विद्याभवन-प्राच्यविद्या-ग्रन्थमाला

१५८

यजुर्वेदिनां परम्परयाऽऽगतम्

विस्तृतसंस्कृतभूमिकया सोमाकरभाष्येण कौण्डिन्न्यायनव्याख्यानेन च सहितम्

लगधमुनिप्रोक्तम्

वेदाङ्गज्योतिषम्

(सङ्क्षिप्तहिन्दीभूमिका-हिन्द्यनुवादादियुतं विविधपरिशिष्टविभूषितं च)

व्याख्यानकारः

शिवराज आचार्यः कौण्डिन्न्यायनः

ब्रह्ममीमांसाचार्यः, साहित्याचार्यः, एम्.ए.(संस्कृते), एम्.ए.(फिलोसफिविषये), विद्यावारिधिः (पीएच्.डी.), वाचस्पतिः (डी.लिट्., वाराणसीस्थ-स.सं.वि.वि., १९९२), (भारतवर्षान्तर्गतहिमवत्खण्डस्थगण्डकीप्रदेशाभिजनः)

व्याख्यानसहायकौ

प्रमोदवर्धनः कौण्डिन्न्यायनः, धर्ममीमांसाचार्यः

सम्मोदवर्धनः कौण्डिन्न्यायनः, एम्.बी.बी.एस्.

सम्पादकाः

आमोदवर्धनः कौण्डिन्न्यायनः, शुक्लयजुर्वेदाचार्यः

सुमोदवर्धनः कौण्डिन्न्यायनः, ब्रह्ममीमांसाचार्यः

वशवँदाम्बा कौण्डिन्न्यायनी, गणितविज्ञा

अतिसम्मोदवर्धनः कौण्डिन्न्यायनः, गणितविज्ञः

(स्वाद्ध्यायशालाकुटुम्बगृहपतिगृह्याः)

चौखम्बा विद्याभवन

वाराणसी

आर्यावर्त पुस्तकालय

सुवाह्यलेखस्वरूप(पीडीएफ) आपकी सुविधा एवं दुर्लभ ग्रंथ को बचाने एवं व्युत्पन्न प्रारुप (डिजिटल) करने के लिए है अतः इसका दुरुपयोग ना करे प्रकाशन से पुस्तकों का क्रय अवश्य करें तभी हम दुर्लभ ग्रंथों को बचा पाएंगे।

आप लोगो के पुस्तक न खरीदने के कारण कितने कितने प्रकाशन बंद हो चुके है और आगे भी होते रहेंगे यदि अभी से सतर्क नही हुए तो। और कितने ही अमूल्य ग्रंथ इसीलिए कारण दुर्लभ हो चुके है आज।

अतः प्रकाशन से पुस्तक खरीदने में प्रमाद न करे। पुस्तक अवश्य खरीदे।



आर्यावर्त पुस्तकालय

विषयानुक्रमणिका

संक्षिप्त हिन्दी भूमिका

लगधप्रोक्त वेदाङ्गज्योतिष, प्रचलित कालगणना तथा पञ्चाङ्ग और प्रस्तुत वेदाङ्गज्योतिषव्याख्यान

१. लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ का महत्त्व ..... (९)
२. लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ की प्रामाणिकता ..... (१०)
३. लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ की माननीयता ..... (१२)
४. लगधप्रोक्त वेदाङ्गज्योतिष में प्रतिपादित मुख्य विषय ..... (१२)
५. लगधप्रोक्त वेदाङ्गज्योतिष में अप्रतिपादित विषय ..... (१२)
६. कालगणना में वर्ष के यथार्थ ज्ञान का महत्त्व ..... (१३)
७. वैदिकवर्ष और उस का माघशुक्लप्रतिपदा में प्रारम्भ ..... (१३)
८. उत्तरायण के प्रारम्भ के साथ वैदिकवर्ष का प्रारम्भ ..... (१५)
९. प्रचलित सूर्यसिद्धान्तग्रन्थ की वेदाङ्गता की परीक्षा ..... (१८)
१०. प्रचलित सूर्यसिद्धान्तग्रन्थ के विषय में भ्रम ..... (१९)
११. श्रौत-स्मार्त-धर्मकृत्यों में चान्द्रसंवत्सर और चान्द्र ऋतु की ग्राह्यता ..... (२०)
१२. अर्वाचीन काल में लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ का अनुशीलन ..... (२१)
१३. स्वाद्ध्यायशाला में लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ का विशिष्ट अध्ययन ..... (२२)
१४. वैदिककालगणनाव्यवस्था के सम्बन्ध में स्वाद्ध्यायशाला के निष्कर्ष ..... (२३)
१५. प्रचलित पञ्चाङ्गों के सिद्धान्त में असामञ्जस्य ..... (२५)
१६. लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ के अनुशीलन की और पञ्चाङ्गों में तदनुकूल विषयों के समावेश की आवश्यकता ..... (२५)
१७. प्रस्तुत कौण्डिन्न्यायनव्याख्यान की विशेषताएं ..... (२६)

वेदाङ्गज्योतिषव्याख्यानभूमिका

आर्यावर्त पुस्तकालय

१. पुरुषार्थेषु धर्मस्य प्राथम्यं पुरुषार्थान्तरमूलत्वं च २९
२. धर्मज्ञानं च प्राधान्येन वेदादेव भवति, वेदस्वरूपादीनां यथार्थज्ञानं च मुख्यतया वेदाङ्गशास्त्रेभ्य एव भवति ३०

३. धर्मरक्षणं वेदरक्षणं च ब्राह्मणैर् मुख्यतया कर्तव्यम्..... ३१
४. वेद-स्वरूपा-ऽर्थ-प्रयोग-रहस्यानां ज्ञानाय तस्य संरक्षणाय प्रचाराय च स्वाद्ध्यायशालाकुटुम्बस्य प्रयत्नः..... ३१
५. षण्णां वेदाङ्गानामध्ययनस्य प्रसङ्गे लगधप्रोक्तवेदाङ्गज्योतिष-ग्रन्थस्याऽध्ययनम्..... ३३
६. लगधमुनिप्रोक्तस्य "पञ्चसंवत्सरमयम्" इत्यादिकस्य ज्योतिषग्रन्थस्य वेदाङ्गत्वम्..... ३३
७. वैदिकानां कृते धर्ममोक्षविषये वेदवेदाङ्गादीनामेव मुख्यतया प्रामाण्यम्..... ३८
८. "पञ्चसंवत्सरमयम्" इत्यादिकस्य वेदाङ्गज्योतिषग्रन्थस्य प्रामाण्ये सन्देहस् तस्याऽपाकरणञ् च..... ४०
९. लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थानुकूलानां कालगणनादिकानां विषयाणां प्राचीनेषु अर्वाचीनेषु च ग्रन्थेषूल्लेखाः..... ४४
१०. लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थरचनाकालविचारः..... ४५
११. लगधमुनि-देश-विचारः..... ४६
१२. लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थे प्रतिपादिताः प्रमुखा विषयाः..... ४६
(क) पञ्चसंवत्सरं युगम्..... ४६
(ख) संवत्सरः (वर्षम्)..... ४७
(ग) अयनम्..... ४८
(घ) ऋतवः..... ५०
(ङ) मासाः..... ५२
(च) पक्षाः..... ५६
(छ) तिथयः..... ५९
(ज) पर्वाणि..... ७०
(झ) विषुवत्तिथिः..... ७२
(ञ) नक्षत्राणि..... ७२
(ट) अधिमासः..... ७५
१३. वेदाङ्गज्योतिषग्रन्थेऽनुल्लिखिता विषयाः..... ७६
(क) वेदाङ्गज्योतिषग्रन्थे मेष-वृषादिराशीनामुल्लेखस्याऽभावः..... ७६
(ख) आदित्यवारादीनां वाराणामुल्लेखस्यापि वेदाङ्गज्योतिषग्रन्थेऽभावः..... ७७

(ग) वेदाङ्गज्योतिषग्रन्थे ग्रहणस्याऽप्युल्लेखस्याऽभावः ७८
(घ) वेदाङ्गज्योतिषग्रन्थे शुक्र-बृहस्पत्योरुदयास्तमययोश् चोल्लेखस्याऽभावः ७८
१४. वेदाङ्गज्योतिषग्रन्थोक्तस्य पञ्चसंवत्सरकस्य युगस्य विचारः..... ७९
१५. पञ्चसंवत्सरमयस्य युगस्य षष्टिसंवत्सरात्मकयुगादिभिः सम्बन्धः ८७
१६. वेदाङ्गज्योतिषग्रन्थोक्तो नववर्षारम्भः..... ९१
१७. दिव्यकालमानेन सह सामञ्जस्याय उदगयनारम्भे वर्षारम्भः स्वीकरणीयः..... ९१
१८. अयननिरूपणम् १०४
१९. वसन्तर्तौ नववर्षारम्भ इति मतस्य समीक्षणम्..... १०७
२०. शिशिरर्तौ नववर्षारम्भस्य युक्ततमत्वम् ११५
२१. प्रचलित-नववर्षारम्भसिद्धान्तस्याऽवैदिकत्वमनौचित्यं च ११५
२२. राष्ट्रियपञ्चाङ्गे स्वीकृतस्य नववर्षारम्भसिद्धान्तस्य मासव्यवस्थायाश् चाऽवैदिकत्वमनुचितत्वं च १२५
२३. तपस्-तपस्यादीनां वैदिकमासानां चान्द्रमासत्वम्..... १२७
२४. वेदाङ्गज्योतिषग्रन्थोक्ताऽयनव्यवस्था १३३
२५. वेदाङ्गज्योतिषोक्तायाः अयनव्यवस्थायाः दिव्याहोरात्रादिगणनानुकूलत्वम् १४८
२६. श्रौतस्मार्तधर्मकर्मसु चान्द्रर्तूनामेव ग्राह्यत्वाद् वेदाङ्गज्योतिषग्रन्थस्य चान्द्रर्तुप्रतिपादने तात्पर्यम्..... १४८
२७. वेदाङ्गज्योतिषग्रन्थे चान्द्रमासानामेव तात्पर्यविषयत्वम्..... १५३
२८. वेदाङ्गज्योतिषग्रन्थे अमान्तचान्द्रमासस्यैव तात्पर्यविषयत्वम्..... १५५
२९. वेदाङ्गज्योतिषग्रन्थोक्ताऽधिमासविचारः १५६
३०. वेदाङ्गज्योतिषग्रन्थे क्षयमासविचारस्याऽभावः..... १५६
३१. वेदाङ्गज्योतिषोक्ततिथीनां सामान्यतया सावनदिनाऽभिन्नत्वम् १५७
३२. आर्यभटीयग्रन्थस्य वेदाङ्गज्योतिषप्रतिकूलत्वम् १५९
३३. पञ्चसिद्धान्तिकोक्तानां पौलिशसिद्धान्तादीनां चतुर्णां सिद्धान्तानां वेदाङ्गज्योतिषप्रतिकूलत्वम्..... १६०
३४. वराहमिहिरकृताया बृहत्संहिताया वेदाङ्गज्योतिषप्रतिकूलत्वम्..... १६१
३५. ब्रह्मगुप्तकृतस्य ब्राह्मस्फुटसिद्धान्तग्रन्थस्य वेदाङ्गज्योतिषप्रतिकूलत्वम्..... १६२

३६. आधुनिक-प्रचलित-सूर्यसिद्धान्तग्रन्थस्य श्रौत-स्मार्त-धर्मकर्मकालनिर्णयेऽनादेयत्वम्.....१६४
३७. आर्यभटीय-ब्राह्मस्फुटसिद्धान्तादीनां पितामहोक्त-वेदाङ्ग-ज्योतिषशास्त्रानुकूलग्रन्थत्वस्याऽभावः..... २०२
३८. श्रौतस्मार्तधर्मकर्मार्थनाक्षत्रनामकरणेऽवकहडचक्रस्याऽननुसरणीयत्वम् वेदाङ्गज्योतिषस्यैवाऽनुसरणीयत्वम्..... २०३
३९. अस्माभिरदृष्टानि दृष्टानि च वेदाङ्गज्योतिषसंस्करणानि..... २१७
४०. अस्माभिर् दृष्टानि वेदाङ्गज्योतिषग्रन्थस्य हस्तलिखितानि पुस्तकानि..... २२१
४१. वेदाङ्गज्योतिषपाठविमर्शः..... २२१
४२. सोमाकरस्य सोमाकरभाष्यस्य च परिचयः..... २२३
४३. अर्वाचीने काले वेदाङ्गज्योतिषग्रन्थाध्ययने प्रगतिः..... २२७
४४. अस्माकं व्याख्यानस्य वैशिष्ट्यम्..... २३१
४५. श्रौतस्मार्तधर्मकृत्यायाऽवलम्बनीया वैदिककालगणनाव्यवस्था..... २३४
४६. उपसंहारः..... २३७

अस्मद्व्याख्यात-परिष्कृत-वेदाङ्गज्योतिष-मूलपाठः..... २३९

सभाष्यं सव्याख्यानं च लगधमुनिप्रोक्तवेदाङ्गज्योतिषम्

विषयः	श्लो.	पृ.
१. **प्रणामः प्रतिज्ञा च**	१-२	२४३
२. **ज्योतिषज्ञानस्यावश्यकता**	३	२४५
३. **ज्योतिषप्रशंसा**	४	२४७
४. **वेदाङ्गज्योतिषप्रतिपाद्यविषयः**	५	२४८
५. **आदियुगनिरूपणम्**	६	२५३
६. **उदगयन-दक्षिणायनकालनिर्देशः**	७	२६४
७. **दिनवृद्धि-क्षपाह्रासादिप्रतिपादनम्**	८	२६८
८. **सौरायनारम्भस्थायिनस् तिथयः**	९	२७०
९. **सौरायनारम्भस्थायीनि चान्द्रनक्षत्राणि**	१०	२७१

१०. सौरत्वारम्भतिथयः, पञ्चपर्वाणौ ऋतू च ११ २७५
११. पक्षह्रासवृद्धिव्यवस्था, पादपरिभाषादिकं च १२ २७९
(पर्वसावनदिनांशनक्षत्रांशसारणी) २९२
१२. पर्वराशिज्ञानोपायः १३ ३१०
१३. मतभेदेन पर्वसम्मिताः कालाः १४ ३११
१४. पर्वान्तेषु सूर्यचन्द्राभ्यां चन्द्रेण वा भुक्तानां भांशानां ज्ञानस्योपायः १५ ३१५
(पर्वभांशसारणी) ३१९
१५. पर्वभांशानां स्थितावन्यो विशेषः १६ ३३०
१६. भांशमूलकपर्वनक्षत्रज्ञानोपायादिकम् १७ ३३१
१७. जावादिनक्षत्रव्यवस्था १८ ३३५
१८. पर्वभादानकलाज्ञानोपायः १९ ३३८
१९. तिथिनक्षत्रादेशव्यवस्था २० ३४५
२०. तिथिभादानिकाः कलाः २१ ३४८
२१. तिथिसमाप्तिकालः २२ ३५०
२२. विषुवान् तिथिः २३ ३५२
२३. नाडिकाप्रमाणम् २४ ३५४
२४. इष्टतिथौ सूर्यनक्षत्रस्य ज्ञानस्योपायः २५ ३६०
२५. सूर्यस्य नक्षत्रविशेषे प्रवेशस्य कालस्य ज्ञाने उपायः २६ ३६२
२६. रविदिवसभोग्यनक्षत्रांशमानादिकम् २७ ३६५
२७. युगस्याऽवयवानामहरादीनां सङ्ख्या २८ ३६९
२८. वासवादीनाम् (श्रविष्ठादीनाम्) उदयाः २९ ३७२
२९. युगे सूर्यनक्षत्राणां चन्द्रायनानां पर्वणां च सङ्ख्या, काष्ठाकलाश्च ३० ३७४
३०. युगगत-सावनेन्दुस्तृमास-सङ्ख्या सावनादिमासदिनसङ्ख्या च ३१ ३७५
३१. नक्षत्रदेवताः ३२-३४ ३७७
३२. यज्ञकर्मार्थं नक्षत्रदेवताभिर् यजमानस्य नक्षत्रजनाम्नः करणम् ३५ ३९२
३३. नक्षत्रविशेषाणामुग्रक्रूरसञ्ज्ञे ३६ ३९३
३४. अधिकमासोपजन्मकारणम् ३७ ३९६

३५. **नाडिका-मुहूर्तपरिभाषे दिनगता मुहूर्तसङ्ख्या कलासङ्ख्या च**..... ३८ ४१३

३६. **सोमस्य सूर्यस्य च भयोगस्य कालः, काष्ठापरिभाषा च**..... ३९ ४१५

३७. **दिनमानज्ञानोपायः**..... ४० ४१७

३८. **ऋतुशेषज्ञानोपायः**..... ४१ ४१९

३९. **अस्य वेदाङ्गज्योतिषग्रन्थस्य कालज्ञानोपायसमुद्देशपरत्वम् अन्यकल्पनाधारत्वं च**..... ४२ ४२२

४०. **वेदाङ्गज्योतिषस्य प्रतिपाद्यानां विषयाणां प्रवक्तुश् च निर्देशेन ग्रन्थोपसंहारः**..... ४३ ४२३

४१. **एतद्ग्रन्थार्थज्ञानफलम्**..... ४४ ४२४

(व्याख्यानोपसंहारः)..... ४२८

परिशिष्टम्

परिशिष्टम् (१) वेदाङ्गज्योतिषग्रन्थश्लोकानुक्रमणिका ..... (४४२)

परिशिष्टम् (२) व्याख्यातपरिष्कृतवेदाङ्गज्योतिषग्रन्थशब्दानुक्रमणिका ..... (४४३)

परिशिष्टम् (३-१) वेदाङ्गज्योतिषस्य यजुर्वेदिनां पाठस्य ऋग्वेदिनां पाठस्य च तुलना..... (४५१)

परिशिष्टम् (३-२) वेदाङ्गज्योतिषस्य ऋग्वेदिनां पाठस्य यजुर्वेदिनां पाठस्य च तुलना ..... (४५९)

परिशिष्टम् (४-१) हस्तलिखितस्य यजुर्वेदिनां वेदाङ्गज्योतिषग्रन्थस्य छायाप्रतिलिपिः..... (४६७)

परिशिष्टम् (४-२) हस्तलिखितस्य यजुर्वेदिनां वेदाङ्गज्योतिषग्रन्थस्य छायाप्रतिलिपिः..... (४७०)

परिशिष्टम् (५) रत्नकरण्डिकाया हस्तलेखस्य सम्बद्धस्य पृष्ठस्य छायाप्रतिलिपिः ..... (४७३)

परिशिष्टम् (६) निदर्शनरूपा वेदाङ्गज्योतिषानुसारिणी वैदिकसंवत्सरपञ्जी ..... (४७४)

परिशिष्टम् (७) व्याख्यानकारेणाऽवलोकिताः प्रमुखा ग्रन्थाः..... (५३७)

संक्षिप्त हिन्दी भूमिका

लगधप्रोक्त वेदाङ्गज्योतिष, प्रचलित कालगणना तथा पञ्चाङ्ग और प्रस्तुत वेदाङ्गज्योतिषव्याख्यान

१. लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ का महत्त्व

भारतवर्ष के गौरवास्पद विषयों में वेद-वेदाङ्ग-वाङ्मय का प्रमुख स्थान है। वेदों का महत्त्व थोडा बहूत सभी भारतवर्षनिवासी जानते हैं। वेदाङ्ग वाङ्मय में व्याकरणादि अन्य विषयों का भी कुछ प्रचार है। व्याकरणकार पाणिनि प्रसिद्ध ही हैं। किन्तु वेदाङ्ग ज्योतिषविद्या में और कालगणनापद्धति में अतीव महत्त्वपूर्ण स्थान रखने वाले आचार्य लगध को और उन के **"पञ्चसंवत्सरमयम्"** इत्यादि वेदाङ्गज्योतिषग्रन्थ को बहूत कम लोग जानते हैं। किन्तु वैदिकधर्मकृत्यों के कालों के निरूपण में यह ग्रन्थ अत्यन्त प्रामाणिक और अनुल्लङ्घनीय माना गया है। अयनचलन[1] के विचार के लिए अत्यन्त उपयोगी करीब ३४०० वर्ष प्राचीन आलेख, जो भूमण्डल के अन्य देशों के ज्योतिषवाङ्मय में सर्वथा अनुपलब्ध है, इस ग्रन्थ में उपलब्ध होने से कालगणनापद्धति के विषय में इस ग्रन्थ का लौकिक महत्त्व भी विलक्षण और अद्वितीय है। तथापि यह ग्रन्थ आजकल चर्चा में नहीं आता है। सामान्य शिक्षित लोग ही नहीं बडेबडे ज्योतिषी और धर्मशास्त्री पण्डित भी इस ग्रन्थ के विषय में प्रायः यथार्थ ज्ञान से रहित पाये जाते हैं। अतः भारतवर्ष के गौरवास्पद इस ग्रन्थ की और मूल वैदिक धार्मिक कालगणनापद्धति की सङ्क्षिप्त चर्चा हिन्दी भाषा में भी प्रस्तुत की जा रही है। आर्यावर्त पुस्तकालय

भारतवर्ष के इतिहास में विभिन्न समयों में वैदिक धर्म की पालना में नानाविध बाधाएँ उपस्थित दिखाई देतीं हैं। ऐसी ही बाधाव्यवधानों से लगधप्रोक्त वेदाङ्गज्योतिष की कालगणनापद्धति की परम्परा भी टूटी हुई मालूम पडती है। इस विषय में **'भारतवर्ष का नवीन इतिहास'** नाम के ग्रन्थ में (१९५५ क्रै.) डा. ईश्वरीप्रसाद ने लिखा है "(ईसा के पूर्व द्वितीय शताब्दी के आसपास) ज्योतिषविद्या की अनेक बातें भारतीयों ने युरोप के लोगों से सिखीं। वे रोम और यूनान को ज्योतिषविद्या का घर समझते थे। ज्योतिष के अनेक यूनानी ग्रन्थों का अनुवाद

---

१. सूर्य इस वर्ष जिस नक्षत्र के जिस अंश में अथवा बिन्दु में पहुँच कर उत्तरायण में जाता है अगले वर्ष उस नक्षत्र के उस अंश में अथवा उस बिन्दु में पहुँचने से कुछ पहले ही (लगभग २० मिनट २५ सेकेण्ड पहले ही) उत्तरायण में जाता है, ऐसा प्रतिवर्ष होता ही रहता है, अर्थात् अयन शुरु होने का वह बिन्दु प्रतिवर्ष कुछ इधर सरकता रहता है। इसीको अयन-चलन कहते हैं।

संस्कृत में किया गया। भारतीय पञ्चाङ्गों का भी यूनानियों की सलाह से संशोधन हुआ" (पृ.६६)। कुन्दनलाल शर्मा ने होशियारपुर से प्रकाशित **'वैदिक वाङ्मय का बृहद् इतिहास'** नाम के ग्रन्थ के षष्ठ खण्ड में (१९८३ क्रै.) लिखा है "यद्यपि हिन्दू ज्योतिषियों ने वेदाङ्गज्योतिष के सिद्धान्त का परित्याग प्रथम इसवी शती के आरम्भ में करके यूनानी (रोमक) सिद्धान्त को स्वीकार करके अपनी गणनापद्धति में परिवर्तन तथा संशोधन कर लिया था, तो भी जैन ज्योतिर्विदों ने अपनी प्राचीन परम्परा को स्थिर रखा है" (पृ.१४४)। उक्त स्थिति के बाबजूद वैदिक ब्राह्मणों में वर्तमान वेदवेदाङ्गग्रन्थों के विशेष प्रकार के नित्य ब्रह्मयज्ञ की[1] (स्वाध्यायाध्ययन की) परम्परा के बल से ३४०० वर्ष पुराना छोटा सा वेदाङ्गज्योतिषग्रन्थ विविध बाधाओं को पार करता हुआ आजतक अपना अस्तित्व बराबर बनाए हुए है। अब भी वैदिक ब्राह्मण ब्रह्मयज्ञ में (नित्यस्वाध्यायाध्ययन में) लगधप्रोक्त वेदाङ्ग-ज्योतिषग्रन्थ पढा करते हैं[2]।

२. लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ की प्रामाणिकता

इस लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ के अथवा इस के प्रतिपाद्य प्रमेय के तत्तत्काल में अस्तित्व और प्रभाव के प्रमाण मैत्रायणीयब्राह्मणोपनिषद् में (६।१४), बौधायनश्रौतसूत्र में (२६।२९), महाभारत में (चित्रशालासंस्करण १।१२४।२२, २।११।३८, ४।५२।१-४, १२।१३१।१३, १४।४४।२), ब्रह्मवैवर्तपुराण के गणपतिखण्ड में (३।८) और कृष्णजन्मखण्ड में (९६।५७-५८), ब्रह्माण्डपुराण में (१।२४।१४०), भविष्यपुराण में (१।१२५।३३-३६), वायुपुराण में (१।३१।२७, १।५०।१८२-१८३, १।५२।६८, १।५३।११२-११६), विष्णुपुराण में (२।८।६६), भागवत में (३।११।१४,१५; ५।२२।७), मत्स्यपुराण में (१४१।१६-१८), लिङ्गपुराण में (१।६१।५२-५६), स्कन्दपुराण में (१।२।३९।५१-५२, ५।३।१६।१३), देवीभागवत में (८।१६।१५,१६), विष्णुधर्मोत्तरपुराण में (१।८२।५२-५५, २।१७५।१२-१३, ३।९६।११-१२, ३।१२०।२, ३।१५३।१-, ३।३१७।२-३), शिवपुराण-कैलास-संहिता में (१२।८८-९२), कौटलीय अर्थशास्त्र में (२।२०), पतञ्जलिमुनिकृत पाणिनीयव्याकरणभाष्य में (२।१।२९, वा.२; २।२।३४, वा.३), चरकसंहिता में (१।६।४), सुश्रुतसंहिता में (१।६।५,६,७,९), अष्टाङ्गहृदय में (१।३।१-२, उत्तरस्थान १।२२,२३), बृहत्-संहिता के आदित्यचाराध्याय के प्रथम श्लोक में, पञ्चसिद्धान्तिका के पैतामह-

---

१. ब्रह्मयज्ञ का स्वरूप, महत्त्व इत्यादि विषय में चौखम्बाविद्याभवन से प्रकाशित हमारी ब्रह्मयज्ञपद्धति की भूमिका देखें।

२. द्रष्टव्य- भारतीय ज्योतिष, शङ्कर बालकृष्ण दीक्षित, अनु. शिवनाथ झारखण्डी, हिन्दी समिति लखनऊ, १९७५; पृ.९३; याजुषज्यौतिषम् आर्चज्यौतिषं च, सुधाकर द्विवेदी, वाराणसी, संवत् १९६४, ज्यौतिष-भूमिका पृ.१; ज्योतिर्विज्ञानम, अर्कसोमयाजी धूलिपाल, वाराणसेय संस्कृतविश्वविद्यालय, १९६४, पृ.५।

सिद्धान्त में, ब्रह्मगुप्तकृत ब्राह्मस्फुटसिद्धान्त में (११।२), भट्टोत्पलकृत बृहत्संहिता-टीका में (बृहस्पतिचाराध्याय, श्लो.५२), जीमूतवाहनकृत कालविवेक में (पृ.३), उव्वट-कृत शुक्लयजुर्वेदसंहिताव्याख्या में (२७।४५), महीधरकृत शुक्लयजुर्वेदसंहिता-व्याख्या में (२७।४५), काशिकापदमञ्जरी में (५।१।९१), सूर्यदेवकृत आर्यभटीय-व्याख्याप्रकाशिका के उपोद्घातप्रकरण में, कालमाधव के प्रथम प्रकरण में (चौखम्बा, २०४५, पृ.२४), सायणकृत ऋग्वेदव्याख्याभूमिका में, विष्णुपुराण की कलिवर्ष ४४०० में रचित विष्णुचित्ती टीका में (२।८।७१-७२) पुरुषार्थचिन्तामणि के कालखण्ड में (पृ.४०९), मुहूर्तचिन्तामणि की स्वोपज्ञव्याख्या प्रमिताक्षरा के और पीयूषधारा के प्रारम्भ में (१।२), पीयूषधारा के सङ्क्रान्तिप्रकरण में (श्लो.९), मित्रमिश्र के वीरमित्रोदय के परिभाषाप्रकाश में (पृ.२०), याज्ञवल्क्यस्मृतिमिताक्षरा-बालम्भट्टी में (१।१२), गोपीनाथकृत संस्काररत्नमाला में (पृ.८५८), ऋषिभट्टकृत संस्कारभास्कर में (पृ.१२३-१२४) तथा धर्मसिन्धु में और अण्णाशास्त्रिकृत कर्मकाण्ड-प्रदीप में भी नामकरणप्रकरण में और सर्वानन्दकरण में पाए जाते हैं। सोमाकर की व्याख्या भी इस ग्रन्थ की प्रमाणता और अनुसरणीयता की प्रदर्शिका ही है। सोमा-कर की व्याख्या प्राचीन और महत्त्वपूर्ण ही है। इस का उल्लेख पुरुषार्थचिन्तामणि के कालखण्ड में भी है (पृ.४०९)। सुधाकर द्विवेदी ने और शामशास्त्री ने भी आधुनिक काल में ही इस वेदाङ्गज्योतिषग्रन्थ की संस्कृत में व्याख्या की है।

उक्त विवरण से आचार्य लगधप्रोक्त "पञ्चसंवत्सरमयम्" इत्यादि वेदाङ्ग-ज्योतिषग्रन्थ की प्रमाणता और अनुसरणीयता उस ग्रन्थ के आद्य प्रवचन काल से आजतक सैद्धान्तिक रूप में स्वीकृत होने की बात भी स्पष्ट हो जाती है। स्वाध्यायाध्ययनविधि के आधार पर पढे जाने वाला ग्रन्थ होने से वैदिक धर्म में इस वेदाङ्गज्योतिषग्रन्थ की प्रमाणता स्वतः सिद्ध है। इस विषय को स्पष्ट करते हुए लौगाक्षिस्मृतिकार ने **'पञ्चसंवत्सरमयम्'** इत्यादि वेदाङ्गज्योतिषग्रन्थ को सर्वथा अलङ्घनीय बताया है[1]। वेदाङ्गज्योतिष विषय के मूलागम के रूप में वर्तमान यह ग्रन्थ सर्वथा अत्याज्य होने की बात जगन्मोहन ग्रन्थ में उल्लिखित भारद्वाजवचन से भी जानी जा सकती है (शास्त्रावताराध्याय, पृ.४)।

नामकरणसंस्कार में नक्षत्रनाम के निर्णय के विषय में वर्तमान काल में प्रचलित **'[illegible]कहडचक्र'** प्राचीन वैदिक ग्रन्थों में सर्वथा अनुपलब्ध है। वेदाङ्ग-ज्योतिष का नक्षत्रनामकरणविधान इस चक्र के विधान से बिलकूल भिन्न है। वह वैदिक नक्षत्रदेवताओं से सम्बद्ध है। वेदाङ्गज्योतिष के नक्षत्रनामकरणविधान का

---

१. स्मृतिसन्दर्भ, षष्ठभाग, मनसुखराय मोर, कलकत्ता, २०१३, पृ.२७५-२७६।

प्रभाव चरकसंहिता में दिखाइ देता है (शारीरस्थान ८।७९)। इस का स्पष्टीकरण चक्रपाणि ने और गङ्गाधर ने वेदाङ्गज्योतिषानुकूल रूप में किया है। सुश्रुतसंहिता में भी ऐसी बात है (शारीर.१०।२४)। इस का स्पष्टीकरण डल्हण ने भी लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थप्रतिपादित व्यवस्थानुसार ही किया है। अष्टाङ्गसङ्ग्रह के उत्तर-स्थान के प्रथम अध्याय में (श्लो.७८) भी वेदाङ्गज्योतिष की ही अनुकूल बात पाई जाती है। विक्रमसंवत् १७५६ में रचित संस्कारभास्कर ग्रन्थ में भी कात्यायन-सूत्रानुसारी लोगों में वेदाङ्गज्योतिष के अनुकूल नक्षत्रनाम रखने की परम्परा जीवित रहने की बात पाई जाती है (मुम्बई, १९६९, पृ.१२३-१२४)।

३. लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ की माननीयता

इस स्थिति में "पञ्चसंवत्सरमयम्" इत्यादि वेदाङ्गज्योतिषग्रन्थ को अपने विषय में प्रामाणिक न मानना चार्वाक जैन बौद्धों की तरह वैदिक मूल परम्परा के प्रति विद्रोह करना अथवा पाखण्डता अपनाना ही होता है। अतः इस ग्रन्थ को ही भारतवर्षीय मूल वैदिक परम्परा का प्रधान ज्योतिषग्रन्थ और श्रौतस्मार्तकृत्य-कालगणना में प्रमाण भी मानना ही चाहिए।

४. लगधप्रोक्त वेदाङ्गज्योतिष में प्रतिपादित मुख्य विषय

लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ में पाँच वर्षों का युग, माघशुक्लादि वर्ष, अयन, ऋतु, मास, पक्ष, तिथि, पर्व, विषुवत्तिथि[1], नक्षत्र, अधिमास ये विषय प्रतिपादित हैं। श्रौतस्मार्तधर्मकृत्यों में इन की ही अपेक्षा होने से इस वेदाङ्ग ज्योतिषग्रन्थ में इन विषयों का ही मुख्यतया प्रतिपादन किया गया है।

५. लगधप्रोक्त वेदाङ्गज्योतिष में अप्रतिपादित विषय

बार्हस्पत्य संवत्सरका[2], क्षयमासका, मेष वृष इत्यादि राशियों का, सौर सङ्क्रान्तियों का, आदित्यवार सोमवार इत्यादि वारों का, सूर्य-चन्द्रग्रहणों का, मङ्गल-बुधादि ग्रहों का, बृहस्पति के और शुक्र के उदय और अस्त का भी वेद-

---

१. विषुवद्-दिन कहने से जिस दिन में दिन और रात बराबर होते हैं वह दिन समझा जाता है। ऐसे दिन एकवर्ष में दो होते हैं, ये वासन्तविषुवत् अथवा मेषविषुवत् और शारदविषुवत् अथवा तुलाविषुवत् कहे जाते हैं। ये दिन क्रमशः मार्च २१ तारीख में (आजकल प्रायः निरयण सौर मीनमास के सातवें दिन में) और सेप्टेम्बर २२ तारीख में (आजकल प्रायः निरयण सौर कन्यामास के सातवें दिन में) पडते हैं। ऐसे दिन की तिथि को विषुवत्तिथि कहते हैं।

२. बृहस्पति ग्रह के विभिन्न राशियों में परिभ्रमण के आधार में गिने जाने वाले प्रभव विभव इत्यादि साठ संवत्सरों को बार्हस्पत्य संवत्सर कहते हैं।

मन्त्रों में ब्राह्मणग्रन्थों में श्रौतसूत्रों में गृह्यसूत्रों में और धर्मसूत्रों में भी अपेक्षा न होने से लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ में भी इन विषयों का प्रतिपादन नहीं किया गया है।

६. कालगणना में वर्ष के यथार्थ ज्ञान का महत्त्व

वैदिकपरम्परा में संवत्सर का बहुत महत्त्व है। शतपथब्राह्मण में अनेक स्थलों में संवत्सर को प्रजापति बताया गया है[1]। शतपथब्राह्मण में संवत्सर को प्रजापति की प्रतिमा भी कहा गया है (११।१।६।१४)। वैदिक चयनयाग संवत्सर के ही अनुकरण में आधृत दिखाई देता है। अहोरात्र, पक्ष, मास, ऋतु सभी संवत्सर में ही आधृत माने गए हैं (१२।८।३।१४)। वेद की इसी मान्यता को ध्यान में रखकर ही ज्योतिषी गर्गाचार्य ने भी संवत्सर का स्वरूप निश्चित होने पर ही अयन, ऋतु, मास, पक्ष, नक्षत्र, तिथि और दिन निश्चित हो सकने की और अयनादि कालों में विहित धर्मकृत्य भी ठीकठीक समय में हो सकने की बात बताई है। उन का वचन है—

अयनान्यृतवो मासाः पक्षास्त्वृक्षं तिथिर् दिनम्।
तत्त्वतो नाऽधिगम्यन्ते यदाऽब्दो नाऽधिगम्यते॥
यदा तु तत्त्वतोऽब्दस्य क्रियतेऽधिगमो बुधैः।
तदैवैषाममोहः स्यात् क्रियाणां चाऽपि सर्वशः॥

—गर्गवचन, सोमाकरव्याख्या, याजुषवेदाङ्गज्योतिष, श्लो.१०।

इस स्थिति में वैदिक मूल परम्परा के संवत्सर के वास्तविक स्वरूप का विवेचनात्मक ज्ञान प्राप्त करना अत्यन्त आवश्यक है।

७. वैदिकवर्ष और उस का माघशुक्लप्रतिपदा में प्रारम्भ

इस वेदाङ्गज्योतिषग्रन्थ में **"माघशुक्लप्रपन्नस्य"** (श्लो.५) इत्यादि कहकर संवत्सर का माघशुक्लप्रतिपदा में प्रारम्भ और पौषकृष्ण अमावास्या में समाप्ति प्रतिपादित है। वैदिक वर्ष मुसलवानों का वर्ष जैसा शुद्ध चान्द्र वर्ष भी नहीं है, इसाइयों का वर्ष जैसा शुद्ध सौर वर्ष भी नहीं है, वैदिक वर्ष सौर अयन-मान से नियन्त्रित चान्द्र अधिमास से युक्त होने से यह सौरचान्द्र वर्ष है। व्याख्याकार सोमाकर स्पष्ट करते हैं कि वेदों में वसन्तादि ऋतुओं का उल्लेख ब्राह्मण क्षत्रिय इत्यादि वर्णविशेष के यज्ञाद्यनुष्ठानकाल के क्रम को लेकर किया गया है, संवत्सर-प्रारम्भनिमित्तक नहीं (श्लो.६)। उक्त माघशुक्लप्रतिपदा का ठीकठीक निर्णय **"घर्म-**

---

१. १।५।१।१६, १।६।३।३५, २।३।३।१८, ६।१।३।८, १०।२।६।१, १४।३।३।२२ इत्यादि।

वृद्धिरपां प्रस्थः" (श्लो.८) **"उपजायेते मध्ये चाऽन्तेऽधिमासकौ"** (श्लो.३७) इत्यादि वचन के और नेपाल के प्राचीन शिलालेख और ग्रन्थों की भी सहायता से होता है। यह शुक्लप्रतिपदा वास्तविक सौर उदगयनारम्भ (सायन-मकरसङ्क्रान्ति[1]) की प्रायः पूर्ववर्ती और अधिमासयुक्त वर्ष में कभी कभी उत्तरवर्ती भी हो सकने वाली, सायन-मकरसङ्क्रान्ति की आसन्न शुक्लप्रतिपदा है।

बारहवीं शताब्दी के कृत्यकल्पतरुकार लक्ष्मीधर, चौदहवीं शताब्दी के चतुर्वर्गचिन्तामणिकार हेमाद्रि और सत्रहवीं शताब्दी के निर्णयसिन्धुकार कमलाकर भट्ट इत्यादि से ब्रह्मपुराण के वचन के रूप में उल्लिखित **"चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि"** इत्यादि वचन खेमराज श्रीकृष्णदास से मुद्रित एवं प्रचारित उपलभ्यमान ब्रह्मपुराण में नहीं मिलता है। अतः उन लोगों का प्रतिपादन अप्रामाणिक ठहरता है। ब्रह्माण्डपुराण (पूर्वभाग २४।१४१, १४२), लिङ्गपुराण (१।६१।५२-५४) और वायुपुराण (१।५३।११३, ११४) में भी वर्तमान **"वर्षाणामपि पञ्चानामाद्यः संवत्सरः स्मृतः। ऋतूनां शिशिरश्चाऽपि मासानां माघ एव च। पक्षाणां शुक्लपक्षश्च तिथीनाम् प्रतिपत् तथा। अहोरात्रविभागानामहश्चाऽपि प्रकीर्तितम्"** इस वेद-वेदाङ्ग-महाभारताद्यनुकूल प्रामाणिक पुराणवचन का प्रतिकूल अथवा विरुद्ध होने से भी **"चैत्रे मासि"** इत्यादि वचन निर्मूल वा प्रक्षिप्त वा अप्रमाण ठहरता है। सुश्रुतसंहिता का निस्सन्दिग्ध प्राचीन **"तत्र माघादयो द्वादश मासाः संवत्सरः"** (१।१।६) यह वचन और महाभारत का **"ऋतवः शिशिरादयः"** (आश्वमेधिकपर्व ४४।२) यह वचन भी **"चैत्रे मासि"** इत्यादि वचन को अप्रमाण सिद्ध करते ही हैं।

चैत्रशुक्लादि संवत्सर मानने की बात यावनादि ज्योतिष से प्रभावित होकर ग्रन्थप्रणयन करने वाले और **"युग-वर्ष-मास-दिवसाः समं प्रवृत्तास् तु चैत्रशुक्लादेः"** इत्यादि[2] कहने वाले अर्वाचीन ज्योतिषियों की ही है, मूल वैदिक परम्परा की नहीं। यह बात नवम शताब्दी के कवि राजशेखर की काव्यमीमांसा के **"षण्णा-**

---

१. आजकल के पञ्चाङ्गों में अयनचलन में ध्यान नदेकर सूर्य उत्तराषाढा नक्षत्र के तीसरे पाद में (मकर राशि में) जाने पर मकरसङ्क्रान्ति और उत्तरायणारम्भ लिखते हैं। किन्तु अयनबिन्दु के चलन से आजकल अयनबिन्दु मूल के तीसरे पाद में आगया है, और मूल के तीसरे पाद में सूर्य पहुँचने पर ही वास्तविक रूप में सूर्य के उदगयन का प्रारम्भ होता है, और उसी समय में सायन-मकरसङ्क्रान्ति मानी जाती है। यह सङ्क्रान्ति डिसेम्बर २२ या २१ तारीख में पडती है। अतः आजकल निरयण मकरसङ्क्रान्ति से करीब २३ दिन पहले ही सायन मकरसङ्क्रान्ति होती है। अन्य सङ्क्रान्तियों में भी निरयण सङ्क्रान्तियों में और सायन सङ्क्रान्तियों में ऐसा ही फर्क पडता है।

२. आर्यभटीय, कालक्रियापाद, श्लो.११, ब्राह्मस्फुटसिद्धान्त १।४।

मृतूनां परिवर्तः संवत्सरः, स च चैत्रादिरिति दैवज्ञाः" (अध्याय १८) इस कथन से भी व्यक्त होती है। यहाँ कवि राजशेखर का **"दैवज्ञाः"** यह साभिप्राय शब्द अवैदिक फलादेशपरायण ज्योतिषियों की ओर सङ्केत कर रहा है।

८. उत्तरायण के प्रारम्भ के साथ वैदिकवर्ष का प्रारम्भ

जैसे चान्द्र मास दो पक्षों का माना जाता है वैसे ही वर्ष भी दो अयनों का माना जाता है। यह बात वेदाङ्गज्योतिष में **"अब्दः षट् चर्तवोऽयने"** (श्लो.२८) कहकर बताई गई है। यही बात कौटलीय अर्थशास्त्र में **"द्व्ययनः संवत्सरः"** (२।२०) कहकर और सुश्रुतसंहिता में **"अयने द्वे युगपत् संवत्सरः"** (१।६।९) कह कर बताई गई है। पुराणों में और अन्य ग्रन्थों में भी यही बात प्रतिपादित है। **"वर्षं द्वेऽयने दक्षिणोत्तरे"** (कूर्मपु. १।५।६, मार्कण्डेयपु.४३।२५, विष्णुपु.१।३।१०), **"तद्द्वयेन भवेदब्दः"** (नारदीयपु.१।५।२५), **"वर्षमयने दक्षिणोत्तरे"** (पद्मपु.सृष्टि.३।६), **"अब्दस्तु चाऽयने द्वे वै"** (ब्रह्मवैवर्तपु.कृष्णजन्म. ९६।६२), **"दिव्ये रात्र्यहनी वर्षम्"** (ब्रह्माण्डपु.पूर्वभाग २९।१३, मत्स्य.१४२।१०, वायुपु. १।५७।१३), **"द्वेऽयने वर्षमुच्यते"** (वायुपु.१।५०।१७७), **"द्वेऽयने वर्षसंज्ञिते"** (विष्णुपु. २।८।७०), **"वर्षं द्वे चाऽयने मतम्"** (शिवपु.७।१।८।७), **"वत्सरो भवेत्। अयनद्वितयाकारः"** (स्कन्दपु.वैष्णव.१।३६।३१), **"अब्दं द्वे अयने स्मृतम्"** (स्कन्दपु.आवन्त्य.१।४८।११), **"अयने द्वे तु वत्सरम्"** (स्कन्दपु.नागर.१९४।१४, २७२।७), **"वर्षं स्यादयनद्वये"** (स्कन्दपु.प्रभास.१।१९।१२), **"अब्दं स्यादयनद्वयात्"** (स्कन्दपु.प्रभास. १।१०५।३६), **"द्वेऽयने वर्षम्"** (स्कन्दपु.सूतसंहिता १।८।६), **"संवत्सरं द्वे त्वयने वदन्ति"** (शान्तिपर्व २३१।१४), **"अब्दं द्व्ययनमुक्तं च"** (हरिवंश १।८।६), **"अयने द्वे गतिरुदग् दक्षिणार्कस्य वत्सरः"** (अमरकोष, कालवर्ग, श्लो.१०), **"द्व्ययनः संवत्सरः"** (काव्यमीमांसा, अध्याय १८), **"अयनद्वयं वत्सरो भवति"** (त्रिपाद्विभूतिमहानारायणोपनिषद्, तृतीय अध्याय) इत्यादि वचनों से अनेक स्थलों में दो अयनों का एक वर्ष होने की बात बताई गई है।

उक्त वस्तुस्थिति से यह बात स्पष्ट होती है कि अयन का और संवत्सर का एक साथ ही प्रारम्भ होने की बात माननी चाहिए। यह भी ध्यान में रखना चाहिए कि वैदिक धार्मिक परम्परा में अयन भी वर्ष की तरह सौर-चान्द्र ही होता है।

श्रौत-स्मार्त-पौराण-परम्परा में महाकल्प, कल्प, मन्वन्तर, महायुग, युग इत्यादि का प्रतिपादन दिव्य मान के आधार में किया गया है[1]। यह बात पुराणों में **"दिव्येनैव प्रमाणेन युगसङ्ख्याप्रकल्पनम्"** इत्यादि रूप में[2] कण्ठरव से ही बताई

---

१. मनु.१।६८-७३, वनपर्व १८८।२२-२६, शान्तिपर्व २३१।१६-३१, भागवत ३।११।१८-२०,२२-२४।

२. ब्रह्माण्डपु.पूर्वभाग २९।२२, मत्स्यपु.१४२।१६, लिङ्गपु.१।४।२४, वायुपु.१।५७।२१, शिवपु.७।१।८।११।

गई है। यही सिद्धान्त निरुक्तादि ग्रन्थों में है। निरुक्तपरिशिष्ट में (२।४) **"तदेतदहर् युगसहस्रम्", "युगसहस्रं रात्रिः"** कहकर प्रथम दिव्ययुगसहस्र को ब्रह्मा का दिन और दूसरे को रात बताया गया है। ऐसी ही बात बृहद्देवता में (८।९८), मनुस्मृति में (१।७२), महाभारत में[1] और हरिवंश में (१।८।२२-२३, ३।८।२०) भी है। ऐसी ही बात पुराणों के कालमान-विवरणों में भी प्राप्त होती है।

मानुषवर्ष की परिभाषा भी मनुस्मृति में **"दैवे रात्र्यहनी वर्षं प्रविभागस् तयोः पुनः। अहस् तत्रोदगयनं रात्रिः स्याद् दक्षिणायनम्"** (१।६७) कहकर दिव्यमान के ही आधार पर बताई गई है। ऐसी ही बात ब्रह्माण्डपुराण में (पूर्वभाग २९।१३-१४), मत्स्यपुराण में (१४२।१०), लिङ्गपुराण में (१।४।१५-१६), वायुपुराण में (१।५७।१३) और महाभारत में (शान्तिपर्व २३१।१७) भी पाई जाती है। मानुषवर्ष को दैव अहोरात्र से अभिन्न मानने की बात तैत्तिरीयब्राह्मण (३।९।२२।१) के **"एकं वा एतद् देवानामहः यत् संवत्सरः"** इस वचन में भी है।

उक्त शास्त्रीय वस्तुस्थिति से कालगणना के श्रौत-स्मार्त-पौराण परम्परा में दिव्यमान में और मानुषमान में सामञ्जस्य अत्यावश्यक अवगत होता है।

इस स्थिति में दिव्य अहोरात्र का उदगयनारम्भ से प्रारम्भ होने से मानुषवर्ष का आरम्भ भी उदगयनारम्भ से ही मानना मूल वैदिक परम्परा का सम्मत कार्य है। दिव्य अहोरात्र का उदगयनारम्भ से आरम्भ होने की बात **"अहस् तत्रोदगयनम्"** (मनु.१।६७) **"यदुत्तरायणं तदहर् देवानाम्"** (विष्णुधर्मसूत्र २०।१) इत्यादि वचनों से स्पष्ट होती है। ऐसे वचन पुराणादि ग्रन्थों में भी अनेक स्थलों में **"अयनं दक्षिणं रात्रिर् देवानामुत्तरं दिनम्"** (कूर्मपु.१।५।९, पद्मपु.सृष्टि.३।७, विष्णुपु.१।३।१०), **"उत्तरं दिवसं प्राहू रात्रिर् वै दक्षिणायनम्"** (नारदीयपु.१।५।२५), **"अहस् तत्रोदगयनम्"** (ब्रह्माण्डपु.पूर्वभाग.२९।१४, भविष्यपु.१।२।९२, लिङ्गपु.१।४।१६, वायुपु.१।५७।१३, स्कन्दपु.१।२।२९।५४), **"अहस्तु यदुदक् चैव रात्रिर् या दक्षिणायनम्"** (मत्स्यपु. १४२।१०), **"दिनं तत्रोत्तरायणम्"** (मार्कण्डेयपु.४३।२५), **"तथोदगयनं दिनम्"** (शिवपु.७।१।८।८), **"दिवा चैवोत्तरायणम्"** (स्कन्दपु.५।१।४८।१५, स्कन्दपु.सूतसंहिता १।८।६, हरिवंश १।८।९), **"अयनं चोत्तरं शुक्लं यद् देवानां दिनं तु तत्"** (स्कन्द.६।२७२।८), **"अहस् तत्रोदगयनम्"** (शान्तिपर्व २३१।१७) इत्यादि रूप में उपलब्ध होते हैं।

---

१. वनपर्व १८८।२८, भीष्मपर्व ३२।१७ (गीता ८।१७), शान्तिपर्व ३४९।५१,५२।

शतपथब्राह्मण (६।७।४।७) में प्रजापति से पहले दिन की और वाद में रात्रि की और पहले शुक्लपक्ष की और वाद में कृष्णपक्ष की सृष्टि की जाने की बात बताई गई है। पुराणों में भी **"अहोरात्रविभागानामहश्चाऽपि (आद्यम्) प्रकीर्तितम्"**[1] ऐसा उल्लेख मिलता है। महाभारत में भी **"अहः पूर्वं ततो रात्रिर् मासाः शुक्लादयः स्मृताः"** (आश्वमेधिक.४४।२) यह वचन मिलता है। इस से सृष्टिक्रम में पहले दिन की सृष्टि प्रमाणित होती है। इसी न्याय से दिव्यदिनरूप उत्तरायण की सृष्टि पहले और वाद में दक्षिणायन की सृष्टि होने की बात भी सिद्ध होती है।

उक्त शास्त्रीय वस्तुस्थिति में संवत्सर में उदगयन का ही प्रथम स्थान मानना आवश्यक हो जाता है। इसी से संवत्सर का आरम्भ भी सौरचान्द्र उदगयन[2] के आरम्भ से ही मानना परमावश्यक हो जाता है। इस से अर्वाचीन काल के ज्योतिषग्रन्थों की, प्रचलित पञ्चाङ्गों की और लौकिक जनों की उत्तरायण का प्रारम्भ माघ (मकरसङ्क्रान्ति) से मानकर भी संवत्सर का प्रारम्भ तो चैत्रशुक्ल-प्रतिपदा से अथवा पञ्जाबियों की और बङ्गालियों की तरह मेषसङ्क्रान्ति से मानने की प्रथा सर्वथा श्रुति-स्मृति-पुराण-प्रतिकूल होने से अवैदिक और अनुचित सिद्ध होती है।

यदि चैत्र से संवत्सरारम्भ को श्रुति-स्मृति-पुराणसम्मत और उचित सिद्ध करने के लिए उत्तरायणारम्भ भी चैत्र से ही माना जाय, सूर्यसिद्धान्त के भूगोलाध्याय के वचनों को ध्यान में रखकर सूर्य के उत्तरगोलावलम्बन[3] को ही उत्तरायण माना जाय तो हमारे अत्यन्त प्राचीन और अतिमान्य अनेक ग्रन्थों के उल्लेखों का और माघादि उत्तरायण मान कर धार्मिक कृत्य करने की वर्तमान काल में भी प्रचलित परम्परा का भी विरोध हो जाएगा।

माघ से उदगयन का प्रारम्भ होने की बात अत्यन्त प्राचीन और अतिमान्य अनेक ग्रन्थों के **"मघाद्यं श्रविष्ठार्धमाग्नेयम्"** (मैत्रायणीयारण्यक ६।१४), **"माघमासे धनिष्ठाभिरुत्तरेणैति भानुमान्"** (बौधायनश्रौतसूत्र २६।२९), **"स्यात् तदादियुगं माघस् तपःशुक्लोऽयनं ह्युदक्"** (वेदाङ्गज्योतिष, श्लो.६), **"प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक्। सार्पार्धे दक्षिणाऽर्कस् तु माघश्रावणयोः सदा"** (वेदाङ्गज्योतिष, श्लो.७),

---

१. ब्रह्माण्डपुराण, पूर्वभाग २४।१४२; लिङ्गपुराण १।६१।५४, वायुपुराण १।५३।११४।

२. सूर्य के उदगयन से कभी भी दूरविप्रकर्ष (बहूत फर्क) न होने वाले शिशिरादि तीन चान्द्र ऋतुओं का समूह सौर-चान्द्र उदगयन (उत्तरायण) कहा जाता है।

३. सूर्य का विषुवरेखा से उत्तर में रहना सूर्य का उत्तरगोलावलम्बन है, और सूर्य का विषुवरेखा से दक्षिण में रहना सूर्य का दक्षिणगोलावलम्बन है।

"शिशिराद्युत्तरायणम्" (कौटलीय अर्थशास्त्र २।२०), **"शिशिरवसन्तावुदगयनस्थौ"** (पाणिनीयव्याकरणभाष्य २।२।३४, वा.३), **"तत्राऽऽदित्यस्योदगयनमादानं च त्रीनृतून् छिशिरादीन् ग्रीष्मान्तान् व्यवस्येत्"** (चरकसंहिता १।६।४), **"चन्द्रादित्ययोः काल-विभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरं च, तयोर् दक्षिणं वर्षाशरद्धेमन्ताः, उत्तरं च शिशिरवसन्तग्रीष्माः"** (सुश्रुतसंहिता १।६।७), **"उत्तरायणमप्युक्तं मकरस्थे दिवाकरे"** (विष्णुपुराण २।८।६८), **"तदुत्तरायणे कार्यं माघादिष्वेव केवलम्। मुख्येषु कुर्याद् गौणेषु न कदा चन तां क्रियाम्"** (लौगाक्षिस्मृति, स्मृतिसन्दर्भ-६, पृ.२४४), **"तपस्-तपस्यौ मधु-माधवौ च शुक्रः शुचिश्चाऽयनमुत्तरं स्यात्"** (ब्रह्माण्डपुराण १।२१।१५१, वायुपुराण १।५०।२०१, विष्णुपुराण २।८।८१) इत्यादि वचनों में स्पष्ट है।

उक्त शास्त्रीय वस्तुस्थिति में वर्तमान सूर्यसिद्धान्त के उल्लेखों[1] को और विष्णुधर्मोत्तरपुराण के वचन को (१।७३।१३) और उसी के पाश्चात्त्यशब्दावलि से भरे पडे होने से प्रक्षिप्तत्व की आशङ्का से आक्रान्त अध्याय (२।१६७) के बाद के उल्लेखों को मान्यता देकर वैदिक परम्परा के आस्तिक लोग सूर्य के उत्तर-गोलावलम्बन को ही देवता का दिन मानकर उदगयन नहीं मान सकते हैं। वैदिक-पौराणिक-परम्परा में उदगयन ही देवताओं का दिन है, उत्तरगोलावलम्बन नहीं। वेद-वेदाङ्ग-स्मृति के विरुद्ध बात को श्रौत-स्मार्त-पौराण-धर्म में प्रमाण नहीं माना जा सकता है। सूर्यसिद्धान्त की बात का समर्थन करने का प्रयास करने वाली भास्कर की व्याख्या[2] भी श्रुतिस्मृतिपुराणविरुद्ध ही है।

आर्यावर्त पुस्तकालय

९. प्रचलित सूर्यसिद्धान्तग्रन्थ की वेदाङ्गता की परीक्षा

यद्यपि वर्तमान काल में प्रचलित सूर्यसिद्धान्त अपने वेदाङ्गत्व का दावा करता है (मध्यमाधिकार, श्लो.३), तथापि वैदिक यज्ञादि के लिए आवश्यक[3] संवत्सर-परिवत्सरादि पञ्चवर्षात्मक वैदिक युग का कोई उल्लेख इस सूर्य-सिद्धान्त में न होने से, संवत्सर-परिवत्सरादि वर्षज्ञान के लिए कोई करणसूत्र इस ग्रन्थ में प्राप्त न होने से, वैदिक चान्द्र प्रभवादि वत्सर[4] जानने का उपाय भी इस

---

१. भूगोलाध्याय, श्लो. ४, ४५, ४८, ४९, ५०, ६३, ६४, ६७।

२. सिद्धान्तशिरोमणि, गोलाध्याय, त्रिप्रश्नवासना, श्लो.८-१२।

३. द्रष्टव्य— लौगाक्षिस्मृति, स्मृतिसन्दर्भ षष्ठभाग, पृ.३७७; मार्कण्डेयस्मृति, स्मृतिसन्दर्भ षष्ठभाग, पृ.१३४; विष्णुधर्मोत्तरपुराण ३।१५३।१-९, हेमाद्रि-दानखण्ड, पृ.८९०, कालमाधव, पृ.३५।

४. सदा ही वैदिक चान्द्र संवत्सर-परिवत्सरादि वर्षों के साथ में ही प्रारम्भ होकर साथ में ही समाप्त होने वाले प्रभवादि संवत्सर चान्द्र संवत्सर माने जाते हैं। इन का प्रतिपादन गार्ग्यवचन से निर्णयसिन्धु के प्रारम्भ में भी किया गया है।

ग्रन्थ में उपदिष्ट न होने से, वैदिक चान्द्र ऋतुओं का भी इस में उल्लेख न होने से और केवल राशिपरक सौर ऋतुओं का ही इस में उल्लेख होने से (मानाध्याय, श्लो.१०), इस में वैदिक मूल परम्परा के अनुकूल सूर्योदयकालपरिच्छिन्न अहर्गण[1] का उल्लेख न होकर अर्धरात्रपरिच्छिन्न अहर्गण लाने की रीति वर्णित होने से (मध्यमाधिकार, श्लो.५०), वारप्रवृत्ति भी मध्यरात्रि से होने की बात वर्णित होने से (मध्यमाधिकार, श्लो.६६), वैदिक धार्मिक परम्परा में वर्ष अयन ऋतु मास सभी चान्द्र ही प्रधान होने पर भी इस सूर्यसिद्धान्त में सौर वर्षादि का ही प्राधान्य देखे जाने से (मानाध्याय, श्लो.९,१०), **"युता मासैर् मधुशुक्लादिभिर् गतैः"** (मध्यमाधिकार, श्लो.४८), **"द्विराशिनाथा ऋतवस् ततोऽपि शिशिरादयः"** (मानाध्याय, श्लो.१०), **"मेषादयो द्वादशैते मासास् तैरेव वत्सरः"** (मानाध्याय, श्लो.१०) इन वचनों में इस सूर्यसिद्धान्त में वत्सरारम्भ के विषय में भ्रम पैदा कर सकने वाले उल्लेख भी पाए जाने से, इस ग्रन्थ का करणनामक्रम (स्पष्टाधिकार, श्लो.६७) वैदिक परम्परा के करणनामक्रम से (आथर्वणज्योतिष, करणप्रकरण, श्लो.६, ७, ९, ११) भिन्न और वैदिकों को अमान्य होने से, इस ग्रन्थ में ब्रह्म को वासुदेव कहने वाले (द्रष्टव्य– भागवत १।९।४९) और यवनों का भी परिग्रह करने वाले[2] सात्त्वत वैष्णवों के सम्प्रदाय के वासुदेव-सङ्कर्षण-अनिरुद्धों का विशिष्ट उल्लेख (भूगोलाध्याय, श्लो.१२-१४) देखे जाने से और इस सूर्यसिद्धान्त को मयाऽसुर से अधिगत और ऋषियों में प्रचारित कहे जाने से (मध्यमाधिकार, श्लो.२, ४, ७; मानाध्याय, श्लो.२४-२६) भी यह ग्रन्थ मूल वैदिक परम्परा से बाहर का ग्रन्थ अवगत होता है। इस वस्तुस्थिति में प्रचलित सूर्यसिद्धान्त में वेदाङ्गज्योतिष का कार्य अधिक स्पष्ट रहने की बात करना आत्मवञ्चना वा लोकवञ्चना के सिवाय और कुछ नहीं दिखाई देता है।

१०. प्रचलित सूर्यसिद्धान्तग्रन्थ के विषय में भ्रम

वेदमन्त्रसंहिता–ब्राह्मणग्रन्थ–श्रौतसूत्र-गृह्यसूत्र-धर्मसूत्र-लगधप्रोक्तवेदाङ्ग-ज्योतिषादि ग्रन्थों का और उन के इतिहास का पर्यालोचनात्मक गम्भीर ज्ञान से रहित कुछ भोलेभाले लोग वर्तमान सूर्यसिद्धान्तग्रन्थ को 'वेद' ही मानते हैं। वे सूर्य-सिद्धान्त के पीछे दौडने से वैदिक परम्परा के अष्टका-उपनयन-विवाह-अग्न्याधान-

---

१. सूर्योदयकाल में प्रारम्भ होने वाले दिनों का समूह सूर्योदयकालपरिच्छिन्न अहर्गण है, और आधी रात में प्रारम्भ होने वाले दिनों का समूह अर्धरात्रपरिच्छिन्न अहर्गण है।

२. द्रष्टव्य– यवनदूत हेलियोदोरस का २००० वर्षों से भी ज्यादा पुराना मध्यप्रदेश के भिलसा जिले के वेसनगरग्राम का गरुडस्तम्भलेख (भारतीय अभिलेख, एस्.एस्. राणा, भारतीय-विद्याप्रकाशन, वाराणसी, १९७८)।

निरूढपशुबन्ध-सोमयागादि के लिए आवश्यक वैदिक हेमन्त-शिशिर-वसन्तादि ऋतुओं का, अयनमुखों का, माघादिमासों का, तत्तत् मास के पक्षों का और तिथियों का ही ठीकठीक ज्ञान न हो सकने की स्थिति में पहुँच जाने पर भी इस वस्तुस्थिति की चेतना को ही गँवाकर छोटेमोटे पौराणिक तिथिकृत्य की तिथि के निर्णय के अमौलिक और अप्रामाणिक वचनों के विचार में ही उलझ रहे प्रतीत होते हैं। ये लोग **"येनाऽस्य पितरो याताः"** इत्यादि मनुस्मृतिवचन का तात्पर्य मेधातिथि-कुल्लूकभट्टादिव्याख्यानुसार भी स्वशाखाश्रुति-सूत्रादिशास्त्रानुकूल परम्परा की ही अनुसरणीयता के प्रतिपादन में रहने की बात को समझे विना भ्रमप्रमादाऽज्ञानादिमूलक परम्पराको भी अनुसरणीय और अत्याज्य मान कर बैठे हुए भी मालूम होते हैं। यह इन लोगों का बहुत ही बडा अज्ञान अथवा प्रमाद है।

११. श्रौत-स्मार्त-धर्मकृत्यों में चान्द्रसंवत्सर और चान्द्र ऋतु की ग्राह्यता

सौ-पचास सालों से चले आ रहे काशी के महावीरपञ्चाङ्ग-धर्मसङ्घ-पञ्चाङ्गादि पञ्चाङ्गों के कर्ता और प्रयोक्ता लोगों में भी उपर्युक्त भ्रम की ही स्थिति देखी जा रही है। ये लोग श्रौत-स्मार्त धर्मकृत्य के सङ्कल्प के लिए **"स्मरेत् सर्वत्र कर्मादौ चान्द्रं संवत्सरं सदा"**[1] इत्यादि वचनानुसार आवश्यक चान्द्र संवत्सर का पञ्चाङ्ग में कोई उल्लेख नहीं कर रहे हैं। वे बार्हस्पत्य संवत्सर का ही उल्लेख करते हैं । स्यात् उन को चान्द्र और बार्हस्पत्य संवत्सर का भेद[2] ही मालूम नहीं। **"श्रौतस्मार्तक्रियाः सर्वाः कुर्याच् चान्द्रमसर्तुषु"** (निर्णयसिन्धु, ऋतुनिर्णयप्रकरण) इत्यादि वचनानुसार भी श्रौतस्मार्तधर्मकृत्य के लिए प्रथमकल्प के रूप में आवश्यक चान्द्र ऋतुओं का भी मानों इन को ज्ञान ही नहीं है। श्रौत-स्मार्त धर्मकृत्यों में चान्द्रमान की ही ग्राह्यता के विषय में सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय की अनुसन्धान-पत्रिका सारस्वती सुषमा में (वर्ष ५१, अङ्क १-४) प्रमोदवर्धन कौण्डिन्न्यायन का **"जैमिनीय-धर्मशास्त्र-निर्णीतानां वैदिककृत्यकालानां चान्द्रमाननियतत्वम्"** शीर्षक का विशिष्ट लेख भी स्वाद्ध्यायशाला की ओर से प्रकाशित है। ये लोग पञ्चाङ्गों में केवल आनुकल्पिक गौण सौर ऋतु (उस में भी निरयण-मकरमासादिमासद्वयात्मक अवास्तव सौर ऋतु) लिखते हैं। इन के चान्द्र मास भी ऋग्वेद, यजुर्वेद

---

१. आर्ष्टिषेणवचन, निर्णयसिन्धु, अब्दनिर्णयप्रकरण (द्रष्टव्य- धर्मसिन्धु का प्रारम्भभाग)।

२. चान्द्र संवत्सर वैदिक संवत्सर-परिवत्सरादि से अभिन्न रूप में सदाकाल तपश्शुक्लप्रतिपदा में (माघशुक्लप्रतिपदा में) ही प्रवृत्त होते हैं। इन का कभी भी क्षय नहीं होता है। बार्हस्पत्य संवत्सर बृहस्पति के राशियों में परिभ्रमण के आधार में विभिन्न समयों में प्रवृत्त होते हैं और प्रायः ८५ सौर वर्षों में एक बार्हस्पत्य संवत्सर का क्षय होता है।

और सामवेद के विज्ञ और अनुयायी द्विजाति के सम्मत अमान्त रूप के नहीं हैं, पूर्णिमान्त हैं। वेदमन्त्रोक्त चान्द्र मास **"मधुश् च माधवश् च वासन्तिकावृतू"** (शु.य.वे.१३।२५, १४।६, १४।१५, १४।१६, १४।२७, १५।५७; तै.सं.४।४।११।११) इत्यादि मन्त्रप्रमाण से और **"मन्त्रचोदनयोर् मन्त्रबलम् प्रयोगित्वात्"** (कात्यायनश्रौतसूत्र १।५।७) इत्यादि वचनों से ऋतुबद्ध सिद्ध होते हैं; नक्षत्रबद्ध नहीं; इस वस्तुस्थिति में पाणिनि का **"साऽस्मिन् पौर्णमासीति"** (अष्टाध्यायी ४।२।२१) इत्यादि निर्वचन शब्द-रूपज्ञान में और स्वरज्ञान में ही उपयोगी ठहरते हैं। ऐसी बात को वैदिकधर्म-मीमांसकशिरोमणि कुमारिलभट्ट ने भी **"यत्रार्थस्य विसंवादः प्रत्यक्षेणोपलभ्यते। स्वरसंस्कारमात्रार्था तत्र व्याकरणस्मृतिः"** (तन्त्रवार्तिक २।१।१७, आनन्दाश्रमसंस्करण, पृ.४००) कहकर सूचित किया है। पौर्णमासियों में एकमात्र नक्षत्र से चन्द्र का योग नहीं माने जाने से भी यह बात स्पष्ट होती है। इस विषय में भी इन आधुनिक सूर्य-सिद्धन्तादिमूलक पञ्चाङ्गवालों को गाढ भ्रम हुआ है। इन को चैत्रकृष्णपक्ष व्यतीत होने पर मास के मध्य से चैत्रशुक्लप्रतिपदा में नववत्सरारम्भ लिखने में भी कोई असामञ्जस्य का अथवा लज्जा का अनुभव नहीं होता है। प्रचलित पञ्चाङ्गों की ये सब बातें वैदिक मूल परम्परा की सर्वथा प्रतिकूल और नित्यस्वाध्यायाध्ययन में पढे जाने वाले वेदाङ्गज्योतिषग्रन्थ की विरुद्ध हैं। अतः प्रचलित पञ्चाङ्गों की ये सब बातें मनुस्मृति के **"सर्वान् परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः"** (४।१७) इस वचन के विचार से भी सर्वथा त्याज्य ठहरती हैं। भारतवर्ष के विद्वानों को इस विषय में विशेष ध्यान देना चाहिए ।

१२. अर्वाचीन काल में लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ का अनुशीलन

इन सब बातों से लगधप्रोक्त वेदाङ्गज्योतिष ग्रन्थ का महत्त्व भलीभाँती स्पष्ट हो जाता है। इस ग्रन्थ की चर्चा अर्वाचीन काल में पाश्चात्त्य संस्कृतविद् कोलब्रूक, म्याक्समूलर, याकोबि, वेबर, थिबो इत्यादि लोगों ने भी की है। भारतीय लोगों में शङ्कर-बालकृष्ण-दीक्षित, लाला छोटेलाल (बार्हस्पत्य), सुधाकर द्विवेदी, बालगङ्गाधर तिलक, योगेशचन्द्र राय, शामशास्त्री, गोरखप्रसाद, सत्य-प्रकाश इत्यादि लोगों ने भी इस ग्रन्थ की चर्चा की है। इस ग्रन्थ का वर्तमान काल में भी वैदिक धर्म के अग्न्याधान-दर्शपूर्णमासादि यज्ञों में और नामकरण-उपनयन-विवाहादि संस्कारों में अपेक्षित कालज्ञान के उपयोगी साधन के रूप में प्रयोग हो सकने के विषय में उन लोगों ने सम्यक् विचार नहीं किया है। गीताप्रेस की कल्याण पत्रिका की हिन्दूसंस्कृति अङ्क में (२००६ संवत्) तो इस ग्रन्थ की महत्ता को समुचित रूप में समझे विना पण्डित इन्द्रनारायण द्विवेदी ने "हिन्दू ज्योतिर्विज्ञान

अथवा भारतीय ज्योतिःशास्त्र" शीर्षक के लेख में 'वेदाङ्गज्यौतिष और हमारे सिद्धान्तज्यौतिष' नाम के प्रकरण में (पृ.७४९) "इतना ही नहीं, आर्च और याजुष ज्यौतिषको ध्यानपूर्वक पढनेसे विदित होता है कि इनकी रचनाके समयमें हमारे सिद्धान्तज्योतिषकी सूक्ष्म गणना प्रचलित थी और गणितानभिज्ञ वैदिकोंके लिए ही ज्योतिर्विदोंने स्थूल रीतिसे दर्शपूर्णमास और विषुवायन तथा तिथिनक्षत्रादिके जाननेके लिए चुटकुले बना दिए थे, जिनको आजके इतिहासज्ञ वेदाङ्गके नाम से अत्यधिक महत्त्व दे रहे हैं। वस्तुतः वे हमारे मूल ज्योतिःसिद्धान्तके पश्चात् बनाए गए हैं।" इत्यादि लिखा है। यह विचार सर्वथा भ्रान्त है।

१३. स्वाद्ध्यायशाला में लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ का विशिष्ट अध्ययन

हमारे काठमाण्डू में वर्तमान वेद-वेदाङ्गों के अध्ययन के एक विलक्षण गुरुकुल के रूप में वर्तमान स्वाध्यायशाला में वेद-वेदाङ्गादि शास्त्रों का गम्भीर अध्ययन किया जा रहा है। वेदाङ्गों में शिक्षा-वेदाङ्ग का आलोडन करके ५००० वर्षों के संस्कृत वाङ्मय के इतिहास में शिक्षा-वेदाङ्ग का अद्वितीय सर्वाङ्गपूर्ण विशालकाय (८९६ पृष्ठों का) संस्कृतग्रन्थ **कौण्डिन्न्यायनशिक्षा** विरचित और प्रकाशित किया गया है (२०४९ वै.)। कल्प-वेदाङ्ग के क्षेत्र में माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायियों की प्रचलित नित्यसदाचारकर्म-संस्कार-कर्म-श्राद्धकर्मादि की पद्धतियों की अस्तव्यस्तता के निराकरण का मार्ग दिखाने के लिए आवश्यक उपोद्घात और प्रमाणपुष्ट टिप्पणियाँ देकर **वैदिक-मन्त्रसङ्ग्रह** प्रकाशित किया गया है (२०५२ वै.)। ये ग्रन्थ दिल्ली में राष्ट्रिय-संस्कृत-संस्थान के और लालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठ के पुस्तकालय में, प्रयाग में गङ्गानाथझा-केन्द्रीय-संस्कृत-विद्यापीठ में, वाराणसी में गोयन्कापुस्तकालय में और विश्वविद्यालयों के पुस्तकालयों में तथा कोलकाता में भारतीयभाषापरिषद् के पुस्तकालय में भी उपलब्ध हैं। व्याकरण में पाणिनीय व्याकरण का पूरण और परिष्कार तथा व्याख्यान किया जा रहा है। निरुक्तक्षेत्र में लगभग ६००० श्लोकों का **वेदभाषानिघण्टु (कौण्डिन्न्यायनकोष)** बनाया जा रहा है, और उसका भूलोक-काण्डान्तर्गत देववर्ग-ब्रह्मवर्ग-सम्मिलित निदर्शनांश प्रकाशित भी किया गया है (२०५०वै.)। इस प्रकार स्वाद्ध्यायशाला में किये गये वेद के मन्त्रसंहिता, ब्राह्मण-ग्रन्थ, श्रौतसूत्र, गृह्यसूत्र इत्यादि कल्पशास्त्र, शिक्षाव्याकरणादिवेदाङ्ग, वेदाङ्ग-ज्योतिष और स्मृतिपुराणादि ग्रन्थों के अध्ययन-मनन के परिणामस्वरूप हम इस निष्कर्ष में पहुचे हैं कि लगधप्रोक्त वेदाङ्गज्योतिष के तात्पर्यार्थ को लेकर उसी आधार पर हम आज भी वैदिक यज्ञ-संस्कारादि कृत्यों को श्रौतसूत्र-गृह्यसूत्र-प्रोक्त ऋतु में सम्पन्न कर सकते हैं। इस विषय को हम ने २०५२ संवत् में ही

प्रकाशित **वैदिक-मन्त्रसङ्ग्रह** के परिशिष्ट में स्पष्ट किया था, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय की पत्रिका सारस्वती सुषमा में (वर्ष ५०, अङ्क ३-४) और वाराणसी से प्रकाशित होनेवाली दैनिक पत्रिका सन्मार्ग में (१९९८, अप्रैल, १,२) भी इस विषय में लेख प्रकाशित किये गये थे। इस कालगणनापरम्परा को धार्मिक क्षेत्र में जीवित रखना भारतवर्ष की गौरवरक्षा की दृष्टि से अत्यन्त उचित तथा आवश्यक है और आचार्य लगधप्रोक्त वेदाङ्गज्योतिष को आधुनिक काल में वैदिक धार्मिक कृत्य के लिए सर्वथा अनुपयोगी बताना बहूत बडा अविवेक और भूल है।

१४. वैदिककालगणनाव्यवस्था के सम्बन्ध में स्वाद्ध्यायशाला के निष्कर्ष

अब हमारे स्वाद्ध्यायशाला में किए गए लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ के और ब्राह्मणग्रन्थ-श्रौतसूत्रादि ग्रन्थों के अध्ययन-मनन के फलस्वरूप प्राप्त कुछ निष्कर्ष वैदिकधर्म तथा वाङ्मय के अनुयायी एवम् प्रेमी विद्वानों के विवेचनार्थ और आकलनार्थ सङ्क्षेप में नीचे प्रस्तुत करते हैं।

१. वैदिक धर्म में आवश्यक वेदप्रोक्त पञ्चवर्षात्मक युगका सिद्धान्त ब्रह्मगुप्त की अनार्ष उक्ति[1] से खण्डित नहीं हो सकता है[2]।

२. वैदिकों के युग, वर्ष, अयन, ऋतु, मास, पक्ष, तिथि सभी सौरचान्द्र हैं।

३. अयन और विषुव को सूर्य से और मास को चन्द्र से लक्षित करना चाहिए।

४. आर्यावर्त में मध्याह्नों में शङ्कु की छाया सब से लम्बी जिस दिन होगी उस दिन से सूर्य का उदगयन और सब से छोटी जिस दिन होगी उस दिन से दक्षिणायन प्रवृत्त होता है।

५. सूर्य के वास्तविक उदगयनप्रवृत्ति से छठे-सातवें दिन में अथवा उस के वाद आने वाली प्रथम अमावास्या में पूर्ण होने वाला मास वैदिक प्रकृतिसम्मत और धर्मकृत्यार्थक कालगणना के आधारभूत वर्ष का प्रथम मास तपोमास (माघमास) होता है।

६. उस मास की शुक्लप्रतिपदा से वैदिक धार्मिक अनुष्ठानादि के प्रयोजन के लिए नवीन वर्ष, अयन, ऋतु और मास प्रवृत्त माने जाते हैं।

---

१. युगमाहुः पञ्चाब्दं रविशशिनोः संहिताङ्गकारा यत्।
अधिमासाऽवमरात्र-स्फुटतिथ्यज्ञानतस् तदसत्॥—ब्राह्मस्फुटसिद्धान्त, तन्त्रपरीक्षाध्याय, पद्य २।

२. युगमार्षं हि पञ्चाब्दं ब्रह्मगुप्तादिजल्पितैः।
नाऽनार्षैर् बाध्यते धर्मे परं मानमृषिर् यतः॥
—वैदिक-मन्त्र-सङ्ग्रहः, स्वाद्ध्यायाशाला, काठमाण्डु, २०५२, पृ.१३७,
सारस्वती सुषमा (वर्ष ५०, अङ्क ३-४, पृ.२६१)।

७. धार्मिक कार्य के लिए ग्राह्य सौरचान्द्र ऋतु किसी किसी वर्ष में वास्तविक सौर ऋतु से २७-२८ दिन तक पहले भी आ सकता है।

८. उदाहरणार्थ २०६१ वैक्रमाब्द के बापूदेवशास्त्रिप्रवर्तितदृक्सिद्धपञ्चाङ्ग में दिसम्बर १२ तारीख में उल्लिखित मार्गशीर्ष-शुक्लप्रतिपदा ही लगधप्रोक्त वेदाङ्गज्योतिषानुसार तपश्शुक्लप्रतिपदा (माघशुक्लप्रतिपदा) है और इसी दिन सूर्योदय से वैदिक धार्मिक कालगणना के प्रयोजन के लिए वैदिक पञ्चवर्षात्मक युग के पञ्चमवर्ष वत्सर का, उत्तरायण का, शिशिरऋतु का, तपोमास (माघमास) का, शुक्लपक्ष का और प्रतिपदा का प्रवेश माना जाता है। इसी अवसर में कृष्णस्वर्गारोहण से गणनीय कलिवर्ष का ५०७०वाँ वर्ष भी प्रविष्ट होता है।

९. दृश्य सूर्य के एक वास्तविक अयन में अथवा उस प्रकार के अयन की समाप्ति के वाद ६ दिन तक के समय में ७ अमावास्याएँ आती हैं तो सप्तम अमावास्या में पूर्ण होने वाला मास अधिकमास होता है।

१०. इस प्रकार लगधप्रोक्त वेदाङ्गज्योतिषानुसार अयन के अन्त में होने वाले शुक्रमास (आषाढ) अथवा सहस्यमास (पौष) अधिक मास हो सकते हैं, अन्य मास नहीं। यही अधिकमास का सिद्धान्त नेपाल के लिच्छविकाल (लगभग ५२० वैक्रमाब्द से ९०० वैक्रमाब्द तक) के शिलालेखों में व्यवहृत पाया जाता है, और इस विषय के स्पष्टीकरण के लिए द्रोणकृत रत्नकरण्डिकानामक स्मृति-समुच्चय और धर्मनिर्णयतिथिसारसङ्ग्रह नाम के दो प्राचीन ग्रन्थ भी नेपाल के राष्ट्रिय अभिलेखालय में सुरक्षित पाये जाते हैं।

११. वैदिक मूल कालगणनापद्धति में क्षयमास नहीं होता है।

१२. वैदिक तिथिगणना में चतुर्दशी तिथि टूट सकती है, और तिथियां नहीं। तिथिवृद्धि भी नहीं होती है।

१३. श्रौत-स्मार्त धार्मिक कृत्य के लिए संवत्सर-परिवत्सरादि वर्ष, शिशिरादि ऋतु, तपोमासादि मास और शुक्लप्रतिपदादि तिथि लगधप्रोक्त वेदाङ्ग-ज्योतिष के अनुकूल रूप में ही लेने चाहिए।

१४. श्रौत-स्मार्त-धर्मकृत्यों के अधिकारी द्विजाति का धर्मकृत्यों में प्रयोज्य नक्षत्र-नाम नक्षत्रदेवता-सम्बद्ध होना चाहिए, चुचेचोला इत्यादि के शतपदचक्र से अथवा अवकहडचक्र से सम्बद्ध नहीं।

१५. राशि-सङ्क्रान्ति-ग्रह-ग्रहण-जन्मपत्री-ग्रह-दशाफलादि-व्यवस्था के विषय में लगधप्रोक्त मूल वेदाङ्गज्योतिष ग्रन्थ से विरोध न होने से अन्य ग्रन्थों को मान्यता दी जा सकती है।

१६. नवीन ज्योतिषग्रन्थानुसारी राशिमूलक शुद्ध सौर मासों के नाम मकर-मास, कुम्भमास इत्यादि माने जा सकते हैं। इस का सङ्केत भागवत में (५।२२।५) भी है, और लोक में केरलप्रदेशादि में ऐसे मासनाम प्रचलित भी हैं।

१५. प्रचलित पञ्चाङ्गों के सिद्धान्त में असामञ्जस्य

आजकल के प्रचलित धार्मिक पञ्चाङ्गों में उत्तरायणारम्भ माघ में और नववर्षारम्भ चैत्र में मानना परस्पर असमन्वित बातें हैं। समन्वय के लिए तो उत्तरायणारम्भ भी चैत्र में मानना आवश्यक होता है, नहीं तो नववर्षारम्भ भी माघ में ही मानना पडता है। प्रचलित काशीविश्वनाथपञ्चाङ्ग, महावीरपञ्चाङ्ग, वापूदेव-शास्त्रिप्रवर्तित दृक्सिद्ध पञ्चाङ्ग इत्यादि में चैत्र मास के कृष्णपक्ष के व्यतीत होने पर मास के मध्य के चैत्रशुक्लप्रतिपदा से धार्मिक नववर्ष का आरम्भ मानने की बात भी अत्यन्त असमञ्जस बात है। चैत्रशुक्लप्रतिपदा से नववर्ष मानने के पक्ष में मासों को भी शुक्लादि ही मानना उचित होता है, कृष्णादि नहीं। भारतीय राष्ट्रिय पञ्चाङ्ग में वसन्त ऋतु के द्वितीय मास में विषुवद्दिन के दूसरे दिन में नववर्षारम्भ मानना और उसी दिन से वैदिक माधव मास की प्रवृत्ति मानना भी वैदिक मूल परम्परा की सर्वथा प्रतिकूल बात दिखाई देती है। वैदिक तपस्-तपस्यादि मास सौरायनसापेक्ष चान्द्रमास होने से वैदिकधर्म में उन की प्रवृत्ति शुक्लप्रतिपदा से ही मानी जाती है। श्रौत-स्मार्त यज्ञादि में चान्द्रमासनिरपेक्ष सौरमास का उपयोग ब्राह्मणग्रन्थ और श्रौतसूत्र-गृह्यसूत्रादि वाङ्मय में विहित नहीं पाया जाता है। भारतवर्षीय मूल वैदिककालगणनापद्धति का आकलन करने में बडे वैज्ञानिक मेघनाद साहा की अध्यक्षता वाली भारतसम्प्रशासनद्वारा नियुक्त पञ्चाङ्गसुधार-समिति भी असमर्थ ही दिखाई देती है।

१६. लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ के अनुशीलन की और पञ्चाङ्गों में तदनुकूल विषयों के समावेश की आवश्यकता

इस स्थिति में हमारे विचार में भारतवर्ष के गौरव की रक्षा तथा अभिवृद्धि के लिए लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ का गम्भीर अनुशीलन होना चाहिए, सिद्धान्तज्योतिषाचार्यपरीक्षा में भी व्याख्यासहित इस मूल ग्रन्थ को निर्धारित करना चाहिए, और भारतवर्षीय धार्मिक पञ्चाङ्गकारों को भी अपने अपने पञ्चाङ्गों में वैदिक संवत्सर-परिवत्सरादि वर्षों के आरम्भदिन, वैदिक धार्मिक उदगयनारम्भ-दक्षिणायनारम्भ के दिन, वैदिक शिशिरर्त्वादि ऋतुओं के आरम्भ के दिन, वैदिक तपस्-तपस्यादि मासों के आरम्भ के दिन, पूर्णमासेष्टिदिन तथा दर्शेष्टिदिन, और वैदिक अधिमासारम्भदिन इत्यादि भी लगधप्रोक्त **'पञ्चसंवत्सरमयम्'** इत्यादि मूल

वेदाङ्गज्योतिष के अनुकूल रूप में निर्दिष्ट करना चाहिए। कोई नेपाली पञ्चाङ्ग ने हमारे इस प्रस्ताव को अपनाकर उन विषयों का समावेश करना शुरु किया भी है।

वैदिक धर्म में लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ की प्रमाणता में ज्योतिषियों पण्डितों और वैदिकों को कोई सन्देह हो तो उस में खुले रूप में शास्त्रार्थक्रम चलाना चाहिए और उसको सार्वजनिक सञ्चारमाध्यमों को भी प्रकाशनादि से प्रोत्साहित करना चाहिए।

१७. प्रस्तुत कौण्डिन्न्यायनव्याख्यान की विशेषताएं

सोमाकर को छोडकर अन्य शङ्करबालकृष्णदीक्षितादि अर्वाचीन व्याख्याताओं ने केवल इतिहास की दृष्टि से ही वेदाङ्गज्योतिषग्रन्थ की व्याख्या की है। तथापि उन की व्याख्याओं का भी मनन करके और वेदाङ्गज्योतिष के यथालाभ हस्तलिखित पुस्तकों के पाठों को भी देखकरके हमने इस व्याख्यान को प्रस्तुत किया है। प्रस्तुत व्याख्यान की प्रमुख विशेषताएं ये हैं—

(१) प्रस्तुत कौण्डिन्न्यायनव्याख्यान में वेद-वेदाङ्ग-वेदोपाङ्ग-स्मृति-पुराण-धर्मशास्त्रनिबन्ध इत्यादि के अध्ययन के आधार में लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ की श्रौत-स्मार्त धर्मकृत्यों के कालों के प्रतिपादन के लिए वर्तमान काल में भी अनुसरणीयता प्रतिपादित की गई है।

(२) लगधमुनिप्रोक्त वेदाङ्गज्योतिषग्रन्थ के तात्पर्यार्थ का स्पष्टीकरण और श्रुति-स्मृति-पुराणवचनों से समर्थन इस व्याख्यान में दृढतापूर्वक किया गया है।

(३) सोमाकर ने लगधमुनिप्रोक्त कालगणनापद्धति को सभी काल में प्रयोगयोग्यता खोलकर नहीं बताई है और सभी श्लोकों के स्पष्ट अर्थ भी नहीं बताये हैं, प्रस्तुत व्याख्यान में लगधमुनिप्रोक्त कालगणनापद्धति का सारभूत सिद्धान्त और उस का तात्पर्यार्थ सभी कालों में प्रयोज्य होने की बात निष्कर्ष रूप में प्रतिपादित और समर्थित की गई है और प्रायः सभी श्लोकों के स्पष्ट अर्थ भी बताए गए हैं।

(४) षष्ठ श्लोक के आदियुगशब्द का सुधाकर-बार्हस्पत्यादि से बताए गए 'युग का आदि' इस अर्थ को छोडकर इस ग्रन्थ की कालगणना का आधारभूत आदियुग (प्रथम आदर्श युग) इस अर्थ को ही लिया गया है और इस ग्रन्थ की स्थिति को विलकूल भिन्न पृष्ठभूमि में स्थापित किया गया है।

(५) पञ्चम श्लोक के व्याख्यान में शिशिरऋतु में नववर्षारम्भ का समर्थन करने वाले सोमाकरभाष्य की विशेष पुष्टि श्रुति-स्मृति-वचनों से की गई है।

(६) पञ्चम श्लोक के व्याख्यान में चान्द्र प्रभवादि ६० संवत्सरों का ही वैदिक संवत्सर-परिवत्सरादि से समन्वय हो सकने की बात और वराहमिहिरादि का बार्हस्पत्य संवत्सरों को वैदिक संवत्सर-परिवत्सरादि से जोडने का प्रयास अनुपपन्न होने की बात बताई गई है।

(७) षष्ठ श्लोक के व्याख्यान में वर्तमान समय में कलिसंवत् से संवत्सर-परिवत्सरादि वर्षों का और चान्द्र प्रभवादि संवत्सरों का ज्ञान करने की रीति ऊहापोहपूर्वक स्पष्ट की गई है।

(८) षष्ठ श्लोक के व्याख्यान में जिस शुक्लादि कृष्णान्त चान्द्रमास में कृष्णनवमी के भीतर सूर्य का शङ्कुच्छायादिवेद्य दृक्सिद्ध उदगयन होता है उस मास को ही वेदमन्त्रोक्त तपोमास मानने की बात स्पष्ट की गई है और ब्राह्मण-ग्रन्थाद्युक्त माघादि मासों को तपोमासाद्यभिन्न मानने की बात बताई गई है। साथ ही भूमिकाभाग में माघादिमासों को तपोमासाद्यभिन्न होने से ऋतुबद्ध मानने की बात सिद्ध की गई है और उन को नक्षत्रबद्ध मानने की बात निराकृत की गई है।

(९) सप्तम श्लोक के व्याख्यान में उदगयन को मुख्य प्रतिपाद्य रूप में और उस के नक्षत्रविशेष से सहभाव को उपलक्षण के रूप में व्याख्या करके इस ग्रन्थ की कालगणनोपायप्रदर्शन के रूप में सदा प्रयोज्यता सिद्ध की गई है।

(१०) एकादश श्लोक के पूर्वव्याख्याताओं से अव्याख्यात उत्तरार्ध का अर्थ परम्परागत पाठ को ही युक्तियुक्त रूप से लेकर स्पष्ट किया गया है।

(११) पूर्वव्याख्याताओं से अन्यथा प्रतिपादित बारहवें श्लोक का अर्थ श्रुति-स्मृति-पुराणादि धर्मशास्त्रसम्मत रूप में प्रतिपादित है।

(१२) आदियुग के सावनदिनों के १२४ पर्वान्तों की विस्तृत व्याख्यात्मक सारणी प्रस्तुत की गई है।

(१३) नेपाल में सुरक्षित ग्रन्थों शिलालेखों और अन्य लेख्यों के भी सहायता से वेदाङ्गज्योतिषोक्त अधिमासव्यवस्था की युक्तियुक्त और व्यावहारिक व्याख्या प्रस्तुत करके अन्यव्याख्याताओं से अप्रकाशित वस्तुतथ्य प्रकाशित किया गया है। इस से वैदिक अधिमास की पद्धति का सार्वकालिक उपयोग सिद्ध करने का कार्य हुआ है।

(१४) द्विजातियों के नक्षत्रनामकरण में लगधमुनिप्रोक्त व्यवस्था की अनुसरणीयता का दृढतापूर्वक प्रतिपादन किया गया है।

(१५) हस्तलेखों के आधार में और अन्य युक्ति के आधार में भी मूल ग्रन्थ के कतिपय शुद्धतर पाठ भी समाविष्ट किए गए हैं (द्र.- श्लो. ११,१३,१४,१६,२६, ३१,३७,३८,४२)।

(१६) लगध के उल्लेख से युक्त ४३ वें श्लोक का हस्तलिखित पाठ के आधार से भी यजुर्वेदियों के वेदाङ्गज्योतिष में भी पठित होना सिद्ध किया गया है।

(१७) यजुर्वेदियों की परम्परा से आए हुए हस्तलिखित वेदाङ्गज्योतिषग्रन्थ की छायाप्रतिलिपियाँ भी समाविष्ट की गई है।

(१८) आदियुग के पाँचों वर्षों की संवत्सरपञ्जी अथवा तिथिपञ्जी भी प्रस्तुत की गई है।

(१९) यजुर्वेदियों के मूल वेदाङ्गज्योतिषग्रन्थ के शब्दों की अनुक्रमणिका भी संलग्न की गई है।

(२०) विस्तृत संस्कृतभूमिका से वेदाङ्गज्योतिषग्रन्थ में प्रतिपादित विषयों का उपपादन किया गया है और श्रौत-स्मार्त धार्मिक कृत्यकालों के निर्णय में वेदाङ्गज्योतिषग्रन्थ की ही मान्यता सिद्ध की गई है।

आर्यावर्त पुस्तकालय

(२१) वेदाङ्गज्योतिषग्रन्थ से विरुद्ध अंशों में आर्यभटीय-ब्राह्मस्फुटसिद्धान्त-सूर्यसिद्धान्तादि की अमान्यता भी संस्कृत भूमिका में स्पष्ट की गई है।

यह व्याख्यान वेदाङ्गज्योतिष के क्षेत्र में नवीन और बहूत ही बडी उपलब्धि है, विद्वज्जन इस व्याख्यान का पर्यालोचन करें॥

आर्यावर्त पुस्तकालय

—शिवराज आचार्य कौण्डिन्न्यायन

स्वाद्ध्यायशाला,
१६८, शिवभक्तमार्ग (नीलसरस्वतीमार्गसंलग्न),
लाजिम्पाट्, काठमाण्डु-२, नेपाल,
☎ ००९७७-१-४४३३३२७।

कलियुगसंवत् ५०७०,
तपश्शुक्लप्रतिपदा,
(२०६१।८।२७ वै.=२००४।१२।१२ क्रै.)
E-mail : svadhyaya@hotmail.com

❁

वेदाङ्गज्योतिषव्याख्यानभूमिका

इदं नम ऋषिभ्यः पूर्वजेभ्यः

*"षडङ्ग*शास्त्रतेजोभिर् विशेषेणोज्ज्वलीकृतेः
वेदार्थज्ञानरत्ने मे तृष्णाऽतीव विजृम्भते॥"

१. पुरुषार्थेषु धर्मस्य प्राथम्यं पुरुषार्थान्तरमूलत्वं च

यो ह्यवगतः सन् स्ववृत्तितयेष्यते स पुरुषार्थः। स च द्विविधः साध्यरूपः साधनरूपश् च। तत्र कामः मोक्षश् च साध्यरूपौ पुरुषार्थौ। कामो हि **"श्रोत्र-त्वक्-चक्षुर्-जिह्वा-घ्राणानामात्मसंयुक्तमनसाऽधिष्ठितानां स्वेषुस्वेषु विषयेषु आनुकूल्यतः प्रवृत्तिः कामः"** (१।२।११) इति, **"स्पर्शविशेषविषयत्वात् त्वस्याभिमानिकसुखानुविद्धा फलवत्यर्थप्रतीतिः प्राधान्यात् कामः"** इति (१।२।१२) च कामसूत्रे वात्स्यायनेनोक्तः। स हि काम ऐहलौकिकसुखाभिव्यञ्जकः। स च प्रायः सर्वेषां लौकिकजनानामिष्ट एव। मोक्षश्च दुःखानुवेधरहिता स्वस्वरूपानन्दावाप्तिः। साऽपि सर्वेषामिष्टैव। तथाहि सङ्क्षेपशारीरके **"इह जगति हि सर्व एव जन्तुर् निरतिशयं सुखमुत्तमं ममास्तु। उपरमतु तथोपघातरूपं विषयजदुःखमिति स्पृहां करोति॥ निरतिशयसुखं च दुःख-जातव्युपरमणं च वदन्ति मोक्षतत्त्वम्। उभयमपि जनोऽभिवाञ्छतीति स्फुटतरमस्य सदास्ति मोक्षवाञ्छा॥"** (१।६६,६७) इत्युक्तम्। अर्थो धर्मश्च साधनरूपौ पुरुषार्थौ। तत्र **"विद्या-भूमि-हिरण्य-पशु-धान्य-भाण्डोपस्कर-मित्रादीनामर्जनमर्जितस्य विवर्धन-मर्थः"** इति अर्थलक्षणमाह कामसूत्रे (१।२।९) वात्स्यायनः। **"यतोऽभ्युदयनिश्श्रेयस-सिद्धिः स धर्मः"** इति कणादो धर्मतटस्थलक्षणमाह वैशेषिकसूत्रे (१।१।२)। जैमिनिः खलु धर्मस्वरूपलक्षणमाह धर्ममीमांसासूत्रे **"चोदनालक्षणोऽर्थो धर्मः"** (१।१।२) इति। **"श्रुतिस्मृतिविहितो धर्मः"** इति धर्मलक्षणं वासिष्ठधर्मसूत्रे (१।४) प्रोक्तम्। वात्स्यायन-प्रणीते कामसूत्रेऽपि **"अलौकिकत्वाददृष्टार्थत्वादप्रवृत्तानां यज्ञादीनां शास्त्रात् प्रवर्तनम्, लौकिकत्वाद् दृष्टार्थत्वाच् च प्रवृत्तेभ्यश्च मांसभक्षणादिभ्यः शास्त्रादेव निवारणं धर्मः, तं श्रुतेर् धर्मज्ञसमवायाच् च प्रतिपद्येत"** इति (१।२।७, ८) दृश्यते।

तत्र पुरुषार्थेषु धर्मस्य प्राथम्यमिति लोकेऽपि **"धर्मार्थकाममोक्षाः"** इति प्रसिद्धिरस्ति। भारतवर्षीय-ज्ञानविज्ञान-विश्वकोषरूपे महाभारते खलु वेदव्यासः कृष्णो द्वैपायनो मुनिरपि **"ऊर्ध्वबाहुर् विरौम्येष न च कश्चिच् छृणोति मे। धर्मा-दर्थश् च कामश् च स किमर्थं न सेव्यते॥"** (१८।५।६२) इति रोरूयते। तत्र धर्मान् न केवलं मोक्षः, किन्तु लोकैषणाप्रधानानामीप्सिततमौ अर्थकामौ अपि धर्मादेव

सिद्ध्यत इति मुनेरभिप्रायोऽवगम्यते। अत एव धर्मस्य परम्परया मोक्षफलकत्वमपि एतेन वचनेन सूच्यते। गणसङ्घातादयस् सामाजिक-राष्ट्रनीतिक-क्रियाकलापा अपि धर्माश्रयाः सन्त एव समेधन्त इति च तत्रैवाऽपि (१२।३५।३२, ३३) उक्तमिति सर्वथा धर्मः पुरुषार्थेषु प्राथम्यं भजते। यद्यपि धर्माचरणायाऽप्यर्थः आवश्यकोऽपि भवति तथाऽपि अर्थं विनाऽपि धर्माचरणं सम्भवतीति **"तीर्थस्नानेन जप्येन परोपकरणोक्तिभिः। विनार्थं लभ्यते धर्मो धर्मादर्थः स्वयं भवेत्॥ विनैवाऽर्थार्जनोपायं धर्मादर्थो भवेद् ध्रुवम्। अतोऽर्थचिन्तामुत्सृज्य धर्ममेकं समाश्रयेत्॥ धर्मादर्थोऽर्थतः कामः कामात् सर्वसुखोदयः। स्वर्गोऽपि सुलभो धर्मात् काश्येका दुर्लभा परम्॥"** इत्युक्त्वा स्कान्दे काशीखण्डे (२५।३१-३३) प्रतिपादितम्। तस्मात् पुरुषार्थेषु धर्मस्यैव प्राथम्यमवगन्तव्यम्। धर्मस्य अन्यपुरुषार्थमूलत्वं च **"श्रद्धाबीजो विप्रपादाम्बुसिक्तो विद्या शाखास् ताश् चतस्रो दशाऽपि। पुष्पाण्यर्था द्वे फले स्थूलसूक्ष्मे मोक्षः कामो धर्मवृक्षोऽयमीड्यः॥"** इति काशीखण्डे (३।९५), **"यथेक्षुहेतोरपि सेचितं पयस् तृणानि वल्लीरपि च प्रसिञ्चति। तथा नरो धर्मपथेन सञ्चरन् सुखं च कामाँश् च वसूनि चाऽश्नुते"** इति वीरमित्रोदये परिभाषाप्रकाशे (पृ.६७), **"धर्मात् सञ्जायते ह्यर्थो धर्मात् कामोऽभिजायते। धर्मादेवाऽपवर्गश् च तस्माद् धर्मं समाश्रयेत्"** इति कूर्मपुराणे (१।२।५४-५५), गरुडपुराणे च (२।१२।३१-३२); **"कामार्थौ लिप्समानस् तु धर्ममेवाऽऽदितश् चरेत्। न हि धर्मादपैत्यर्थः कामो वाऽपि कदाचन"** इति उद्योगपर्वणि (१२४।३७), **"अर्थसिद्धिं परामिच्छन् धर्ममेवादितश् चरेत्। न हि धर्मादपैत्यर्थः स्वर्गलोकादिवाऽमृतम्"** इति च उद्योगपर्वण्येव (३७।४८), **"धर्मश् चाऽर्थश् च कामश् च त्रिवर्गो जन्मनः फलम्। धर्महीनस्य कामार्थौ वन्ध्यासुतसमौ प्रभो"** इति मत्स्यपुराणे (२१३।३) चोक्तम्। अत एव विश्वरूपेणाऽपि याज्ञवल्क्यस्मृतिव्याख्याया बालक्रीडायाः प्रारम्भे **"सुश्लिष्टवेदमूलः पावनशाखो महाध्वरस्कन्धः। हारि-त्रिवर्ग-कुसुमो मोक्षफलो जयति वेदार्थः"** इत्युक्तम्।

२. धर्मज्ञानं च प्राधान्येन वेदादेव भवति, वेदस्वरूपादीनां यथार्थज्ञानं च मुख्यतया वेदाङ्गशास्त्रेभ्य एव भवति

धर्मज्ञानं चाऽस्मादृशानां वेदादेव भवति। वेद-स्वरूप-प्रयोगार्थ-रहस्य-सम्यग्ज्ञानमपि अस्मद्विधानां शिक्षादिभिः षड्भिरङ्गैस् तदनुकूलया गुरुशिष्य-परम्परया यथाविधि वेदस्याऽध्ययनेन चैव भवति। तथाहि आचार्ययास्कोऽपि **"साक्षात्कृतधर्माण ऋषयो बभूवुस् तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः, उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमङ् ग्रन्थं समाम्नासिषुर् वेदञ् च वेदाङ्गानि च"** (निरुक्ते १।६।४) इति वदन्नभिप्रैति। **"पुराण-तर्क-मीमांसा-धर्म-**

शास्त्रा-ऽङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश" इति वेदानां विशेष्यत्वं पुराणादीनां विशेषणत्वं च प्रदर्शयन् याज्ञवल्क्यस्मृतिकारोऽपि यास्काभिप्रायानुकूलमेवाऽभिप्रायं प्रकटयति।

३. धर्मरक्षणं वेदरक्षणं च ब्राह्मणैर् मुख्यतया कर्तव्यम्

धर्मरक्षणं ब्राह्मणैर् विशेषतः कर्तव्यमिति **"चतुष्पात् सकलो धर्मो ब्राह्मणस्य विधीयते। पादावकृष्टो राजन्ये तथा धर्मो विधीयते। धर्मो वैश्ये च शूद्रे च पादःपादो विहीयते। विद्यादेवंविधेनैषां गुरुलाघवनिश्चयम्"** इति महाभारतवचनाद् (१२।३५।३२,३३) अपि अवगम्यते। वेदविद्यासंरक्षणं च ब्राह्मणैर् विशेषतः कर्तव्यमिति **"विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष् टेऽहमस्मि"** इति श्रुतिवचनाद् (संहितोपनिषद्ब्राह्मणे, तृतीये खण्डे; शाट्यायनीयोपनिषदि, निरुक्ते २।१।४, वासिष्ठधर्मसूत्रे च २।८) अपि ज्ञायते।

आर्यावर्त पुस्तकालय

४. वेद-स्वरूपा-ऽर्थ-प्रयोग-रहस्यानां ज्ञानाय तस्य संरक्षणाय प्रचाराय च स्वाद्ध्यायशालाकुटुम्बस्य प्रयत्नः

उक्तविधे शास्त्रार्थे यास्कवचनमनुसरद्भिरस्माभिः स्वाद्ध्यायशालाकुटुम्बजनैः षड्भिरङ्गैरज्जितं वेदार्थं ज्ञातुमनुशीलयितुं च वेदाङ्गाध्ययनेन तद्विषयकग्रन्थप्रणयनेन च प्रयत्नः क्रियमाणोऽस्ति। तत्र शिक्षा कल्पो व्याकरणं निरुक्तं छन्दश्शास्त्रं ज्योतिषं चेति षड् वेदाङ्गानि। तेषु शिक्षाविषयेऽस्माभिः प्रभूतं विचारितमस्ति। कौण्डिन्न्यायनशिक्षेति विपुलकायो ग्रन्थश् च प्रणीतोऽस्ति। स च ग्रन्थो **"वेदाङ्गशिक्षाशास्त्रस्य रचनात्मकं समीक्षात्मकं च परिशीलनम्"** इति शीर्षके वाचस्पतिः (डी.लिट्.) इत्युपाधये मुद्रितग्रन्थरूपेण वाराणसीस्थ-सम्पूर्णानन्दसंस्कृतविश्वविद्यालये प्रस्तुतः, १९९२तमे क्रैस्ताब्दे (२०४९तमे वैक्रमाब्दे) स्वीकृतश् च। एतर्हि च कौण्डिन्न्यायनशिक्क्षानाम्नैव स ग्रन्थः प्रचरति। स च काश्यां विश्वनाथपुस्तकालये (गोयन्कापुस्तकालये), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयपुस्तकालये, काशीहिन्दुविश्वविद्यालयपुस्तकालये, काशीविद्यापीठपुस्तकालये, देहल्यां राष्ट्रियसंस्कृतसंस्थानपुस्तकालये, लालबहादुरशास्त्रि-संस्कृत-विद्यापीठे, कोलकातायां भारतीयभाषापरिषत्पुस्तकालये, प्रयागे गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठपुस्तकालयेऽन्यत्र चोपलभ्यते। पाणिनीयशिक्षायाः शोधोपलब्धिपूर्णा वेदाङ्गशिक्षाविमर्शाख्या व्याख्यान्तराऽगतार्था व्याख्या च कृता प्रकाशिता (१९९८ क्रै.) च। तथैव नारदीयशिक्षायाः शिक्षाविवेचन्याख्या व्याख्या च कृता प्रकाशिता (२००२ क्रै.) च। कल्पविषये च किञ्चिदध्ययनं कृतमस्ति। गम्भीरतरमध्ययनं

प्रारब्धमस्ति। **"वैदिकयज्ञा औपनिषदमात्मज्ञानं च"** इत्येतस्मिन् विषये अनुसन्धान-प्रबन्धं प्रस्तुत्य अमुर्ह्येव (१९८६तमे क्रैस्ताब्दे) विद्यावारिधिः (पीएच्.डी.) इत्युपाधिरपि प्राप्तोऽस्ति। माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाध्यायिनां द्विजानां प्रचरन्तीषु नित्यसदाचारकर्म-संस्कारकर्म-श्राद्धकर्मादिपद्धतिषु स्वशाखासूत्रदृष्ट्या समीक्षणे बह्वीरशुद्धीर् दृष्ट्वा तासां परिमार्जनाय दिक्प्रदर्शनं कर्तुं **"माद्ध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायिनां निरग्निकानां द्विजानां नित्य-सदाचारकर्म-संस्कारकर्म-श्राद्धकर्मादि-वैदिकमन्त्रसङ्ग्रहः (सपरिशिष्टः)"** इति ग्रन्थः प्रणीतः प्रकाशितश् च (२०५२ वै.) अस्ति। पाणिनीये व्याकरणेऽप्यनल्पो विचारो विहितोऽस्त्यस्माभिः। उपलभ्यमानव्याकरणान्तरविचारेण वैदिकप्रयोगविचारेणोपलभ्यमानप्रातिशाख्यविचारेण च पाणिनीयव्याकरणपरिष्कारश् च कृतोऽस्ति। पाणिनीय-व्याकरणस्य वेदपरकं व्याख्यानं च करिष्यमाणमस्ति। निरुक्तमपि यास्कप्रणीतं निघण्टुसहितं विशेषेणाऽधीतमस्माभिः। तत्र निघण्टुस्थानीयः **कौण्डिन्न्यायनकोषा-परनामको वेदभाषानिघण्टुनामको** ग्रन्थोऽपि षट्सहस्रश्लोकात्मको निष्पन्नप्रायो विरच्यमानोऽस्त्यस्माभिः। पिङ्गलकृतं छन्दश्शास्त्रमप्यस्माभिर् विशेषेणाधीतम्। तस्याऽपि छन्दस्तत्त्वप्रकाशनपरं व्याख्यानं चिकीर्षितमस्ति।

उक्तप्रकारेण षडङ्गशास्त्रतेजोभिर् विशेषेणोज्ज्वलीकृतं वेदार्थज्ञानरत्नं प्राप्तुं प्रयतमानैः स्वाद्ध्यायशालाकुटुम्बजनैः वेदाङ्गज्योतिषपरिशीलनं च कृतं क्रियमाणं चाऽस्ति।

भूमण्डले स्वकीयसैनिकार्थिकबलश्रेष्ठतया सह स्वकीयां धार्मिकसांस्कृतिकश्रेष्ठतामपि निराबाधतया स्थापयितुमिच्छुकैः परचक्रिभिस् तत्कृपाभाजनतां वरयद्भिस् तदनुजीविभिश् च कैश्चिद् विवेकशिथिलैर् जनैर् वैदिकसनातन-वर्णाश्रमधर्मस्य तन्मूलभूताया वेदवेदाङ्गादिशिक्षायाश् चोन्मूलने क्रियमाणे तत्-प्रतीकाराय यथाशक्ति चेष्टमानैरस्माभिर् वैदिकशिक्षायाः प्रचाराय वैदिकसनातन-वर्णाश्रमधर्मस्य संरक्षणाय चाऽपि प्रयत्नो विशेषतः क्रियमाणोऽस्ति।

तत्र यास्क-पाणिनि-कात्यायन-पतञ्जलि-वररुचि-भर्तृहरिप्रभृतिभिः श्रेष्ठैर् भारतवर्षीयैर् भाषाव्याकरणविद्भिराविष्कृतस्य व्याख्यातस्य च शाश्वतस्य भाषा-व्याकरणसिद्धान्तस्य तिरस्कारं कृत्वा पाश्चात्त्यगतानुगतिकतया कृतस्य नैपालीय-भाषाव्याकरणस्य शासकाज्ञाबलेन कृतस्य क्रियमाणस्य च प्रचारस्य विरोधे ग्रन्थानां विरचनप्रकाशनप्रचारणैः, नेपालदेशे २०११तमाद् वैक्रमाब्दात् प्रभृति शासकैः प्रारब्धस्य वेदवेदाङ्गादिसंस्कृतशिक्षामूलोन्मूलनकार्यस्य प्रतिरोधस्य प्रयासेन, वैदिक-धर्मदर्शन–वेदवेदाङ्गवेदोपाङ्गस्मृतिपुराणादिशास्त्र-ज्योतिषाऽऽयुर्वेदादिप्राच्यविज्ञान-वैदिकराष्ट्रनीत्यादि–सार्वलौकिकज्ञान–संरक्षण-संवर्धन-प्रचारणपर-बहुमुखसंस्कृत-

विद्यालयसंस्थापन-सञ्चालनप्रयत्नेन, स्वपुत्राणां च **"न्याय्यां वृत्तिं वा तपस्या-मुपेत्य आपद्धर्मं चावलम्ब्य क्वचिच् च। स्वे धर्मे ह्यारमतामार्ययूनां सिद्धयै वृद्धयै चाऽऽदृतोऽस्त्येष यत्नः"** इति सङ्कल्पं कृत्वा वैदिकसनातनवर्णाश्रमधर्मानुसारिण्यां शिक्षायां प्रवर्तनेन, वैदिके शिखासूत्रधारण-संस्कारपालन-भक्ष्याऽभक्ष्य-पेयाऽपेय-स्पृश्याऽस्पृश्य-गम्यागम्य-गन्तव्याऽगन्तव्य-कार्याऽकार्यादिविषयकश्रुति-स्मृतिपुराण-विधिनिषेधानुसरण-स्नान-सन्ध्योपासन-ब्रह्मयज्ञसम्पादनादिके सदाचारे स्थिरी-करणेन, स्वस्य गृहे कुले समाजे ग्रामे देशे सम्पूर्णे भारतवर्षे च वैदिकसनातन-वर्णाश्रमधर्मस्य तदनुकूलशिक्षायाश्च प्रचारे यथाशक्ति क्रियमाणेन प्रयासेन चाऽयं प्रयत्नः स्वाद्ध्यायशालाकुटुम्बगृहपतिना विशेषतः प्रवर्त्यमानोऽस्ति। अयं प्रयत्नो वैदिकसनातनवर्णाश्रमधर्मानुयायिभिर् भारतवर्षवासिभिः सर्वैर् जनैस् तदनुकूलै-रन्यैश्च साहाय्यकरणेन सफलीकरणीयः।

५. षण्णां वेदाङ्गानामध्ययनस्य प्रसङ्गे लगधमुनिप्रोक्त-वेदाङ्गज्योतिषग्रन्थस्याऽध्ययनम्

उक्तविधे प्रयासे प्रवर्तमाने स्वाद्ध्यायशालाकुटुम्बजनैः कृतस्य वेदाङ्ग-ज्योतिषाध्ययनस्य विवरणं फलं चाऽत्र सम्पूर्णभूमण्डलस्थानां वेदवेदाङ्गार्थानु-शीलनपराणां विज्ञजनानामग्रे प्रस्तूयते।

६. लगधमुनिप्रोक्तस्य "पञ्चसंवत्सरमयम्" इत्यादिकस्य ज्योतिषग्रन्थस्य वेदाङ्गत्वम्

"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषम्" इति मुण्डकोपनिषदि (१।१।५) गणितेषु षट्सु वेदाङ्गेषु शिक्षाविषये कोऽपि भ्रमो बहोः कालात् पूर्वत एव प्रवृत्तोऽवगम्यते। तथाऽपि शैशिरीयऋग्वेदप्रातिशाख्यादयः प्रातिशाख्यग्रन्था एव तत्तद्वेदशाखासम्बद्धा **वेदाङ्गशिक्षाग्रन्था** इत्यवगम्यते। एतस्मिन् विषयेऽस्माभिः कौण्डिन्न्यायनशिक्षायाः प्रस्ताविकायां विस्तरेण प्रतिपादितमस्ति। तत् तत्रैव द्रष्टव्यम्। कलियुगाब्दानां सप्तत्रिंशे शतके (वैक्रमाब्दानां सप्तमे शतके) वर्तमान-त्वेन सम्भावितेन कुमारिलभट्टेनाऽपि **"प्रातिशाख्यानि वा यानि स्वाध्यायवदधीयते। गृह्यमाणतदर्थत्वादङ्गत्वं तेषु वा स्थितम्"** इति (तन्त्रवार्तिके १।३।२४, पृ.१९८), **"प्रातिशाख्यैः पुनर् वेदसंहिताध्ययनानुगतस्वरसन्धिप्रयतिविवृतिपूर्वाङ्गपराङ्गा-द्यनुसरणाद् वेदाङ्गत्वमाविष्कृतम्"** इति च (तत्रैव, पृ.१९९) उक्त्वा प्रातिशाख्यानां शिक्षारूपाणां वेदाङ्गत्वमास्थितमवगम्यते। प्रातिशाख्यानां स्वाध्यायवदधीतानां

पाठे विगानानामदर्शनाच्च तेषामेव शिक्षारूपाङ्गत्वमुपपन्नतरम्। पाणिनीयशिक्षादीनां तु तत्तद्वेदशाखासम्बद्धप्रातिशाख्याध्ययनेऽसमर्थानां कृतेऽनुकल्परूपशिक्षाख्यवेदाङ्गलघुग्रन्थत्वमवगन्तव्यम्। **कल्पग्रन्थास्** तु तत्तद्वेदशाखाविशेषसम्बद्धाः श्रौतसूत्र-गृह्यसूत्ररूपा ग्रन्थाः प्रसिद्धा एव। **व्याकरणग्रन्थास्तु** पाणिनितः प्राचीनैः शाकटायनादिभिराचार्यैः कृता अपीदानीं तेऽनुपलभ्यमाना इति पाणिनीयव्याकरणाऽष्टाध्याय्येवेदानीं व्याकरणरूपवेदाङ्गग्रन्थत्वेन स्वीक्रियते शिष्टपरम्परया। मुनिना पतञ्जलिना पाणिनीय-व्याकरण-भाष्य-प्रथमाह्निके पाणिनीयव्याकरणस्याध्येतव्यतायाः प्रतिपादने **"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयः"** इत्यागमवचनं प्रमाणरूपेण प्रस्तुत्य पाणिनीयव्याकरणस्याऽध्येतव्यतायाः प्रतिपादितत्वात् तत्र भवता पाणिनीयव्याकरणग्रन्थस्य वेदाङ्गग्रन्थत्वं प्रतिपादितमेव। पाणिनीयव्याकरणग्रन्थमेवादाय **"सर्ववेदपारिषदं हीदं शास्त्रम्। तत्र नैकः पन्थाः शक्य आस्थातुम्"** इति (२।१।५८, ६।३।१४) च वदता तत्र भवता पाणिनीयव्याकरणग्रन्थस्य वेदाङ्गग्रन्थत्वं स्फुटतया प्रतिपादितमेव। वेदाङ्गनिरुक्तग्रन्थोऽपीदानीं निघण्टुपञ्चाध्यायीव्याख्यानरूपो यास्कप्रणीतः प्रसिद्ध एव। वेदाङ्गच्छन्दश्शास्त्रग्रन्थश्च पिङ्गलकृतः पिङ्गलच्छन्दःसूत्रनाम्ना प्रसिद्ध एव। वेदाङ्गज्योतिषग्रन्थविषये त्विदानीं प्रायेणाऽबोधो भ्रम एव वाऽपि लोके प्रचरन् दृश्यते। इदानीं प्रायः सर्वे ज्यौतिषिकाः पण्डिताश् च प्रचलितं सूर्यसिद्धान्तग्रन्थं सिद्धान्तशिरोमणिग्रन्थमेव वाऽपि मुख्यं वेदाङ्गज्योतिषग्रन्थं मन्यमाना विलोक्यन्ते। तस्माद् वेदाङ्गज्योतिषग्रन्थस्य विषये विस्तरेण विचारः प्रस्तूयतेऽधस्तात्।

यद्यपि प्रचलिते सूर्यसिद्धान्तग्रन्थे **"अल्पावशिष्टे तु कलौ मयो नाम महासुरः। रहस्यं परमं पुण्यं जिज्ञासुर् ज्ञानमुत्तमम्॥ वेदाङ्गमग्र्यमखिलं ज्योतिषां गतिकारणम्। आराधयन् विवस्वन्तं तपस् तेपे सुदुश्चरम्"** (१।२,३) इत्यादिना सन्दर्भेण तस्य ग्रन्थस्य वेदाङ्गज्योतिषग्रन्थत्वं प्रतिपादितम्, सिद्धान्तशिरोमणिग्रन्थे च तस्य ग्रन्थस्य ब्राह्मणैरध्ययनीयतायाः प्रतिपादने **"वेदचक्षुः किलेदं स्मृतं ज्योतिषं *मुख्यता चाऽङ्गमध्येऽस्य* तेनोच्यते। संयुतोपीतरैः कर्णनासादिभिश् चक्षुषाऽङ्गेन हीनो न किञ्चित्करः॥ तस्माद् *द्विजैरध्ययनीयमेतत्* पुण्यं रहस्यं परमं च तत्त्वम्। यो ज्यौतिषं वेत्ति नरः स सम्यग् धर्मार्थकामाल्ँ लभते यशश् च"** (१।१।११,१२) इत्युक्त्वा तस्य ग्रन्थस्य वेदाङ्गज्योतिषग्रन्थत्वं प्रतिपादितम्, तथाऽपि सूर्यसिद्धान्त-सिद्धान्तशिरोमण्यादयो ग्रन्था मुख्या वेदाङ्गज्योतिषग्रन्था न सन्ति। इदानीं मुख्यो वेदाङ्गज्योतिषग्रन्थस् तु लगधमुनिप्रोक्तः **"पञ्चसंवत्सरमयम्"** इति प्रारब्धो ग्रन्थ एवाऽस्ति।

यद्यपि पुराकाले दिवाकरमधुच्छन्दमुखैः कृता वेदाङ्गज्योतिषशास्त्रग्रन्था आसन्निति **"ज्योतिश्शास्त्रं तु सुमहन् महामुनिसुरोत्तमैः। दिवाकरमधुच्छन्दमुखै-**

रन्यैश् च कारितम्" इति स्मृतिसन्दर्भषष्ठभागगतमार्कण्डेयस्मृतिस्थ-वेदाङ्गप्रतिपादनप्रकरणवचनाद् (पृ.२२) ज्ञायते, नारदसंहितादिषु ग्रन्थेषु ब्रह्माऽऽचार्य-वसिष्ठादयः प्राचीना ज्योतिषशास्त्रप्रवर्तका उक्ता इति तेषामपि ग्रन्था प्राचीने काले आसन्निति ज्ञायते, तथापीदानीं प्राचीनतमो वेदाङ्गज्योतिषशास्त्रग्रन्थो लगधप्रोक्तः **"पञ्चसंवत्सरमयम्"** इत्यादिको ग्रन्थ एवोपलभ्यते।

"पञ्चसंवत्सरमयम्" इत्यादिकस्य ग्रन्थस्य वेदाङ्गज्योतिषग्रन्थत्वं मुख्यतया नित्यब्रह्मयज्ञकारिणां स्वाध्यायाध्ययनपरायणानां वैदिकानां परम्परातोऽवगम्यते। सा च परम्परा शङ्करबालकृष्णदीक्षितादिलेखेभ्योऽपि ज्ञायते। तथाहि शङ्करबालकृष्णः कथयति—**"भारतस्य सर्वेषु प्रान्तेषु ब्राह्मणानां (वेदाङ्गज्योतिषग्रन्थस्य पाठः) समानोऽस्ति। वैदिका एतं ग्रन्थं साक्षाद् वेदान् न्यूनं न मन्यन्ते। तान् प्रति यदि भवद्भिः पठ्यमाने वेदाङ्गज्योतिषग्रन्थे अयं पाठोऽशुद्धोऽस्ति, तत्स्थाने एतं शुद्धं पाठं कुर्वन्तु भवन्तः इत्युच्येत, तदा ते एतं प्रस्तावं स्वीकर्तुं कदाऽपि तत्परा न भविष्यन्ति"** इति[1]। तथैव धूलिपालकुलजः अर्कसोमयाजी आन्ध्रदेशजो वैदिको ज्यौतिषिकश् च **"वेदाङ्गज्यौतिषमिति कश् चिद् ग्रन्थो वर्तते महात्मना लगधेन प्रवर्तित इति प्रतिपादितः। यद्यपि याजुषमार्चं चेति वेदाङ्गज्यौतिषं द्विविधं प्रसिद्धं लोके। यथा वेदस् तथैवेदमद्यापि कण्ठे वर्तते बहूनां वेदपण्डितानाम्"**[2] इति प्रतिपादयति। इदानीं प्रचरत्सु आह्निक-कृत्यसङ्ग्रहेषु च ब्रह्मयज्ञरूप-स्वाध्यायाध्ययनप्रकरणे षण्णां वेदाङ्गानां मध्ये ज्योतिषरूपस्य वेदाङ्गस्य **"पञ्चसंवत्सरमयम्"** इति प्रतीकः सङ्गृहीतो दृश्यते। १९३७तमे वैक्रमाब्दे षट्चत्वारिंशद्वर्षवयस्केन वैद्य-नारायणशर्मणा नागोजिभट्टकृतमाह्निकम्, आचारमयूखम्, धर्मप्रवृत्तिम्, हलायुधकृतं ब्राह्मणसर्वस्वम्, आचारार्कं च विलोक्य तेभ्योऽन्येभ्यश् च सम्बद्धेभ्यः स्वशाखाश्रुतिसूत्रादिग्रन्थेभ्यः सारं सङ्गृह्य रचितत्वेनोक्तायाम्, १९५२ तमे वैक्रमेऽब्दे परिष्कृतं रूपं दत्त्वा चतुर्थावृत्तौ मुद्रितायाम्, १९८०तमे वैक्रमेऽब्दे तु नवमावृत्तौ मुद्रितायां **शुक्लयजुर्वेदीय-माध्यन्दिन-वाजसनेयिनाम् आह्निकसूत्रावलौ** दिनचतुर्थभागकृत्यरूपेषु मध्याह्नकृत्येषु प्रदर्शिते ब्रह्मयज्ञप्रयोगेऽपि **"पञ्चसंवत्सरमयम्"** इत्येव वेदाङ्गज्योतिषप्रतीकः प्रदर्शितो दृश्यते (पृ.१७७)। सुधाकरद्विवेदेनाऽपि १९६४तमे वैक्रमेऽब्दे वाराणस्यां मेडिकल्हाल्मुद्रायन्त्रालये मुद्रितस्य **"याजुषज्यौतिषम् आर्चज्यौतिषं च"** इत्युक्तस्य ग्रन्थस्य भूमिकायाम्

---

१. भारतीय ज्योतिष, अनु.शिवनाथ झारखण्डी, हिन्दी समिति, लखनऊ, १९७५ क्रै., पृ.९३।

२. ज्योतिर्विज्ञानम्, अर्कसोमयाजिना श्रीधूलिपालेन विरचितम्, वाराणसेय-संस्कृत-विश्वविद्यालयः, १९६४ क्रै., पृ.५।

"षडङ्गपाठः पुण्यपुञ्जोत्पादक इति समवगम्याऽधीयते लोका इदं वेदचक्षूरूपं याजुषमार्चं च ज्यौतिषमपि" इत्युक्तमस्ति। एतावता च **"पञ्चसंवत्सरमयम्"** इत्यादेर् ग्रन्थस्य परम्पराप्राप्तरूपेण वेदाङ्गज्योतिषग्रन्थत्वं सर्वैरास्तिकैर् जनैः स्वीक्रियत इति सुस्पष्टं भवति।

"पञ्चसंवत्सरमयम्" इत्यादिकस्य वेदाङ्गज्योतिषग्रन्थस्य नित्ये ब्रह्मयज्ञेऽध्ययनीयत्वम्, उपाकर्मणि उत्सर्जनकर्मणि च कर्तव्ये स्वाध्यायप्रवचने प्रवचनीयत्वम्, अलङ्घनीयत्वम्, पुराणादिभ्यो विशिष्टत्वम्, मान्यतरत्वम्, सर्वथाऽलङ्घनीयत्वं च कालीघट्टनगरे मनसुखरायमोरमहाशयेन मुद्रापितस्य स्मृतिसन्दर्भस्य २०१३तमे वैक्रमेऽब्दे मुद्रिते षष्ठे भागे सङ्गृहीतायां लौगाक्षिस्मृतावुक्तम्। तथाहि—

स्वाध्यायी तु हि वेदस्य ब्रह्मयज्ञाय सन्ततम्।
इषे त्वेत्यनुवाकान्तमनुवाकाँस् ततः पुनः॥ ....
ऋग्वेदेऽप्यग्निमीडेति अग्न आयाहि सामनि।
शं नो देवीति परमे वेदवाक्यमृचं तु वा॥
वदेदधीत्य विधिना साक्षात् कल्पे ततः पुनः।
अथातो दर्शपूर्णेति प्रणयत्यन्तकं जपेत्॥
वृद्धिरादैच्-सूत्रमध्ये तत्त्रयं समुदीरयेत्।
ऋग्वेदलक्षणे चाऽपि गौर् ग्मेति च वदेत् तथा।
पञ्चसंवत्सरमिति ज्योतिःसूत्रं च तद् वदेत्।
मयरेत्यादिकं सूत्रं छन्दोविचितिमध्यगम्॥
अथातो जैमिनेः सूत्रमथातो व्यासभाषितम्।—इति (पृ.२९९),
तस्मिन् वेदोपदेशेऽपि तैष्यां श्रावणकर्मणि।
प्रधानहोमात् परतः श्रुतीनामुपदेशतः॥
परं कल्पोपदेशोऽपि क्रियते शास्त्रवाक्यतः।
तत्समत्वेन च तथा पाणिनीयस्य तत्परम्॥
गौर्ग्मेत्यादिसमाम्नायादिकबोधकताकृतः।
शास्त्रस्य तत्परं भूयः *पञ्चादिग्रन्थकस्य च*॥
मयादिसूत्रकस्याऽपि मीमांसायुग्मकस्य च।
अथात इति तत्सूत्रद्वयस्याऽपि क्रमेण वै॥
तत्समत्वेन विहितोपदेशो वेदकर्मणि।
तस्मादेतानि सर्वाणि ह्यलङ्घ्यान्येव सर्वदा॥
पुराणधर्मशास्त्रादिशास्त्राणि निखिलान्यपि।
न तैस् समानीति बुधाः प्रवदन्ति यतस्तु हि॥

नोपदिष्टानि तानि स्युः प्रतिसंवत्सरं परम्।
उपदिष्टानि तु पुनः यानि कर्मणि तादृशे॥
स्युरेवाऽलङ्घनीयानि गुरूणि प्रतिवत्सरम्।
द्विवारं बहुधाऽऽवृत्त्या यावज्जीवं विशेषतः॥–इति (पृ.२७५-२७६) च।

"पञ्चसंवत्सरमयम्" इत्यादिकस्य वेदाङ्गज्योतिषग्रन्थस्य नित्ये ब्रह्मयज्ञे स्वाध्यायाध्ययनरूपेऽध्ययनीयत्वं देवीभागवतेऽपि(११।२०।४-१०) उक्तम्। तथाहि–

विमुक्तये सर्वपापक्षयार्थं चैवमेव हि।
सूत्रोक्तदेवताप्रीत्यै ब्रह्मयज्ञं करोम्यहम्॥
गायत्रीं त्रिर् जपेत् पूर्वं चाऽग्निमीडे ततः परम्।
यदङ्गेति ततः प्रोच्य अग्निर् वै इति कीर्तयेत्॥
अथ महाव्रतं चैव पन्था एतच् च कीर्तयेत्।
अथाऽतः संहितायाश् च विदामघवदित्यपि॥
महाव्रतस्येति तथा इषे त्वोर्जे इतीव हि।
अग्न आयाहि चेत्येवं शन्नो देवीरितीति च॥
अथैतस्य समाम्नायो वृद्धिरादैजितीव हि।
अथ शिक्षां प्रवक्ष्यामि *पञ्चसंवत्सरेति च* ॥
मयरसतजभनेत्येव गौर्म्मेति कीर्तयेत्।
अथातो धर्मजिज्ञासा अथातो ब्रह्म इत्यपि॥
तच् छंयोरिति च प्रोच्य ब्रह्मणे नम इत्यपि।–इति।

आर्यावर्त पुस्तकालय

शिवपुराणस्य कैलाससंहितायाः (१२।८८-९२) वचनेनाऽपि **"पञ्चसंवत्सरमयम्"** इत्यादिकस्य ग्रन्थस्य वेदाङ्गज्योतिषग्रन्थरूपेण नित्यस्वाध्यायाध्ययनेऽप्यध्ययनीयत्वं सूचितमवगम्यते। तथाहि शिवपुराणवचनम्–

ब्राह्ममोङ्कारसहितं नमो ब्रह्मण इत्यपि।
जपित्वा त्रिस् ततो ब्रूयादग्निमीडे पुरोहितम्॥
अथ महाव्रतमिति अग्निर् वै देवानामतः।
तथैतस्य समाम्नायमिषेत्त्वोर्ज्जे त्त्वा वेति तत्॥
अग्न आयाहि वीतये शन्नो देवीरभीष्टये।
पश्चात् प्रोच्य मयरसतजभनलगैः सह॥
सम्मितं च ततः *पञ्चसंवत्सरमयं* ततः।
समाम्नायः समाम्नातः अथ शिक्षां वदेत् पुनः॥

प्रवक्ष्यामीत्युदीर्याऽथ वृद्धिरादैच् च संवदेत्।
अथातो धर्मजिज्ञासेत्युच्चार्य पुनरञ्जसा।
अथातो ब्रह्मजिज्ञासा वेदादीनपि सञ्जपेत्॥–इति।

एतावता च **"पञ्चसंवत्सरमयम्"** इत्यादिको ग्रन्थ एवेदानीं वेदाङ्गज्योतिषशास्त्रस्य मुख्यो ग्रन्थ इति स्वीकर्तव्यमिति सुस्पष्टं भवति।

७. वैदिकानां कृते धर्ममोक्षविषये वेदवेदाङ्गादीनामेव मुख्यतया प्रामाण्यम्

भारतवर्षीयस्य चातुर्वर्ण्यस्य कृते धर्मे मोक्षे च मुख्यं प्रमाणं वेद एव। वेद इति च मुख्यतया मन्त्रसंहिता-ब्राह्मणग्रन्थयोर् ग्रहणं भवति। आरण्यकानि उपनिषदश् च प्रायेण ब्राह्मणग्रन्थेष्वन्तर्भवन्तीति मन्त्र-ब्राह्मणयोर् ग्रहणेनैव तेषामपि ग्रहणं भवति। एतस्मिन् विषये **"मन्त्रब्राह्मणयोर् वेदशब्दः"** इति कौषीतकिगृह्यसूत्रे (३।१२।२३), **"मन्त्रब्राह्मणयोर् वेदनामधेयम्"** इति आपस्तम्बश्रौतसूत्रे (२४।१।३१), सत्याषाढश्रौतसूत्रे (१।१।७), कात्यायनप्रतिज्ञासूत्रे (१।२) च, **"मन्त्रब्राह्मणं वेद इत्याचक्षते"** इति बौधायनगृह्यसूत्रे (२।६।२), **"मन्त्राश्च ब्राह्मणं च वेदः"** इति शबरस्वामिकृते जैमिनीयधर्ममीमांसासूत्रभाष्ये (२।१।३३), **"आम्नायः पुनर् मन्त्राश् च ब्राह्मणानि च"** इति कौशिकसूत्रे (१।३) दृश्यते इति चाऽत्र स्मरणीयम्। कुमारिलभट्टमहोदयेन च **"यद् वा प्रयोगशास्त्रत्वमङ्गानामभिधीयते। वेदत्वं वा षडङ्गेऽपि वेदत्वस्मृतिरस्ति हि॥ 'मन्त्रब्राह्मणयोर् वेद इति नामधेयम्, षडङ्गमेके' इत्यङ्गान्यपि वेदशब्दवाच्यानि स्मर्यन्ते"** इत्यपि तन्त्रवार्तिके(१।३।११, पृ.१५६) प्रोक्तमित्यप्यत्र स्मरणीयम्।

एवं च वेदानां महास्मृतिरूपाणां वेदाङ्गानां च धर्मे मोक्षे च मुख्यं प्रामाण्यमवगन्तव्यम्। अन्येषां परिशिष्टा-ऽनुस्मृति-पुराणोपपुराणादीनां तु वेदवेदाङ्गोपोद्बलकानामेव सतां धर्मे मोक्षे च प्रामाण्यं भवति।

तत्राऽनादेरपौरुषेयस्य वेदस्य गुरुशिष्यपरम्परयाऽविच्छेदेन धारणेन वेदादिशास्त्रयथार्थस्वरूपरक्षायै तदर्थाधिगमनेन धर्ममोक्षसाधनाय चैव द्विजातीनामुपनयनं क्रियते। अत एवोपनयनपूर्वकमुपाकर्मपूर्वकं च विधिनाऽधीतानां हि शास्त्राणां धर्मे मोक्षे च मुख्यं प्रामाण्यम्। अन्येषां ग्रन्थानां तु तथाऽधीतशास्त्रविहितोक्तसूचितानुवादेन, तथाधीतशास्त्राकाङ्क्षापूरणेन, तथाऽधीतशास्त्रानुकूलार्थसमर्पणेन, तथाऽधीतशास्त्राऽविरोध्यर्थप्रतिपादनेन चैव वेदादीनामुपबृंहणेनैव प्रामाण्यं धर्ममीमांसाशास्त्रेण शिष्टैश्च स्वीक्रियमाणमवगम्यते। एष एव वैदिकानां मुख्यः शास्त्रप्रामाण्यसिद्धान्तः। अत एव च अधीति-बोधा-ऽऽचरण-प्रचारणक्रमो वेदवादिभिर्निर्धारितः।

उक्तं हि पाणिनीयव्याकरणभाष्यकारेण मुनिना पतञ्जलिना **"चतुर्भिश् च प्रकारैर् विद्योपयुक्ता भवत्यागमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेनेति"** इति (प्रथमे आह्निके)। महाकविः श्रीहर्षोऽपि **"अधीति-बोधा-ऽऽचरण-प्रचारणैर् दशाश् चतस्रः प्रणयन्नुपाधिभिः। चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दश-स्वयम्"** (नैषधीयचरिते १।४) इति निबध्नन् एतादृशमेवार्थं सूचयति। अध्ययनवतो विदुष एव कर्माधिकारं प्रतिपादयन्ति वैदिकाः। **"न ह्यविद्वान् विहितोऽस्ति"** इति धर्ममीमांसासूत्रे जैमिनिः (३।८।१८)। **"विद्यावतश् चाऽधानाधिकारः सामर्थ्यात्"** इति धर्ममीमांसासूत्रभाष्ये (६।८।१२) शबरः। **"कर्तृवैगुण्यमविद्वान् प्रयोक्ता कपूयाचरणश् च"** इति गौतमप्रणीतन्यायसूत्रभाष्ये (२।१।५९) वात्स्यायनः। कात्यायनश्रौतसूत्रे **"अङ्गहीनाऽश्रोत्रियषण्ढशूद्रवर्ज्जम्"** (१।१।५) इति वदन् कात्यायनोऽपि वेदाद्यध्ययन-रहितस्य श्रौतकर्मण्यनधिकारं सूत्रयत्येव। नारदीयपुराणे (१।२५।६१-), सौरपुराणे (१७।३७), वीरमित्रोदये संस्कारप्रकाशे (पृ.५११), संस्कारगणपतौ (पृ.६-७) च **"नित्यं नैमित्तिकं काम्यं यच् चाऽन्यत् कर्म वैदिकम्। अनधीतस्य विप्रस्य सर्वं भवति निष्फलम्"** इति वचनं दृश्यते। कुमारिलभट्टेनाऽपि "निरुक्तव्याकरणाद्यङ्गानुगृहीत-वेदाध्ययनजनितकर्मावबोधपूर्वकानुष्ठानायत्तत्वात् स्वर्गादिसिद्ध्यर्थापूर्वसिद्धेः अव्युत्पन्नरूपे च ज्ञातेऽपि निरुक्तावगत-धात्वर्थपूर्वकनामार्थज्ञानद्वारवाक्यार्थ-प्रतिपत्तिपूर्वकानुष्ठानादेवाऽदृष्टसिद्धिः" इति तन्त्रवार्तिके (१।३।११, पृ.१५४) उक्त-मस्त्येव। तथैव **"तस्माद् यान्येव शास्त्राणि वेदमूलानतिक्रमात्। अवस्थितानि तैरेव ज्ञातो धर्मो फलप्रदः॥ यथैवाऽन्यायविज्ञाताद् वेदाल् लेख्यादिपूर्वकात्। शूद्रेणा-ऽधिगताद् वाऽपि धर्मज्ञानं न सम्मतम्"** इति च तत्रैव (पृ.१२३) तत्रभवतोक्तम्।

अध्ययनविधौ हि **"वेदं समाप्य स्नायात्, ब्रह्मचर्यं वाऽष्टाचत्वारिंशकम्, द्वादशेऽप्येके, गुरुणाऽनुज्ञातः, विधिर् विधेयस् तर्कश्च वेदः, षडङ्गमेके, न कल्प-मात्रे, कामन् तु याज्ञिकस्य"** इत्यादिके पारस्करगृह्यसूत्रे (२।६।१, ५-८) अन्यत्र च दृष्टे वेदाङ्गानामप्यध्ययनस्य विधानात् वेदाङ्गेषु ज्योतिषस्याऽप्यध्ययनीयत्वाद् विध्यनुसारमधीतस्य **"पञ्चसंवत्सरमयम्"** इत्यादिकस्य ज्योतिषग्रन्थस्यैव अग्न्या-धान-दर्शपूर्णमासयाग-चातुर्मास्ययाग-निरूढपशुबन्धयागा-ऽग्निष्टोम-सोमयागादीनां श्रौतकर्मणाम् अन्नप्राशन-चूडाकरणोपनयन-विवाहादीनां गृह्यकर्मणां च कृते युग-वर्षा-ऽयन-ऋतु-मासा-ऽधिमास-पक्ष-तिथिरूपाणां कालानां निरूपणे परमं प्रामाण्यं स्वीकर्तव्यमेव। एतस्य ग्रन्थस्यैतादृशस्य प्रामाण्यस्याऽस्वीकरणं तु नास्तिक्यं जैन-बौद्धतुल्यतया वैदिकपरम्परायां विद्रोहस्याऽप्रामाण्यस्य चोद्भावनमेवेति निश्चीयते। मेषादिराशि-भौमादिग्रहचार-सूर्यचन्द्रोपराग-ग्रहदशानिरूपण-जन्मपत्रीनिर्माणादिषु

तु वेदाङ्गज्योतिषग्रन्थाविरोधेन सूर्यसिद्धान्तादयोऽपि ग्राह्याः स्युः। एतस्य विषयस्य सम्यगाकलने दृश्यमानं पुराणानामाधुनिकानां च गुरुपुरोहितपण्डितादीनामसामर्थ्यं तु शोच्यमेवाऽस्ति। वैधस्य वेद-वेदाङ्गाध्ययनस्याऽतीव विरलत्वेन लोकेऽश्रूयमाणत्वात्, मुख्यस्य ब्रह्मयज्ञस्याऽपि लुप्तप्रायत्वात्, मुख्यस्य ब्रह्मयज्ञस्वरूपस्याऽज्ञानात्, ब्रह्मयज्ञेऽध्येतव्यानां ग्रन्थानां परिचयस्याऽभावात्, ब्रह्मयज्ञस्याऽकरणात्, पाश्चात्त्यप्रवर्तितसंस्कृतशिक्षाप्रणाल्या अनुसरणात्, आर्षवेदवेदाङ्गशिक्षाप्रणाल्या विलोपनाच् च आधुनिका निकटभूतकालस्थाश् च लोके ख्यातिं गता महान्तो विद्वांसश् चाऽपि तादृशे शोच्यभावे प्राप्ता अवगम्यन्ते। एतादृशी स्थितिश् च कलेः प्रारम्भात् प्रभृत्येव शनैःशनैर् वर्धमाना, भारतवर्षे मुसलबाणानां शासनस्य प्रारम्भात् प्रभृति तु भृशं वृद्धा, निकटभूतकाले प्रारब्धात् पाश्चात्त्यशिक्षासंस्कृतीनामत्यधिकात् प्रचारात् प्रभृति तु चरमोत्कर्षं प्राप्ता प्रतीयते। तथापि ब्रह्ममीमांसासूत्रस्य "शाङ्करभाष्यम्" इति प्रथिते शारीरकमीमांसाभाष्ये शङ्करेणोल्लिखितं **"न हि पूर्वजो मूढ आसीदित्यात्मनाऽपि मूढेन भवितव्यमिति किञ्चिदस्ति प्रमाणम्"** इति वाक्यं च (२।१।११) स्मृत्वाऽधुनातनैर् विवेकशीलैर् जनैर् व्यवहरणीयमिति प्रतिभाति।

८. "पञ्चसंवत्सरमयम्" इत्यादिकस्य वेदाङ्गज्योतिषग्रन्थस्य प्रामाण्ये सन्देहस् तस्याऽपाकरणञ् च

अनादेः अतिदीर्घकालेनाऽनुवृत्तस्य च वैदिकसनातनवर्णाश्रमधर्मस्यानुसरणे नानाविधाभिर् बाधाभिरुपहता जना वेदादिशास्त्राणां सम्यगध्ययनेऽजागरूकत्वात् श्रद्धाहीनत्वात् अशक्तत्वाद् वा, अन्यैः प्राज्ञम्मन्यैर् जनधनबलेन लौकिकतर्कबलेन च नानाविधानां विमतीनां प्रदर्शनेन मुख्यस्य वैदिकमार्गस्याऽऽच्छादितत्वाच् च सन्देहमापन्ना अपथं प्रतिपन्ना वाऽप्यनुभूयन्ते। अत एव श्रौत-स्मार्तकर्मसु चान्द्रा ऋतव एव ग्राह्या इत्येतं वेदाङ्गज्योतिषग्रन्थानुकूलमनुपदं प्रतिपादयिष्यमाणं जैमिनीयधर्ममीमांसादिवैदिकशास्त्रसम्मतं सिद्धान्तमाकलयितुमसमर्था इष्टिपूर्वमाधानं कृतवन्तोऽपि जना वैदिकसम्मते वास्तविके सायने सौरे वसन्ते ऋतावपि व्यतीते वास्तविके सौरे ग्रीष्मे ऋतौ वैदिके सौरचान्द्रे शुक्रे मासे ग्रीष्मे ऋतौ प्रथमाग्निष्टोमसोमयागनाम्ना तथाकथितं श्रौतं यज्ञं कुर्वाणाः कारयन्तश् चाऽपि २०५६तमे वैक्रमाब्दे नेपालदेशे दृष्टाः। तस्मादत्र **"पञ्चसंवत्सरमयम्"** इत्यादिकस्य ग्रन्थस्य प्रामाण्ये कैश्चित् प्रदर्श्यमानान् सन्देहानुल्लिख्य तेषामपाकरणं क्रियते।

इदानीन्तनाः केचन वेद-वेदाङ्ग-शास्त्रश्रद्धाविधुरा वा वैदिकशास्त्ररक्षाव्यवस्थामाहात्म्यप्रतिपत्तिबन्ध्या वाऽपि लब्धशासकीयज्योतिषाचार्यपदवीका अपि

जनाः **"पञ्चसंवत्सरमयम्"** इत्यादेर् लगधप्रोक्त-वेदाङ्गज्योतिषग्रन्थस्य प्रामाण्य एव संशेरते।

तत्र केचन वेदाङ्गज्योतिषग्रन्थस्य पाठे क्वचित् किञ्चिद् विगानं दृष्ट्वा तमाक्षिपन्ति। किन्त्वेतद् अकिञ्चित्करम्। भवन्ति हि शाखाभेदमूला अध्येतृ-वैगुण्यादिमूला वा स्थूलसूक्ष्माः पाठभेदाः।

केचन तु सूर्यचन्द्रग्रहणाऽऽनयन-मङ्गलादिग्रहचाराऽऽनयनादिविषयाणा-मभावादपूर्णत्वात् **"पञ्चसंवत्सरमयम्"** इत्यादेर् वेदाङ्गज्योतिषग्रन्थस्याऽनादरणी-यतां प्रतिजानते। एतदपि तेषामविवेकमूलकमेव। को हि नाम वेदवेदाङ्गशास्त्र-स्वरूपप्रयोजनाभिज्ञः श्रौतसूत्रे जातकर्मसंस्कारादिविषयाभावं दृष्ट्वा तस्य हेयतां प्रतिजानीत। लगधमुनिप्रोक्तः **"पञ्चसंवत्सरमयम्"** इत्यादिको वेदाङ्गज्योतिषग्रन्थो हि श्रौतसूत्रोक्तवैदिकयज्ञार्थं विवाहसंस्कारादिगृह्यकर्मार्थं चाऽत्यन्तमेवाऽपेक्षितस्य वेद-वेदाङ्गोक्तस्य युगवर्षायनर्तुमासाधिमासतिथिनक्षत्रपर्वरूपस्य कालस्यैव निरूपणे प्रवृत्त इति जानन् वैदिको जनोऽलं तेषां लगधमुनिप्रोक्तवेदाङ्गज्योतिष-ग्रन्थमवज्ञाय प्रवर्तमानानां ज्यौतिषिकाणामुपेक्षणाय।

केचन पुनर् भास्करप्रभृतिभिर् महद्भिर् ज्यौतिषिकैः स्वग्रन्थेन वेदाङ्ग-ज्योतिषशास्त्रविषयं प्रतिपाद्यमानं प्रतिजानानैरपि **"पञ्चसंवत्सरमयम्"** इत्यादेर् लगधप्रोक्तस्य वेदाङ्गज्योतिषग्रन्थस्याऽनुल्लिखितत्वात् तस्य ग्रन्थस्य वेदाङ्गत्वं स्वीकर्तुं नोत्सहन्ते। किन्त्वेतदपि वैदिकानां कृतेऽकिञ्चित्करम्। कतमो ग्रन्थो वेदाङ्गग्रन्थत्वेन गुरुपरम्पराप्राप्तरूपेण स्वीक्रियते इति उपाकर्मोत्सर्जनब्रह्मयज्ञादि-विधिपालनपरा वैधस्वाध्यायाध्ययननिरता वैदिका द्विजवरा एव जानन्ति, न तु केवलं भौतिकं ज्यौतिषमेव संसम्मृशन्तो ज्यौतिषिकाः। यदि **"पञ्चसंवत्सरमयम्"** इत्यादिकं लगधप्रोक्तं ग्रन्थं वैदिका द्विजवरा वेदाङ्गज्योतिषग्रन्थत्वेन स्वाध्याया-ध्ययनावसरे ब्रह्मयज्ञावसरे चाऽधीयते तर्हि स हि ग्रन्थस् तेषां कृते वेदाङ्गज्योतिष-ग्रन्थत्वेन परमं प्रमाणम्, ततोऽन्ये ज्योतिषग्रन्थास् तु लगधप्रोक्तवेदाङ्गज्योतिष-ग्रन्थविहितोक्तसूचितार्थानुवादकास् तदाकाङ्क्षितपूरणेन तदनुकूलार्थसमर्पणेन तदविरोध्यर्थप्रतिपादनेन चैव तदुपबृंहका वाऽपि सन्त एव वैदिकधर्मे प्रमाणम्, अन्यथा त्वप्रमाणमेवेति हि वैदिकानां पन्थाः। एवं च यदि आर्यभट-वराहमिहिर-ब्रह्मगुप्त-लल्ल-श्रीधर-नवीनसूर्यसिद्धान्तकार-मुञ्जाल-श्रीपति-शतानन्द-भास्कर-गणेशदैवज्ञ-नारायणदैवज्ञ-रामदैवज्ञादिकृता ग्रन्था अन्ये चोपलभ्यमाना नारद-संहितादिग्रन्थास् तदंशा वाऽपि **"पञ्चसंवत्सरमयम्"** इत्यादेर् लगधप्रोक्तस्य वेदाङ्ग-ज्योतिषग्रन्थस्य वस्तुतो विरोधिनः प्रतिकूला वा सन्ति तर्हि ते सर्व एव वैदिकधर्मे

प्रमाणत्वेन स्वीकर्तुमशक्या एव। अविरुद्धांशे अप्रतिकूलांशे तु तेषामपि प्रामाण्यं स्वीकर्तुं शक्यमेव। कात्यायनेन पतञ्जलिना वाऽपि निराकृतत्वात् केषां चित् पाणिनिवचनानामप्रामाण्ये स्वीकृतेऽपि सर्वेषामेव पणिनिवचनानामप्रामाण्यं तु नैव स्वीक्रियते इति च स्मर्तव्यमत्र। कतिपयानां स्मृत्यंशानां वेदविरुद्धत्वेनाऽप्रामाण्ये स्वीकृतेऽपि सर्वस्या एव स्मृतेरप्रामाण्यं तु नाऽङ्गीक्रियते धर्ममीमांसकैरित्यप्यत्र न विस्मरणीयम्। एतस्मिन् प्रसङ्गे भारद्वाजवचनत्वेन जगन्मोहने शास्त्रावताराध्याये (पृ.४) उल्लिखितौ तललिखितौ श्लोकौ च मननीयौ—

मूलागमेषु सत्स्वेव कृत्रिमं यः प्रकाशयेत्।
प्रजाक्षयो भवेत् तस्य श्रोतुश् चाऽपि न संशयः॥
न मूलाऽऽगमवाक्यानि तदर्थो वा न विद्यते।
यत्राऽऽयुषः क्षयाद् धेतोस् तं ग्रन्थं नाऽवलोकयेत्॥ इति।

एवमेवाधुना ब्रह्म-वसिष्ठा-ऽङ्गिरो-ऽत्रि-कश्यप-मरीचि-पुलस्त्य-भृगु-च्यवन-यवन-गर्ग-पराशर-व्यास-शौनक-शुक-मनु-रोमशादिवचनत्वेन पुराणोपपुराणादिषु ज्योतिषग्रन्थविशेष-तद्व्याख्यानादिषु अर्वाचीनेषु धर्मशास्त्रनिबन्धेषु **भुजबलनिबन्ध-कृत्यकल्पतरु-कालविवेक-स्मृतिचन्द्रिका-स्मृतिरत्नाकर-चतुर्वर्गचिन्तामणि-पाराशरमाधवीय-निर्णयामृत-निर्णयसिन्धु-धर्मसिन्ध्वादिषु** चोपलभ्यमानानि वचनानि च मूलागमरूपोक्त-लगधप्रोक्तवेदाङ्गज्योतिषग्रन्थविरोधित्वे तु स्वाध्यायाध्ययने **"पञ्चसंवत्सरमयम्"** इत्यादिकं मूलागमरूपं वेदाङ्गज्योतिषग्रन्थमधीयानानां वैदिकानां द्विजानां कृते ह्यप्रमाणान्येव, पुराणादिष्वपि प्रक्षिप्तानां वचनानां वर्तमानत्वस्य मार्कण्डेयस्मृतिकार-दानसागरकारादिभिः प्राचीनैरर्वाचीनैश् च विवेचकैः स्वीकृतत्वाच् च।

केचन पुनः **"चक्षुः शास्त्रं जलं लेख्यं गणितं बुद्धिवित्तमाः। पञ्चैते हेतवो विप्रा ज्योतिर्गणविवेचने"** इति ब्रह्माण्डपुराणवचनम् (१।२४।१५२) एतादृशान्येवाऽन्यानि च वचनानि दृष्ट्वा **"पञ्चसंवत्सरमयम्"** इत्यादेर् वेदाङ्गज्योतिषग्रन्थस्य सौरे वर्षे ३६६ दिनानि उल्लिखतो गणितविरुद्धत्वात् सर्वथाऽप्रामाण्यमिति वदन्ति। आत्मानं श्रेष्ठं ज्यौतिषिकं मन्वानो भास्करेण 'गणकचक्रचूडामणिः' इत्युक्तो ब्रह्मगुप्तोऽपि तन्त्राणां परीक्षां कुर्वाणो **"युगमाहुः पञ्चाब्दं रविशशिनोः संहिताङ्गकारा यत्। अधिमासा-ऽवमरात्र-स्फुटतिथ्यज्ञानतस् तदसत्॥"** इति ब्राह्मस्फुटसिद्धान्ते (११।२) वदन्नेवमेव मन्यते स्म। किन्त्वेतदपि लगधप्रोक्तवेदाङ्गज्योतिषहृदयविदां मुनिप्रणीतग्रन्थमाहात्म्यमाकलयतामार्षग्रन्थव्याख्यानमर्यादायां जागरूकाणां वैदिकद्विजवराणां कृते सर्वथाऽश्रद्धेयमे[illegible]ो ह्यबालिश उपायमुपदिश्यमानमुपेयं मन्येत,

को वाऽमूढधीः **"काकवद् देवदत्तस्य गृहम्"** इत्याप्तोपदेशेन देवदत्तस्य गृहं परिचित्य क्षणान्तरे काकेषूड्डीय गतेषु परिचितमपि देवदत्तस्य गृहं देवदत्तगृहत्वेन न स्वीकुर्वीत। लगधमुनिना हि **"इत्युपायसमुद्देशो भूयोऽप्येनं प्रकल्पयेत्। ज्ञेय-राशिं गताभ्यस्तं विभजेज् ज्ञातराशिना"** (श्लो.४२) इति वदता उपायदिक्प्रदर्शनायैव **"पञ्चसंवत्सरमयम्"** इत्यादिको ग्रन्थः कृत इति सूचितमेव। एवं हि सति लगध-प्रोक्तग्रन्थस्य चरकमुनिना चरकसंहितायां सूत्रस्थाने प्रोक्ताम् **"अतश् च प्रकृतं बुद्ध्वा देशकालान्तराणि च। तन्त्रकर्तुरभिप्रायानुपायाँश् चाऽर्थमादिशेत्"** (२६।३७) इत्यार्षग्रन्थव्याख्यानमर्यादामवलम्ब्य व्याख्यानं कृत्वा लगधमुनिप्रोक्तग्रन्थगौरव-मनुपालनीयम्, न तु **"श्रुतिर् यत्र प्रमाणं स्याद् युक्तिः का तत्र नारद। जिज्ञासोर् युक्तिरिष्टाऽस्ति यदि श्रुत्यनुसारिणी"** इति वैदिकज्यौतिषिकमर्यादां ज्योतिषसिद्धान्त-सङ्ग्रहे ब्राह्मसिद्धान्ते (२।६४) प्रोक्तामप्युल्लङ्घ्य **"अज्ञात्वा ग्रन्थतत्त्वानि व्याख्यां यः कुरुते नरः। लोभाद् वाऽप्यथवा दम्भात् स पापी निरयं व्रजेत्"** इति ब्रह्मपुराणस्य (१३५।१७), **"यः प्रवृत्तां श्रुतिं सम्यक् शास्त्रं वा मुनिभिः कृतम्। दूषयत्यनभिज्ञाय तं विद्याद् ब्रह्मघातिनम्"** इति महाभारतानुशासनपर्वणः (२४।८) उक्तिं चाऽवज्ञाय ब्रह्मगुप्तेनेव पुरोभागित्वमवलम्बनीयम्।

केचन पुनः कुत्र चित् केन चिद् वेदाङ्गज्योतिषवचनत्वेन लिखितं वचन-मुपलभ्यमाने लगधप्रोक्तवेदाङ्गज्योतिषपाठेऽनुपलभ्य **"पञ्चसंवत्सरमयम्"** इत्यादेर् लगधप्रोक्तवेदाङ्गज्योतिषग्रन्थस्याऽपूर्णतां विकलतां च मत्वा तस्याऽप्रामाण्यमननु-सरणीयत्वं च प्रतिपिपादयिषन्ति। किन्त्वेतदपि न विचारसहम्। यदि तादृशेन तर्केण याज्ञवल्क्यस्मृतिव्याख्यायां मिताक्षरायाम्, स्मृतिचन्द्रिकायाम्, स्मृतिरत्नाकरे, चतुर्-वर्गचिन्तामणौ दानखण्डे श्राद्धकल्पे च, पाराशरमाधवीये, निर्णयसिन्धौ, भगवन्त-भास्करादिषु च मनुवचनत्वेनोल्लिखितानां बहूनां वचनानां मेधातिथि-गोविन्दराज-सर्वज्ञनारायण-कुल्लूकभट्ट-राघवानन्द-नन्दन-रामचन्द्रादिव्याख्यातायामुपलभ्यमानायां मनुस्मृतावनुपलम्भादुपलभ्यमानां मनुस्मृतिमपूर्णां विकलां चोक्त्वा तस्या अप्रामा-ण्यमननुसरणीयत्वं चोच्येत तर्हि सा उक्तिः श्रद्धेया स्यात्? नैव स्यात्। यथा आर्च-ज्योतिषे याजुषज्योतिषे च भेदोऽस्ति तथा शाखान्तरसम्प्रदायागते वेदाङ्गज्योतिषेऽपि कोऽपि भेदो विशेषो वाऽपि भवितुमर्हत्येव। सुसम्प्रदायादागतश्चेत् सोऽपि वैदिकानां कृते केनाऽपि रूपेण स्वीकार्यः स्यात्। तैत्तिरीयारण्यकेऽपि आन्ध्रपाठे द्रविडपाठे च विशेषो दृश्यते तर्हि वेदाङ्गज्योतिषपाठेऽपि भिन्नसम्प्रदायागते कोऽपि विशेषो भवितुमर्हत्येव।

कश्चन पुनः सर्वे वेदाङ्गग्रन्था गद्यसूत्ररूपाः सन्ति **"पञ्चसंवत्सरमयम्"** इत्यादिकं वेदाङ्गज्योतिषं तु पद्यरूपमिति वैलक्षण्यान् नैतस्य ग्रन्थस्य वेदाङ्गत्वं

स्वीकर्तुमुचितमित्यपि मन्यते, तेन तु वराकेण शौनककृतम् ऋग्वेदप्रातिशाख्यं न दृष्टं न च श्रुतमित्यनुकम्पनीय एव स वराकः प्रतीयते।

कश्चन पुनरन्यो निहीनतार्किकः **"पञ्चसंवत्सरमयम्"** इत्यादेर् ग्रन्थस्य केषाञ्चित् पद्यानां त्वर्थ एव न बुध्यते इति तस्याऽप्रामाण्यमननुसरणीयत्वं च साधयितुमिच्छति, तादृशा अश्रद्धालवो नास्तिकास् तार्किकास् तु ऋग्वेदस्याऽपि केषां चिन् मन्त्राणामर्थस्य सम्यगविज्ञायमानत्वाद् ऋग्वेदस्याऽपि अप्रामाण्यमननुसरणीयत्वमपि जल्पेयुः, न हि तत्राऽऽस्तिकानां वैदिकानां द्विजवराणां कोऽप्यादरो भवितुमर्हति।

दिवाकरादीनां प्राचीनतराणां मुनीनां वेदाङ्गज्योतिषग्रन्थेषु श्रूयमाणेष्वपि कथं लगधप्रोक्तस्य **"पञ्चसंवत्सरमयम्"** इत्यादेर् ज्योतिषग्रन्थस्यैव वेदाङ्गत्वमास्थीयते इति चेत् तत्र वाक्यपदीयस्थम् **"साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः। अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम्॥"** इति (१।१४१), **"तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम्। आश्रित्याऽऽरभ्यते शिष्टैः शब्दानामनुशासनम्"** इति (१।४३), **"अनादिमव्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम्। शिष्टैर् निबध्यमाना तु न व्यवच्छिद्यते स्मृतिः"** इति (१।१४४) च भर्तृहरिव्याख्यानं स्मरणीयमित्युच्यते। यथा शाकटायनादीनां शब्दानुशासनेषु श्रूयमाणेष्वपि पाणिनेः शब्दानुशासनग्रन्थो वेदाङ्गत्वेनेदानीं स्वीक्रियते शिष्टैः तथैव दिवाकरादीनां ज्योतिषग्रन्थेषु श्रूयमाणेष्वपि लगधप्रोक्तस्यैव ज्योतिषग्रन्थस्येदानीं वेदाङ्गत्वमास्थीयते शिष्टैरित्यवगन्तव्यम्।

९. लगधप्रोक्तवेदाङ्गज्योतिषग्रन्थानुकूलानां कालगणनादिकानां विषयाणां प्राचीनेषु अर्वाचीनेषु च ग्रन्थेषूल्लेखाः

"पञ्चसंवत्सरमयम्" इत्यादेर् लगधमुनिप्रोक्त-वेदाङ्गज्योतिषग्रन्थस्याऽनुकूलानां कालगणनादिकानां विषयाणां प्राचीनेषु अर्वाचीनेषु च बहुषु ग्रन्थेषूल्लेखाः प्राप्यन्ते। एतेन चाऽस्य ग्रन्थस्य प्रामाणिकपरम्पराऽऽगतत्वमनुसरणीयत्वं च स्फुटं भवति। एतस्य ग्रन्थस्याऽनुकूला विषयाश् च वेदमन्त्रसंहितासु, ब्राह्मणग्रन्थेषु, मैत्रायणीयारण्यके, बौधायनश्रौतसूत्रे, ब्रह्मवैवर्तपुराणे, ब्रह्माण्डपुराणे, भविष्यपुराणे, भागवतपुराणे, देवीभागवतपुराणे, मत्स्यपुराणे, लिङ्गपुराणे, वायुपुराणे, विष्णुपुराणे, विष्णुधर्मोत्तरपुराणे, शिवपुराणे, महाभारते, पाणिनीयव्याकरणाष्टाध्याय्याम्, कौटलीयार्थशास्त्रे, पाणिनीयव्याकरणभाष्ये, चरकसंहितायाम्, सुश्रुतसंहितायाम्, सूर्यप्रज्ञप्तौ, पञ्चसिद्धान्तिकायाम्, बृहत्संहितायाम्, ब्राह्मस्फुटसिद्धान्ते, अभिधर्मकोषव्याख्यायाम्, अष्टाङ्गसङ्ग्रहे, अष्टाङ्गहृदये, भट्टोत्पलकृतायां बृहत्संहिताव्याख्यायाम्, जीमूतवाहनकृते कालविवेके, उव्वटकृतायां माध्यन्दिनीयवाजसनेयि-शुक्लयजुर्वेद-

मन्त्रार्षसंहिताव्याख्यायाम्, हरदत्तकृतायां काशिकाव्याख्यायां पदमञ्जर्याम्, भट्टप्रकाशिकाख्यायामार्यभटीयव्याख्यायाम्, कालमाधवे, सायणकृतायामृग्वेदभाष्यभूमिकायाम्, विष्णुचित्तकृतायां विष्णुपुराणव्याख्यायाम्, महीधरकृतायां माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्रार्षसंहिता-व्याख्यायाम्, महूर्तचिन्तामणिव्याख्यायां प्रमिताक्षरायाम्, पीयूषधारायां च, वीरमित्रोदये, संस्कारकौस्तुभे, मिताक्षराबालम्भट्ट्याम्, संस्काररत्नमालायाम्, पुरुषार्थचिन्तामणौ, संस्कारभास्करे, धर्मसिन्धौ, अण्णाशास्त्रिकृतकर्मकाण्डप्रदीपे च प्राप्यन्ते। एतस्य विषयस्याऽधिकतरं स्पष्टीकरणं च पञ्चसंवत्सरात्मकयुग-संवत्सरादिवर्ष-सौरचान्द्रायन-चान्द्रर्त्वादिविषयनिरूपणे, नामकरणव्यवस्थानिरूपणे, मूलग्रन्थव्याख्याने च भविष्यति।

१०. लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थरचनाकालविचारः

लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थरचनाकालस्य विषये सुधाकरद्विवेदमहाशयेन **"याजुषज्यौतिषं सोमाकर-सुधाकरभाष्यसहितम् आर्चज्यौतिषं च सुधाकरभाष्येण तल्लघुविवरणेन च सहितम्"** इत्युक्तस्य वाराणस्यां मेडिकल्हल्नाम्नि मुद्रायन्त्रालये १९६४तमे वैक्रमाब्दे मुद्रितस्य ग्रन्थस्य भूमिकायां **"अस्य रचना च भारतात् पूर्वं मन्मते"** इत्युक्तम्।

शङ्करबालकृष्णदीक्षितश् च **"क्रैस्तवर्षारम्भात् पूर्वं १४१०तमे वर्षे धनिष्ठाया भोगः ९ राशय इति (गणिताद्) आगच्छति, अतः सिद्धं यत् तस्मिन् वर्षे धनिष्ठाया आरम्भे उत्तरायणारम्भोऽभूदिति। एवं च वेदाङ्गज्योतिषस्याऽयमेव समयो निश्चितो भवति"** इति ब्रवीति स्मेति लखनऊनगरस्थया हिन्दीसमित्या १९७५तमे क्रैस्ताब्दे प्रकाशितात् शिवनाथ-झारखण्डिनाऽनूदिताद् भारतीयज्योतिष-नामकाद् ग्रन्थाद् (पृ.१२२) ज्ञायते।

वेदाङ्गज्योतिषस्य दीपिकाख्याया व्याख्यायाः कर्ता शामशास्त्री तु दीपिकायाः प्रारम्भे लगधप्रोक्तवेदाङ्गज्योतिषरचनाकालविषये—

वेदाङ्गज्योतिषं लोके यज्ञकालार्थसिद्धये।
प्रणीतं शककालात् प्राग् वत्सराणां सहस्रके॥

इति ब्रवीति।

पाश्चात्त्यैरालोचकैः कोलब्रूक-बेण्टलि-प्राट-म्याक्समूलर-याकोबिप्रभृतिभिरपि **"पञ्चसंवत्सरमयम्"** इत्यादेर् लगधप्रोक्तवेदाङ्गज्योतिषग्रन्थस्य रचनायाः समयः प्रायेण शङ्करबालकृष्णदीक्षितोक्तसमयेन तुल्य एव स्वीकृत इति **"वैदिक वाङ्मय का (विवेचनात्मक) बृहद् इतिहास"** इत्युक्तस्य ग्रन्थस्य वेदाङ्गेतिहास-

प्रतिपादके १९८३तमे क्रैस्ताब्दे होश्यारपुरे प्रकाशिते षष्ठे खण्डे (पृ.१४२) कुन्दन-लालशर्मणोक्तमस्ति।

एवं चोपलभ्यमानेषु ज्योतिषग्रन्थेषु लगधप्रोक्तो वेदाङ्गज्योतिषग्रन्थ एव प्राचीनतम इति सर्वे स्वीकुर्वन्त्येवेति ज्ञायते।

११. लगधमुनि-देश-विचारः

लगधमुनेर् देशस् तु कश्मीरदेश इति शङ्करबालकृष्णदीक्षितः सम्भावयति। छोटेलाल-बार्हस्पत्यस् तु लगधमुनेर् देशं बर्बरदेशं मन्यते इति हिन्दुत्वनामके ग्रन्थे रामदासगौडः कथयति। किन्तु लगधमुनेरयं देश इति निश्चयेन कथयितुं न शक्यते। **"घर्मवृद्धिरपां प्रस्थः"** इत्यादिना श्लोकेन (श्लो.८) **"यदुत्तरस्याऽयनतः"** इत्यादिना श्लोकेन (श्लो.४०) च प्रतिपादितां दिनमानव्यवस्थां विचार्य शङ्करबालकृष्ण-दीक्षितेन छोटेलालबार्हस्पत्येन च तथा सम्भावना कृता भवेत्। दिनमानविषये तु 'गोनर्दीयः' इत्युक्तेन **"इह पुष्यमित्रं याजयामः"** (पाणिनीय-व्याकरणभाष्ये ३।२।१२३) इति वदता मागध-शौङ्गशासकयाजकेन पतञ्जलिमुनिनाऽपि **"षण् मुहूर्ताश्चराचराः, ते कदाचिदहर् गच्छन्ति, कदाचिद् रात्रिम्"** इति (पा.व्या.भा.२।१।२८) कथितमित्येतावता पतञ्जलिमुनेर् देशोऽपि कश्मीरा वा बर्बरदेशो वेति वक्तुं शक्येत?

१२. लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थे प्रतिपादिताः प्रमुखा विषयाः

"यज्ञकालार्थसिद्धये" (श्लो.२) एव लगधमुनिप्रोक्तो वेदाङ्गज्योतिषग्रन्थः प्रवृत्त इति मुख्यतया यज्ञार्थमपेक्षितानां कालविशेषाणामेव तत्र प्रतिपादनं कृतमस्ति।

(क) पञ्चसंवत्सरं युगम्

श्रौते अग्निधिष्ण्यचयनयुक्ते सोमयागे पञ्चसु आहवनीयधिष्ण्यचितिषु चितासु यथाविधि गार्हपत्याग्नितोऽग्निं नीत्वा यथास्थानमाहवनीयचितौ निधाय यथा-विधि कर्म कृत्वा **माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखामन्त्रार्षसंहितायाम्** (२७।४५), **काठककृष्णयजुर्वेदशाखासंहितायाम्** (४०।६), **मैत्रायणीयकृष्णयजुर्वेद-शाखासंहितायाम्** (४।९।१८) **आत्रेयतैत्तिरीयकृष्णयजुर्वेदशाखाब्राह्मणे** (३।१०।४।१) च दृष्टेन "संवत्सरोऽसि परिवत्सरोऽसि" इत्यादिना वेदमन्त्रेण **माध्यन्दिनीयवाज-सनेयिशुक्लयजुर्वेदशतपथब्राह्मणादौ** (८।१।४।७-१०) "अथाऽतः समञ्चनप्रसारणस्यैव" इत्यादौ श्रुतं विधिमनुसृत्य **कात्यायनश्रौतसूत्रे** (१८।४।१४-१५) पठितम् "अभिमृशे-दिच्छन् संवत्सरोऽसीति, एवं यथाचिति" इति, **बौधायनश्रौतसूत्रे** (१९।४), **हिरण्य-केशिश्रौतसूत्रे (सत्याषाढश्रौतसूत्रे)** (२३।२।३४), **आपस्तम्बश्रौतसूत्रे** (१९।१२।२३) च

पठितं "यजमानः संहारविहाराभ्यामुपतिष्ठते संवत्सरोऽसि परिवत्सरोऽसि" इति च कल्पमनुसृत्य चित्यस्याऽग्नेः सम्मर्शनमुपस्थानं वा कार्यम्। एतस्य कर्मणो रहस्यस्य ज्ञानाय पञ्चसंवत्सरमयस्य युगस्य ज्ञानमावश्यकं भवति। अत एव कालीघट्टनगरे मनसुखरायमोरमहाशयेन २०१३तमे वैक्रमाब्दे मुद्रापिते स्मृतिसन्दर्भस्य षष्ठे भागे समाविष्टायां लौगाक्षिस्मृतौ (पृ.३७७) **"पञ्चसंवत्सरमयं जगदेतच् चराचरम्। ते पञ्च संवत्सराश् चाऽपि त इमे परिकीर्तिताः"** इत्युक्तम्। अत एव च लगधमुनिप्रोक्ते वेदाङ्गज्योतिषग्रन्थे (श्लो.१, ५, २८) पञ्चसंवत्सरमयस्य युगस्य प्रतिपादनं कृतमस्ति।

(ख) संवत्सरः (वर्षम्)

श्रौत-स्मार्तधर्मकृत्यार्थं संवत्सरज्ञानमावश्यकं भवति। तथाहि—

माध्यन्दिनीयवाजसनेयि-शुक्लयजुर्वेदशाखाशतपथब्राह्मणे निरूढपशुबन्ध-यागविषये "तं वै संवत्सरो नाऽनीजानमतीयात्" (११।७।१।३) इति श्रूयते, सोमयाग-विषये च "संवत्सरेसंवत्सरे सोमयाजी" (१०।१।५।४) इति श्रूयते, चयनवति सोम-यागे उखाधारणस्य विषये "नाऽसंवत्सरभृतस्यर्त्विजा भवितव्यमिति ह स्माऽऽह वात्स्यः" (९।५।१।६२) इति श्रूयते, अश्वमेधयज्ञविषये च "संवत्सरमाहुतीर् जुहोति" (१३।१।६।२) इति, "संवत्सरं रक्षन्ति" (१३।४।२।१६) इति, "एतदेव समानमाख्यानम् पुनःपुनः संवत्सरम् परिप्लवते" (१३।४।३।१५) इति, "अथोत्तरं संवत्सरमृतुपशुभिर् यजते" (१३।५।४।२८) इति च श्रूयते। **कात्यायनश्रौतसूत्रे** च "पश्विज्या संवत्सरे-संवत्सरे प्रावृषि" (६।१।१) इति, "आवृत्तिरतः संवत्सरम्" (१६।५।२६) इति, "वावाता-संवेशन-सावित्र्युत्तरमन्द्रागान-पारिप्लव-धृतीः संवत्सरम्" (२०।३।५) इत्यादि च दृश्यते। **आत्रेय-तैत्तिरीयकृष्णयजुर्वेदशाखाब्राह्मणे** "यो वै सोमं भक्षयित्वा संवत्सरं सोमं न पिबति पुनर्भक्ष्योऽस्य सोमपीथो भवति" (३।२।३।११) इति श्रूयते। **आपस्तम्ब-श्रौतसूत्रे** च "ऐन्द्राग्नो निरूढपशुबन्धः सौर्यः प्राजापत्यो वा, तेन संवत्सरेसंवत्सरे यजेत" (७।८।५) इति दृश्यते। **भारद्वाजश्रौतसूत्रे** च "नाऽऽहिताग्निं पशुनाऽनीजानं संवत्सरोऽतीयात्" (७।२३।१०) इति दृश्यते। **मानव(मैत्रायणीय)श्रौतसूत्रे** च "षट्सु-षट्सु मासेषु पशुना यजेत संवत्सरेसंवत्सरे वा, नैनमनीजानं संवत्सरोऽतीयात्" (१।८।६।२४,२५) इति, **तत्परिशिष्टे** च "संवत्सरः प्रजापतिः, तस्य यदुदगयनं शुक्लो-ऽहः पूर्वाह्णस् तद् देवानाम्" (११।९।४।२) इति च दृश्यते। **पारस्करगृह्यसूत्रे** च "प्रति-संवत्सरानर्हयेयुः" (१।३।२) इति, "यद्यप्यसकृत् संवत्सरस्य सोमेन यजेत कृताघ्र्या एवैनं याजयेयुः" (१।२।३१) इति, "संवत्सरं न मिथुनमुपेयाताम्" (१।८।२१) इति, "सांवत्-सरिकस्य चूडाकरणम्, तृतीये वाऽप्रतिहते" (२।१।१,२) इति, "संवत्सरं पृथगेके" (३।१०।५२) इति च पठ्यते। **कात्यायनश्राद्धकल्पसूत्रे** च "ततः संवत्सरे पूर्णे" इति

पञ्चम्यां कण्डिकायामस्ति। एतादृशा संवत्सराख्यकालापेक्षिणो विधयो **ब्राह्मणेषु श्रौतसूत्रेषु गृह्यसूत्रेषु** चाऽनेके सन्ति। तदर्थं संवत्सररूपस्य कालस्य ज्ञानमावश्यकं भवति। तत्र मुख्यरूपेण मास-पक्ष-तिथि-बद्धस्य चान्द्रस्य वर्षस्यापेक्षा भवति। कुत्रचित्तु "संवत्सरमाहुतीर् जुहोति षोडश नवतीः" (१३।१।६।२) इति, "एतदेव समानमाख्यानम् पुनःपुनः संवत्सरम् परिप्लवते, तद् यत् पुनःपुनः परिप्लवते तस्मात् पारिप्लवं षट्त्रिंशतं दशाहानाचष्टे" (१३।४।३।१५) इति च **माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाशतपथब्राह्मणे** दर्शनात् सावनस्य संवत्सरस्यापेक्षा भवति। चान्द्रवर्षस्य निरूपणाय सौरवर्षस्याऽप्यपेक्षा भवति। सौरचान्द्रवर्षयोर् निरूपणे नाक्षत्रवर्षस्यापि उपयोगो भवति। संवत्सरसत्रे नाक्षत्रवर्ष-सौरवर्षयोरप्युपयोगो लाट्यायन-श्रौतसूत्रादिषु प्रतिपादितोऽस्ति (ला.४।८।४, द्रा. ८।४।३)। तस्मादेतेषां वर्षाणां लगधमुनिप्रोक्ते वेदाङ्गज्योतिषग्रन्थे निरूपणं कृतमस्ति (श्लो.१,५,२८,३१,४४)।

(ग) अयनम्

श्रौत-स्मार्तधर्मकृत्यार्थमयनज्ञानमावश्यकं भवति। तथाहि—

माध्यन्दिनीयवाजसनेयि-शुक्लयजुर्वेदशाखा-शतपथब्राह्मणे "स यत्रोदङ्ङावर्त्तते तर्ह्यग्नी आदधीत" इति (२।१।३।४), तत्रैव "स यः कामयेत महत् प्राप्नुयामित्युदगयनऽ आपूर्यमाणपक्षे पुण्याहे द्वादशाहमुपसद्व्रती भूत्वौदुम्बरे कंसे चमसे वा सर्वौषधम् फलानीति सम्भृत्य परिसमुह्य परिलिप्याऽग्निमुपसमाधायाऽऽवृताऽऽज्यं संस्कृत्य पुंसा नक्षत्रेण मन्थं सन्नीय जुहोति" (१४।९।३।१) इति च श्रूयते। **काण्ववाजसनेयि-बृहदारण्यकोपनिषदि** च (६।३।१) एवमेव श्रूयते। **शाङ्खायन-श्रौतसूत्रे** (६।१।१८) "उदग्यनस्याऽऽद्यन्तयोरैन्द्राग्नो निरूढ-पशुबन्धः" इति दृश्यते। **आश्वलायनश्रौतसूत्रे** च "उदगयने पूर्वपक्षे श्रोष्यन् बहिर्ग्रामात् स्थालीपाकं तिलमिश्रं श्रपयित्वाऽऽचार्याय वेदयीत" (८।१४।३) इति दृश्यते। **कात्यायनश्रौतसूत्रे** च (६।१।१,२) "पशिवज्या संवत्सरेसंवत्सरे प्रावृषि, आवृत्तिमुखयोर् वा" इति पठ्यते। **आपस्तम्बश्रौतसूत्रे** च "ऐन्द्राग्नो निरूढपशुबन्धः सौर्यः प्राजापत्यो वा, तेन संवत्सरेसंवत्सरे यजेत, षट्सुषट्सु मासेष्वित्येके, ऋतुव्यावृत्तौ सूयवसे आवृत्तिमुखआवृत्तिमुखे वा" (७।२८।५-७) इति प्राप्यते। तथैव **सत्याषाढश्रौतसूत्रे (हिरण्यकेशिश्रौतसूत्रे)** च "ऐन्द्राग्नेन पशुना षाण्मास्येषाण्मास्ये यजते, आवृत्तिमुखआवृत्तिमुखे संवत्सरेसंवत्सरे वा" (४।१।१) इति दृश्यते। **बौधायनश्रौतसूत्रे** च "आ दक्षिणायनपशोः कालादुत्तरायणपशोः कालो नाऽतीयादोत्तरायणपशोर् दक्षिणायनपशोः" इति पठ्यते (२८।१२)। "उदगयनस्याऽऽद्यन्तयोरैन्द्राग्नेन पशुना यजेत" इति **वाराहश्रौतसूत्रे** (१।६।१) चास्ति। **लाट्यायनश्रौतसूत्रे** च "उदगयन-पूर्वपक्ष-पुण्याहसन्निपाते यज्ञकालोऽनादेशे"

(८।१।१) इति दृश्यते। **द्राह्यायणश्रौतसूत्रेऽप्येतद्** वचनं दृश्यते (२२।१।१)। **आश्वलायनगृह्यसूत्रे** च "उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः" (१।४।१) इति पठ्यते। **कौषीतकिगृह्यसूत्रे** च "उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्यै पाणिं गृह्णीयात्" (१।१।८) इति दृश्यते। **पारस्करगृह्यसूत्रे** च "उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्याः पाणिं गृह्णीयात्" (१।४।५) इति पठ्यते। **आपस्तम्बगृह्यसूत्रे** च "अथ कर्माण्याचाराद् यानि गृह्यन्ते, उदगयन-पूर्वपक्षाहः-पुण्याहेषु कार्याणि" (१।१,२) इति दृश्यते। **आग्निवेश्यगृह्यसूत्रे** च "अथातोऽवान्तरदीक्षां व्याख्यास्यामः। उदगयना-ऽऽपूर्यमाणपक्षे पुण्ये नक्षत्रे केशान् वापयित्वा स्नात्वा-ऽशित्वा अग्निमौदुम्बरीश् चतस्रः समिधोऽहतं वासो दर्भानाज्यं च उदकुम्भमित्येतान् समादाय बहिर्ग्रामाद् उत्तरां दिशमुपनिष्क्रम्याऽच्छदिर्दर्शेऽग्निमुपसमाधाय परिस्तीर्य मदन्तीरधिश्रित्य पूर्वां शान्तिं कृत्वाऽथ परिषिच्याभ्यज्य समिधोऽभ्यादधाति 'पृथिवी समित्' इत्येताभिश् चतसृभिः" (१।२।३) इति, "पुत्रमुत्पाद्य संस्कृत्य वेदमध्याप्य वृत्तिं विधाय गुणवति पुत्रे कुटुम्बभारं नियोज्य उत्तरायणे पूर्वपक्षे पुण्ये नक्षत्रे कुशचीरचर्मवल्कलवासा जटी कृष्णाजिनोत्तरीयः कृतप्रस्थानलिङ्गोऽग्निमात्मसमारोपणं कृत्वा सपत्नीको वाऽप्यपत्नीको वा वनमाश्रयेत्" इति (३।७।१०) च दृश्यते। **गोभिलगृह्यसूत्रे** च "अथाऽतो गृह्या कर्माण्युपदेक्ष्यामः, यज्ञोपवीतिनाऽऽचान्तोदकेन कृत्यम्, उदगयने पूर्वपक्षे पुण्येऽहनि प्रागावर्तनादह्नः कालं विद्यात्" इति (१।१।१-३), "उदगयने च पक्षिणीं रात्रिम्" (३।३।१०) इति च पठ्यते। **द्राह्यायणगृह्यसूत्रे** च "अथातो गृह्या कर्माणि, उदगयनपूर्वपक्षपुण्याहेषु प्रागावर्तनादह्नः कालोऽनादेशे" (१।१।१,२) इति दृश्यते। **बौधायनधर्मसूत्रे** च "अग्न्याधेयप्रभृत्यथेमान्यजस्राणि भवन्ति यथैतदग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणमुदगयनदक्षिणायनयोः पशुः चातुर्मास्यानि ऋतुमुखे षड्ढोता वसन्ते ज्योतिष्टोम इत्येवं क्षेमप्रापणम्" (२।२।२३ [२।४।२३]) इति पठ्यते। **जैमिनीयधर्ममीमांसासूत्रे** च "उदगयनपूर्वपक्षाहःपुण्याहेषु दैवानि स्मृतिरूपान्यार्थदर्शनात्" (६।८।२३) इति पठ्यते।

एवं च श्रौतस्मार्तकर्मार्थमयनयोर् ज्ञानमावश्यकमिति स्पष्टम्। अयने च सूर्यगतिमूले एव। तथापि वेदोक्तानां तपस्-तपस्यादीनां मासानां चान्द्रत्वात्, वेदोक्तानामृतूनां च चान्द्रमासद्वयरूपत्वात्, तैरेव त्रिभिर् ऋतुभिरयनस्य परिभाषिततायाः श्रुतिस्मृतिपुराणेभ्योऽवगम्यमानत्वाच् च श्रौत-स्मार्त-कर्मार्थमयनमपि चान्द्रमेव प्राधान्येन गृह्यत इत्यवगम्यते। एतस्य विषयस्य स्पष्टीकरणमनुपदमेव विस्तरेण करिष्यते। अत एव लगधमुनिप्रोक्ते वेदाङ्गज्योतिषेऽपि सौरायनाभ्यां सह चान्द्रे वा सौरचान्द्रे अयने अपि स्वीकृते, अधिमासव्यवस्थया ते उपपादिते च स्तः (श्लो.१,६,७,८,९,१०,२८,३७,४०,४३)।

(घ) ऋतवः

श्रौत-स्मार्तधर्मकृत्यार्थमृतूनां ज्ञानमावश्यकं भवति। तथाहि—

काठकसंहितायां ब्राह्मणभागे "वसन्ता ब्राह्मणेनाऽऽधेयः" इति, "ग्रीष्मे राजन्येनाऽऽधेयः" इति, "शरदि वैश्येनाऽऽधेयः" इति, "शिशिर आधेयः" इति च अष्टमे स्थानके प्रथमेऽनुवाके दृश्यते। **कपिष्ठलकठसंहितायां च ब्राह्मणभागे** "वसन्ते ब्राह्मणेनाऽऽधेयः" (६।६) इत्यादिकं दृश्यते। **मैत्रायणीयसंहितायां च ब्राह्मणभागे** "वसन्ता आग्नेयीं प्रावृषि बार्हस्पत्यां शिशिरे सौरीम् (आलभेत)" इति (२।५।२) दृश्यते। **तैत्तिरीयसंहितायां च ब्राह्मणभागे** "वसन्ता प्रातराग्नेयीं कृष्णग्रीवीमालभेत ग्रीष्मे मध्यन्दिने संहितामैन्द्रीं शरद्यपराह्णे श्वेतां बार्हस्पत्याम्" (२।१।२।५) इति श्रूयते। **तैत्तिरीयब्राह्मणे** च "वसन्ता ब्राह्मणोऽग्निमादधीत" इति, "ग्रीष्मे राजन्य आदधीत" इति, "शरदि वैश्य आदधीत" इति च प्रथमस्य काण्डस्य प्रथमे प्रपाठके द्वितीयेऽनुवाके श्रूयते। **माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणे** च अग्न्याधानविषये "ब्रह्मैव वसन्तः क्षत्रं ग्रीष्मो विडेव वर्षास् तस्माद् ब्राह्मणो वसन्तऽ आदधीत ब्रह्म हि वसन्तः, तस्मात् क्षत्रियो ग्रीष्म आदधीत क्षत्रं हि ग्रीष्मः, तस्माद् वैश्यो वर्षास्वादधीत विड् ढि वर्षाः" इति (२।१।३।५) पुनराधेयविषये च "स वै वर्षास्वादधीत" इति (२।२।३।७), अश्वमेधविषये "तद् वै वसन्तऽ एवाऽभ्यारभेत" इति (१३।४।१।३), "अथोत्तरं संवत्सरमृतुपशुभिर् यजते षड्भिराग्नेयैर् वसन्ते, षड्भिरैन्द्रैर् ग्रीष्मे, षड्भिः पार्जन्यैर् वा मारुतैर् वा वर्षासु, षड्भिर् मैत्रावरुणैः शरदि, षड्भिरैन्द्रावैष्णवैर् हेमन्ते, षड्भिरैन्द्राबार्हस्पत्यैः शिशिरे" इति (१३।५।४।२८) च श्रूयते। **आश्वलायनश्रौतसूत्रे** अग्न्याधानविषये "वसन्ते पर्वणि ब्राह्मण आदधीत, ग्रीष्म-वर्षा-शरत्सु क्षत्रिय-वैश्योपक्रुष्टाः" (२।१।१२,१३) इति पठ्यते। **शाङ्खायनश्रौतसूत्रे** च "वसन्ते ब्राह्मणस्याऽग्न्याधेयम्, ग्रीष्मे क्षत्रियस्य, वर्षासु वैश्यस्य शरदि वा, शिशिरः सर्ववर्णानाम्" इति (२।१।१-५) पठ्यते। तत्रैव "शरदि वाजपेयः" इति (१५।१।१), "संवत्सरमृतुपशवः, षडाग्नेया वसन्ते, ऐन्द्रा ग्रीष्मे, मारुताः पार्जन्या वा वर्षासु, मैत्रावरुणाः शरदि, बार्हस्पत्या हेमन्ते, ऐन्द्रावैष्णवाः शिशिरे" इति (१६।९।२६-३२) च पठ्यते। **बौधायनश्रौतसूत्रे** च अग्न्याधानविषये "अथात ऋतूनामेव मीमांसा, वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः, वर्षासु रथकार इति" (२।१२) इति पठ्यते। तत्रैव "स ग्रीष्मस्य जघन्याहःसु पुरस्तादाषाढ्यै पौर्णमास्यै दीक्षते" इति (११।१), "ओत्तरवसन्तज्योतिष्टोमस्य कालात् पूर्ववसन्तज्योतिष्टोमस्य कालो नाऽतीयात्" इति (२८।१२) च पठ्यते। **आपस्तम्बश्रौतसूत्रे** च अग्न्याधानकालविषये "वसन्तो ब्राह्मणस्य, ग्रीष्मो राजन्यस्य, हेमन्तो वा, शरद् वैश्यस्य, वर्षा रथकारस्य; ये त्रयाणां वर्णानां कर्म कुर्युस् तेषामेष कालः; शिशिरः सार्ववर्णिकः" इति (५।१।३।१८-२०)

पठ्यते। तत्र "वसन्ते ज्योतिष्टोमेन यजेत" इति (१०।१।१६), "वसन्तेवसन्ते ज्योतिष्टोमेन यजेत, तस्य तिस्रो दक्षिणा इति च्छन्दोगब्राह्मणं भवति" इति (१०।१।१९) च पठ्यते। **हिरण्यकेशिश्रौतसूत्रे (सत्याषाढश्रौतसूत्रे)** च "वसन्तो ब्राह्मणस्याऽऽधानकालः, ग्रीष्मो हेमन्तश् च राजन्यस्य, वर्षा रथकारस्य, शरद् वैश्यस्य, सर्वेषां शिशिरः" इति (३।२) पठ्यते। तथैव तत्र "सर्वकामोऽग्निष्टोमः, युगपत् कामयेत, आहारपृथक्त्वे वा, तेन वसन्तेवसन्ते यजेत" इति (७।१।१-४), "शरदि वाजपेयेन यजेत" इति (१३।१।१) च पठ्यते। **भारद्वाजश्रौतसूत्रेऽ**पि "वसन्ते ब्राह्मण आदधीत, ग्रीष्मे हेमन्ते वा राजन्यः, शरदि वैश्यः, वर्षासु रथकारः, शिशिरः सार्ववर्णिकः" इति (५।२।१-५) दृश्यते। तथा तत्रैव "वसन्ते ज्योतिष्टेमेन यक्ष्यमाणो ब्राह्मणानार्षेयानृत्विजो वृणीते यूनः स्थविरान् वाऽनूचानान् अनङ्गहीनानूर्ध्ववाचश्चतुरः सर्वान् वा" इति (१०।१।१,२) च दृश्यते। मानव(मैत्रायणीय)श्रौतसूत्रे च "अग्नीनादधीत वसन्ते ब्राह्मणो ग्रीष्मे राजन्यः शरदि वैश्यः, शिशिरं सर्वेषाम्" इति (१।५।१।१), "पर्वण्याग्रयणं कुर्वीत वसन्ते यवानां शरदि व्रीहीणाम्" इति (१।६।४।१), "अग्निष्टोमेन वसन्ते यजेत" इति (२।१।१।१) च दृश्यते। " वाराहमैत्रायणीयश्रौतसूत्रे च "पौर्णमास्याममावास्यायां वा वसन्ते ब्राह्मण आदधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः, वर्षासु रथकारः, सार्ववर्णिकं शिशिरम्" इति (१।४।१,२) दृश्यते। तथा तत्रैव "ब्राह्मणो राजन्यो वा शरदि वाजपेयेन यजेत" इति (३।१।१) च दृश्यते। **वैखानसश्रौतसूत्रे** चाऽग्न्याधानविषये "अग्न्याधेयं व्याख्यास्यामः, ब्राह्मणो वसन्ते, राजन्यो ग्रीष्मे, वैश्यः शरदि, रथकारो वर्षासु, सर्वे शिशिर इत्येके" (१।१) इति, पुनराधेयविषये "प्रावृट्छरदावृतू" (१।१९) इति, आग्रयणविषये "शरदि व्रीहिभिर् यजेत" इति (८।१), "वसन्ते यवैर् यजेत" इति (८।२), सोमयागविषये "वसन्तेवसन्ते सोमेन यजेत" (१२।३) इति दृश्यते। **कात्यायनश्रौतसूत्रे** च आग्रयणप्रकरणे "वैणवो ग्रीष्मे" इति (४।६।१८), अग्न्याधानप्रकरणे "वसन्तो ब्राह्मण-ब्रह्मवर्चसकामयोः, ग्रीष्मः क्षत्रिय-श्रीकामयोः, वर्षाः प्रजा-पशुकाम-वैश्य-रथकृताम्" इति (४।७।५-६) पठ्यते, तत्रैव पुनराधेयप्रकरणे "वर्षासु मध्यन्दिने वा" (४।११।६) इति पठ्यते। तत्रैव सोमयागप्रकरणे "वसन्तेऽग्निष्टोमः" (७।१।५), वाजपेयप्रकरणे "वाजपेयः शरद्यवैश्यस्य" इति (१४।१।१), अश्वमेधप्रकरणे "ग्रीष्म एके" इति (२०।१।३), "प्रत्यृतु पशूनालभते षट्षड् वसन्तादि" इति (२०।८।३०) च पठ्यते। तत्रैव पितृमेधप्रकरणे च "निदाघ-शरन्-माघेषु" (२१।३।५) इति पठ्यते। **लाट्यायनश्रौतसूत्रे** च "तावुभौ सप्तापवर्गौ स्यातां वसन्ते च" इति (९।४।१०)। "(अश्वमेधं) ग्रीष्म उपक्रमेतेति धानञ्जय्यः, वसन्त इति शाण्डिल्यः" (९।९।६, ७) इति च दृश्यते। **आश्वलायनगृह्यसूत्रे** "हेमन्त-शिशिरयोश् चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः" इति (२।४।१) पठ्यते। **बौधायनगृह्यसूत्रे** च "वसन्ते ब्राह्मणमुपनयीत

ग्रीष्मे राजन्यं शरदि वैश्यं वर्षासु रथकारमिति सर्वानेव वा वसन्ते" इति (२।५।६) पठ्यते। **आपस्तम्बगृह्यसूत्रेऽपि** "गर्भाष्टमेषु ब्राह्मणमुपनयीत गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यम्, वसन्तो ग्रीष्मः शरदित्यृतवो वर्णानुपूर्व्येण" इति (४।२-४) दृश्यते। **हिरण्यकेशिश्रौतसूत्रे** गृह्यप्रकरणे च सप्तवर्षं ब्राह्मणमुपनयेत्, एकादशवर्षं राजन्यं द्वादशवर्षं वैश्यम्, वसन्ते ब्राह्मणं ग्रीष्मे राजन्यं शरदि वैश्यम्, आपूर्यमाण-पक्षे पुण्ये नक्षत्रे विशेषेण पुन्नामधेये" इति (१९।१।२-५) पठ्यते। **भारद्वाजगृह्यसूत्रे** च "वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे हेमन्ते वा राजन्यं शरदि वैश्यं वर्षासु रथकारं शिशिरे वा सर्वान्, आपूर्यमाणपक्षे पुण्ये नक्षत्रे विशेषेण पुन्नामधेये" इति (१।१) दृश्यते। **आग्निवेश्यगृह्यसूत्रे** च "सप्तमे वर्षे ब्राह्मणमुपनयीतैकादशे वर्षे राजन्यं द्वादशे वर्षे वैश्यम्, वसन्ते ब्राह्मणं ग्रीष्मे राजन्यं शरदि वैश्यम्, आपूर्यमाणपक्षे पुण्ये नक्षत्रे विशेषेण पुन्नामधेये" इति (१।१) दृश्यते। **वैखानसगृह्यसूत्रेऽपि** "अथ गर्भाधानादिवर्षे पञ्चमे ब्रह्मवर्चसकाममायुष्काममष्टमे नवमे श्रीकामं वसन्ते ब्राह्मणमुपनयीतैकादशे ग्रीष्मे राजन्यं द्वादशे शरदि वैश्यम्" इति (२।३) दृश्यते। **काठकगृह्यसूत्रे (लौगाक्षि-गृह्यसूत्रे)** च "वर्षासु श्रवणेनाऽध्यायानुपाकरोति" इति (८।१) पठ्यते। **मानव-मैत्रायणीयगृह्यसूत्रेऽपि** "वर्षासु श्रवणेन स्वाध्यायानुपाकुरुते" इति (१।४।१) दृश्यते। **वाराहगृह्यसूत्रे** च "वर्षासु श्रवणेनाऽध्यायानुपाकरोति हस्तेन वा" इति (८।१) दृश्यते। **गोभिलगृह्यसूत्रे** च "चतुरष्टको हेमन्तः" इति (३।१०।३) पठ्यते। **आपस्तम्बधर्मसूत्रे** "वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यम्" इति (१।१।१।१९) पठ्यते। एतादृशमेव वचनं **हिरण्यकेशिश्रौतसूत्रे** धर्मप्रश्नेऽपि (२६।२०) दृश्यते।

उपरि उल्लिखितेभ्यो वचनेभ्यो वैदिकपरम्परायां श्रौतस्मार्तधर्मकृत्यार्थम् **ऋतूनां ज्ञानमावश्यकमिति सुस्पष्टं भवति। तस्मादेव लगधमुनिप्रोक्ते वेदाङ्ग-ज्योतिषग्रन्थे ऋतूनां प्रतिपादनं कृतमस्ति** (श्लो.१, १०, ११, २८, ४१, ४३)।

(ङ) मासाः

श्रौत-स्मार्तधर्मकृत्यार्थं मासानां ज्ञानमावश्यकं भवति। तथाहि—

आत्रेय-तैत्तिरीय-कृष्णयजुर्वेद-संहितायां ब्राह्मणभागे "मासं दीक्षितः स्यात्" (५।६।७।३) इति, "द्वादश मासो भूत्वाऽग्निं चिन्वीत" इति (५।६।७।४), "मासिमास्य-तिग्राह्या गृह्यन्ते" इति (७।५।१।६) च श्रूयते। "ऋध्नुवन्ति दशसु मास्सूत्तिष्ठन्त ऋध्नुवन्ति द्वादशसु य एवं वेद" इति **काठककृष्णयजुर्वेदसंहितायां** (३३।१) दृश्यते। एतादृशमेव वचनम् **आत्रेयतैत्तिरीयकृष्णयजुर्वेदसंहितायामपि** (७।५।२।२) दृश्यते। "मासं दीक्षितः स्यात्" इत्यादीनि वचनानि **काठककृष्णयजुर्वेदसंहितायाम्** (२१।५), **कपिष्ठलकठकृष्णयजुर्वेदसंहितायां** च (३१।२०) प्राप्यन्ते। **मैत्रायणीयकृष्णयजुर्वेद-**

संहितायां च "द्वादशे मासा आलभेत" इति (२।५।१०) दृश्यते। "षडहैर् मासं सम्पाद्य यत् सप्तममहस् तदुत्सृजेयुः" इति च **काठककृष्णयजुर्वेदसंहितायां** (३३।७) प्राप्यते। **ऐतरेयिब्राह्मणे** च "विराजमेव तन् मासिमासि सम्पादयन्तो यन्ति" इति (१८।२) दृश्यते। **शाङ्खायनारण्यके** च "अथ मासिमास्यमावास्यायां वृत्तायां पश्चाच् चन्द्रमसं दृश्यमानमुपतिष्ठेत" इति (४।८) दृश्यते। **माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मणे** च "तद् वा एतन् मासिमास्येव पितृभ्यो ददतो यदैवैष न पुरस्तान् न पश्चाद् ददृशेऽथैभ्यो ददाति" इति (२।४।२।७), "तस्माद् वा एष एतैश् चतुर्थे मासि यजते" इति (२।५।२।४, २।५।३।१), "तान् वै द्वादश गृह्णीयाद् द्वादश वै मासा संवत्सरस्य तस्माद् द्वादश गृह्णीयात्" इति (४।३।१।५), "तद् यन् मासिमासि पृष्ठान्युपयन्ति मासशऽ एव तत् संवत्सरस्य तेज आप्नुवन्ति" इति (१२।२।१।८) च श्रूयते। **आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदशाखारण्यके** च "मासं दीक्षितो भवति" इति (२।८) दृश्यते। **जैमिनीय-सामवेदशाखाब्राह्मणे** च "एवं तद् यन् मासिमासि पृष्ठान्युपयन्ति" इति (२।१), "स चतुर्षुचतुर्षु मास्सु केशान् परिवर्तयते" इति (२।२३४) च दृश्यते। **ताण्ड्य-कौथुम-राणायनीय-सामवेदशाखापञ्चविंशब्राह्मणे** च "पञ्चसु माःसु बार्हताः प्रगाथा आप्यन्ते। तेष्वाप्तेषु च्छन्दसी संयुज्यैतव्यम्" इति (४।४।१,२), "मासं दीक्षिता भवन्ति" इति (२५।४।१), "मासमग्निहोत्रं जुह्वति" इति (२५।४।१), "मासं दर्शपूर्णमासाभ्यां यजन्ते" इति (२५।४।१) च पठ्यते। **ताण्ड्य-कौथुम-राणायनीयानामेव सामविधानब्राह्मणे** च "मासमेतेन कल्पेनाऽऽव इन्द्रं क्रिविं यथेति दशताऽऽप्तोर्यामम् (अवाप्नोति)" इति (१।४।३), "अयाज्ययाजने दक्षिणास् त्यक्त्वा मासं चतुर्थकाले भुञ्जानः कानी इत्येतद् गायेत्" इति (१।५।२), "ब्राह्मणस्वं हृत्वा मासमुदके वासः" इति (१।६।१), "राज्ञः प्रतिगृह्य मासमुदके वसन् दिवा भुञ्जानो महत् तत् सोमो महिषश् चकारेत्येतद् गायेत्" इति (१।७।१), "मासं सोमभक्षस् स्यात् सदसस्पतिमद्भुतमित्येतेन श्रुतनिगादी भवति" इति (२।७।३) च श्रूयते। आथर्वणां ब्राह्मणे **गोपथब्राह्मणनामके** च "य एतमैन्द्राग्नं पशुं षष्ठेषष्ठे मास आलभते तेनैवेन्द्राग्निभ्यां ग्रसितमात्मानं निरवदयते" इति (२।२।१) दृश्यते। **आश्वलायनश्रौतसूत्रे** च "अतिमूर्तिना यक्ष्यमाणो मासं सौर्याचान्द्रमसीभ्यामिष्टीभ्यां यजेत" इति (९।८।१), "कुण्डपायिनामयनम्, मासं दीक्षिता भवन्ति, ते मासि सोमं क्रीणन्ति" इत्यादि (१२।४।१-९), "यदहर् मासः पूर्यते तदहरिष्टिं समाप्याऽग्निप्रणयनादि घर्मोत्सादनादि वौपवसथिकं कर्म कृत्वा श्वोभूते प्रसुनुयुः" (१२।४।१०) इति, "मासिमासि च गोआयुषी उपेयुरायुरयुग्मेषु गौर् युग्मेषु" इति (१२।६।१२) च दृश्यते। **शाङ्खायनश्रौतसूत्रे** च "अथेष्टिकालाः सद्यो द्वादशाहे मास ऋतौ संवत्सरे वा" इति (२।२।१-२), "मासं दीक्षाः कौण्डपायिनामयनस्य" इति (१३।२४।१,२), "चतुरो मासान् व्रतं चरित्वा बलभिदा यजेत"

इति (१४।१४।१), "मासापवर्गा अहीनाः" इति (१६।२०।८), "ते प्रथममासं दीक्षितवसनानि वा वसते, तानि नवरात्राय निदधति, उत्तमाय च मासाय, अथेतरान् मासानजिनानि वाऽऽर्द्रवसनानि वा वसते" (१८।२४।४-७) इत्यादि च दृश्यते। **कात्यायनश्रौतसूत्रे** च "द्वादशाहान्ते तनूहवींषि निर्वपति, मासे द्वितीये तृतीये षण्मास्ये संवत्सरे सद्यो वा" इति (४।१०।७), "चत्वारोऽभिप्लवाः पृष्ठ्यश् च मासः" इति (१३।२।३), "षष्ठे मासि त्रयोऽभिप्लवाः" इति (१३।२।१८), "द्वादशोत्तराणि प्रयुग्घवींषि मासान्तराणि" इति (१५।९।७), "उत्तरे च मासान्तराः" इति (१५।९।१६), "तापश्चिते मासशश् चितिपुरीषे चतसृणाम्" इति (१७।७।१४), "मासं पुरीषम्" इति (१७।७।१७), "द्वादशोपसत्का अहीना मासापवर्गाः" इति (२३।१।१), "मासाः पृष्ठ्यमध्याः" इति (२४।४।४), "मासाः पृष्ठ्यादयः पूर्वपक्षे" इति (२४।४।१३), "दृतिवातवतोरयनमेकैकेन पृष्ठ्यस्तोमेन मासम्मासम्" इति (२४।४।१६), "मासं दीक्षाः" (२४।४।२३) इत्यादि च पठ्यते। **आपस्तम्बश्रौतसूत्रे** च "पवमानहवींषि सद्यो निर्वपेत्, द्वादशाहे द्व्यहे त्र्यहे चतुरहेऽर्धमासे मास्यृतौ संवत्सरे वा" इति (५।२१।१-२), "षट्सुषट्सु मासेष्वित्येके" इति (७।२८।६), "मधुश्च माधवश्चेति चतुर्भिर् मासनामभिरेककपालमभिजुहोति" इत्यादि (८।२।१८, ८।७।२, ८।१२।५, ८।२०।८) च दृश्यते। **हिरण्यकेशिश्रौतसूत्रे (सत्याषाढश्रौतसूत्रे)** च "पवमानहविर्भिर् यजते संवत्सर ऋतौ मासेऽर्धमासे द्वादशाहे चतुरहे द्व्यहे श्वोभूते सद्यो वा" इति (३।५।१०), "ऐन्द्राग्नेन पशुना षाण्मास्येषाण्मास्ये यजते" (४।१।१) इत्यादि च दृश्यते। **भारद्वाजश्रौतसूत्रे** च "काममेव श्वोभूते तनुहवींषि निर्वपेत्, काममर्धमासे मास्यृतौ संवत्सरे" इति (५।१३।२०,२१), "एवमेव षट्सुषट्सु मासेषु संवत्सरेसंवत्सरे वा पशुना यजेत" इति (७।२३।९), "ततश्चतुर्षु मासेषु वरुणप्रघासैर् यजते" इत्यादि (८।५।१) च दृश्यते। **लाट्यायनश्रौतसूत्रे** च "मासिमास्याद्यस्याऽभिप्लवस्य स्थाने त्रिकद्रुकाः" इति (४।८।३), "षट्त्रिंशदूनो नाक्षत्रः, सप्तविंशिनो मासाः" इति (४।८।४), "उत्सर्जनानि मासिमासि" इति (४।८।८), "प्रथमं चाऽभिप्लवं पञ्चाहं कृत्वा मासान्ते सवनविधः पशुः" इत्यादि (४।८।१४) च दृश्यते। **आश्वलायनगृह्यसूत्रे** च "तृतीये गर्भमासे तिष्येणोपोषितायाः सरूपवत्साया गोर् दधनि द्वौद्वौ माषौ यवं च दधिप्रसृतेन प्राशयेत्" इति (१।१३।३), "चतुर्थे मासि सीमन्तोन्नयनम्" इति (१।१४।१), "षष्ठे मास्यन्नप्राशनम्" इति (१।१६।१), "अपरपक्षे मासिमासि चैवम्" इति (२।५।११), "षण् मासानधीयीत" (३।५।१२) इति च दृश्यते। **शाङ्खायनगृह्यसूत्रे** विशेषेण "चतुर्थे मासि गर्भरक्षणम्" इति (१।१३।१), "चतुर्थे मासि निष्क्रमणिका" इति (१।१८।१), "सप्तमेऽष्टमे वा मासि कर्णवेधनम्" इति (१।२०।१), "छन्दांसि विश्रामयन्त्यर्धषष्ठान् मासान्" इति (३।८।३), "अथ मासिमासि पितृभ्यो दद्यात्" इति (३।१४।१) च दृश्यते। **पारस्करगृह्यसूत्रे** च "अथ पुंसवनम्, पुरा स्पन्दत इति मासे द्वितीये तृतीये वा" इति (१।१४।१,

२), **"अथ सीमन्तोन्नयनम्, पुंसवनवत्, प्रथमगर्भे मासे षष्ठेऽष्टमे वा"** इति (१।१५।१-३), **"चतुर्थे मासि निष्क्रमणिका"** इति (१।१७।५), **"षष्ठे मासेऽन्नप्राशनम्"** इति (१।१९।१), **"अर्धषष्ठान् मासानधीत्योत्सृजेयुः"** इति (२।११।१०) च पठ्यते। **बौधायनगृह्यसूत्रे** च **"सर्वे मासा विवाहस्य, शुचि-तपस्-तपस्यवर्जमित्येके"** इति (१।१।१८,१९), **"अथाधिमासे संसर्पोऽस्यंहस्पत्याय त्वेति हुत्वा"** इति (२।१०।८), "षण् मासान् चतुरो मासान् द्वौ वा मासौ मासं वा व्रतं चरेत्" (३।२।६०, ३।३।२७) इति च विशेषतो दृश्यते। **काठकगृह्यसूत्रे (लौगाक्षिगृह्यसूत्रे)** च "षष्ठे मासेऽन्नप्राशनम्, दन्तेषु वा जातेषु" इति (३९।१) विशेषो दृश्यते। **वाराहमैत्रायणीयगृह्यसूत्रे** च "अर्धपञ्चमान् मासानधीत्य पञ्चाऽर्धषष्ठान् वा दक्षिणायनं वाऽधीत्याऽथोत्सृजन्ति" (८।७) इति विशेष उल्लिखितोऽस्ति। यथा **बौधायनगृह्यसूत्रे** "मासं प्रदोषे नाऽधीयीरन्" इत्युक्तम् (३।९।१४), तथैव **भारद्वाजगृह्यसूत्रेऽपि** "मासं प्रदोषे नाधीयीत" (३।८) इत्युक्तमस्ति। **बौधायनगृह्यसूत्रे** (३।७।१,२) इव **आग्निवेश्यगृह्यसूत्रेऽपि** "आयुष्यकरणम्, संवत्सरे-संवत्सरे षट्सुषट्सु मासेषु चतुर्षुचतुर्षु ऋतावृतौ मासिमासि जन्मनक्षत्रे क्रियेत" (२।२।१) इत्युक्तम्। तत्र "गृहवृद्धिमिच्छन् मासिमासि ऋतावृतौ संवत्सरेसंवत्सरे पूर्वपक्षे पुण्ये नक्षत्रे गृहशान्तिमारभेत" इति (२।५।९) च दृश्यते। **वैखानसगृह्यसूत्रे** च "अथ श्राद्धं मासिमास्यपरपक्षे" इति (४।७), "यस्मिन् दिने ज्ञातिर् मृतस् तस्मिन् मासिमासि प्रेतायैकं पिण्डं निरुप्यैकं भोजयेदा वत्सराद्" इति (४।७), "सपिण्डीकरणात् पूर्वं मासिमासि तन्मरणदिने पिण्डं निरुप्यैकं भोजयति, द्वादशे षष्ठे तृतीये वा मासे शुभकार्ये प्राप्ते द्वादशाहे वा सपिण्डीकरणं कुर्यात्" इति (७।७) च विशेषो दृश्यते। सामगानां **जैमिनिगृह्यसूत्रे** च "संवत्सरं भैक्षभक्षः प्रयुञ्जानश् (संहिताध्ययनं कुर्वाणः) चक्षुर् लभते, षण् मासान् यावकभक्षश् चतुरो मासानुदकसक्तुभक्षो द्वौ मासौ फलभक्षो मासमब्भक्षो द्वादशरात्रं वाऽनश्नन् क्षिप्रमन्तर्धीयते, ज्ञातीन् पुनाति सप्ताऽतीतान् सप्ताऽनागतानात्मानं च पञ्चदशं तारयते, तामेतां देवनिश्रेणीत्याचक्षते, एतया वै देवा देवत्वमगच्छन्नृषय ऋषित्वम्, तस्य ह वा एतस्य ब्रह्मसत्रस्य त्रिविध एवाऽऽरम्भो भवति प्रातःसवने माध्यन्दिने सवने ब्राह्मे वाऽपररात्रे, तस्य ह वा एतस्य द्वावेवाऽनध्यायौ यदात्माऽशुचिर् यद् देशः" इति (२।८) विशेषतः प्रतिपादितं दृश्यते। आथर्वणिकानां गृह्यकर्मणां प्रतिपादके **कौशिकसूत्रे** च "अर्धमासं चोपाकृत्य क्षपेरँस् त्र्यहमुत्सृज्य" इति (१४१।५) विशेषो दृश्यते।

उपर्युल्लिखितानां नानावेदशाखाश्रुतिसूत्रवचनानां दर्शनाच् श्रौतस्मार्तधर्मकृत्यार्थं मासानां ज्ञानमावश्यकमिति च सुस्पष्टं ज्ञायते। एतस्मादेव कारणाल् लगधमुनिप्रोक्ते वेदाङ्गज्योतिषग्रन्थे मासानां प्रतिपादनं कृतमस्ति (श्लो.१, ५, ६, ७, ११, २८, ३१, ३७, ४३)।

(च) पक्षाः

श्रौत-स्मार्तधर्मकर्मणां कृते पक्षाणां ज्ञानमावश्यकं भवति। तथाहि—

शैशिरीयशाकलऋग्वेदशाखाध्यायिनामैतरेयिब्राह्मणे "तस्मादापूर्यमाणपक्षेषु यजन्त एतदेवोपेप्सन्ते" इति (१९।५[४।२७]) श्रूयते। **शाङ्खायनीयऋग्वेदशाखाऽध्यायिनां शाङ्खायनब्राह्मणे** च "तद् यदपरपक्षं दाक्षायणयज्ञस्य व्रतानि चरति देवानामपि सोमपीथोऽसानीति" इति (४।४), "तस्मादेनान् पूर्वपक्षे यजन्ति" इति (४।६), "यद्यु नक्षत्रमुपेप्सेत् पूर्वपक्षे नक्षत्रमुदीक्ष्य यस्मिन् नक्षत्रे कामयेत तस्मिन् यजेत" इति च (४।१२) श्रूयते। तेषामेवाऽऽरण्यके च "पौर्णमास्यां वाऽमावास्यायां वा शुद्धपक्षे वा पुण्ये नक्षत्र एतेषामेकस्मिन् पर्वण्यग्निमुपसमाधाय परिसमुह्य परिस्तीर्य पर्युक्ष्य दक्षिणं जान्वाच्य स्रुवेणाऽऽज्याहुतीर् जुहोति" इति (४।३) श्रूयते। **कौषीतकिनाम् ऋग्वेदशाखाध्यायिनां ब्राह्मणोपनिषदि** च "पौर्णमास्यां वाऽमावास्यायां वा शुद्धपक्षे वा पुण्ये नक्षत्रेऽग्निमुपसमाधाय परिसमुह्य परिस्तीर्य पर्युक्ष्योत्पूय दक्षिणं जान्वाच्य स्रुवेण वा चमसेन वा कंसेन वैता आज्याहुतीर् जुहोति" (२।२[२।३]) इति श्रूयते। **आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायां ब्राह्मणभागे** च "पूर्वपक्षे सुत्या सम्पद्यते पूर्वपक्षं मासा अभिसम्पद्यन्ते ते पूर्वपक्ष उत्तिष्ठन्ति" (७।४।८।३) इति श्रूयते। **आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदब्राह्मणे** च "यं कामयते वसीयान् स्यादिति तं पूर्वपक्षे याजयेत्" (२।२।३।१-२) इत्यादि श्रूयते। **काठककृष्णयजुर्वेदसंहितायां** च "अग्नीषोमीयया पूर्वपक्ष उपतिष्ठेत" (७।५) इति श्रूयते। तथैव **कपिष्ठलकठकृष्णयजुर्वेदसंहितायां** च (५।४) श्रूयते। **माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाशतपथब्राह्मणे** च "अथाऽस्याऽऽपूर्यमाणपक्षे सर्वोऽग्निश् चीयते" (६।२।२।२६) इति, "या आपूर्यमाणपक्षस्य रात्रयस् ताः सर्वाः पौर्णमासीं समवयन्ति याऽअपक्षीयमाणस्य रात्रयस् ताः सर्वाऽ अमावास्यायां समवयन्ति, स यो हैवं विद्वान् त्स्वयमुपवसथे जुहोति सर्वदा हैवाऽस्य स्वयंहुतं भवति" इति (११।१।७।४), "याज्ञवल्क्येति होवाच यदिदं सर्वम् पूर्वपक्षाऽपरपक्षाभ्यामाप्तं सर्वम् पूर्वपक्षापरपक्षाभ्यामभिपन्नङ् केन यजमानः पूर्वपक्षापरपक्षयोराप्तिमति मुच्यतऽ इति ब्रह्मणर्त्विजा मनसा चन्द्रेण, मनो वै यज्ञस्य ब्रह्मा तद् यदिदम् मनः सोऽसौ चन्द्रः स ब्रह्मा सा मुक्तिः साऽतिमुक्तिः" (१४।६।१।७) इति, "स यः कामयेत महत् प्राप्नुयामित्युदगयनऽ आपूर्यमाणपक्षे पुण्याहे द्वादशाहमुपसद्व्रती भूत्वौदुम्बरे कंसे चमसे वा सर्वौषधम् फलानीति सम्भृत्य परिसमुह्य परिलिप्याऽग्निमुपसमाधायाऽऽवृताऽऽज्यं संस्कृत्य पुंसा नक्षत्रेण मन्थं सन्नीय जुहोति" इति च (४।९।३।१) श्रूयते। **काण्व-वाजसनेयिशुक्लयजुर्वेदशाखाशतपथब्राह्मणान्तर्गतायां बृहदारण्यकोपनिषदि** च (३।१।५, ६।३।१) पूर्वपक्षस्याऽपरपक्षस्य चोल्लेखः प्राप्यते। **जैमिनीय-सामवेदशाखाब्राह्मणे** च "अथ सत्त्रिण

उभौ पूर्वपक्षापरपक्षौ सुन्वन्त आसते" इति (१।३५९), "पूर्वपक्षाऽपरपक्षौ यजते" (२।९८) इति च दृश्यते। **ताण्डिकौथुम-राणायनीय-सामवेदशाखाध्यायिनां पञ्चविंश-ब्राह्मणे** च "तेषां पूर्वपक्षे सुत्या सम्पद्यते" इत्यादि (५।९।१४), "ते तमापूर्यमाणमामावास्येन यन्ति" इति (२५।१०।६), "ते तमपक्षीयमाणं पौर्णमासेन यन्ति" (२५।१०।८) इति च श्रूयते। **षड्विंशब्राह्मणे** च "पूर्वपक्षे वै देवा दीक्षन्ते, तेऽपरपक्षे सोमं भक्षयन्ति" (५।६।२) इति श्रूयते। **शाङ्खायनश्रौतसूत्रे** च "अमावास्यायां पौर्णमास्यां वाऽऽदधीत, शुद्धपक्षे पुण्ये नक्षत्रे" (२।१।७,८) इति, "अपरपक्षं दीक्षितव्रतोऽतिथिभ्यो ददाति" (३।८।१४) इति, "रुद्रं गवा यजते स्वस्त्ययनाय, शूलगव इत्याचक्षते, शुद्धपक्ष उपोष्य पुण्ये नक्षत्रे" इत्यादि (४।१७।१-३), "शुद्धपक्षे दीक्षा पुण्ये नक्षत्रे समापनं च" (५।२।४) इति, "शुद्धपक्षस्याऽष्टम्यां द्वादशाहाय दीक्षन्ते" इति (१०।१।१), "तेषां ज्यौत्स्नस्य पञ्चम्यामुपवसथः" इति (१३।१९।६), "अपरपक्षे सौरीष्टिः पूर्वाह्णे" (१४।३२।२) इति च पठ्यते। **आश्वलायनश्रौतसूत्रे** च "यद्याहिताग्निरपरपक्षे प्रमीयेताऽऽहुतिभिरेनं पूर्वपक्षं हरेयुः" इति (३।१०।१८), "उदगयने पूर्वपक्षे श्रोष्यन् बहिर् ग्रामात् स्थालीपाकं तिलमिश्रं श्रपयित्वाऽऽचार्याय वेदयीत" इति (८।१४।३) च पठ्यते। **बौधायनश्रौतसूत्रे** च "अथाऽहतं वासः परिधायाऽपरपक्षं व्रतं चरति" इति (१७।५१,५२,५३) पठ्यते। **आपस्तम्बश्रौतसूत्रे** च "अग्नीषोमाविमं सुम इति सप्तम्या पूर्वपक्षे ऐन्द्राग्न्या सप्तम्याऽपरपक्षे" इति (६।१६।५) पठ्यते। **हिरण्यकेशिश्रौतसूत्रे (सत्याषाढश्रौतसूत्रे)** च "त एतमापूर्यमाणपक्षमामावास्येन यजन्ति" इति (१८।४।३१), "त एतमपरपक्षं पौर्णमासेन यजन्ति इति (१८।४।३४) च पठ्यते। **मानवमैत्रायणीय-श्रौतसूत्रे** च "इष्टिभिर् यजेत पौर्णमास्याममावास्यायां वा पूर्वपक्षे वा पुण्ये नक्षत्रेऽन्यत्र नवम्याः" इति (५।१।१।१) दृश्यते। **कात्यायनश्रौतसूत्रे** च "दीक्षाप्रभृति शुक्लपक्षे पञ्चमीं सप्तमीं वा प्रसुतः" इति (७।१।२१), "उभयतः शुक्लपक्षौ बृहस्पतिसवेन यजते" इति (१४।१।२), पौर्णमासेन कृष्णपक्षानेत्याऽऽमावास्येन शुक्लाना शुनासीरीयात्" इति (१५।१।१६), "उत्तरे शुक्ले पञ्चबिलः" इति (१५।९।१), "उत्तरे शुक्ले सौत्रामणी" इति (१५।९।२२), अष्टम्यां नवम्यां वा फाल्गुनीशुक्लस्य" इति (२०।१।२), "चतुर्थ्यां वाऽपरपक्षस्य" इति (२४।४।२२), "पक्षादौ यद्धविस् तत् सर्वस्मिन्" इति (२४।४।१६), "शुक्लपक्षसप्तम्यां दीक्षा सरस्वतीविनशने" इति (२४।५।३०), "शुक्लपक्षश् चेत् त्रिवृदग्निष्टोम इत्येके पञ्चदश उक्थ्यः कृष्णे" इति (२४।६।२६), "तुरायणं वैशाखीशुक्लस्य पञ्चम्याम्" इति च (२४।७।१) पठ्यते। आर्यावर्तनिवासिनां **कौथुम-राणायनीयानां सामवेदशाखाध्यायिनां लाट्यायनश्रौत-सूत्रे** दाक्षिणात्यानां **शार्दूल-राणायनीय-सामवेदशाखाध्यायिनां** कौथुम-राणायनीय-सामवेदशाखाध्यायिनामेव वाऽपि **द्राह्यायणश्रौतसूत्रे** च प्रायेण समानरूपतया पक्ष-

पूर्वपक्षाऽपरपक्षोल्लेखयुतानि सूत्राणि दृश्यन्ते। तथाहि तत्र "तथा सत्येकादश्यां पूर्वपक्षस्य दीक्षित्वा त्रयोदश दीक्षाः कुर्वीरन्" इति (ला.४।८।१८, द्रा.८।४।२१), "उदगयन-पूर्वपक्षपुण्याहसन्निपाते यज्ञकालोऽनादेशे" इति (ला.८।१।१, द्रा.२२।१।१), "प्रथमायां पूर्वपक्षस्य दीक्षेतैकाहेभ्यः" इति (ला.८।१।४, द्रा.२२।१।४), "तैर् ज्योतिष्टोमादिभिस् तद्व्यवेतैः संवत्सरं पूर्वपक्षेषु यजेत, त्रयोदशे पूर्वपक्षे वाजपेयेनेष्ट्वेतरैरेवावृत्तैरपरं संवत्सरम्" इति (ला.८।११।६, द्रा.२४।३।७-८), "फाल्गुनीपक्षस्य प्रथमायां दीक्षेत" इति (ला.९।१।२, द्रा.२५।१।२), "त्रयोदश्यां त्वपरपक्षस्य दीक्षेत" इति (ला.९।१।८, द्रा.२५।१।८), "दशपेयेनेष्ट्वा य उत्तरः पूर्वपक्षस् तस्मिन्नेव केशवपनीयेन यजेतेति धानञ्जय्यः" इति (ला.९।३।३, द्रा.२५।३।३), "पौर्णमास्यामिति चेत् पूर्वपक्ष एव दीक्षेत" इति (ला.९।३।६, द्रा.२५।३।७), "उभे एव पूर्वपक्षे स्याताम्" इति (ला.९।३।९, द्रा.२५।३।१०), "तस्मिन्नेव पूर्वपक्षे क्षत्रस्य धृतिना यजेत" इति (ला.९।३।११, द्रा.२५।३।१२), "वसन्ते प्रथमायां पूर्वपक्षस्य केशश्मश्रूणि वापयित्वाऽहतं वसनं परिधायाऽनन्तर्हिते स्थण्डिले द्वादश रात्रीरधः शयीत तप्तं क्षीरं पिबन्" इति (ला.९।८।४, द्रा.२६।४।६), "त्रयोदश्यामपरपक्षस्य दीक्षेत" इति (ला.९।१२।१, द्रा.२७।५।७), "दीक्षा-क्रय-प्रसवोत्थानानि सर्वसत्रेषु पूर्वपक्ष उपपादयेयुः" इति (ला.१०।१।१, द्रा.२८।१।१), "तेषामेकस्याऽनुपपत्तौ क्रयोऽपरपक्षे स्यात्" इति (ला.१०।१।२, द्रा.२८।१।२), "त्रिषूत्थानमेव पूर्वपक्षे स्यात्" इति (ला.१०।१।४, द्रा.२८।१।४), "तथा सत्यष्टम्यां (पूर्वपक्षस्य) दीक्षित्वा पञ्चदश दीक्षाः कुर्वीरन्" इति (ला.१०।१०।१०, द्रा.३०।१।१४), "मासं दर्शपूर्णमासाभ्यामित्यामावास्येन पूर्वपक्षमितरं पौर्णमासेन" इति (ला.१०।१२।४, द्रा.३०।२।२५), "यजनीयेऽहनि प्रसवः स्यात् पूर्वपक्षे" इति (ला.१०।१४।९, द्रा.३०।४।२३), "अपरपक्षे विषमेषु" इति (ला.१०।१४।१०, द्रा.३०।४।२४), "षष्ठ्याम् पक्षस्येति गौतमः" इति (ला.१०।१५।१, द्रा.३१।१।२), "पूर्वपक्षो ह्यामावास्यस्थानमिति" इति (ला.१०।१५।६, द्रा.३१।१।६), "ते तमापूर्यमाणं ते तमपक्षीयमाणमिति च कृत्स्नवत् पक्षाभिधानम्" इति (ला. १०।१६।२,५; द्रा.३१।१।२६,३०), "तासु सहस्रं सम्पन्नासु पूर्वपक्षे गामतिरात्रं कृत्वा दत्त्वैता उत्तिष्ठेयुः" इति (ला.१०।१७।६, द्रा.३१।२।१३), "प्रादुर्भावान्तादेतयोरापदोरुत्तिष्ठेयुरप्यपरपक्षे" इति (ला.१०।१७।९, द्रा.३१।२।१७), "तथा प्रास्येयुर् यथैनं पूर्वपक्ष आगच्छेयुः" इति (ला.१०।१७।१२, द्रा.३१।२।१७) च पठ्यते। **आश्वलायनगृह्यसूत्रे** च "चतुर्थे गर्भमासे सीमन्तोनन्नयनम्, आपूर्यमाणपक्षे यदा पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात्" इति (१।१४।२,३), "अपरपक्षे मासिमासि चैवम्" इति च (२।५।११) पठ्यते। **बौधायनगृह्यसूत्रे** च "मासिश्राद्धेन चाऽपरपक्षे" (१।८।१४) इति पठ्यते। **आग्निवेश्यगृह्यसूत्रे** च "गृहवृद्धिमिच्छन् मासिमासि ऋतावृतौ संवत्सरेसंवत्सरे पूर्वपक्षे पुण्ये नक्षत्रे गृहशान्तिमारभेत" इति (२।५।९) दृश्यते। **वैखानसगृह्यसूत्रे** च "अथ श्राद्धं मासिमास्यपरपक्षे" (४।७) इति प्राप्यते। **वैखानसधर्मसूत्रे** च "वसन्ते शुक्लपक्षे पुण्यर्क्षे

पत्न्या सार्धं वनाश्रमं याति" इति (२।१) दृश्यते। **पारस्करगृह्यसूत्रे** च "उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्याः पाणिं गह्णीयात्" इति (१।४।५), "पक्षादिषु स्थाली-पाकं श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति" इति (१।१२।१), "पक्षं द्वौ वाऽऽशौचम्" इति (३।१०।३८) च पठ्यते। **कात्यायनश्राद्धकल्पसूत्रे** च "अपरपक्षे श्राद्धं कुर्वीत" इति, "श्रद्धान्वितः श्राद्धं कुर्वीत शाकेनापि नाऽपरपक्षमतिक्रामेन् मासिमासि वोऽशनमिति श्रुतेः" इति च पठ्यते। **जैमिनिगृह्यसूत्रे** च "गृहवृद्धिमिच्छन् मासिमास्यृतावृतौ संवत्सरेसंवत्सरे वा पूर्वपक्षे पुण्ये नक्षत्रे गृहशान्तिमारभेत" इति (२।६) पठ्यते। **द्राह्यायणगृह्यसूत्रे** च "सर्वोऽपरपक्षः पूर्णमासस्य, पूर्वपक्षो दार्शस्य" इति (२।२।७,८) दृश्यते। **कौशिकसूत्रे** च "स खल्वेतं पक्षमपक्षीयमाणः पक्षमनधीयान उपश्राम्येता दर्शात्" इति (१३९।१३), "अथ राज्ञामिन्द्रमहस्योपाचारकल्पं व्याख्यास्यामः, प्रोष्ठपदे शुक्लपक्षेऽश्वयुजे वा-ऽष्टम्यां प्रवेशः" इति (१४०।१,२), "मार्गशीर्षपौषमाघापरपक्षेषु तिस्रोऽष्टकाः" इति (१४१।२४) च पठ्यते।

उपर्युल्लिखितानां नानावेदशाखाश्रुतिसूत्रवचनानां **दर्शनात् श्रौतस्मार्तधर्म-कृत्यार्थं पक्षयोः** स्वरूपस्य तयोः पौर्वापर्यस्य च ज्ञानमावश्यकं **भवतीति स्पष्टतया ज्ञायते। एतस्मादेव** कारणाल् लगधमुनिप्रोक्ते **वेदाङ्गज्योतिषग्रन्थे पक्षयोः स्वरूपस्य तयोः पौर्वापर्यस्य च सूचनं कृतमस्ति** (श्लो.५, ६, ९, ११, १३, १४, १५, १७, ४१)।

(छ) तिथयः

धर्मकृत्यार्थं तिथीनां ज्ञानमपि आवश्यकं भवति। तिथ्युल्लेखयुता विधयो निषेधा वाऽपि बहवः श्रुतिषु श्रौतसूत्रेषु गृह्यसूत्रेषु च दृश्यन्ते। तथाहि—

आत्रेयतैत्तिरीयकृष्णयजुर्वेदसंहितायां ब्राह्मणभागे "य एवं विद्वान् पौर्णमासीं यजते यावदुक्थ्येनोपाप्नोति तावदुपाप्नोति, य एवं विद्वानमावास्यायां यजते याव-दतिरात्रेणोपाप्नोति तावदुपाप्नोति" (१।६।९।१-२) इति, "अग्नये पथिकृते पुरोडाशमष्टा-कपालं निर्वपेद् यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपातयेत्" (२।२।२।१, २।२।५।४) इति, "नाऽमावास्यायां च पौर्णमास्यां च स्त्रियमुपेयात्, यद्युप-पेयान् निरिन्द्रियः स्यात्" (२।५।६।५) इति, "बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमा-वास्यायाम्" इति (१।६।७।२), "अमावास्यायां निर्वपेत्" इति (२।३।५।३), "पूर्णमासे सन्नयेत्, मैत्रावरुण्याऽऽमिक्षयाऽमावास्यायां यजेत" इति (२।५।५।४), "तस्मात् सदृशीनां रात्रीणाममावास्यां च पौर्णमास्यां च देवता इज्यन्ते, एते हि देवतानां भागधे" इति (२।५।६।६), "आग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाऽच्युतो

भवति" इति (३।६।३।३), "अमावास्यया मासान् सम्पाद्याऽहरुत्सृजन्ति अमावास्यया हि मासान् सम्पश्यन्ति, पौर्णमास्या मासान् सम्पाद्याऽहरुत्सृजन्ति पौर्णमास्या हि मासान् सम्पश्यन्ति" इति (७।५।६।१), "संवत्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्नेषा वै संवत्सरस्य पत्नी यदेकाष्टका एतस्यां वा एष एतां रात्रिं वसति साक्षादेव संवत्सरमारभ्य दीक्षन्ते" इति (७।४।८।१), "फल्गुनीपूर्णमासे दीक्षेरन् मुखं वा एतत् संवत्सरस्य" इति (७।४।८।१-२) च श्रूयते। **तैत्तिरीयब्राह्मणे** च "पौर्णमास्यां पूर्वमहर् भवति व्यष्टकायामुत्तरम्, नानैवाऽर्धमासयोः प्रतितिष्ठति, अमावास्यायां पूर्वमहर् भवत्युद्दृष्ट उत्तरम्, नानैव मासयोः प्रतितिष्ठति, अथो खलु ये एव समानपक्षे पुण्याहे स्यातां तयोः कार्यं प्रतिष्ठित्यै" इति (१।८।१०।२) श्रूयते। **तैत्तिरीयारण्यके** च "यो ब्रह्मचारी अवकिरेदमावास्यायां रात्र्यामग्निं प्रणीयोपसमाधाय द्विराज्यस्योपघातं जुहोति" इति (२।१८।१) श्रूयते। **मैत्रायणीयसंहितायां** च "फल्गुनीपूर्णमासे ब्राह्मणस्याऽऽदध्यात्" इति (१।६।९), "यत् पौर्णमास्यां वाऽमावास्यायां वाऽग्निमाधत्ते प्रजापतिमेव प्रत्तं दुहे" इति (१।६।९), "यो राजयक्ष्मगृहीतः स्यात् तस्मा अमावास्यायां वैश्वदेवं चरुं निर्वपेत्" इति (२।२।७) च दृश्यते। काठकसंहितायां च "फाल्गुनीपूर्णमास आधेयः" इति (८।१), "यश्शिशिरेऽग्निमाधत्ते पूर्णमासे वाऽमावास्यायां वाऽऽदधीत, एतद् वै पुण्याहं पुण्याह एवैनमाधत्ते, तस्मादिष्ट्या वाऽग्रायणेन वा पशुना वा सोमेन वा पूर्णमासे वाऽमावस्यायां वा यजेत" इति (८।१), "प्रजननायाऽदित्यै घृते चरुममावास्यायां पशुकामोऽनुनिर्वपेत्" इति (८।१०), "अग्नीषोमीयमेकादशकपालं पूर्णमासेऽनुनिर्वपेदाग्नेयो वै ब्राह्मणो देवतया सोमराजा यज्ञमुखमग्न्याधेयं यज्ञमुखमेवाक्रम्य स्वाराज्यमुपैति" (८।१०) इति च श्रूयते। शैशिरीयशाकल-ऋग्वेदशाखाध्यायिनाम् **ऐतरेयिणां ब्राह्मणे** च "तदाहुर् यद् दर्शपूर्णमासयोरुपवसति" इति (३२।९) श्रूयते। **शाङ्खायनीय-ऋग्वेदशाखाध्यायिनां ब्राह्मणे** च "या वैषाऽऽषाढ्या उपरिष्टादमावास्या भवति तस्मिन् पुनरादधीत" (१।३) इति, "अमावास्यायामिन्द्रं यजति" (३।६) इति, "सा या तस्मिन् कालेऽमावास्योपसम्पद्येत तयेष्ट्वाऽथैतयेष्ट्या यजेत, यदि पौर्णमासी एतयेष्ट्वाऽथ पौर्णमासेन यजेत" (४।१२) इति, "तैषस्याऽमावास्याया एकाहे उपरिष्टाद् दीक्षेरन्" (१९।२) इति, "माघस्याऽमावास्यायामुपवसति उदङ्ङावर्त्स्यन्नुपेमे वसन्ति" (१९।३) इति, "तद् वै न तस्मिन् काले दीक्षेरन्ननागतं सस्यं भवति दहरकाण्यहानि भवन्ति संवेपमाना अवभृथादुदायन्ति तस्मादत्र न दीक्षेरँश् चैत्रस्याऽमावास्याया एकाह उपरिष्टाद् दीक्षेरन्नागतं सस्यं भवति महान्यहानि भवन्त्यसंवेपमाना अवभृथादुदायन्ति, तस्मादेतत् स्थितम्" (१९।३) इति च श्रूयते। **तेषामेवारण्यके** च "पौर्णमास्यां वाऽमावास्यायां वा शुद्धपक्षे वा पुण्ये नक्षत्र एतेषामेकस्मिन् पर्वण्यग्निमुपसमाधाय परिसमुह्य परिस्तीर्य पर्युक्ष्य दक्षिणं जान्वाच्य स्रुवेणाऽऽज्याहुतीर् जुहोति" इति (४।३),

"अथ मासिमास्यमावास्यायां वृत्तायां पश्चाच् चन्द्रमसं दृश्यमानमुपतिष्ठेत" इति (४।८), "अथ पौर्णमास्यां पुरस्ताच् चन्द्रमसं दृश्यमानमुपतिष्ठेत" इति (४।९), "अथ यदि महज् जिगमिषेत् त्रिरात्रं दीक्षित्वाऽमावास्यायां सर्वौषधस्य मन्थं दधिमधुभ्यामुपमन्थ्याऽग्निमुपसमाधाय परिसमुह्य परिस्तीर्य पर्युक्ष्य दक्षिणं जान्वाच्योत्तरतोऽग्नेः कंसे मन्थं कृत्वा हुत्वा होमान् मन्थे सम्पातमवनयेत्" (९।८) इति च श्रूयते। माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायिनां **शतपथब्राह्मणे** च "स वै द्वे पौर्णमास्यौ यजते द्वे अमावास्ये" इति (२।४।४।६), "अथ यत् पूर्वेद्युरैन्द्राग्नेन यजतेऽमावास्यायां दर्शपूर्णमासयोर् वै देवते स्त इन्द्राग्नी एव ते एवैतदञ्जसा प्रत्यक्षं यजति" इति (२।४।४।१७), "अमावास्यायां दीक्षते" इति (६।२।२।२६), "एतद् वै यैव प्रथमा पौर्णमासी तस्यां पशुमालभते या प्रथमाऽष्टका तस्यामुखां सम्भरति या प्रथमाऽमावास्या तस्यां दीक्षते" इति (६।२।२।३०), "तस्मादमावास्यायामेवाग्नी आदधीत पौर्णमास्यामन्वारभेताऽमावास्यायां दीक्षेत" इति (११।१।१।७), "अद्याऽमावास्येति मन्यमान उपवसति" इति (११।१।५।१, ११।१।५।४), "स यो हैवं विद्वान् पौर्णमासेनैव पौर्णमासीं यजत आमावास्येनाऽमावास्यां क्षिप्र एव पाप्मानमपहते" इति (११।१।३।७) च श्रूयते। **कौथुमराणायनीय-सामवेदशाखाध्यायिनां ताण्डिनां पञ्चविंशब्राह्मणे** च "एकाष्टकायां दीक्षेरन्" इति (५।९।१), "चित्रापूर्णमासे दीक्षेरन्" इति (५।९।१०), "अमावास्यायां पूर्वमहरुद्दृष्ट उत्तरं नानैवाऽर्द्धमासयोः प्रतितिष्ठति, पौर्णमास्यां पूर्वमहर् व्यष्टकायामुत्तरं नानैव मासोः प्रतितिष्ठति, तदाहुर् ये एव समानपक्षे पुण्याहनी स्यातां तयोरेव कार्यं समृद्ध्यै" इति (१८।११।८), "ते तमापूर्यमाणमामावास्येन यन्ति, तेषां पौर्णमास्यां गोष्टोम स्तोमो भवत्युक्थो बृहत्सामा, संस्थिते गोष्टोमे पौर्णमासं निर्वपन्ते ते तमपक्षीयमाणं पौर्णमासेन यन्ति तेषाममावास्यायामायुष्टोम स्तोमो भवत्युक्थ्यो रथन्तरसामा" इति (२५।१०।६-८) च श्रूयते। तेषामेव **षड्विंशब्राह्मणे** च "पौर्णमास्यः प्रतिहारः अष्टका उपद्रवोऽमावास्या निधनम्" इति (३।४।२२), "तस्मादमावास्यायां नाऽध्येतव्यं भवति" इति (५।६।२) च दृश्यते। तेषामेव **सामविधानब्राह्मणे** च "कन्याप्रवहण एकरात्रोपोषितोऽमावास्यायां निशि चतुष्पथ एह्यूषु ब्रवाणि त इत्येतेनाऽभिषिञ्चेत् त्रिरभिषिक्ता प्रदीयते" इति (२।६।५), "त्रिरात्रोपोषितः कृष्णचतुर्दश्यां शवादङ्गारमाहृत्य चतुष्पथे बाधकमिध्ममुपसमाधाय मत्स्यं कृकरमित्येतौ जुहुयात्" इत्यादि (२।६।६), "कृष्णाया गोः सरूपवत्सायाः पयसि कृष्णषष्टिकानां स्थालीपाकं श्रपयित्वा कृष्णपञ्चम्यामुदिते सोमे त्वमिमा ओषधीरित्येतेनाऽभिजुहुयात् सहस्रकृत्वः शतावरम्, एतेनैवाऽभिगीर्योद्धृत्य सभार्यः प्राश्नीयात्, सुरूपान् दीर्घायुषः पुत्रालँ् लभते" इति (२।८।२), "अष्टरात्रोपोषितोऽमावास्यायां निश्येकवृक्षे क्षीरिण्यरण्ये मांसं सुसंस्कृतमेकतृप्त्यवराद्धर्यं माणिभद्रायोपहरेदेष स्य ते मधुमाँ

इन्द्र सोमेत्येतेन, हिरण्यद्रोणं लभते" (३।३।१) इति, "त्रिरात्रोपोषितः शुक्लचतुर्दश्यां शौनं मांसं पायसं वोपहरेत् त्रिरस्मै सप्त धेनवो दुदुह्रिर इत्येतेन, दैवान् पोषान् पुष्यति, बहुपुरुषं चास्य भवति, क्रियाश्चानेन कुरुते" (३।३।१) इति, "त्रिरात्रोपोषितः कृष्णचतुर्दश्यां मत्स्यानुपहरेन् महाराजाय संश्रवस इति वर्गेण आसुरान् पोषान् पुष्यति, बहुपुरुषं चाऽस्य भवति, क्रियाश् चाऽऽनेन कुरुते" इति (३।३।१), "आषाढ्यां पौर्णमास्यां बीजानि धारयित्वोपवासयेत् तुलां चेन्द्रमिद् देवतातय इत्येतेन। व्युष्टायां रात्रावेतेनैवाऽभिगीय परिमृज्य प्रोक्ष्य धारयेत्, यानि गरीयांसि तान्यृध्यन्ते" इति (३।४।३), "त्रिरात्रोपोषितः कृष्णचतुर्दश्यां शवादङ्गारमाहृत्य चतुष्पथे बाधकमिध्म-मुपसमाधाय वैभीतकेन स्रुवेण सर्षपतैलेनाऽऽहुतिसहस्रं जुहुयात् संमील्येन यत्र वृश्चशब्दः स्यात्, तत्र पुरुषः शूलहस्त उत्तिष्ठति, तं ब्रूयादमुं जहीति हन्त्येनम्" इति (३।६।३), "अष्टरात्रोपोषितोऽमावास्यायां मुख आज्यं कृत्वा अग्निं नर इत्येतयोः पूर्वं मनसाऽनुद्रुत्यान्ते स्वाहाकारेणाग्नौ जुहुयात्, व्युष्टायां रात्रौ भूतौ (पश्यति), पञ्च हाऽस्य कार्षापणा भवन्ति, व्ययकृताश् च पुनरायान्ति, मूलमशून्यं कुर्यात्" इति (३।७।५) च श्रूयते। **शाङ्खायनश्रौतसूत्रे** च "अमावास्यायां पौर्णमास्यां वाऽऽदधीत" इति (२।१।७), "मध्यावर्षं पुनराधेयकालः, पुनर्वसू च नक्षत्रम्, या वाऽऽषाढ्या उत्तरा-ऽमावास्या" इति (१।५।४-६), "तैषस्याऽमावास्याया एकाह उपरिष्टाद् दीक्षेरन् माघस्य वा" इति (१३।१९।३), "तेषां ज्यौत्स्नस्य पञ्चम्यामुपवसथः" इति (१३।१९।६), "अष्टम्यां सुत्यमहः" इति (१५।१२।६) "दशम्यां दशपेयः" इति (१५।१४।५) च दृश्यते। **आश्व-लायनश्रौतसूत्रे** च "अग्निमग्नीषोमाविति पौर्णमास्याम्, अग्नीषोमयोः स्थान इन्द्राग्नी अमावास्यायामसन्नयतः" इति (१।३।९,१०), "अग्नीषोमीयं पौर्णमास्यां वैष्णवममावा-स्यायामेके नैके कञ्चन" इति (१।३।१३), "वृधन्वन्तावमावास्यायाम्" इति (१।५।३५), "पौर्णमासेनेष्टिपशुसोमा उपदिष्टाः, तैरमावास्यायां पौर्णमास्यां वा यजेत" इति (२।१।१,२), "अमावास्यायामपराह्णे पिण्डपितृयज्ञः" इति (२।६।१), "दाक्षायणयज्ञे द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत, नित्ये पूर्वे यथा सन्नयतोऽमावास्यायाम्, उत्तरयो-रैन्द्रं पौर्णमास्यां द्वितीयम्, मैत्रावरुणममावास्यायाम्" इति (२।१४।७-१०), "यथा-ऽमावास्यायामतिरात्रः स्यात् तथा दीक्षेरन्, तेऽमावास्यायामतिरात्रं संस्थाप्य तदह-रेवाऽऽमावास्यस्य सान्नाय्यवत्सानपाकुर्युः, तं पक्षमामावास्येन व्रजित्वा पौर्णमास्यां गामुपेयुः, पौर्णमासेनोत्तरं व्रजित्वाऽमावास्यायामायुषमुपेयुः" इति (१२।६।१५-१८) च दृश्यते। **बौधायनश्रौतसूत्रे** च "सा याऽऽषाढ्याः पौर्णमास्याः पुरस्तादमावास्या भवति सा सकृत् संवत्सरस्य पुनर्वसुभ्यां सम्पद्यते तस्यामादधीत" इति (३।१), "वैश्वदेव-हविर्भिर् यक्ष्यमाणो भवति फाल्गुन्यां वा चैत्र्यां वा पौर्णमास्यां नक्षत्रप्रयोग इत्येक आहुरुदगयन आपूर्यमाणपक्षस्य पुण्याहे प्रयुञ्जीत" इति (५।१), "स ग्रीष्मस्य जघन्या-

हःसु पुरस्तादाषाढ्यै पौर्णमास्यै दीक्षेत" इति (११।१), "स पुरस्तात् फाल्गुन्यै वा चैत्र्यै वा पौर्णमास्या आमावास्येन हविषेष्ट्वा दीक्षते" इति (१२।१), "यो ब्रह्मवर्चसकामः स्यात् तस्मा एतं सोमारौद्रं चरुं तिष्यापूर्णमासे निर्वपेदिति स यो ब्रह्मवर्चसकामः स्यात् स तैष्यां पौर्णमास्यां सोमारौद्रं चरुं निर्वपति" इति (१३।१७), "अथ वै भवति यः पापयक्ष्मगृहीतः स्यात् तस्मा एतमादित्यं चरुममावास्यायां निर्वपेत्" इति (१३।२८), "स यद्येको यदि बहवोऽमावास्याया एव षडहेनोपरिष्टाद् दीक्षन्ते" इति (१६।१), "संवत्सराय दीक्षिष्यमाणाः समवस्यन्ति, तद् ध स्मैतत् पूर्वे संवत्सरं समवसायाऽऽसतेऽन्योऽन्यस्यानूक्तं च मानुषं च विजिज्ञासमाना उतो ह्येकः शमरथस्य कर्ता भवति, ते चतुरहे पुरस्तान् माघ्यै पौर्णमास्यै दीक्षन्ते, तेषामेकाष्टकायां क्रयः सम्पद्यते इति नु यदि समामविज्ञाय दीक्षन्ते, यद्यु वा एतस्यामेवैकाष्टकायां समां विजिज्ञासन्ते चतुरह एव पुरस्तात् फाल्गुन्यै वा चैत्र्यै वा पौर्णमास्यै दीक्षन्ते" इति (१६।१३), "स तथा राजानं क्रीणाति यथा मन्यते द्विरात्रस्य मे सतोऽमावास्याया उपवसथीयेऽहन् पूर्वमहः सम्पत्स्यत उत्तरस्मिन्नुत्तरमिति" इति (१६।२४), "अथ वै भवति ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्णमासौ यजेत य एनौ सेन्द्रौ यजेतेति वैमृधः पूर्णमासेऽनुनिर्वाप्यो भवति तेन पूर्णमासः सेन्द्र ऐन्द्रं दध्यमावास्यायां तेनाऽमावास्या सेन्द्रेति" इति (१७।४७), "पौर्णमासीमेव यजेत भ्रातृव्यवान् नाऽमावास्यामिति स पौर्णमासीं पौर्णमासीमेव यजेत भ्रातृव्यवान् नाऽमावास्याम्" इति (१७।४८), "अथ याऽमावास्याऽऽगच्छति तस्यां महेन्द्रं यजते" इति (१७।४९), "दाक्षायणयज्ञेन सुवर्गकामो यजेत पूर्णमासे संनयेन् मैत्रावरुण्याऽऽमिक्षयाऽमावास्यायां यजेतेत्येतयेष्ट्या यक्ष्यमाण उपकल्पयतेऽहतं वासोऽथ पौर्णमास्या उपवसथेऽग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति" इति (१७।५१), "अथ याऽमावास्याऽऽगच्छति तस्या उपवसथेऽग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति" इति (१७।५१), "तथाऽहतं वासः परिधायाऽपरपक्षं व्रतं चरति, आगच्छत्यमावास्या तस्या उपवसथे यजते" इति (१७।५२, द्र.-१७।५३), "चातुर्मास्यैः सोमैर् यक्ष्यमाणो भवति स द्वयान् सम्भारानुपकल्पयत आग्निष्टोमिकाँश् च वैश्वदेवसम्भाराँश् च, स पुरस्तात् फाल्गुन्यै वा चैत्र्यै वा पौर्णमास्या आमावास्येन हविषेष्ट्वा दीक्षते" इति (१७।५५), "स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्यै मे यज्ञियेऽहन् द्वितीयमहः सम्पत्स्यत इति" इति (१७।५६; द्र.- १७।५७,५८,५९,६०,६१), "पञ्चशारदीयेन यक्ष्यमाणो भवति स उपकल्पयते सप्तदश निरष्टान् वत्सतरानेकहायनान् स पुरस्तान् मार्गशीर्ष्यै पौर्णमास्या आमावास्येन हविषेष्ट्वा सप्तदश मारुतीः पृश्नीर् वत्सतरीरालभते" इति (१८।११) च दृश्यते। **भरद्वाजश्रौतसूत्रे** च "यदहः पूर्णश् चन्द्रमाः स्यात् तां पौर्णमासीमुपवसेत्, श्वः पूरितेति वा, यदहर् न दृश्येत ताममावास्याम्, श्वो नोदेतेति वा, तत्रैषोऽत्यन्तप्रदेशो ये केचन पौर्णमासीममावास्यां वा

धर्मा अनारभ्याऽम्नायन्त उभयत्रैव ते क्रियन्ते" इति (१।१।६-९), "श्वोभूत इध्माबर्हिषी व्रतोपेते पौर्णमास्यां कुर्यात्, पूर्वेद्युरेवाऽमावास्यायाम्, यथाकामी पौर्णमास्यामित्यपरम्" इति (१।६।१-३), "अमावास्यायामधिवृक्षसूर्ये पिण्डपितृयज्ञेन चरन्ति" इति (१।७।१), "अमावास्यायां वैव पौर्णमास्यामादधीत, या पूर्वाभ्यां फल्गुनीभ्यां पौर्णमासी स्यान् न तस्यामादधीत" इति (५।२।७,८), "यदीष्ट्या यदि पशुना यदि सोमेन यजेताऽमावास्यायां वैव पौर्णमास्यां वा यजेत" इति (६।१५।१३), "ये प्रागेकाष्टकाया वत्सा जायन्ते तेषां प्रथमजं दक्षिणां ददाति" इति (६।१७।१९), "फाल्गुन्यां चैत्र्यां वा प्राचीनप्रवणे वैश्वदेवेन यजते" इति (८।१।६), "अष्टम्यां पर्वणि चोपवसति वाग्यतः" इति च (११।२२।१) दृश्यते। आपस्तम्बश्रौतसूत्रेऽपि "पूर्वेद्युरमावास्यायां पौर्णमास्यां त्वन्वाधानपरिस्तरणोपवासाः सद्यो वा सद्यस्कालायां सर्वं क्रियते" इति (१।१४।१६, १७), "द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत यः कामयेतर्ध्नुयामित्युक्त्वा हैकामेव यजेतेति" इति (३।१४।१४), "संस्थाप्य पौर्णमासीमिन्द्राय वैमृधाय पुरोडाशमेकादशकपालमनुनिर्वपति समानतन्त्रमेके समामनन्ति तस्य यथाकामी प्रक्रमे प्रक्रमात् तु नियम्यते" इति (३।१५।१-३), "फल्गुनीपूर्णमास आदधीतेत्युक्त्वाऽऽह यत् फल्गुनीपूर्णमास आदध्यात् संवत्सरस्यैनमासन् दध्याद् द्व्यहे पुरैकाहे वा, अमावास्यायां पौर्णमास्यां वाऽऽधेयः" इति (५।३।१६,१७), "अमावास्यायामादधानस्यैतत्, पौर्णमास्यां तु पूर्वस्मिन् पर्वणि सेष्टि सान्वारम्भणीयमाधानमपवृज्य" इति (५।२४।९), "व्रीहीणां यवानां श्यामाकानामित्यग्रपाकस्य यजेत, अमावास्यायां पौर्णमास्यां वा" इति (६।२९।३,४), "सर्वान् लोकान् पशुबन्धयाज्यभिजयति, तेन यक्ष्यमाणोऽमावास्यायां पौर्णमास्यां वा षड्ढोतारं मनसाऽनुद्रुत्याहवनीये सग्रहं जुहोति सूर्यं ते चक्षुरिति" इति (६।१।१,२), "अक्षय्यं ह वै चातुर्मास्ययाजिनस् सुकृतं भवति, फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा वैश्वदेवेन यजते" इति (८।१।१,२), "चातुर्मास्यैरिष्ट्वा सोमेन पशुना वा यजते, फाल्गुन्या उद्दृष्टे सोमाय दीक्षते, तं ततो नाऽनीजानमपरा फाल्गुनी पर्यवेयात् इति वै खलूत्सृजमानस्य, अथ पुनरालभमानस्य फाल्गुन्याश् चतुर्दश्यां शुनासीरीयेणेष्ट्वा, पञ्चदश्यां वैश्वदेवेन यजते" इति (८।२१।२-६, ८।२२।१), "अमावास्यायाममावास्यया यजेत पौर्णमास्यां पौर्णमास्या यदहश् चन्द्रमाः पूर्ण उत्सर्पेत् तां पौर्णमासीमुपवसेच् छ्वः पूरितेति वा खर्विकां तृतीयां वाजसनेयिनः समामनन्ति, यदहर् न दृश्यते तदहरमावास्यां श्वो न द्रष्टार इति वा" (२४।२।१९-२५), इति च दृश्यते। हिरण्यकेशिश्रौतसूत्रे च "पूर्वा पूर्णमास्युत्तराऽमावास्या, पौर्णमास्यां पौर्णमास्या यजतेऽमावास्यायाममावास्यया, आग्नेयोऽष्टाकपाल उपांशुयाजश् चाऽग्नीषोमीयो वैष्णवः प्राजापत्यो वाऽग्नीषोमीयश् चैकादशकपालः पौर्णमास्यां प्रधानानि, नाऽसोमयाजिनो ब्राह्मणस्याऽग्नीषोमीयः पुरोडाशो विद्यत इत्येकेषामाग्नेयोऽष्टाकपाल ऐन्द्राग्न एकादशकपालो

द्वादशकपालो वाऽमावास्यायामसन्नयत आग्नेयः सान्नाय्यं च सन्नयतः तदङ्गमितरे होमाः" इति (१।१), "पूर्वां पौर्णमासीमुपवसेत्, सम्पूर्णां वा, पूर्वाममावास्याम्, यदहर् वा न दृश्यते" इति (१।१), "एतत् कृत्वोपवसत्यमावास्यायाम्, पौर्णमास्यां तु पूर्वेद्युरग्न्यन्वाधानमग्निपरिस्तरणं च, श्वोभूत इध्माबर्हिर् वेदं च करोति, सद्यो वा सर्वं क्रियते, सद्यस्कालायामुपरिष्टाद् वेदकर्मणोऽग्नीन् परिस्तृणाति" इति (१।४), "द्वे पौर्णमास्यौ यजेत द्वे आमावास्ये यः कामयेतर्ध्नुयामित्येकेषां पौर्णमासीमेव यजते" इति (२।६), "दाक्षायणयज्ञेन सुवर्गकामो यजेत द्वे पौर्णमास्यौ भवतो द्वे अमावास्ये" इति (२।६), "अमावास्यायामपराह्णे पिण्डपितृयज्ञेन यजते" इति (२।७), "अमावास्यायां पौर्णमास्यामापूर्यमाणपक्षे वा पुण्ये नक्षत्रे" इति (३।२), "सोमेनाऽऽग्रयणेष्ट्या पशुबन्धेन वाऽमावास्यायां पौर्णमास्यां वा यजेत" इति (३।८), "अपि वा नाऽऽग्रयणेष्टिं कुर्वीत नवैरेवाऽमावास्यायां पौर्णमास्यां वा यजेत" इति (३।८), "अक्षय्यं ह वै सुकृतं चातुर्मास्ययाजिनः, तान्यालभमानः फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा पूर्वस्य पर्वण औपवसथ्येऽहनि पञ्चहोतारं मनसाऽनुद्रुत्य सग्रहं हुत्वाऽन्वारम्भणीयामिष्टिं निर्वपति" इति (५।१), "ततश् चतुर्षु मासेष्वाषाढ्यां श्रावण्यां वा वरुणप्रघासैर् यजते" इति (५।२), "ततश् चतुर्षु मासेषु कार्त्तिक्यां मार्गशीर्ष्यां वा द्व्यहं साकमेधैर् यजते" इति (५।३), "अमावास्यायां यजनीयेऽहनि दीक्षते, पौर्णमास्यां यजनीयेऽहनि सुत्यमहः" इति (७।१), "तं चेष्यमाणोऽमावास्यायां पौर्णमास्यामापूर्यमाणपक्षे वा पुण्ये नक्षत्र ऋत्विजो वृत्वा" इति (११।१।५), "तैष्याः पौर्णमास्याः पुरस्तात् पञ्चरात्रे मासि दीक्षेत, यथाऽस्यां परस्मिन् संवत्सरे तैष्यां पौर्णमास्यामभिषेचनीयाय दीक्षा प्रवत्स्यतीति" इति (१३।३।२,३), "चैत्र्यां पौर्णमास्यां साङ्ग्रहण्येष्ट्या यजेत तस्या योत्तराऽमावास्या तस्यां संज्ञान्या" इति (१४।१।४), "अमावास्यायां प्रायणीयोऽष्टम्यां महाव्रतम्, पौर्णमास्यामुदयनीयः" इति (१८।१।१९), च दृश्यते। **मानवमैत्रायणीयश्रौतसूत्रे** च "चन्द्राऽदर्शनेऽमावास्यायामिध्माबर्हिः सन्नह्याऽपराह्णे पिण्डपितृयज्ञेन चरन्ति प्राग्दक्षिणाचाराः" इति (१।१।२।१), "अग्निं चेष्यमाण उखां सम्भरेत् पौर्णमास्याममावास्यायामेकाष्टकायां वा" इति (६।१।१।१), "गवामयनाय माघीपक्षस्य द्वादश्यां दीक्षेरन्" इति (७।२।४।१३), "आश्वयुज्याममावास्यायां वा यजनीयेऽहन्यग्निष्टोमाय ज्योतिष्टोमाय दीक्षते" इति (९।१।१।३), "फाल्गुन्यां पौर्णमास्यां प्राजापत्यमृषभं तूपरं सर्वरूपमालभत" इति (९।२।१।३) च दृश्यते। माध्यन्दिनीयवाजसनेयि-शुक्लयजुर्वेद-शाखाध्यायिनां श्रौतसूत्रे **कात्यायनश्रौतसूत्रे** सर्वशुक्लयजुर्वेद-शाखासाधारणत्वेन गृह्यमाणे च "पूर्वां पौर्णमासीमुत्तरां वोपवसेत्" इति (२।१।१), "अपराह्णे पिण्डपितृयज्ञश् चन्द्रादर्शनेऽमावास्यायाम्" इति (४।१।१), "श्वो नोदेतेत्यदृष्टे वा पर्णशाखां छिनत्ति शामीलीं वेषेत्वेत्यूर्जेत्वेति वा" इति (४।२।१), "अग्नीषोमीयः पौर्णमास्यामैन्द्राग्नोऽमावास्यायाम्"

इति (४।४।४), "अमावास्यायां पयस्या मैत्रावरुणी" इति (४।४।६), "अमावास्यायामग्न्याधेयम्" इति (४।७।१), "चातुर्मास्यप्रयोगः फाल्गुन्याम्" इति (५।१।१), "आषाढ्यामयन्ते योनिरिति समारोह्योदवसाय निर्मथ्य वरुणप्रघासाः" इति (५।३।१), "कार्त्तिक्यां साकमेधा द्व्यहम्" इति (५।६।१), "संवत्सरेप्सोः फाल्गुन्युद्दृष्टे शुनासीरीयेणेष्ट्वा सोमेन पशुनेष्ट्या वा यजेत पौर्णमास्याम्" इति (५।११।१६), "फाल्गुन्युपवसथे शुनासीरीयं प्रातर् वैश्वदेवम्" इति (५।१।१८), "फाल्गुनीपौर्णमासे, चैत्र्याम्, चतुरहे वा पुरस्तात् पौर्णमास्याः, चैत्र्यानन्तर्यात्, सर्वा वा अविशेषात्, माघी वा क्रयश्रुतेः" इति (१३।१।३-८), "माघीपक्षयजनीये दीक्षा" इति (१५।१।४), "चातुर्मास्यप्रयोगः फाल्गुन्याम्" इति (१५।१।१५), "फाल्गुनीपक्षयजनीयेऽभिषेचनीयाय दीक्षते" इति (१५।३।३५), "तदन्ते केशवपनीयोऽतिरात्रः पौर्णमासीसुत्यः" इति (१५।९।१५), "चिकीषमाण उत्तरस्यां फाल्गुन्यां पौर्णमासेनेष्ट्वा पञ्चपशूनालभतेऽदक्षिणान्" इति (१६।१।५), "अमावास्यायामेके" इति (१६।१।७), "उखासम्भरणमष्टम्याम्" इति (१६।२।१), "दीक्षाऽमावास्यायामामावास्येनेष्ट्वा" इति (१६।४।२७), "राज्ञोऽश्वमेधः सर्वकामस्य, अष्टम्यां नवम्यां वा फाल्गुनीशुक्लस्य" इति (२०।१।१,२), "पितृमेधः संवत्सरास्मृतौ अयुग्मेषु वा, एकनक्षत्रे, अमावास्यायाम्, निदाघ-शरन्-माघेषु" इति (२१।३।१-५), "कुण्डपायिनामयनम् पौर्णमासीदीक्षम्" इति (२४।४।२१), "चतुर्थ्यां वाऽपरपक्षस्य" इति (२४।४।२२), "शुक्लपक्षसप्तम्यां दीक्षा सरस्वतीविनशने" इति (२४।५।३०), "तुरायणं वैशाखीशुक्लस्य पञ्चम्याम्, चैत्रस्य वा" इति (२४।७।१,२) च पठ्यते। **आश्वलायनगृह्यसूत्रे** च "श्रावण्यां पौर्णमास्यां श्रवणाकर्म" इति (२।१।१), "आश्वयुज्यामाश्वयुजीकर्म" इति (२।२।१), "मार्गशीर्ष्यां प्रत्यवरोहणं चतुर्दश्याम्, पौर्णमास्यां वा" इति (२।३।१,२), "हेमन्तशिशिरयोश् चतुर्णामपरपक्षाणाम् अष्टमीष्वष्टकाः" इति (२।४।१), "श्रावणस्य पञ्चम्यां हस्तेन वा" इति (२।५।३), "मध्यमाष्टकायामेताभ्यो देवताभ्योऽन्नेन हुत्वाऽपोऽभ्यवयन्ति" इति (३।४।१८), "सञ्चयनमूर्ध्वं दशम्या कृष्णपक्षस्याऽयुजास्वेकनक्षत्रे" इति (४।५।१), "गुरुणाऽभिमृता अन्यतो वाऽपक्षीयमाणा अमावास्यायां शान्तिकर्म कुर्वीरन्" इति (४।६।१), च दृश्यते। **कौषीतकिनां गृह्यसूत्रे** च "अथ वृषोत्सर्गः, कार्त्तिक्यां पौर्णमास्यां रेवत्यां वाऽऽश्वयुज्यां च गवां मध्ये सुसमिद्धमग्निं कृत्वाऽऽज्याहुतीर् जुहोति" इति (३।६।१,२), "अथात उपाकरणम्, ओषधीनां प्रादुर्भावे, श्रावण्यां पौर्णमास्याम्, हस्तेन श्रवणेन वा" इति (१३।७।१-४), "अथात उत्सर्गः, माघशुक्लप्रतिपदि" इति (३।८।१,२), "चतुर्दश्यमावास्ययोः, अष्टकासु" इति (३।९।७,८), "ऊर्ध्वमाग्रहायण्यास् तिस्रोऽष्टमीष्वष्टका अपरपक्षेषु" इति (३।१५।१), "श्रावण्यां पौर्णमास्यां हस्तेन श्रवणेन वा अक्षतसक्तूनां स्थालीपाकस्य वा जुहुयात्" (४।२।१) इति, "आश्वयुज्यां पौर्णमास्यामैन्द्रः पायसः"

इति (४।३।१), "आग्रहायण्यां प्रत्यवरोहेत्" (४।४।१) इति च दृश्यते। **काठकगृह्यसूत्रे (लौगाक्षिगृह्यसूत्रे)** च "अमावास्यां पौर्णमासीं च (मुनिव्रतः स्यात्)" इति (४।१७), "तस्याऽनध्यायोऽमावास्यां पक्षिणीं नाऽधीते" इति (९।११), "षडाहुतं प्रतिपदि पुत्रकामो ब्रह्मणाग्निः संविदान इति षड्भिराज्यस्य जुहोति" इति (४८।१), "श्रावण्यां चत्वारि हवींष्यासादयेत्" इति (५५।२), "आश्वयुज्यामश्वान् महयन्ति सर्वाणि च वाहनानि" इति (५७।१), "अथ वृषोत्सर्गः कार्त्तिक्यां पौर्णमास्यां रेवत्यां वाऽश्वयुजस्य" इति (५९।१-२), "आग्रहायण्यामेतान्येव चत्वारि हवींष्यासादयेद् यानि श्रावण्याम्, यवमयस् त्वपूपः" इति (६०।१), "ऊर्ध्वमाग्रहायण्यास् त्रयस् तामिस्रास् तेष्वष्टमीष्वष्टकायज्ञाः" इति (६१।२) च दृश्यते। **भारद्वाजगृह्यसूत्रे** च "श्रावण्यां पौर्णमास्यामुपकल्पयते" इति (२।१), "तत आग्रहायण्यां पौर्णमास्यामेवैतत् कर्म क्रियते" इति (२।२), "अमावास्यायामपराह्णे मासिश्राद्धमपरपक्षस्य" इति (२।११), "अष्टकां व्याख्यास्यामः, उपरिष्टान् माघ्याः प्राक् फाल्गुन्या यो बहुलस् तस्याऽष्टमी ज्येष्ठया सम्पद्यते तामेकाष्टकेत्याचक्षते" इति (२।१५), "प्रवासमेष्यन् भार्यायाः परिदां करोति, स्थूलाढारिकाजीवचूर्णानि कारयित्वाऽमावास्यायां रात्र्यां सुप्तायामुपस्थं प्रतिवपति सोमावास्य परिघमन्येभ्यः पुरुषेभ्योऽन्यत्र मदिति यद्यस्यां बहुतयापीच्छन्ति न हैव सिध्यन्ति" इति (२।२८), "स्त्री चैवं भर्तरि प्रमीते पाणिग्रहणादूर्ध्वं पर्वणः पौर्णमास्याममावास्यायां वा रोहिण्यां मृगशिरसि पुनर्वस्वोर् वा मध्यन्दिन आदधीत" इति (३।१), "अथात उपाकरणविसर्जने व्याख्यामः श्रवणापक्ष ओषधीषु जातासु हस्तेन पौर्णमास्यां वोपाकर्म" इति (३।८), "तैषीपक्षस्य रोहिण्यां पौर्णमास्यां वोत्सर्गोऽपि वा माघ्याम्" इति (३।८) च दृश्यते। **आपस्तम्बगृह्यसूत्रे** च सप्तमे खण्डे "पौर्णमास्यां पौर्णमासी यस्यां क्रियते" इति (२८), एकादशखण्ड-द्वादशखण्डयोः चतुर्थपटल-पञ्चमपटलयोर् वा मध्ये प्रक्षिप्तत्वेनाऽऽशङ्क्यमाने सुदर्शनाचार्येणाऽनुल्लिखिते हरदत्तेन त्वनाकुलायां व्याख्यातत्वेन सम्भाविते उपाकर्मोत्सर्जनपटले च "श्रवणापक्ष ओषधीषु जातासु हस्तेन पौर्णमास्यां वाऽध्यायोपाकर्म" इति (२), "तैषीपक्षस्य रोहिण्यां पौर्णमास्यां वोत्सर्गः" इति (८) च, "मार्गशीर्ष्यां पौर्णमास्यामस्तमिते स्थालीपाकः" इति (१९।३) च दृश्यते। **हिरण्यकेशिश्रौतसूत्रान्तर्गते गृह्यसूत्रे** च "अमावास्यायामपराह्णे मासिकम्, अपरपक्षस्याऽयुक्ष्वहस्सु वा" इति (२०।४।१), "माघ्याः पौर्णमास्या योऽपरपक्षस् तस्याष्टमीमेकाष्टकेत्याचक्षते" इति (२०।५।१), "तद् या पौर्णमासी श्रवणेन युज्यात् तस्यामुपरिष्टात् सायमग्निहोत्रस्य दक्षिणाग्निमुपसमादधाति औपासनमनाहिताग्नेः" इति (२०।६।२), "नियमत ऊर्ध्वं बलिं हरत्या मार्गशीर्ष्याः" इति (२०।६।८), "मार्गशीर्ष्याम् पौर्णमास्यामग्निमुपसमाधाय" इति (२०।८।२), "श्रवणापक्ष ओषधीषु जातासु हस्तेन पौर्णमास्यां वाऽध्यायोपाकर्म" इति

(२०।९।२), "तैषीपक्षस्य रोहिण्यां पौणमास्यां वोत्सर्गः" इति (२०।९।५), **मानव-मैत्रायणीयगृह्यसूत्रे** च "पौर्णमास्याममावास्यायां वाऽऽग्नेयेन पशुना यजेत" इति (१।२।२०), "प्रतिपदं पक्षिणीं रात्रीं नाधीयीत" इति (१।४।१०), "तृतीयस्य वर्षस्य भूयिष्ठे गते चूडाः कारयेत्, उदगयने ज्यौत्स्ने पुण्ये नक्षत्रेऽन्यत्र नवम्याम्" इति (१।२१।१), "आग्रहायण्यां पौर्णमास्यां पयसि स्थालीपाकं श्रपयित्वा तस्य जुहोति" इति (२।७।१), "तिस्रोऽष्टकाः, ऊर्ध्वमाग्रहायण्याः प्राक् फाल्गुन्यास् तामिस्राणामष्टम्यः, तासु नाऽधीयीत, तासु स्थालीपाकं श्रपयित्वा तस्य जुहोति" इति (२।८।१-४), "फाल्गुन्यां पौर्णमास्यां पुरस्ताद् धानापूपाभ्यां भगं चाऽर्यमणं च यजेत्" इति (२।१०।१), "अथातः षष्ठीकल्पं व्याख्यामः शुक्लपक्षस्य पञ्चम्यां प्रत्यङ्मुखो हविष्यमन्नमश्नीत, अधः शयीत दर्भेषु शालिपलालेषु वा प्राक्शिरा ब्रह्मचारी, श्वोभूत उदित आदित्ये स्नानं पानं भोजनमनुलेपनं स्रजो वासांसि न प्रत्याचक्षीत" इति (२।१३।१-४), "सर्पेभ्यो बिभ्यत् श्रावण्यां तूष्णीं भौममेककपालं श्रपयित्वाऽक्षतसक्तून् पिष्ट्वा स्वकृत इरिणे दर्भानास्तीर्याऽच्युताय ध्रुवाय भौमाय स्वाहेति जुहोति" इति (२।१६।१), "षडाहुतं प्रतिपदि पुत्रकामः पयसि स्थालीपाकं श्रपयित्वा तस्य जुहोति" इति (२।१८।१,२) च दृश्यते। **बौधायनगृह्यसूत्रे** च "अथाष्टकाहोमः, तैषे मास्यपरपक्षस्याष्टम्यां क्रियेत, एवं माघ एवं फाल्गुने यदि विहतः,यद्यु वै समस्त उपरिष्टान् माघ्याः पौर्णमास्या अपरपक्षस्य सप्तम्यामष्टम्यां नवम्यामिति क्रियेताऽपि वाऽष्टम्यामेव" इति (२।११।१-४), "हुतानुकृतिरुपाकर्म, श्रावण्यां पौर्णमास्यां क्रियेताऽपि वा आषाढ्याम्" इति (३।१।१,२), "अथातोऽर्धमासेऽर्धमासेऽष्टम्यां ब्राह्मणा ब्रह्मचारिणस् स्त्रियश् चाऽहरुपवसन्ति" इति (३।८।१), "बलिहरणानुकृतिरुत्सर्गः, तैष्यां पौर्णमास्यां क्रियेताऽपि वा माघ्याम्" इति (३।९।१, २) च दृश्यते। **पारस्करगृह्यसूत्रे** च "पक्षादिषु (प्रतिपत्सु) स्थालीपाकं श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति" इति (१।१२।१), "अथातोऽध्यायोपाकर्म, ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्यां श्रावणस्य पञ्चमीं हस्तेन वा" इति (२।१०।१,२), "वातेऽमावास्यायां सर्वानध्यायः" इति (२।११।१), "पौषस्य रोहिण्यां मध्यमायां वाऽष्टकायामध्यायानुत्सृजेरन्" इति (२।१२।२), "अथातः श्रवणाकर्म, श्रावण्यां पौर्णमास्याम्" इति (२।१४।२), "प्रौष्ठपद्यामिन्द्रयज्ञः" इति (२।१५।१), "आश्वयुज्यां पृषातकाः" इति (२।१६।१), "मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म" इति (३।२।१), "ऊर्ध्वमाग्रहायण्यास् तिस्रोऽष्टकाः" इति (३।३।१), "मध्यावर्षे च तुरीया शाकाष्टका" इति (३।३।१३), "अथ वृषोत्सर्गः, गोयज्ञेन व्याख्यातः, कार्त्तिक्यां पौर्णमास्यां रेवत्यां वाऽऽश्वयुजस्य" इति (३।९।३), "अथातोऽवकीर्णिप्रायश्चित्तम्, अमावास्यायां चतुष्पथे गर्दभं पशुमालभते" इति (३।१२।२) च पठ्यते। **कात्यायनश्राद्धकल्पसूत्रे** च "अपरपक्षे श्राद्धं कुर्वीत, ऊर्ध्वं वा चतुर्थ्या यदहः सम्पद्येत" इति

प्रथमायां कण्डिकायाम्, "अथ काम्यानि भवन्ति, स्त्रियोऽप्रतिरूपाः प्रतिपदि, द्वितीयायां स्त्रीजन्म, अश्वास् तृतीयायाम्, चतुर्थ्यां क्षुद्रपशवः, पुत्राः पञ्चम्याम्, द्यूतर्द्धिः षष्ठ्याम्, कृषिः सप्तम्याम्, वाणिज्यमष्टम्याम्, एकशफं नवम्याम्, दशम्यां गावः, परिचारका एकादश्याम्, धनधान्यानि द्वादश्याम्, कुप्यं हिरण्यं ज्ञातिश्रैष्ठ्यं च त्रयोदश्याम्, युवानस् त्वत्र म्रियन्ते, शस्त्रहतस्य चतुर्दश्याम्, अमावास्यायां सर्वमिति" इति नवम्यां कण्डिकायां पठ्यते। कौथुमराणायनीयानां सामगानां **गोभिलगृह्यसूत्रे** च "तथा तिथिनक्षत्रपर्वसमवाये" इति (१।१।१३), "दर्शे पौर्णमासे वाऽग्निसमाधानं कुर्वीत" इति (१।१।१४), "अथ दर्शपूर्णमासयोः, सन्ध्यां पौर्णमासीमुपवसेत्, उत्तरामित्येके, यदहश् चन्द्रमा न दृश्येत तामावास्याम्, पक्षान्ता उपवस्तव्याः पक्षादयोऽभियष्टव्याः, आमावास्येन हविषा पूर्वपक्षमभियजते पौर्णमासेनाऽपरपक्षम्, यः परमो विकर्षः सूर्याचन्द्रमसोः सा पौर्णमासी यः परमः सङ्कर्षः साऽमावास्या, यदहस् त्वेव चन्द्रमा न दृश्येत तामावास्यां कुर्वीत, दृश्यमानेऽप्येकदा, गताध्वा भवतीति त्रयः पौर्णमासीकाला भवन्ति सन्ध्या वाऽस्तमितोदिता वोच्चैर् वा, यदहः पूर्णो भवति" इति (१।५।१-१२), "आग्नेय एवाऽनाहिताग्नेरुभयोर् दर्शपूर्णमासयोः स्थालीपाकः स्यात्, आग्नेयो वाऽग्नीषोमीयो वाऽहिताग्नेः पौर्णमास्याम्, ऐन्द्रो वैन्द्राग्नो माहेन्द्रो वा अमावास्यायाम्" इति (१।८।२१-२३), "आमावास्याया पौर्णमासं नात्येत्या पौर्णमास्या आमावास्यम्" इति (१।९।१३), "जननाद् यस् तृतीयो ज्यौत्स्नस् तस्य तृतीयायां प्रातः सशिरस्कमाप्लाव्याऽस्तमिते वीते लोहितिम्नि अञ्जलिकृतः पितोपतिष्ठते" इति (२।८।१), "अथ येऽत ऊर्ध्वं ज्यौत्स्नाः प्रथमोद्दृष्ट एव तेषु पितोपतिष्ठतेऽपामञ्जलिं पूरयित्वाऽभिमुखश् चन्द्रम्" इति (२।८।६), "दैवतमिष्ट्वा तिथिं नक्षत्रं च यजेत" इति (२।८।२०), "प्रौष्ठपदीं हस्तेनोपाकरणम्" इति (३।३।१), "श्रवणामेक उपाकृत्यैतमा सावित्रात् कालं काङ्क्षन्ते" इति (३।३।१३), "तैषीमुत्सृजन्ति" इति (३।३।१४), "अष्टकाऽमावास्यासु नाऽधीयीरन्, पौर्णमासीषु च, तिसृषु कार्त्तिक्यां फाल्गुन्यामाषाढ्यां चाहोरात्रम्" इति (३।३।२०-२२), "अथातः श्रवणाकर्म, पौर्णमास्यां कृत्यम्" इति (३।७।१,२), "आश्वयुज्यां पौर्णमास्यां पृषातके पायसश् चरू रौद्रः" इति (३।८।१), "आग्रहायण्यां बलिहरणम्" इति (३।९।१), "चतुरष्टको हेमन्तः" इति (३।१०।३), "त्र्यष्टक इत्यौद्गाहमानिः" इति (३।१०।५), "योर्ध्वमाग्रहायण्यास् तामिस्राष्टमी तामपूपाष्टकेत्याचक्षते" इति (३।१०।७), "तैष्या ऊर्ध्वमष्टम्यां गौः" इति (३।१०।१६), "अमावास्यायां तत् श्राद्धम्" इति (४।४।२), "माघ्या ऊर्ध्वमष्टम्यां स्थालीपाकः" इति (४।४।१७), "पौर्णमास्यां रात्रावविदासिनि ह्रदे नाभिमात्रमवगाह्याऽक्षततण्डुलानृगन्तेष्वास्येन जुहुयात् स्वाहेत्युदके" इति (४।५।२६), "श्रवणाऽऽग्रहायणीकर्मणोरक्षताञ् छिष्ट्वा" इति (४।८।१), "पौर्णमास्यां रात्रौ खदिरशङ्कुशतं

जुहुयादायुष्कामः, आयसान् वधकामः" इति (४।८।१२,१३) च पठ्यते। **द्राह्यायण-गृह्यसूत्रे खादिरगृह्यसूत्रे जैमिनिगृह्यसूत्रे** च प्रायेणैतादृशानि वचनानि दृश्यन्ते। आथर्वणानां **कौशिकगृह्यसूत्रेऽ**पि तिथ्युल्लेखयुता विधयो बहव एव दृश्यन्ते।

उपर्युल्लिखितानां नानावेदशाखाश्रुतिसूत्रवचनानां दर्शनाच् श्रौतस्मार्तधर्म-कृत्यार्थं तिथीनां ज्ञानमावश्यकं भवतीति स्फुटतया बुध्यते। एतस्मादेव कारणाल् लगधमुनिप्रोक्ते वेदाङ्गज्योतिषग्रन्थे तिथीनां प्रतिपादनं कृतमस्ति (श्लो.९, ११, २०, २१, २२, २३, २५, २६)।

(ज) पर्वाणि

आर्यावर्त पुस्तकालय

श्रौत-स्मार्तधर्मकर्मार्थं पर्वणां ज्ञानं परमावश्यकं भवति। पर्वकालस्योल्ले-खाश् च श्रौतसूत्रादिषु च बहुत्र दृश्यन्ते। तथाहि—

आश्वलायनश्रौतसूत्रे "वसन्ते पर्वणि ब्राह्मण आदधीत" इति (२।१।१२), "यवाग्वा पयसा वा स्वयं पर्वणि जुहुयात्" इति (२।४।२), **शाङ्खायनश्रौतसूत्रे** च "याजमानं च पर्वणि" इति (२।१४।७), "अनागते पर्वण्यामावास्ये प्रवृत्तेऽभ्युदितेष्टिः" इति (३।२।१), "अतीते पर्वण्यामावास्ये प्रवृत्तेऽभ्युद्दृष्टेष्टिः" इति (३।३।१), "सदा यजते-ऽन्यत्र पर्वणः" इति (३।११।९,१३), "स्वयंहोमश्च पर्वणि" इति (४।५।१२), "पर्वणिपर्वणि वा संस्थित ऐन्द्राग्नः" इति (१४।१०।१७), च दृश्यते। **बौधायनश्रौतसूत्रे** च "अवत्ते स्विष्टकृति स्रुवेण पार्वणौ होमौ जुहोति" इति (१।१७), "अन्नकामस्य सर्वकामस्य वा पर्वणिपर्वणि वैश्रवणयज्ञः" इति (१९।१०), "तस्य चेदुपवसतोऽस्तमित आदित्ये पुरस्ताच् चन्द्रमा लोहितीभवन्निवोदियादारमताऽग्निहोत्रेणेत्युक्त्वा पार्वणेन प्रक्रामेत् संस्थिते पार्वणेऽग्निहोत्रं जुहुयादिति नु खलु पौर्णमास्यामथामावास्यायामिति" इति (२०।१), "चतुर्दश चतुर्गृहीतानि गृह्णाति सोपवसथे पार्वणे वाऽथेतरस्मिन् पञ्चदश" इति (२९।८), "काले पार्वणेन यजेत" इति (२९।८) च दृश्यते। **भारद्वाजश्रौतसूत्रे** च "स्वयं यजमानः पर्वण्यग्निहोत्रं जुहोत्रि" इति (१।११।७), "पर्वणि यजमानः केशश्मश्रु वापयते" इति (४।१।२), "अष्टम्यां पर्वणि चोपवसति वाग्यतः" इति (११।२२।१) च दृश्यते। **आपस्तम्बश्रौतसूत्रे** च "स्रुवेण पार्वणौ होमौ" इति (२।२०।५), "पूर्वस्मिन् पर्वणि पञ्चहोतारं मनसाऽनुद्रुत्य" इत्यादि (८।१।३), "ततश्चतुर्षु मासेषु पूर्वस्मिन् पर्व-ण्युपक्रम्य द्व्यहं साकमेधैर् यजते" (८।९।१) इत्यादि च दृश्यते। **हिरण्यकेशिश्रौतसूत्रे** सत्याषाढकृते च "दर्शपूर्णमासावारभमाणः पूर्वस्य पर्वण औपवसथ्येऽहनि" इत्यादि (३।५।२०), "पौर्णमास्यां तु पूर्वस्य पर्वण औपवसथ्येऽहन्यग्नीनाधाय सेष्ट्यपवृज्य तदानीमेव चतुर्होतारं सारस्वतौ होमावन्वारम्भरणीयां च कुरुते" इति (३।५।२८), "तान्या-

लभमानः फल्गुन्यां पौर्णमास्यां चैत्र्यां वा पूर्वस्य पर्वण औपवसथ्येऽहनि" इत्यादि (५।१।२) च दृश्यते। **मानवमैत्रायणीयश्रौतसूत्रे** च "पर्वण्याग्रयणं कुर्वीत वसन्ते यवानां शरदि व्रीहीणाम्" इति (१।६।४।१) दृश्यते। **कात्यायनश्रौतसूत्रे** च "पुरस्ताद् वा पर्वणः पर्वणोऽन्ते वा" इति (५।११।३०) दृश्यते। **लाट्यायनश्रौतसूत्र-द्राह्यायन-श्रौतसूत्रयोश्** च "पर्वण्युत्तमं साकमेधानाम्" इति (ला.८।८।४६, द्रा.२३।४।४७), "पर्वणि त्वेव स्यात्, तेषां पौर्णमास्यां तेषाममावास्यायामिति हि प्रत्यक्षेण विदधाति" इति (ला.१०।१६।३, द्रा.३१।१।२७,२८), "चन्द्रप्रमाणास् त्वेव पर्वसु स्युः" इति (ला.१०।१६।१३, द्रा.३१।२।७), "पर्वणोरिन्द्रकुक्षी" इति (ला.१०।१८।४, द्रा.३१।३।४), "तयोर् यस्मिन्ननुपेते पर्वाऽऽगच्छेत् तेनोत्तरं पक्षमुपक्रमेत" इति (ला.१०।१८।८, द्रा.३१।३।९), **आश्वलायन-गृह्यसूत्रे** च "अथ पार्वणः स्थालीपाकः" इति (१।१०।१), "अथातः पार्वणे श्राद्धे" इति (४।७।१) च दृश्यते। **कौषीतकिगृह्यसूत्रे** च "पर्वसु (नाधीयीत)" इति (३।९।१०) दृश्यते। **भारद्वाजगृह्यसूत्रे** च "अष्टम्यः पर्वाणि चोपवसति, आग्नेयेन स्थालीपाकेन पर्वसु यजते" इति (१।१९), "पर्वण्युदगयने" इत्यादि (३।४), "अथ पर्वण्यतीते मनो ज्योतिरयाश् चाग्ने यदस्मिन्नग्ने स्वस्ति न इन्द्र इति चतस्र आज्याहुतीर् हुत्वा स्थाली-पाकं च कुर्यात् प्रागष्टम्या अत ऊर्ध्वं सोपवासः कार्यो द्वयोर् द्वौ त्रिषु त्रय इति" इति (३।२१) च दृश्यते। **काठकगृह्यसूत्रे** (लौगाक्षिगृह्यसूत्रे) च "शुद्धपक्षस्य पुण्याहे पर्वणि वा" इति (३१।२, ४३।४), "पुण्याहे पर्वणि वा" इति (३७।२-७), "पर्वणि भार्यामुपवास्य दर्शपूर्णमासदेवताभ्यो जुहुयात्" इति (५।३।२) च दृश्यते। **मानवमैत्रायणीयगृह्यसूत्रे** च "औद्वाहिकं प्रेतपिता शालाग्निं कुर्वीत, अन्यत्र ततः प्रेते पितरि प्रज्वलन्तोऽग्निं जागरयेयुः पर्वणि ज्यौत्स्ने पुण्ये नक्षत्रेऽन्यत्र नवम्याः" इति (२।१।२), "पर्वण्याग्रयणं कुर्वीत वसन्ते यवानां शरदि व्रीहीणाम्" इति (२।३।१०), "सांवत्सरेषु च पर्वसु" इति (२।१०।७), "यदि पर्वसु मार्तिकं भिद्यते पार्थिवमसि पृथिवीं दृंहस्व योनिं गच्छ स्वाहेत्यप्सु प्रहरेत्" इति (३।१५।५), च दृश्यते। **वाराहमैत्रायणीयगृह्यसूत्रे** च "पर्वसु चैवं स्यात्" इति (७।२०) दृश्यते। **हिरण्यकेशिश्रौतसूत्रान्तर्गते सत्याषाढकृते गृह्यसूत्रे** च "नित्यमत ऊर्ध्वं पर्वस्वाग्नेयस्थालीपाकेन यजते" इति (१९।७।१९) दृश्यते। **बौधायनगृह्यसूत्रे** च "पर्वणिपर्वणि चाऽऽग्नेयस्थालीपाकः" इति (२।६।२३) दृश्यते। **गोभिलगृह्यसूत्रे** च "कुमारस्य मासिमासि संवत्सरे सांवत्सरिकेषु वा पर्वस्वग्नीन्द्रौ द्यावापृथिवी विश्वान् देवाँश् च यजेत" इति (२।८।१९) दृश्यते।

उपर्युल्लिखितेभ्यो वचनेभ्यः श्रौतस्मार्तधर्मकृत्यार्थं पर्वकालज्ञानमावश्यक-मिति स्पष्टतया बुध्यते। तस्मादेव कारणल् लगधमुनिप्रोक्ते वेदाङ्गज्योतिषग्रन्थे पर्वज्ञानोपायः प्रदर्शितोऽस्ति (श्लो.१९-१९, २५, ४३)।

(झ) विषुवत्तिथिः

यद्यपि संवत्सरसत्रयागगतं विषुवद्दिनं ज्योतिषप्रतिपादितं विषुवद्दिनं च भिन्नमेव, तथापि समानपक्षकद्वययुक्तत्वमुभयत्र समानमित्युभयत्र विषुवच्छब्द-प्रयोगो दृश्यते। ज्योतिषप्रतिपादितस्य विषुवद्दिनस्य वास्तविकसौरवर्षायनर्तुमास-गणनायां सौरवर्षादिभिश् चान्द्रवर्षादीनां सम्बन्धस्य स्थापनायां चोपयोगित्वमिति वेदाङ्गज्योतिषेऽपि तस्य चर्चा कृताऽवगम्यते (श्लो.२३)।

(ञ) नक्षत्राणि

श्रौत-स्मार्तधर्मकर्मार्थं नक्षत्रज्ञानमप्यावश्यकं भवति। तथाहि—

शैशिरीय-शाकल-ऋग्वेदशाखामन्त्रसंहितायाम् "सूर्याया वहतुः प्रागात् सविता यमवासृजत्। अघासु हन्यन्ते गावोऽर्जुन्योः पर्युह्यते" इति (१०।८५।१३) विवाहनक्षत्रोल्लेखः कृतोऽस्ति। **काठककृष्णयजुर्वेदशाखासंहितायां** ब्राह्मणभागे "दिशो वै नाऽकल्पन्त न प्राज्ञायन्त तत एतामग्नये प्राचीं दिशमरोचयन् यत् कृत्तिका यत् कृत्तिकास्वग्निमाधत्ते प्रच्यामेवैनं दिश्याधत्ते" (८।१) इत्यादिना अग्न्याधान-नक्षत्राणि कृत्तिकादीनि विहितानि सन्ति। एष विधिः **कपिष्ठलकठकृष्णयजुर्वेद-शाखासंहिताब्राह्मणभागे** च (६।६) दृश्यते। **मैत्रायणीयकृष्णयजुर्वेदसंहिताब्राह्मण-भागे** च "कृत्तिकासु ब्राह्मणस्याऽऽदध्यादाग्नेयीः कृत्तिका आग्नेयो ब्राह्मणः" (१।६।९) इत्यादिना अग्न्याधाननक्षत्राणि विहितानि सन्ति। **आत्रेयतैत्तिरीयकृष्णयजुर्वेद-संहितान्तर्गते ब्राह्मणभागे** च "पुनर्वस्वोरादधीतैतद् वै पुनराधेयस्य नक्षत्रं यत् पुनर्वसू, स्वायामेवैनं देवतायामाधाय ब्रह्मवर्चसी भवति" इति (१।५।१।४) विधिर् दृश्यते। **शाङ्खायनीयऋग्वेदशाखाध्यायिनां ब्राह्मणे** च "मध्यावर्षे पुनर्वसू नक्षत्रमुदीक्ष्य पुनरादधीत पुनर् मा वसु वित्तमुपनमत्विति" इति (१।३) विधिर् दृश्यते। **आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदशाखाब्राह्मणे** च "कृत्तिकास्वग्निमादधीत, एतद् वा अग्नेर् नक्षत्रम्, यत् कृत्तिकाः, स्वायामेवैनं देवतायामाधाय ब्रह्मवर्चसी भवति" (१।१।२।१) इत्यादिना अग्न्याधाननक्षत्राणि प्रतिपादितानि सन्ति। माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायिनां **शतपथब्राह्मणे** च "कृत्तिकास्वग्नीऽ आदधीत" (२।१।२।१) इत्यादिना अग्न्याधाननक्षत्राणि प्रतिपादितानि सन्ति। अन्येऽप्यनेके नक्षत्रसम्बद्धा विधयः श्रुतिषु दृश्यन्ते। **आश्वलायनश्रौतसूत्रे** च "अग्न्याधेयम्, कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोः एतेषां कस्मिँश् चित्" इति (२।१।९।११), **शाङ्खायनश्रौतसूत्रे** च "कृत्तिकाप्रभृतीनि त्रीणि फल्गुनीप्रभृतीनि च" इति (२।१।९), **बौधायनश्रौतसूत्रे** च "अथातो नक्षत्राणामेव मीमांसा, कृत्तिकास्वग्नि-

मादधीत, रोहिण्यामग्निमादधीत, पुनर्वस्वोरग्निमादधीत, पूर्वयोः फल्गुन्योरुत्तरयोः फल्गुन्योश् चित्रायामिति" इति (२।१२), **भारद्वाजश्रौतसूत्रे** च "कृत्तिकासु ब्राह्मण आदधीत यः कामयेत मुख्यो ब्रह्मवर्चसी स्यामिति" इत्यादि (५।१।७-१८), **आपस्तम्बश्रौतसूत्रे** च "अथ नक्षत्राणि, कृत्तिकासु ब्राह्मण आदधीत मुख्यो ब्रह्मर्चसी भवति, गृहांस् तस्याऽग्निर् दाहुको भवति, रोहिण्यामाधाय सर्वान् रोहान् रोहति" इत्यादि (५।४।२-१५), सत्याषाढकृते **हिरण्यकेशिश्रौतसूत्रे** च "कृत्तिका रोहिणी मृगशीर्षम् पुनर्वसू फल्गुन्यौ हस्तश् चित्रा विशाखे अनूराधाः श्रोणा प्रोष्ठपदाश् चोत्तरेऽग्न्याधेयनक्षत्राणि" इति (३।२), **वाराहमैत्रायणीयश्रौतसूत्रे** च "रोहिण्यनूराधापुनर्वसुस् तेषामेकस्मिन् वर्षासु शरदि वा पर्वण्यादधीत (पुनराधेयं कुर्वाणः)" इति (१।५।१।५), **मानवमैत्रायणीयश्रौतसूत्रे** च "इष्टिभिर् यजेत पौर्णमास्याममावास्यायां वा पूर्वपक्षे वा पुण्ये नक्षत्रेऽन्यत्र नवम्याः" इति (५।१।१।१), **वैखानसश्रौतसूत्रे** च "रोहिणीकृत्तिकामृगशिरःपुनर्वसूत्तरानूराधाश्रवणहस्तविशाखास्वेकस्मिन् नक्षत्रेऽमावास्यायां पौर्णमास्यां वाऽऽदधीत" इति (१।१) "कृत्तिकास्वग्निमादधीतेति ब्राह्मणोक्तानि काम्यानि नक्षत्राणि" इति (१।१), "रोहिणी पुनर्वसू अनूराधाश् च पुनराधाननक्षत्राणि" इति (१।१९) च, **कात्यायनश्रौतसूत्रे** च "अमावास्यायामग्न्याधेयम्, कृत्तिकारोहिणीमृगशिरःफल्गुनीषु, हस्तो लाभकामस्य, चित्रा क्षत्रियस्य" इति (४।७।१-४) दृश्यते। **आश्वलायनगृह्यसूत्रे** च "उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः" इति (१।४।१), "तृतीये गर्भमासे तिष्येणोपोषितायाः सरूपवत्साया गोर् दधनि द्वौद्वौ माषौ यवं च दधिप्रसृतेन प्राशयेत्" इति (१।१३।२), "चतुर्थे गर्भमासे सीमन्तोन्नयनम्, आपूर्यमाणपक्षे यदा पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात्" इति (१।१४।१,२), "क्षेत्रं प्रकर्षयेदुत्तरैः प्रोष्ठपदैः फल्गुनीभी रोहिण्या वा" इति (२।१०।३), "अथातोऽध्यायोपाकरणम्, ओषधीनां प्रादुर्भावे श्रवणेन, श्रावणस्य पञ्चम्यां हस्तेन वा" इति (३।५।१-३), "सञ्चयनमूर्ध्वं दशम्याः कृष्णपक्षस्याऽयुजास्वेकनक्षत्रे" इति (४।५।१) नक्षत्रोल्लेखयुता विधयो दृश्यन्ते। **कौषीतकिगृह्यसूत्रे** च "तृतीये मासि पुंसुवनम्, पुष्येण श्रवणेन वा" इति (१।१२।७,८), "पुंवदुपकरणानि स्युः, नक्षत्रं च" इति (१।१४।४,५), "सप्तमेऽष्टमे वा मासि कर्णवेधनम्, यथाकुलधर्मं वा, तिष्यपुनर्वस्वोः श्रवणधनिष्ठयोर् वा, पूर्वोत्तरेषु वा" इति (१।२०।१-४), "अथ वृषोत्सर्गः कार्तिक्यां पौर्णमास्यां रेवत्यां वाऽऽश्वयुज्यां च गवां मध्ये सुसमिद्धमग्निं कृत्वाऽऽज्याहुतीर् जुहोति" इति (३।६।१, २), "अथात उपाकरणम्, ओषधीनां प्रादुर्भावे श्रावण्यां पौर्णमास्याम्, हस्तेन श्रवणेन वा" इति (३।७।१।४), "रोहिण्यां कृषिकर्माणि कारयेत्" इति (३।१३।१), "श्रावण्यां पौर्णमास्यां हस्तेन श्रवणेन वा अक्षतसक्तूनां स्थालीपाकस्य वा जुहुयात्" इति (४।२।१), "आग्रहायण्यां प्रत्यवरोहेत्, रोहिण्यां प्रोष्ठपदासु

वा" इति (४।४।१,२), "लोकतो नक्षत्राण्यन्वावृतश्च" इति (४।४।२०) च नक्षत्रोल्लेख-युता विधयो दृश्यन्ते। **काठकगृह्यसूत्रे (लौगाक्षिगृह्यसूत्रे)** च "वर्षासु श्रवणेना-ऽध्यायानुपाकरोतिं" इति (९।१), "रोहिणी मृगशिरः श्रविष्ठा उत्तराणीत्युपयमे" इति (१४।१०) च दृश्यते। **भारद्वाजगृह्यसूत्रे** च "विज्ञायते तु खल्वेकेषामिन्वकाभिः प्रसृज्यन्ते ते वरा प्रतिनिन्दिता मघाभिर् गावो गृह्यन्ते फल्गुनीभ्यां व्यूह्यत इति यां कामयेत दुहितरं प्रिया स्यादिति तां निष्ट्यायां दद्यात् प्रियैव भवति, नैव तु पुनरा-गच्छतीति विज्ञायतें" इति (१।१२), "अथास्याः प्रथमगर्भिण्याश् चतुर्थे मासि सीमन्तं कुर्वन्त्यापूर्यमाणपक्षे पुण्ये नक्षत्रे" इति (१।२१), "अथ पुंसवनं तृतीये मासि चतुर्थादौ वा तिष्येण वा हस्तेन वाऽनुराधैर् वोत्तरैर् वा प्रोष्ठपदैर् न्यग्रोधावरोहमाहृत्य" इत्यादि (१।२२) "अथ नक्षत्राणि तिष्य उत्तरे फल्गुनी हस्तश् चित्रा स्वातिर् विशाखे इत्येते-षामेकस्मिन् पुरोदयादादित्यस्य व्रजं प्रपद्यते" इति (२।१८), "स्त्री चैवं भर्तरि प्रमीते पाणिग्रहणादूर्ध्वं पर्वणः पौर्णमास्याममावास्यायां वा रोहिण्यां मृगशिरसि पुनर्वस्वोर् वा मध्यन्दिन आदधीत" इति (३।१) च दृश्यते। **मानवमैत्रायणीयगृह्यसूत्रे** च "वर्षासु श्रवणेन स्वाध्यायानुपाकुरुते" इति (१।४।१), "भार्यां विन्दते, कृत्तिका-स्वाति-पूर्वैरिति वरयेत्, रोहिणी-मृगशिरः-श्रवण-श्रविष्ठोत्तराणीत्युपयमे तथोद्वाहे यद् वा पुण्यो-क्तम्" इति (१।७।३-५) च दृश्यते। **आपस्तम्बगृह्यसूत्रे** च "मघाभिर् गावो गृह्यन्ते, फल्गुनीभ्यां व्यूह्यते, यां कामयेत दुहितरं प्रिया स्यादिति तां निष्ट्यायां दद्यात् प्रियैव भवति नेव तु पुनरागच्छतीति ब्राह्मणावेक्षो विधिः, इन्वकाशब्दो मृगशिरसि, निष्ट्याशब्दः स्वातौ" इति (३।१-५) दृश्यते। सत्याषाढकृते **हिरण्यकेशिगृह्यसूत्रे** च "उदगयन आपूर्यमाणपक्षे रोहिण्यां मृगशिरसि तिष्य उत्तरयोः फल्गुन्योर् हस्ते चित्रायां विशाखयोर् वैतेषु स्नायात्" इति (१९।३।२), "शालां कारयिष्यन्, उदगयन आपूर्यमाणपक्षे रोहिण्यां त्रिषु चोत्तरेष्वग्निमुपसमाधाय व्याहृतिपर्यन्तं कृत्वा जुहोति" इति (१९।८।१-२), "ततः पूर्वेद्युरनूराधयोरपराह्णेऽग्निमुपसमाधाय दक्षिणाग्रागग्रैर् दर्भैः परिस्तीर्य पवित्रान्तर्हितानि कृत्वा चत्वारि व्रीहिशरावाणि निर्वपति" इति (२०।५।३), "तद् या पौर्णमासी श्रवणेन युज्यात्, तस्यामुपरिष्टात् सायमग्निहोत्रस्य दक्षिणाग्नि-मुपसमादधाति औपासनमनाहिताग्नेः" इति (२०।६।२), "श्रवणापक्ष ओषधीषु जातासु हस्तेन पौर्णमास्यां वाऽध्यायोपाकर्म" इति (२०।८।२), "तैषीपक्षस्य रोहिण्यां पौर्णमास्यां वोत्सर्गः" इति (२०।८।५) च दृश्यते। **बौधायनगृह्यसूत्रे** च "रोहिणी मृगशीर्षमुत्तरे फल्गुनी स्वातीति विवाहस्य नक्षत्राणि, पुनर्वसू तिष्यो हस्तश् श्रोणा रेवतीत्यन्येषां भूतिकर्मणाम्, यानि चान्यानि पुण्योक्तानि नक्षत्राणि" इति (१।१।२०-२२), **बौधायन-गृह्यपरिभाषासूत्रे** च "रोहिण्यां स्नायादित्येकम्, तिष्ये स्नायादित्येकम्, उत्तरयोः

फल्गुन्योस् स्नायादित्येकम्, हस्ते स्नायादित्येकम्, चित्रायां स्नायादित्येकम्, विशाखयोस् स्नायादित्येकम्" इति (१।१३।३-८) दृश्यते। **पारस्करगृह्यसूत्रे** च "उदगयन आपूर्यमाणपक्षे पुण्याहे कुर्मायाः पाणिं गृह्णीयात्, त्रिषुत्रिषूत्तरादिषु, स्वातौ मृगशिरसि रोहिण्यां वा" इति (१।४।५-६), "यदहः पुंसा नक्षत्रेण चन्द्रमा युज्येत तदहरुपवास्य" इत्यादि (१।१४।३), "अथातोऽध्यायोपाकर्म, ओषधीनां प्रादुर्भावे श्रवणेन, श्रावण्यां पौर्णमास्याम्, श्राबणस्य पञ्चमीम्, हस्तेन वा" इति (२।१०।१,२), "पौषस्य रोहिण्यां मध्यमायां वाऽष्टकायामध्यायानुत्सृजेरन्" इति (२।१२।२), "पुण्याहे लाङ्गलयोजनम्, ज्येष्ठया वेन्द्रदेवत्यम्" इति (२।१३।१), "अथ वृषोत्सर्गः, गोयज्ञेन व्याख्यातः, कार्त्तिक्यां पौर्णमास्यां रेवत्यां वाऽऽश्वयुजस्य" इति (३।९।१-३) च दृश्यते। **गोभिलगृह्यसूत्रे** च "प्रौष्ठपदीं हस्तेनोपाकरणम्" इति (३।३।१) दृश्यते। **कौशिकसूत्रे** च "पूर्वास्वषाढासु गर्तं खनति, उत्तरासु सञ्चिनोति" इति (४१।१०,११), "अथ विवाहः ऊर्ध्वं कार्त्तिक्या आ वैशाख्याः, यथाकामी वा, चित्रापक्षं तु वर्जयेत्, मघासु हन्यन्ते गावः फल्गुनीषु व्युह्यत इति विज्ञायते" इति (७५।१-५), "अभिजिति शिष्यानुपनीय श्वोभूते सम्भारान् सम्भरति" इति (१३९।१), "दृष्टे चन्द्रमसि फल्गुनीषु द्वयान् रसानुपसादयति" इति (१३९।१४), "प्रोष्ठपदे शुक्लपक्षेऽश्वयुजे वाऽष्टम्यां प्रवेशः, श्रवणेनोत्थापनम्" इति (१४०।२,३) च दृश्यते।

उपर्युल्लिखितानां वेद-वेदाङ्गवाक्यानां दर्शनाद् वैदिकधर्मकर्मार्थं नक्षत्राणां ज्ञानमावश्यकं भवतीति स्पष्टतया ज्ञायते। तस्मादेव कारणाल् लगधमुनिप्रोक्ते वेदाङ्गज्योतिषग्रन्थे नक्षत्राणां विविधरूपेण प्रतिपादनं कृतमस्ति (श्लो.६, ७, १०, १४, १५, १७-२१, २५-२७, २९, ३१, ३२-३६, ३९, ४४)।

(ट) अधिमासः

यद्यपि अधिमासोल्लेखयुता विधयो निषेधाश् च ब्राह्मणग्रन्थेषु श्रौतसूत्रेषु गृह्यसूत्रेषु च बहवस् तु दुर्लभास् तथाऽपि **मैत्रायणीयसंहितायाम्** "संसर्पोऽस्यंहस्पत्याय स्वाहा" इति (३।१२।१३), **तैत्तिरीयसंहितायां** च "संसर्पोस्यंहस्पत्याय त्वा" इति (१।४।१४।१), "उपयामगृहीतोऽसि संसर्पोऽस्यंहस्पत्याय त्वेत्याहाऽस्ति त्रयोदशो मास इत्याहुस् तमेव तत् प्रीणाति" इति (६।५।३।४), **माध्यन्दिनीयवाजसनेयि-शुक्लयजुर्वेदमन्त्रसंहितायां** च "उपयामगृहीतोस्यंहसस्पतये त्वा" इति (७।३०), "अंहसस्पतये स्वाहा" इति (२२।३१) च, **माध्यन्दिनीय-वाजसनेयि-शुक्ल-यजुर्वेद-शतपथ-ब्राह्मणे** च "उपयामगृहीतोऽस्यंहसस्पतये त्वेति त्रयोदशं ग्रहं गृह्णाति यदि त्रयोदशं गृह्णीयाद्" इति (४।३।१।२०), **बौधायनश्रौतसूत्रे** च "उपयामगृहीतोऽसि संसर्पोस्यंह-

स्पत्याय त्वा जुष्टं गृह्णामीति" इति (७।१६), **आपस्तम्बश्रौतसूत्रे** च "संसर्पोऽस्यंह-स्पत्याय त्वेति मासनाम्नैककपालं जुहोति" (८।२०।८) इति, **कात्यायनश्रौतसूत्रे** च "त्रयोदशं च गृह्णीयादिच्छन्नुपयामगृहीतोऽस्यंहसस्पतये त्वेति" इति (९।१३।१८), **बौधायनगृह्यसूत्रे** च "अथाधिमासे संसर्पोऽस्यंहसस्पत्याय त्वेति हुत्वा चैत्रिकै-रलङ्कारैरलङ्कृत्य चैत्रिकान्यन्नानि ब्राह्मणेभ्यो दत्त्वाऽन्नशेषान् सगणः प्राश्नाति" (२।१०।८) इति दर्शनात्, त्रयोदशस्य मासस्य "वेद मासो धृतव्रतो द्वादश प्रजावतः। वेदा य उपजायते" इति **ऋग्वेदे**ऽपि (१।२५।८) उल्लिखितत्वात्, ऋग्वेदिना**मैतरेयि-ब्राह्मणे** च "तं त्रयोदशान् मासादक्रीणणंस् तस्मात् त्रयोदशो मासो नाऽनुविद्यते, न वै सोमविक्रय्यनुविद्यते पापो हि सोमविक्रयी" (३।१[१।१२]) इत्यधिमासस्य पापत्वस्य प्रतिपादितत्वात्, चान्द्र-सौरवर्षयोः समन्वयाय चान्द्राणामृतूनां सौरेभ्य ऋतुभ्यो दूरविप्रकर्षस्य परिहाराय चाऽधिमासव्यवस्थाया आवश्यकत्वाच् च लगधप्रोक्ते वेदाङ्गज्योतिषग्रन्थेऽधिमासस्य प्रतिपादनं कृतमस्ति (श्लो.३७, ४१)।

१३. वेदाङ्गज्योतिषग्रन्थेऽनुल्लिखिता विषयाः

(क) वेदाङ्गज्योतिषग्रन्थे मेष-वृषादिराशीनामुल्लेखस्याऽभावः

हेमाद्रिणा, माधवेन, निर्णयसिन्धुकारेण कमलाकरभट्टेन च बौधायनवचन-त्वेन ऋतुनिरूपणप्रकरणे उल्लिखितं शङ्करबालकृष्णदीक्षितेन च बौधायनवचन-त्वेनोक्तम् **"मीन-मेषयोर् मेष-वृषयोर् वा वसन्तः"** इति वचनमिदानीं बौधायनश्रौत-सूत्र-गृह्यसूत्रादिषु मुद्रितमूलग्रन्थेषु न दृश्यते। हस्तलिखितेषु तेषु ग्रन्थेषु कुत्रचित् केनचित् अर्वाचीनेन जनेन पत्रप्रान्तके लिखितं तद् वचनं हेमाद्रिणाऽन्येन वाऽपि बौधायनवचनत्वेन भ्रमाद् गृहीतं सम्भाव्यते, अन्येषु वेद-वेदाङ्गग्रन्थेषु मेष-वृषादि-राशीनामुल्लेखस्याऽभावात्। तस्मान् मूलेषु वेद-वेदाङ्गग्रन्थेषु राशिविभागमूलका मेष-वृषादिशब्दा नैव सन्तीति वक्तुं सुखेन शक्यते। शङ्करबालकृष्णदीक्षितेन मैत्रेयसूत्रवचनत्वेनोल्लिखितं **"मासद्वये यदाऽप्येकराशिं सङ्क्रमेताऽऽदित्यस् तत्रा-ऽऽद्यो मलिम्लुचः, शुद्धोऽन्यः"** इति वचनमपि मैत्रायणीयसूत्रपरिशिष्टादिषु कुत्रचित् स्थितमर्वाचीनं वचनमवगम्यते वेदाङ्गज्योतिषग्रन्थाऽननुकूलत्वात्। अमुष्मिन् लग्ने अमुकं कर्म कार्यम् अमुकं कर्म न कार्यमिति विधि-निषेधौ च मूलेषु वेद-वेदाङ्ग-ग्रन्थेषु न दृश्येते। महाभारते राशिविभागमूलको व्यवहारः **"पर्वसु द्विगुणं दानमृतौ दशगुणं भवेत्। अयने विषुवे चैव षडशीतिमुखेषु च"** इति पुण्यपत्तनस्थ-चित्र-शाला-मुद्रणालयमुद्रिते नीलकण्ठव्याख्यायुते महाभारतपुस्तके वनपर्वणि (२००।२५) वर्तमानाच् श्लोकात् सिद्ध्यतीति शङ्करबालकृष्णदीक्षितप्रभृतयो मन्यन्ते। किन्तु महाभारतेऽन्यत्र राशिविभागमूलकव्यवहारस्याऽदृश्यमानत्वाद्, वनपर्वस्थे **"यदा**

सूर्यश्च चन्द्रश्च तथा तिष्यबृहस्पती। एकराशौ समेष्यन्ति प्रपत्स्यति तदा कृतम्" (१९०।९०-९१, शोधसंस्करणे १८८।८७) इति श्लोके वर्तमानस्य **एकराशौ** इति शब्दस्य प्राचां गुरूणां वाचमनुसरता भारत-भावदीपकारेण नीलकण्ठेन **"गुरु-सूर्य-चन्द्रा यदा युगपत् पुष्यनक्षत्रमेष्यन्ति"** इति स्फुटीकृतत्वात् तस्य मेषादिराशिपरकताया अनिश्चयात्, वनपर्वणष् षडशीतिमुखोल्लेखयुतस्य द्विशततमस्याऽध्यायस्य तु भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरेण प्रकाशिते महाभारतस्य विवेचनात्मके पाठ-शोधयुते संस्करणेऽभावाच् चोक्ताच् छ्लोकादपि महाभारते राशिविभागमूलक-व्यवहारो न निश्शङ्कतया स्वीकर्तुं शक्योऽवगम्यते। तस्माच् छ्रौत-स्मार्त-धर्मकृत्यार्थं राशीनां लग्नानां वा निरूपणस्याऽनावश्यकत्वाल् लगधमुनिप्रोक्ते वेदाङ्गज्योतिषे राशीनां तदुदयरूपाणां लग्नानां च प्रतिपादनं नैव कृतमित्यवगन्तव्यम्।

यद्यपि याज्ञवल्क्यस्मृतेः श्राद्धकालनिरूपणप्रकरणे **"विषुवत्-सूर्यसङ्क्रमः"** इत्युल्लेखो दृश्यते (१।२१७), तथापि षडशीतिमुखानां तत्रोल्लेखस्याऽभावाद् विषुवत्-सूर्यसङ्क्रमशब्देन सूर्यस्य विषुवत्कालप्राप्तेरेवापि विवक्षितत्वस्य सम्भवात्, मत्स्यपुराणादावपि **"अयने विषुवे चैव सङ्क्रान्तिव्रतमाचरेत्"** (९८।२) इत्यादेः प्रयोगस्य दर्शनाच् च याज्ञवल्क्यस्मृतावपि मेषादीनां राशीनामुल्लेखो निश्शङ्कया स्वीकर्तुं तु न युज्यते, तत्र वाराणामुल्लेखस्याभावाच् चेति विवेक्तव्यम्। यद्यपि विष्णुस्मृतौ (विष्णुधर्मसूत्रे) श्राद्धकालेषु **"आदित्यसङ्क्रमणम्"** इति (७७।१) सूर्यस्य राशिषु सङ्क्रान्तयः श्राद्धकालतयोक्ता अवगम्यन्ते, तथापि तत्र काम्यस्य श्राद्धस्य कालेषु **"सततमादित्येऽह्नि श्राद्धं कुर्वन्नारोग्यमाप्नोति"** (७८।१) इत्यादीना-मादित्यवारादिवारोल्लेखयुतानां वचनानामपि दर्शनात् स तु ग्रन्थोऽर्वाचीन एवेत्यव-गम्यमानो न हि वेदाङ्गज्योतिषग्रन्थे राशीनां प्रतिपादनं प्रयोजयितुं क्षम इत्यव-गन्तव्यम्। एतेन **"अथ ऋतुशान्तिं व्याख्यास्यामः, तिथि-वार-नक्षत्र-योग-करण-लग्न-दोषशान्त्यर्थं चतुर्थे वा पञ्चमेऽह्नि वा शान्तिस्नानं प्रकुर्वीत"** इत्यादिकं बौधायनगृह्यशेषसूत्रादिवचनं (५।३।१) च व्याख्यातम्।

(ख) आदित्यवारादीनां वाराणामुल्लेखस्यापि वेदाङ्गज्योतिषग्रन्थेऽभावः

आदित्यवारादिवाराणामपि मूलेषु वेद-वेदाङ्गग्रन्थेषूल्लेखस्याऽभावाद् वार-प्रयुक्तविधिनिषेधयोश् च तेषु सुतरामभावाल् लगधमुनिप्रोक्ते वेदाङ्गे ज्योतिष-ग्रन्थे वाराणामपि प्रतिपादनं न कृतमिति वेदितव्यम्। वाराणामुल्लेखो महाभारते, मनुस्मृतौ, याज्ञवल्क्यस्मृतौ च नास्तीत्यवगन्तव्यम्। तत्तत्कार्यानुकूलनक्षत्र-तिथि-करण-मुहूर्तोल्लेखयुतेषु हरिवंश-चरक-सुश्रुत-भरतनाट्यशास्त्रादिषु प्राचीनेषु ग्रन्थेषु च वाराणामुल्लेखो न दृश्यते। तस्माद् वारोल्लेखयुता आथर्वणज्योतिषम्, वैखानस-

गृह्यसूत्रम्, आग्निवेश्यगृह्यसूत्रम्, कौथुमगृह्यसूत्रम्, विष्णुधर्मसूत्रम्, आश्वलायन-गृह्यपरिशिष्टम्, बौधायनगृह्यशेषसूत्रम् इत्यादयो ग्रन्था अर्वाचीना एवेत्यवगन्तव्यम्। ज्ञातकालेषु लौकिकग्रन्थेषु कलियुगाब्दानां षट्त्रिंशत्तमे शतके वर्तमानस्याऽऽर्यभटस्य ग्रन्थे आर्यभटीये गुरुदिवसस्योल्लेखः प्राप्यत इति ज्ञेयम्। शिलाभिलेखेषु च प्राचीनतमो वारोल्लेखो बुधगुप्तस्य ५४१तमे वैक्रमेऽब्दे ४८४तमे क्रैस्ताब्दे १६५तमे गुप्तशासनवर्षे स्थापिते एरणस्तम्भाभिलेखे प्राप्यत इत्यवगन्तव्यम्।

(ग) वेदाङ्गज्योतिषग्रन्थे ग्रहणस्याप्युल्लेखस्याऽभावः

यद्यपि **"यत् त्वा सूर्य स्वर्भानुस् तमसा विध्यदासुरः। अक्षेत्रविद् यथा मुग्धो भुवनान्यदीधयुः"** (५।४०।५) इत्यादिषु मन्त्रेषु ऋग्वेदेऽपि ग्रहणस्योल्लेखोऽस्ति। शाङ्खायनीयब्राह्मणेऽपि **"स्वर्भानुर् हाऽसुर आदित्यं तमसाऽविध्यत् तस्याऽत्रयस् तमोऽपजिघांसन्त एतं सप्तदशस्तोमं पुरस्ताद् विषुवत उपायन्"** (२४।३) इत्यादि पठ्यते; माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाशतपथब्राह्मणे च **"स्वर्भानुर् ह वाऽ असुरः सूर्यं तमसा विव्याध, स तमसा विद्धो न व्यरोचत तस्य सोमारुद्रावैतत् तमोऽपाहतां स एषोऽपहतपाप्मा तपति"** इति (५।३।२।२) पठ्यते; काण्व-वाजसनेयि-शुक्लयजुर्वेदशाखाशतपथब्राह्मणेऽपि (७।२।१।१) एतादृशमेव वचनं दृश्यते; ताण्डि-कौथुम-राणायनीयानां पञ्चविंशब्राह्मणेऽपि **"स्वर्भानुर् वा आसुर आदित्यं तमसाऽविध्यत् तं देवाः स्वरैरस्पृण्वन् यत् स्वरसामानो भवन्त्यादित्यस्य स्पृत्यै"** (४।५।२, ४।६।१३, ६।६।८, १४।११।१४, २३।१६।२) इत्यादिकं पठ्यते। जैमिनीयब्राह्मणेऽपि **"स्वर्भानुर् वा असुर आदित्यं तमसाऽविध्यत्। तं देवाश् चर्षयश् चाऽभिषज्यन्"** इत्यादि (२।३८६, २।३९०) पठ्यते। गोपथब्राह्मणेऽपि **"स्वर्भानुर् वा आसुरिः सूर्यं तमसाऽविध्यत्, तदत्रिरपनुनोद, यदात्रेयाय हिरण्यं ददाति तम एव तेनाऽपहते"** इति (२।३।१९) दृश्यते; तथापि मूलेषु वेद-वेदाङ्गग्रन्थेषु ग्रहणे अमुकं कर्म कार्यम् अमुकं कर्म तु न कार्यम् इति मुख्यतयोल्लेख्ययोर् विधिनिषेधयोरभावात् यज्ञकालार्थसिद्धये प्रवृत्ते लगधप्रोक्ते वेदाङ्गे ज्योतिषग्रन्थे सूर्यग्रहणस्य चन्द्रग्रहणस्याऽपि प्रतिपादनं न कृतमिति ज्ञेयम्।

(घ) वेदाङ्गज्योतिषग्रन्थे शुक्र-बृहस्पत्योरुदयास्तमययोश् चोल्लेखस्याऽभावः

बृहस्पतेः शुक्रस्य वोदये सत्येव एतत् कर्म कर्तव्यम्, बृहस्पतेः शुक्रस्य वा अस्तमये एतत् कर्म न कर्तव्यमिति विधि-निषेधयोर् मूलेषु वेद-वेदाङ्गग्रन्थेषु अभावाद् यज्ञकालार्थसिद्धये प्रवृत्ते लगधमुनिप्रोक्ते वेदाङ्गे ज्योतिषग्रन्थे बृहस्पतेः शुक्रस्य वा उदयास्तमययोरपि प्रतिपादनं नैव कृतमिति बोध्यम्।

यद्यपि पुण्याहे शुभकर्माणीति विधिर् गृह्यसूत्रेषु दृश्यते, पुण्याहशब्देन च गुरुशुक्रास्तमयादिरहितं लग्नशुद्ध्यादियुतं दिनं ग्रहीतुमुचितमित्यपि वक्तुं शक्यते, तथाऽपि गृह्यसूत्रेषु पुण्याहशब्देन इष्टनक्षत्रयुक्तं दिनमेव विवक्षितमवगम्यते। एतच्च तत्तत्प्रकरणपर्यालोचनात् स्पष्टतयैव बुध्यते। कौशिकसूत्रस्य **"त्रीणि पर्वाणि कर्मणः, पौर्णमास्यमावास्ये पुण्यं नक्षत्रम्"** इति (९.४।७) वचनमप्यत्राऽनुकूलम्। अत्र **"नक्षत्रमतिपृच्छन्तं बालमर्थोऽतिवर्तते। अर्थो ह्यर्थस्य नक्षत्रं किं करिष्यन्ति तारकाः"** इति कौटलीयार्थशास्त्रवचनं च (९।४) लोकेऽपि पुराकाले कर्मविशेषार्थं नक्षत्रविशेषस्यैवाऽऽवश्यकत्वस्य धारणामवगमयतीति च स्मरणीयम्।

१४. वेदाङ्गज्योतिषग्रन्थोक्तस्य पञ्चसंवत्सरकस्य युगस्य विचारः

यद्यपि पञ्चसंवत्सरकस्य युगस्य स्पष्टतयोल्लेखो वेदेषु न प्राप्यते, तथाऽपि पञ्चवर्षात्मकयुगान्तर्गतानां संवत्सर-परिवत्सरादीनां पञ्चानां संवत्सराणामुल्लेखास् तु वेदेषु वेदाङ्गेषु चोपलभ्यन्त एव। तथाहि—

संवत्सराय परिवत्सरायेदावत्सरायाऽनुवत्सरायोद्वत्सराय कृणुता बृहन् नमः। तेषां वयं सुमतौ यज्ञियानां निवात एषामभये स्याम। इति

—काठक-कृष्णयजुर्वेदसंहितायाम् (१३।१५)।

इयं स्वस्तिस् संवत्सरीया परिवत्सरीयेदावत्सरीयाऽनुवत्सरीयोद्वत्सरीया। सा नः पिपर्त्वहृणीयमानैनाह्वेदमहरशीय स्वाहा॥ इति च

—तत्रैव (१३।१५)।

संवत्सरे सीद परिवत्सरे सीदेदावत्सरे सीदाऽनुवत्सरे सीदोद्वत्सरे सीद। इति च

—तत्रैव (३९।६)।

संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोऽस्यनुवत्सरोऽस्युद्वत्सरोऽसि। इति च

—तत्रैव (४०।६)।

संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोऽस्युद्वत्सरोऽसि वत्सरोऽसि। इति

—मैत्रायणीयकृष्णयजुर्वेदसंहितायाम् (४।९।१८)।

यत् ते रुद्र पुरो धनुस् तद् वातो अनुवातु ते तस्मै ते रुद्र संवत्सरेण नमस्करोमि, यत् ते रुद्र दक्षिणा धनुस् तद् वातो अनु वातु ते तस्मै ते रुद्र परिवत्सरेण नमस्करोमि, यत् ते रुद्र पश्चाद् धनुस् तद् वातो अनु वातु ते तस्मै ते रुद्रेदावत्सरेण नमस्करोमि, यत् ते रुद्रोत्तराद् धनुस् तद् वातो अनुवातु ते तस्मै

ते रुद्रेदुवत्सरेण नमस्करोमि, यत् ते रुद्रोपरि धनुस् तद् वातो अनु वातु ते तस्मै ते रुद्र वत्सरेण नमस्करोमि। इति

–आत्रेय-तैत्तिरीयकृष्णयजुर्वेदसंहितायाम् (५।५।७।२-४)।

संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोऽसीद्वत्सरोऽसि वत्सरोऽसि। इति

–माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रार्षसंहितायाम् (२७।४५), शतपथब्राह्मणे च (८।१।४।८)

संवत्सराय पर्य्यायिणीम् परिवत्सरायाऽविजातामिदावत्सरायाऽतित्त्वरीमिद्-वत्सरायाऽतिष्कद्वरीं वत्सराय विजर्जरां संवत्सराय पलिक्नीम्। इति च

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदमन्त्रार्षसंहितायाम् (३०।१५)।

संवत्सराय पर्यारिणीम् परिवत्सरायाऽविजाताम्, इदावत्सरायाऽपिस्कद्वरीम्, इद्वत्सरायाऽतीत्वरीम्, वत्सराय विजर्जराम्, संवत्सराय पलिक्नीम्। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदब्राह्मणे (३।४।११)।

संवत्सरोऽसि, परिवत्सरोऽसि, इदावत्सरोऽसीदुवत्सरोऽसि, इद्वत्सरोऽसि वत्सरोऽसि। इति च

–तत्रैव (३।१०।४।१), तैत्तिरीयारण्यके च (४।१९।१)।

अग्निर् वाव संवत्सरः, आदित्यः परिवत्सरः, चन्द्रमा इदावत्सरः, वायु-रनुवत्सरः। इति

–आत्रेय-तैत्तिरीयकृष्णयजुर्वेदब्राह्मणे १।४।१०।१।

अग्निः संवत्सरः सूर्यः परिवत्सरश् चन्द्रमा इदावत्सरो वायुरनुवत्सरोऽग्निं संवत्सरं वैश्वदेवेनाप्नोति सूर्यं परिवत्सरं वरुणप्रघासैश् चन्द्रमसमिदावत्सरं साकमेधैर् वायुमनुवत्सरं शुनासीर्येण। इति

–ताण्डि-कौथुम-राणायनीय-सामवेद-पञ्चविंशब्राह्मणे (१७।१३।१७)।

संवत्सरे सीद परिवत्सरे सीदेदावत्सरे सीदेदुवत्सरे सीदोद्वत्सरे सीद वत्सरे सीद। इति

–सत्याषाढकृते हिरण्यकेशिश्रौतसूत्रे (११।८।४), आपस्तम्ब-श्रौतसूत्रे (१६।३१।१), वैखानसश्रौतसूत्रे च (१८।२०)।

तस्माद् वैश्वदेवेन यजमानः संवत्सरीणां स्वस्तिमाशास्त इत्याशासीत, तस्माद् वरुणप्रघासैर् यजमानः परिवत्सरीणां स्वस्तिमाशास्त इत्याशासीत, तस्मात् साकमेधैर् यजमान इदावत्सरीणां स्वस्तिमाशास्त इत्याशासीत, तस्माच् छुना-सीरीयेण यजमानोऽनुवत्सरीणां स्वस्तिमाशास्त इत्याशासीत। इति

–बौधायनश्रौतसूत्रे (१४।३०)।

संवत्सरेभ्यः परिवत्सरेभ्य इदावत्सरेभ्य इदुवत्सरेभ्यो वत्सरेभ्यः ...। इति

–वैखानसगृह्यसूत्रे (२।१२)।

संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय कृणुते बृहन् नमः। तेषां वयं सुमतौ यज्ञियानां ज्योग् जीता अहताः स्याम स्वाहा॥ इति

–पारस्करगृह्यसूत्रे (३।२।२), जैमिनीयगृह्यसूत्रे च (२।३)।

केवलं श्रौतसूत्र-गृह्यसूत्ररूपासु महास्मृतिष्वेव न हि, अनुस्मृतिरूपासु स्मृतिष्वपि कुत्रचित् पञ्चवर्षात्मकयुगान्तर्गतानां वर्षाणामुल्लेखो दृश्यते। तथाहि–

संवत्सरे तिलान् दद्याद् यवाँस् तु परिवत्सरे।
इडापूर्वे च वस्त्राणि धान्यं चाऽप्यनुवत्सरे॥
इद्वत्सरे तु रजतं क्रमाद् देयानि शक्तितः। इति

–मार्कण्डेयस्मृतौ, मनसुखरायमुद्रापिते, स्मृतिसन्दर्भे, षष्ठे भागे (पृ.१३४)।

पञ्चसंवत्सरमयं जगदेतच् चराचरम्।
ते पञ्च वत्सराश् चाऽपि त इमे परिकीर्तिताः॥
भवोऽव्ययो विलम्बी च पश्चात् साधारणः पुनः।
दुन्दुभिश् चेति कथिता मूलभूतास् तु वत्सराः॥ इति

–लौगाक्षिस्मृतौ, मनसुखरायमुद्रापिते स्मृतिसन्दर्भे, षष्ठे भागे (पृ.३७७)।

तथैव पुराणेषु महाभारते अन्येषु च प्राचीनेषु अर्वाचीनेषु च बहुष्वेव ग्रन्थेषु पञ्चवर्षात्मक-वैदिकयुगान्तर्गतानां पञ्चानां वर्षाणां पञ्चवर्षात्मकस्य युगस्य वोल्लेखाः प्राप्यन्ते। तथाहि–

संवत्सरः प्रवत्सर इलावत्सर एव च।
अनुवत्सरो वत्सरोऽयमिति कालविदो विदुः॥ इति

–ब्रह्मवैवर्तपुराणे कृष्णजन्मखण्डे (९६।५७-५८)।

संवत्सरादयः पञ्च चतुर्मानविकल्पिताः।
निश्चयः सर्वकालस्य युगमित्यभिधीयते।
संवत्सरस् तु प्रथमो द्वितीयः परिवत्सरः॥
इडावत्सरस् तृतीयस् तु चतुर्थश् चाऽनुवत्सरः।
पञ्चमो वत्सरस् तेषां कालस् तु युगसंहितः॥ इति

–ब्रह्माण्डपुराणे पूर्वभागे (२१।१३०-१३२)।

संवत्सरस् तु प्रथमो द्वितीयः परिवत्सरः।
इद्वत्सरस् तृतीयस् तु चतुर्थस् त्वनुवत्सरः॥

पञ्चमो वत्सरस् तेषामित्येवं पञ्च ते स्मृताः।
तेषु संवत्सरो ह्यग्निः सूर्यस् तु परिवत्सरः॥
सोम इद्वत्सरस् तेषां वायुश् चैवाऽनुवत्सरः।
रुद्रस् तु वत्सरो ज्ञेयः पञ्चैता युगदेवताः॥ इति

–भविष्यपुराणे ब्राह्मपर्वणि (१२५।३३-३५)।

संवत्सरः परिवत्सर इडावत्सर एव च।
अनुवत्सरो वत्सरश् च विदुरैवं प्रभाष्यते॥
यः सृज्यशक्तिमुरुधोच्छ्वसयन् स्वशक्त्या
पुंसोऽभ्रमाय दिवि धावति भूतभेदः।
कालाख्यया गुणमयं क्रतुभिर् वितन्वँस्
तस्मै बलिं हरत वत्सरपञ्चकाय॥ इति

–भागवते तृतीयस्कन्धे (११।१४,१५)।

अथ च यावन् नभोमण्डलं सह द्यावापृथिव्योर् मण्डलाभ्यां कात्स्न्र्येन स ह भुञ्जीत तं कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति भानोर् मान्द्यशैघ्र्यसमगतिभिः समामनन्ति। इति च

–तत्रैव पञ्चमस्कन्धे (२२।७)।

अथ यावन् नभोमण्डलं स ह प्रतिगच्छति।
कात्स्न्र्येन स ह भुञ्जीत कालं तं वत्सरं विदुः॥
संवत्सरं परिवत्सरमिडावत्सरमेव च।
अनुवत्सरमिद्वत्सरमिति पञ्चकमीरितम्।
भानोर् मान्द्य-शैघ्र्य-सम-गतिभिः कालवित्तमैः॥ इति

–देवीभागवतेऽष्टमस्कन्धे (१६।१४-१६)।

तेषु संवत्सरो ह्यग्निः सूर्यस् तु परिवत्सरः।
सोमस् त्विड्वत्सरश् चैव वायुश् चैवाऽनुवत्सरः॥
रुद्रस् तु वत्सरस् तेषां पञ्चाब्दा ये युगात्मकाः।
कालेनाऽधिष्ठितस् तेषु चन्द्रमाः स्रवते सुधाम्॥ इति

–मत्स्यपुराणे (१४१।१७,१८)।

श्रवणान्तं धनिष्ठादि युगं स्यात् पञ्चवार्षिकम्।
भानोर् गतिविशेषेण चक्रवत् परिवर्तते॥ इति

–लिङ्गपुराणे (१।६१।५५-५६)।

पञ्चानां प्रविभक्तानां कालावस्थां निबोधत।
दिना-ऽर्धमास-मासैस् तु ऋतुभिस् त्वयनैस् तथा॥
संवत्सरस् तु प्रथमो द्वितीयः परिवत्सरः।
इद्वत्सरस् तृतीयस् तु चतुर्थश् चाऽनुवत्सरः॥
वत्सरः पञ्चमस् तेषां कालः स युगसंज्ञितः।
तेषां तु तत्त्वं वक्ष्यामि कीर्त्यमानं निबोधत॥ इति

–वायुपुराणे पूर्वार्धे (३१।२६-२८)।

संवत्सरादयः पञ्च चतुर्मानविकल्पिताः।
निश्चयः सर्वकालस्य युग इत्यभिधीयते॥
संवत्सरस् तु प्रथमो द्वितीयः परिवत्सरः।
इद्वत्सरस् तृतीयस् तु चतुर्थश् चाऽनुवत्सरः।
पञ्चमो वत्सरस् तेषां कालस् तु परिसंज्ञितः॥ इति च

–तत्रैव (५०।१८२-१८३)।

श्रवणान्तं धनिष्ठादि युगं स्यात् पञ्चवार्षिकम्।
भानोर् गतिविशेषेण चक्रवत् परिवर्तते॥ इति च

–तत्रैव (५३।११६)।

संवत्सरादयः पञ्च चतुर्मास(न)विकल्पिताः।
निश्चयः सर्वकालस्य युगमित्यभिधीयते॥
संवत्सरस् तु प्रथमो द्वितीयः परिवत्सरः।
इद्वत्सरस् तृतीयस् तु चतुर्थश् चाऽनुवत्सरः।
वत्सरः पञ्चमश् चाऽत्र कालोऽयं युगसंज्ञितः॥ इति

–विष्णुपुराणे (२।८।७१,७२)।

क्रमेण परिवर्तन्ते पञ्च यादव वत्सराः।
तेषामधिपतीन् वक्ष्ये नामानि च फलानि च॥
पञ्चभक्ते तु यच् छेषं तिष्ठेदब्दगणे गते।
संवत्सराद्यः स ज्ञेयो नित्यं संवत्सरो बुधैः॥
आद्यः संवत्सरो नाम द्वितीयः परिवत्सरः।
इडाख्यश् च तृतीयोऽत्र चतुर्थश् चाऽनुवत्सरः।
इद्वत्सराख्यः कथितस् तथा चैवाऽत्र पञ्चमः॥
संवत्सरोऽग्निः परिवत्सरोऽर्क इडाभिधानो भगवाञ् छशाङ्कः।
ब्रह्मा स्वयम्भूरनुवत्सरोऽपि इद्वत्सरः शैलसुतापतिश् च॥ इति

–विष्णुधर्मोत्तरपुराणे (१।८२।५२-५५)।

आर्यावर्त पुस्तकालय

वाय्वग्निदिक्समुद्भूतं परिधिं तु न लङ्घयेत्।
राम संवत्सराद्येषु सर्वेष्वेव महीपतिः॥
संवत्सरमदिक् प्राची परिपूर्वस्य दक्षिणा।
तत्पूर्वस्याऽपरा ज्ञेया चाऽनुपूर्वस्य दक्षिणा।
अद्वारस् तु विनिर्दिष्टस् तथा वत्सरसंज्ञितः॥ इति च

–तत्रैव (२।१७५।१०-१२)।

संवत्सराख्ये कर्तव्या नित्यमाज्ञायुता भवेत्।
परिपूर्वे तु भूतघ्नी लोकख्याता तथैव च॥
इडापूर्वे तथा सौम्या वरदा लोकसुन्दरी।
अनुपूर्वे तु वरदा धनधान्यवती भवेत्॥
तत्पूर्वे नाशमाप्नोति कर्तुर् नाशावहा भवेत्।
तत्राऽपि शम्भोर् मृत्योश् च यमस्य च हिता भवेत्॥ इति च

–तत्रैव (३।९६।११-१३)।

नृहयं नृवराहं च नरसिंहं च वामनम्।
त्रिविक्रमं तु धर्मज्ञ पञ्चस्वब्देषु पूजयेत्॥ इति च

–तत्रैव (३।१२०।२)।

इदमन्यत् प्रवक्ष्यामि पञ्चमूर्तिव्रतं तव।
संवत्सरः स्मृतो वह्निस् तथाऽर्कः परिवत्सरः॥
इडापूर्वस् तथा सोमः अनुपूर्वः प्रजापतिः।
तत्पूर्वश् च तथा प्रोक्तो देवदेवो महेश्वरः॥
तेषां मण्डलविन्यासैः प्राग्वदेव विधीयते।
प्राग्वच् च पूजनं कार्यं होमः कार्यस् तथाविधः॥
तिल-व्रीहि-यवैश् चैव घृतेन सितसर्षपैः।
तल्लिङ्गैरथवा मन्त्रैर् नामभिः प्रत्यहं क्रमात्॥
नक्ताशनस् तथा तिष्ठेत् प्राग्वद् दिवसपञ्चकम्।
संवत्सराख्ये वर्षे तु व्रतमेतत् समारभेत्॥
व्रतावसाने दातव्यं सुवर्णं पञ्च यादव।
चतुर्वेदविदां देयं शाखाभेदेन यादव॥
एकैकं पञ्चमं देयं तथा कालविदे भवेत्।
अश्वमेधफलं ह्येतद् व्रतं तव मयेरितम्॥
यथेष्टं लोकमाप्नोति कामचारी विहङ्गमः।
कृतेनाऽनेन धर्मज्ञ पूज्यमानः सुरासुरैः॥

मानुष्यमासाद्य भवत्यरोगो वर्णेन रूपेण बलेन युक्तः।
नृपः प्रतापानतशत्रुसङ्घो देवोत्तमो वा बहुयज्ञयाजी॥ इति च

–तत्रैव (३।१५३।२-९)।

संवत्सरे तथा दानं तिलस्य च महाफलम्।
परिपूर्वे तथा दानं यवानां द्विजसत्तमाः॥
इडापूर्वेऽन्नवस्त्राणां धान्यानां चाऽनुपूर्वके।
उदासंवत्सरे दानं रजतस्य महाफलम्॥ इति च

–तत्रैव (३।३१७।२,३)।

चतुर्भेदं मासमाहुः पञ्चभेदं च वत्सरम्।
संवत्सरस् तु प्रथमो द्वितीयः परिवत्सरः॥
इद्वत्सरस् तृतीयोऽसौ चतुर्थश् चाऽनुवत्सरः।
पञ्चमश् च युगो नाम गणनानिश्चयो हि सः॥ इति

–स्कन्दपुराणे माहेश्वरखण्डे (२।३९।५१,५२)।

संवत्सरोऽयं परिवत्सरश् च उद्वत्सरो वत्सर एष देवः।
दृष्टोऽप्यदृष्टः प्रहुतः प्रकाशी स्थूलश् च सूक्ष्मः परमाणुरेषः॥ इति

–तत्रैव, आवन्त्यखण्डे (३।१६।१३)।

अनुसंवत्सरं जाता अपि ते कुरुसत्तमाः।
पाण्डुपुत्रा व्यराजन्त पञ्चसंवत्सरा इव॥ इति

–महाभारते आदिपर्वणि (१२४।२२)।

संवत्सराः पञ्च युगमहोरात्रश् चतुर्विधः।
कालचक्रं च तद् दिव्यं नित्यमक्षयमव्ययम्॥ इति च

–तत्रैव, सभापर्वणि (११।३८)।

द्वौ मासावृतुः। श्रावणः प्रोष्ठपदश् च वर्षाः। आश्वयुजः कार्त्तिकश् च शरत्। मार्गशीर्षः पौषश् च हेमन्तः। माघः फाल्गुनश् च शिशिरः। चैत्रो वैशाखश् च वसन्तः। ज्येष्ठामूलीय आषाढश् च ग्रीष्मः। शिशिरादि उत्तरायणम्। वर्षादि दक्षिणायनम्। द्व्ययनः संवत्सरः। पञ्चसंवत्सरो युगमिति। इति

–कौटलीये अर्थशास्त्रे (२।२०)।

अथ खल्वयने द्वे युगपत् संवत्सरो भवति। ते तु पञ्च युगमिति संज्ञां लभन्ते। स एष निमेषादियुगपर्यन्तः कालश् चक्रवत् परिवर्तमानः कालचक्रमुच्यत इत्येके। इति

–सुश्रुतसंहितायाम्, सूत्रस्थाने (६।७)।

अथ संवत्सरदानानि विष्णुधर्मोत्तरे। संवत्सरे तु दातृणां तिलदानं महाफलम्। परिपूर्वे तथा दानं यवानां द्विजसत्तमाः। परिपूर्व इति परिवत्सर इत्यर्थः। इदापूर्वे च वस्त्राणां धान्यानां चाऽनुपूर्वके। इत्पूर्वे रजतस्याऽपि दानं प्रोक्तं महाफलम्। इदापूर्व इत्यादि इदावत्सरः अनुवत्सरः इद्वत्सर इति। संवत्सरादयश् च ज्योतिःशास्त्रे प्रसिद्धाः। इति

–हेमाद्रिकृते चतुर्वर्गचिन्तामणौ, दानखण्डे (पृ.८९०)।

ततः श्वः संवत्सरपरिवत्सरेदावत्सरानुवत्सरोदावत्सरेषु वर्तमानं युगमनुकीर्त्य वर्तमान-संवत्सरायनर्तुमासपक्षतिथिवारनक्षत्रयोगकरण-कुतपादि-कालनामानि सप्तम्यन्तानि संकीर्त्य अत्र पार्वणश्राद्धनामधेयकर्मणि .... इत्येताः प्रधानदेवताः .... अङ्गदेवता यथोक्तलक्षणमन्नं हविः ब्राह्मणा आहवनीयार्थे ..... अमुक-गोत्राणां ..... पृथग्वैश्वदेविकसहितं सपिण्डनिर्वापं पार्वणश्राद्धद्वयं पितृतृप्ति-कामोऽहं करिष्य इति सङ्कीर्तयेत्। इति

–हेमाद्रिकृते चतुर्वर्गचिन्तामणौ परिशेषखण्डे श्राद्धकल्पे (पृ.११५३)।

अथ चान्द्रस्याऽवान्तरभेदा उच्यन्ते। संवत्सरः परिवत्सरः इडावत्सरोऽनुवत्सरः इद्वत्सरश् चेत्येते पञ्च भेदाः। तदेतत् सामान्याकारेण संवत्सरादिपञ्चविधत्वं सावित्रचयनगताऽग्निप्रशंसकमन्त्रे पठ्यते– संवत्सरोऽसि, परिवत्सरोऽसि, इदावत्सरोऽसि, इद्वत्सरोऽसि, इदुवत्सरोऽसि इति। इदुवत्सरोऽनुवत्सर इत्यर्थः। अत एव चातुर्मास्यब्राह्मणे (तै.ब्रा.१।४।१०।१-१०) तदधिष्ठातृदेवतारूपत्वेनैवं श्रूयते– अग्निर् वाव संवत्सरः आदित्यः परिवत्सरः चन्द्रमा इदावत्सरः वायु-रनुवत्सरः महेश्वर इद्वत्सर इति। ब्रह्मवैवर्तेऽपि–

संवत्सरस् तु प्रथमो द्वितीयः परिवत्सरः।
इदावत्सरस् तृतीयश् चतुर्थश् चाऽनुवत्सरः।
इद्वत्सरः पञ्चमस् तु तत्सङ्घो युगसंज्ञकः॥ इति।

तेषां पञ्चानां विनियोगो विष्णुधर्मोत्तरे पठ्यते–

संवत्सरे तु दातृणां तिलदानं महाफलम्।
परिपूर्वे तथा दानं यवानां द्विजसत्तम॥
इदापूर्वे च वस्त्राणां धान्यानां चाऽनुपूर्वके।
इत्पूर्वे रजतस्याऽपि दानं चोक्तं महाफलम्॥इति।

तथा तदधिष्ठातृदेवतापूजारूपो व्रतविशेषः पठ्यते–

संवत्सरः स्मृतो वह्निस् तथाऽर्कः परिवत्सरः।
इदापूर्वस् तथा सोमो ह्यनुपूर्वः प्रजापतिः॥

इत्पूर्वश् च तथा प्रोक्तो देवदेवो महेश्वरः।
तेषां मण्डलविन्यासं प्राग्वदेव विधीयते॥
प्राग्वत् स्यात् पूजनं कार्यं होमः कार्यो यथाविधि। इति।
प्रभवमारम्य क्षयान्तेषु षष्टिवर्षेषु द्वादश पञ्चकानि। तत्रैकस्मिन् वर्षपञ्चके एकैकक्रमेण संवत्सरादयो भवन्ति। तदेतत् सर्वं ज्योतिःशास्त्रादवगन्तव्यम्। इति
–कालमाधवे संवत्सरनिर्णयप्रकरणे (पृ.३५-३६)।

ऋग्वेदेऽपि **"ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम्"** इत्यत्र (७।१०३।८) 'परिवत्सरीणम्' इति पदं दृश्यते। एतादृशानां प्रयोगाणामन्वाख्यानाय पाणिनिना स्वकीयव्याकरणाष्टाध्याय्यां **"वत्सरान्ताच् छश् छन्दसि"** इति (५।१।९१), **"सम्परिपूर्वात् ख च"** इति (५।१।९२) च सूत्रे कृते स्तः। एवं च ऋग्वेदस्थमुक्तं पदं संवत्सरपञ्चकान्तर्गत-परिवत्सरप्रकृतिकं स्यादिति आपाततः प्रतीयते। ऋगर्थविचारणे तु पाणिन्यन्वाख्यातोऽर्थः सुसङ्गतो नाऽवगम्यते। तैत्तिरीयब्राह्मणेऽपि **"संवत्सरीणाम्"** (१।४।१०।१-) इत्यादीनि पदानि प्रयुक्तानि दृश्यन्ते। बौधायनश्रौतसूत्रे च (१४।३०) **"इदावत्सरीणाम्"** इति **"अनुवत्सरीणाम्"** इति च पदे प्रयुक्ते दृश्येते। एतादृशे पदे आपस्तम्बश्रौतसूत्रे हिरण्यकेशिश्रौतसूत्रे च दृश्येते। एते पदे ब्राह्मणग्रन्थप्रयोगमूले एवाऽवगम्येते। एतस्मिन् विषये पाणिनीयव्याकरणे वार्त्तिककारेण भाष्यकारेण च किमपि स्पष्टीकरणं कृतं न दृश्यते। प्रासङ्गिकमिदमुक्तम्। अथ प्रकृतमनुसरामः।

१५. पञ्चसंवत्सरमयस्य युगस्य षष्टिसंवत्सरात्मकयुगादिभिः सह सम्बन्धः

पञ्चवर्षात्मकस्य युगस्य अग्निधिष्ण्यचयनवता सोमयागेन सह सम्बन्धः **"संवत्सरोऽसि परिवत्सरोऽसि"** इत्यादिकस्य मन्त्रस्य तत्प्रयोगप्रतिपादकस्य ब्राह्मणस्य कल्पसूत्रस्य च दर्शनादवगम्यते। ते च मन्त्रादयः प्रागेव प्रदर्शिता एव। एवं च पञ्चवर्षात्मकयुगरूपा कालगणना श्रौतीति श्रुतिश् च धर्मे परमं प्रमाणमिति एतस्याः कालगणनापद्धतेः खण्डनमास्तिकेन जनेन कर्तुं न युज्यते। अत एवाऽस्माभिर् वैदिक-मन्त्र-सङ्ग्रह-परिशिष्टेऽमुर्ह्येव **"युगमार्षं हि पञ्चाब्दं ब्रह्मगुप्तादिजल्पितैः। नाऽनार्षैर् बाध्यते धर्मे परं मानमृषिर् यतः"** इत्युक्तम्। एतस्यैव पञ्चवर्षात्मकयुगस्य द्वादशभिः परिवर्तैः षष्टिवत्सरात्मकं युगं भवति। षष्टिवत्सरात्मकयुगानां हि परिवर्तैः सत्ययुगादीनि युगानि, चतुर्युगात्मकानि महायुगानि च जायन्ते। तेषां महायुगानां परिवर्तैर् मन्वन्तराणि, मन्वन्तराणां परिवर्तैः कल्पाः, कल्पानां परिवर्तैर्

महाकल्पाश् च भवन्ति। एवञ्च वैदिकानां कालगणनानां मूलं श्रौतयज्ञसम्बद्धं पञ्चवर्षात्मकं युगमेवाऽस्ति।

षष्टेः संवत्सराणां गणना च द्विविधाऽस्ति। तत्र प्रथमा चान्द्रसंवत्सरमूला द्वितीया च बार्हस्पत्यसंवत्सरमूला। अद्यत्वे तिथिपञ्जीकाराः (संवत्सरपञ्जीकाराः, पञ्चाङ्गकाराः) औत्तराहा ज्यौतिषिकास् तेषां पञ्चाङ्गपत्रकेषु बार्हस्पत्यसंवत्सरानेव लिखन्तीति, वराहमिहिरेण बृहत्संहितायां बार्हस्पत्येष्वेव वत्सरेषु संवत्सरपरिवत्सरादीन् वैदिकान् वत्सरान् योजयित्वा भ्रान्तिपूर्णा पद्धतिर् ज्यौतिषिकेषु प्रचारितेति च आधुनिका धर्मशास्त्रिणो गुरुपुरोहितादयश् च प्रायेण भ्रान्तौ पतिता दृश्यन्ते। यद्यपि इदानीं लोके प्रचलिते धर्मशास्त्रनिबन्धे निर्णयसिन्धौ ग्रन्थादावेव संवत्सरनिर्णयप्रकरणे **"स्मरेत् सर्वत्र कर्मादौ चान्द्रं संवत्सरं सदा। नाऽन्यं यस्माद् वत्सरादौ प्रवृत्तिस् तस्य कीर्तिता"** इति आर्ष्टिषेणवचनमस्ति, **"व्यावहारिकसंज्ञोऽयं कालः स्मृत्यादिकर्मसु। योज्यः सर्वत्र तत्राऽपि जैवो वा नर्मदोत्तरे"** इति ज्योतिर्निबन्धाख्य-ग्रन्थधृत-ब्रह्मसिद्धान्ताख्यग्रन्थवचनत्वेन धृतं वचनं चास्ति, धर्मसिन्धौ च **"कर्मादौ सङ्कल्पे चान्द्रसंवत्सर एव स्मर्तव्यो नाऽन्यः"** इति ग्रन्थारम्भे एव स्पष्टतयोक्तमस्ति, तथापि प्रचलितपञ्चाङ्गपत्रकप्रतारिता धर्मशास्त्रिणः कर्मकाण्डिनश् च कर्मादौ प्रायेण बार्हस्पत्यं संवत्सरविशेषमेव सङ्कल्पवाक्ये निवेशयन्ति। एतादृशं प्रतारणं पञ्चाङ्गपत्रककारैर् नैव कार्यम्। धर्मशास्त्र्यादिभिश् च भ्रमे नैव पतितव्यम्। अत्र भ्रमनिवारणाय चान्द्रसंवत्सर-बार्हस्पत्यसंवत्सरयोर् भेदः स्फुटीक्रियते।

चान्द्राणां षष्टेः संवत्सराणां नामानि बार्हस्पत्यानां षष्टेः संवत्सराणां नामानि च प्रभव-विभावादीनि प्रायेण समानानीति तेषामापाततोऽभेदः प्रतीयते, किन्तु चान्द्राः प्रभवादयः षष्टिः संवत्सराः श्रौतचान्द्र-संवत्सर-परिवत्सरादिपञ्चसंवत्सरात्मकयुगमूलाः, प्रभवादयः पञ्चकाः संवत्सर-परिवत्सरादिपञ्चकाभिन्ना इति यस्मिन् क्षणे चान्द्राः संवत्सरपरिवत्सरादयः प्रवर्तन्ते तस्मिन्नेव क्षणे प्रवर्तन्ते। **"यस्माद् वत्सरादौ प्रवृत्तिस् तस्य कीर्तिता"** इति आर्ष्टिषेणवाक्यांशेनैतत् स्पष्टीकृतमस्ति। बार्हस्पत्याः प्रभवादयः संवत्सरास् तु बृहस्पतिचारवशात् प्रवर्तमानाः स्वतन्त्रतया प्रवर्तन्ते न तु चान्द्रसंवत्सर-परिवत्सराद्यभिन्नतया। बृहस्पतेर् मध्यममानगत्या एकस्य भगणस्य भोगे प्रायः ३६१ सावनदिनानि लगन्तीति बार्हस्पत्ये संवत्सरे प्रायेण ३६१ दिनानि भवन्ति, किन्तु चान्द्रे संवत्सरे प्रायेण ३५४ दिनान्येव भवन्तीति तयोः प्रारम्भस्य दिनानि प्रतिसंवत्सरं विभिन्नान्येव भवन्ति। यद्यपि एकस्मिन् सौरे वर्षे प्रायेण ३६५ सावनदिनानि भवन्ति, एकस्मिन् चान्द्रे संवत्सरे तु प्रायेण ३५४ दिनान्येव भवन्तीति तयोः प्रारम्भोऽपि प्रतिवर्षं प्रायेण भिन्नेभिन्ने दिने एव भवति, तथाऽपि चान्द्रे संवत्सरे प्रतितृतीयवर्षम् अधिकचान्द्रमासस्य योजनेन चान्द्रवर्ष-

सौरवर्षयोः समन्वयः पुनःपुनः स्थाप्यते इति चान्द्रवर्षलोपः कदापि न स्वीक्रियते। किन्तु बार्हस्पत्यवर्ष-सौरवर्षयोः समन्वयाय कस्या अपि उचिताया व्यवस्थाया अकृतत्वात् पञ्चाशीतौ सौरवर्षेषु एकं बार्हस्पत्यवर्षं लुप्यते इति स्वीक्रियते। एवं च बार्हस्पत्येषु प्रभवादिषु षष्टौ संवत्सरेषु कोऽप्येकः संवत्सरः पञ्चाशीतौ सौरवर्षेषु एकवारं लुप्यते इति स्वीक्रियते। चान्द्रेषु प्रभावादिषु षष्टौ संवत्सरेषु तु कोऽपि संवत्सरः कदाऽपि न लुप्यते इति स्वीक्रियते। एवं च चान्द्रसंवत्सराणां प्रभवादीनां बार्हस्पत्यसंवत्सराणां प्रभवादीनां च परस्परं भेदः सम्यगवगन्तव्यः। चान्द्राणां प्रभवादीनां पञ्चकेपञ्चके समूहीकरणं वैदिकपञ्चसंवत्सरात्मकयुगव्यवस्थामूलमस्ति। तेषां विंशतेर्विंशतेस् त्रिषु समूहेषु समूहीकरणमपि तन्मूलकमेव। बार्हस्पत्यानां प्रभवादीनां षष्टेः संवत्सराणां तु पञ्चकेपञ्चके समूहीकरणं किम्मूलकमिति न ज्ञायते। तेषां पञ्चकेपञ्चके समूहीकरणस्याऽनुपपन्नत्वे विंशतेर्विंशतेः समूहेषु समूहीकरणमपि अनुपपन्नमेवेत्यवगम्यते। तस्मादवैदिकमगब्राह्मणत्वेन सम्भावितेन वराहमिहिरेण बृहत्संहितायां प्रतिपादितो बार्हस्पत्यानां प्रभवादीनां वैदिकैश् चान्द्रैः संवत्सर-परिवत्सरादिभिः सहाऽभेदसम्बन्धो निर्मूलोऽनुपपन्नश् चाऽवगम्यते। तस्मादेव भट्टोत्पलेनाऽपि तत्समर्थनाय किमपि मुनिवचनं न प्रदर्शितमित्यपि बोद्धव्यम्। अत एव एष विषयो विवेचकैः सम्यग् विवेचनीयः। यथा वा तथा वा भवतु बार्हस्पत्याः संवत्सराः ज्यौतिषिकैः संवत्सरफलप्रतिपादने एव प्रयोक्तव्याः। आस्तिकैर् वैदिकैर् जनैः श्रौत-स्मार्त-पौराण-धर्मकृत्येषु सङ्कल्पे तु मूल-वैदिक-परम्परानुकूलास् सर्वत्र प्रयोज्याश् चान्द्रा एव प्रभवादयः स्मरणीयाः, न तु "जैवो वा नर्मदोत्तरे" इति प्रतिपादिताः देशविशेष एव वैकल्पिकत्वेन प्रयोज्यत्वेनोक्ता बार्हस्पत्याः प्रभवादयः, **'प्रथमत्यागे मानाभावात्'** इति न्यायात्। एवं च चान्द्राणां प्रभवादीनां बार्हस्पत्यानां प्रभवादीनां च परस्परं भेदः सम्यगाकलनीयः। चान्द्राः प्रभवादयो निर्णयसिन्धौ अब्दनिर्णयप्रकरणे गार्ग्यवचनेन प्रतिपादिता एव सन्ति। धर्मसिन्धावपि ते द्वितीयपरिच्छेदान्ते परिच्छेदद्वयशेषाख्यप्रकीर्णप्रकरणे प्रतिपादिता एव। हेमाद्रिणाऽपि चतुर्वर्गचिन्तामणेः परिशेषखण्डे श्राद्धकल्पे (पृ.११५२-११५३) **"प्रभवादिसंवत्सरपञ्चकात्मकमवान्तरयुगमनुकीर्तयेत्। तानि च युगानि द्वादशैवाऽऽहुः—"वैष्णवं प्रथमं तत्र बार्हस्पत्यं ततः परम्। ऐन्द्रमाग्नेयमेतस्मादाहिर्बुध्नं च पैतृकम्। वैश्वदेवं च सौम्यं च प्राजापत्यं च मारुतम्। आश्विनं भाग्यमित्येवं युगानि द्वादशैव हि। इति। ततः श्वः संवत्सर-परिवत्सरेदावत्सराऽनुवत्सरोदावत्सरेषु वर्तमानं युगमनुकीर्त्य वर्तमानसंवत्सरायनर्तुमासपक्षतिथिवारनक्षत्रयोगकरण-कुतपादिकालनामानि सप्तम्यन्तानि सङ्कीर्त्य"** इति वदता प्रभवादि-संवत्सर-पञ्च-कात्मकस्य युगस्य संवत्सर-परिवत्सरादिवर्षपञ्चकात्मकस्य युगस्य चाऽभिन्नत्वं

प्रतिपादितं द्वादशभिः पञ्चवर्षात्मकैर् वैदिकैर् युगैरेव षष्टिसंवत्सरात्मकस्य चान्द्रस्य युगस्य निष्पन्नत्वं च स्वीकृतं प्रतीयते। एतेन हेमाद्रिणाऽपि सङ्कल्पे चान्द्राणामेव प्रभवादीनां कीर्तनीयत्वं च प्रतिपादितमवगम्यते, संवत्सर-परिवत्सरादीनां वर्षाणां चान्द्रत्वात्। माधवेन तु कालमाधवग्रन्थस्योपोद्घातप्रकरणे स्थितासु कारिकासु **"चान्द्राणां प्रभवादीनां पञ्चकेपञ्चके युगे। सम्परीदान्विदित्येतच्छब्दपूर्वास् तु वत्सराः"** इति (श्लो.१३) वदता प्रभवादीनां संवत्सराणां चान्द्रत्वं संवत्सर-परिवत्सरादि-श्रौतपञ्चवर्षात्मकयुगमूलकत्वं चाऽतिस्पष्टतया प्रतिपादितमस्त्येव। सायणेनाऽपि मन्त्रब्राह्मणापरनामकस्य छान्दोग्यब्राह्मणस्य व्याख्यायां **"चान्द्राः प्रभवादिवत्सराः क्रमेण संवत्सरपरिवत्सरेदावत्सरानुवत्सरेद्वत्सरनाम्ना पुनःपुनरावर्तन्ते। तथा च पूर्वेषां वचनम्— चान्द्राणां प्रभवादीनां पञ्चकेपञ्चके युगे। सम्परीदान्विदित्येतच्छब्दपूर्वास् तु वत्सराः इति"** (२।१।१२) इत्युक्तं दृश्यते। तैत्तिरीयब्राह्मणव्याख्यायामप्येतादृशं कथनमस्ति (१।४।१०।१) चान्द्राणां प्रभवादीनामित्यादिकः श्लोकः कोषकल्पतरुकारेण विश्वनाथेनाऽपि कोषकल्पतरौ कालवर्गे समावेशितोऽस्ति (श्लो.१०१)। यद्यपि नानामतकालगणनाप्रकारसङ्कलनैर् युक्ते विष्णुधर्मोत्तरपुराणे (१।६०।२५, १।७२।१-१।७३।१९, १।८२।१-५६, १।८४।१-१४, १।१३७।३८,३९; २।१६७ अ., २।१६८ अ., ३।९६।१...) काऽप्यस्पष्टता प्रतीयते, तथापि तत्रापि (१।८२।२-२१) चान्द्रप्रभवादिविवेकः कृत इवैव लक्ष्यते। रघुनन्दनेनाऽपि स्मृतितत्त्वग्रन्थस्य मलमासतत्त्वप्रकरणे (पृ.७६४) **"शकाब्दात् पञ्चभिः शेषात् समाद्यादिषु वत्सराः। सम्परीदानुपूर्वाश्च तथोदापूर्वका मताः। संवत्सरफलमुक्तं विष्णुधर्मोत्तरे। संवत्सरे तथा दानं तिलस्य तु महाफलम्। परिपूर्वे तथा दानं यवानां च द्विजोत्तम। इदापूर्वेऽन्नवस्त्राणां धान्यानां चाऽनुपूर्वके। उदासंवत्सरे दानं रजतस्य महाफलम्। ज्योतिर्विदस् त्विज्यमध्यात् प्रभवादेश् च सम्भवम्। ऊचुस् तद्वत् समाद्यादिवर्षाणामपि सम्भवम्"** इत्युल्लिखता चान्द्राणां प्रभवादीनां बार्हस्पत्यानां प्रभवादीनां च भेदः स्वीकृत एवाऽवगम्यते। आर्यभटेनाऽऽर्यभटीये **"षष्ट्यब्दानां षष्टिर् यदा व्यतीतास् त्रयश् च युगपादाः। त्र्यधिका विंशतिरब्दास् तदेह मम जन्मनोऽतीताः"** इति (कालक्रियापादे श्लो.१०) वदता युगाब्दानां षष्टिवर्षात्मकलघुयुगचक्रेण गणनायाः परम्परा सूचिताऽवगम्यते। अत्र युग-महायुग-मन्वन्तर-कल्प-महाकल्पानां वर्षसङ्ख्याः सर्वा अपि षष्ट्या निश्शेषतया विभक्तुं शक्यन्त इत्यपि स्मर्तव्यम्। वैष्णवमतप्रभाविते बृहत्पराशरस्मृतिनामके ग्रन्थे (१२।३६०-३६८) दृश्यमानं **"पञ्चभिस् तैर् युगं प्रोक्तं तद्द्वादशकषष्टिकम्। षष्टिकः षष्टिगुणितो वाक्पतेर् युगमुच्यते। तद्द्वयं तु कलिः प्रोक्तस् तद्द्वयं द्वापरो भवेत्। कलित्रयेण त्रेता स्यात् कृतः कलिचतुष्टयम्"** इत्यादिकं विलक्षणं युगवर्षाणां परिमाणस्य प्रतिपादनमपि पञ्चवर्षात्मकानां युगानां द्वादशकेन

निष्पन्नस्य षष्टिवर्षात्मकस्य लघुयुगस्याधारे एव युग-महायुगादीनां वर्षसङ्ख्याया गणितत्वं गण्यमानत्वं च सूचयत् प्रतीयते। एवं च श्रौतयज्ञसम्बद्धस्य पञ्चवर्षात्मकस्य युगस्य वैदिकपरम्परायाः सर्वासु कालगणनासु अनुस्यूतत्वमवगन्तव्यम्।

१६. वेदाङ्गज्योतिषग्रन्थोक्तो नववर्षारम्भः

वेदाङ्ग-ज्योतिष-ग्रन्थानुसारं शङ्कुच्छायादिवेद्यात् सूर्यस्योदगयनारम्भस्य दिनात् प्रायेण पूर्वस्याम्, अधिमासयुते वर्षे तु कदाचित् परस्यामपि आसन्नायां शुक्लपक्षस्य प्रतिपदायां तिथौ वैदिकानां सौरचान्द्रस्य नववर्षस्य आरम्भो भवति। एतच्च लगधमुनेर् ज्योतिषग्रन्थस्य **"माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः। युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते॥ स्वराक्रमेते सोमर्कौ यदा साकं सवासवौ। स्यात् तदादियुगं माघस् तपःशुक्लोऽयनं ह्युदक्॥ प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक्। सार्पार्धे दक्षिणार्कस् तु माघश्रावणयोस् सदा"** (श्लो.५-७) **"उपजायेते मध्येऽन्ते चाऽधिमासकौ"** (श्लो.३७) इत्यादिभ्यो वचनेभ्य एवाऽर्थतः सिद्धतया ज्ञातं भवति।

१७. दिव्यकालमानेन सह सामञ्जस्याय उदगयनारम्भे वर्षारम्भः स्वीकरणीयः

शुद्धस्य सौरवर्षस्याऽऽरम्भस् तु शङ्कुच्छायावेद्ये सूर्यस्योदगयनस्याऽऽरम्भस्य दिने भवति। यद्यपि सौरस्य वर्षस्य आरम्भः सूर्यस्योदगयनारम्भस्य दिने वा वासन्तविषुवदिने वा दक्षिणायनारम्भदिने वा शारदविषुवदिने वाऽपि भवितुमर्हतीति आपाततः प्रतीयते, तथैव लोकेऽपि माघादिकं चैत्रादिकं श्रावणादिकं कार्त्तिकादिकं वाऽपि वर्षं क्वचित् स्वीकृतं स्वीक्रियमाणं चाऽपि अवगम्यते, तथाऽपि दिव्यदिनवर्षादिगणनानुकूलतया मानुषदिनवर्षादिगणना कार्येति वदतां वैदिकानां कालगणनापद्धत्यनुसारं तु सूर्यस्योदगयनस्य आरम्भेण सहैव सौरवर्षस्याऽप्यारम्भः स्वीकर्तव्यो भवति। एतच् चाऽनुपदमेव स्पष्टतरं करिष्यते। एतादृशस्य सौरवर्षस्य च वैदिकपरम्परायां मुख्यतया चान्द्रवर्षगणनाव्यवस्थापन एवोपयोगो भवति न तु श्रौतयज्ञस्मार्तविवाहादिधर्मकर्मसु इत्यवगन्तव्यम्।

शुद्धस्य चान्द्रवर्षस्य तु तिथि-पक्ष-मासबद्धस्य यस्यकस्याऽपि मासस्य यस्मिन्कस्मिन्नपि पक्षे यस्यांकस्यां चिदपि तिथौ प्रारम्भः स्वीकर्तुं शक्यते। अत एव कालमाधवे **"एवं सति वर्तमानभाद्रशुक्लचतुर्दशीमारभ्य आगामिभाद्रशुक्लचतुर्दश्याः प्राचीने तिथिसमुदाये चान्द्रसंवत्सरत्वमविरुद्धम्"** इति चान्द्रसंवत्सरनिर्णयप्रकरणे प्रोक्तम्। एतादृशस्य चान्द्रवर्षस्य वार्षिकश्राद्धादौ पौराणव्रतादौ चोपयोगो भवति।

सावनस्य वर्षस्य ३६० दिनात्मकस्य प्रारम्भस् तु यस्मात्कस्मादपि यज्ञ-विशेषस्याऽऽरम्भस्य दिनाद् भवति। एतादृशस्य सावनवर्षस्य गवामयनादावुपयोगो भवति।

अथ सौरस्य सौरचान्द्रस्यापि वर्षस्य उदगयनारम्भेण सहैवाऽऽरम्भस्य स्वीकारे उपपत्तयोऽत्र प्रदर्श्यन्ते।

श्रौत-स्मार्त-पौराणपरम्परायां महाकल्प-कल्प-मन्वन्तर-महायुग-युगादीनां प्रतिपादनं दिव्यकालमानस्यैवाऽवलम्बनेन मानुषकालमान-दिव्यकालमानसामञ्ज-स्येन च क्रियते। तथाहि—

एकं वा एतद् देवानामहर् यत् संवत्सरः। इति

—आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदब्राह्मणे (३।९।२२।१)।

ब्राह्मस्य तु क्षपाहस्य यत् प्रमाणं समासतः।
एकैकशो युगानां तु क्रमशस् तन् निबोधत॥
चत्वार्याहुः सहस्राणि वर्षाणां तत् कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश् च तथाविधः॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु।
एकापायेन वर्तन्ते सहस्राणि शतानि च॥
यदेतत् परिसङ्ख्यातमादावेव चतुर्युगम्।
एतद् द्वादशसाहस्रं देवानां युगमुच्यते॥
दैविकानां युगानां तु सहस्रं परिसङ्ख्यया।
ब्राह्ममेकमहर् ज्ञेयं तावतीं रात्रिमेव च॥
तद् वै युगसहस्रान्तं ब्राह्मं पुण्यमहर् विदुः।
रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः॥ इति

—मनुस्मृतौ (१।६८-७३)।

दिव्यैर् वर्षसहस्रैस् तु कृतत्रेतादिसंज्ञितम्।
चतुर्युगं द्वादशभिस् तद्विभागं निबोधत॥
चत्वार्याहुः सहस्राणि वर्षाणां तत् कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश् च कृतस्य तु॥ इत्यादि

—कूर्मपुराणे (१।५।९-१९)।

दिव्यैर् वर्षसहस्रैर् द्वा-दशभिर् दैवतं युगम्।
दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम्॥

एकसप्ततिसङ्ख्यातैर् दिव्यैर् मन्वन्तरं युगैः।
चतुर्दशभिरेतैश् च ब्रह्मणो दिवसं मुने॥ इति

–नारदीयपुराणे (१।५।२६-२८)।

दिव्यैर् वर्षसहस्रैस् तु कृतत्रेतादिसंज्ञितम्।
चतुर्युगं द्वादशभिस् तद्विभागं निबोध मे॥
चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम्।
दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः॥
तत्प्रमाणैः शतैः सन्ध्या पूर्वा तत्राभिधीयते।
सन्ध्यांशकश् च तत्तुल्यो युगस्यानन्तरो हि यः॥ इति

–पद्मपुराणे सृष्टिखण्डे (३।७-१०), विष्णुपुराणे च (१।३।११-१३)।

मासैर् द्वादशभिर् वर्षमहोरात्रं तु तद् दिवि।
त्रिभिर् वर्षशतैर् वर्षं षष्ट्या चैवाऽसुरद्विषाम्॥
तैस् तु द्वादशसाहस्रैश् चतुर्युगमुदाहृतम्।
चतुर्युगसहस्रं तु कथ्यते ब्रह्मणो दिनम्॥ इत्यादि

–ब्रह्मपुराणे (१२४।१०,११) विष्णुपुराणे च (६।३।१०,११)।

त्रिंशतैश् च षष्ट्यधिकैर् युगैर् दिव्यं युगं स्मृतम्।
मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः॥ इति च

–ब्रह्मवैवर्तपुराणे (१।५।६-७)।

वर्षे पूर्णे नराणां च देवानां च दिवानिशम्।
शतत्रये षष्ट्यधिके नराणां च युगे गते॥
देवानां च युगो ज्ञेयः कालसङ्ख्याविदां मतः।
मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः॥ इति च

–तत्रैव (२।७।७३-७४)।

चत्वार्याहुः सहस्राणि वर्षाणां च कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशः सन्ध्यया समः॥ इत्यादि

–ब्रह्माण्डपुराणे (१।२९।२५)।

चत्वार्याहुः सहस्राणि वर्षाणां तत् कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश् च तथाविधः॥ इत्यादि

–भविष्यपुराणे (१।२।९३-९४), मत्स्यपुराणे (१४२।१९) च।

कृतं त्रेता द्वापरं च कलिश् चेति चतुर्युगम्।
द्विव्यैर् द्वादशभिर् वर्षैः सावधानं निरूपितम्॥

चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम्।
सङ्ख्यातानि सहस्राणि द्विगुणानि शतानि च॥ इति

–भागवते (३।११।१८, १९)।

वर्षे पूर्णे नराणां च देवानां च दिवानिशम्।
शतत्रये षष्ट्यधिके नराणां च युगे कृते॥
देवानां च युगं ज्ञेयं कालसङ्ख्याविदां मतम्।
मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः॥ इत्यादि

–देवीभागवते (९।८।६९, ७०)।

दिव्यैर् वर्षसहस्रैस् तु कृतत्रेतादिसंज्ञितम्।
चतुर्युगं द्वादशभिस् तद्विभागं शृणुष्व मे॥ इत्यादि

–मार्कण्डेयपुराणे (४३।२६)।

लौकिकेनैव मानेन अब्दो यो मानुषः स्मृतः।
एतद् दिव्यमहोरात्रमिति लैङ्गेऽत्र कीर्त्यते॥ इत्यादि

–लिङ्गपुराणे (१।४।१४-१५)।

चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश् च तथाविधः॥
इतरासु च सन्ध्यासु सन्ध्यांशेषु च वै त्रिषु।
एकापायेन वर्तन्ते सहस्राणि शतानि च॥ इत्यादि

–वायुपुराणे (१।५७।२३, २४), शिवपुराणे च (७।१।८।१३, १४)।

समाशतैर् द्वादशभिर् दिव्यैस् तिष्ययुगं स्मृतम्।
द्विगुणं द्वापरं ज्ञेयं त्रेता त्रिगुणमुच्यते॥
चतुर्गुणं कृतं ज्ञेयं पिण्डितं चाऽब्दसङ्ख्यया।
चतुर्युगं सहस्राणि राम द्वादश कीर्तितम्॥ इति

–विष्णुधर्मोत्तरपुराणे (१।७३।१७, १८)।

मानुषेण तु मानेन यो वै संवत्सरः स्मृतः।
देवानां तदहोरात्रं दिवा चैवोत्तरायणम्॥ इत्यादि

–स्कन्दपुराणे आवन्त्यखण्डे (१।४८।१४-१५)।

दिव्यैर् द्वादशसाहस्रैर् वर्षैः प्रोक्तं चतुर्युगम्।
कृतं तत्र युगं विप्राः सहस्राणां चतुष्टयम्॥ इत्यादि

–स्कन्दपुराणसूतसंहितायाम् (१।८।८)।

चत्वार्याहुः सहस्राणि वर्षाणां तत् कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश् च तथाविधः॥ इत्यादि

–महाभारते वनपर्वणि (१८८।२२-२६), शान्तिपर्वणि च (२३१।२०)।

चत्वार्येव सहस्राणि वर्षाणां तु कृतं युगम्।
तावच्छती भवेत् सन्ध्या सन्ध्यांशश् च तथा नृप॥ इत्यादि

–हरिवंशे (१।८।१३)।

दिव्यं द्वादशसाहस्रं युगं तु कवयो विदुः।
एतत्सहस्रपर्यन्तं तदहो ब्राह्ममुच्यते॥ इति च

–तत्रैव (३।८।२०)।

उपरि प्रदर्शितेभ्यो वचनेभ्यो मानुषकालमान-दिव्यकालमानयोः सामञ्जस्येनैव श्रौत-स्मार्त-पौराणपरम्परायां कालगणना क्रियते इति स्पष्टतयाऽवगम्यते। एतच्च कतिपयेषु पुराणेषु कण्ठरवेणैवाऽपि प्रतिपादितं दृश्यते। तथाहि–

इत्येवमृषिभिर् गीतं दिव्यया सङ्ख्यया त्विह।
दिव्येनैव प्रमाणेन युगसङ्ख्याप्रकल्पनम्॥ इति

–ब्रह्माण्डपुराणे पूर्वभागे (२९।२२)।

इत्येतदृषिभिर् गीतं दिव्यया सङ्ख्यया द्विजाः।
दिव्येनैव प्रमाणेन युगसङ्ख्या प्रकल्पिता॥ इति

–मत्स्यपुराणे (१४२।१६)।

त्रीण्येव नियुतान्याहुर् वर्षाणां मानुषाणि तु।
षष्टिश् चैव सहस्राणि सङ्ख्यातानि तु सङ्ख्यया॥
दिव्यं वर्षसहस्रं तु प्राहुः सङ्ख्याविदो जनाः।
दिव्येनैव प्रमाणेन युगसङ्ख्याप्रकल्पनम्॥ इति

–लिङ्गपुराणे (१।४।२२-२४)।

इत्येवमृषिभिर् गीतं दिव्यया सङ्ख्ययाऽन्वितम्।
दिव्येनैव प्रमाणेन युगसङ्ख्याप्रकल्पनम्॥ इति

–वायुपुराणे (१।५७।२१)।

संवत्सरोऽपि देवानां मासैर् द्वादशभिस् तथा।
त्रीणि वर्षशतान्येव षष्टिवर्षयुतान्यपि॥
दिव्यः संवत्सरो ज्ञेयो मानुषेण प्रकीर्तितः।
दिव्येनैव प्रमाणेन युगसङ्ख्या प्रवर्तते॥ इति

–शिवपुराणे (७।१।८।९-११)।

एतच् च दिव्ययुगसहस्रस्य ब्रह्मणो दिनत्वेन प्रतिपादनाच् च समर्थितं भवति। दिव्ययुगसहस्रस्य ब्रह्मणो दिनत्वं च निरुक्तपरिशिष्ट-बृहद्देवता-मनुस्मृति-पुराण-महाभारतादिग्रन्थेषु प्रतिपादितमस्त्येव। तथाहि—

तदेतदहर् युगसहस्रं जागर्ति, तस्याऽन्ते सुषुप्स्यन्नङ्गानि प्रत्याहरति, भूतग्रामाः पृथिवीमपियन्ति, पृथिव्यपः, आपो ज्योतिषम्, ज्योतिर् वायुम्, वायुराकाशम्, आकाशो मनः, मनो विद्याम्, विद्या महान्तमात्मानम्, महानात्मा प्रतिभाम्, प्रतिभा प्रकृतिम्, सा स्वपिति, युगसहस्रं रात्रिः, तावेतावहोरात्रावजस्रं परिवर्तेते, स कालस् तदेतदहर् भवति। युगसहस्रपर्यन्तमहर् यद् ब्रह्मणो विदुः। रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः॥ इति

—निरुक्तपरिशिष्टे (२।४)।

महानाम्न्य ऋचो गुह्यास् ता ऐन्द्र्यश् चैव यो वदेत्।
सहस्रयुगपर्यन्तम् अहर् ब्राह्मं स राध्यते॥ इति

—बृहद्देवतायाम् (८।९८)।

दैविकानां युगानां तु सहस्रं परिसङ्ख्यया।
ब्राह्ममेकमहर् ज्ञेयं तावतीं रात्रिमेव च॥
तद् वै युगसहस्रान्तं ब्राह्मं पुण्यमहर् विदुः।
रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः॥ इति

—मनुस्मृतौ (१।७२,७३)।

ब्राह्ममेकमहः कल्पस् तावती रात्रिरिष्यते।
चतुर्युगसहस्रं तु कल्पमाहुर् मनीषिणः॥ इति

—कूर्मपुराणे (१।५।१७-१८)।

दिव्यैर् वर्षसहस्रैर् द्वा-दशभिर् दैवतं युगम्।
दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम्॥ इति

—नारदीयपुराणे (१।५।२६-२७)।

एषा चतुर्युगावृत्तिरा सहस्राद् गुणीकृता।
ब्रह्मणस् तदहः प्रोक्तं रात्रिश् चैतावती स्मृता॥ इति

—ब्रह्माण्डपुराणे पूर्वभागे (३१।११४-११५)।

तैस् तु द्वादशसाहस्रैश् चतुर्युगमुदाहृतम्।
चतुर्युगसहस्रं तु कथ्यते ब्रह्मणो दिनम्॥ इति

—ब्रह्मपुराणे (१२४।११)।

मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः।
चतुर्दशेषु मनुषु गतेषु ब्रह्मणो दिनम्॥ इति

–ब्रह्मवैवर्तपुराणे (१।५।७)।

मन्वन्तरसमं ज्ञेयं चेन्द्रायुः परिकीर्तितम्।
अष्टाविंशतिमे चेन्द्रे गते ब्राह्मं दिवानिशम्॥ इति च

–तत्रैव (२।७।७४-७५)।

दैविकानां युगानां तु सहस्रं परिसङ्ख्यया।
ब्राह्ममेकमहर् ज्ञेयं तावती रात्रिरुच्यते॥
एतद् युगसहस्रान्तं ब्राह्मं पुण्यमहर् विदुः।
रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः॥ इति

–भविष्यपुराणे (१।२।८९-१००)।

त्रिलोक्या युगसाहस्रं बहिरा ब्रह्मणो दिनम्।
तावत्येव निशा तात यन् निमीलति विश्वसृक्॥ इति

–भागवते (३।११।२२)।

मन्वन्तरसमं ज्ञेयमायुष्यं च शचीपतेः।
अष्टाविंशतिमे चेन्द्रे गते ब्रह्मदिवानिशम्॥ इति

–देवीभागवते (९।८।७१)।

मन्वन्तरस्य कालस् तु युगैः सह प्रकीर्तितः।
एषा चतुर्युगाख्या तु साधिका ह्येकसप्ततिः॥
क्रमेण परिवृत्ता सा मनोरन्तरमुच्यते।
एतच् चतुर्दशगुणं कल्पमाहुस् तु तद्विदः॥ इति

–मत्स्यपुराणे (१४२।३४-३६)।

एषा द्वादशसाहस्री युगाख्या कविभिः कृता।
एतत् सहस्रगुणितमहो ब्राह्ममुदाहृतम्॥ इति

–मार्कण्डेयपुराणे (४३।३१)।

चतुर्युगस्य च तथा वर्षसङ्ख्या प्रकीर्तिताः।
चतुर्युगसहस्रं वै कल्पश् चैको द्विजोत्तमाः॥ इति

–लिङ्गपुराणे (१।४।३६)।

तत्र युगसहस्रान्तमहर् यद् ब्रह्मणो विदुः।
रात्रिं युगसहस्रान्तामहोरात्रविदो जनाः॥ इति

–वायुपुराणे २।३८।१३१)।

कृतं त्रेता द्वापरश् च कलिश् चैव चतुर्युगम्।
प्रोच्यते तत्सहस्रं च ब्रह्मणो दिवसं मुने॥ इति

–विष्णुपुराणे (१।३।१५)।

मन्वन्तरस्य सङ्ख्येयं मानुषैर् वत्सरैर् द्विज।
चतुर्दशगुणो ह्येष कालो ब्राह्ममहः स्मृतम्॥ इति च

–तत्रैव (१।३।२१-२२)।

चतुर्युगसहस्रं तु कथ्यते ब्रह्मणो दिनम्।
स कल्पस् तत्र मनवश् चतुर्दश महामुने॥ इत्यादि च

–तत्रैव (६।३।११-१२)।

पद्मयोनेर् दिनं यत् तु चतुर्युगसहस्रवत्।
एकार्णवीकृते लोके तावती रात्रिरिष्यते॥ इति च

–तत्रैव (६।४।९)।

चतुर्युगसहस्रं तु कल्पमाहुर् मनीषिणः।
कल्पश् च दिवसः प्रोक्तो ब्रह्मणः परमेष्ठिनः॥ इति

–विष्णुधर्मोत्तरपुराणे (१।७३।३६-३७)।

चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते।
रात्रिश् च तावती तस्य मानमेतत् क्रमेण ह॥ इति

–शिवपुराणे (२।१।१६)।

एतद् द्वादशसाहस्रं साऽधिकं च चतुर्युगम्।
चतुर्युगसहस्रं यत् स कल्प इति कथ्यते॥ इति,
कल्पो नाम दिवा प्रोक्तो ब्रह्मणोऽव्यक्तजन्मनः। इति च

–तत्रैव (७।१।८।१५,१९)।

आयुर् मनोर् युगानां च साऽधिका ह्येकसप्ततिः।
चतुर्दशमनूनां च कालेन ब्रह्मणो दिनम्॥ इति

–स्कन्दपुराणे माहेश्वरखण्डे (२।३९।५९)।

चतुर्दश विधातुस् ते भवन्ति मनवोऽहनि।
तत् कल्पसंज्ञं तस्याऽन्ते निशा स्यात् तत्समा शृणु॥ इति

–तत्रैव वैष्णवखण्डे (१।३६।४१)

ब्रह्मणस् तदहः प्रोक्तं कल्पश् चेति स उच्यते।
सहस्रयुगपर्यन्तं सा निशा प्रोच्यते बुधैः॥ इति

–तत्रैव आवन्त्यखण्डे (१।४८।२८-२९)।

चतुर्युगसहस्रेण दिनं पैतामहं भवेत्। इति

–तत्रैव नागरखण्डे (१९४।२०)।

एवं युगसहस्रेण सम्प्राप्तेन ततः परम्।
ब्रह्मणो दिवसं भावि रात्रिश् चैव ततः परम्॥ इति च

–तत्रैव (२७२।५३)।

चतुर्युगैकसप्तत्या मन्वन्तरमुदाहृतम्।
ऐन्द्रमेतद् भवेदायुः समासान्तं च कीर्तितम्॥
चतुर्दशेन्द्रैः प्रलीनैः कल्पं ब्रह्मदिनं भवेत्।
रात्रिश् च तावती चैव चतुर्युगसहस्रिका॥ इति

–तत्रैव प्रभासखण्डे (१।१९।१३-१५)।

एते सर्वे विनश्यन्ति ब्रह्मणो दिवसे प्रिये।
रात्रिस् तु तावती ज्ञेया कल्पमानमिदं स्मृतम्॥ इति च

–तत्रैव (१।१०५।४४)

युगानामेकसप्तत्या मन्वन्तरमिहोच्यते।
मनवो ब्रह्मणः प्रोक्ता दिवसे च चतुर्दश॥
ब्राह्ममेकमहर् विप्राः कल्प इत्युच्यते बुधैः।
तावती रात्रिरप्युक्ता ब्रह्मणः पण्डितोत्तमाः॥ इति

–स्कन्दपुराणसूतसंहितायाम् (१।८।१२,१३)।

एषा द्वादशसाहस्री युगाख्या परिकीर्तिता।
एतत्सहस्रपर्यन्तमहो ब्राह्ममुदाहृतम्॥ इति

–महाभारते, वनपर्वणि (१८८।२७-२८)।

सहस्रयुगपर्यन्तमहर् यद् ब्रह्मणो विदुः।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः॥ इति

–तत्रैव, भीष्मपर्वणि (३२।१७, गीतायाम् ८।१७), शान्तिपर्वणि च (२३१।३१)।

एतां द्वादशसाहस्रीं युगाख्यां कवयो विदुः।
सहस्रपरिवर्तं तद् ब्राह्मं दिवसमुच्यते॥ इति च

–तत्रैव, शान्तिपर्वणि (२३१।२९)।

तस्मिन् युगसहस्रे तु पूर्णे भरतसत्तम।
ब्राह्मे दिवसपर्यन्ते कल्पो निःशेष उच्यते॥ इति

–हरिवंशे (१।८।२२-२३)।

एवं द्वादशसाहस्रं तदेकं युगमुच्यते।
तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते॥
त्रय्यां चैव न सन्देहो युमान्ते जनमेजय।
दिव्यं द्वादशसाहस्रं युगं तु कवयो विदुः॥
एतत्सहस्रपर्यन्तं तदहो ब्राह्ममुच्यते॥ इति च

–तत्रैव (३।८।१९–२०)।

मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः।
दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम्॥ इति

–अमरकोषापरनामके नामलिङ्गानुशासने (१।४।२१)।

मानुषवर्षस्य परिभाषाऽपि मनुस्मृतिप्रभृतिषु बहुष्वेव ग्रन्थेषु दिव्यमान-मनुसृत्य कृता दृश्यते। तथाहि–

दैवे रात्र्यहनी वर्षं प्रविभागस् तयोः पुनः।
अहस् तत्रोदगयनं रात्रिः स्याद् दक्षिणायनम्॥ इति

–मनुस्मृतौ (१।६७), महाभारते च (१२।२३१।१७)।

दिव्ये रात्र्यहनी वर्षं प्रविभागस् तयोः पुनः।
अहस् तत्रोदगयनं रात्रिः स्याद् दक्षिणायनम्॥ इति

–ब्रह्माण्डपुराणे पूर्वभागे (२९।१३-१४), लिङ्गपुराणे (१।४।१५-१६), वायुपुराणे च (१।५७।१३)।

दिव्ये रात्र्यहनी वर्षं प्रविभागस् तयोः पुनः।
अहस् तु यदुदक् चैव रात्रिर् या दक्षिणायनम्॥ इति

–मत्स्यपुराणे (१४२।१०)।

उक्तविधायां स्थितौ दिव्यस्याऽहोरात्रस्याऽहःपूर्वकत्वेन उदगयनादावारम्भाद् दिव्याहोरात्राभिन्नस्य मानुषवर्षस्याऽपि उदगयनारम्भे एव प्रारम्भ इति स्वीकारः श्रौत-स्मार्त-पौराणपरम्परासम्मत इत्यवगन्तव्यम्। उदगयनस्य दिव्याहोरूपत्वं च बहुषु ग्रन्थेषु प्रतिपादितं दृश्यते। तथाहि–

स (सूर्यः) यत्रोदङ्ङावर्तते देवेषु तर्हि भवति, देवाँस्तर्ह्यभिगोपायति। इति

–माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मणे (२।१।३।३)।

यदुत्तरायणं तदहर् देवानाम्। इति

–विष्णुस्मृतौ (विष्णुधर्मसूत्रे) (२०।१)।

अहस् तत्रोदगयनं रात्रिः स्याद् दक्षिणायनम्। इति

–मनुस्मृतौ (१।६७)।

अयनं दक्षिणं रात्रिर् देवानामुत्तरं दिनम्। इति

–कूर्मपुराणे (१।५।९), पद्मपुराणे सृष्टिखण्डे (३।७), विष्णुपुराणे च (१।३।१०)।

उत्तरं दिवसं प्राहू रात्रिर् वै दक्षिणायनम्। इति

–नारदीयपुराणे (१।५।२५)।

अहस् तत्रोदगयनं रात्रिः स्याद् दक्षिणायनम्। इति

–ब्रह्माण्डपुराणे पूर्वभागे (२९।१४), भविष्यपुराणे (१।२।९२), लिङ्गपुराणे (१।४।१६), वायुपुराणे (१।५७।१३), स्कन्दपुराणे (१।२।२९।५४), महाभारते शान्तिपर्वणि च (२३१।१७)।

अहस् तु यदुदक् चैव रात्रिर् या दक्षिणायनम्। इति

–मत्स्यपुराणे (१४२।१०)।

तद् देवानामहोरात्रं दिनं तत्रोत्तरायणम्। इति

–मार्कण्डेयपुराणे (४३।२५)।

एतद् दिव्यमहोरात्रमिति शास्त्रस्य निश्चयः।
दक्षिणं चाऽयनं रात्रिस् तथोदगयनं दिनम्॥ इति

आर्यावर्त पुस्तकालय

–शिवपुराणे (७।१।८।८)।

देवासुराणामन्योन्यमहोरात्रं विपर्ययात्।
उत्तरं दक्षिणं भानोरयने ते यथाक्रमम्॥ इति

–स्कन्दपुराणे वैष्णवखण्डे (१।३६।३२)।

मानुषेण तु मानेन यो वै संवत्सरः स्मृतः।
देवानां तदहोरात्रं दिवा चैवोत्तरायणम्॥ इति

–तत्रैव आवन्त्यखण्डे (१।४८।१४-१५), हरिवंशे च (१।८।९)।

अयनं चोत्तरं शुक्लं यद् देवानां दिनं तु तत्।
यद् दक्षिणं तु सा रात्रिः शुभकर्मविगर्हिता॥ इति च

–स्कन्दपुराणे, नागरखण्डे (२७२।८)।

अयनं द्वेऽयने वर्षं क्रमात् ते दक्षिणोत्तरे।
रात्रिर् दिवौकसां पूर्वं दिवा चैवोत्तरायणम्॥ इति

–स्कन्दपुराणसूतसंहितायाम् (१।८।६)।

यथा मानुषस्याऽहोरात्रस्य अहःपूर्वकत्वं स्वीक्रियते तथैव दिव्यस्याऽहोरात्रस्याऽपि अहःपूर्वकत्वमेव स्वीकर्तव्यमिति उत्तरायणारम्भे एव मानुषवर्षारम्भः स्वीकर्तव्यः। तत्र मानुषस्याऽहोरात्रस्याऽहःपूर्वकत्वं च **"विष्णुक्रमैर् वै प्रजापतिरहरसृजत वात्सप्रेण रात्रिम्"** इति माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथ-ब्राह्मणस्य (६।७।४।७) वचनादवगम्यते। एतादृशान्येव वेदवचनान्युपजीव्य पुराणेषु महाभारते च अहोरात्रस्य अहःपूर्वकत्वं प्रतिपादितमवगम्यते। तथाहि—

सर्वग्रहाणामेतेषामादिरादित्य उच्यते।
तारागृहाणां शुक्रस् तु केतूनां चैव धूमवान्॥
ध्रुवः कीलो ग्रहाणां तु विभक्तानां चतुर्दिशम्।
नक्षत्राणां श्रविष्ठा स्यादयनानां तथोत्तरम्॥
वर्षाणामपि पञ्चानामाद्यः संवत्सरः स्मृतः।
ऋतूनां शिशिरश् चाऽपि मासानां माघ एव च॥
पक्षाणां शुक्लपक्षश् च तिथीनां प्रतिपत् तथा।
अहोरात्रविभागानामहश् चाऽपि प्रकीर्तितम्॥
मुहूर्तानां तथैवाऽऽदिर् मुहूर्तो रुद्रदैवतः॥ इति

—ब्रह्माण्डपुराणे पूर्वभागे (२४।१३९-१४३), लिङ्गपुराणे (१।६१।५०-५४), वायुपुराणे च (१।५३।१११-११५)।

अहः पूर्वं ततो रात्रिर् मासाः शुक्लादयस् तथा।
श्रविष्ठादीनि ऋक्षाणि ऋतवः शिशिरादयः॥ इति

—महाभारते शोधसंस्करणे आश्वमेधिकपर्वणि (४४।२)।

यथा चान्द्रो मुख्यो मासः पक्षद्वयात्मकः स्वीक्रियते तथैव मानुषं वर्षमपि अयनद्वयात्मकं स्वीक्रियते इति च यथा पक्षारम्भे मासारम्भः स्वीक्रियते तथैव अयनारम्भे एव मानुषवर्षारम्भोऽपि स्वीकर्तव्यः। वर्षस्याऽयनद्वयात्मकत्वं च बहुभिः श्रुतिवचनैरपि ज्ञायमानं वेदाङ्ग-ज्योतिषादिषु बहुषु ग्रन्थेषु कण्ठरवेणैव प्रोक्तम्। तथाहि—

अब्दः षट् चर्तवोऽयने। इति

—वेदाङ्गज्योतिषे (श्लो.२८)।

अयनद्वयं वत्सरो भवति। इति

—त्रिपाद्-विभूतिमहानारायणोपनिषदि, तृतीयेऽध्याये।

द्व्ययनः संवत्सरः। इति

—कौटलीयेऽर्थशास्त्रे (२।२०)।

अयने द्वे युगपत् संवत्सरः। इति

–सुश्रुतसंहितायाम् (१।६।९)।

वर्षं द्वेऽयने दक्षिणोत्तरे। इति

–कूर्मपुराणे (१।५।६), मार्कण्डेयपुराणे (४३।२५), विष्णुपुराणे च (१।३।१०)।

ऋतुर् मासद्वयेन स्यात् तत् त्रयेणाऽयनं स्मृतम्।
तद्द्वयेन भवेदब्दः स देवानां दिनं भवेत्॥ इति

–नारदीयपुराणे (१।५।२४)।

वर्षमयने दक्षिणोत्तरे। इति

–पद्मपुराणे सृष्टिखण्डे (३।६)।

दिव्ये रात्र्यहनी वर्षम्। इति

–ब्रह्माण्डपुराणे पूर्वभागे (२९।१३), मत्स्यपुराणे (१४२।१०), वायुपुराणे च (१।५७।१३)।

अब्दस् तु चाऽयने द्वे वै चोत्तरे दक्षिणायने। इति

–ब्रह्मवैवर्तपुराणे, कृष्णजन्मखण्डे (९६।६२)।

द्वेऽयने वर्षमुच्यते। इति

–वायुपुराणे (१।५०।१७७)।

द्वेऽयने वर्षसंज्ञिते। इति

–विष्णुपुराणे (२।८।७)।

वर्षं द्वे चाऽयने मतम्। इति

–शिवपुराणे (७।१।८।७)।

वत्सरो भवेत्। अयनद्वितयाकारः। इति

–स्कन्दपुराणे वैष्णवखण्डे (१।३६।३१)।

अब्दं द्वे अयने स्मृतम्। इति

–तत्रैव आवन्त्यखण्डे (१।४८।११)।

अयने द्वे तु वत्सरम्। इति

–तत्रैव नागरखण्डे (१९४।१४, २७२।७)।

वर्षं स्यादयनद्वये। इति

–तत्रैव प्रभासखण्डे (१।१९।१२)।

अब्दं स्यादयनद्वयात्। इति

–तत्रैव (१।१०५।३६)।

द्वेऽयने वर्षम्। इति

–स्कन्दपुराणसूतसंहितायाम् (१।८।६)।

संवत्सरं द्वे त्वयने वदन्ति। इति

–महाभारते शान्तिपर्वणि (२३१।१४)।

अब्दं द्व्ययनमुक्तं च। इति

–हरिवंशे (१।८।६)।

अयने द्वे गतिरुदग् दक्षिणाऽर्कस्य वत्सरः। इति

–अमरकोषापरनामके नामलिङ्गानुशासने (१।४।१३)।

द्व्ययनः संवत्सरः। इति

–काव्यमीमांसायां राजशेखरकृतायामष्टादशेऽध्याये।

१८. अयननिरूपणम्

उपरि प्रदर्शितेभ्यो वचनेभ्यो यदोदगयनस्याऽऽरम्भो भवति तदैव श्रौत-स्मार्त-पौराण-परम्परायां वर्षस्याऽऽरम्भोऽपि भवतीति स्वीकर्तव्यमिति स्पष्टतया-ऽवगम्यते। एतादृश्यां स्थितौ उदगयनमिति किमुच्यते इति उदगयनस्याऽऽरम्भः कदा भवतीति च निरूपणीयं भवति।

तत्र माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाशतपथब्राह्मणे **"वसन्तो ग्रीष्मो वर्षास् ते देवाऽ ऋतवः, शरद् धेमन्तः शिशिरस् ते पितरः, य एवाऽऽपूर्यते-ऽर्द्धमासः स देवाः, योऽपक्षीयते स पितरः, अहरेव देवा रात्रिः पितरः, पुनरह्नः पूर्वाह्णो देवाः, अपराह्णः पितरः। ते वा एत ऋतवो देवाः पितरः, स यो हैवं विद्वान् देवाः पितर इति ह्वयति आ हाऽस्य देवा देवहूयं गच्छन्ति आ पितरः पितृहूयम्, अवन्ति हैनं देवा देवहूये, अवन्ति पितरः पितृहूये, य एवं विद्वान् देवाः पितर इति ह्वयति। स यत्रोदङ्ङावर्तते देवेषु तर्हि भवति देवाँस् तर्ह्यभिगोपायति, अथ यत्र दक्षिणा आवर्तते पितृषु तर्हि भवति पितॄँस् तर्ह्यभिगोपायति। स यत्रोदङ्ङावर्तते तर्ह्यग्नी आदधीत, अपहतपाप्मानो देवा अप पाप्मानं हते, अमृता देवाः, नाऽमृतत्वस्याऽऽशा-ऽस्ति सर्वमायुरेति यस् तर्ह्याधत्ते, अथ यत्र दक्षिणा आवर्तते यस् तर्ह्याधत्ते अनपहत-पाप्मानः पितरः, न पाप्मानमपहते, मर्त्याः पितरः पुरा हाऽऽयुषो म्रियते यस् तर्ह्याधत्ते"** (२।१।३।१-४) इति श्रूयते। अत्र वसन्तो ग्रीष्मो वर्षाः इति त्रय ऋतवो उदगयनगताः, शरद् हेमन्तः शिशिर इति त्रय ऋतवो दक्षिणायनगताः स्वीकृता इति प्रतीयते।

विष्णुधर्मोत्तरपुराणे च **"सूर्यसङ्क्रमणस्याऽन्ते सौरो मासः समाप्यते। सौर-मासद्वयं राम ऋतुरित्यभिधीयते॥ ऋतुत्रयं चाऽयनं स्यात् तद्द्वयं च समा स्मृता।**

देवतानामहोरात्रं स च राम प्रकीर्तितः॥ मेषादिषट्कगे सूर्ये तेषां दिवस उच्यते। तुलादिषट्कगे सूर्ये तेषां रात्रिः प्रकीर्तिता" इति (१।७३।११-१३) दृश्यते। अत्र सूर्यस्य मेषराशौ प्रवेशात् प्रभृति उत्तरायणस्य प्रवृत्तिः, तुलाराशौ प्रवेशात् प्रभृति दक्षिणायनस्य प्रवृत्तिः इति स्वीकृतं दृश्यते। एतादृशमेव प्रतिपादनं तत्र द्वितीयखण्डे सप्तषष्ट्यधिकशततमेऽध्याये (२६५तमे पत्रे, पूर्वपृष्ठे) च **"अर्कभगणभोगो दिव्योऽहोरात्रः, तेषामर्कस्य मेषप्रवेशे सूर्योदयः कर्कटप्रवेशे मध्याह्नः। तुलाप्रवेशेऽस्तमयः, मकरप्रवेशेऽर्धरात्रः"** इत्युक्त्वा कृतं दृश्यते।

आधुनिके प्रचलिते सूर्यसिद्धान्ते च भूगोलाध्याये **"देवासुरा विषुवति क्षितिजस्थं दिवाकरम्। पश्यन्त्यन्योन्यमेतेषां वामसव्ये दिनक्षपे॥ मेषादावुदितः सूर्यस् त्रीन् राशीनुदगुत्तरम्। सञ्चरन् प्रागहर्मध्यं पूरयेन् मेरुवासिनाम्॥ कर्क्यादीन् सञ्चरँस् तद्वदह्नः पश्चार्धमेव सः। तुलादींस् त्रीन् मृगादींश् च तद्वदेव सुरद्विषाम्॥ अतो दिनक्षपे तेषामन्योन्यं हि विपर्ययात्। अहोरात्रप्रमाणं च भानोर् भगणपूरणात्"** (श्लो.४७–५०) इति दृश्यते।

भास्करकृते सिद्धान्तशिरोमणावपि गोलाध्याये त्रिप्रश्नवासनाप्रकरणे **"दिनं सुराणामयनं यदुत्तरं निशेतरत् सांहितिकैः प्रकीर्तितम्। दिनोन्मुखेऽर्के दिनमेव तन् मतं निशा तथा तत्फलकीर्तनाय तत्॥ द्वन्द्वान्तमारोहति यैः क्रमेण तैरेव वृत्तैरवरोहतीनः। यत्रैव दृष्टः प्रथमं स देवैस् तत्रैव तिष्ठन् न विलोक्यते किम्"** (श्लो.११,१२) इत्युक्तं दृश्यते।

अत्रेदं विचार्यम्। किं वासन्तविषुवात् प्रभृति शारदविषुवं यावत् सूर्यस्य पृथिव्या उत्तरगोलस्याऽवलम्बनमेवोदगयनम्? उत सूर्यस्योदङ्मुखीभावस्याऽऽरम्भात् प्रभृति दक्षिणाभिमुखीभावस्य प्रारम्भं यावदेवोदगयनम्? इति।

तत्र उदगयन-देवदिनयोरैक्यस्य श्रुति-स्मृति-पुराणेषु प्रतिपादितत्वात्, शतपथब्राह्मणे वसन्त-ग्रीष्म-वर्षर्तूनां देवर्तुत्वेन प्रतिपादिततया तेषां देवदिनतायाः प्रतीयमानत्वात्, मेरुनिवासिनां देवानां कृते सूर्यस्य पृथिव्या उत्तरगोलावलम्बनस्यैव दिनत्वस्योपपन्नत्वाच् च वासन्तविषुवात् प्रभृति शारदविषुवं यावत् सूर्यस्य पृथिव्या उत्तरगोलस्याऽवलम्बनमेवोदगयनमिति स्वीर्तव्यमित्यापाततः प्रतीयते।

किन्तु मैत्रायणीयारण्यक-बौधायनश्रौतसूत्र-वेदाङ्गज्योतिष-कौटलीयार्थशास्त्र-पाणिनीयव्याकरणभाष्य-चरकसंहिता-सुश्रुतसंहिता-लौगाक्षिस्मृति-ब्रह्माण्ड-पुराण-वायुपुराण-विष्णुपुराणादिवचनानां विचारात्, यास्कमुनिकृतस्य निरुक्तस्य **"बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति पृथिवी वैश्वानरः संवत्सरो वैश्वानरो ब्राह्मणो वैश्वानरः इति"** (७।७।१) इति वचनस्य मननात्, धार्मिकविषयेषु भौतिक-

वासनाया एव निर्णायकत्वस्याऽभावाच् च सूर्यस्योदङ्मुखीभावस्याऽऽरम्भात् प्रभृति दक्षिणाभिमुखीभावस्य प्रारम्भं यावदेवोदगयनमिति निश्चेतुं शक्यते। तथाहि सूर्यस्योदङ्मुखीभावस्याऽऽरम्भात् प्रभृत्येवोदगयनस्याऽऽरम्भ इति सूचकानि प्रतिपादकानि वाऽपि वचनानि–

सूर्यो योनिः कालस्य। तस्यैतद् रूपं यन् निमेषादिकालात् सम्भृतं द्वादशात्मकं वत्सरम्, एतस्याऽऽग्नेयमर्धमर्धं वारुणम्। मघाद्यं श्रविष्ठार्धमाग्नेयं क्रमेणोत्क्रमेण सार्पाद्यं श्रविष्ठार्धान्तं सौम्यम्। इति

–मैत्रायणीयारण्यके (६।१४)।

षट्सुषट्सु मासेष्वाहिताऽग्निना पशुना यष्टव्यं भवति, उभे काष्ठे अभियजेते, माघमासे धनिष्ठाभिरुत्तरेणैति भानुमान्, अर्धाश्लेषस्य श्रावणस्य दक्षिणेनोप निवर्तत इत्येते काष्ठे भवतः। इति

–वौधायनश्रौतसूत्रे (२६।२९)।

स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ।
स्यात् तदाऽऽदियुगं माघस् तपःशुक्लोऽयनं ह्युदक्॥ इति

–वेदाङ्गज्योतिषे (श्लो.६)।

प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक्।
सार्पार्धे दक्षिणाऽर्कस् तु माघश्रावणयोः सदा॥ इति च

–तत्रैव (श्लो.७)।

शिशिराद्युत्तरायणम्, वर्षादि दक्षिणायनम्। इति

–कौटलीयेऽर्थशास्त्रे (२।२०)।

शिशिरवसन्तावुदगयनस्थौ। इति

–पाणिनीयव्याकरणभाष्ये (२।२।३४, वा.३)।

तत्राऽऽदित्यस्योदगयनमादानं च त्रीनृतून् छिशिरादीन् ग्रीष्मान्तान् व्यवस्येत्। इति

–चरकसंहितायां सूत्रस्थाने (६।४)।

चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरं च, तयोर् दक्षिणं वर्षाशरद्धेमन्ताः, उत्तरं च शिशिरवसन्तग्रीष्माः। इति

–सुश्रुतसंहितायां सूत्रस्थाने (६।७)।

तदुत्तरायणे कार्यं माघादिष्वेव केवलम्।
मुख्येषु कुर्याद् गौणेषु न कदाचन तां क्रियाम्॥ इति

–लौगाक्षिस्मृतौ, मनसुखरायमोरमुद्रापिते स्मृतिसन्दर्भे, षष्ठे भागे (पृ.२४४)।

तपस्-तपस्यौ मधु-माधवौ च शुक्रः शुचिश् चाऽयनमुत्तरं स्यात्।
नभोनभस्याविषऊर्जसंज्ञौ सहःसहस्याविति दक्षिणं स्यात्॥ इति

–ब्रह्माण्डपुराणे पूर्वभागे (२१।१५१), वायुपुराणे (१।५०।२०१), विष्णुपुराणे च (२।८।८१)।

कर्कटावस्थिते भानौ दक्षिणायनमुच्यते।
उत्तरायणमप्युक्तं मकरस्थे दिवाकरे॥ इति

–विष्णुपुराणे (२।८।६८।)।

एतादृश्यां शास्त्रीयवस्तुस्थितौ शतपथब्राह्मणे वर्षर्तोर् यद् देवर्तुत्वमुक्तं तद् धि वर्षर्तौ वैश्यस्याऽग्न्याधानस्य विधानाय वर्षर्तोः प्रशंसार्थमेवेत्यवगन्तव्यम्। एवं च वस्तुगत्या वर्षर्तोर् दक्षिणायनगतत्वेन स्वीकारे न काऽप्यनुपपत्तिः। एतेन विष्णुधर्मोत्तरपुराणवचनमपि कर्कटमासादीनामुत्तरायणगतत्वस्य स्वीकारे हेतुत्वं न गच्छतीत्यवगन्तव्यम्। "दिनक्षपार्धमेतेषामयनान्ते विपर्ययात्" इति भूगोलाध्याये (श्लो.५१) वदता सूर्यसिद्धान्तकारेणाऽपि अयनप्रवृत्तिस् तु सूर्यस्योदङ्मुखीभावस्य दक्षिणाभिमुखीभावस्य वा प्रारम्भादेव भवतीति तु स्वीकृतमेवाऽवगम्यते। तेनैव मानाध्याये तु **"भानोर् मकरसङ्क्रान्तेः षण् मासा उत्तरायणम्। कर्क्यादिस् तु तथैव स्यात् षण् मासा दक्षिणायनम्"** (श्लो.९) इति वदता अयनप्रारम्भः मकरसङ्क्रान्तौ कर्कटसङ्क्रान्तौ च स्पष्टतयैव प्रतिपादित एव। तस्मात् सूर्यस्य उदङ्मुखीभावस्य प्रारम्भे उदगयनस्य प्रारम्भः, सूर्यस्य दक्षिणाभिमुखीभावस्य प्रारम्भे दक्षिणायनस्य प्रारम्भ इति निश्चयो भवति। तत्र वैदिकपरम्परायां सौरमानसापेक्षस्य चान्द्रमानस्य प्राधान्यात् सौरोदगयनारम्भ-सन्निहित-शुक्लपक्षप्रतिपदातः सौरचान्द्रोदगयनस्य प्रारम्भः, सौरदक्षिणायनारम्भसन्निहित-शुक्लपक्षप्रतिपदातः सौरचान्द्रदक्षिणायनाऽऽरम्भ इति स्वीक्रियते इत्यवगन्तव्यम्।

एवं च सूर्यस्योदङ्मुखीभावस्य प्रारम्भेण सन्निहितायां शुक्लपक्षप्रतिपद्येव श्रौत-स्मार्त-पौराणधार्मिकपरम्परायां नववर्षारम्भो भवतीति बोध्यम्। एतेन वेदाङ्ग-ज्योतिषोक्तः शिशिरर्त्वारम्भरूपो नववर्षारम्भसमयः सर्वथा श्रुति-स्मृति-पुराण-सम्मत इति च सिध्यति।

१९. वसन्तर्तौ नववर्षारम्भ इति मतस्य समीक्षणम्

ननु बहुषु श्रुतिवाक्येषु ऋतूनां मध्ये वसन्तस्यैव प्रथममुल्लेखो दृश्यते, ततश् च वर्षस्य वसन्तर्तौ प्रारम्भः श्रुतिसम्मतः प्रतीयते। तथाहि श्रुतिवाक्यानि—

वसन्तो अस्याऽऽसीदाज्यं ग्रीष्म इध्मः शरद् धविः। इति

–शैशिरीय-शाकलऋग्वेदमन्त्रसंहितायाम् (१०।९०।६), माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदमन्त्रसंहितायाम् (३१।१४), शौनक्यथर्ववेदमन्त्रसंहितायाम् (१९।६।१०), आत्रेय-तैत्तिरीय-कृष्णयजुर्वेद-शाखाऽऽरण्यके च (३।१२।३)।

मधुश् च माधवश् च वासन्तिका ऋतू शुक्रश् च शुचिश् च ग्रैष्मा ऋतू नभश् च नभस्यश् च वार्षिका ऋतू इषश् चोर्जश् च शारदा ऋतू सहश् च सहस्यश् च हैमन्तिका ऋतू तपश् च तपस्यश् च शैशिरा ऋतू त इमं यज्ञमवन्तु ते मामवन्त्वनु व आरभेऽनु मारभध्वम्। इति

–काठकसंहितायाम् (३५।९), कपिष्ठलकठसंहितायाम् (४८।१०) च; द्र.- मैत्रायणीयसंहितायाम् (२।८।१२), अत्रेयतैत्तिरीयकृष्णयजुर्वेद-संहितायाम् (४।४।११।१), माध्यन्दिनीय वाजसनेयि-शुक्लयजुर्वेद-मन्त्रसंहितायां च (१३।२५, १४।६,१५,१६,२७, १५।५७)।

संवत्सरो वा अग्निर् ऋतुस्थास् तस्य वसन्तः शिरो ग्रीष्मो दक्षिणः पक्षो वर्षाः पुच्छं शरदुत्तरः पक्षो हेमन्तो मध्यम्। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायाम् (५।७।६।६)।

प्रजापतिरग्निमचिनुतर्तुभिः संवत्सरं वसन्तेनैवाऽस्य पूर्वार्धमचिनुत ग्रीष्मेण दक्षिणं पक्षं वर्षाभिः पुच्छं शरदोत्तरं पक्षं हेमन्तेन मध्यम्॥ इति च

–तत्रैव (५।६।१०।१)।

वसन्तमृतूनां प्रीणामि स मा प्रीतः प्रीणातु, ग्रीष्ममृतूनां प्रीणामि स मा प्रीतः प्रीणातु, वर्षा ऋतूनां प्रीणामि ता मा प्रीताः प्रीणन्तु, शरदमृतूनां प्रीणामि सा मा प्रीता प्रीणातु, हेमन्तशिशिरावृतूनां प्रीणामि तौ मा प्रीतौ प्रीणीताम्। इति च

–तत्रैव (१।६।२।३, द्र.१।६।११।४-५)।

समिधो यजति वसन्तमेवर्तूनामवरुन्धे तनूनपातं यजति ग्रीष्ममेवाऽवरुन्धे, इडो यजति वर्षा एवाऽवरुन्धे बर्हिर् यजति शरदमेवाऽवरुन्धे स्वाहाकारं यजति हेमन्तमेवाऽवरुन्धे। इति च

–तत्रैव (२।६।१।१)।

स रसमह वसन्ताय प्रायच्छद् यवं ग्रीष्मायौषधीर् वर्षाभ्यो व्रीहीञ् छरदे माषतिलौ हेमन्त-शिशिराभ्याम्। इति च

–तत्रैव (७।२।१०।१-२)।

पिशङ्गास् त्रयो वासन्ताः सारङ्गास् त्रयो ग्रैष्माः पृशन्तस् त्रयो वार्षिकाः पृश्नयस् त्रयः शारदाः पृश्निसक्थास् त्रयो हैमन्तिका अवलिप्तास् त्रयः शैशिराः संवत्सराय विवक्षसः। इति च

–तत्रैव (५।६।२३।१)।

तस्या आहुत्या वसन्तोऽजायत ग्रीष्मोऽजायत वर्षा अजायन्त शरदजायत हेमन्तोऽजायत, ... ततश् शिशिरमजायत तस्मात् तत् क्रूरतमम्। इति

–काठकसंहितायाम् (६।२), कपिष्ठलकठसंहितायाम् (४।१) च,
द्र.- मैत्रायणीयसंहितायां च (१।८।२)।

वसन्तो वा इमाः प्रजा ग्रीष्मायोपरुणद्धि ग्रीष्मो वर्षाभ्यो वर्षाश् शरदे शरद् धेमन्ताय हेमन्तः शिशिराय। इति

–काठकसंहितायाम् (८।६), कपिष्ठलकठसंहितायां च (७।२)।

वसन्तो ग्रीष्मो मधुमन्ति वर्षाः शरद् धेमन्तः सुविते दधात। इति

–काठकसंहितायाम् (१३।१५)।

संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोस्युद्वत्सरोऽसि वत्सरोऽसि। तस्य ते वसन्तः शिरो ग्रीष्मो दक्षिणं पक्षं वर्षा उत्तरं शरत् पुच्छम्। हेमन्तो मध्यं शिशिरः प्रतिष्ठानं तस्य ते मासाश् चार्धमासाश् च ऋतवः परिवत्सरः। इति

–मैत्रायणीयसंहितायाम् (४।९।१८), द्र.- तैत्तिरीयब्राह्मणे (३।१०।४।१),
तैत्तिरीयारण्यके च (४।१९।१)।

धूम्रान् वसन्तायाऽऽलभते श्वेतान् ग्रीष्माय कृष्णान् वर्षाभ्योऽरुणाञ् छरदे पृषतो हेमन्ताय पिशङ्गाञ् छिशिराय। इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्रसंहितायाम् (२४।११)।

वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान् वर्षाभ्यस् तित्तिरीञ् छरदे वर्त्तिका हेमन्ताय ककराञ् छिशिराय विककरान्। इति च

–तत्रैव (२४।२०)।

वसन्त इन् नु रन्त्यो ग्रीष्म इन् नु रन्त्यः।
वर्षाण्यनु शरदो हेमन्तः शिशिर इन् नु रन्त्यः॥ इति

–कौथुम-सामवेदार्चिकसंहितायाम् आरण्यपर्वणि (४।२)।

ब्रह्मवादिनो वदन्ति प्र चातुर्मास्ययाजी मीयता ३ न प्रमीयता ३ इति जीवन् वा एष ऋतूनप्येति। यदि वसन्ता प्रमीयते वसन्तो भवति। यदि ग्रीष्मे ग्रीष्मः। यदि

वर्षासु वर्षाः। यदि शरदि शरत्। यदि हेमन् हेमन्तः। ऋतुर् भूत्वा संवत्सर-मप्येति। संवत्सरः प्रजापतिः प्रजापतिर् वावैषः। इति

–आत्रेय-तैत्तिरीयकृष्णयजुर्वेदब्राह्मणे (१।४।१०।११)।

संवत्सरो वा अग्निर् नाचिकेतः। तस्य वसन्तः शिरः, ग्रीष्मो दक्षिणः पक्षः, वर्षाः पुच्छम्, शरदुत्तरः पक्षः, हेमन्तो मध्यम्। इति च

–तत्रैव (३।११।१०।४)।

वसन्तो ग्रीष्मो वर्षास् ते देवा ऋतवः शरद् धेमन्तः शिशिरस् ते पितरः। इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणे (२।१।३।१)।

आदित्यस्त्वेव सर्व ऋतवो यदैवोदेत्यथ वसन्तो यदा सङ्गवोऽथ ग्रीष्मो यदा मध्यन्दिनोऽथ वर्षा यदाऽपराह्णोऽथ शरद् यदैवास्तमेत्यथ हेमन्तः। इति च

–तत्रैव (२।२।३।९)।

तद् वसन्तो ग्रीष्मो वर्षा एते ते ये व्यजयन्त शरद् धेमन्तः शिशिरस् त उ ते यान् पुनः समैरयन्त। इति च

–तत्रैव (२।६।१।२)।

शाट्यायनिरु ह स्माह संवत्सर एवाऽग्निस् तस्य वसन्तः शिरो ग्रीष्मो दक्षिणः पक्षो वर्षा उत्तरः शरदृतुर् मध्यमात्मा हेमन्तशिशिरावृतू। इति च

–तत्रैव (१०।४।५।२)।

संवत्सरो यजमानस् तमृतवो याजयन्ति वसन्त आग्नीध्रस् तस्माद् वसन्ते दावाश् चरन्ति तद् ध्यग्निरूपम्, ग्रीष्मोऽध्वर्युस् तप्त इव वै ग्रीष्मस् तप्त-मिवाध्वर्युर् निष्क्रामति, वर्षा उद्गाता तस्माद् यदा बलवद् वर्षति साम्न इवोपब्दिः क्रियते, शरद् ब्रह्मा तस्माद् यदा सस्यम् पच्यते ब्रह्मण्वत्यः प्रजा इत्याहुर् हेमन्तो होता तस्माद् धेमन् वषट्कृताः पशवः सीदन्ति। इति च

–तत्रैव (११।२।७।३२)।

अथोत्तरं संवत्सरमृतुपशुभिर् यजते षड्भिराग्नेयैर् वसन्ते षड्भिरैन्द्रैर् ग्रीष्मे षड्भिः पार्जन्यैर् वा मारुतैर् वा वर्षासु षड्भिर् मैत्रावरुणैः शरदि षड्भिरैन्द्रा-वैष्णवैर् हेमन्ते षड्भिरैन्द्राबार्हस्पत्यैः शिशिरे। इति च

–तत्रैव (१३।५।४।२८)।

तस्याऽयमेव लोकः प्रथममहोऽयमस्य लोको वसन्त ऋतुः, यदूर्ध्वमस्माल् लोकादर्वाचीनमन्तरिक्षात् तद् द्वितीयमहस् तद्वस्य ग्रीष्म ऋतुः, अन्तरिक्षमेवा-ऽस्य मध्यममहरन्तरिक्षमस्य वर्षाशरदावृतू, यदूर्ध्वमन्तरिक्षादर्वाचीनन् दिवस्

तच् चतुर्थमहस् तद्वस्य हेमन्त ऋतुः, द्यौरेवाऽस्य पञ्चममहर् द्यौरस्य शिशिर ऋतुरित्यधिदेवतम्। इति च

–तत्रैव (१३।६।१।११)।

संवत्सरो वै व्रतं तस्य वसन्त ऋतुर् मुखं ग्रीष्मश् च वर्षाश् च पक्षौ शरन् मध्यं हेमन्तः पुच्छम्। इति

–ताण्डि-कौथुम-राणायनीयसामवेदाध्यायिनां पञ्चविंशे ब्राह्मणे (२१।१५।२)।

तस्य ह वा एतस्य संवत्सरस्य साम्नो वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत् प्रतीहारो हेमन्तो निधनम्। इति

–तेषामेव षड्विंशे ब्राह्मणे (३।४।२३)।

द्वया ह वै पूर्व ऋतव आसुः प्राणर्तवो देवर्तवः। **अथेम एतर्ह्यृतव एव। प्राण एव वसन्त आस। वाग् ग्रीष्मः।** चक्षुर् वर्षाः, आर्द्रमिवैव **चक्षुरार्द्रा इव वर्षाः। श्रोत्रं शरत्। मनो हेमन्तः।** या इमा पुरुष आपः स शिशिरः। **अथ देवर्तवः। वायुरेव वसन्त आस। अग्निर् ग्रीष्मः।** पर्जन्यो वर्षाः। आदित्यश् **शरत्। चन्द्रमा हेमन्तः।** या अमूर् दिव्या आपस् स शिशिरः। स यस् स प्राणो **वसन्त आस यो वायुर् वसन्तस् सोऽयमेतर्हि वसन्तः।** इत्यादि

–जैमिनीयसामवेदब्राह्मणे (२।५१)।

एतावदेव न, संवत्सरस्य ऋतूनां मध्ये वसन्त ऋतुरेव प्रथम इत्येवंप्रकारेण वसन्तस्यर्तोः प्राथम्यस्य प्रतिपादकानि श्रुति-वाक्यानि अपि दृश्यन्ते। तथाहि–

मुखं वा एतदृतूनां यद् वसन्तः। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदशाखाब्राह्मणे (१।१।२।६-७)।

साऽऽरागवस्त्रैर् जर-दक्षो वसन्तो वसुभिः सह।
संवत्सरस्य सवितुः प्रैषकृत् प्रथमः स्मृतः॥ इति च

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदशाखाऽऽरण्यके (१।३।२)।

सोऽकामयत यज्ञं सृजेयेति तस्मात् त्रिवृत् स्तोमानां मुखम्, गायत्री छन्दसाम्, अग्निर् देवानाम्, ब्राह्मणो मनुष्याणाम्, वसन्त ऋतूनाम्। इति

–ताण्डि-कौथुम-राणायनीयसामवेदाध्यायिनां पञ्चविंशे ब्राह्मणे (६।१।६)।

संवत्सरो वै व्रतं तस्य वसन्त ऋतुर् मुखम्। इति च

–तत्रैव (२१।१५।२)।

वसन्तो वै प्रथम ऋतूनां ग्रीष्मो द्वितीयो वर्षास् तृतीयाश् शरच् चतुर्थी हेमन्तः पञ्चमश् शिशिरष् षष्ठः। इति

–जैमिनीयसामवेदब्राह्मणे (२।३५६)।

अत्रोच्यते। एतस्य विषयस्य सम्यग् विचारं कृत्वैव लगधमुनिना शिशिरादि वर्षं प्रतिपादितमस्ति। तस्य स्पष्टीकरणं च वेदाङ्ग-ज्योतिषग्रन्थभाष्यकारेण सोमाकरेण कृतमेवाऽस्ति। तथाहि **"ननु यद्येवं कथमृतूनां वसन्तो जायते आद्यस् तत्पूर्वाः सर्वाः श्रुतय इति। उच्यते। तास् तु वर्णानां क्रमानुष्ठानाभिधायकत्वेन प्रवृत्ताः"** इत्यादि (श्लो.६)। एतेनैतदुक्तं भवति ब्राह्मणादीनामग्न्याधानादीनि कृत्यानि वसन्तादिषु ऋतुषु विहितानि इति, अग्निष्टोमादिसोमयागा-ऽश्वमेधयाग-गवामयनसत्रादीनि कर्माणि च वसन्तर्तावेव प्रारभ्यन्त इति च सावनवर्षाभिप्रायेण श्रुतिषु वसन्त ऋतुः प्रथममुपात्तो न प्रकृतिसम्मत-सौरचान्द्रवर्षाभिप्रायेणेति श्रुति-स्मृत्यविरुद्धतयैव प्रकृतिसम्मत-सौरचान्द्रवर्षाभिप्रायेणैव च लगधमुनिना शिशिरादि वर्षं प्रतिपादितं बोध्यमिति।

तत्र ब्राह्मणादीनां वसन्तादिषु अग्न्याधानादीनां विधायकानि श्रुति-स्मृति-वचनानि यथा—

वसन्ता ब्राह्मणेनाधेयो वसन्तो वै ब्राह्मणस्यर्तुस् स्व एवैनमृता आधत्ते तेजो ब्रह्मवर्चसमुपाधत्ते ग्रीष्मे राजन्येनाधेयो ग्रीष्मो वै राजन्यस्यर्तुस् स्व एवैनमृता आधत्त ओजो वीर्यमुपाधत्ते शरदि वैश्येनाधेयश् शरद् वै वैश्यस्यर्तुस् स्व एवैनमृता आधत्त ऊर्जं पशूनुपाधत्ते। इति

—काठककृष्णयजुर्वेदसंहितायाम् (८।१), कपिष्ठलकठकृष्णयजुर्वेदसंहितायां च (६।६)।

वसन्ता ब्राह्मणोऽग्निमादधीत, वसन्तो वै ब्राह्मणस्यर्तुः, स्व एवैनमृतावाधाय ब्रह्मवर्चसी भवति, मुखं वा एतदृतूनां यद् वसन्तः, यो वसन्ताग्निमाधत्ते मुख्य एव भवति। अथो योनिमन्तमेवैनं प्रजातमाधत्ते। ग्रीष्मे राजन्य आदधीत, ग्रीष्मो वै राजन्यस्यर्तुः, स्व एवैनमृतावाधायेन्द्रियावी भवति। शरदि वैश्य आदधीत। शरद् वै वैश्यस्यर्तुः, स्व एवैनमृतावाधाय पशुमान् भवति। इति

—आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदब्राह्मणे (१।१।२।६-८)।

ब्रह्मैव वसन्तः क्षत्रं ग्रीष्मो विडेव वर्षास् तस्माद् ब्राह्मणो वसन्त आदधीत ब्रह्म हि वसन्तः, तस्मात् क्षत्रियो ग्रीष्म आदधीत क्षत्रं हि ग्रीष्मः, तस्माद् वैश्यो वर्षास्वादधीत विड् ढि वर्षाः। इति

—माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणे (२।१।३।५)।

तदाहुः कस्मिन्नृतावभ्यारम्भ इति ग्रीष्मेऽभ्यारभेतेत्यु हैक आहुर् ग्रीष्मो वै क्षत्रियस्यर्तुः क्षत्रिययज्ञ उ वा एष यदश्वमेध इति। तद् वै वसन्त एवाभ्यारभेत वसन्तो वै ब्राह्मणस्यर्तुर् य उ वै कश्च यजते ब्राह्मणीभूयैव यजते तस्माद् वसन्त एवाऽभ्यारभेत। इति च

—तत्रैव (१३।४।१।२-३)।

तैषस्याऽमावास्याया एकाह उपरिष्टाद् दीक्षेरन् माघस्य वेत्याहुस् तदुभयं व्युदितं तैषस्य त्वेवोदिततरमिव त एतं त्रयोदशमधिचरं मासमाप्नुवन्ति, एतावान् वै संवत्सरो यदेष त्रयोदशो मासस् तदत्रैव सर्वः संवत्सर आप्तो भवति। इत्यादि

–शाङ्खायनीयऋग्वेदशाखाब्राह्मणे (१९।२)।

तद् वै न तस्मिन् काले दीक्षेरन्ननागतं सस्यं भवति दहरकाण्यहानि भवन्ति संवेपमाना अवभृथमुदायन्ति तस्मादत्र न दीक्षेरँश् चैत्रस्याऽमावास्याया एकाह उपरिष्टाद् दीक्षेरन्नागतं सस्यं भवति महान्यहानि भवन्त्यसंवेपमाना अवभृथा-दुदायन्ति तस्मादेतत् स्थितम्। इति च

–तत्रैव (१९।३)।

संवत्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्नेषा वै संवत्सरस्य पत्नी यदेका-ष्टकैतस्यां वा एष एतां रात्रिं वसति साक्षादेव संवत्सरमारभ्य दीक्षन्ते, आर्तं वा एते संवत्सरस्याऽभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतो व्यस्तं वा एते संवत्सरस्याऽभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतः। फल्गुनीपूर्णमासे दीक्षेरन् मुखं वा एतत् संवत्सरस्य यत् फल्गुनीपूर्ण-मासो मुखत एव संवत्सरमारभ्य दीक्षन्ते, तस्यैकैव निर्या यत् साम्मेघ्ये विषूवान् सम्पद्यते। चित्रापूर्णमासे दीक्षेरन् मुखं वा एतत् संवत्सरस्य यच् चित्रापूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते, तस्य न काचन निर्या भवति, चतुरहे पुरस्तात् पौर्णमास्यै दीक्षेरन्, तेषामेकाष्टकायां क्रयः सम्पद्यते तेनैकाष्टकां न छम्बट् कुर्वन्ति, तेषां पूर्वपक्षे सुत्या सम्पद्यते पूर्वपक्षं मासा अभिसम्पद्यन्ते ते पूर्वपक्षे उत्तिष्ठन्ति, तानुत्तिष्ठत ओषधयो वनस्पतयोऽनूत्तिष्ठन्ति, तान् कल्याणी कीर्ति-रनूत्तिष्ठति, अरात्सुरिमे यजमाना इति तदनु सर्वे राध्नुवन्ति। इति

–तैत्तिरीयसंहितायाम् (७।४।८।१-३), द्र.- ताण्डिब्राह्मणे च (५।९।१-१४)।

यैवाऽसौ फाल्गुनस्याऽमावास्या तस्या उपरिष्टात् पञ्चाह-षडहे दीक्षेरन्। इति

–जैमिनीयब्राह्मणे (२।३७३)।

वसन्ते पर्वणि ब्राह्मण आदधीत ग्रीष्म-वर्षा-शरत्सु क्षत्रियवैश्योपक्रुष्टाः। इति

–आश्वलायनश्रौतसूत्रे (२।१।१२,१३)।

अथात ऋतूनामेव मीमांसा, वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्यः शरदि वैश्यः, वर्षासु रथकारः इति। इति

–बौधायनश्रौतसूत्रे (२।१२)।

वसन्तो ब्राह्मणस्य, ग्रीष्मो राजन्यस्य हेमन्तो वा, शरद् वैश्यस्य, वर्षा रथकारस्य। इति

–आपस्तम्बश्रौतसूत्रे (५।१।३।१८)।

वसन्तेवसन्ते ज्योतिष्टोमेन यजेत, तस्य तिस्रो दक्षिणा इति च्छन्दोगब्राह्मणं भवति। इति च

–तत्रैव (१०।१।१९)।

राजयज्ञोऽश्वमेधः सर्वकामस्य, अष्टम्यां नवम्यां वा फाल्गुनीशुक्लस्य। इति

–कात्यायनश्रौतसूत्रे (२०।१।१,२)।

गवामयनायैकाष्टकायां दीक्षा, फल्गुनीपौर्णमासे, चैत्र्याम्, चतुरहे वा पुरस्तात् प्राक् पौर्णमास्याः। इति च

–तत्रैव (१३।१।२-५)।

सप्तदश गवामयनस्य दीक्षाः, द्वादश वा, तैषस्याऽमावास्याया एकाह उरिष्टाद् दीक्षेरन् माघस्य वा, तेषां माघस्याऽमावास्यायामुवसथः फाल्गुनस्य वा। द्वादश दीक्षाः कुर्वाणाश् चतुरहे पुरस्तात् पौर्णमास्या दीक्षेरन्। इति

–शाङ्खायनश्रौतसूत्रे (१३।१९।१-४)।

एवं च **"मुखं वा एतत् संवत्सरस्य यत् फल्गुनीपूर्णमासः"** इति **"मुखं वा एतत् संवत्सरस्य यच् चित्रापूर्णमासः"** इति च तैत्तिरीयसंहितायां सहैव (७।४।८।२) श्रूयमाणत्वाद् भक्तिवादमात्रं तदिति सुखेन बोद्धुं शक्यम्। तत्रैव **"एकाष्टकायां दीक्षेरन्नेषा वै संवत्सरस्य पत्नी यदेकाष्टका, एतस्यां वा एष एतां रात्रिं वसति साक्षादेव संवत्सरमारभ्य दीक्षन्ते"** इति च (७।४।८।१) श्रूयमाणत्वेन एकाष्टकायामेव संवत्सरारम्भस्याऽऽश्रितत्वस्य प्रतीयमानत्वाच् च "मुखं वा एतत् संवत्सरस्य" इत्यादिकं वचनं भक्तिवादमात्रमित्यवसातुं सुखेन शक्यम्। एवं चाऽत्र **"बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति"** इति यास्कवचनस्य (७।१) गौरवं सम्यगाकलनीयं विचारकैः। एतेन "संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोऽस्युद्वत्सरोऽसि वत्सरोऽसि। तस्य ते वसन्तः शिरो ग्रीष्मो दक्षिणं पक्षम्" इत्यादिकं मैत्रायणीयसंहितावचनम् (४।९।१८), अन्यच्चापि तादृशं वचनजातमपि व्याख्यातम्, तत्र मैत्रायणीयसंहितायां शरदः पुच्छत्वस्य (मै.४।९।१८) तैत्तिरीयब्राह्मणे (३।१०।४।१) तैत्तिरीयाऽऽरण्यके (४।१९।१) च वर्षाणां पुच्छत्वस्य, शतपथब्राह्मणे (१०।४।५।२) कस्मिन्नपि ऋतौ पुच्छत्वभावनाया अभावस्य, पञ्चविंशब्राह्मणे (२१।५।२) हेमन्तस्य पुच्छत्वस्य च दर्शनात्, वसन्तादेः शिरस्त्वादिकस्य भावनामात्रात्मकत्वस्याऽवगम्यमानत्वात्। माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणे **"तस्मादृतवः सर्वे प्रथमाः सर्वे मध्यमाः सर्व उत्तमाः"** (१२।८।२।३५) इत्यप्युक्तमस्तीति च स्मरणीयम्। एतच्च

सावनसंवत्सराभिप्रायेणेति श्लिष्टतरमवगन्तव्यम्। एवं च सावनसंवत्सरस्य वसन्तर्तौ प्रारम्भे स्वीकृतेऽपि प्रकृतिसम्मतसौरचान्द्रसंवत्सरस्य शिशिरर्तावेव प्रारम्भः समुपपन्नतम इति लगधमुनिना शिशिरादिकं प्रकृतिसम्मतं यज्ञार्थायनर्तुमासपक्षनिर्णयाऽधारभूतं सौरचान्द्रवर्षं प्रतिपादितं बोध्यम्।

२०. शिशिरर्तौ नववर्षारम्भस्य युक्ततमत्वम्

प्रकृतिसम्मतस्य सौरचान्द्रवर्षस्य शिशिरर्तौ प्रारम्भस्य समुपपन्नतमत्वं चैवमाकलनीयम्। यद्यपि संवत्सरात्मके सौरर्तुचक्रे किं प्रारम्भस्थानमिति स्वीकर्तव्यमिति सहसा निर्णेतुं न शक्यते तथाऽपि अयनारम्भस्थाने विषुवस्थाने वा प्रारम्भस्थानतया विचारणीये दृश्येते। तत्र वासन्तविषुवस्थानस्य शारदविषुवस्थानस्य वाऽपि प्रारम्भस्थानत्वे स्वीकृते वर्षस्य अयनस्य ऋतोर् मासस्य चैव समानकाले प्रारम्भः स्वीकर्तुमुचितो न भवति, केवलं वर्षस्य मासस्य चैव समानकाले प्रारम्भः स्वीकर्तुमुचितो भवति, अयनस्य ऋतोश् चान्यस्मिन्नेव काले प्रारम्भस्य स्वीकर्तव्यत्वात्। उदगयनारम्भस्थानस्य दक्षिणायनारम्भस्थानस्य वाऽपि प्रारम्भस्थानत्वे स्वीकृते तु वर्षस्य अयनस्य ऋतोर् मासस्य च समानकाले प्रारम्भः स्वीकर्तुं शक्यते। तथापि उदगयनस्य दिव्याहोरूपत्वाद् अहोरात्रस्य चाऽहःपूर्वकत्वस्य श्रुति-स्मृति-पुराणोक्तत्वाच्च उदगयनारम्भस्थानस्यैव प्रारम्भस्थानतायाः स्वीकारस्य समुपपन्नतमत्वं बोध्यम्। एवं च पूर्ण-सौरर्तु-चक्ररूपस्य शुद्धसौरवर्षस्य सूर्यस्य उदङ्मुखीभावस्य शङ्कुच्छायादिवेद्ये दृक्सिद्धे वास्तविके आरम्भे एव प्रारम्भो भवतीति ज्ञायते। तथापि वैदिकस्य प्रकृतिसम्मतस्य यज्ञार्थायनर्तुमासपक्षनिर्णयाऽधारभूतस्य वर्षस्य तु सौरचान्द्रत्वात् सूर्यस्य उक्तविधस्य उदङ्मुखीभावस्य पूर्वतः स्थितायाम् आसन्नायां शुक्लपक्षप्रतिपदि प्रायेण वर्षारम्भो भवति, अधिकमासयुते वर्षे तु कदाचित् सूर्यस्य उक्तविधस्य उदङ्मुखीभावस्य परतः स्थितायामासन्नायां शुक्लपक्षप्रतिपद्यपि वर्षारम्भो भवति। एतच् च लगधमुनिवचनादेव यथा सिद्धं भवति तथा लगधमुनिवचनस्य (श्लो.५, ६) व्याख्यानं करिष्यते। तत् तत्रैव द्रष्टव्यम्। वैदिकानामृतूनां सौरचान्द्रत्वाद् अयनमपि सौरचान्द्रमेव, वर्षमपि सौरचान्द्रमेव, युगमपि सौरचान्द्रमेव, वैदिकानां मासोऽपि सौरचान्द्र एव, पक्षोऽपि सौरचान्द्र एव, तिथिरपि सौरचान्द्र एव। एतच् च सर्वं यथास्थानं प्रतिपादयिष्यामः।

२१. प्रचलित-नववर्षारम्भसिद्धान्तस्याऽवैदिकत्वमनौचित्यं च

अथाऽत्र प्रचलिताधुनिकनववत्सरारम्भसिद्धान्तमुल्लिख्य तस्य श्रुति-स्मृति-पुराणवचनविरोधात्, विधिप्रयुक्ताध्ययनेऽधीयमानस्य वेदाङ्गज्योतिषग्रन्थस्य

विरोधात्, अयनारम्भवर्षारम्भसहभावाऽभावात्, दिव्यकालमानेन सहाऽसामञ्जस्यात्, वैदिकमन्त्रवर्णोक्तर्तुविरोधात्, अवैदिकमेषादिराशिसापेक्षपरिभाषाप्रतिपादितत्वात्, मासमध्यात् नववर्षारम्भस्य स्वीकारस्याऽत्यन्तमेवाऽनौचित्याच् चाऽवैदिकत्व-मनौचित्यं चेत्यधः स्पष्टीक्रियते।

आधुनिकः प्रचलितश्चैत्रशुक्लप्रतिपदि नव-वत्सरस्याऽऽरम्भ इति सिद्धान्तः खलु यावनाद्यवैदिकज्योतिषप्रभावपतितैर् मगब्राह्मणत्वेन शकशासकादि-शासक-चित्तानुसरणपरायणत्वेन च सम्भावितैर् आर्यभट-वराहमिहिर-ब्रह्मगुप्त-भास्करा-दिभिः प्रचारितो दृश्यते। तथाहि कलियुगवर्षाणां त्रिषु सहस्रेषु षट्सु शतेषु च व्यतीतेषु त्रयोविंशतिवर्षात्मके वयसि वर्तमानत्वेनोक्तेन आर्यभटेनोक्तम्—

युग-वर्ष-मास-दिवसाः समं प्रवृत्तास् तु चैत्रशुक्लादेः।
कालोऽयमनाद्यन्तो ग्रहभैरनुमीयते क्षेत्रे॥ इति

—आर्यभटीये कालक्रियापादे (श्लो.११)।

अन्यैश् चोक्तम्—

सप्ताश्विववेदसङ्ख्यं (४२७) शककालमपास्य चैत्रशुक्लादौ।
अर्धास्तमिते भानौ यवनपुरे सोमदिवसाद्ये॥ इति

—वराहमिहिरकृतायां पञ्चसिद्धान्तिकायां करणावताराख्ये प्रथमाध्याये रोमकसिद्धान्ते (श्लो.८)।

चैत्रसितादेरुदयाद् भानोर् दिनमासवर्षयुगकल्पाः।
सृष्ट्यादौ लङ्कायां समं प्रवृत्ता दिनेऽर्कस्य॥ इति

—ब्रह्मगुप्तेन ५५० शकाब्देषु गतेषु रचिते ब्राह्मस्फुटसिद्धान्ते (१।४)।

लङ्कानगर्यामुदयाच् च भानोस् तस्यैव वारे प्रथमं बभूव।
मधोः सितादेर् दिन-मास-वर्ष-युगादिकानां युगपत् प्रवृत्तिः॥ इति

—भास्करेण १०७२ शकाब्देषु गतेषु रचिते सिद्धान्त-शिरोमणौ ग्रहगणिताध्याये (१।१।१५)।

द्विराशिनाथा ऋतवस् ततोऽपि शिशिरादयः।
मेषादयो द्वादशैते मासास् तैरेव वत्सरः॥ इति

—प्रचलिते नवीनत्वेन सुधाकरद्विवेदादिभिरपि स्वीकृते सूर्यसिद्धान्ते मानाध्याये (श्लो.१०)।

उक्तो मधुशुक्लादिवत्सरसिद्धान्तो मेषादिवत्सरसिद्धान्तश्च "सूर्यो योनिर् वै कालस्य तस्यैतद् रूपं यन् निमेषादिकालात् सम्भृतं द्वादशात्मकं वत्सरम्, एतस्या-ऽऽग्नेयमर्धम् अर्धं वारुणम्, मघाद्यं श्रविष्ठार्धमाग्नेयं क्रमेण उत्क्रमेण सार्पाद्यं श्रवि-

ष्ठार्धान्तं सौम्यम्" इति मैत्रायणीयारण्यकश्रुतिवचनेन (६।१४), त्रिपाद्विभूतिमहानारायणोपनिषत्-तृतीयाध्याये स्थितेन "अयनद्वयं वत्सरो भवति" इति वचनेन च प्रतिपादितस्याऽयनद्वयनिष्पन्नवत्सरसिद्धान्तस्य विरुद्ध एवेति वैदिकानां कृतेऽनादरणीय एव। पूर्णाऽयनद्वयनिष्पाद्यवत्सरसिद्धान्तश् चोदगयन-दक्षिणायनविभागप्रदर्शकैः श्रुतिवचनैः, गवामयनादिसंवत्सरसत्ररूपयज्ञप्रक्रियया, अयनमुखेऽयनमुखे संवत्सरे-संवत्सरे वाऽपि चोदितेन निरूढपशुबन्धयागेन च सूचित एवेति च न विस्मरणीयम्। अयनद्वयविभागप्रदर्शकानि श्रुतिस्मृत्यादिवचनानि अयननिरूपणे अष्टादशे प्रकरणे दृश्यानि। मधुशुक्लादिवत्सरसिद्धान्तो मेषादिवत्सरसिद्धान्तश् च "दैवे रात्र्यहनी वर्षं प्रविभागस् तयोः पुनः। अहस् तत्रोदगयनं रात्रिः स्याद् दक्षिणायनम्" इति मनुस्मृतिवचनस्य च (१।६७) विरुद्ध एव। एवमेव कूर्मपुराणस्य (१।५।६), मार्कण्डेयपुराणस्य (४३।२५), विष्णुपुराणस्य च (१।३।१०) "वर्षं द्वेऽयने दक्षिणोत्तरे" इति वचनस्य, नारदीयपुराणस्य (१।५,२५) "तद्द्वयेन भवेदब्दः" इति वचनस्य, पद्मपुराणे सृष्टिखण्डे (३।६) स्थितस्य "वर्षमयने दक्षिणोत्तरे" इति वचनस्य, ब्रह्माण्डपुराणे पूर्वभागे (२९।१३), मत्स्यपुराणे (१४२।१०) वायुपुराणे (१।५७।१३) च स्थितस्य "दिव्ये रात्र्यहनी वर्षम्" इति वचनस्य, वायुपुराणस्य (१।५०।१७७) "द्वेऽयने वर्षमुच्यते" इति वचनस्य, ब्रह्मवैवर्तपुराणे कृष्णजन्मखण्डे (९६।६२) स्थितस्य "अब्दस् तु चायने द्वे वै चोत्तरे दक्षिणायने" इति वचनस्य, विष्णुपुराणस्य (२।८।७०) "द्वेऽयने वर्षसंज्ञिते" इति वचनस्य, शिवपुराणस्य (७।१।८।७) "वर्षं द्वे चायने मतम्" इति वचनस्य, स्कन्दपुराणे वैष्णवखण्डे (१।३६।३१) स्थितस्य "वत्सरो भवेत्। अयनद्वितयाकारः" इति वचनस्य; आवन्त्यखण्डे (१।४८।११) वर्तमानस्य "अब्दं द्वे अयने स्मृतम्" इति वचनस्य, नागरखण्डे (१९४।१४, २७२।४) स्थितस्य "अयने द्वे तु वत्सरम्" इति वचनस्य, प्रभासखण्डे (१।१९।१२) स्थितस्य "वर्षं स्यादयनद्वये" इति वचनस्य, तत्रैव (१।१०५।३६) स्थितस्य "अब्दं स्यादयनद्वयात्" इति वचनस्य, स्कन्दपुराणसूतसंहितायां स्थितस्य (१।८।६) "द्वेऽयने वर्षम्" इति वचनस्य चोक्तः सिद्धान्तो विरुद्ध एव। तथैव महाभारतस्य शान्तिपर्वणि स्थितस्य (२३१।१४) "संवत्सरं द्वे त्वयने वदन्ति" इति वचनस्य, हरिवंशे (१।८।६) वर्तमानस्य "अब्दं द्व्ययनमुक्तं च" इति वचनस्य, कौटलीयार्थशास्त्रस्य (२।२०) "द्व्ययनः संवत्सरः" इति वचनस्य, सुश्रुतसंहितायाः (१।६।९) "अयने द्वे युगपत् संवत्सरः" इति वचनस्य, अमरकोशापरनामकस्य नामलिङ्गाऽनुशासनस्य (१।४।१०) "अयने द्वे गतिरुद्ग् दक्षिणाऽर्कस्य वत्सरः" इति वचनस्य, वैक्रमाब्दानां दशम्यां शताब्द्यां स्थितत्वेन सम्भावितेन राजशेखरेण रचितायाः काव्यमीमांसाया अष्टादशेऽध्याये स्थितस्य "द्व्ययनः संवत्सरः" इति वचनस्य चोक्तो मधुशुक्लादिवत्सरारम्भसिद्धान्तो मेषादिवत्सरारम्भसिद्धान्तश् च विरुद्ध एव।

राजशेखरस्य तत्रैव स्थितं "षण्णामृतूनां परिवर्तः संवत्सरः, स च चैत्रादिरिति दैवज्ञाः" इति वचनमपि चैत्रादिवत्सरसिद्धान्तः फलादेशपरकज्यौतिषिकाणामेव न तु यज्ञकालार्थसिद्ध्यर्थक-ज्योतिषाध्यायिनां वैदिकानामिति च ध्वनयत् प्रतीयते।

ननु धारेश्वर-लक्ष्मीधर-जीमूतवाहन-चण्डेश्वर-हेमाद्रि-माधव-कमलाकर-भट्टप्रभृतिभिर् धर्मशास्त्रनिबन्धकारैः प्राचीनैरर्वाचीनैश् च तिथिकृत्याद्यर्थं चैत्रादिः संवत्सरः स्वीकृतोऽवगम्यते, लक्ष्मीधरेण कृत्यकल्पतरौ नियतकालकाण्डनामके तृतीये काण्डे (तृतीये भागे, पृ.३७७) "चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि। शुक्लपक्षे समग्रं तु यदा सूर्योदये सति। ततः प्रभृति यो धर्मः पूर्वैः पूर्वतरैः कृतः। अद्यापि गूढः सुतरां कर्तव्योऽसौ प्रयत्नतः" इति वचनं लिखितं दृश्यते, चण्डेश्वरेणाऽपि गतानुगतिकतया लक्ष्मीधरमक्षरशोऽनुसरता गृहस्थरत्नाकर-कृत्यरत्नाकर-पूजारत्नाकर-दानरत्नाकर-शुद्धिरत्नाकर-व्यवहाररत्नाकर-विवादरत्नाकरनामकैः खण्डैर् युते स्मृतिरत्नाकरे कृत्यरत्नाकरखण्डे (पृ.१०३-१०८) एतद् वचनं लिखितं दृश्यते। चण्डेश्वरेण कृत्यरत्नाकरे (पृ.८१) लिखितमनुसरतेव हेमाद्रिणाऽपि व्रत-दान-तीर्थ-मोक्ष-परिशेषरूपखण्डपञ्चकात्मके चतुर्वर्गचिन्तामणौ प्रथमे व्रतखण्डे पञ्चमेऽध्याये (पृ.३६०) "चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि। शुक्लपक्षे समग्रं तु तदा सूर्योदये सति। प्रवर्तयामास तथा कालस्य गणनामपि। ग्रहान् नागानृतून् मासान् वत्सरान् वत्सराधिपान्" इत्यादिको संवत्सरारम्भविधिर् ब्रह्मपुराणोक्तत्वेनोल्लिखितो दृश्यते। चण्डेश्वरं हेमाद्रिं चानुसरतेव माधवेनाऽपि उपोद्घात-संवत्सर-प्रतिपद्-द्वितीयादि-प्रकीर्ण-नामक-प्रकरणपञ्चकात्मके कालमाधवनामके ग्रन्थे द्वितीये संवत्सरप्रकरणे "चान्द्रः संवत्सरश् चैत्रशुक्लप्रतिपदादिः फाल्गुनदर्शान्तः, सौरस् तु मेषादिर् मीनान्तः" इत्यादि लिखित्वा "अत एव ब्रह्मपुराणेऽभिहितं चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि" इत्यादि लिखितं विलोक्यते, लक्ष्मीधरादिगतानुगतिकतया कमलाकरभट्टेनाऽपि निर्णयसिन्धौ द्वितीयपरिच्छेदारम्भे "चैत्रे मासि" इत्यादिकः श्लोको लिखितो दृश्यते। एतादृश्यां स्थितौ कथं चैत्रशुक्लादिवत्सराम्भसिद्धान्तः पुराणविरुद्ध इत्युच्यते? इति के चिद् विवेकशिथिला जना जल्पेयुः। तत्रोच्यते। मन्त्र-ब्राह्मणग्रन्थोल्लिखितपुराणभिन्नानि वर्तमानकाले उपलभ्यमानानि ब्रह्मपुराणादीनि पुराणानि पौरुषेयग्रन्थत्वेन स्वीक्रियन्ते शिष्टैः। पौरुषेयग्रन्थ इति तादृशो ग्रन्थ उच्यते यो हि विषयस्य प्रमाणान्तरेण ज्ञानं कृत्वा तस्य विषयस्य प्रतिपादनाय पुरुषविशेषेण रचितः। यथा हि अपौरुषेयाणां मन्त्र-ब्राह्मणरूपाणां वेदानाम् अध्ययनं गुर्वध्ययन-पूर्वकं स्वीक्रियते पौरुषेयाणां पुराणानां तु तथाऽध्ययनं न स्वीक्रियते। अत एव एतेषां पुराणानां केवलं लिखितपुस्तकावलम्बनेनाऽपि अध्ययनं क्रियते। अत एव लेखकप्रमादादिना पुराणेष्वावापा उद्वापाश्च जाता अवगम्यन्ते। एतस्मिन् विषये

टिप्पणी मार्कण्डेयस्मृतावपि कृता दृश्यते। तत्र हि यथा वेदेषु वेदाङ्गेषु महास्मृतिषु च प्रक्षेपाऽभावो न तथाऽनुस्मृतिषु पुराणेषु च; अनुस्मृतिषु पुराणेषु च प्रक्षेपाशङ्काया जागरूकत्वादप्रामाण्यशङ्काकलङ्कोऽपि लगत्येवेत्युक्तम्। तथाहि—

पदस्य वर्णमात्रस्य वा वाक्यस्य स्वरस्य वा।
व्यत्यासो यत्रकुत्राऽपि भेदः प्रक्षेप एव वा॥
घटते नैव सुतरां वेदमात्रे शिवात्मके।
तत्रात्यन्तं जागरूकास् तत्तद्विशदकर्मणि॥
प्रस्तावचरणव्यूहलक्षणान्यखिलान्यपि।
किञ्च वेदाश् च सूत्राणि कल्पाः शाखाः समन्ततः॥
अध्यापनाध्ययनतः पदक्रममुखेन वै।
अतिस्पष्टाः सुप्रसिद्धाः प्राजापत्यादिसंज्ञया॥ इत्यादि
—मार्कण्डेयस्मृतौ, मनसुखरायमोरप्रकाशिते स्मृतिसन्दर्भे, षष्ठे भागे (पृ.६४)।।

तस्मादेतेषु सर्वेषु विद्याभेदेषु कृत्स्नशः।
उपदिष्टेषु विशयो नास्त्येव सुतरां खलु॥
नैवं स्मृतिषु सर्वासु पुराणेष्वखिलेषु वा।
तस्मात् तन्मध्यसम्प्राप्तप्रक्षिप्तग्रन्थविस्तरैः॥
तानि सर्वाण्यप्रामाण्यकलङ्कितशरीरतः।
आचारसंशयेष्वत्र सम्यक् स्युर् न विधायकाः॥ इति च
—तत्रैव, (पृ.६६)।

१२२६तमे वैक्रमेऽब्दे रचिते दानसागरनामके धर्मशास्त्रनिबन्धे बङ्गदेशस्य शासकेन वल्लालसेनेनाऽपि पुराणेषु प्रक्षेपाणां दूषणानां प्रवेशस्य चर्चा कृता दृश्यते। तथाहि—

प्रचरद्रूपतः स्कन्दपुराणैकांशतोऽधिकम्।
यत् खण्डत्रितयं पौण्ड्र-रेवा-ऽवन्तिकथाश्रयम्॥
तार्क्ष्यं पुराणमपरं ब्राह्ममाग्नेयमेव च।
त्रयोविंशतिसाहस्रं पुराणमपि वैष्णवम्॥
षट्सहस्रमितं लैङ्गं पुराणमपरं तथा।
दीक्षा-प्रतिष्ठा-पाषण्डयुक्ति-रत्नपरीक्षणैः॥
मृषावंशानुचरितैः कोषव्याकरणादिभिः।
असङ्गतकथाबन्ध-परस्परविरोधतः॥

तन् मीनकेतनादीनां भण्डपाषण्डलिङ्गिनाम्।
लोकवञ्चनमालोक्य सर्वमेवाऽवधीरितम्॥ इति

–दानसागरे, उपक्रमणिकाभागे (श्लो.६२-६६)।

वैक्रमाब्दानां त्रयोदशे शतके रचिते जगन्मोहन-नामके ज्योतिषग्रन्थे लक्ष्मणाचार्येणाऽप्युक्तं हि–

पुराणवचनेषु पद्मपुराणादिकतिपयपुराणेषु कृत्रिमवचनानि बहूनि दृश्यन्ते। इति

–जगन्मोहने तिथिफलाध्याये (प्रथमे भागे, पृ.२०७)।

काश्यां १६६८तमे वैक्रमेऽब्दे निर्णयसिन्धुं पूर्णं कृतवता कमलाकरभट्टेनाऽप्युक्तम्–

यत् तु बृहन्नारदीये 'अनग्निर् दूरभार्यश् च... इति' तद् वृद्धानादरादुपेक्ष्यम्। इति

–निर्णयसिन्धौ श्राद्धे पाणिहोमस्य निरूपणस्य प्रकरणे (पृ.३१३)।

वैक्रमाब्दानां सप्तदशे शतके मित्रमिश्रेणाऽप्युक्तम्–

पुराणानामव्यवस्थितत्वात्। इति

–वीरमित्रोदये संस्कारप्रकाशे (पृ.६५५)।

हरिहरानन्द-करपात्रेणाऽप्युक्तम्–

व्यासोक्तपुराणानां श्रुतिस्मृत्यनुसारेणैव व्यवस्था युक्ता। इति

–चातुर्वर्ण्यसंस्कृतिविमर्शे द्वितीयभागे (पृ.९५)।

एवं च केवलेषु वेद-वेदाङ्गाऽननुकूलेषु पुराणपाठेषु न समाश्वास इति, इदानीमुपलभ्यमाने वेङ्कटेश्वरमुद्रणालयमुद्रिते ब्रह्मपुराणे "चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि" इत्यादिकं वचनं नोपलभ्यते इति च तद् वचनं रोमकसिद्धान्त-पौलिशसिद्धान्ता-ऽऽर्यभटसिद्धान्त-ब्रह्मगुप्तसिद्धान्तादिज्योतिषसिद्धान्तविशेषप्रभाव-पतितेन केन चित् पुरुषेण ब्रह्मपुराणस्य कस्मिँश् चित् पुस्तके प्रक्षिप्तं तदेव लक्ष्मीधरेण लिखितम्, तत्प्रत्ययनेयैश् चण्डेश्वर-हेमाद्रि-माधवादिभिरपि गतानुगतिकतयाऽविवेकेन लिखितमवगम्यते। न च वर्तमानकाले उपलभ्यमाने ब्रह्मपुराण-पुस्तकेऽनुपलभ्यमानं तद् वचनं पुराकाले ब्रह्मपुराणे वर्तमानमपि अर्वाचीने काले केनाऽपि ब्रह्मपुराणान् निरस्तम्, तादृशनिरासयुतं पुस्तकमेवादाय वेङ्कटेश्वर-मुद्रणालयेन ब्रह्मपुराणं मुद्रितमिति किमिति न स्वीकर्तव्यमिति वक्तव्यम्, तस्य वचनस्य वेदाङ्गमहास्मृतिविरुद्धत्वेन वेदोपबृंहकपुराणे समावेशस्याऽनौचित्यात् तस्य वचनस्य प्रक्षिप्तत्वस्यैवाऽऽश्रयणीयत्वात्। वेदाङ्गज्योतिषग्रन्थे माघशुक्ल-

प्रतिपदि नववत्सरारम्भस्य प्रतिपादितत्वात् "चैत्रे मासि जगद् ब्रह्मा" इत्यादेर् वचनस्य वेदाङ्गमहास्मृतिविरुद्धत्वं स्पष्टमेव।

ननु मा भूद् ब्रह्मपुराणे **"चैत्रे मासि जगद् ब्रह्मा"** इत्यादिकं वचनम्, नारदीयपुराणे तु (१।११०।५।६) **"चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि। शुक्लपक्षे समग्रं वै तदा सूर्योदये सति॥ वत्सरादौ वसन्तादौ बलिराज्ये तथैव च। पूर्वविद्धैव कर्तव्या प्रतिपत् सर्वदा बुधैः"** इति वचनं दृश्यते, विष्णुधर्मोत्तरपुराणे च (१।८२।३४-३६) **"चैत्रशुक्लसमारम्भे जगतां जगदीश्वरः। सर्वं चक्रे तदा राजँस् ततस् तस्मिन् सदा दिने॥ संवत्सरेशः क्रियते ब्रह्मणा तु सदा ग्रहः। नागो यज्ञश्च धर्मज्ञ गन्धर्वश् च तथैव च। *सप्तच्छिन्ने तु यः शेषः कलिपातसमागणे। आदित्यादिः स बोद्धव्यो ग्रहसंवत्सराधिपः"*** इति वचनं दृश्यते, तस्माच् चैत्रशुक्लादिः संवत्सरः पुराणसम्मत एव दृश्यते इति चेत्, अत्रोच्यते। **"न वेदे ग्रहसञ्चारो न शुद्धिः कालबोधिनी। तिथिवृद्धिः क्षयो वाऽपि पर्वग्रहविनिर्णयः॥"** (२।२४।२९) इति, **"यन् न दृष्टं हि वेदेषु तत् सर्वं लक्ष्यते स्मृतौ। उभयोर् यन् न दृष्टं हि तत् पुराणैः प्रगीयते"** (२।१४।२०-२१) इति च वदता नारदीयपुराणेनैव वेदे वेदाङ्गज्योतिषे वाऽपि अप्रतिपादितस्याऽपि तिथिवृद्धिक्षयादिकस्य विषयस्य पुराणे प्रतिपादितत्वं प्रकाशितमस्ति। एष तिथिवृद्धिक्षयादिविषयो वराहमिहिरेण ४२७तमे शकाब्दे रचितायां पञ्चसिद्धान्तिकायां प्रतिपादिते रोमकसिद्धान्ते पौलिशसिद्धान्ते च स्थितोऽवगम्यते। तेन तिथिवृद्धिक्षयादिविषयो भारतीयैरर्वाचीनैर् ज्यौतिषिकै रोमकसिद्धान्तादित एव सङ्गृहीतोऽवगम्यते। ५५०तमे शकाब्दे व्यतीते ब्राह्मस्फुटसिद्धान्तं रचयन् ब्रह्मगुप्तोऽपि रोमकसिद्धान्तादिभ्य एव वेद-वेदाङ्गबाह्यां तिथिपरिभाषां सङ्गृह्य आत्मानं स्फुटतिथिमानविज्ञं स्वीकृत्य **"युगमाहुः पञ्चाब्दं रविशशिनोः संहिताङ्गकारा यत्। अधिमासाऽवमरात्रस्फुटतिथ्यज्ञानतस् तदसत्"** (११।२) इति वदन् स्फुटतिथिपक्षस्य वेदबाह्यत्वमजानन् स्वयमज्ञो नास्तिक्यमवलम्ब्य वेदाङ्गज्योतिषग्रन्थकारस्य स्फुटतिथ्यनभिज्ञत्वमुद्घोषयति। एतेन पुराणेषु यानि तिथि-वृद्धिक्षयादिविषयाणि वचनानीदानीं दृश्यन्ते तानि सर्वाण्यपि अर्वाक्कालिकानि प्रक्षिप्तान्येवाऽवगम्यन्ते। तेन तादृशैर् वचनैर् युक्तानि नारदीयपुराणस्य विष्णुधर्मोत्तरपुराणस्य अन्यस्य वाऽपि पुराणस्य प्रकरणानि वैदिकानां कृते प्रमाणपदवीं नाऽऽरोहन्ति, अतश्चोक्तं नारदीयपुराणवचनं विष्णुधर्मोत्तरपुराणवचनं च वैदिकानां कृते प्रकृतिसम्मतस्य धार्मिकस्य व्यावहारिकस्य च सौरचान्द्रवर्षस्य प्रारम्भस्य कालस्य निरूपणे प्रमाणं नैव भवितुमर्हति। अपि च ब्रह्माण्डपुराणस्य पूर्वभागे (२४।१४१,१४२), लिङ्गपुराणे (१।६१।५२-५४), वायुपुराणे (१।५३।११३,११४) चोपलभ्यमानेन **"वर्षाणामपि पञ्चानामाद्यः संवत्सरः स्मृतः। ऋतूनां शिशिरश् चाऽपि मासानां माघ एव च। पक्षाणां शुक्ल-**

पक्षश् च तिथीनां प्रतिपत् तथा। अहोरात्रविभागानामहश् चाऽपि प्रकीर्तितम्" इति वचनेन विरुद्धत्वाच् च **"चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि"** इत्यादिकं वचनं पुराणविरुद्धमेवेति च निश्चेतुं शक्यते। **"विरोधो यत्र वाक्यानां प्रमाण्यं तत्र भूयसाम्। तुल्यप्रमाणकत्वे तु न्याय एवं प्रकीर्तितः"** इति छन्दोगपरिशिष्टापरनामयुतायाः कात्यायनस्मृतेर् (२८।१७) वचनात् **"विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात् सधर्मत्वम्"** इति जैमिनीयधर्ममीमांसासूत्रस्य (१२।२।२३) वचनाच् च त्रिषु महापुराणेषु दृष्टेन वचनेन विरुद्धत्वाच् च **"चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि"** इत्यादेर् वचनस्य वैदिकानां कृतेऽननुसरणीयत्वरूपमप्रामाण्यमेव।

नित्यस्वाध्यायविधिप्रयुक्ताध्ययनकेन महास्मृतिरूपेण वेदाङ्गज्योतिषग्रन्थेन विरुद्धत्वात् तु **"चैत्रे मासि जगद् ब्रह्मा ससर्ज"** इत्यादेर् वचनस्य सुतरामप्रामाण्यं वैदिकानां कृते वेदितव्यम्। वेदाङ्गज्योतिषग्रन्थस्य नित्यस्वाध्यायाध्ययनविधिप्रयुक्ताध्ययनकत्वं वैदिकधर्मकृत्यकालनिर्णयें परमप्रमाणत्वं तत्र माघशुक्लादिवर्षस्यैव प्रतिपादितत्वं च पूर्वमेव प्रतिपादितमत्राऽनुसन्धेयम्। अत्र श्रुतिस्मृतिपुराणानां प्रमाण्ये तारतम्यस्याऽपि सम्यगाकलनं कर्तव्यम्। तथाहि **"वेदो हि धर्ममूलम्"** इति कौषीतकिगृह्यसूत्रे (३।१२।२४)। **"वेदो धर्ममूलम्"** इति गौतमधर्मसूत्रे (१।१।१), **"वेदोऽखिलो धर्ममूलम्"** इति (२।६) **"धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः"** इति (२।१३), **"वेदाद् धर्मो हि निर्बभौ"** इति च (५।४४) मनुस्मृतौ। **"यदन्यद् वेदवादेभ्यस् तदशास्त्रमिति श्रुतिः"** इति महाभारते शान्तिपर्वणि (२६९।५९)। **"नास्ति वेदात् परं शास्त्रम्"** इति च तत्रैवाऽनुशासनपर्वणि (१०६।६५), अत्रिस्मृतौ (श्लो.१५१), भविष्यपुराणे च (१।१४७।३४)। **"न वेदेन समं शास्त्रम्"** इति पद्मपुराणे (४।९४।३७) आनन्दाश्रमसंस्करणे। **"वेदप्रणिहितो धर्मो ह्यधर्मस् तद्विपर्ययः। (वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम॥)"** इति भागवते (६।१।४०), ब्रह्मवैवर्तपुराणे (१।२४।८) च। **"तत् प्रमाणं बादरायणस्याऽनपेक्षत्वात्"** इति जैमिनीयधर्ममीमांसासूत्रे (१।१।५)। **"श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः। ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ॥ योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः। स साधुभिर् बहिष्कार्यो नास्तिको वेदनिन्दकः॥"** इति मनुस्मृतौ (२।१०,११), विष्णुधर्मोत्तरपुराणे च (३।१३३।६१,६२)। **"श्रुतिस्मृति-पुराणानां विरोधो यत्र दृश्यते। तत्र श्रौतं प्रमाणं स्याद् द्वयोर् द्वैधे स्मृतिर् वरा॥"** इति वेदव्यासस्मृतौ (१।४), **"श्रुतिस्मृती उभे नेत्रे पुराणं हृदयं स्मृतम्। एतत्त्रयोक्त एव स्याद् धर्मो नाऽन्यत्र कुत्र चित्॥ विरोधो यत्र तु भवेत् त्रयाणां च परस्परम्। श्रुतिस् तत्र प्रमाणं स्याद् द्वयोर् द्वैधे स्मृतिर् वरा॥"** इति देवीभागवते (११।१।२१,२४)। **"अतः स परमो धर्मो यो वेदादधिगम्यमे। अवरः स तु विज्ञेयो यः पुराणादिषु स्मृतः"** इति व्यासवचनं वीरमित्रोदये परिभाषाप्रकाशे (पृ.२९)। **"वेदा-**

ऽविरोधि चेत् तन्त्रं तत् प्रमाणं न संशयः। प्रत्यक्षश्रुतिरुद्धं यत् तत् प्रमाणं भवेन् न च॥" इति देवीभागवते (११।१।२५)। **"स्मृतिः पुराणमन्यद् वा तन्त्रं वा शास्त्रमेव वा। तन्मूलत्वे प्रमाणं स्यान् नाऽन्यथा तु कदाचन॥"** इति च तत्रैव (११।१।२९)। **"वेदाङ्गं धर्मशास्त्रं च पुराणं भारतं तथा। देशजातिकुलाचारमपरं च समासतः॥ विरोधे सति वेदेन वेदमार्गैकसंस्थितः। ब्राह्मणः क्षत्रियोऽन्यो वा निश्शङ्कं परिवर्जयेत्॥"** इति च पराशरपुराणे (१०।६३,६४)। **"श्रुतिर् यत्र प्रमाणं स्याद् युक्तिः का तत्र नारद। जिज्ञासोर् युक्तिरिष्टाऽस्ति यदि श्रुत्यनुसारिणी"** इति ज्योतिषसिद्धान्तसङ्ग्रहे ब्रह्मसिद्धान्ते (२।६४)। **"वेदाः प्रमाणमङ्गानि परिशिष्टाः ससाधनाः। स्मृतयश् च पुराणानि तेषां स्वत्वे विशेषतः। श्रुत्योर् विरोधे स्वत्वादौ स्वश्रुतिश् च बलीयसी॥ मन्त्रचोदनयोर् मन्त्रः प्रयोगित्वाद् बलं यतः। श्रुतिकल्पविरोधे तु श्रुतिर् वै कल्पसाधनात्॥ विरोधे कल्प-कल्पयोः स्वकल्पः स्वश्रुतिक्रमात्। कल्पस्मृतिविरोधे तु कल्प एव प्रयोगितः। स्मृत्योर् विरोधे सम्प्राप्ते स्वस्मृतिः कल्पसाधनात्। स्मृतिर् बलीयसी ज्ञेया द्वैधे स्मृति-पुराणयोः। स्मृतीनां श्रुतिमूलत्वात् पुराणं स्मृतिसाधनम्। एवं बलाबलं ज्ञात्वा श्रुतिकल्पस्मृतीषु च। कर्माणि फलयुक्तानि कुर्युः कर्मविदोऽनिशम्। ज्ञात्वा कर्माणि यः कुर्यात् साङ्गानि विधि-पूर्वकम्। फलं ब्रह्मार्पणं कृत्वा ब्रह्मलोकं स गच्छति।"** इति कातीयमन्त्रभ्रान्तिहरसूत्रे (श्लो. १०२-१०९)। **"अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात्, विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्"** इति जैमिनीय-धर्ममीमांसासूत्रे (१।३।२)। एवं शास्त्रव्यवस्थायां सत्यां च श्रुतिस्मृतिभ्यां विहितस्य, उक्तस्य सूचितस्य, आकाङ्क्षितस्य वाऽर्थस्य प्रतिपादने, श्रुतिस्मृत्योरनुकूलस्याऽविरोधिन एव वाऽप्यर्थस्य प्रतिपादने चैव पुराणानां प्रामाण्यम्, श्रुतिस्मृतिविरोधिनोऽर्थस्य प्रतिपादकस्य पुराणांशस्य तु वैदिकानां कृते सर्वथैवाऽप्रामाण्यमिति **श्रुतिवाक्यानुकूलेन महास्मृतिरूपेण वेदाङ्गज्योतिषेण प्रतिपादितस्य माघशुक्लादिवर्षस्य विरोधेन चैत्रशुक्लादिवर्षस्य प्रतिपादकः पुराणांशो वैदिकधर्मे सर्वथाऽप्रमाणमेवेति विवेक्तव्यम्।**

अयनारम्भवर्षारम्भसहभावाऽभावाच् च प्रचलितश् चैत्रशुक्लप्रतिपदि नववत्सरारम्भ इति सिद्धान्तस्य मेषमासारम्भे नववत्सरारम्भ इति सिद्धान्तस्य चाऽनौचित्यं बोध्यम्। अयनद्वयनिष्पन्नवत्सरसिद्धान्तः श्रुति-स्मृति-पुराणैः महाभारत-कौटलीयार्थशास्त्र-सुश्रुतसंहिता-ऽमरकोषादिभिश् च प्रतिपादित इति पूर्वमेव प्रदर्शितमिति वैदिकधार्मिक-व्यावहारिक-परम्परायाम् अयनारम्भ-वर्षारम्भयोः सहभावस्य स्वीकारोऽत्यावश्यक इति बोध्यम्।

दिव्यकालमानाऽसामञ्जस्याच्च चैत्रशुक्लप्रतिपदि नववर्षारम्भ इति सिद्धान्तस्य मेषमासादौ नववर्षारम्भ इति सिद्धान्तस्य चावैदिकत्वमनौचित्यं च बोध्यम्।

दिव्यकालमानमवलम्ब्यैव वर्ष-युग-महायुग-मन्वन्तर-कल्प-महाकल्पादिकालमानं पुराण-महाभारतादिषु प्रतिपादितमिति पूर्वमेव प्रदर्शितम्। पुराण-महाभारतादीनां तत् प्रतिपादनं च वेदानुकूलमेव। तत्र **"एकं वा एतद् देवानामहो यत् संवत्सरः"** इति तैत्तिरीयब्राह्मणवचनं (३।९।२२।१) च प्रदर्शितमेव। दिव्यकालमानेन सह कालगणनायाः सामञ्जस्याय च माघशुक्लादिवर्षमेव स्वीकर्तव्यं दिव्याहोरात्रस्य उदगयन-दक्षिणायनात्मकत्वात्। एवं च चैत्रशुक्लप्रतिपदि नववर्षारम्भ इति सिद्धान्तस्य मेषमासादौ नववर्षारम्भ इति सिद्धान्तस्य च दिव्यकालमानेन सहाऽसामञ्जस्यमवैदिकत्वं च बोध्यम्।

वैदिकमन्त्रवर्णोक्ततुविरोधाच्च चैत्रशुक्लप्रतिपदि वर्षारम्भ इति सिद्धान्तस्य मेषमासादौ वर्षारम्भ इति सिद्धान्तस्याऽवैदिकत्वम् अनौचित्यं च बोध्यम्। माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखामन्त्रार्षसंहितायाः (१३।२५; १४।६,१५,१६; १४।२७, १५।५७), आत्रेयतैत्तिरीयकृष्णयजुर्वेदसंहितायाः (४।४।११।१), काठक-कृष्णयजुर्वेदसंहितायाः (३५।९), कपिष्ठल-कठ-कृष्णयजुर्वेद-संहितायाः (४८।१०), मैत्रायणीयकृष्णयजुर्वेदसंहितायाश् (२।८।१२) च **"मधुश् च माधवश् च वासन्तिकावृतू"** इत्यादिकाद् वचनात्, **"मन्त्रचोदनयोर् मन्त्रबलं प्रयोगित्वात्"** इति कात्यायन-श्रौतसूत्रस्य (१।५।७) वचनाच् च वैदिकमासा ऋतुबद्धा अवगम्यन्ते, न तु नक्षत्रबद्धाः। एतस्यां वैदिकस्थितौ च **"साऽस्मिन् पौर्णमासीति सञ्ज्ञायाम्"** इति पाणिनीय-व्याकरणाष्टाध्यायीसूत्रस्य (४।२।२१) वचनेन कृतमन्वाख्यानं च शब्दस्वरूपज्ञानाय शब्दस्वरज्ञानाय चैवोपयोगीति स्वीकर्तव्यम्। अत एव वैदिकधर्ममीमांसकशिरोमणिना कुमारिलभट्टेन च **"यत्रार्थस्य विसंवादः प्रत्यक्षेणोपलभ्यते। स्वरसंस्कारमात्रार्था तत्र व्याकरणस्मृतिः"** इति तन्त्रवार्तिके (२।१।१७, आनन्दाश्रमसंस्करणे, पृ.४००) प्रोक्तम्। मासपौर्णमासीषु तत्तत्नक्षत्रविशेषस्य चन्द्रेण योगस्याऽनियतत्वाच् च पाणिनेर् निर्वचनं प्रायिकमात्रमित्यवगम्यत एव। एवं च ब्राह्मणादिषूक्ताश् चैत्र-वैशाखादिमासा मन्त्रवर्णोक्तमधुमाधवादिमासाऽभिन्ना एवेति वैदिकैः स्वीकर्तव्यं भवति। एवं च चैत्रादयोऽपि वैदिकैर् ऋतुबद्धा एव मन्तव्याः। ऋतवश् च वैदिकानां सूर्यस्य वास्तविकाभ्यामयनाभ्यामेव सम्बद्धाः, न सूर्यस्य मेषादिराशिषु प्रवेशैः सम्बद्धाः, वेद-वेदाङ्गेषु मेषादीनां राशीनामुल्लेखस्यैवाऽभावात्। एवं च यन् माधवेन कालमाधवे द्वितीये संवत्सरप्रकरणे ऋतुनिर्णये (पृ.४३) "सौरेष्वृतुषु बौधायनेन मीन-मेषयोर् मेषवृषयोर् वा वसन्तः इत्यभिधानान् मीनादित्वं मेषादित्वं च वैकल्पिकं वसन्तस्याऽऽङ्गीकृतम्" इत्युक्तम्, माधवानुयायिना कमलाकरभट्टेन च निर्णयसिन्धौ प्रथमपरिच्छेदे ऋतुनिर्णयप्रकरणे "चैत्रारम्भो वसन्तादिश् चान्द्रः, मीनारम्भो मेषारम्भो वा सौरः, मीनमेषयोर् मेषवृषयोर् वा वसन्तः इति बौधायनोक्तेः" इत्युक्तम्, तत् तादृशमन्यच् च सर्वमवैदिकत्वादुपेक्ष्यम्, वैदिकैः सौरचान्द्राणामेव ऋतूना-

माश्रितत्वाच् शुद्धानां सौराणामृतूनामनाश्रितत्वात्। एतच्च ऋतुनिर्णयप्रकरणे विशदतरं प्रतिपादयिष्यामः। अत्र "मीन-मेषयोर् मेष-वृषयोर् वा वसन्तः" इति वचनं च बौधायनश्रौतसूत्रादिषु नोपलभ्यते इति च स्मरणीयम्। एतेन माधवेन कालमाधवे द्वितीये संवत्सरप्रकरणे मलमासनिर्णये (पृ.५९) यन् **"मेषादिस्थे सवितरि योयो मासः प्रपूर्यते चान्द्रः। चैत्राद्यः स ज्ञेयः पूर्तिद्वित्वेऽधिमासोऽन्त्यः॥"** इति ज्योतिःशास्त्रेऽभिहितमुक्तम्, तदपि वैदिकानां कृतेऽस्वीकार्यमेवाऽवगन्तव्यम्। अतश् च चैत्रादिवर्षवादिभिः परिभाषितानां चैत्रादिमासानामवैदिकत्वेन तत्परिभाषितानां चैत्रवैशाखाद्यात्मकानां मीनमेषाद्यात्मकानां वाऽपि ऋतूनां च वैदिकऋतुविरोधाच् च चैत्रादिवर्षसिद्धान्तो मेषमासादिवर्षसिद्धान्तश् चाऽवैदिकोऽनुचित एवेति निश्चितं भवति। एवं च अवैदिक-मेषादि-राशि-सापेक्षपरिभाषामूलकत्वाच्च चैत्रशुक्लादिवर्षसिद्धान्तो मेषमासादिवर्षसिद्धान्तश् चाऽवैदिकोऽनुचितश् चेति च स्पष्टमेव।

मासमध्यात् नववर्षारम्भस्य स्वीकारस्याऽत्यन्तमेवाऽनौचित्याच् च चैत्रशुक्लादिवर्षसिद्धान्तो महावीरपञ्चाङ्ग-काशीविश्वनाथपञ्चाङ्ग-बापूदेवशास्त्रिप्रवर्तितदृक्सिद्धपञ्चाङ्गादिषु काश्यां मुद्रितेषु पञ्चाङ्गपत्रकेषु दृश्यमानस् त्वत्यन्तमेवाऽनुचितः, एकस्यैव मासस्याऽर्धस्य पूर्वे वत्सरेऽर्धस्य चोत्तरे वत्सरे समावेशस्याऽत्यन्तमेवाऽनुचितत्वात्। तेषु हि पञ्चाङ्गकेषु चैत्रकृष्णपक्षः पूर्वे वत्सरे चैत्रशुक्लपक्षस् तूत्तरे वत्सरे समावेश्यते इत्यवगन्तव्यम्। तेषां पञ्चाङ्गपत्रकाणां कृष्णादिशुक्लान्ता मासा अपि त्रैविद्यवृद्धाऽसम्मता असार्वत्रिका भारतवर्षस्य दक्षिणे भागे च सर्वथा अस्वीकार्या एवेति चाऽत्र स्मरणीयम्।

२२. राष्ट्रियपञ्चाङ्गे स्वीकृतस्य नववर्षारम्भसिद्धान्तस्य मासव्यवस्थायाश् चाऽवैदिकत्वमनुचितत्वं च

भारतीयसम्प्रशासनेन १९५२तमे क्रैस्ताब्दे (२००९तमे वैक्रमाब्दे) मेघनाथसाहानामकस्य विज्ञस्य अध्यक्षत्वे सम्पूर्णस्य भारतस्य कृते समानस्य पञ्चाङ्गपत्रकस्य निर्माणाय पद्धतिं निर्देष्टुं पञ्चाङ्गसंस्कारसमितिः सङ्घटिता बभूव किल। तया समित्या १९५६तमे क्रैस्ताब्दे (२०१२तमे वैक्रमाब्दे) स्वकीयमभिमतं सम्प्रशासनाग्रे प्रस्तुतं बभूव किल। तदनुसारमेव १९५७तमात् क्रैस्ताब्दात् (२०१३तमात् वैक्रमाब्दात्) प्रभृति भारतसम्प्रशासनपर्यावरणविभागप्रकाश्यमानस्य राष्ट्रियपञ्चाङ्गस्य (राष्ट्रियतिथिपत्रस्य) प्रकाशनं प्रारब्धं बभूव किल। उक्तायाः समितेरभिमतस्य सारांशोऽस्माभिः पाण्डुरङ्ग-वामन-काणेमहाशयेन रचितस्य आङ्लभाषामयस्य ग्रन्थस्याऽनुवादरूपेण अर्जुनचौबेकाश्यपमहाशयेन हिन्दीभाषायां प्रस्तुतस्य उत्तरप्रदेशसम्प्रशासनस्य हिन्दीसमित्या प्रकाशितस्य "धर्मशास्त्र का इतिहास (धर्म-

शास्त्रस्येतिहासः)" इति नामकस्य ग्रन्थस्य १९७४तमे क्रैस्ताब्दे प्रथमसंस्करणरूपेण प्रकाशिते चतुर्थे भागे (पृ.३४१-३४२) पठितः। भारतसम्प्रशासनस्य पर्यावरणविभागेन प्रकाशितं १८८७तमस्य शकाब्दस्य (२०२२तमस्य वैक्रमाब्दस्य, १९६५-१९६६क्रै.) "राष्ट्रीय-पञ्चाङ्गम्" अपि अस्माभिर् दृष्टम्।

तत्र वेदाः वैदिकपरम्परा च भारतवर्षस्य निधिरस्ति। तस्मात् सम्पूर्णस्य भारतवर्षस्य कृते पञ्चाङ्गस्य निर्माणाय पद्धतेर् निर्देशात् प्राग् वेदेषु वैदिक-परम्परायां च कालगणनायाः कीदृशी व्यवस्थेति सम्यगाकलनं कर्तव्यं भवति, किन्तु पञ्चाङ्ग-संस्कार-समित्या तथा कृतं नावलोक्यते। यद्यपि शङ्करबालकृष्ण-दीक्षितेन १८९६तमे क्रैस्ताब्दे (१९५३तमे वैक्रमाब्दे) महाराष्ट्रभाषायां रचयित्वा प्रकाशितस् तत्पुत्त्रेण १९३१तमे क्रैस्ताब्दे (१९८८तमे वैक्रमाब्दे) पुनः सम्पाद्य प्रकाशितः, १९५७तमे क्रैस्ताब्दे (२०१४तमे वैक्रमाब्दे) उत्तरप्रदेशसम्प्रशासनस्य हिन्दीसमित्या हिन्दीभाषायां "भारतीय ज्योतिष" इति नाम्ना शिवनाथझारखण्डि-कृतानुवादरूपेण प्रकाशितश् च ग्रन्थ एतस्मिन् विषये महत्त्वपूर्णः, इदानीमपि भारतवर्षेऽनेकेषु संस्कृतविश्वविद्यालयेषु तदीयेषु ज्योतिषविभागेषु बहुषु सिद्धान्त-ज्योतिषाध्यापकेषु ज्योतिषाचार्येषु च सत्स्वपि भारतीयज्योतिषविषये शङ्कर-बालकृष्णदीक्षितग्रन्थापेक्षया समीचीनतरः समृद्धतरश् चाऽन्यो ग्रन्थः केनाप्यन्येन रचितोऽस्माकं दृष्टिपथे नाऽऽगतः, शङ्करबालकृष्णदीक्षितग्रन्थे च वेदेषु वेदाङ्गेषु च प्राप्याणां ज्योतिषविषयाणां च विचारः कृतोऽपि दृश्यते, अतः शङ्करबालकृष्ण-दीक्षितस्य प्रयासः प्रशंसनीय एव, तथाऽपि तस्मिन् ग्रन्थेऽपि शङ्करबालकृष्ण-दीक्षितेनाऽपि कालगणनाविषये वेदानां वेदाङ्गानां वैदिकमूलपरम्परायाश् च सम्य-गाकलनं तु कृतं न दृश्यते। एतच् चाऽस्माकमेतस्य ग्रन्थस्याऽवलोकनेन विदुषां कृते स्फुटं भविष्यत्येव। वेदेषु वेदाङ्गेषु वैदिकमूलपरम्परायां च प्राप्यायाः काल-गणनायाः पद्धतेः सम्यगाकलने भारतसम्प्रशासन-नियुक्तायाः पञ्चाङ्ग-संस्कार-समितेरक्षमत्वस्य स्थूलमुदाहरणं तु भारतवर्षीयनववर्षारम्भदिनस्य निर्धारणे तस्यास् त्रुटिरेवाऽस्ति। तथाहि भारतवर्षीयज्योतिषशास्त्रस्य प्रचीनतमे ग्रन्थे लगधमुनिप्रोक्ते वेदाङ्गज्योतिषे वेदवेदाङ्गानुकूलतया नववर्षारम्भदिनत्वेन प्रतिपादितं माघशुक्ल-प्रतिपद्दिनं सूर्यस्य वास्तविकस्योदगयनारम्भस्य दिनं वाऽपि नववर्षारम्भदिनमस्वी-कृत्य भारतसम्प्रशासन-नियुक्त-पञ्चाङ्ग-संस्कारसमित्या वासन्तविषुवद्दिनोत्तर-दिनस्य नववर्षारम्भदिनत्वेन स्वीकरणं त्रुटिपूर्णमेवाऽस्ति। एतेन लाहिरिणा वेदाङ्ग-ज्योतिषानुसारित्वेनोक्तं वर्षारम्भदिनमपि व्याख्यातम्। एतस्य त्रुटिपूर्णत्वं वेद-वेदाङ्गाऽननुकूलत्वं च चैत्रशुक्लप्रतिपदि नववत्सरस्याऽऽरम्भः इति सिद्धान्तस्य मेषमासादौ नववत्सरस्याऽऽरम्भं इति सिद्धान्तस्य चाऽवैदिकत्वस्याऽनौचित्यस्य च एकविंशे प्रकरणे कृतेन प्रतिप्रादनेनैव प्रतिपादितं भवतीति नात्र पिष्ट-पेषणं क्रियते।

२३. तपस्-तपस्यादीनां वैदिकमासानां चान्द्रमासत्वम्

वैदिकानां तपस्-तपस्य-मधु-माधवादीनां मासानां वेदानुकूलस्य स्वरूपस्याऽऽकलनेऽपि पञ्चाङ्ग-संस्कार-समितेरक्षमत्वं दृश्यते। वेदेषु मन्त्रभागे तपस्-तपस्य-मधु-माधवादीनि एव नामानि प्राप्यन्ते, ब्राह्मणभागे तु माघ-फाल्गुन-चैत्र-वैशाखादीन्येव नामानि दृश्यन्ते, तथैव श्रौतसूत्रादिषु गृह्यसूत्रेषु च प्रायेण माघ-फाल्गुन-चैत्र-वैशाखादीनि नामान्येव प्राप्यन्ते। अतश् च चैत्र-वैशाखादीनां मधु-माधवादिभिरभेदस्य सिद्धत्वाच् चैत्र-वैशाखादीनां चान्द्रत्वस्य स्फुटत्वाच् च मधु-माधवादयो मासाश् चान्द्रा एवाऽवगम्यन्ते। श्रौतेषु यागेषु दर्शपूर्णमासयागौ प्रमुखौ, तौ च चान्द्रमासानुसारिणौ दृश्येते, चातुर्मास्ययागदिनान्यपि चान्द्रमासतिथिविशेष-रूपाण्येव दृश्यन्ते, अयनमुखे कार्यस्य निरूढपशुबन्धयागस्य प्रयोगोऽपि चान्द्रमास-तिथिविशेष एव करणीयोऽवगम्यते, अन्येषां श्रौतयागानां दिनान्यपि चान्द्रमासतिथि-विशेषरूपाण्येव दृश्यन्ते। क्षयाहश्राद्धमपि चान्द्रमासतिथिविशेष एव विधीयते। अतश् च वैदिकानां मासाश् चान्द्रा एव मुख्या इत्यवगम्यते। एतच् च शङ्कर-बालकृष्णदीक्षितेनाऽपि "वेदकाले मासाश् चान्द्रा आसन्, एतदेव स्वाभाविकमस्ति *(वेदकाल में मास चान्द्र थे और ऐसा ही होना स्वाभाविक है)*" (हिन्दीसंस्करणे, १९७५, पृ.३७) इत्येवमुक्त्वा, "वेदोक्तानि मधु-माधवादीनि नामानि सौरमासानां न सन्तीति निश्चयपूर्वकं वक्तुं न शक्यते, यतस् तेषां सम्बन्धः ऋतुभिरर्थात् सूर्येण सहाऽस्ति, एतावदेव न, मध्वादय ऋतवोऽप्युक्ताः सन्ति, किन्तु वेदेषु तादृशं विधानं कुत्राऽपि न प्राप्यते यतस् तेषां मासानां समाप्तिः पौर्णमासीममावास्यां वा विहायाऽन्येषु दिनेषु च भवति स्मेति स्पष्टं भवेत्, पौर्णमास्याम् अमावास्यायां च मासानां समाप्तेर् निर्देशाः वेदेषु सन्ति, अत एतानि नामानि पौर्णमास्याममावास्यायां वा समापिनां चान्द्राणां मासानामेव सन्तीति सिद्धं भवति। *(वेदोक्त मधु-माधवादि नाम सौर मासों के नहीं है यह निश्चयपूर्वक नहीं कहा जा सकता, क्यों कि उन के अर्थ का सम्बन्ध ऋतुओं से अर्थात् सूर्य से है, इतना ही नहीं, मध्वादिकों को ऋतु भी कहा है, परन्तु वेदों में ऐसा विधान कहीं नहीं मिलता जिस से यह प्रकट हो कि उन मासों की समाप्ति पूर्णिमा या अमावास्या के अतिरिक्त किसी अन्य दिवस में भी होती थी। पूर्णिमा और अमावास्या में मासान्त होने का निर्देश है। इस से सिद्ध होता है कि ये नाम पूर्णिमा या अमावास्या में समाप्त होनेवाले चान्द्र मास के ही हैं)।*" (पृ.५४) इत्येवमप्युक्त्वा तपस्-तपस्य-मधु-माधवादीनां मासानां चान्द्र-मासत्वं प्रतिपादितमेवास्ति। वेदेषु अर्धमासानां (पक्षाणां) मासानां च नैरन्तर्येणो-ल्लेखस्य दर्शनादपि वैदिकानां मासाः पक्षद्वयात्मका मुख्यतया चान्द्रा एवेति निश्चेतुं शक्यते। अर्धमास-मासयोर् नैरन्तर्येण वेदेषूल्लेखा यथा—

अहोरात्रेभ्यः स्वाहाऽर्द्धमासेभ्यः स्वाहा मासेभ्यः स्वाहऽ ऋतुभ्यः स्वाहाऽऽर्तवेभ्यः स्वाहा संवत्सराय स्वाहा। इति

–माध्यन्दिनीय-वाजसनेयिशुक्लयजुर्वेदमन्त्रार्षसंहितायाम् (२२।२८); तैत्तिरीयसंहितायां चैतादृशं वचनं द्रष्टव्यम् (७।१।१५)।

उषसस्ते कल्पन्तामहोरात्रास्ते कल्पन्तामर्द्धमासास्ते कल्पन्ताम् मासास्ते कल्पन्तामृतवस्ते कल्पन्तां संवत्सरस्ते कल्पताम्। इति च

–माध्यन्दिनीय-वाजसनेयिशुक्लयजुर्वेदमन्त्रार्षसंहितायाम् (२७।४५)।

अहोरात्राण्यर्धमासा मासाऽऋतवः संवत्सरे प्रतिष्ठिताः। इति

–माध्यन्दिनीय-वाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मणे (१२।८।३।१४)।

अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा बिधृताः। इति च

–तत्रैव (१४।६।८।९)।

अर्धमासा मासा ऋतवः संवत्सर ओषधीः पचन्ति। इति

–तैत्तिरीयसंहितायाम् (५।७।२।५)।

अर्धमासानेव मासानृतून् संवत्सरं प्रीणाति। इति च

–तत्रैव (५।७।२।६)।

अहोरात्रे निमेषोऽर्धमासाः पर्वाणि मासाः सन्धानान्यृतवोऽङ्गानि संवत्सर आत्मा। इति च

–तत्रैव (७।५।२५।१)।

स त्वाह्ने परिददात्वहस् त्वा रात्रौ परिददातु रात्रिस् त्वाऽहोरात्राभ्यां परिददात्वहोरात्रौ त्वाऽर्धमासेभ्यः परिदत्तामर्धमासास् त्वा मासेभ्यः परिददतु मासास् त्वर्तुभ्यः परिददत्वृतवस् त्वा संवत्सराय परिददतु। इति

–ताण्डिकौथुमराणायनीयसामवेदमन्त्रब्राह्मणे (१।५।१५)।

अंहसस्पतिना अंहस्पत्येन वाऽपि साहचर्याच् च मधुमाधवादिपदानां चान्द्रमासावबोधकत्वं स्पष्टं भवति। मधु-माधवादीनाम् अंहसस्पतिना अंहस्पत्येन वाऽपि साहचर्यं च यथा–

उपयामगृहीतोऽसि मधवे त्वोपयामगृहीतोऽसि माधवाय त्वोपयामगृहीतोऽसि शुक्राय त्वोपयामगृहीतोऽसि शुचये त्वोपयामगृहीतोऽसि नभसे त्वोपयामगृहीतोऽसि नभस्याय त्वोपयामगृहीतोऽसीषे त्वोपयामगृहीतोऽस्यूर्जे त्वोपयामगृहीतोऽसि सहसे त्वोपयामगृहीतोऽसि सहस्याय त्वोपयामगृहीतोऽसि तपसे त्वोपयामगृहीतोऽसि तपस्याय त्वोपयामगृहीतोऽस्यंहसस्पतये त्वा। इति

–मा.वा.शुक्लयजुर्वेदसंहितायाम् (७।३०); द्र.- शतपथब्राह्मणे च (४।३।१।१३-२०)।

मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहाऽंहसस्पतये स्वाहा। इति च

–तत्रैव २२।३१।

मधुश् च माधवश् च शुक्रश् च शुचिश् च नभश् च नभस्यश् च इषश् च ऊर्जश् च सहश् च सहस्यश् च तपश् च तपस्यश् चोपयामगृहीतोसि संसर्पोऽस्यंहस्पत्याय त्वा। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायाम् (१।४।१४।१), (द्र.- तत्रैव ६।५।३।४)।

मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहा संसर्पोऽस्यंहस्पत्याय **स्वाहा।** इति

–मैत्रायणीयकृष्णयजुर्वेदसंहितायाम् (३।१२।१३)।

अंहसस्पतेर् अंहस्पत्यस्य वा मासस्य त्रयोदशमासत्वस्य वेदेषूल्लेखाच् च मधुमाधवादीनां द्वादशानां मासानाम् अंहसस्पतेर् अंहस्पत्यस्य चाऽपि समानप्रकारकमासत्वमवगम्यते, एकस्मिन् वत्सरे त्रयोदश सौरमासा न सम्भवन्ति, अधिकमासयुते वत्सरे चान्द्रमासास् तु त्रयोदश भवन्तीति च मधुमाधवादयो मासा अपि चान्द्रमासा एवेत्येवगम्यते। भट्टभास्करेणाऽपि आत्रेयतैत्तिरीय-कृष्णयजुर्वेदसंहिताव्याख्याने मधुमाधवादीनां वैदिकानां मासानां **"मासाश्च चान्द्राः, त्रयोदशस्य चान्द्रत्वात्, पौर्णमासीनिमित्तस्य चैत्रादिव्यपदेशस्य चान्द्राणामेव सम्भवात्, अत एव मासानुविधायिमधुशब्दः"** इत्युक्त्वा स्पष्टतयैव चान्द्रत्वं प्रतिपादितं दृश्यते(१।४।१४।१)॥ अंहसस्पतेर् अंहस्पत्यस्य वाऽपि मासस्य त्रयोदशमासत्वम्, एकस्मिन् वत्सरे त्रयोदशानां मासानां सत्त्वं च वेदेषु प्रतिपादितं दृश्यते। तथाहि–

उपयामगृहीतोऽसि संसर्पोऽस्यंहस्पत्याय त्वेत्याहाऽस्ति त्रयोदशो मास इत्याहुस् तमेव तत् प्रीणाति। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायाम् (६।।५।३।४)।

इति त्रयोदशीमाहुतिं जुहुयादस्ति मासस् त्रयोदशस् तमेवैतयाप्त्वाऽवरुन्द्धे। इति

–मैत्रायणीय-कृष्णयजुर्वेदसंहितायाम् (१।४।१४)

अग्नीषोमीयया त्रयोदश्योपस्थेयोऽस्ति मासस् त्रयोदशस् तमेवैतयाऽऽप्त्वाऽवरुन्द्धे। इति च

–तत्रैव (१।५।६))

अथ यस् त्रयोदशं मासं सम्पादयति त्रयोदशं मासमभियजते। इति च
–तत्रैव (१।१०।८)

एष वाव त्रयोदशो मासस् तमेवैतत् सम्पादयति, तमभियजते। इति च
–तत्रैव (१।१०८)।

नैवारश् चरुस् त्रयोदशो भवत्यस्ति मासस् त्रयोदशस् तमेवैतेनाऽऽप्त्वाऽवरुन्द्धे। इति च
–तत्रैव (३।४।१०)।

अस्ति मासस् त्रयोदशस् तमेवैतेनाऽऽप्त्वाऽवरुन्द्धे। इति च
–तत्रैव (४।६।७)।

उत वै त्रयोदशं मासं विदुरुत न विदुः। इति
–काठककृष्णयजुर्वेदसंहितायाम् (३४।१३)।

एष वाव स त्रयोदशो मासस् तमेवैतत् सम्पादयति तमभियजते। इति च
–तत्रैव (३६।३)।

मलिम्लुचो नामाऽसि त्रयोदशो मासः। इति च
–तत्रैव (३८।१४)।

सनिस्रसो नामाऽसि त्रयोदशो मास इन्द्रस्य गृहः। इति
–शौनकिनामथर्ववेदमन्त्रसंहितायाम् (५।६।४)।

अहोरात्रैर् विमितं त्रिंशदङ्गं त्रयोदशं मासं यो निर्मिमीते।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति॥ इति च
–तत्रैव (१३।३।८)।

तं त्रयोदशान् मासादक्रीणँस् तस्मात् त्रयोदशो मासो नाऽनुविद्यते न वै सोमविक्रय्यनुविद्यते पापो हि सोमविक्रयी। इति
–ऐतरेयिब्राह्मणे ३।१ (१।१२)।

अश्वं त्रयोदशं ददाति यस् त्रयोदशो मासस् तस्याऽऽप्त्यै। इति
–शाङ्खायनीयब्राह्मणे (१।१)।

त्रयोदशं वा एतं मासमाप्नोति यच् छुनासीर्येण यजत एतावान् वै संवत्सरो यदेष त्रयोदशो मासस् तदत्रैव सर्वैः संवत्सर आप्तो भवति। इति च
–तत्रैव (५।८)।

अथ यत् त्रयोदश्यामन्वाहाऽस्ति त्रयोदशो मास उपचरो विज्ञात इव तस्याऽऽप्त्यै। इति च
–तत्रैव (७।१०)

अथो अपि त्रयोदश गृह्णीयादस्ति त्रयोदशो मास इति। इति

–माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मणे (४।३।१।५)।

तदाहुर् द्वादशारत्नी रशना कर्तव्या३ त्रयोदशारत्नी३रिति। ऋषभो वा एष ऋतूनां यत् संवत्सरः। तस्य त्रयोदशो मासो विष्टपम्। ऋषभ एष यज्ञानां यदश्वमेधः। यथा वा ऋषभस्य विष्टपम् एवमेतस्य विष्टपम्। त्रयोदशारत्निं रशनायामुपादधाति। यथर्षभस्य विष्टपं संस्करोति तादृगेव तत्। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदब्राह्मणे (३।८।३।३), माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणे च (१३।१।२।२)।

अस्ति त्रयोदशो मास इत्याहुः, यत् त्रयोदशः परिधिर् भवति तेन त्रयोदशं मासमवरून्धे। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदाऽऽरण्यके (५।४।१०[२९])।

त्रयोदशाक्षराणि स्तोभति, य एवाऽसावधिचरस् त्रयोदशो मासस् तमेव तदाप्नोति। इति

–जैमिनीयसामवेदब्राह्मणे (१।१३२)।

ते त्रयोदश हिङ्काराः सम्पद्यन्ते। एवं त्रयोदशस्य मासस्य उपाप्तिरिति। इति च

–तत्रैव (२।२०)।

त्रयोदशो मासो भूत्वेदं सर्वमभ्यारोहत्, संवत्सरो वाव इदं सर्वम्। इति च

–तत्रैव (२।३३४)।

तदाहुर् यत् त्रयोदश मासास् संवत्सरस् संवत्सरश् च चतुर्दशोऽथ केन त्रयोदशं च मासमुपाप्नुवन्ति संवत्सरं च चतुर्दशमिति। इति च

–तत्रैव (३।३८६)।

प्रायणीयेनाऽतिरात्रेण त्रयोदशं मासमुपाप्नुवन्त्युदयनीयेन संवत्सरम्। इति च

–तत्रैव (३।३८६)।

त्रयोदशरात्रीर् दीक्षितः स्यात् त्रयोदश मासाः संवत्सरः संवत्सरो विराड् विराजमाप्नोति। इति

–आत्रेयतैत्तिरीयकृष्णयजुर्वेदसंहितायाम् (५।६।७।१-२), काठककृष्णयजुर्वेद-संहितायाम् (२१।५), कपिष्ठलकठ-कृष्णयजुर्वेद-संहितायां च (३१।२०)।

त्रयोदश वा एता आहुतयस् त्रयोदश मासाः संवत्सरः संवत्सरं वावाऽस्मा एतदुपदधाति स्वर्गे लोके। इति

–मैत्रायणीय-कृष्णयजुर्वेदसंहितायाम् (१।११।८, ३।४।२)।

त्रयोदशैता आहुतयस् त्रयोदशमासस् संवत्सरस् संवत्सरस् स्वर्गो लोकस् संवत्सरमेवाऽस्मै स्वर्गे लोक उपाधात्। इति

–काठककृष्णयजुर्वेदसंहितायाम् (१४।८)।

त्रयोदशैता व्याहृतयस् त्रयोदशमासस् संवत्सरोऽन्तत एव संवत्सरं रोहति। इति च

–तत्रैव (२१।११)।

त्रयोदश दीक्षेरन् संवत्सरायतनाः, त्रयोदश मासास् संवत्सरस् संवत्सरायतना एवर्ध्नुवन्ति। इति च

–तत्रैव (३४।९)।

द्वादश वा वै त्रयोदश वा संवत्सरस्य मासाः। इति

–माध्यन्दिनीय-वाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मणे (२।२।३।२७)।

त्रयोदश वै मासाः संवत्सरस्य। इति च

–तत्रैव (३।६।४।१४, १२।३।२।२)।

संवत्सरो वाव विवर्तोऽष्टाचत्वारिंशस् तस्य षड्विंशतिरर्धमासास् त्रयोदश मासाः सप्तर्तवो द्वे अहोरात्रे। इति च

–तत्रैव (८।४।१।२५)।

त्रयोदशत्रयोदशाऽऽरण्यानाकाशेष्वालभते त्रयोदश मासाः संवत्सरः सर्वं संवत्सरः सर्वमश्वमेधः सर्वस्याऽऽप्त्यै सर्वस्याऽवरुद्ध्यै। इति च

–तत्रैव (१३।५।१।१५)।

त्रयोदश मासाः संवत्सरस्य त्रयोदशेमे पुरुषे प्राणा इत्यत्र तत् समम्। इति

–आथर्वणिकानां गोपथब्राह्मणे (१।५।५)।

त्रयोदशं वा एतं मासमाप्नोति यच् छुनासीर्येण यजते, एतावान् वै संवत्सरो यावानेष त्रयोदशो मासः। इति च

–तत्रैव (२।१।२६)।

शैशिरीयशाकलऋग्वेदमन्त्रसंहितायामपि (१।२५।८) "वेद मासो धृतव्रतो द्वादश प्रजावतः। वेदा य उपजायते" इति मन्त्रे द्वादशानां मासानां तेष्वेव मध्ये योऽतिरिक्तस् त्रयोदशो मासः कदाचित् उपजायते तस्य चोल्लेखादपि एते त्रयोदशैव मासा मुख्यतया चान्द्रा एवाऽवगम्यन्ते इत्यपि न विस्मरणीयम्। एवं च वैदिकपरम्परायां मधुमाधवादीनां मासानां मुख्यतया चान्द्रत्वे निश्चिते यद् भारतसम्प्रशासननियुक्तायाः पञ्चाङ्गसंस्कारसमितेर् निर्देशमवलम्ब्य राष्ट्रियपञ्चाङ्गे शुद्धसौरवासन्तविषुवदिनोत्तरदिने वैदिकमाधवमासस्य प्रवृत्तिर् लिख्यते तत् सर्वथा वैदिकशास्त्र-परम्परा-प्रतिकूलमेवेत्यवसीयते। यदि पञ्चाङ्गसंस्कार-समितेरवैदिकेष्वपि

मेषादिराश्यसम्बद्धेषु शुद्धसौरर्तुसम्बद्धेषु शुद्धेषु सौरेषु मासेषु क्रैस्तमासानामनुकरणे च आग्रहस् तर्हि तादृशानां मासानां कृते अवैदिकान्येव लौकिकानि नामानि देयानि न तु वैदिकनामत्वभ्रमजनकानि मधु-माधवादीनि, वैदिकशब्दप्रयोगपरंम्परायां विप्लवस्य जननेऽनौचित्यात्। अत्यल्पमेतत्। वैदिकानां पञ्चसंवत्सरात्मकयुग-वर्षाऽयन-ऋतु-मास-पक्ष-तिथीनां सर्वेषामेव सौरचान्द्रत्वमिति तस्याऽऽकलने पञ्चाङ्ग-संस्कार-समितेरक्षमत्वं दृश्यते इति च बोद्धव्यम्।

२४. वेदाङ्गज्योतिषग्रन्थोक्ताऽयनव्यवस्था

लगधमुनिप्रोक्ते वेदाङ्गज्योतिषग्रन्थे वैदिकानां जनानां युगस्य वर्षस्याऽयनस्य ऋतोर् मासस्य पक्षस्य च युगपदेव प्रारम्भो भवतीति **"स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ। स्यात् तदाऽऽदियुगं माघस् तपः शुक्लोऽयनं ह्युदक्"** इति (श्लो.६) वचनेन प्रतिपादितं दृश्यते। यथा युगादीनामारम्भो युगपद् भवति तथैव तेषां समाप्तिरपि युगपदेव भवतीति **"माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः। युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते"** इति (श्लो.५) वचनेन, **"त्रिंशत्यह्नां सषट्षष्टिरब्दः षट् चर्तवोऽयने। मासा द्वादश सौराः स्युरेतत् पञ्चगुणं युगम्"** इति (श्लो.२८) वचनेन, **"सावनेन्दुस्तृ-मासानां षष्टिः सैकद्विसप्तिका। द्यु-त्रिंशत् सावनः साऽर्धः सौरः स्तृणां स पर्ययः"** इति (श्लो.३१) वचनेन च सूच्यते। एवं च वैदिकानां युग-संवत्सरा-ऽयन-ऋतु-मास-पक्ष-तिथयः सर्वे एव सौरचान्द्रा इत्यप्यवगम्यते। तत्र वेदाङ्गज्योतिषग्रन्थे यद्यपि शुद्धस्य सौरायनस्य प्रतिपादकानि **"घर्मवृद्धिरपां प्रंस्थः"** इत्यादीनि (श्लो.८-११, ४०-४१) बहूनि वचनानि सन्त्येव, तथापि तानि सौरचान्द्रस्याऽयनस्य ज्ञानस्य साधनत्वेनैव प्रवृत्तानि, वेदाङ्गज्योतिषग्रन्थस्य यज्ञकालार्थसिद्धये प्रवृत्तत्वात्, लगधमुनिना अयनान्त एवाऽधिमासस्य व्यवस्थायाः **"द्व्यूनं द्विषष्टिभागेन"** इत्यादिना वचनेन (श्लो.३७) प्रतिपादितत्वात्, अब्दस्य द्व्ययनात्मकतायाः **"त्रिंशत्यह्नाम्"** इत्यादिना (श्लो.२८) वचनेनोक्तत्वात्, श्रौतयज्ञकर्मणि अयनमुखेऽयनमुखे वा अयनस्याऽऽद्यन्तयोर् वा संवत्सरेसंवत्सरे वाऽपि कार्यस्य निरूढपशुबन्धयागस्याऽपि चान्द्रमासतिथिविशेष एव प्रयोज्यतायाः श्रौतकल्पसूत्रकारैः प्रतिपादितत्वात्, वैदिकानां मासानामृतूनां च सौरचान्द्रत्वात्, अब्दस्याऽपि मुख्यतया सौरचान्द्रत्वाच् च ऋत्वब्दमध्यस्थस्याऽयनस्यापि सौरचान्द्रत्वस्यैवौचित्याच् च।

एतादृशीं वैदिकानामयनव्यवस्थामवगम्यैव पुराणादिषु वैदिकपरम्परायाग्रन्थेषु षड्भिश् चान्द्रैर् मासैः चान्द्रपक्षद्वयात्मक-चान्द्रमासद्वयघटितैस् त्रिभिश् चान्द्रैर् (सौरचान्द्रैर् वा) ऋतुभिर् वा एकमयनं भवतीत्युक्तम्। तथाहि—

अहोरात्राणि तावन्ति मासः पक्षद्वयात्मकः ॥
तैः षड्भिरयनं वर्षं द्वेऽयने दक्षिणोत्तरे। इति

–कूर्मपुराणे (१।५।८-९)।

त्रिंशद्दिनैर् भवेन् मासः पक्षद्वितयसंयुतः।
ऋतुर् मासद्वयेन स्यात् तत्त्रयेणाऽयनं स्मृतम्॥ इति

–नारदीयपुराणे (१।५।२३-२४)।

काष्ठास् त्रिंशत् कला, त्रिंशत् कला मौहूर्तिको विधिः ॥
तावत्सङ्ख्यैरहोरात्रं मुहूर्तैर् मानुषं स्मृतम्।
अहोरात्राणि तावन्ति मासः पक्षद्वयात्मकः ॥
तैष् षड्भिरयनं वर्षमयने दक्षिणोत्तरे। इति

–पद्मपुराणे सृष्टिखण्डे (३।५-६)।

तिथिपञ्चदशेनैव पक्षमानं प्रकीर्तितम्।
पक्षद्वयेन मासः स्याच् छुक्लकृष्णाभिधेन च॥
ऋतुर् मासद्वयेनैव तत्षट्केनैव वत्सरः। ....
अब्दस् तु चाऽयने द्वे वै चोत्तरे दक्षिणायने।
माघादिषड्भिर् निर्मितमुत्तरायणमीप्सितम्।
श्रावणादिमासषट्कं दक्षिणायनमेव च॥ इति

–ब्रह्मवैवर्तपुराणे कृष्णजन्मखण्डे (९६।५५-६३)।

पक्षः पञ्चदशाऽहानि शुक्लः कृष्णश्च मानद।
तयोः समुच्चयो मासः पितॄणां तदहर्निशम्॥
द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि।
अयने चाऽहनी प्राहुर् वत्सरो द्वादश स्मृतः॥ इति

–भागवतपुराणे (३।११।१०-११)।

अहोरात्रैश्च त्रिंशद्भिः पक्षौ द्वौ मास उच्यते॥
तैः षड्भिरयनं वर्षं द्वेऽयने दक्षिणोत्तरे। इति

–मार्कण्डेयपुराणे (४३।२४-२५)।

तथा पञ्चदशाहानि पक्ष इत्यभिधीयते।
द्वौ पक्षौ तु भवेन्मासो द्वौ मासावन्तरावृतुः॥
ऋतुत्रयमयनं स्याद् द्वेऽयने वर्षमुच्यते। इति

–वायुपुराणे (१।५०।१७७)।

काष्ठात्रिंशत् कला त्रिंशत् कला मौहूर्तिको विधिः।
तावत्सङ्ख्यैरहोरात्रं मुहुर्तैर् मानुषं स्मृतम्॥
अहोरात्राणि तावन्ति मासः पक्षद्वयात्मकः॥
तैः षड्भिरयनं वर्षं द्वेऽयने दक्षिणोत्तरे। इति

–विष्णुपुराणे (१।३।८-१०)।

त्रिंशत्सङ्ख्यैरहोरात्रैर् मासः पक्षद्वयात्मकः॥
ज्ञेयं पित्र्यमहोरात्रं मासः कृष्णसितात्मकः॥
मासैस्तैरयनं षड्भिर् वर्षं द्वे चाऽयने मतम्॥ इति

–शिवपुराणे (७।१।८।५-७)।

विनाडिकानां षष्ट्या स्यान् नाडिकैका दिनं भवेत्।
तत्षष्ट्या, दिवसास् त्रिंशन् मासः पक्षद्वयात्मकः॥
मासौ द्वावृतुरित्युक्तस् तैष् षड्भिर् वत्सरो भवेत्।
अयनद्वितयाकारः शीतवर्षोष्णसंश्रयः॥ इति

–स्कन्दपुराणे वैष्णवखण्डे (१।३६।३०,३१)।

अहोरात्राः पञ्चदश पक्ष इत्यभिशब्दितः।
पक्षौ द्वौ तौ कृतौ मासो मासौ द्वावृतुरुच्यते॥
अयनं चर्तुभिस् त्रिभिरब्दं द्वे अयने स्मृतम्।
दक्षिणं चोत्तरं चैव सङ्ख्यातत्त्वविशारदैः॥
मानेनाऽनेन यो मासः पक्षद्वयसमन्वितः।
पितॄणां तदहोरात्रमिति कालविदो विदुः॥
शुक्लपक्षस् त्वहस् तेषां कृष्णपक्षस् तु शर्वरी।
कृष्णपक्षे त्विह श्राद्धं पितॄणां वर्तते द्विज॥ इति

–तत्रैव, आवन्त्यखण्डे (१।४८।१०-१४)।

विंशतिकलो मुहूर्तः स्याद् दिनं पञ्चदशैस् तु तैः॥
दिनमाना निशा ज्ञेया अहोरात्रं द्वयाद् भवेत्।
तैः पञ्चदशभिः पक्षो द्विपक्षो मास उच्यते॥
मासैश्चैवाऽयनं षड्भिर् वर्षं स्यादयनद्वये। इति

–तत्रैव, प्रभासखण्डे (१।१९।९-१२, १।१०५।३३-३६)।

पक्षद्वयेन मासः स्यान् मासैः षड्भिर् द्विजोत्तमाः।
अयनं द्वेऽयने वर्षं क्रमात् ते दक्षिणोत्तरे॥ इति

–स्कन्दपुराणसूतसंहितायाम् (१।८।५-६)।

अहोरात्राः पञ्चदश पक्ष इत्यभिशब्दितः।
द्वौ पक्षौ तु स्मृतो मासो मासौ द्वावृतुरुच्यते॥
अब्दं द्व्ययनमुक्तं च अयनं त्वृतुभिस् त्रिभिः।
दक्षिणं चोत्तरं चैव सङ्ख्यातत्त्वविशारदैः॥ इति

–हरिवंशे (१।८।५,६)।

कालो हि नाम भगवान् स्वयम्भूरनादिमध्यनिधनः। अत्र रसव्यापत्-सम्पत्ती जीवितमरणे च मनुष्याणामायत्ते। स सूक्ष्मामपि कलां न लीयत इति कालः, सङ्कलयति कालयति वा भूतानीति कालः। तस्य संवत्सरात्मनो भगवानादित्यो गतिविशेषेणाऽक्षिनिमेष–काष्ठा–कला–मुहूर्ता-ऽहोरात्र-पक्ष-मासर्त्वयनसंवत्सर-युगप्रविभागं करोति। तत्र लघ्वक्षरोच्चारणमात्रोऽक्षिनिमेषः। पञ्चदशाक्षिनिमेषाः काष्ठा। त्रिंशत् काष्ठाः कला। विंशतिकलो मुहूर्तः कलादशभागश् च। त्रिंशन्-मुहूर्तमहोरात्रम्। पञ्चदशाऽहोरात्राणि पक्षः। स च द्विविधः शुक्लः कृष्णश् च। तौ मासः। तत्र माघादयो द्वादश मासा द्विमासिकमृतुं कृत्वा षड्ऋतवो भवन्ति। ते शिशिर-वसन्त-ग्रीष्म-वर्षा-शरद्-धेमन्ताः। तेषां तपस्-तपस्यौ शिशिरः। मधु-माधवौ वसन्तः। शुचि-शुक्रौ ग्रीष्मः। नभोनभस्यौ वर्षाः। इषोर्जौ शरत्। सहस्-सहस्यौ हेमन्तः इति। त एते शीतोष्णवर्षलक्षणाश् *चन्द्रादित्ययोः* कालविभाग-करत्वादयने द्वे भवतो दक्षिणमुत्तरं च। तयोर् दक्षिणं वर्षा-शरद्-धेमन्ताः। तेषु भगवानाप्यायते सोमः, अम्ल-लवण-मधुराश् च रसा बलवन्तो भवन्ति, उत्तरोत्तरं च सर्वप्राणिनां बलमभिवर्धते। उत्तरं च शिशिर-वसन्त-ग्रीष्माः। तेषु भगवानाप्यायतेऽर्कः, तिक्तकषायकटुकाश् च रसा बलवन्तो भवन्ति, उत्तरोत्तरं च सर्वप्राणिनां बलमपहीयते। भवति चाऽत्र–

शीतांशुः क्लेदयत्युर्वीं विवस्वान् शोषयत्यपि।
तावुभावपि संश्रित्य वायुः पालयति प्रजाः॥

अथ खल्वयने द्वे युगपत् संवत्सरो भवति। ते तु पञ्च युगमिति संज्ञां लभन्ते। स एष निमेषादि-युगपर्यन्तः कालश् चक्रवत् परिवर्तमानः कालचक्रमुच्यत इत्येके। इति

–सुश्रुतसंहितायाम्, सूत्रस्थाने (६।३-९)।

कालमानमत ऊर्ध्वम्। त्रुटो लवो निमेषः काष्ठा कला नाडिका मुहूर्तः पूर्वापरभागौ दिवसो रात्रिः पक्षो मास ऋतुरयनं संवत्सरो युगमिति कालाः। शिशिराद्युत्तरायणम्। वर्षादि दक्षिणायनम्। द्व्ययनः संवत्सरः। पञ्चसंवत्सरो युगम्। इति

–कौटलीयार्थशास्त्रे (२।२०)।

पक्षौ पूर्वापरौ शुक्ल-कृष्णौ मासस् तु तावुभौ।
द्वौद्वौ मार्गादिमासौ स्यादृतुस् तैरयनं त्रिभिः॥ इति
—नामलिङ्गानुशासने (अमरकोशे), प्रथमकाण्डे, कालवर्गे (श्लो.१२-१३)।

उक्तेषु वचनेषु सुश्रुतसंहिताया वचने **"चन्द्रादित्ययोः कालविभागकरत्वाद् अयने द्वे भवतः"** इत्युक्त्वा चान्द्रमानप्रधानस्य सौर-चान्द्रस्याऽयनस्य विशेषरूपेण प्रतिपादनं च कृतं दृश्यते।

अत्रेदं विचार्यम्। कर्केण कात्यायनश्रौतसूत्रस्य **"आवृत्तिमुखयोर् वा"** (६।१।२) इति वचनस्य व्याख्यायाम् **"आवृत्तिशब्देन उदगयनदक्षिणायने उच्येते, तयोर् मुखम् प्रथममहः, तत्र कर्तव्या (पश्विज्या), न पौर्णमास्यमावास्ये अपेक्ष्येते"** इत्युक्तम्, अर्वाचीनेन देवयाज्ञिकेन तु मन्त्रेषु ब्राह्मणेषु च मेषादिराशिमूलकसौर-सङ्क्रान्तिभिर् व्यवहारस्य सर्वथाऽभावमविचार्य उक्तसूत्रव्याख्यायां **"नाऽत्र पौर्णमास्यमावास्ययोरपेक्षा सङ्क्रान्तिदिन एव विधानात्, सङ्क्रान्तेः पूर्वदिने उत्तरदिने वा यस्मिन्नहनि स्मृतिशास्त्रतः पूर्वाह्णे पूर्णकालत्वम् तत्र पशुयागः कर्तव्यः"** इत्युक्तम्, तदेवाऽनुसृत्य सरलायां विद्याधरगौडमहाशयेनाऽपि **"दक्षिणायनसङ्क्रान्तिदिने उत्तरायणसङ्क्रान्तिदिने वा प्रतिवर्षं यावज्जीवं पशुना यजेत"** इत्युक्तम्। किन्तु आपस्तम्बश्रौतसूत्रे **"सर्वान् लोकान् पशुबन्धयाज्यभिजयति, तेन यक्ष्यमाणोऽमावास्यायां पौर्णमास्यां वा षड्ढोतारमनुद्रुत्याऽऽहवनीये सग्रहं जुहोति सूर्यं ते चक्षुरिति"** (७।१।१।२) इत्युक्तत्वात्, तत्र **"ऐन्द्राग्नो निरूढपशुबन्धः सौर्यः प्राजापत्यो वा, तेन संवत्सरेसंवत्सरे यजेत, षट्सुषट्सु मासेष्वित्येके, ऋतुव्यावृत्तौ सूयवसे, आवृत्तिमुखआवृत्तिमुखे वा"** (७।२८।५-७) इति चोक्तत्वाच् च अमावास्यायां पौर्णमास्यां वा निरूढपशुबन्धस्य प्रयोगः कर्तव्य इत्यवसीयते। बौधायनश्रौतसूत्रेऽपि **"पशुना यक्ष्यमाणो भवति"** इत्युक्त्वा **"अथाऽमावास्येन वा हविषेष्ट्वा नक्षत्रे वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा षड्ढोतारं मनसाऽनुद्रुत्याऽऽहवनीये जुहोत्यन्वारब्धे यजमाने स्वाहेति"** इत्युक्तं दृश्यते (४।१)। वैखानसश्रौतसूत्रे च **"ऐन्द्राग्नेन सौर्येण प्राजापत्येन वा निरूढपशुबन्धेन प्रतिसंवत्सरं प्रत्ययनं प्रतिषण्मासं वा यक्ष्यमाणः पौर्णमास्यामेमावास्यायामापूर्यमाणपक्षे पुण्ये नक्षत्रे वा यजेत"** (१०।१) इत्युक्तमस्ति। एतत् सर्वं विचार्यैव सत्याषाढश्रौतसूत्रस्य (हिरण्यकेशिश्रौतसूत्रस्य) **"ऐन्द्राग्नेन पशुना षाण्मास्येषाण्मास्ये यजत आवृत्तिमुखआवृत्तिमुखे संवत्सरेसंवत्सरे वा"** इति (४।१।१) सूत्रस्य व्याख्याने महादेवकृतायां प्रयोगवैजयन्त्याम् **"आवृत्तिमुखआवृत्तिमुखे"** इत्यस्यांशस्य व्याख्यायां स्वमतत्वेन **"सङ्क्रान्त्यनन्तरपर्वणि"** इत्युक्तम्। एतस्य तात्पर्यं च सौरस्य सौरचान्द्रस्य वाऽयनस्य प्रवृत्तेरनन्तरम् प्रथम-

मागते पर्वणीति गम्यते। युक्तं चैतद् आपस्तम्ब-बौधायनादिवचनानुकूलत्वात्। कालीघट्टनगर्यां मनसुखरायमोरमहाशयेन मुद्रापितस्य स्मृतिसन्दर्भस्य २०१२तमे वैक्रमाब्दे मुद्रिते पञ्चमे भागे समाविष्टायां द्वितीयायाम् आङ्गिरसस्मृतौ दृश्यमानम् (श्लो.३०-३१, पृ.२९५२) **"पौर्णमासं च दर्शं च पशुबन्धं च तद्दिने। समागतं समाप्याऽऽदौ पश्चाच् छ्राद्धं समाचरेत्"** इति वचनमपि पौर्णमासयागदिने दर्शयागदिने वा निरूढपशुबन्धयागस्य कर्तव्यत्वं सूचयद् दृश्यते। तस्मात् कर्कादिव्याख्यानं चिन्त्यं प्रतीयते। माधवेनाऽपि कालमाधवग्रन्थे संवत्सरप्रकरणे "यच् च निरूढपशुबन्धप्रकरणे श्रूयते—तेन संवत्सरेसंवत्सरे यजेतेति पशुना संवत्सरो नातीयादिति च। तत्राऽपि चान्द्र एव द्रष्टव्यः सर्वाल्ँ लोकान् पशुबन्धयाज्यभिजयति तेन यक्ष्यमाणोऽमावास्यायां वा पौर्णमास्यां वेति कल्पसूत्रकारैश् चान्द्रतिथौ तदनुष्ठानविधानात्" इत्युक्तमित्यप्यत्र स्मरणीयम्। प्रावृषि एव वा आवृत्तिमुखयोर् वाऽपि प्रतिवर्षं कर्तव्ये निरूढपशुबन्धयागस्य प्रयोगे सौरचान्द्रस्य अयनस्य प्रारम्भात् पश्चात् प्रथममागते शुक्ले पक्षे समुचिते नक्षत्रे, तथा समागते पर्वण्येव वा मुख्यतया निरूढपशुबन्धयागप्रयोगः कार्य इत्यवगम्यत इति चान्द्रमानस्यैवा-ऽयन-कालनिर्धारणे मुख्यत्वं वैदिकपरम्परयामित्यवसीयते। अर्वाचीनाऽवैदिकज्योतिषग्रन्थप्रभावाऽभिभूततया यद्यपि कालमाधवकारेणाऽयननिरूपणप्रकरणे **"के चित् तु चान्द्रमानेनाऽयनद्वयमभ्युपगच्छन्ति"** इति चान्द्रमयनमुपेक्षणीयतयोक्तम्, तथापि वैदिकानां चान्द्रस्याऽयनस्य स्वीकारस्य परम्परा तेनाऽपि केनाऽपि प्रकारेण सूचितैवाऽवगम्यते। तस्माद् वैदिकपरम्परायां धर्मकृत्ये सौरचान्द्रमेवाऽयनं ग्राह्यतया स्वीकृतमवसीयते। लगधमुनिनाऽपि अयनान्ताऽधिमासव्यवस्थाया वेदाङ्गज्योतिषग्रन्थे (श्लो.३७) प्रतिपादनं कृत्वा श्रौतस्मार्तधर्मकृत्ये सौरचान्द्रस्याऽयनस्य ग्राह्यत्वं प्रतिपादितमेवाऽस्ति।

ननु सूर्य एव कालगणनाया मूलम्। उक्तं हि—

त्रीणि जना परिभूषन्त्यस्य समुद्र एकं दिव्येकमप्सु।
पूर्वामनु प्र दिशं पार्थिवानामृतून् प्रशासद् विदधावनुष्ठु॥ इति

—शैशिरीय-शाकल-ऋग्वेदमन्त्रसंहितायाम् (१।९५।३)।

सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाऽधि तस्थुः॥ इति च

—शैशिरीय-शाकल-ऋग्वेदमन्त्रसंहितायाम् (१।१६४।२),
निरुक्ते च (४।४।६।[४।२७])।

सूर्यो योनिर् वै कालस्य तस्यैतद् रूपं यन् निमेषादिकालात् सम्भृतं द्वादशात्मकं वत्सरम्। इति

—मैत्रायणीय-कृष्णयजुर्वेदारण्यके (६।१४)।

आदित्यस् त्वेव सर्व ऋतवः। यदैवोदेत्यथ वसन्तो यदा सङ्गवोऽथ ग्रीष्मो यदा मध्यन्दिनोऽथ वर्षा यदाऽपराह्णोऽथ शरद् यदैवाऽस्तमेत्यथ हेमन्तः। इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशतपथब्राह्मणे (२।२।३।९)।

स यः संवत्सरोऽसौ स आदित्यः। इति च

–तत्रैव (१०।२।४।३)।

स्मृतिः प्रत्यक्षमैतिह्यमनुमानश् चतुष्टयम्।
एतैरादित्यमण्डलं सर्वैरेव विधास्यते॥
सूर्यो मरीचिमादत्ते सर्वस्माद् भुवनादधि।
तस्याः पाकविशेषेण स्मृतं कालविशेषणम्॥ इति

–आरुणकेतुके, तैत्तिरीयकृष्णयजुर्वेदारण्यके (१।२।१)।

येन मूर्तीनामुपचयाश् चाऽपचयाश् च लक्ष्यन्ते तं कालमाहुः। तस्यैव कया चित् क्रियया युक्तस्य अहरिति च भवति रात्रिरिति च। कया क्रियया? आदित्य-गत्या। तयैवाऽसकृदावृत्तया मास इति भवति संवत्सर इति च। इति

–पाणिनीय-व्याकरणभाष्ये (२।२।५)।

अहोरात्रे विभजते सूर्यो मानुषदैविके।
रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः॥ इति

–मनुस्मृतौ (१।६५),महाभारते शान्तिपर्वणि च (२३१।१५)।

यस्यैकं चक्रं द्वादशारं षण्नेमि त्रिणाभि संवत्सरात्मकं समामनन्ति तस्याऽक्षो मेरोर् मूर्धनि कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयन्त्रचक्र-वद् भ्रमन् मानसोत्तरगिरौ परिभ्रमति। इति

–भागवतपुराणे (५।२१।१३)।

क्षणा मुहूर्ता दिवसा निशाः पक्षास् तथैव च।
मासाः संवत्सराश् चैव ऋतवोऽथ युगानि च॥
तदादित्यादृते ह्येषां कालसङ्ख्या न विद्यते।
कालादृते न नियमो नाऽग्नेर् विहरणक्रिया॥ इति

–साम्बपुराणे (७।७-८)।

अहोरात्रव्यवस्थानकारणं भगवान् रविः।
देवयानः परः पन्था योगिनां क्लेशसङ्क्षये॥ इति

–विष्णुपुराणे (२।८।११)।

संवत्सरकरोऽश्वत्थः कालचक्रो विभावसुः।
पुरुषः शाश्वतो योगी व्यक्ताऽव्यक्तः सनातनः॥

कालाध्यक्षः प्रजाध्यक्षो विश्वकर्मा तमोनुदः।
वरुणः सागरोऽंशश् च जीमूतो जीवनोऽरिहा॥ इति

–महाभारते, वनपर्वणि (३।२१,२२)।

तव यद्युदयो न स्यादन्धं जगदिदं भवेत्।
न च धर्मार्थकामेषु प्रवर्तेरन् मनीषिणः॥
आधान-पशुबन्धेष्टि-मन्त्र-यज्ञ-तपःक्रियाः।
त्वत्प्रसादादवाप्यन्ते ब्रह्म-क्षत्र-विशां गणैः॥
यदहर् ब्रह्मणः प्रोक्तं सहस्रयुगसम्मितम्।
तस्य त्वमादिरन्तश् च कालज्ञैः परिकीर्तितः॥ इति च

–तत्रैव (३।५३-५५)।

कालो हि नाम भगवान् स्वयम्भूरनादिमध्यनिधनोऽत्र रसव्यापत्सम्पत्ती जीवितमरणे च मनुष्याणामायत्ते। ... ... स सूक्ष्मामपि कलां न लीयते इति कालः, सङ्कलयति कालयति वा भूतानीति कालः। तस्य संवत्सरात्मनो भगवानादित्यो गतिविशेषेणाऽक्षिनिमेषकलामुहूर्ताऽहोरात्रपक्षमासर्त्वयनसंवत्सरयुगप्रविभागं करोति। इति

–सुश्रुतसंहितायाम्, सूत्रस्थाने (६।३,४)।

विशेषेणोदगयन-दक्षिणायनरूपकालविभागहेतुत्वेन च सूर्य एव श्रुति-स्मृति-पुराणेषु प्रतिपादितो दृश्यते। तथाहि–

प्रसिद्धमेवाऽध्वर्युर् दक्षिणेन प्रपद्यते प्रसिद्धं प्रतिप्रस्थातोत्तरेण तस्मादादित्यः षण् मासो दक्षिणेनैति षडुत्तरेण। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायाम् (६।५।३।४)।

तदुतैषाऽपि गीयते। अहोरात्राणि विदधदूर्णावा इव धीर्यः। षण् मासो दक्षिणा नित्यः षडुदङ्ङेति सूर्य इति, षड्ढ्येव उदङ् मासानेति षड् दक्षिणा। इति

–शाङ्खायनीयब्राह्मणे (१९।३)।

स यत्रोदङ्ङावर्तते देवेषु तर्हि भवति देवाँस् तर्ह्यभिगोपायत्यथ यत्र दक्षिणाऽऽवर्तते पितृषु तर्हि भवति पितॄँस् तर्ह्यभिगोपायति। इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशतपथब्राह्मणे (२।१।३।३)।

यान् षण् मासानुदङ्ङादित्य एति। इति च

–तत्रैव (१४।९।१।१८)।

यान् षण् मासान् दक्षिणाऽऽदित्य एति। इति च

–तत्रैव (१४।९।१।१९)।

दैवे रात्र्यहनी वर्षं प्रविभागस् तयोः पुनः।
अहस् तत्रोदगयनं रात्रिः स्याद् दक्षिणायनम्॥ इति

–मनुस्मृतौ (१।६७), महाभारते च (१२।२३१।१७)।

दिव्ये रात्र्यहनी वर्षं प्रविभागस् तयोः पुनः।
अहस् तत्रोदगयनं रात्रिः स्याद् दक्षिणायनम्॥ इति

–ब्रह्माण्डपुराणे पूर्वभागे (२९।१३-१४), मत्स्यपुराणे (१४२।१०), लिङ्गपुराणे (१।४।१५-१६), वायुपुराणे च (१।५७।१३)।

उत्तरां तु यदा काष्ठां क्रमादाक्रमते रविः।
तदा तथा भवेद् वृद्धिर् दिवसस्य महाभुज॥ इति

–विष्णुधर्मोत्तरपुराणे (१।७३।५)।

दक्षिणां च यदा काष्ठां क्रमादाक्रमते रविः।
दिवसस्य तथा हानिर् ज्ञातव्या नित्यमेव तु॥ इति च

–तत्रैव (१।७३।७)।

उदगयन-दक्षिणायनरूपकालविभागस्य सूर्यगतिस्थितिमूलकत्वं हि प्रकृति-सिद्धमृतुगुणमूलं चेति पुराणेऽपि प्रतिपादितमेव। तथाहि–

यन्मध्यगतो भगवाँस् तपताम्पतिस् तपन आतपेन त्रिलोकीं प्रतपति अवभासयति आत्मभासा, स एष उदगयन-दक्षिणायन-वैषुवसञ्ज्ञाभिर् मान्द्य-शैघ्र्य-समानाभिर् गतिभिरारोहणाऽवरोहणसमानस्थानेषु यथासवनमभिपद्यमानो मकरादिषु राशिषु अहोरात्राणि दीर्घ-ह्रस्व-समानानि विधत्ते। यदा मेषतुलयोर् वर्तते तदाऽहोरात्राणि समानानि भवन्ति, यदा वृषभादिषु पञ्चसु राशिषु चरति तदाहान्येव वर्धन्ते ह्रसति च मासिमासि एकैका घटिका रात्रिषु। यदा वृश्चिकादिषु पञ्चसु वर्तते तदाऽहोरात्राणि विपर्ययाणि भवन्ति, यावद्दक्षिणायनमहानि वर्धन्ते, यावदुदगयनं रात्रयः। इति

–भागवतपुराणे (५।२१।३-६)।

स एष भगवानादिपुरुष एव साक्षान् नारायणो लोकानां स्वस्तये आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसन्तादिषु ऋतुषु यथोपजोषमृतुगुणान् विदधाति। इति च

–तत्रैव (५।२२।३)।

शीताऽऽतपौ तथा वृष्टिः सौरमानेन जायते।
वृक्षाणां फलनिष्पत्तिः सस्यानां च तथा परा॥ इति

–स्कन्दपुराणे, नागरखण्डे (२७३।११-१२)।

अयनं तस्य षण्मासानुत्तरं दक्षिणं तथा।
येन संयाति लोकेषु शीतोष्णे विसृजन् रविः॥ इति
–महाभारते शान्तिपर्वणि (२२५।३६)।

एतादृश्यां शास्त्रीयायां लौकिक्यां च वस्तुस्थितौ कथमयनयोश् चान्द्रत्वं सौरचान्द्रत्वं वा वैदिकैः स्वीक्रियते? इति चेत् अत्रोच्यते—यद्यपि प्रकृतिसिद्ध-मार्तवं वर्षं सूर्यगतिस्थितिमूलकमेव, अयनमपि तादृशमेव, ऋतवोऽपि शीतोष्ण-वर्षादिलक्षणास् तादृशा एव, तथापि मासास् तु चन्द्रवृद्धिक्षयाभ्यामेव लोके सुपरि-च्छेद्याः, पक्षा अपि तादृशा एवेति, तिथयोऽपि सूर्योदयपरिच्छेद्या अपि चन्द्रवृद्धि-क्षयोपलक्षिता भवन्तीति च कालगणनायां चन्द्रः प्राधान्येन गृह्यते वैदिकैः, सूर्यो विशेषकत्वेन। अत एव वैदिकैः युग-वर्षा-ऽयन-ऋतु-मास-पक्षाः सर्वे एव सौर-चान्द्रा गृह्यन्ते। यद्यपि तिथिपरिच्छेदः सूर्योदयेन क्रियते वैदिकैरित्यवगम्यते, सूर्यो-दयस्य सुखेन ज्ञातुं शक्यत्वात्, श्रुतिषु तिथिशब्दस्य दुर्लभत्वात्, तिथिशब्दप्रयोगो-चितेषु स्थलेषु श्रुतिषु अहोरात्रशब्दस्याऽहश्शब्दस्यैव वाऽपि प्रयुक्तत्वाद् यज्ञेषु सूर्योदयपरिच्छिन्नस्य सावनदिनस्यैव परिगृहीतत्वाच् च; तथापि तिथिगणनायां चन्द्रवृद्धिक्षयावपि विशेषकौ भवत इति तिथीनां चान्द्रसौरत्वं सौरचान्द्रत्वमेव वा-ऽवगन्तव्यम्। तत्र सूर्योदयस्य सर्वजनवेद्यस्याऽपि वेदेऽपि विशेषतया वर्णनं यथा—

उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्। इत्यादि
–शैशिरीय-शाकल-ऋग्वेद-मन्त्रसंहितायाम् (१।५०।१-१३)।

चित्रं देवानामुदगादनीकं चक्षुर् मित्रस्य वरुणस्याऽग्नेः।
आ प्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस् तस्थुषश्च॥ इत्यादि
–तत्रैव (१।११५।१-६), माध्यन्दिनीय-वाजसनेयि-शुक्ल-यजुर्वेदमन्त्रसंहितायां च (७।४२, १३।४६)।

उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणाम्।
चक्षुर् मित्रस्य वरुणस्य देवश् चर्मेव यः समविव्यक् तमांसि॥ इत्यादि च
–शैशिरीय-शाकल-ऋग्वेद-मन्त्रसंहितायाम् (७।६३।१-५)।

उदु त्यद् दर्शतं वपुर् दिव एति प्रतिह्वरे।
यदीमाशुर् वहति देव एतशो विश्वस्मै चक्षसे अरम्॥ इत्यादि च
–तत्रैव (७।६६।१४-१६)।

सूर्यरश्मिर् हरिकेशः पुरस्तात् सविता ज्योतिरुदयाँ अजस्रम्।
तस्य पूषा प्रसवे याति विद्वान् सम्पश्यन् विश्वा भुवनानि गोपाः॥ इत्यादि च
–तत्रैव (१०।१३९।१-३)।

सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः। इति

–प्रश्नोपनिषदि (१।८), मैत्रायणीयोपनिषदि च (६।८)।

तच् चक्षुर् देवहितं पुरस्ताच् छुक्रमुच्चरत्। इत्यादि

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदमन्त्रसंहितायाम् (३६।१४),
द्र.- शैशिरीय-शाकल-ऋग्वेद-मन्त्रसंहितायां च (७।६६।१६)।

श्रुतिषु तिथिशब्दप्रयोगोचितेषु स्थलेषु अहोरात्रशब्दस्य प्रयोगस्य नानावेद-शाखासूदाहरणानि यथा–

अहोरात्रेभ्यः स्वाहाऽर्द्धमासेभ्यः स्वाहा मासेभ्यः स्वाहऽ ऋतुभ्यः स्वाहार्तवेभ्यः स्वाहा संवत्सराय स्वाहा। इति

–माध्यन्दिनीयवाजसनेयि-शुक्लयजुर्वेदमन्त्रसंहितायाम् (२२।२८),
मैत्रायणीयकृष्णयजुर्वेदसंहितायां च (३।१२।७)।

उषसस् ते कल्पन्तामहोरात्रास् ते कल्पन्तामर्द्धमासास् ते कल्पन्ताम् मासास् ते कल्पन्तामृतवस् ते कल्पन्तां संवत्सरस् ते कल्पताम्। इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदमन्त्रसंहितायाम् (२७।४५)।

अहोरात्रेभ्यस् स्वाहाऽर्धमासेभ्यस् स्वाहा मासेभ्यस् स्वाहर्तुभ्यस् स्वाहा संवत्सराय स्वाहा। इति

–काठककृष्णयजुर्वेदसंहितायाम् (४१।६), आत्रेय-तैत्तिरीय-
कृष्णयजुर्वेदसंहितायाम् (७।१।१५।१), आत्रेय-तैत्तिरीय-
कृष्णयजुर्वेदब्राह्मणे च (३।१।६।१)।

सोऽहोरात्रैः सोऽर्धमासैः स मासैः स ऋतुभिः परियज्ञं बभूव।
संवत्सरस्य महिमानमेतं शुनासीरमिन्द्रमद्या हुवेम॥ इति

–मैत्रायणीयकृष्णयजुर्वेदसंहितायाम् (४।१०।६)।

यानि दारूणि ते मासा ये स्थूला अङ्गारास् ते ऋतवो येऽणीयांसस् तेऽर्धमासा मुर्मुरा अहोरात्राणि। इति

–काठककृष्णयजुर्वेदसंहितायाम् (६।७), कपिष्ठलकठकृष्णयजुर्वेदसंहितायाम्
(४।६), मैत्रायणीयकृष्णयजुर्वेदसंहितायां च (१।८।६)।

पञ्चदश रात्रीर् दीक्षितस् स्यात् पञ्चदशाऽर्धमासस्य रात्रयोऽर्धमासशस् संवत्सर आप्यते संवत्सरो विराड् विराजमेवाऽऽप्नोति। इति

–काठककृष्णयजुर्वेदसंहितायाम् (२१।५), कपिष्ठलकठकृष्णयजुर्वेदसंहितायाम्
(३१।२०), आत्रेय-तैत्तिरीयकृष्णयजुर्वेदसंहितायां च (५।६।७।२)।

ऋतवस् ते कल्पन्तां मासास् ते कल्पन्तामर्धमासास् ते कल्पन्तामहोरात्राणि ते कल्पन्ताम्। इति

–काठककृष्णयजुर्वेदसंहितायाम् (४०।६)।

अर्धमासाः परूंषि ते मासाश् छ्यन्तु शिम्यन्तः।
अहोरात्राणि मरुतो विलिष्टं सूदयन्तु ते॥ इति

–काठककृष्णयजुर्वेदसंहितायाम् (५०।६), आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायां च (५।२।१२।१)।

अहोरात्रे निमेषोऽर्धमासाः पर्वाणि मासाः सन्धानान्यृतवोऽङ्गानि संवत्सर आत्मा। इति

–आत्रेय-तैत्तिरीयकृष्णयजुर्वेदसंहितायाम् (७।५।२५।१)।

पूर्वपक्षाश् चितयोऽपरपक्षाः पुरीषमहोरात्राणीष्टकाः। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायाम् (५।७।६।६), आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदब्राह्मणे (३।१०।४।१-२) आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदारण्यके च (४।१९।१),

चन्द्रमा वा अकामयताऽहोरात्रानर्धमासान् मासानृतून् संवत्सरमाप्त्वा चन्द्रमसः सायुज्यं सलोकतामाप्नुयामिति। इति

–आत्रेय-तैत्तिरीयकृष्णयजुर्वेदब्राह्मणे (३।१।६।१)।

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि।
कला मुहूर्ताः काष्ठाश् चाऽहोरात्राश् च सर्वशः।
अर्धमासा मासा ऋतवः संवत्सरश् च कल्पताम्। इति

–आत्रेय-तैत्तिरीयकृष्णयजुर्वेदाऽऽरण्यके (१०।१)।

तस्यामेतस्यां संहितायां ध्वंसयो निमेषाः काष्ठाः कलाः क्षणा मुहूर्ता अहोरात्रा अर्धमासा मासा ऋतवः संवत्सराश् च सन्धीयन्ते। इति

–शाङ्खायनीयऋग्वेदारण्यके (७।२१)।

संवत्सरो वै प्रजापतिरेकशतविधस् तस्याऽहोरात्राण्यर्धमासा मासा ऋतवः षष्टिर् मासस्याऽहोरात्राणि मासि वै संवत्सरस्याऽहोरात्राण्याप्यन्ते चतुर्विंशतिरर्धमासास् त्रयोदश मासास् त्रय ऋतवस् ता शतं विधाः संवत्सर एवैकशततमी विधा। इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणे (१०।२।६।१)।

एत उ वाव लोका यदहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरः। इति च

–तत्रैव (१०।२।६।७)।

यथा संवत्सरस्याऽहोरात्राण्यर्धमासा मासा ऋतव एवमस्यैतानि सर्वाणि रूपाणि। इति च

–तत्रैव (१०।४।३।२१)।

मासाः पर्वाण्यर्धमासा नाड्योऽहोरात्राणि रजतसुवर्णानि पत्राणि। इति च

–तत्रैव (१०।४।५।२)।

ऋतवोऽङ्गानि मासाश् चाऽर्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा। इति च

–तत्रैव (१०।६।४।१), काण्व-वाजसनेयि-शुक्लयजुर्वेद-बृहदारण्यकोपनिषदि च (१।१।१)।

अहोरात्राण्येवैतदर्धमासान् मासानृतून् संवत्सरे प्रतिष्ठापयति तानीमान्यहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरे प्रतिष्ठिताः। इति च

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणे (१२।८।३।१४)।

तिथिगणनायां चन्द्रवृद्धिक्षयावपि विशेषकौ भवत इत्यत्र श्रौतं लिङ्गं यथा–

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम्।
भागं देवेभ्यो विदधात्यायन् प्र चन्द्रमास् तिरते दीर्घमायुः॥ इति

–शैशिरीयशाकल-ऋग्वेदमन्त्रसंहितायाम् (१०।८५।१९), काठककृष्णयजुर्वेद-संहितायाम् (१०।१२), मैत्रायणीयकृष्णयजुर्वेदसंहितायाम् (४।१२।२), आत्रेय-तैत्तिरीयकृष्णयजुर्वेदसंहितायां च (२।४।१४।१)।

एतस्य मन्त्रस्य व्याख्यानं च यास्कमुनिना कृतं यथा–"नवोनवो भवति जायमान इति पूर्वपक्षादिमभिप्रेत्य। अह्नां केतुरुषसामेत्यग्रम् इत्यपरपक्षान्तमभिप्रेत्य। आदित्यदैवतो द्वितीयः पाद इत्येके। भागं देवेभ्यो विदधात्यायन् इति अर्धमासेज्यामभिप्रेत्य। प्रवर्धयते चन्द्रमा दीर्घमायुः" इति (११।१।६)।

एतस्यैव मन्त्रस्य यास्कव्याख्यामुपजीव्य कृतं सायणविद्वन्मण्डलकृतं व्याख्यानं यथा–"अयं चन्द्रमा जायमानः प्रतिदिनं जायमान एकैककलाधिक्येनोत्पद्यमानः सन् नवोनवो भवति प्रतिदिनं नूतन एव भवति। एतत् पूर्वपक्षाद्यभिप्रायम्। तथा अह्नां दिवसानां केतुः प्रज्ञापकः प्रतिपदादीनां तिथीनां चन्द्रकलाह्रासवृद्ध्यधीनत्वात्। तादृशश् चन्द्रमा उषसां प्रभातीनाम् अग्रमेति। एतत् कृष्णपक्षान्ताभिप्रायम्। केचनैतं पादमादित्यदैवत्यमाहुः। तस्मिन् पक्षेऽह्नां केतुत्वमुषसामग्रगतिश् च प्रसिद्धे। देवेभ्यो भागं हविर्भागं विदधाति करोत्युभयपक्षान्ते। किं कुर्वन् आयन् प्रतिदिनं ह्रासवृद्ध्या पक्षान्तमभिगच्छन्। एतदर्धमासाभिप्रायम्। चन्द्रमा उक्तलक्षणो देवः दीर्घमायुः तिरते वर्धयति" इति (ऋग्वेदसंहितायाम् १०।८५।१९)।

एतस्यैव मन्त्रस्य व्याख्यानं तैत्तिरीयसंहिताव्याख्यायां सायणविद्वन्मण्डल्या एवं कृतम्—"आदित्यस्य चन्द्रदीप्तिकारणत्वाच् चन्द्राभेदेनाऽऽदित्य इह स्तूयते। चन्द्रमा जायमानः प्रतिदिनमुदयं गच्छन् नवोनवो भवति। शुक्लप्रतिपद्येककला-युक्तः द्वितीयायां कलाद्वययुक्तः इत्येवं कलावृद्धि-क्षयाभ्यां प्रतिदिनं नूतनत्वम्। चन्द्रवद् दीप्तिकारणभूत आदित्योऽपि प्रतिदिनं नूतनो भवति। स्वरूपे वृद्धिक्षया-भावेऽपि दक्षिणोत्तरगतिभ्यां नूतनत्वम्। स चाऽह्नां केतुश् चिह्नम्, तस्मिन्नुदिते सति अहरिदमिति ज्ञायमानत्वात्। उषसां प्रभातकालानामग्र उपक्रमे प्राच्यामुदयमेति, तदनुरोधेन प्रातरग्निहोत्रादीनां प्रवृत्तेर् देवेभ्यो भागं विदधाति। तादृशश् चन्द्रकला-वृद्धिक्षयहेतुरादित्य इह कर्मणि आगच्छन् दीर्घमायुः प्रतिरति प्रकर्षेण ददातु।" इति।

अत्रैतस्य मन्त्रस्य ऋग्वेदिनाम् आश्वलायनश्रौतसूत्रे (९।८।३) शाङ्खायन-श्रौतसूत्रे (१४।३२।४) च चान्द्र्यामिष्टौ विनियोगः प्रतिपादितः, कृष्णयजुर्वेदिनां त्वस्य मन्त्रस्याऽऽदित्यचरौ विनियोगः (बौधायनश्रौतसूत्रे १३।२८) इति विनियोगानुसारमर्थः कृतोऽवगम्यते इति च बोद्धव्यम्। तैत्तिरीयसंहितायां मन्त्रपाठेऽपि अग्रे इति **तिरति** इति च पठ्यते। अथर्ववेदेऽप्ययं मन्त्रः पठ्यते। तथाहि—

नवोनवो भवसि जायमानोऽह्नां केतुरुषसामेष्यग्रम्।
भागं देवेभ्यो विदधास्यायन् प्र चन्द्रमस् तिरसे दीर्घमायुः॥ इति
—शौनकिनाम् अथर्ववेद-मन्त्रसंहितायाम् (७।८१।२, १४।१।२४)।

"सत्येनोत्तभिता (१४।१।१) पूर्वापरम् (७।८१।१) इत्युपदधीत" इति कौशिक-सूत्रवचनेन (७५।६) विवाहहोमविशेषे आथर्वणिकैर् विनियुक्त इत्युक्तोऽयं मन्त्रः सायणविद्वन्मण्डल्या एवं व्याख्यातः—"हे चन्द्रमः त्वं जायमानः शुक्लपक्षप्रति-पदादिषु एकैककलाधिक्येन उत्पद्यमानः सन् नवोनवः पुनःपुनरभिनवो भवसि प्रतिदिनं नूतन एव भवसि। "अनुदात्तं च" (पाणिनीयव्याकरणे ८।१।३) इति द्वितीयो नवशब्दोऽनुदात्तः। किञ्च *अह्नां तिथीनां* केतुः केतुवत् केतयिता ज्ञापयिता प्रति-पदादीनां तिथीनां चन्द्रकलाह्रासवृद्ध्यधीनत्वात्। तादृशस् त्वमुषसां रात्रीणाम् अग्र-मेषि अग्रणीर् भवसि। रात्रीणां कर्तृत्वात्। यद् वा अह्नां केतुः अहरवसाने शुक्लपक्षे प्रतीच्यां दिशि दृश्यसे कृष्णपक्षे तु उषसां रात्रीणामग्रम् अवसानमेषि। प्राच्यां दिशि दृश्यसे इत्यर्थः। केचन एतं पादम् आदित्यदेवत्यमाहुः। तस्मिन् पक्षे अह्नां केतुत्वम् उषसाम् अग्रगतिश् च सूर्यस्य प्रसिद्धे। एवम् आयन् आगच्छन् प्रतिदिनं ह्रास-वृद्धिभ्यां पक्षान्तम् अभिगच्छन् हे चन्द्रमः त्वं देवेभ्यो भागं हविर्भागं विदधासि करोषि। *तिथिविशेषरूपपर्वनिबन्धनत्वात् सर्वयागानाम्।* एवमुक्तलक्षण हे चन्द्रमः त्वं दीर्घमायुः प्रतिरसे। प्रपूर्वस् तिरतिर् वर्धनार्थः। प्रवर्धयसि" इति।

अत्र केचिद् एताभ्यां मन्त्राभ्यां चन्द्रकलापरिच्छिन्नायास् तिथेः सूचितत्वात् ब्रह्मगुप्तादिभिः प्रचारितः स्फुटतिथिपक्ष एव वैदिको न तु अहोरात्रात्मकतिथिपक्ष इति प्रतिपिपादयिषन्ति, किन्तु एताभ्यां मन्त्राभ्यां प्रत्यहोरात्रमहोरात्रव्यवधानेनोदयमानस्य चन्द्रस्यैव नवनवताया उल्लिखितत्वात् तिथेरहोरात्रात्मकताया एव सूचकावेतौ मन्त्रौ ज्ञेयौ। सायणविद्वन्मण्डलीव्याख्यानं तु वैक्रमाब्दानां पञ्चदशे शतके वर्तमानेभ्यः सायणादिभ्योऽत्यन्तमेव प्राचीनेन वैक्रमाब्दानां सप्तमे शतके वर्तमानेन ब्रह्मगुप्तेन प्रतिपादितस्य शासकाद्याश्रयजातबलस्य स्फुटतिथिपक्षस्य प्रभावे पतितं ज्ञेयम्। ब्राह्मस्फुटसिद्धान्ते (११।२) संहिताङ्गकारस्य अधिमासाऽवमरात्रस्फुटतिथ्यज्ञानमुद्घोषयतो नास्तिकस्य ब्रह्मगुप्तस्य वचनमपि अविवेकेन धर्मे प्रमाणत्वेन हेमाद्रि-माधव-प्रभृतिभिर् गृहीतं दृश्यत एव चतुर्वर्गचिन्तामणि-कालनिर्णयाध्याय-कालमाधवादिषु। अतश्च सायणादिव्याख्यानमुपेक्ष्यैतयोर् मन्त्रयोस् तिथेः सामान्यतयाऽहोरात्रात्मकतायाः सूचकत्वमेवाऽऽस्थेयम्। एवमेव निर्णीय आर्चज्योतिषे, याजुषज्योतिषे, आथर्वणज्योतिषे, प्राचीनात् कालात् प्रभृति अनुवृत्ते कायस्थैः प्रयुक्ते मितिपत्रे प्रतिपादिते शुदि-बदिव्यवहारे (शुक्लपक्षदिन-बलक्षपक्षदिनव्यवहारे) च वैदिकपरम्परायां तिथेस् सामान्यतयाऽऽहोरात्रात्मकत्वमेव स्वीकृतमिति बोध्यम्। कायस्थैर् आङ्लशासनप्रारम्भात् पूर्वं लेख्येषु प्रयुज्यमानं तिथिमितिपत्रमन्वेष्टव्यमितिहासलेखकैः। वैदिकानां तिथीनामहोरात्रात्मकत्वादेव महाभारतेऽपि "कृष्णस्य पक्षस्य चतुर्दशाहे" (११।२१।१३) इति "नक्षत्रेऽहनि च ध्रुवे" (१४।६३।१८) इति, "अद्यैव नक्षत्रमहश् च पुण्यम्" (१४।६५।१४) इति च तिथिशब्दस्थानेऽहश्शब्दस्य प्रयोगः कृतो दृश्यते। यत् तु तत्र (१४।६३।१८) नीलकण्ठस्य "ध्रुवे नक्षत्रे रोहिण्यामुत्तरात्रये च अहनि वारे ध्रुवे रविवारे उत्तरार्केऽमृतसिद्धयोगे इत्यर्थः" इति व्याख्यानं तत् तु चिन्त्यमेव महाभारतेऽन्यत्र रविवार-सोमवारादीनां वाराणामनुल्लिखितत्वात्, वार-प्रयुक्तव्रतादीनां वारप्रयुक्तश्राद्धादीनां च तत्राऽप्रतिपादितत्वाच्च। वैदिकानां तिथीनामहोरात्रात्मकत्वादेव याज्ञवल्क्यस्मृतावपि तिथिशब्दस्थाने "समा-मास-तदर्धा-ऽहर्-नाम-जात्यादिचिह्नितम्" इत्यादौ (२।६, २।८५) अहश्शब्दस्य प्रयोगः कृतोऽस्ति। मिताक्षरोद्धृते (२।६) "वर्षर्तुमासपक्षाहोवेलादेशप्रदेशवत्" इति वचनेऽपि तिथिशब्दस्थानेऽहश्शब्दस्यैव प्रयोगो दृश्यते। अहश्शब्दस्य तिथिपरत्वं विज्ञानेश्वरेण कण्ठरवेणाऽप्युक्तमेवास्ति (२।८५)। वेदाङ्गज्योतिषेऽपि "एकान्तरेऽह्नि" (श्लो. ११) इत्यत्र तिथिशब्दप्रयोगयोग्ये स्थानेऽहश्शब्दः प्रयुक्तो दृश्यते। "अपरपक्षास्याऽयुक्ष्वहस्सु वा" इति हिरण्यकेशिगृह्यसूत्रे (२०।४।१) च तिथ्यर्थेऽहश्शब्दः प्रयुक्तो दृश्यते।

एवं च वैदिकानां तिथयोऽपि सौरचान्द्राः, पक्षा अपि सौरचान्द्राः, मासा अपि सौरचान्द्राः, ऋतवोऽपि सौरचान्द्रा एव, वर्षमपि सौरचान्द्रमेवेति **धर्मकृत्यार्थमयने**

अपि सौरचान्द्रे एव गृह्येते इति बोद्धव्यम्। वर्षस्य सौरचान्द्रत्वमृग्वेद एवाऽधिमास-व्यवस्थाया दर्शनादवगम्यते। अयनयोः सौरचान्द्रत्वमपि लगधमुनिना अयनान्त एवाऽधिमासस्य प्रतिपादित्वात्, अयनपशुयागस्याऽपि कल्पसूत्रकारैः पक्षान्त एव विहितत्वात्, वर्षस्य सौरचान्द्रत्वे तद्घटकयोरयनयोस् तद्घटकानामृतूनामपि सौरचान्द्रत्वस्यैवौचित्याद् आवश्यकत्वाच् चाऽवगम्यते। लगधमुनिना सूर्याचन्द्र-मसोः सहैवोदगयनं प्रतिपाद्य सूर्यस्योदगयन-दक्षिणायनयोः पृथगुल्लिखितत्वाच् च (श्लो.७) एतत् स्पष्टयैव ज्ञायते।

२५. वेदाङ्गज्योतिषोक्ताया अयनव्यवस्थाया दिव्याहोरात्र-मासवर्षगणनामूलक-युग-महायुग-चतुर्युगी-मन्वन्तरादिगणनानुकूलत्वम्

वर्ष-युग-महायुग-चतुर्युगी-मन्वन्तरादीनां सर्वेषामेव सौरचान्द्रत्वादयनस्या-ऽपि सौरचान्द्रत्वमेवोचितमिति वेदाङ्गज्योतिषग्रन्थाभिप्रेताया अयनान्ताधिमास-व्यवस्थायुताया अयनव्यवस्थायाः सर्वथा दिव्याहोरात्रमासवर्षगणनामूलक-युग-महायुग-चतुर्युगी-मन्वन्तरादि-गणनानुकूलत्वं च वेद्यम्।

२६. श्रौतस्मार्तधर्मकर्मसु चान्द्रर्तूनामेव ग्राह्यत्वाद् वेदाङ्ग-ज्योतिषग्रन्थस्य चान्द्रर्तुप्रतिपादने तात्पर्यम्

वेदमन्त्रोक्तास् तपस्-तपस्य-मधु-माधव-प्रभृतयो मासा मुख्यतया चान्द्रा एवेति तत्तन्मासद्वयघटिताश् शिशिर-वसन्तादय ऋतवोऽपि मुख्यतया चान्द्रा एवा-ऽवगम्यन्ते। वेदमन्त्रोक्तानां तपस्-तपस्य-मधु-माधवादीनां मासानां मुख्यतया चान्द्र-त्वमनुपदमेव स्फुटीकरिष्यते। वेदोक्तानां शिशिर-वसन्तादीनां चान्द्रत्वमत्र विशेषेण प्रतिपाद्यते। तत्राऽधोलिखिते ऋङ्मन्त्रे चन्द्रमस ऋतुविधायकत्वमुक्तं दृश्यते—

पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परि यातो ऽ अध्वरम्।
विश्वान्यन्यो भुवनाऽभिचष्ट ऋतूँरन्यो विदधज् जायते पुनः॥ इति

—शैशिरीय-शाकल-ऋग्वेद-मन्त्रसंहितायाम् (१०।८५।१८)।

अस्य मन्त्रस्य सायणादपि प्राचीनेन स्कन्दस्वामिव्याख्यासमीक्षापूर्वकम् ऋग्वेदसंहिताव्याख्यां कुर्वता वेङ्कटमाधवेन कृता व्याख्या यथा—"कश्चित् पूर्वं गच्छति अन्यस् तस्य पृष्ठतः। एवमेतौ पूर्वापरं प्रज्ञया सह चरतः। शिशू क्रीडन्तौ परिगच्छतो यज्ञम्। तयोः अन्यः विश्वानि भुवनानि अभिपश्यति आदित्यः। ऋतून् अन्यः कुर्वन् मासानर्धमासाँश् च जायते पुनःपुनः चन्द्रमाः" इति।

अस्यैव मन्त्रस्य सायणविद्वन्मण्डलीकृता व्याख्या च— "कश्चित् पूर्वं गच्छति सूर्यः। अन्यस् तमनुगच्छति चन्द्रमाः। एवं पूर्वापरं पौर्वापर्येण मायया स्वप्रज्ञानेन एतौ आदित्यचन्द्रौ चरतः गच्छतो दिवि। तौ शिशू। शिशुवद् भ्रमणाज् जायमानत्वाद् वा शिशू इत्युच्येते। शिशू सन्तौ क्रीडन्तौ अन्तरिक्षे विहरन्तौ अध्वरं परि यातः यज्ञं प्रतिगच्छतः। तयोः अन्यः आदित्यः विश्वानि भुवना भुवनानि अभिचष्टे पश्यति। ऋतून् वसन्तादीन् अन्यः चन्द्रमाः विदधत् कुर्वन् मासानर्धमासाँश् च कुर्वन् पुनः जायते। यद्यप्युभयोरपि पुनर्जनिरस्ति तथापि सूर्यस्य सर्वदा प्रवृद्धेरुदयो नाऽभिप्रेतः। चन्द्रस्य तु ह्रासवृद्धिसद्भावात् पुनःपुनर् जायत इत्युक्तिर् युक्ता। 'चन्द्रमा वै जायते पुनः' (तैत्तिरीयब्राह्मणे ३।९।५।४) इत्यादिश्रुतेः" इति।

एष मन्त्रः शौनकिभिः स्वल्पेन पाठभेदेन पठितो यथा—

पूर्वापरं चरतो मायया॑तौ शिशू क्रीडन्तौ परियातोऽर्णवम्।
विश्वाऽन्यो भुवना विचष्ट ऋतूँरन्यो विदधज् जायसे नवः॥ इति।

—शौनकिनाम् अथर्ववेद-मन्त्रसंहितायाम् (७।८१।१)।

एतस्य मन्त्रस्य सायणविद्वन्मण्डलीकृता व्याख्या च यथा—"कश् चित् पूर्वो गच्छति सूर्यः। अन्यस् तमनुचरति चन्द्रमाः। एवमेतौ सूर्यचन्द्रौ पूर्वापरं क्रियाविशेषणमेतत्। पौर्वापर्येण मायया सह चरतः द्युलोके गच्छतः। तौ शिशुवद् भ्रमणाज् जायमानत्वाद् वा शिशू इत्युच्येते। शिशू सन्तौ क्रीडन्तौ विहरन्तौ अर्णवम्, अन्तरिक्षनामैतत्, अर्णांसि उदकानि अस्मिन् सन्तीति अर्णवः, 'अर्णसो लोपश् च' (पाणिनीयव्याकरणवार्त्तिके ५।२।१०९) इति वप्रत्ययः। सकारलोपश् च। अन्तरिक्षं परियातः परिगच्छतः। तयोरन्यः आदित्यो विश्वा विश्वानि भुवना भुवनानि भूतजातानि विचष्टे पश्यति। 'एकान्याभ्यां समर्थाभ्याम्' (पाणिनीयव्याकरणवार्त्तिके ८।१।६५) इति निघातनिषेधः। 'तिङि चोदात्तवति' (तत्रैव ८।१।७१) इति गतेर् निघातः। अन्यश् चन्द्रमाः ऋतून् वसन्तादीन् तदवयवभूतान् मासान् अर्धमासाँश् च विदधत् कुर्वन् नवः नूतनः जायते उत्पद्यते। यद्यपि उभयोर् जनिरस्ति, तथापि सूर्यस्य सर्वदा प्रवृद्धेः उदयो नाऽभिप्रेतः, चन्द्रस्य तु कलाह्रासवृद्धिसद्भावाद् नवो जायत इत्युक्तिर् युक्ता, 'चन्द्रमा जायते पुनः' (माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रार्षसंहितायाम् २३।१०) इत्यादिश्रुतेश् च" इति।

अत्र "जायसे" इति मन्त्रे पाठोऽस्ति, शौनकिनामथर्ववेदमन्त्रसंहितायाम् उत्तरमन्त्रेऽपि "नवोनवो भवसि" इत्यादौ मध्यमपुरुषान्तपाठादत्राऽपि मध्यमपुरुषान्तपाठ एव समुचितो भाति, व्याख्यायां कथं प्रथमपुरुषान्तपाठ उपात्त इति विचार्यमेतत्। मन्ये ऋग्वेदमन्त्रसंहिताव्याख्यानुसरणसंरम्भाद् व्याख्यायां प्रथम-

पुरुषान्तपाठ आपतित इति। उत्तरमन्त्रव्याख्यायां तु मध्यमपुरुषान्तपाठा एवोपात्ता दृश्यन्ते। प्रासङ्गिकमेतदुक्तम्।

आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदाऽऽरण्यके तु **"चन्द्रमाः षड्ढोता स ऋतून् कल्पयति"** (३।७।३) इति स्पष्टतया चन्द्रमस ऋतूनां कल्पकत्वमुक्तं दृश्यते।

उक्तयोः श्रुतिसन्दर्भयोर् मननेनैव आपस्तम्बसूत्रध्वनितार्थकारिकाख्ये ग्रन्थे कातीयगृह्यकारिकायां रेणुदीक्षितेनाऽप्युल्लिखितेन सायणादपि प्राचीनेन त्रिकाण्ड-मण्डन इति प्रसिद्धेन भास्करमिश्रेणैवमुक्तमिति हेमाद्रिणा चतुर्वर्गचिन्तामणेः परि-शेषखण्डे कालनिर्णये तद्वचनान्युल्लिखितानि सन्ति। तथाहि—

श्रौतस्मार्तक्रियाः सर्वाः कुर्याच् चान्द्रमसर्तुषु।
तदभावे तु सौरर्तुष्विति ज्योतिर्विदां मतम्॥
ऋतौ चान्द्रनिमित्तत्वं मन्त्रवर्णात् प्रतीयते।
ऋतूनन्यो विदधज् जायते पुनरित्यतः॥
पुनःपुनर् यो जायते स एव विदधदृतून्।
चन्द्रः पुनःपुनर्जन्मा तस्माच् चन्द्रवशादृतुः॥
होतृप्रकरणे चन्द्रं प्रकृत्य प्राह तित्तिरिः।
स ऋतून् कल्पयतीति चन्द्रोऽयमृतुकल्पकः॥ इति (पृ.१४)

माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशतपथब्राह्मणेऽपि ऋतुभिर् हि सं-वत्सरश् चन्द्रमसा सम्बद्ध इति **"चन्द्रमसि ह्ययं संवत्सर ऋतुभिरासक्तः"** इति वाक्येन प्रतिपादितमस्ति (६।७।१।१९)।

माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदमन्त्रार्षसंहितायाम् आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायां काठक-कृष्णयजुर्वेद-संहितायां कपिष्ठलकठकृष्णयजुर्वेद-संहितायाम् मैत्रायणीयकृष्णयजुर्वेदसंहितायां ब्राह्मणेषु चाऽऽगतैर् अर्धमासरूप-पक्ष-मास-ऋतूनां क्रमबद्धैरुल्लेखैश् च वैदिकानामृतूनां चान्द्रमासद्वयात्मकत्वेन चान्द्रत्वस्य बोधनं क्रियत इत्यपि बोध्यम्। ते चोल्लेखा यथा—

अहोरात्रेभ्यः स्वाहाऽर्द्धमासेभ्यः स्वाहा मासेभ्यः स्वाहऽ ऋतुभ्यः स्वाहार्त्तवेभ्यः स्वाहा संवत्सराय स्वाहा। इति

—माध्यन्दिनीयवाजसनेयि-शुक्लयजुर्वेदमन्त्रसंहितायाम् (२२।२८),
मैत्रायणीयकृष्णयजुर्वेदसंहितायां च (३।१२।७)।

उषसस् ते कल्पन्तामहोरात्रास् ते कल्पन्तामर्द्धमासास् ते कल्पन्ताम् मासास् ते कल्पन्तामृतवस् ते कल्पन्तां संवत्सरस् ते कल्पताम्। इति

—माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदमन्त्रसंहितायाम् (२७।४५)।

अहोरात्रेभ्यस् स्वाहाऽर्धमासेभ्यस् स्वाहा मासेभ्यस् स्वाहर्तुभ्यस् स्वाहा संवत्सराय स्वाहा। इति

–काठककृष्णयजुर्वेदसंहितायाम् (४१।६), आत्रेयतैत्तिरीय-कृष्णयजुर्वेदसंहितायाम् (७।१।१५।१), आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदब्राह्मणे च (३।१।६।१)।

सोऽहोरात्रैः सोऽर्धमासैः स मासैः स ऋतुभिः परियज्ञं बभूव।
संवत्सरस्य महिमानमेतं शुनासीरमिन्द्रमह्या हुवेम॥ इति

–मैत्रायणीयकृष्णयजुर्वेदसंहितायाम् (४।१०।६)।

अहोरात्रे निमेषोऽर्धमासाः पर्वाणि मासाः सन्धानान्यृतवोऽङ्गानि संवत्सर आत्मा। इति

–आत्रेय-तैत्तिरीयकृष्णयजुर्वेदसंहितायाम् (७।५।२५।१)।

यानि दारूणि ते मासा ये स्थूला अङ्गारास् ते ऋतवो येऽणीयांसस् तेऽर्धमासा मुर्मुरा अहोरात्राणि। इति

–काठककृष्णयजुर्वेदसंहितायाम् (६।७), कपिष्ठलकठकृष्णयजुर्वेदसंहितायाम् (४।६), मैत्रायणीयकृष्णयजुर्वेदसंहितायां च (१।८।६)।

ऋतवस् ते कल्पन्तां मासास् ते कल्पन्तामर्धमासास् ते कल्पन्तामहोरात्राणि ते कल्पन्ताम्। इति

–काठककृष्णयजुर्वेदसंहितायाम् (४०।६)।

तस्यामेतस्यां संहितायां ध्वंसयो निमेषाः काष्ठाः कलाः क्षणा मुहूर्ता अहोरात्रा अर्धमासा मासा ऋतवः संवत्सराश् च सन्धीयन्ते। इति

–शाङ्खायनीयऋग्वेदारण्यके (७।२१)।

चन्द्रमा वा अकामयताऽहोरात्रानर्धमासान् मासानृतून् संवत्सरमाप्त्वा चन्द्रमसः सायुज्यं सलोकतामाप्नुयामिति। इति

–आत्रेय-तैत्तिरीयकृष्णयजुर्वेदब्राह्मणे (३।१।६।१)।

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि।
कला मुहूर्ताः काष्ठाश् चाऽहोरात्राश् च सर्वशः।
अर्धमासा मासा ऋतवः संवत्सरश् च कल्पताम्। इति

–आत्रेय-तैत्तिरीयकृष्णयजुर्वेदाऽऽरण्यके (१०।१)।

आर्यावर्त पुस्तकालय

संवत्सरो वै प्रजापतिरेकशतविधस् तस्याऽहोरात्राण्यर्धमासा मासा ऋतवः षष्टिर् मासस्याऽहोरात्राणि मासि वै संवत्सरस्याऽहोरात्राण्याप्यन्ते चतुर्विंशतिरर्धमासास् त्रयोदश मासास् त्रय ऋतवस् ता शतं विधाः संवत्सर एवैकशततमी विधा। इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणे (१०।२।६।१)।

एत उ वाव लोका यदहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरः। इति च

–तत्रैव (१०।२।६।७)।

यथा संवत्सरस्याऽहोरात्राण्यर्धमासा मासा ऋतव एवमस्यैतानि सर्वाणि रूपाणि। इति च

–तत्रैव (१०।४।३।२१)।

ऋतवोऽङ्गानि मासाश् चाऽर्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा। इति च

–तत्रैव (१०।६।४।१), काण्व-वाजसनेयि-शुक्लयजुर्वेद-बृहदारण्यकोपनिषदि च (१।१।१)।

अहोरात्राण्येवैतदर्धमासान् मासानृतून् संवत्सरे प्रतिष्ठापयति
तानीमान्यहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरे प्रतिष्ठिताः। इति च

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणे (१२।८।३।१४)।

उक्तविधां वैदिकानां वेदशास्त्रानुसारिणीं परम्परां विचार्यैव हेमाद्रिणा चतुर्वर्गचिन्तामणेः परिशेषकाण्डे कालनिर्णये (पृ.१४) त्रिकाण्डमण्डनकारिकाः प्रदर्श्य श्रौतस्मार्तक्रियासु मुख्यतया चान्द्राणामेवर्तूनां ग्राह्यत्वं प्रतिपादितम्। तथैव माधवेनाऽपि भास्करमिश्र-हेमाद्र्याद्यनुयायिना कालमाधवे द्वितीये प्रकरणे ऋतुनिर्णये **"ते च वसन्ताद्यृतवो द्विविधाः चान्द्राः सौराश् च। चैत्रादयश् चान्द्राः। तच् चोदाहृतं मधुश् च माधवश् चेत्यादिना। न च तत्र चैत्रादयो नोक्ता इति शङ्कनीयम्, मध्वादीनां चैत्रादिपर्यायत्वात्"** इति (पृ.४१) लिखितं दृश्यते। एतेनाऽपि वेदमन्त्रेषूल्लिखितानां मधु-माधवादिमासद्वयात्मकानामृतूनां चान्द्रत्वं स्वीक्रियते स्म वैदिकपरम्परायामित्येतावत् तु स्पष्टमेवाऽस्ति। निर्णयसिन्धुकारेण कमलाकरभट्टेनाऽपि निर्णयसिन्धोः प्रथमे परिच्छेदे ऋतुनिर्णयप्रकरणे **"ऋतुर् मासद्वयात्मा। मलमासे तु मासद्वयात्मक एको मासः, तेन मासद्वयात्मकत्वमविरुद्धम्। स द्वेधा चान्द्रः सौरश् च, चैत्रारम्भो वसन्तादिश् चान्द्रः, मीनारम्भो मेषारम्भो वा सौरः, मीनमेषयोर् मेषवृषयोर् वा वसन्त इति बौधायनोक्तेः। अनयोर् विनियोगमाह त्रिकाण्डमण्डनः 'श्रौतस्मार्तक्रियाः सर्वाः कुर्याच् चान्द्रमसर्तुषु। तदभावे तु सौरर्तुष्विति ज्योतिर्विदां मतम्'"** इत्युल्लिखितमेव। एवमेव भगवन्तभास्करकारेण नीलकण्ठभट्टेन समयमयूखे ऋतुनिर्णयप्रकरणे (पृ.१७२-१७३), स्मृतिकौस्तुभकारेण आपदेवात्मजेनाऽनन्तभट्टेन स्मृतिकौस्तुभस्य संवत्सरदीधितौ ऋतुनिर्णयप्रकरणे (पृ.४५९), वीरमित्रोदयकारेण मित्रमिश्रेण वीरमित्रोदये समयप्रकाशे (पृ.१३-१४) च वेदप्रतिपादितानां मधु-माधवादिमासद्वयात्मकानामृतूनां चान्द्रर्तुत्वं प्रतिपादितमेवाऽस्ति। धर्मसिन्धावपि प्रथमे परिच्छेदे प्रारम्भभागे एव ऋतुनिर्णये "ऋतुर् द्विविधः सौरश् चान्द्रश् च, मीनारम्भो मेषारम्भो वा सूर्यराशिद्वयभोगात्मको वसन्तादिषट्संज्ञकः सौर ऋतुः, **चैत्रमारभ्य मासद्वयात्मको**

वसन्तादिषट्संज्ञकश् चान्द्रः, मलमासे तु किञ्चिदून-नवतिसङ्ख्यैर् दिनैश् चान्द्र ऋतुः, **श्रौत-स्मार्तादौ चान्द्रर्तुस्मरणं प्रशस्तम्"** इत्युक्तमेव। एवं च वैदिकानामृतूनां चान्द्रत्वं परम्परासम्मतमेव। एवं च वेदाङ्गज्योतिषग्रन्थेऽपि चान्द्राणामृतूनां प्रतिपादितत्वं स्वीकर्तव्यमेव। तत् प्रतिपादनं चाऽयनान्ताधिमासप्रतिपादनद्वारा (श्लो.३७) चान्द्रर्तु-सौरर्तु-सामञ्जस्यप्रतिपादनेनैव कृतं वेदितव्यम्। माघशुक्लप्रतिपदि युगस्य वर्षस्याऽयनस्य ऋतोर् मासस्य च सहैव प्रारम्भस्य सूचनेन च (श्लो.५, ६) एतत् सूचितं बोध्यम्। एवं च यत् सूर्यस्योदगयने दिनस्य वृद्धे रात्रेर् ह्रासस्य, सूर्यस्य दक्षिणायने दिनस्य ह्रासस्य रात्रेर् वृद्धेश्च प्रतिपादनम् (श्लो.८), यद् युगस्य वर्षेषु सूर्यस्योदगयनानां दक्षिणायनानां च प्रारम्भस्य तिथीनां (श्लो.९, ११) चान्द्रनक्षत्राणां (श्लो.१०) च प्रतिपादनं तदपि चान्द्र-सौरऋतूनां परस्परं सम्बन्धस्य प्रदर्शनायैव कृतं न तु सौरस्याऽयनस्य सौराणाम् ऋतूनां च श्रौत-स्मार्तकृत्येष्वाश्रयणायेति मन्तव्यम्, कल्पसूत्रकारैरयनमुखेऽयनाद्यन्तयोर् वा विहितस्याऽपि निरूढपशुबन्धयागस्य चान्द्रपर्वण्येव कर्तव्यताया उपदिष्टत्वात्, वेदाङ्गज्योतिषग्रन्थस्य यज्ञकालार्थसिद्धये प्रवृत्तत्वात्, **"अतश्च प्रकृतं बुद्ध्वा देशकालान्तराणि च। तन्त्रकर्तुरभिप्रायानुपायाँश् चाऽर्थमादिशेत्"** (चरकसंहितायाम् १।२६।३७) इति मुनिप्रणीतग्रन्थवचनव्याख्यासिद्धान्ताच् च। एतेन सौरर्तुविस्तारप्रतिपादनम् (श्लो.१०), विषुवत्तिथिनिरूपणम् (श्लो.२३), सौराऽब्दर्त्वयनमासपरिमाणप्रतिपादनम् (श्लो.२८) सूर्यनक्षत्रभोगकालप्रतिपादनम् (श्लो.३९), दिवसप्रमाणप्रतिपादनं च (श्लो.४०) व्याख्यातम्। एतच्च सर्वं लगधमुनिना **"इत्युपायसमुद्देशो भूयोऽप्येनं प्रकल्पयेत्"** (श्लो.४२) इति वचनेन ज्ञापितमेव। एतस्मिन् विषये सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्याऽनुसन्धानपत्रिकायां सारस्वत्यां सुषमायां (५१तमे वर्षे १-४ अङ्केषु) प्रकाशितो **"जैमिनीयधर्ममीमांसाशास्त्रनिर्णीतानां वैदिककृत्यकालानां चान्द्रमाननियतत्वम्"** इति प्रमोदवर्धनकौण्डिन्न्यायनस्य निबन्धोऽपि द्रष्टव्यः।

२७. वेदाङ्गज्योतिषग्रन्थे चान्द्रमासानामेव तात्पर्यविषयत्वम्

वैदिकानां तपस्-तपस्य-मधु-माधवादीनां मासानां मुख्यतया चान्द्रमासत्वं गते त्रयोविंशे प्रकरणे (पृ.१२७) सप्रमाणं विस्तरेण वेदमन्त्रसंहिताब्राह्मणग्रन्थवचनानि च प्रदर्श्य प्रतिपादितमेव। एतस्यां स्थितौ यज् जीमूतवाहनेन धर्मरत्ननामकधर्मशास्त्रनिबन्धान्तर्गते कालविवेके **"तपस्तपस्यादिपदानां सौरमासादिवचनत्वावधारणात्"** इति (पृ.१८), **"माघादिशब्दानामपि सौरनामत्वं श्रुतित एवाऽवधार्यते"** इति (पृ.१९) चोक्तम्, तत् तु श्रुतिवचनप्रतिकूलमेवाऽवगन्तव्यम्। अत्र वेदे मास्-शब्दस्य **"सूर्यामासा दृशे कम्"** (ऋ.८।९४।२) इत्यादिषु ऋग्वेदादिप्रयोगेषु चन्द्रवाचकत्वाद्

मासशब्द एव मुख्यतया चन्द्रकृतकालपरिमाणविशेषवाचक इत्यवगम्यते इत्यपि न विस्मरणीयम्। एतच् च **"तत्र सकारान्तं मासिति प्रातिपदिकं चन्द्रवाचि, तस्याऽयं काल इति मासः"** इति कालमाधवनिबन्धस्थमासनिर्णयप्रकरणवाक्यादपि स्पष्टं भवति। यद्यपि यास्केन **"मासो मानात्"** (४।४।६) इत्येवोक्तं तथापि मानं चन्द्रमसेति तदपि पूर्वोक्तव्याख्यानस्याऽविरुद्धमेव। हेमाद्रिणाऽपि चतुर्वर्गचिन्तामणौ परिशेषखण्डे कालनिर्णयेऽपि **"तस्माच् चान्द्रमासवचना एव चैत्रवैशाखादिशब्दाः"** इति निर्णयः कृतो दृश्यते (पृ.१४) इति, हेमाद्रिणा कालनिर्णये (पृ.१५) माधवेन कालमाधवे च (पृ.४१-४२) **"चैत्रो मासो मधुः प्रोक्तो वैशाखो मधवो भवेत्। ज्यैष्ठमासश् च शुक्रः स्यादाषाढः शुचिरुच्यते॥ नभोमासः श्रविणः स्यान् नभस्यो भाद्र इष्यते। इष आश्वयुजो मासः कार्त्तिकश् चोर्जसंज्ञकः॥ सहोमासो मार्गशिरः सहस्यः पौषनामकः। माघमासस् तपाः प्रोक्तस् तपस्यः फाल्गुनः स्मृतः॥"** इति ऋचां वचनमपि प्रदर्शितमस्ति इति च वैदिकानां तपस्-तपस्यादिमासानां मुख्यतया चान्द्रमासत्वमेव हेमाद्रिमाधवयोरपि सम्मतमेवेत्यवगम्यते। ऋग्वेदेऽपि **"अरुणो मासकृद् वृकः"** (१।१०५।१८) इत्यत्र चन्द्रमा मासकृत् इत्युक्तोऽवगम्यते। यद्यपि तत्र शाकल्येन "मा सकृत्" इति पदच्छेदः कृतस् तथापि निरुक्तकारेण मुनिना यास्केन शाकल्यकृतपदच्छेदमवधीर्य "अरुण आरोचनो मासकृन् मासानां चाऽर्धमासानां च **कर्ता भवति चन्द्रमा वृकः"** (५।४।२) इत्युक्तमस्ति। तस्य निरुक्तवाक्यस्य व्याख्याने स्कन्दस्वामिव्याख्यानुगामिना महेश्वरेण च "मासकृत् मासानां कर्ता। मन्त्रे तु मासः प्रदर्शनं यत आह अर्धमासानां चेति। विरूपैकशेषो वा मासार्धमासानां वेति। विरूपैकशेषो वा मासार्धमाससंवत्सरऋत्वयनाहोरात्राणामित्यर्थः। वृकश् चन्द्रमाः" इत्युक्तमस्ति। तथैव तस्य निरुक्तवाक्यस्य व्याख्याने दुर्गसिंहानुयायिना मुकुन्दवख्शीमहाशयेन च **"मासानाम् इति मासशब्दसम्बन्धादर्धमासशब्दोऽध्याहृतो भाष्यकारेण। तानपि ह्यसौ निर्मिमीत इति। उपलक्षणमेतदृत्वयनसंवत्सरादीनां कालविशेषाणाम् कर्ता तिथिविभागज्ञानस्य चन्द्रगत्यधीनत्वात्"** इत्युक्तमस्ति। तथैव ऋग्वेदव्याख्यायां सायणपण्डितमण्डलीकृतायां च **"मासकृत् मासार्धमासर्त्वयनसंवत्सरादीन् कालविशेषान् कुर्वन्, तिथिविभागज्ञानस्य चन्द्रगत्यधीनत्वात्, स चन्द्रमाः"** इत्यप्युक्तं दृश्यते (१।१०५।१८)। एवं च वैदिकपरम्परायां मासा मुख्यतया चान्द्रा एव स्वीक्रियन्ते इति स्पष्टं भवति। यद्यपि लगधमुनिप्रोक्ते वेदाङ्गज्योतिषग्रन्थे सावनमासस्य चान्द्रमासस्य नाक्षत्रमासस्य सौरमासस्य चोल्लेखोऽस्त्येव (श्लो.३१), सोमाकरभाष्ये (श्लो.११) धृतेन **"सावनं चाऽपि सौरं च चान्द्रं नाक्षत्रमेव च। चत्वार्येतानि मानानि यैर् युगं प्रविभज्यते"** इति गर्गवचनेनाऽप्येतत् स्वीकृतं दृश्यत एव, तथाऽपि "यज्ञकालार्थसिद्धये" प्रवृत्तस्य वेदाङ्गज्योतिषग्रन्थस्य

तात्पर्यं तु चान्द्रमासानां प्रतिपादने एव बोद्धव्यम्, वैदिकधर्मकर्मणां मुख्यतया चान्द्रकालमानानुसारित्वात्। तत् तात्पर्यं च **"माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः। युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते"** इति (श्लो.५) वचनेन वेदाङ्गज्योतिषग्रन्थकारेण लगधमुनिना ज्ञापितमेव।

२८. वेदाङ्गज्योतिषग्रन्थे अमान्तचान्द्रमासस्यैव तात्पर्यविषयत्वम्

वेद-वेदाङ्गेषु शुक्लपक्षस्य (पूर्णिमान्तस्य पक्षस्य) पूर्वपक्षत्वम् आश्रितमस्ति, तथाहि "पूर्वपक्षे सुत्या सम्पद्यते" इति **आत्रेयतैत्तिरीयकृष्णयजुर्वेदसंहिताब्राह्मणभागे** (७।४।८।३), "यं कामयेत वसीयान् स्यादिति तं पूर्वपक्षे याजयेत्" इति **आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदब्राह्मणे** (२।२।३।१-२), "अग्नीषोमीयया पूर्वपक्ष उपतिष्ठेत" इति **काठककृष्णयजुर्वेदसंहितायां** (७।५) **कपिष्ठलकठकृष्णयजुर्वेदसंहितायां** (५।४) च, "सर्वं पूर्वपक्षाऽपरपक्षाभ्यामाप्तं सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नम्" इति **माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मणे** (१४।६।१।७) **काण्ववाजसनेयिशुक्लयजुर्वेदबृहदारण्यकोपनिषदि** (३।१।५) च, "अथ सत्त्रिण उभौ पूर्वपक्षाऽपरपक्षौ सुन्वन्त आसते" इति (१।३५९), "पूर्वपक्षाऽपरपक्षौ यजते" (२।९८) इति च **जैमिनीयसामवेद-ब्राह्मणे**, "तेषां पूर्वपक्षे सुत्या सम्पद्यते" इति (५।९।१४) **ताण्डि-कौथुम-राणायनीय-सामवेदाध्यायिनां पञ्चविंशब्राह्मणे**, "पूर्वपक्षे वै देवा दीक्षन्ते, तेऽपरपक्षे सोमं भक्षयन्ति" इति तेषामेव **षड्विंशब्राह्मणे** (५।६।२), "यद्याहिताग्निरपरपक्षे प्रमीयेताऽऽहुतिभिरेनं पूर्वपक्षं हरेयुः" इति (३।१०।१८), "उदगयने पूर्वपक्षे श्रोष्यन् बहिर्ग्रामात् स्थालीपाकं तिलमिश्रं श्रपयित्वाऽऽचार्याय वेदयीत" इति च **आश्वलायनश्रौतसूत्रे** (८।१४।३), "अग्नीषोमाविमं सुम इति सप्तम्या पूर्वपक्षे ऐन्द्राग्न्या सप्तम्यामपरपक्षे" इति **आपस्तम्बश्रौतसूत्रे** (६।१६।५), "मासाः पृष्ठ्यादयः पूर्वपक्षे प्रतिलोमाः परे" इति (२४।४।३), "चतुर्थ्यां वाऽपरपक्षस्य" इति च (२४।४।२२) **कात्यायनश्रौतसूत्रे**, "तथा सत्येकादश्यां पूर्वपक्षस्य दीक्षित्वा त्रयोदश दीक्षाः कुर्वीरन्" इति **लाट्यायनश्रौतसूत्रे** (४।८।१८) **द्राह्यायणश्रौतसूत्रे** (८।४।२१) च, "उदगयनपूर्वपक्षपुण्याहसन्निपाते यज्ञकालोऽनादेशे" इति **लाट्यायनश्रौतसूत्रे** (८।१।१) **द्राह्यायणश्रौतसूत्रे** च (२२।१।१), "प्रथमायां पूर्वपक्षस्य दीक्षेतैकाहेभ्यः" इति **लाट्यायनश्रौतसूत्रे** (८।१।४) **द्राह्यायणश्रौतसूत्रे** (२२।१।४) च, "तैर् ज्योतिष्टोमादिभिस् तद्व्यवेतैः संवत्सरं पूर्वपक्षेषु यजेत, त्रयोदशे पूर्वपक्षे वाजपेयेनेष्ट्वैवेतरैरेवाऽऽवृत्तैरपरं संवत्सरम्" इति **लाट्यायनश्रौतसूत्रे** (८।११।६) **द्राह्यायणश्रौतसूत्रे** च (२४।३।७-८) शुक्लपक्षस्य पूर्वपक्षत्वं समाश्रितमवगम्यते। एतेन त्रैविद्यपरम्परायां पूर्णिमान्तपक्षस्य पूर्वपक्षत्वम्

अमान्तपक्षस्याऽपरपक्षत्वमुत्तरपक्षत्वं वा स्वीक्रियते इति स्पष्टं भवति। एतेनैव त्रैविद्यपरम्परायां चान्द्रा मासा अमान्ता एव स्वीक्रियन्ते इत्यप्युक्तमेव भवति। अत एव च वेदाङ्गज्योतिषग्रन्थे लगधमुनिनाऽपि अमान्ताँश् चान्द्रमासान् स्वीकृत्यैव **"माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः। युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते"** (श्लो.५) इत्युक्तमित्यवगन्तव्यम्। निर्णयसिन्ध्वादिष्वपि अमान्तस्यैव चान्द्रमासस्य मुख्यत्वं स्वीक्रियते इत्यपि स्मरणीयम्।

२९. वेदाङ्गज्योतिषग्रन्थोक्ताऽधिमासविचारः

वेदाङ्गज्योतिषग्रन्थेऽधिमासस्य प्रतिपादनमस्ति (श्लो.३७)। यद्यपि शैशिरीय-शाकल-ऋग्वेदमन्त्रसंहितायामपि **"वेद मासो धृतव्रतो द्वादश प्रजावतः। वेदा य उपजायते"** इति मन्त्रे (१।२५।८) अधिमासस्य सङ्केत उपलभ्यते, अन्येष्वपि वेदमन्त्रसंहिता-ब्राह्मणग्रन्थेषु त्रयोदशस्य मासस्योल्लेखाः प्राप्यन्ते। एतेषामुल्लेखानां विवरणं च गते त्रयोविंशे प्रकरणे (पृ.१२७) तपस्तपस्यादिमासानां चान्द्रमासत्वस्य प्रतिपादने दत्तमेव। तथापि कीदृशो मासः कदा चाऽधिमास उच्यते इति तु तेषु ग्रन्थेषु स्पष्टीकृतं नास्ति। वेदाङ्गज्योतिषग्रन्थे (श्लो.३७, ४१) तु अधिमासस्य स्पष्टीकरणं प्राप्यते। अधिमासो वर्षमध्ये वर्षान्ते वा भवन्नपि अयनान्ते एव भवति, न यस्यकस्याऽपि मासस्याऽन्ते इति तत्र प्रतिपादितमस्ति। एषा चाऽधिमासव्यवस्थां इदानीं प्रचलिताया अधिमासव्यवस्थाया भिन्ना वर्तते। एतस्या व्यवस्थायाः स्पष्टीकरणं मूलग्रन्थस्थस्य सम्बद्धश्लोकस्य व्याख्यान एव सम्यक् करिष्यते।

३०. वेदाङ्गज्योतिषग्रन्थे क्षयमासस्याऽभावः

अधिमासस्य वर्तमानकाले प्रचलिता **"असङ्क्रान्तिमासोऽधिमासः स्फुटः स्याद् द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित्"** इत्यादिका भास्कराद्युक्ता परिभाषा आर्यभटीयग्रन्थे, पञ्चसिद्धान्तिकायाम्, ब्राह्मस्फुटसिद्धान्ते, शिष्यधीवृद्धिदकरणे, भट्टोत्पलटीकायां च नोपलभ्यते। शङ्करबालकृष्णदीक्षितेन ज्योतिषदर्पणनामकमुहूर्तग्रन्थे १०९६तमे वैक्रमेऽब्दे वर्तमानस्य श्रीपतेः सिद्धान्तशेखरग्रन्थादुद्धृता मध्यममानाऽधिमासप्रतिपादकाः श्लोका उद्धृताः सन्ति (भारतीयज्योतिष, अनु. शिवनाथझारखण्डी, हिन्दी समिति, लखनऊ, १९७५ क्रै., पृ.५१२)। दीक्षितेन **"मेषादिस्थे सवितरि योयो मासः प्रपूर्यते चान्द्रः। चैत्राद्यः स ज्ञेयः पूर्तिद्वित्वेऽधिमासोऽन्त्यः"** इति ज्योतिश्शास्त्रवचनत्वेन कालमाधवे (पृ.५९) उल्लिखितेन वापूदेवशास्त्रिप्रभृतिभिर् जनैर् ब्रह्मसिद्धान्तवचनत्वेनोच्यमानेनाऽपि वर्तमानकाले कस्मिन्नपि ब्रह्मसिद्धान्तनामके ग्रन्थेऽनुपलभ्यमानेन वचनेन परिभाषितस्य मध्यम-

मानाऽधिमासस्य प्रचलनं गुर्जरप्रदेशे ७०५तमे वैक्रमाब्दे वर्तमानं ज्ञायते इत्यपि तत्र (पृ.५११) प्रतिपादितमस्ति। ११४८तमे वैक्रमेऽब्दे वर्तमानत्वेन पाण्डुरङ्ग-वामन-काणेमहाशयेन सम्भावितेन धर्मरत्नान्तर्गत-कालविवेकखण्डकारेण वङ्गदेशजेन धर्मशास्त्रनिबन्धकारेण जीमूतवाहनेन परिशिष्टवचनत्वेन **"अमावास्यापरिच्छिन्नं रविसङ्क्रान्तिवर्जितम्। अधिमासं विजानीयाद् गर्हितं सर्वकर्मसु"** इति अधिमास-परिभाषावचनं प्रदर्शितमस्ति (पृ.१२७)। तथैव शङ्खधरलिखितवचनत्वेन **"पक्ष-द्वयेऽपि सङ्क्रान्तिर् यदि न स्यात् सिताऽसिते"** इत्यादि वचनमपि तेन लिखित-मस्ति (पृ.१३९)। एवमेव पाण्डुरङ्ग-वामन-काणेमहाशयेन १३१७तमवैक्रमाब्दा-सन्नकाले वर्तमानत्वेन सम्भावितेन "असङ्क्रान्तिमासोऽधिमासः **स्फुटः स्यात्"** इत्यादिकं भास्करवचमुल्लिखता हेमाद्रिणा चतुर्वर्गचिन्तामणेः परिशेषखण्डे काल-निर्णये, १४३४तमे वैक्रमाब्दे वर्तमानत्वेन पाण्डुरङ्ग-वामन-काणे-महाशयेनोक्तेन सायणाग्रजेन माधवेन कालमाधवग्रन्थे च अधिमासपरिभाषाप्रतिपादकानि लघु-हारीतस्मृति-ब्रह्मसिद्धान्त-नन्दिपुराण-ज्योतिश्शास्त्र-वशिष्ठसिद्धान्त-विष्णुधर्मोत्तर-पुराण-काठकगृह्यपरिशिष्ट-बार्हस्पत्यज्योतिर्ग्रन्थादिवचनानि प्रदर्शितानि सन्ति। किन्तु तानि सर्वाणि वचनानि वैदिकमूलवाङ्मयेऽनुल्लिखितायाः सूर्यराशिसङ्क्रान्ते-रुल्लेखेन युक्तानीति तानि सर्वाण्येव वचनानि ६८५तमे वैक्रमाब्दे ब्राह्मस्फुट-सिद्धान्तग्रन्थं रचितवतो ब्रह्मगुप्ताद् अर्वाचीनानि लगधप्रोक्ताऽयनान्तनियताधि-मासव्यवस्थाविरुद्धानीति च श्रौतस्मार्तधर्मकृत्यार्थं सर्वथाऽनादेयानि बोद्धव्यानि, वेदाङ्गमहास्मृतिरूपवेदाङ्गज्योतिषविरोधात्। तत्र काठकगृह्यवचनत्वेनोक्तं **"यस्मिन् मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा। मलमासः स विज्ञयो मासे त्रिंशत्तमे भवेत्"** इति वचनं तु भृशं चिन्त्यम्। एवं च तैर् वचनैः परिभाषितः क्षयमासोऽपि अवैदिक एवाऽवसीयते। तस्मादवैदिकस्याऽस्य क्षयमासस्य कोऽपि गन्धो लगध-मुनिप्रोक्ते वेदाङ्गज्योतिषग्रन्थे न प्राप्यते।

३१. वेदाङ्गज्योतिषोक्ततिथीनां सामान्यतया सावनदिनाऽभिन्नत्वम्

वैदिकपरम्परायां खलु सामान्यतया तिथिरहोरात्रात्मकः सावनदिनात्मको वाऽपि स्वीक्रियते इति स्फुटतयाऽवगम्यते। तत्र वेदमन्त्रसंहिता-ब्राह्मणग्रन्थेषु अहोरात्राऽर्धमास-मासादीनां क्रमबद्धतयोल्लेखस्य दर्शनात् तत्र तिथीनामहोरात्रा-त्मकतायाः स्वीकृतत्वमवगम्यते। तथाहि—

अहोरात्रेभ्यः स्वाहाऽर्धमासेभ्यः स्वाहा मासेभ्यः स्वाहऽ ऋतुभ्यः स्वाहा-ऽऽर्तवेभ्यः स्वाहा संवत्सराय स्वाहा। इति

—माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहितायाम् (२२।२८)।

एतादृशा उल्लेखाः प्रभूता एव वेदाङ्गज्योतिषग्रन्थोक्ताया अयनव्यवस्थाया विचारस्य प्रकरणे चतुर्विंशे (पृ.१४३) प्रदर्शिताः। तपस्-तपस्यादिवैदिकमासानां चान्द्रमानत्वस्य प्रतिपादके त्रयोविंशे प्रकरणेऽपि (पृ.१२८) प्रदर्शिता एव। ते तत्रैव द्रष्टव्याः।

वैदिकवाङ्मये तिथिशब्दप्रयोग एव दुर्लभः। तिथिशब्दप्रयोगयोग्येषु स्थलेषु तत्राऽहश्शब्दस्यैव प्रयोगो दृश्यते। एतेनाऽपि वैदिकपरम्परायां तिथेरहोरात्रात्मकत्वं स्वीकृतमिति गम्यत एव।

आथर्वणज्योतिषे करणनिरूपणप्रकरणे तिथ्यर्धरूपाणां करणानां दिनव्यापित्वस्य रात्रिव्यापित्वस्य वाऽपि प्रतिपादितत्वस्य दर्शनाच् च वैदिकपरम्परायां तिथीनामहोरात्रात्मकतायाः स्वीकृतत्वं स्पष्टतयैवाऽवगम्यते।

महाभारतेऽपि "कृष्णस्य पक्षस्य चतुर्दशाहे" (११।२१।१३), "नक्षत्रेऽहनि च ध्रुवे" (१४।६३।१८), "अद्यैव नक्षत्रमहश् च पुण्यम्" (१४।६४।१४) इत्यादिषु स्थलेषु तिथिशब्दप्रयोगस्य योग्येषु स्थलेष्वपि अहश्शब्दस्य प्रयोगः कृतो दृश्यते।

याज्ञवल्क्यस्मृतावपि"समा-मास-तदर्धा-ऽहर्-नाम-जात्यादिचिह्नितम्"इत्यत्र (२।६) **"समा-मास-तदर्धा-ऽहर्-नाम-जाति-स्वगोत्रकैः। सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम्"** इत्यत्र च (२।८५) तिथिशब्दप्रयोगयोग्ये स्थलेऽहश्शब्दस्य प्रयोगः कृतो दृश्यते। तत्र विज्ञानेश्वरेण मिताक्षरायाम् "अहस् तिथिः प्रतिपदादिः" इति (२।८५) स्पष्टीकृतं चास्ति। मिताक्षरायामुद्धृते **"वर्षर्तुमासपक्षाऽहोवेलादेशप्रदेशवत्"** इति वचनेऽपि (२।६) तिथिशब्दस्थानापन्नतयाऽहश्शब्दस्य प्रयोगः कृतो दृश्यते। वेदाङ्गज्योतिषे **"एकान्तरेऽह्नि"** (श्लो.११) इति, हिरण्यकेशिगृह्यसूत्रे **"अपरपक्षस्याऽयुक्ष्वहस्सु वा"** (२०।४।१) इति, मनुस्मृतौ **"माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि"** (४।९६ इति च तिथिशब्दार्थेऽहश्शब्दः प्रयुक्तो दृश्यते।

नूनं तिथेः सावनदिनाऽभिन्नत्वमादायैव **"तिथिप्रमाणं विप्रेन्द्राः क्षपाकरदिवाकरौ"** इति (२।२।१६) नारदीयपुराणस्थं वचनं च प्रवृत्तं स्यात्। नारदीयपुराणस्य **"न वेदे ग्रहसञ्चारो न शुद्धिः कालबोधिनी। तिथिवृद्धिः क्षयो वाऽपि पर्वग्रहविनिर्णयः"** (२।२४।२९) इति वचनमपि वेदेषु वेदाङ्गेषु च खण्डतिथेरभावं बोधयत् सद् वैदिकानां तिथेः सामान्यतया सावनदिनाऽभिन्नत्वं सूचयत्येव।

कौटलीयेऽर्थशास्त्रे च **"त्रुटो लवो निमेषः काष्ठा कला नाडिका मुहूर्तः पूर्वापरभागौ दिवसः रात्रिः पक्षः मासः ऋतुः अयनं संवत्सरो युगमिति कालाः"** इत्यत्र (२।२०) तिथेरुल्लेखो न दृश्यते, दिवसस्य रात्रेश्चोल्लेखेनैव तिथिपदार्थो गतार्थ इति स्वीकृतं दृश्यते। तत्र **"राजवर्षं मासः पक्षो दिवसश् च व्युष्टम्। वर्षहिमन्तग्रीष्माणां तृतीयसप्तमा दिवसोनाः पक्षाः शेषाः पूर्णाः"** इति (२।६) प्रयोगे च तिथि-

शब्दप्रयोगोचिते स्थले दिवसशब्दः प्रयुक्तो दृश्यते। तत्रैव **"दिवस-पञ्चरात्र-पक्ष-मास-चातुर्मास्य-संवत्सरैश् च प्रतिसमानयेत्"** इति (२।७) प्रयोगेऽपि तिथ्यर्थे दिवसशब्दस्यैव प्रयोगः कृतोऽवगम्यते।

वैदिकपरम्पराऽऽगतधर्मशास्त्रानुकूललेख्यकारैः कायस्थादिभिर् लेख्येषु शुक्लपक्षदिनवाचकाऽव्ययरूपेण प्रयुज्यमानं सिद्धान्तकौमुद्यव्ययप्रकरणव्याख्याने तत्त्वबोधिनीकारेण ज्ञानेन्द्रसरस्वत्या चोल्लिखितं **सुदि** (शुदि) इति पदं बहुलपक्षदिन-वाचकाऽव्ययरूपेण प्रयुज्यमानं **वदि** (बदि) इति पदं च लोकव्यवहारपरम्परायामपि तिथीनां सावनदिनाऽभिन्नतया गृह्यमाणत्वं सूचयत एव।

वेदाङ्गज्योतिषे लगधमुनिनाऽपि शुक्लपक्ष-कृष्णपक्षतिथीनां सामान्यतया सावनदिनाऽभिन्नत्वं स्वीकृत्यैव तेषां गणना कृताऽवगम्यते (श्लो.९, ११)। अत एव खण्डतिथेः काऽपि चर्चा लगधमुनिना कृता नास्ति। केवलं पर्वदिननिर्णयायैव पर्व-समाप्तेः कालो विशेषेण विचारितोऽस्ति। अत एव तु अन्यासु प्रतिपदादितिथिषु तिथिसमाप्तिकालमवधीर्य तिथिमहोरात्रव्यापिनीमेव स्वीकृत्य वैदिकाः कर्म कुर्वते। अत एव परिशिष्टकारेणाऽपि **"या तिथिस् तदहोरात्रं यस्मादभ्युदितो रविः। तथा कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्"** इत्युक्तमवगम्यते (सोमाकरभाष्ये, श्लो.२९)। एतस्मिन् विषये मूलग्रन्थव्याख्याने एव विस्तरेण स्पष्टीकरणं करिष्यते।

३२. आर्यभटीयग्रन्थस्य वेदाङ्गज्योतिषप्रतिकूलत्वम्

भारतवर्षीयज्योतिषवाङ्मयेऽनार्षेषु ज्योतिषग्रन्थेषु आर्यभटीयं प्रथममिति ज्योतिषशास्त्रेतिहासचिन्तकाः कथयन्ति। आर्यभटेन गीतिकापाद-गणितपाद-काल-क्रियापाद-गोलपादयुते आर्यभटीयग्रन्थे कालक्रियापादे **"षष्ट्यब्दानां षष्टिर् यदा व्यतीतास् त्रयश् च युगपादाः। त्र्यधिका विंशतिरब्दास् तदेह मम जन्मनोऽतीताः"** इति दशमेन पद्येन स्वकालः प्रतिपादितः। तदनुसारं च वर्तमानकलियुगस्य ३५७७-तमे वर्षे वर्तमाने आर्यभटस्य जन्माऽभूदिति गम्यते। तदनुसारं चाऽस्माकं मते ४३४-तमे शकान्ताब्दे (५६९तमे वैक्रमाब्दे) आर्यभटस्य जन्मेति निर्णीतं भवति। अन्ये खलु आर्यभटेनोल्लिखितायाः कल्यब्दगणनायाः महाभारतयुद्धसमाप्तिकालादारम्भं मन्यन्ते। वयं तु महाभारतयुद्धसमाप्तिकालात् षट्त्रिंशति वर्षेषु व्यतीतेषु युधिष्ठिरा-दिषु महाप्रस्थानं गतेषु कल्यब्दगणनाया आरम्भं मन्यामहे। एतदुपपादनं च वयं मूलग्रन्थव्याख्यानावसरे संवत्सर-परिवत्सरादिज्ञानोपायप्रतिपादने करिष्यामः।

तत्र लगधमुनिना वेदाङ्गज्योतिषे **"माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः। युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते॥"** इति (श्लो.५) वदता युग-वर्षा-ऽयन-ऋतु-

मासानां प्रारम्भो माघशुक्लप्रतिपदि भवतीति प्रतिपादितम्, आर्यभटेन तु उत्सर्पिण्यपसर्पिण्याद्यवैदिकजैनबौद्धादिप्रक्रियामपि परिगृह्णानेन मनुस्मृत्यादिप्रतिकूलयुगव्यवस्थां स्वीकुर्वाणेन पौलिश-रोमकादिसिद्धान्तमनुसरता आर्यभटीये कालक्रियापादे **"युग-वर्ष-मास-दिवसाः समं प्रवृत्तास् तु चैत्रशुक्लादेः। कालोऽयमनाद्यन्तो ग्रहभैरनुमीयते क्षेत्रे"** इति एकादशेन पद्येन चैत्रशुक्लप्रतिपदि युग-वर्षादीनां प्रारम्भो भवतीति प्रतिपादितमिति आर्यभटीयग्रन्थस्य लगधमुनिप्रोक्तवेदाङ्गज्योतिषप्रतिकूलत्वं स्पष्टम्।

यद्यपि आर्यभटेनाऽऽर्यभटीयग्रन्थस्य ब्रह्मप्रोक्तज्योतिषग्रन्थानुगामित्वं गोलपादे ग्रन्थान्ते **"आर्यभटीयं नाम्ना पूर्वं स्वायम्भुवं सदा सत्यम्। सुकृतायुषोः प्रणाशं कुरुते प्रतिकञ्चुकं योऽस्य"** इति पद्येन कथितं तथाऽपि वेदेषु दृश्यमानस्य वैदिकचयनयागज्ञानोपयोगिनः लगधमुनिना वेदाङ्गे ज्योतिषग्रन्थे चोक्तस्य पञ्चवर्षात्मकस्य युगस्याऽऽर्यभटेनाऽऽर्यभटीये कोऽप्युल्लेखो न कृत इति च तस्य ग्रन्थस्य वेदवादिब्रह्मप्रोक्तग्रन्थानुगामित्वमपि स्वीकर्तुं न शक्यते।

३३. पञ्चसिद्धान्तिकोक्तानां पौलिशसिद्धान्तादीनां चतुर्णां सिद्धान्तानां वेदाङ्गज्योतिषप्रतिकूलत्वम्

पञ्चसिद्धान्तिकाया अष्टादशेऽध्याये "आवन्त्यकः समासाच् छिष्यहितार्थं ततः स्फुटाङ्कसमम्। चक्रे वराहमिहिरस् ताराग्रहकारिकातन्त्रम्" इति एकषष्टितमेन पद्येन, **"अष्टादशभिर् बद्धं ताराग्रहतन्त्रमेतदध्यायैः। वरमिति वराहमिहिरो ददाति निर्मत्सरः करणम्"** इति पञ्चषष्टितमेन पद्येन च स्वपरिचयं ददद् वराहमिहिरः पञ्चसिद्धान्तिकायाः प्रथमेऽध्याये **"पौलिश-रोमक-वासिष्ठ-सौर-पैतामहास् तु सिद्धान्ताः। पञ्चभ्यो द्वावाद्यौ व्याख्यातौ लाटदेवेन"** इति तृतीये पद्ये लाटदेवस्य, पञ्चदशेऽध्याये **"द्युगणाद् दिनवाराप्तिर् द्युगणोऽपि हि देशकालसम्बन्धात्। लाटाचार्येणोक्तो यवनपुरेऽर्धास्तगे सूर्ये"** इति अष्टादशे पद्ये लाटाचार्यस्य, तत्रैव **"रव्युदये लङ्कायां सिंहाचार्येण दिनगणोऽभिहितः। यवनानां निशि दशभिर् गतैर् मुहूर्तैश् च तद्गुरुणा"** इत्यूनविंशे पद्ये सिंहाचार्यस्य तद्गुरोश् च, तत्रैव पुनः **"लङ्कार्धरात्रसमये दिनप्रवृत्तिं जगाद चाऽऽर्यभटः। भूयः स एव सूर्योदयात् प्रभृत्याह लङ्कायाम्"** इति विंशे पद्ये आर्यभटस्य, तथैव अष्टादशेऽध्याये **"प्रद्युम्नो भूतनये जीवे सौरे च विजयनन्दी। भग्नावतः स्फुटमिदं करणं दृष्टं वराहमिहिरेण"** इति द्वाषष्टितमे पद्ये प्रद्युम्नस्य विजयनन्दिनश् चोल्लेखं करोति। तत्राऽन्येषां कालेऽनिश्चितेऽपि आर्यभटीयस्य रचनायाः कालस्य निश्चयाद् वराहमिहिरकृतपञ्चसिद्धान्तिकारचनाकाल आर्यभटीयग्रन्थरचनाकालादर्वाचीन इति स्फुटं भवति। तत्र पञ्चसिद्धान्तिकायाः

प्रथमेऽध्याये करणावतारेऽष्टमे पद्ये **"सप्ताश्ववेदसङ्ख्यं (४२७) शककालमपास्य चैत्रशुक्लादौ"** इत्युल्लेखस्य दर्शनाद् वराहमिहिरस्य जन्म ४२७तमे शकान्ताब्दे जातमित्यवगम्यते इति केचिन् मन्यन्ते। अपरे तु मकरादिस्थे सूर्ये उदगयनप्रारम्भस्य कालोऽसौ गणितायाऽऽश्रितोऽवगम्यते नाऽसौ वराहमिहिरजन्मकाल इति मन्यन्ते। यथा वा तथा वाऽस्तु पञ्चसिद्धान्तिकायाः पञ्चदशेऽध्याये आर्यभटग्रन्थमुल्लिखता बृहत्संहितां रचितवता (१५।१०) वराहमिहिरेण रचितायां पञ्चसिद्धान्तिकायां सङ्गृहीताः पैतामहसिद्धान्तभिन्नाः पौलिश-रोमक-वासिष्ठ-सौरसिद्धान्ताश् चत्वार एव चैत्रशुक्लादौ वर्षारम्भं वदन्तः (१।८), विविधानि युगानि प्रतिपादयन्तः (१।१४,१५) खण्डतिथीन् स्वीकुर्वाणाश् (३।३७) च वेदाङ्गज्योतिषसिद्धान्तप्रतिकूलाः प्रतीयन्ते। पौलिश-रोमक-सौरसिद्धान्तास् तु सर्वथा भारतवर्षबाह्यदेशोद्भवाश् च प्रतीयन्ते। पञ्चसिद्धान्तिकाया द्वितीयेऽध्याये प्रतिपादिते त्रयोदशपद्यात्मके वासिष्ठसमास-सिद्धान्तत्वेन (२।१३) उक्ते सिद्धान्तेऽपि राशिशब्दस्य लग्नशब्दस्य मकरशब्दस्य कर्कटकशब्दस्य च प्रयोगाणां दर्शनाच् चाऽयं सिद्धान्तोऽपि पौलिश-रोमकादि-पाश्चात्त्यसिद्धान्तप्रभावे पतितोऽवगम्यते। मन्येऽत एव ब्रह्मगुप्तेनाऽपि ब्राह्मस्फुट-सिद्धान्ते अस्य ज्यौतिषिकस्य वसिष्ठस्य **"अयमेव कृतः सूर्येन्दुपुलिशरोमकवसिष्ठ-यवनाद्यैः।"** (२४।३, पृ.४०६) इति पुलिशरोमकयवनपङ्क्तावुल्लेखः कृतः।

३४. वराहमिहिरकृताया बृहत्संहिताया वेदाङ्गज्योतिषप्रतिकूलत्वम्

बृहत्संहितायां वराहमिहिरेण बृहस्पतिचाराध्याये बृहस्पतिकार्यमध्यमराशि-भोगानुसारं गणनीयैर् बार्हस्पत्यैरब्दैर् वैदिकानां संवत्सर-परिवत्सरादीनां पञ्चाब्दक-युगवर्षाणामभेदः प्रतिपादितः। प्रभवादीनां संवत्सराणां बार्हस्पत्यसंवत्सरत्वं हि तेन बृहत्संहितायां बृहस्पतिचाराध्याये **"आद्यं धनिष्ठांशमभिप्रपन्नो माघे यदा यात्युदयं सुरेज्यः। षष्ट्यब्दपूर्वः प्रभवः स नाम्ना प्रपद्यते भूतहितस् तदाऽब्दः"** इति सप्तविंशेन पद्येन प्रतिपादितम्। तेषां बार्हस्पत्यानां वर्षाणां वर्षपञ्चकैर् नारायणादीनि द्वादश युगानि च **"गतानि वर्षाणि शकेन्द्रकालाद्"** इत्यादिकाभ्यां विंशैकविंशाभ्यां पद्याभ्यां **"विष्णुः सुरेज्यः"** इत्यादिना त्रयोविंशेन पद्येन च प्रतिपाद्य तेषां युगानां वर्षपञ्चकानां पञ्चानां वर्षाणां च क्रमेण संवत्सर-परिवत्सरेदावत्सराद्यभिन्नत्वं च तेन **"संवत्सरोऽग्निः परिवत्सरोऽर्कः"** इत्यादिना चतुर्विंशेन पद्येन प्रतिपादितम्। तस्यैतेन प्रतिपादनेन वेदाङ्गज्योतिषोक्तस्य पञ्चवर्षात्मकस्य युगस्य तदन्तर्गतानां पञ्चानां संवत्सर-परिवत्सरादीनां वर्षाणां च बार्हस्पत्यत्वस्य भ्रमो जनितोऽवगम्यते। वस्तुतस्तु वेदाङ्ग-ज्योतिषोक्तं पञ्चवर्षं युगं सौरचान्द्रं वर्तते, तदन्तर्गतानि संवत्सर-परिवत्सरादीनि

वर्षाणि च सौरचान्द्राण्येव सन्ति। एतेषां वर्षाणां बार्हस्पत्यमानेन सह कोऽपि सम्बन्धो नाऽस्ति। एवं च बृहत्संहिताया वेदाङ्गज्योतिषग्रन्थप्रतिकूलत्वमवगन्तव्यम्। वराहमिहिरस्यैतेन ग्रन्थेन अर्वाचीना ज्यौतिषिका धर्मशास्त्रिणः कर्मकाण्डिनश् च भ्रमे पातिता दृश्यन्ते।

३५. ब्रह्मगुप्तकृतस्य ब्राह्मस्फुटसिद्धान्तग्रन्थस्य वेदाङ्गज्योतिषप्रतिकूलत्वम्

ब्रह्मगुप्तेन अष्टोत्तरसहस्रसङ्ख्याभिरार्याभिर् युतस्य ब्राह्मस्फुटसिद्धान्तस्य चतुर्विंशेऽध्याये **"श्रीचापवंशतिलके श्रीव्याघ्रमुखे नृपे शकनृपाणाम्। पञ्चाशत्संयुक्तैर् वर्षशतैः पञ्चभिरतीतैः। ब्राह्मस्फुटसिद्धान्तः सज्जनगणितज्ञगोलवित्प्रीत्यै। त्रिंशद्वर्षेण कृतो जिष्णुसुतब्रह्मगुप्तेन"** इत्युक्तमिति तस्य समयो निश्चितोऽस्ति। स खलु ६८५तमे वैक्रमेब्देऽतीते ब्राह्मस्फुटसिद्धान्तग्रन्थं रचयामास किल।

तेन हि ब्राह्मस्फुटसिद्धान्तस्य प्रथमेऽध्याये मध्यमाधिकारे **"चैत्रसितादेरुदयाद् भानोर् दिन-मास-वर्ष-युग-कल्पाः। सृष्ट्यादौ लङ्कायां समं प्रवृत्ता दिनेऽर्कस्य"** इति चतुर्थेन पद्येन चैत्रशुक्लप्रतिपदि वर्षारम्भः प्रतिपादितः। एतादृशं च आर्यभट-ब्रह्मगुप्तादिकृतं प्रतिपादनं पौलिश-रोमक-सौर-सिद्धान्तादिमूलकं वैदिकपरम्पराबाह्यमिति वेदाङ्गज्योतिषग्रन्थे माघशुक्लप्रतिपदि पक्ष-मास-ऋत्वयन-वर्ष-युगानां प्रारम्भस्य प्रतिपादितत्वात् स्पष्टं भवति।

एतावदेव न, ब्रह्मगुप्तेन हि ब्राह्मस्फुटसिद्धान्तस्य तन्त्रपरीक्षानामके एकादशेऽध्याये **"युगमाहुः पञ्चाब्दं रविशशिनोः संहिताङ्गकारा यत्। अधिमासाऽवमरात्रस्फुटतिथ्यज्ञानतस् तदसत्"** इति द्वितीयेन पद्येन संहिताङ्गकारेषु लगधादिषु अज्ञत्वमारोपयताऽऽत्मनो नास्तिकत्वं स्पष्टतया प्रकाशितमिति तद्ग्रन्थस्य वेद-वेदाङ्गविरुद्धत्वं स्पष्टमेव।

चरकमुनेः **"अतश्च प्रकृतं बुद्ध्वा देशकालान्तराणि च। तन्त्रकर्तुरभिप्रायानुपायांश् चाऽर्थमादिशेत्"** इति चरकसंहितासूत्रस्थानस्थेन (२६।३७) वचनेन प्रकाशितामार्षग्रन्थव्याख्यापद्धतिमबुद्ध्वैव **"यः प्रवृत्तां श्रुतिं सम्यक् शास्त्रं वा मुनिभिः कृतम्। दूषयत्यनभिज्ञाय तं विद्याद् ब्रह्मघातिनम्"** इति महाभारतकारस्य कृष्णद्वैपायनमुनेर् महाभारतस्याऽनुशासनपर्वणि स्थितं (२४।८) वचनं चाऽश्रुत्वा **"श्रुतिर् यत्र प्रमाणं स्याद् युक्तिः का तत्र नारद। जिज्ञासोर् युक्तिरिष्टाऽस्ति यदि श्रुत्यनुसारिणी"** इति ज्योतिषसिद्धान्तसङ्ग्रहस्थ-ब्राह्मसिद्धान्तस्थेन (२।६४) वचनेन, शिष्टपरम्परया, **"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना। यस् तर्केणाऽनुसन्धत्ते स धर्मं**

वेद नेतरः" इति मनुस्मृतिवाक्येन (१२।१०६) च प्रकाशितां तर्कसीमां चाऽज्ञात्वा मन्त्र-ब्राह्मण-श्रौतसूत्रादिसम्मतस्य लगधमुनिप्रोक्तस्य पञ्चवर्षात्मकस्य युगस्य निराकरणं कुर्वाणो ब्रह्मगुप्तो गणकचक्रचूडामणिरित्युक्तोऽपि नास्तिकशिरोमणिरेव प्रतीयते। एतस्मिन् विषये चाऽस्माभिस् तु—

युगमार्षं हि पञ्चाब्दं ब्रह्मगुप्तादिजल्पितैः।
नाऽनार्षैर् बाध्यते धर्मे परं मानमृषिर् यतः॥ इत्येवोच्यते।

(द्र.– वैदिकमन्त्रसङ्ग्रहः सपरिशिष्टः, २०५२ वै., पृ.१३४;
सारस्वती सुषमा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका,
व.५०, अ. ३-४, पृ. २६१; व.५१, अ.१-४, पृ. १३२)

एतस्मिन् विषये पञ्चाब्दकस्य युगस्य श्रुति-स्मृति-पुराण-सम्मतत्वं च गते चतुर्दशे 'वेदाङ्गज्योतिषग्रन्थोक्तस्य पञ्चसंवत्सरकस्य युगस्य विचारः' इति प्रकरणे विस्तरेणैव प्रदर्शितमस्ति (पृ.७९)। तत् तत्रैव द्रष्टव्यम्।

एतादृशस्य वेदबाह्यस्य नास्तिकग्रन्थकारस्य वचनं धर्मनिरूपणे प्रमाणतया प्राचीनैरपि धर्मशास्त्रग्रन्थकारैः कथं गृहीतमिति च विचारणीयम्।

तत्र वाङ्गक-प्राचीन-धर्मशास्त्र-निबन्धकारेण धर्मरत्ननामकग्रन्थकृता जीमूतवाहनेन धर्मरत्नस्य कालविवेकाख्ये खण्डे "मेषाद्युपक्रान्तेषु प्रतिपदुपक्रम-दर्शान्तेषु चान्द्रेषु (वैशाखादिशब्दाः) गौणाः" इत्यत्र प्रमाणत्वेन **"चैत्रसितादेरुदयाद् भानोर् दिनमासवर्षयुगकल्पाः। सृष्ट्यादौ लङ्कायां समं प्रवृत्ता दिनेऽर्कस्य"** इति ब्रह्मगुप्तवचनं (१।४) प्रदर्शितं दृश्यते (पृ.१००)।

तथैव हरिसिंहदेवसान्धिविग्रहिकेण मैथिल-धर्मशास्त्र-निबन्धकारेण चण्डेश्वर-ठक्कुरेणाऽपि स्मृतिरत्नाकरस्य कृत्यरत्नाकराख्ये खण्डे शुक्लादिचान्द्रमास-स्वीकारे प्रमाणरूपेण "तथा ब्रह्मसिद्धान्ते" इत्युक्त्वा **"चैत्रसितादेरुदयाद् भानोर्"** इत्यादिकं वचनं प्रमाणत्वेन गृहीतं दृश्यते (पृ.८१)।

दाक्षिणात्यदेवगिरिप्रदेशस्थशासकमहादेवसर्वकरणाध्यक्षेण हेमाद्रिपण्डितेनाऽपि चतुर्वर्गचिन्तामणेः परिशेषखण्डे कालनिर्णये "चान्द्रसंवत्सरस्य चैत्रशुक्ल-प्रतिपद्युपक्रमः" इति प्रतिज्ञाय तत्र प्रमाणस्य प्रदर्शने "ब्रह्मसिद्धान्ते" इत्युक्त्वा **"चैत्र-सितादेरुदयाद् भानोर् दिनमासवर्षयुगकल्पाः। सृष्ट्यादौ लङ्कायां समं प्रवृत्ता दिनेऽर्कस्य"** इति ब्राह्मस्फुटसिद्धान्तस्थं वचनं (१।४) चोपात्तमस्ति (पृ.१७)।

उक्तानां शासकाद्याश्रितानां ग्रन्थकाराणामुक्तविधा प्रवृत्तिर् विवेकशैथिल्य-सूचिका ग्रन्थविशेषेतिहासादिज्ञानाऽभावप्रवृत्ता वेदवेदाङ्गाध्ययनवैधुर्यमूला लोक-गतानुगतिकत्वादिप्रभवा वाऽपि प्रतीयते।

३६. आधुनिक-प्रचलित-सूर्यसिद्धान्तग्रन्थस्य श्रौत-स्मार्त-धर्मकर्मकालनिर्णयेऽनादेयत्वम्

अद्यत्वे प्रायः सर्वे भारतवर्षीया ज्यौतिषिकाः **"अचिन्त्याऽव्यक्तरूपाय"** इत्यादिकं **"रहस्यं ब्रह्मसम्मितम्"** इत्यन्तं प्रचलितं सूर्यसिद्धान्तनामकं ग्रन्थं वेदाङ्ग-ज्योतिषशास्त्रस्य प्रमुखमाधारभूतं ग्रन्थं मन्यन्ते। एतस्मिन् ग्रन्थे मध्यमाधिकारः, स्पष्टाधिकारः, त्रिप्रश्नाधिकारः, चन्द्रग्रहणाधिकारः, सूर्यग्रहणाधिकारः, छेद्यकाधिकारः, ग्रहयुत्यधिकारः, ग्रहनक्षत्रयुत्यधिकारः, उदयास्ताधिकारः, चन्द्रशृङ्गोन्नत्यधिकारः, पाताधिकारः, भूगोलाध्यायः, ज्योतिषोपनिषदध्यायः, मानाध्याय इति प्रकरणानि सन्ति। एतस्य ग्रन्थस्य १६६०तमे वैक्रमाब्दे काश्यां समापिता रङ्गनाथ-कृता गूढार्थदीपिकाख्या व्याख्या प्राप्यते। ततोऽर्वाचीना अन्या अपि त्रिचतुरा व्याख्याः सन्ति। मुख्याया वैदिकपरम्परायाः समीचीनेन परिचयेन रहिताः १७१५ तमस्य वैक्रमाब्दस्याऽऽसन्ने काले स्थितेन सिद्धान्ततत्त्वविवेककार-कमलाकरेण सहिता अर्वाचीना विवेकशिथिलाः कतिपये ज्यौतिषिका एतं सूर्यसिद्धान्तग्रन्थं वेदतुल्यं प्रमाणभूतं ग्रन्थं मन्यन्ते।

भारते आङ्ग्लानां शासनस्य समयात् प्रभृति प्रारब्धायामधुना प्रचलितायां संस्कृत-विश्व-विद्यालयादिषु दीयमानायां संस्कृतशिक्षायां च ज्योतिषविषयस्य पाठने पठने चोक्तस्य सूर्यसिद्धान्तग्रन्थस्य प्रमुखं स्थानं दृश्यते।

भारतवर्षे समाजे चार्वाक-जैन-बौद्ध-वैष्णव-शैव-शाक्तादीनां प्रभावैर् इरानज-यवन-शक-कुषाण-हूण-मोहमदीय-क्रैस्तादीनामाक्रमणैश् च इतः पूर्वं प्रायः पञ्च-विंशतिशतेषु वर्षेषु यदा नानाविधानां विघ्नानामुपस्थितेः प्रारम्भोऽभूत् ततः प्रभृत्येव वैदिकाऽध्ययन-बोधा-ऽऽचरण-प्रचारणेषु शिथिलताया आगतत्वात्, शिक्षा-कल्प-व्याकरण-निरुक्त-च्छन्दश्शास्त्र-ज्योतिषरूपैः षड्भिर् वेदाङ्गैर् धर्ममीमांसाशास्त्र-ब्रह्ममीमांसाशास्त्रादिरूपैर् वेदोपाङ्गैश्च सहितानां वेदानामध्ययन-मननाऽनुसरणाना-मतिविरलताया आगमनेन च श्रेष्ठविदुषां रूपेण प्रसिद्धानां प्रभावशालिनां जनाना-मपि मूलवैदिकपरम्परायाः कालगणनापद्धतौ सूर्यसिद्धान्तस्य कालगणनापद्धतौ च वर्तमानस्य स्थूलस्य महत्त्वपूर्णस्य च भेदस्याऽप्याकलने जागरूकताया अभावाच् च प्रचलितस्य सूर्यसिद्धान्तस्य, आर्यभटीयस्य, ब्राह्मस्फुटसिद्धान्तस्य, सिद्धान्त-शिरोमणेः, ग्रहलाघवादिकानां चाऽर्वाचीनानां ज्योतिषग्रन्थानां वेदाङ्गज्योतिषशास्त्रस्य प्रधानग्रन्थतायाः स्वीकारस्य प्रथा लोके इतः पूर्वं प्रायः सप्ताष्टशतेषु वर्षेषु प्रारब्धा, ततः प्रभृति व्यापकतयैव लोके प्रसृता स्थिता च प्रतीयते। तादृश्याः समाजस्थितेः कारणादेव धारेश्वरेण ब्रह्मगुप्तानुसरणपरेण राजमृगाङ्कनामकः करणग्रन्थः कृतः,

जीमूतवाहनेन चण्डेश्वरेण हेमाद्रिणा च लगधप्रोक्तवेदाङ्गज्योतिषग्रन्थनिन्दकस्य ब्रह्मगुप्तस्य (११।२) **"चैत्रसितादेरुदयाद् भानोर् दिन-मास-वर्ष-युग-कल्पाः। सृष्ट्यादौ लङ्कायां समं प्रवृत्ता दिनेऽर्कस्य"** इति वचनं (१।४) धर्मनिरूपणे प्रमाणतया गृहीतमवगम्यते। एतच्च प्रायेण गते पञ्चत्रिंशेऽपि प्रकरणे प्रदर्शितमेव। कालमाधवकारेणाऽपि लगधप्रोक्तवेदाङ्गज्योतिषग्रन्थनिन्दकस्य ब्रह्मगुप्तस्य **"कृती जयति जिष्णुजो गणकचक्रचूडामणिः"** इति प्रशंसां कुर्वाणस्य भूम्ना तस्यैवाऽनुसरणं च कुर्वाणस्य नवीनसूर्यसिद्धान्तं प्रमाणतया स्वीकुर्वाणतयैव प्रतीयमानस्य सिद्धान्तशिरोमणिकारस्य भास्करस्य "असङ्क्रान्तिमासोऽधिमासः स्फुटः स्याद् द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित्। क्षयः कार्त्तिकादित्रये नाऽन्यदा स्यात् तदा वर्षमध्येऽधिमासद्वयं च" इति मध्यमाधिकारान्तस्थं वचनं धर्मनिरूपणे प्रमाणतया कालमाधवे गृहीतं दृश्यते (पृ.६१)। भास्करस्य तद् वचनं हेमाद्रिणाऽपि कालनिर्णये (पृ.२८) उल्लिखितमस्ति। हेमाद्रिगतानुगतिकतयैव माधवेनाऽपि भास्करवचनं प्रमाणत्वेन गृहीतं प्रतीयते। हेमाद्रि-माधवादिगतानुगतिकतयैव च मन्ये आपदेवात्मजाऽनन्तदेवेनाऽपि स्मृतिकौस्तुभे संवत्सरदीधितौ अधिकमासनिर्णये (पृ.५२०), १६६८तमे वैक्रमाब्दे काश्यां निर्णयसिन्धुं पूर्णं कृतवता कमलाकरभट्टेन निर्णयसिन्धौ मलमासनिरूपणे (पृ.७), नीलकण्ठभट्टेन च भगवन्तभास्करे समयमयूखे मलमासप्रतिपादने (पृ.१६६), मित्रमिश्रेण च वीरमित्रोदये समयप्रकाशे मलमासनिर्णये (पृ.१४२) प्रमाणत्वेन तद् भास्करवचनमुल्लिखितं दृश्यते। गोविन्दानन्देनाऽपि वर्षक्रियाकौमुद्यां **"मेषगरविसङ्क्रान्तिः शशिमासे भवति यत्र तच् चैत्रम्। एवं वैशाखाद्या वृषादिसङ्क्रान्तियोगेन"** इति ब्रह्मगुप्तवचनं (खण्डखाद्यकस्थं) प्रमाणतया गृहीतं दृश्यते (पृ.२२८)।

एवमर्वाचीनैर् जनैः प्रमाणत्वेन गृह्यमाणे एतस्मिन् नवीने सूर्यसिद्धान्तग्रन्थे प्रतिपादितस्य सिद्धान्तस्य गते सत्ययुगान्ते सूर्येण तदंशभूतपुरुषद्वारा मयनामकाय महाऽसुरायोपदेशः कृत इति एतस्मिन् नवीने सूर्यसिद्धान्तग्रन्थे उक्तमस्ति। तथाहि—

अल्पावशिष्टे तु कृते मयो नाम महाऽसुरः।
रहस्यं परमं पुण्यं जिज्ञासुर् ज्ञानमुत्तमम्॥
वेदाङ्गमग्र्यमखिलं ज्योतिषां गतिकारणम्।
आराधयन् विवस्वन्तं तपस् तेपे सुदुश्चरम्॥
तोषितस् तपसा तेन प्रीतस् तस्मै वरार्थिने।
ग्रहाणां चरितं प्राऽदान् मयाय सविता स्वयम्॥
विदितस् ते मया भावस् तोषितस् तपसा ह्यहम्।
दद्यां कालाश्रयं ज्ञानं ग्रहाणां चरितं महत्॥

न मे तेजस्सहः कश्चिदाख्यातुं नास्ति मे क्षणः।
मदंशः पुरुषोऽयं ते निश्शेषं कथयिष्यति॥
इत्युक्त्वाऽन्तर्दधे देवः समादिश्यांशमात्मनः।
स पुमान् मयमाहेदं प्रणतं प्राञ्जलिस्थितम्॥
शृणुष्वैकमनाः पूर्वं यदुक्तं ज्ञानमुत्तमम्।
युगेयुगे महर्षीणां स्वयमेव विवस्वता॥ इति (१।२-८)।

किन्तु गणितज्ञा शङ्करबालकृष्णदीक्षितादयो ज्यौतिषिका ५८७तमे शकान्ताब्दे (७२२तमे वैक्रमाब्दे) खण्डखाद्यकं करणग्रन्थं कृतवता ब्रह्मगुप्तेन एतस्य नवीनसूर्यसिद्धान्तग्रन्थस्य वर्षमानं (३६५।१५।३१।३१।२४) परिगृहीतं नास्ति, वराहमिहिरेण पञ्चसिद्धान्तिकायां सङ्गृहीतस्य पुराणसूर्यसिद्धान्तस्य वर्षमानं (३६५।१५।३१।३०) हि तेन तत्र परिगृहीतमस्तीति वदन्ति। एवमेव १०२१तमे शकान्ताब्दे (११५६तमे वैक्रमाब्दे) भास्वतीं कृतवता शतानन्देनाऽपि नवीनसूर्यसिद्धान्तस्य वर्षमानमगृहीत्वा पुराणसूर्यसिद्धान्तस्यैव वर्षमानं गृहीतमस्तीति च ते वदन्ति। बौद्धानां सुमतितन्त्राख्ये ज्योतिषग्रन्थेऽपि पुराणसूर्यसिद्धान्तवर्षमानस्यैव परिगृहीतत्वमन्ये प्रतिपादयन्ति। एतस्मात् कारणच् च वर्तमाने काले प्रचलितस्य नवीनस्य सूर्यसिद्धान्तग्रन्थस्य ब्रह्मगुप्तादिसमये मान्यत्वं नाऽऽसीदित्यवगम्यते। तत्र पुराणसूर्यसिद्धान्तग्रन्थस्याऽपि आर्यभटसमये रचितत्वं नवीनसूर्यसिद्धान्तग्रन्थस्य तु ततोऽप्यर्वाचीनत्वमन्येऽपि गणितज्ञाः प्रतिपादयन्त्येव। तथाहि प्रसिद्धो ज्यौतिषिकः सुधाकरद्विवेदमहाशयः पञ्चसिद्धान्तिकाप्रकाशिकायाम् **"सूर्यसिद्धान्तरचनाकालस् तु नित्यानन्देन सिद्धान्तराजकृता कलेः षट्त्रिंशच्छ्तमितेऽब्दगणे व्यतीते निगद्यते। स कालस् तु आर्यभटसिद्धान्तस्य प्रसिद्ध एव। तेन सूर्यसिद्धान्त आर्यभटसिद्धान्तसमकालिक एव सिध्यति, विभाति च तथ्यं नित्यानन्दप्रतिपादितम्, आर्यभटीयसिद्धान्ते न कुत्राऽपि सूर्यसिद्धान्तमतप्रतिपादनात्। साम्प्रतं प्रचलितः सूर्यसिद्धान्तः कृतयुगान्तकालिकस् तु केन चिदन्येन प्रकल्पितो नवीन इति स्फुटमेव सूक्ष्मविचारप्रवृत्तानां गणकानाम्"** इति वदति (पृ.२-३)। एवं च एतस्मिन् नवीनसूर्यसिद्धान्ते गतकृतयुगान्ते एतस्य सिद्धान्तस्योपदेशः सूर्यपुरुषेण कृत इति यदुक्तं तन् मिथ्यैवेत्यवगम्यते।

एवं च ग्रहगणितस्याऽज्ञानाद् आर्यभटीय-पञ्चसिद्धान्तिका-ब्राह्मस्फुटसिद्धान्त-खण्डखाद्यक-सूर्यसिद्धान्त-सिद्धान्तशिरोमण्यादिकानां ग्रन्थानामितिहासस्याप्यज्ञानाल् लगधप्रोक्त-वेदाङ्गज्योतिषग्रन्थस्य समीचीनपरिचयस्य चाभावाद् धारेश्वर-लक्ष्मीधर-जीमूतवाहन-चण्डेश्वर-हेमाद्रि-माधव-गोविन्दानन्दा-ऽनन्तभट्ट-नीलकण्ठभट्ट-मित्रमिश्रादीनां धर्मशास्त्रनिबन्धकाराणाम् आर्यभटीय-ब्राह्मस्फुटसिद्धान्त-खण्डखाद्यक-

सूर्यसिद्धान्तादिग्रन्थेषु विवेकरहिता श्रद्धा जाताऽवगम्यते। तस्माद् धारेश्वरादिगताऽनुगतिकतया तेषां ग्रन्थानां वेदाङ्गज्योतिषमुख्यग्रन्थत्वं नाऽऽस्थेयं विवेकशीलैर् वैदिकैर् विद्वद्भिरित्यवसीयते।

श्रौत-स्मार्त-पौराण-धर्मकृत्यार्थमावश्यकस्य पञ्चाब्दस्य युगस्योल्लेखस्यैव प्रचलिते सूर्यसिद्धान्तग्रन्थेऽभावादस्य ग्रन्थस्य श्रौत-स्मार्त-धर्म-कर्मकालनिर्णयेऽनादेयत्वं व्यक्तं भवति। श्रौत-स्मार्त-पौराण-धर्मकृत्यार्थं पञ्चवर्षात्मकस्य युगस्य तदन्तर्गतानां संवत्सर-परिवत्सरादीनां च ज्ञानस्याऽऽवश्यकता तु गते चतुर्दशे प्रकरणे (पृ.७९) प्रदर्शितैर् वचनैः स्फुटतया ज्ञायते।

वैदिकं धार्मिककृत्यवर्षं मुख्यतया चान्द्रं वर्तते। यद्यपि ३६० अहोरात्राणां वा ३६०अह्नां ३६०रात्रीणां च सावनं वर्षमपि वेदेषूल्लिखितं वर्तते, तथापि वैदिकानां मुख्यं प्रकृतिसम्मतं धर्मकृत्यवर्षं तु चान्द्रमेवाऽस्ति। तत्र सावनवर्षस्य वेदेषूल्लेखो यथा—

द्वादश प्रधयश् चक्रमेकं त्रीणि नभ्यानि क उ तच् चिकेत।
तस्मिन् त्साकं त्रिशता च शङ्कवोऽर्पिताः षष्टिर् न चलाचलासः॥ इति

—शैशिरीय-शाकल-ऋग्वेद-मन्त्रसंहितायाम् (१।१६४।४८)।

द्वादशारं न हि तज् जराय वर्वर्ति चक्रं परि द्यामृतस्य।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश् च तस्थुः॥ इति च

—तत्रैव (१।१६४।११)।

तासां वै त्रीणि षष्टिशतान्यक्षराणां भवन्ति त्रीणि वै षष्टिशतानि संवत्सरस्याऽह्नाम्, तत् सामिधेनीभिः संवत्सरस्याऽहान्याप्नोति। इति

—शाङ्खायनीयऋग्वेदब्राह्मणे (३।२)।

स वा एषोऽग्निष्टोम आज्यप्रभृत्याग्निमारुतान्तो यच्छस्यं त्रीणि षष्टिशतान्यृचां सम्पद्यन्ते त्रीणि वै षष्टिशतानि संवत्सरस्याऽह्नां संवत्सरस्यैवाऽऽप्त्यै। इति च

—तत्रैव (१६।९)।

तस्य त्रीणि षष्टिशतानि स्तोत्रियाणां सम्पद्यन्ते त्रीणि वै षष्टिशतानि संवत्सरस्याऽह्नां संवत्सरस्यैवाऽऽप्त्यै। इति च

—तत्रैव (१९।८)।

त्रीणि षष्टिशतान्यनुब्रूयात् त्रीणि वै षष्टिशतानि संवत्सरस्याऽह्नां संवत्सस्यैवाऽऽप्त्यै। इति च

—तत्रैव (११।७)।

सप्तविंशतिशतान्यनुब्रूयात् सप्त वै विंशतिशतानि संवत्सरस्याऽहोरात्राणां तत् संवत्सरस्याऽहोरात्राण्याप्नोति। इति च

–तत्रैव (११।७)।

तदाहुः कतिषडहः संवत्सर इति षष्टिः षडहाः षडहशस् तदेतदव्यवलम्बि संवत्सरायनं तद् य एवं संवत्सरस्याऽहानि युञ्जन्ति त एतान् कामानृध्नुवन्ति ये संवत्सरे। इति च

–तत्रैव (२६।१)।

सप्त वै विंशतिशतानि संवत्सरस्याऽहोरात्राणाम्। इति

–शाङ्खायनीयऋग्वेदारण्यके (२।१०, ८।१)।

त्रीणि च शतानि षष्टिश् चाऽनूच्यानि यज्ञकामस्य त्रीणि च वै शतानि षष्टिश् च संवत्सरस्याऽहानि तावान् संवत्सरः संवत्सरः प्रजापतिः प्रजापतिर् यज्ञः। इति

–ऐतरेयिब्राह्मणे (७।७[२।१७])।

सप्त च वै शतानि विंशतिश् च संवत्सरस्याऽहोरात्राः। इति च

–तत्रैव (७।७[२।१७])।

तस्य षष्टिश् च त्रीणि च शतानि स्तोत्रियास् तावन्ति संवत्सरस्याऽहान्यहःश एव तत् संवत्सरमारभन्ते। इति च

–तत्रैव (१७।६[४।१२])।

सप्त च वै शतानि विंशतिश् च संवत्सरस्याऽहोरात्राः। इति

–ऐतरेय्यारण्यके (३।२।१)।

तासां त्रीणि च शतानि षष्टिश् चाऽक्षराणि तावतीः संवत्सरस्य रात्रयोऽक्षरश एव संवत्सरमाप्नोति। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायाम् (२।५।८।३)।

तस्य त्रीणि च शतानि षष्टिश् च स्तोत्रीयास् तावतीः संवत्सरस्य रात्रयः उभे एव संवत्सरस्य रूपे आप्नुवन्ति। इति च

–तत्रैव (७।५।१।४)।

तस्य षष्टिश्च त्रीणि च शतानि स्तोत्रीयास् षष्टिश्च वै त्रीणि च शतानि संवत्सरस्याऽहान्यहश्शस् संवत्सर आप्यतेऽहश्श एव तत् संवत्सरमाप्नुवन्ति। इति च

–काठककृष्णयजुर्वेदसंहितायाम् (३३।२)।

पञ्चदशानामु वै गायत्रीणां त्रीणि च शतानि षष्टिश् चाक्षराणि त्रीणि च वै शतानि षष्टिश् च संवत्सरस्याऽहानि तदहान्याप्नोति तद्वेव संवत्सरमाप्नोति। इति

–माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मणे (१।३।५।९)।

तदाहुः कैतासामसङ्ख्यातानां सङ्ख्येति द्वे इति ब्रूयाद् द्वे हि सिकते शुक्ला च कृष्णा चाऽथो सप्त विंशतिशतानीति ब्रूयादेतावन्ति हि संवत्सरस्याहोरात्राणि। इति च

–तत्रैव (७।३।१।४३)।

यानि षष्टिश् च त्रीणि च शतानि तावन्ति संवत्सरस्याऽहानि। इति च

–तत्रैव (९।१।१।४३)।

ततो यानि षष्टिश् च त्रीणि च शतानि तावन्ति संवत्सरस्याऽहानि तत् संवत्सरस्याऽहान्याप्नोति। इति च

–तत्रैव (९।३।३।१८)।

तस्य वा एतस्य संवत्सरस्य प्रजापतेः सप्त च शतानि विंशतिश् चाऽहोरात्राणि। इति च

–तत्रैव (१०।४।२।२)।

ताः षष्टिश् च त्रीणि च शतानि भवन्ति षष्टिश् च ह वै त्रीणि च शतानि संवत्सरस्य रात्रयः। इति च

–तत्रैव (१०।४।३।१३)।

ततो याः षष्टिश् च त्रीणि च शतान्यहर्लोकास् ता अह्नामेव साप्तिः क्रियते-ऽह्नाम् प्रतिमा ताः षष्टिश् च त्रीणि च शतानि भवन्ति षष्टिश् च ह वै त्रीणि च शतानि संवत्सरस्याऽहानि। इति च

–तत्रैव (१०।४।३।१९)

संवत्सरो ह त्वेवैषोऽग्निश् चितस् तस्य रात्रय एव परिश्रितस् ताः षष्टिश् च त्रीणि च शतानि भवन्ति षष्टिश् च ह वै त्रीणि च शतानि संवत्सरस्य रात्रयो-ऽहानि यजुष्मत्यऽइष्टकास् ताः षष्टिश् चैव त्रीणि च शतानि भवन्ति षष्टिश् च ह वै त्रीणि च शतानि संवत्सरस्याऽहानि। इति च

–तत्रैव (१०।५।४।१०)।

त्रीणि च वै शतानि षष्टिश् च संवत्सरस्य रात्रयः। इति च

–तत्रैव (११।१।२।१०, १२।३।२।३)।

त्रीणि च वै शतानि षष्टिश् च संवत्सरस्याऽहानि। इति च

–तत्रैव (११।१।२।११, १२।३।२।३)।

षष्टिः षडहा इति नु संवत्सरस्याऽऽप्तिः। इति च

–तत्रैव (१२।२।१।७)।

सप्त च वै शतानि विंशतिश् च संवत्सरस्याऽऽहोरात्राणि। इति च

–तत्रैव (१२।३।२।४)।

एतदेव समानमाख्यानम् पुनःपुनः संवत्सरम् परिप्लवते तद् यत् पुनःपुनः परिप्लवते तस्मात् पारिप्लवं षट्त्रिंशतं दशाहानाचष्टे। इति च

–तत्रैव (१३।४।३।१५)।

अथ यत् त्रीणि षष्टिशतानि स्तोत्र्या भवन्ति तावतीस् संवत्सरस्य रात्रयस् तेन रात्रिशः। इति

–जैमिनीयसामवेदब्राह्मणे (२।१६३)।

तस्य त्रीणि च शतानि स्तोत्रिया भवन्ति षष्टिश् च, तावतीस् संवत्सरस्य रात्रयः। इति च

–तत्रैव (२।३७७, २।२१३)।

द्वादश प्रधयश् चक्रमेकं त्रीणि नभ्यानि क उ तच् चिकेत।
तत्राऽऽहतास्त्रीणि शतानि शङ्कवः षष्टिश्च खीला अविचाचला ये॥ इति

–शौनकिनामथर्ववेदमन्त्रसंहितायाम् (१०।८।४)।

त्रीणि च ह वै शतानि षष्टिश् च संवत्सरस्याऽहोरात्राणि। इति

–आथर्वणानां गोपथब्राह्मणे (१।५।५)।

वैदिकानां धर्मकृत्यार्थक-वर्षायनर्त्वादिगणनाऽधारभूतस्य प्रकृतिसम्मतस्य वर्षस्य मुख्यतया चान्द्रत्वे च बहूनि प्रमाणानि प्राप्यन्ते।

अहोरात्रात्मकचान्द्रतिथेर् गणनामवलम्ब्यैव मासर्त्वयनैः सह वर्षस्याऽपि गण्यमानताया अधोलिखितेषु वेदवचनेषु प्रतीयमानत्वाद् वैदिकानां मुख्यं वर्षं चान्द्रमेवेति गम्यते। तथाहि वचनानि–

अहोरात्रा अर्धमासा मासा ऋतवः संवत्सराश् च सन्धीयन्ते। इति

–शाङ्खायनीयऋग्वेदारण्यके (७।२१)।

अहोरात्रेभ्यः स्वाहाऽर्धमासेभ्यः स्वाहा मासेभ्यः स्वाहऽ ऋतुभ्यः स्वाहा-ऽऽर्तवेभ्यः स्वाहा संवत्सराय स्वाहा। इति

–माध्यन्दिनीयवाजसनेयि-शुक्लयजुर्वेदमन्त्रसंहितायाम् (२२।२८)।

उषसस् ते कल्पन्तामहोरात्रास् ते कल्पन्तामर्धमासास् ते कल्पन्तां मासास् ते कल्पन्तामृतवस् ते कल्पन्तां संवत्सरस् ते कल्पताम्। इति च

–तत्रैव (२७।४५)।

संवत्सरो वै प्रजापतिरेकशतविधस् तस्याऽहोरात्राण्यर्धमासा मासा ऋतवः षष्टिर् मासस्याऽहोरात्राणि मासि वै संवत्सरस्याऽहोरात्राण्याप्यन्ते चतुर्विंशतिरर्ध-मासास् त्रयोदश मासास् त्रय ऋतवस् ताः शतं विधाः संवत्सर एवैकशततमी विधा। इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशतपथब्राह्मणे (१०।२।६।१)।

एत उ वाव लोका यदहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरः। इति च

–तत्रैव (१०।२।६।७)।

यथा संवत्सरस्याऽहोरात्राण्यर्धमासा मासा ऋतव एवमस्यैतानि रूपाणि। इति च

–तत्रैव (१०।४।३।२१)।

अहोरात्राण्येवैतदर्धमासान् मासानृतून् **संवत्सरे प्रतिष्ठापयति तानीमान्यहोरात्रा-ण्यर्धमासा मासा ऋतवः** संवत्सरे **प्रतिष्ठिताः।** इति च

–तत्रैव (१२।८।३।१४)।

अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा **विधृतास् तिष्ठन्ति।** इति च

–तत्रैव (१४।६।८।९), काण्वबृहदारण्यकोपनिषदि च (३।८।९)

अहोरात्रेभ्यः स्वाहाऽर्धमासेभ्यः स्वाहा **मासेभ्यः स्वाहर्तुभ्यः स्वाहा संवत्सराय स्वाहा।** इति

–आत्रेय-तैत्तिरीयकृष्णयजुर्वेदसंहितायाम् (७।१।१५।१)।

अहोरात्रे निमेषोऽर्धमासाः पर्वाणि मासाः सन्धानान्यृतवोऽङ्गानि संवत्सर आत्मा। इति च

–तत्रैव (७।५।२५।१)।

एता ह वै प्रवतः शश्वतीरपो यत् संवत्सर ऋतवो मासा अर्धमासा अहो-रात्राण्युषसः। इति

–जैमिनीयसामवेदब्राह्मणे (२।३९१)।

वेदेषु चान्द्रस्याऽधिमासस्य त्रयोदशमासत्वं स्वीकृत्य तेन संहितस्य वर्षस्यो-ल्लेखानां दर्शनात् सौरे वर्षे तु त्रयोदशानां मासानां सम्मितेरसम्भवाच्च वैदिकानां वर्षं मुख्यतया चान्द्रमेवेत्यवगम्यते। उक्तविधा उल्लेखाश् च वेदेषु यथा–

वेद मासो धृतव्रतो द्वादश प्रजावतः। वेदा य उपजायते॥ इति

–शैशिरीय-शाकलऋग्वेदमन्त्रसंहितायाम् (१।२५।८)।

अश्वं त्रयोदशं ददाति यस् त्रयोदशो मासस् तस्याऽऽप्त्यै। इति

–शाङ्खायनीयऋग्वेदब्राह्मणे (१।१)।

त्रयोदशं वा एतं मासमाप्नोति यच् छुनासीर्येण यजत एतावान् वै संवत्सरो यदेष त्रयोदशो मासस्तदत्रैव सर्वैः संवत्सर आप्तो भवति। इति च

–तत्रैव (५।८)।

अथ यत् त्रयोदशीमन्वाहाऽस्ति त्रयोदशो मास उपचरो विज्ञात इव तस्या-ऽऽप्त्यै। इति च

–तत्रैव (७।१०)

एतावान् वै संवत्सरो यदेष त्रयोदशो मासः। इति च

–तत्रैव (१९।२)।

तं त्रयोदशान् मासादक्रीणँस् तस्मात् त्रयोदशो मासो नाऽनुविद्यते। इति

–ऐतरेयिब्राह्मणे (३।१ [१।१२]।

त्रयोदश मासाः संवत्सरः। इति

–आत्रेय-तैत्तिरीयकृष्णयजुर्वेदसंहितायाम् (५।६।७।१-२)।

अस्ति त्रयोदशो मास इत्याहुः। इति च

–तत्रैव (६।५।३।४)।

अस्ति मासस् त्रयोदशः। इति

–मैत्रायणीयकृष्णयजुर्वेदसंहितायाम् (१।४।१४, १।५।६, ३।४।१०, ४।६।७)।

अथ यस् त्रयोदशं मासं सम्पादयति त्रयोदशं मासमभियजते। इति च

–तत्रैव (१।१०।८)।

एष वाव त्रयोदशो मासस् तमेवैतत् सम्पादयति, तमभिजयते। इति च

–तत्रैव (१।१०।८), काठककृष्णयजुर्वेदसंहितायां च (३६।३)।

उत वै त्रयोदशं मासं विदुरुत न विदुः। इति

–काठककृष्णयजुर्वेदसंहितायाम् (३४।१३)।

मलिम्लुचो नामाऽसि त्रयोदशो मासः। इति च

–तत्रैव (३८।१४)।

अथो अपि त्रयोदश गृह्णीयादस्ति त्रयोदशो मास इति। इति

–माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मणे (४।३।१।५)।

ऋषभो वा एष ऋतूनां यत् संवत्सरः। तस्य त्रयोदशो मासो विष्टपम्। इति च

–तत्रैव (१३।१।२।२), आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदब्राह्मणे च (३।८।३।३)।

द्वादश वा वै त्रयोदश वा संवत्सरस्य मासाः। इति

–माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मणे (२।२।३।२७)।

त्रयोदश वै मासाः संवत्सरस्य। इति च

–तत्रैव (३।६।४।२४, १२।३।२।२)।

संवत्सरो वाव विवर्तोऽष्टाचत्वारिंशस् तस्य षड्विंशतिरर्धमासास् त्रयोदश मासाः। इति च

–तत्रैव (८।४।१।२५)।

त्रयोदश मासाःसंवत्सरः। इति च

–तत्रैव (१३।५।१।१५)।

त्रयोदश रात्रीर् दीक्षितः स्यात् त्रयोदश मासाः संवत्सरः संवत्सरो विराड् विराजमाप्नोति। इति

–आत्रेयतैत्तिरीयकृष्णयजुर्वेदसंहितायाम् (५।६।७।१-२), काठककृष्णयजुर्वेद-संहितायाम् (२१।५), कपिष्ठलकठकृष्णयजुर्वेदसंहितायां च (३१।२०)।

त्रयोदश वा एता आहुतयस् त्रयोदश मासाः संवत्सरः संवत्सरं वावाऽस्मा एत-दुपदधाति स्वर्गे लोके। इति

–मैत्रायणीय-कृष्ण-यजुर्वेदसंहितायाम् (१।११।८, ३।४।२)।

त्रयोदशैता आहुतयस् त्रयोदशमासस् संवत्सरस् संवत्सरस् स्वर्गो लोकस् संवत्सरमेवाऽस्मै स्वर्गे लोके उपाधात्। इति

–काठककृष्णयजुर्वेद-संहितायाम् (१४।८)।

त्रयोदशैता व्याहृतयस्त्रयोदशमासस् संवत्सरोऽन्तत एव संवत्सरं रोहति। इति च

–तत्रैव (२१।११)।

त्रयोदश दीक्षेरन् संवत्सरायतनाः,त्रयोदश मासास् संवत्सरस् संवत्सरायतना एवर्ध्नुवन्ति। इति च

–तत्रैव (३४।९)।

त्रयोदशाक्षराणि स्तोभति, य एवाऽसावधिचरस् त्रयोदशो मासस् तमेव तदाप्नोति। इति

–जैमिनीयसामवेदब्राह्मणे (१।१३२)।

ते त्रयोदश हिङ्काराः सम्पद्यन्ते। एवं त्रयोदशस्य मास उपाप्तिरिति। इति च

–तत्रैव (२।२०)।

तदाहुर् यत् त्रयोदश मासास् संवत्सरस् संवत्सरश् च चतुर्दशोऽथ केन त्रयोदशं च मासमुपाप्नुवन्ति संवत्सरं च चतुर्दशमिति। इति च

–तत्रैव (३।३८६)।

पिता नोऽरात्सीदिति मासा उपासीदँस् ते दीक्षयैवाऽराध्नुवन्नुपसत्सु त्रयोदशमदीक्षयन् सोऽनुव्यमभवत् तस्मादुपसत्सु दिदीक्षाणोऽनुव्यं भवत्येव च हि त्रयोदशं मासं चक्षते नैव च। इति

–ताण्डि-कौथुम-राणायनीय-पञ्चविंशब्राह्मणे (१०।३।२)।

यदुपरिष्टाद् व्रतमुपयन्ति न वाचं विच्छिन्दन्त्याप्नुवन्ति त्रयोदशं मासम्। इति च

–तत्रैव (२३।२।३)।

सनिम्नसो नमाऽसि त्रयोदशो मास इन्द्रस्य गृहः। इति

–शौनकिनामथर्ववेदमन्त्रसंहितायाम् (५।६।४)।

अहोरात्रैर् विमितं त्रिंशदङ्गं त्रयोदशं मासं यो निर्मिमीते।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति॥ इति च

–तत्रैव (१३।३।८)।

त्रयोदश मासाः संवत्सरस्य त्रयोदशेमे पुरुषे प्राणा इत्यत्र तत् समम्। इति

–आथर्वणिकानां गोपथब्राह्मणे (१।५।५)।

त्रयोदशं वा एतं मासमाप्नोति यच् छुनासीर्येण यजते, एतावान् वै संवत्सरो यावानेष त्रयोदशो मासः। इति च

–तत्रैव (२।१।२६)।

चान्द्रमधिमासं सप्तममृतुं स्वीकृत्य सप्तानामृतूनामेकस्य वत्सरस्य वेदे प्रतिपादितत्वाच् चान्द्रे संवत्सरे एव तादृशस्य सप्तमस्य ऋतोः सम्भवाच् च वैदिकपरम्परायां चान्द्रस्य वर्षस्यैव मुख्यत्वमवगम्यते। सप्तानामृतूनामेकस्य वत्सरस्योल्लेखो यथा–

साकञ्जानां *सप्तथ*माहुरेकजं षडिद् यमा ऋषयो देवजा इति।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः॥ इति

–शैशिरीय-शाकल-ऋग्वेदमन्त्रसंहितायाम् (१।१६४।१५)।

(एतस्य मन्त्रस्य व्याख्याने हि वेङ्कटमाधव आह– 'सहजातानां मिथुनभूतानां सप्तममृतुमेकजमाहुः' इति। तेन हि "सप्त युञ्जन्ति रथमेकचक्रम्" इत्यादिके मन्त्रेऽपि (१।१६४।२) 'सप्तर्तवः कालरथं संवत्सरैकचक्रं युञ्जन्ति' इत्युक्तम्। सायणव्याख्यायामपि साकञ्जानामित्यादिकस्य मन्त्रस्य व्याख्याने– 'साकंजानामेकस्मादादित्यात् सहोत्पन्नानां सप्तानामृतूनां मध्ये सप्तथं सप्तममृतुम्। थट् च च्छन्दसीति थट्। एकजमेकोत्पन्नमाहुः कालतत्त्वविदः। चैत्रादीनां द्वादशानां मासानां द्वयमेलनेन वसन्ताद्याः षडृतवो भवन्ति। अधिकमासेन एक उत्पद्यते सप्तमर्तुः'

इत्युक्तम्। तत्र "सप्त युञ्जन्ति" इत्यादिके मन्त्रेऽपि (१।१६४।२) वैकल्पिकव्याख्यान-रूपेण 'अथवा मासद्वयात्मकाः षट् अपरः अधिमासात्मकः इत्येवं सप्तर्तवो युञ्जन्ति' इति प्रोक्तं दृश्यते।)

सप्त चितिकोऽग्निः *सप्तर्तवः* संवत्सरः संवत्सरोऽग्निः। इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणे (६।६।१।१४)।

संवत्सरो वाव वर्च्चो द्वाविंशस् तस्य द्वादश मासाः *सप्तर्तवो* द्वे अहोरात्रे संवत्सर एव वर्च्चो द्वाविंशः। इति च

–तत्रैव (८।४।१।१६)।

संवत्सरो वाव सम्भरणस् त्रयोविंशस् तस्य त्रयोदश मासाः *सप्तर्तवो* द्वे अहोरात्रे संवत्सरऽ एव सम्भरणस् त्रयोविंशः। इति च

–तत्रैव (८।४।१।१७)।

संवत्सरो वाव ब्रध्नस्य विष्टपं चतुस्त्रिंशस् तस्य चतुर्विंशतिरर्धमासाः *सप्तर्तवो* द्वे अहोरात्रे, संवत्सर एव ब्रध्नस्य विष्टपं चतुस्त्रिंशः। इति च

–तत्रैव (८।४।१।२३)।

संवत्सरो वाव विवर्त्तोऽष्टाचत्वारिंशस् तस्य षड्विंशतिरर्धमासास् त्रयोदश मासाः *सप्तर्तवो* द्वे अहोरात्रे। इति च

–तत्रैव (८।४।१।२५)।

एतावान् वै त्रयोदशसु मासेषु कामः *सप्तस्वृतुषु* तद् यावाँस् त्रयोदशसु मासेषु कामः *सप्तस्वृतुषु* तन् तत् सर्वमात्मानमभिसञ्चिनुते। इति च

–तत्रैव (१०।२।५।१५)।

***सप्तर्तवः* संवत्सरस्य सप्तेमे पुरुषे प्राणा अत्र तत् समम्।** इति च

–तत्रैव (१२।३।२।१)।

***सप्त वा ऋतवः* संवत्सरस्य सप्तेमे पुरुषे प्राणा इत्यत्र तत् समम्।** इति

–आथर्वणिकानां गोपथब्राह्मणे (१।५।५)।

द्वादशानां चान्द्राणां मासानां द्वौद्वौ पक्षौ गणयित्वा तानादाय 'चतुर्विंशत्यर्ध-मासः संवत्सरः' इति वेदेषु उक्तं दृश्यते। तस्मादपि वैदिकानां मुख्यः संवत्सरश् चान्द्र एवेत्यवगम्यते। संवत्सरस्य चतुर्विंशतेरर्धमासानामुल्लेखाश् च वेदेषु यथा–

त्रिः प्रथमया त्रिरुत्तमया चतुर्विंशतिः सम्पद्यन्ते चतुर्विंशतिर् वै संवत्सर-स्याऽर्धमासाः संवत्सरस्यैवाऽऽप्त्यै। इति

–शाङ्खायनीयऋग्वेदब्राह्मणे (९।६)।

तस्य चतुर्विंशः स्तोमो भवति चतुर्विंशतिर् वै संवत्सरस्याऽर्धमासाः संवत्सरस्याऽऽप्त्यै। इति च

–तत्रैव (१९।८)।

तस्य पञ्चविंशः स्तोमस् चतुर्विंशतिर् वै संवत्सरस्याऽर्धमासा संवत्सरस्यैवाप्त्या अथो प्रजापतिर् वै संवत्सरः पञ्चविंशः। इति

–शाङ्खायनीयऋग्वेदारण्यके (१।१)।

तौ वा एतौ पक्षौ बार्हतराथन्तरौ चतुर्विंशौ चतुर्विंशतिर् वै संवत्सरस्याऽर्धमासाः संवत्सरस्यैवाऽऽप्त्यै। इति च

–तत्रैव (२।५)।

स वा एष संवत्सर एव यदग्निष्टोमश् चतुर्विंशत्यर्धमासो वै संवत्सरश् चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणि। इति

–ऐतरेयि-ऋग्वेदब्राह्मणे (१४।२[३।३९])।

तस्य चतुर्विंशतिः स्तुतशस्त्राणि भवन्ति चतुर्विंशत्यर्धमासो वै संवत्सरः संवत्सरे कृत्स्नमन्नाद्यं कृत्स्न एवैनं तदन्नाद्ये प्रतिष्ठापयति तस्माज् ज्योतिष्टोम एवाऽग्निष्टोमः स्यात्। इति च

–तत्रैव (३६।४[८।४])।

चतुर्विंशतिमन्वाह चतुर्विंशतिरर्धमासाः संवत्सरः संवत्सरोऽग्निर् वैश्वानरः साक्षादेव वैश्वानरमवरुन्धे। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायाम् (५।१।८।५)।

चतुर्विंशतिं रात्रीर् दीक्षितः स्याच् चतुर्विंशतिरर्धमासाः संवत्सरः संवत्सरो विराड् विराजमाप्नोति। इति च

–तत्रैव (५।६।७।२)।

चतुर्विंशो भवति चतुर्विंशतिरर्धमासाः संवत्सरः संवत्सरः सुवर्गो लोकः संवत्सर एव सुवर्गे लाके प्रतितिष्ठन्ति। इति च

–तत्रैव (७।४।१।३; द्र.- ७।४।२।५-६, ७।४।३।४)।

चत्वारः षडहा भवन्ति तानि चतुर्विंशतिरहानि सम्पद्यन्ते चतुर्विंशतिरर्धमासाः संवत्सरस् तत् संवत्सरमनु पर्यावर्तन्ते प्रतिष्ठितः संवत्सर इति खलु वा आहुः। इति च

–तत्रैव (७।४।११।४)।

चतुर्विंशः प्रायणीयो भवति चतुर्विंशतिरर्धमासाः संवत्सरः प्रयन्त एव संवत्सरे प्रतितिष्ठन्ति। इति च

–तत्रैव (७।५।१।३-४)।

चतुर्विंश स्तोमो भवति चतुर्विंशत्यर्धमासो वै संवत्सरः। अर्धमासश एवैतत् संवत्सरे प्रतितिष्ठन्तो यन्ति। इति च

–तत्रैव (३।१७६)।

क्वाऽर्धमासाः क्व यन्ति मासा संवत्सरेण सह संविदानाः।
यत्र यन्त्यृतवो यत्राऽऽर्तवाः स्कम्भं तं ब्रूहि कतमः स्विदेव सः॥ इति

–शौनकिनाम् अथर्ववेदमन्त्रसंहितायाम् (१०।७।६)।

चतुर्विंशतिरर्धमासाः संवत्सरस्य चतुर्विंशोऽयं पुरुषो विंशत्यङ्गुलिश् चतुरङ्ग इत्यत्र तत् समम्। इति

–आथर्वणिकानां गोपथब्राह्मणे (१।५।५)।

वर्षस्य षण्णामृतूनां निष्पादकं चन्द्रं स्वीकृत्य वेदे चन्द्रमाः षड्ढोतेत्युक्तोऽस्ति। ततोऽपि वैदिकानां वर्षं चान्द्रमेवाऽवगम्यते। चन्द्रमाः षड्ढोतेत्युक्तिर् यथा–

चन्द्रमाः षड्ढोता स ऋतून् कल्पयति। इति

–आत्रेय-तैत्तिरीयकृष्णयजुर्वेदारण्यके (३।७।३)।

क्वचित् तु वेदे वर्षस्य चन्द्रमसि आसक्तत्वं स्पष्टतयैवोक्तं दृश्यते। तथाहि–

चन्द्रमसि ह्ययं संवत्सरऽ ऋतुभिरासक्तः। इति

–माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मणे (६।७।१।१९)।

कुत्रचित् तु वेदेऽतोऽपि स्पष्टतररूपेण संवत्सरस्य चान्द्रत्वं व्यक्तीकृतं दृश्यते। तथाहि–

देवाश् च वाऽ असुराश् चोभये प्राजापत्याः प्रजापतेः पितुर् दायमुपेयुरेतावेवार्धमासौ य एवाऽऽपूर्यते तं देवा उपायन् योऽपक्षीयते तमसुराः। ते देवा अकामयन्त कथं न्विममपि संवृञ्जीमहि योयमसुराणामिति, तेऽर्चन्तः श्राम्यन्तश् चेरुस् तऽ एतं हविर्यज्ञं ददृशुर् यद् दर्शपूर्णमासौ, ताभ्यामयजन्त ताभ्यामिष्ट्वैतमपि समवृञ्जत यऽ एषोऽसुराणामासीत्, यदा वाऽ एता उभौ परिप्लवेतेऽ अथ मासो भवति, मासशः संवत्सरः, सर्वं वै संवत्सरः, सर्वमेव तद् देवा असुराणां समवृञ्जत। इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशतपथब्राह्मणे (१।७।२।२२-२४)।

एष वै (चान्द्रः) मासः परिप्लवमानः संवत्सरं करोति। इति च

–तत्रैव (११।२।५।४)।

कुरुते। तासां द्वादश गर्भास् ताश् चतुर्विंशतिश् चतुर्विंशतिर् वै संवत्सरस्या-ऽर्धमासाः संवत्सरः प्रजापतिः प्रजापतिर् यज्ञस् तद् यज्ञं प्रत्यक्षमाप्नोति तं प्रत्यक्षमाप्त्वाऽऽत्मन् कुरुते। इति च

–तत्रैव (५।४।५।२०,२१)।

तेषां चतुर्विंशतिः सामिधेन्यश् चतुर्विंशत्यर्धमासो वै संवत्सरः संवत्सरोऽग्निर् यावानग्निर् यावत्यस्य मात्रा तावतैनमेतत् समिन्द्धे। इति च

–तत्रैव (६।२।१।२१)।

योनिश् चतुर्विंश इति य एव चतुर्विंश स्तोमस् तन् तदुपदधात्यथो संवत्सरो वाव योनिश् चतुर्विंशस् तस्य चतुर्विंशतिरर्धमासास् तद् यत् तमाह योनिरिति संवत्सरो हि सर्वेषां भूतानां योनिस् तदेव तद्रूपमुपदधाति। इति च

–तत्रैव (८।४।१८; द्रष्टव्यं च- ८।४।१।१९,२०,२१,२२,२३,२४)।

संवत्सरो वै प्रजापतिरेकशतविधस् तस्याहोरात्राण्यर्धमासा मासा ऋतवः षष्टिर् मासस्याऽहोरात्राणि मासि वै संवत्सरस्याऽहोरात्राण्याप्यन्ते चतुर्विंशतिरर्धमासास् त्रयोदश मासास् त्रय ऋतवस् ताः शतं विधाः संवत्सर एवैकशततमी विधा। इति च

–तत्रैव (१०।२।६।१)।

अथ यच् चतुर्विंशतिमात्मनोऽकुरुत तस्माच् चतुर्विंशत्यर्धमासः संवत्सरः। इति च

–तत्रैव (१०।४।२।१८)।

चतुर्विंशतिर् वै संवत्सरस्याऽर्धमासाश् चतुर्विंशोऽयम् पुरुषो विंशत्यङ्गुलिश् चतुरङ्गोऽत्र तत् समम्। इति च

–तत्रैव (१२।३।२।२)।

द्वादश स्तोत्राणि द्वादश शस्त्राणि तच् चतुर्विंशतिश् चतुर्विंशतिरर्धमासाः संवत्सरः संवत्सरं पशवोऽनु प्रजायन्ते तेन पशव्यः समृद्धः। इति

–ताण्डि-कौथुम-राणायनीय-सामवेद-पञ्चविंशब्राह्मणे (६।३।४)।

तस्य त्रिर् वचन एकविंशतिः पदानि त्रिः सामाऽऽह तच् चतुर्विंशतिः। चतुर्विंशतिरर्धमासाः संवत्सरः। संवत्सरः साम। इति

–ताण्डि-कौथुम-राणायनीय-सामवेद-षड्विंशब्राह्मणे (३।४।२०,२१)।

तानेताँश् चतुरोऽभिप्लवानुपयन्ति, तेषां चतुर्विंशती रात्र्यः, चतुर्विंशत्यर्धमासस् संवत्सरः, तदेषां मासिमासि संवत्सर आप्तो भवति। इति

–जैमिनीय-सामवेद-ब्राह्मणे (२।४)।

चतुर्विंश स्तोमो भवति चतुर्विंशत्यर्धमासो वै संवत्सरः। अर्धमासश एवैतत् संवत्सरे प्रतितिष्ठन्तो यन्ति। इति च

–तत्रैव (३।१७६)।

क्वाऽर्धमासाः क्व यन्ति मासा संवत्सरेण सह संविदानाः।
यत्र यन्त्यृतवो यत्राऽऽर्तवाः स्कम्भं तं ब्रूहि कतमः स्विदेव सः॥ इति

–शौनकिनाम् अथर्ववेदमन्त्रसंहितायाम् (१०।७।६)।

चतुर्विंशतिरर्धमासाः संवत्सरस्य चतुर्विंशोऽयं पुरुषो विंशत्यङ्गुलिश् चतुरङ्ग इत्यत्र तत् समम्। इति

–आथर्वणिकानां गोपथब्राह्मणे (१।५।५)।

वर्षस्य षण्णामृतूनां निष्पादकं चन्द्रं स्वीकृत्य वेदे चन्द्रमाः षड्ढोतेत्युक्तोऽस्ति। ततोऽपि वैदिकानां वर्षं चान्द्रमेवाऽवगम्यते। चन्द्रमाः षड्ढोतेत्युक्तिर् यथा–

चन्द्रमाः षड्ढोता स ऋतून् कल्पयति। इति

–आत्रेय-तैत्तिरीयकृष्णयजुर्वेदारण्यके (३।७।३)।

क्वचित् तु वेदे वर्षस्य चन्द्रमसि आसक्तत्वं स्पष्टतयैवोक्तं दृश्यते। तथाहि–

चन्द्रमसि ह्ययं संवत्सरऽ ऋतुभिरासक्तः। इति

–माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मणे (६।७।१।१९)।

कुत्रचित् तु वेदेऽतोऽपि स्पष्टतररूपेण संवत्सरस्य चान्द्रत्वं व्यक्तीकृतं दृश्यते। तथाहि–

देवाश् च वाऽ असुराश् चोभये प्राजापत्याः प्रजापतेः पितुर् दायमुपेयुरेतावेवार्धमासौ य एवाऽऽपूर्यते तं देवा उपायन् योऽपक्षीयते तमसुराः। ते देवा अकामयन्त कथं न्विममपि संवृञ्जीमहि योयमसुराणामिति, तेऽर्चन्तः श्राम्यन्तश् चेरुस् तऽ एतं हविर्यज्ञं ददृशुर् यद् दर्शपूर्णमासौ, ताभ्यामयजन्त ताभ्यामिष्ट्वैतमपि समवृञ्जत यऽ एषोऽसुराणामासीत्, यदा वाऽ एता उभौ परिप्लवेतेऽ अथ मासो भवति, मासशः संवत्सरः, सर्वं वै संवत्सरः, सर्वमेव तद् देवा असुराणां समवृञ्जत। इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशतपथब्राह्मणे (१।७।२।२२-२४)।

एष वै (चान्द्रः) मासः परिप्लवमानः संवत्सरं करोति। इति च

–तत्रैव (११।२।५।४)।

कुरुते। तासां द्वादश गर्भास् ताश् चतुर्विंशतिश् चतुर्विंशतिर् वै संवत्सरस्या-र्धमासाः संवत्सरः प्रजापतिः प्रजापतिर् यज्ञस् तद् यज्ञं प्रत्यक्षमाप्नोति तं प्रत्यक्षमाप्त्वाऽऽत्मन् कुरुते। इति च

–तत्रैव (५।४।५।२०,२१)।

तेषां चतुर्विंशतिः सामिधेन्यश् चतुर्विंशत्यर्धमासो वै संवत्सरः संवत्सरोऽग्निर् यावानग्निर् यावत्यस्य मात्रा तावतैनमेतत् समिन्द्धे। इति च

–तत्रैव (६।२।१।२१)।

योनिश् चतुर्विंश इति य एव चतुर्विंश स्तोमस् तन् तदुपदधात्यथो संवत्सरो वाव योनिश् चतुर्विंशस् तस्य चतुर्विंशतिरर्धमासास् तद् यत् तमाह योनिरिति संवत्सरो हि सर्वेषां भूतानां योनिस् तदेव तद्रूपमुपदधाति। इति च

–तत्रैव (८।४।१८; द्रष्टव्यं च- ८।४।१।१९,२०,२१,२२,२३,२४)।

संवत्सरो वै प्रजापतिरेकशतविधस् तस्याहोरात्राण्यर्धमासा मासा ऋतवः षष्टिर् मासस्याऽहोरात्राणि मासि वै संवत्सरस्याऽहोरात्राण्याप्यन्ते चतुर्विंशतिरर्धमासास् त्रयोदश मासास् त्रय ऋतवस् ताः शतं विधाः संवत्सर एवैकशततमी विधा। इति च

–तत्रैव (१०।२।६।१)।

अथ यच् चतुर्विंशतिमात्मनोऽकुरुत तस्माच् चतुर्विंशत्यर्धमासः संवत्सरः। इति च

–तत्रैव (१०।४।२।१८)।

चतुर्विंशतिर् वै संवत्सरस्याऽर्धमासाश् चतुर्विंशोऽयम् पुरुषो विंशत्यङ्गुलिश् चतुरङ्गोऽत्र तत् समम्। इति च

–तत्रैव (१२।३।२।२)।

द्वादश स्तोत्राणि द्वादश शस्त्राणि तच् चतुर्विंशतिश् चतुर्विंशतिरर्धमासाः संवत्सरः संवत्सरं पशवोऽनु प्रजायन्ते तेन पशव्यः समृद्धः। इति

–ताण्डि-कौथुम-राणायनीय-सामवेद-पञ्चविंशब्राह्मणे (६।३।४)।

तस्य त्रिर् वचन एकविंशतिः पदानि त्रिः सामाऽऽह तच् चतुर्विंशतिः। चतुर्विंशतिरर्धमासाः संवत्सरः। संवत्सरः साम। इति

–ताण्डि-कौथुम-राणायनीय-सामवेद-षड्विंशब्राह्मणे (३।४।२०,२१)।

तानेताँश् चतुरोऽभिप्लवानुपयन्ति, तेषां चतुर्विंशती रात्र्यः, चतुर्विंशत्यर्धमासस् संवत्सरः, तदेषां मासिमासि संवत्सर आप्तो भवति। इति

–जैमिनीय-सामवेद-ब्राह्मणे (२।४)।

भविष्यपुराणे—

निमेषा दश चाऽष्टौ च अक्ष्णः काष्ठा निगद्यते॥
त्रिंशत् काष्ठाः कलामाहुः क्षणस् त्रिंशत् कलाः स्मृताः।
मुहूर्तमथ मौहूर्ता वदन्ति द्वादश क्षणम्॥
त्रिंशन्मुहूर्तमुद्दिष्टमहोरात्रं मनीषिभिः।
मासस् त्रिंशदहोरात्रं द्वौद्वौ मासावृतुः स्मृतः॥
ऋतुत्रयमप्ययनमयने द्वे तु वत्सरः। इति (१।२।८६-८९)।

भागवते तृतीयस्कन्धे—

पक्षः पञ्चदशाऽहानि शुक्लः कृष्णश्च मानद।
तयोः समुच्चयो मासः पितॄणां तदहर्निशम्॥
द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि।
अयने चाहनी प्राहुर् वत्सरो द्वादश स्मृतः॥ इति (११।१०-१२)।

मार्कण्डेयपुराणे—

अहोरात्रं मुहूर्तानां नृणां त्रिंशत् तु वै स्मृतम्।
अहोरात्रैश् च त्रिंशद्भिः *पक्षौ द्वौ मास उच्यते॥*
तैः षड्भिरयनं वर्षं द्वेऽयने दक्षिणोत्तरे।
तद् देवानामहोरात्रं दिनं तत्रोत्तरायणम्॥ इति (४३।२४-२५)।

वायुपुराणे पूर्वार्धे—

द्वौ पक्षौ तु भवेन् मासो **द्वौ मासावन्तरावृतुः॥**
ऋतुत्रयमयनं स्याद् द्वेऽयने वर्षमुच्यते। इति (५०।१७७)।

विष्णुपुराणे प्रथमेंऽशे—

काष्ठा पञ्चदशाऽऽख्याता निमेषा मुनिसत्तम।
काष्ठात्रिंशत् कला त्रिंशत् कला मौहूर्तिको विधिः॥
तावत्सङ्ख्यैरहोरात्रं मुहूर्तैर् मानुषं स्मृतम्।
अहोरात्राणि तावन्ति *मासः पक्षद्वयात्मकः*॥
तैः षड्भिरयनं वर्षं द्वेऽयने दक्षिणोत्तरे।
अयनं दक्षिणं रात्रिर् देवानामुत्तरं दिनम्॥ इति (३।८-१०)।

हेममाषैः कृतच्छिद्रा चतुर्भिश् चतुरङ्गुलैः।
मागधेन प्रमाणेन जलप्रस्थस् तु स स्मृतः॥
नाडिकाभ्यामथ द्वाभ्यां मुहूर्तो द्विजसत्तमाः।
अहोरात्रं मुहूर्तास् तु त्रिंशन् मासो दिनैस् तथा॥
मासैर् द्वादशभिर् वर्षमहोरात्रं तु तद् दिवि।
त्रिभिर् वर्षशतैर् वर्षं षष्ट्या चैवाऽसुरद्विषाम्॥ इति

–ब्रह्मपुराणे (१२४।६-१०), विष्णुपुराणे च (६।३।६-१०)।

ब्रह्मवैवर्तपुराणे उत्तरभागे चतुर्थे कृष्णजन्मखण्डे–

सर्वस्माच् च परं सूक्ष्मं परमाणुं निशामय॥
कालारम्भात्मकं सर्वमनूहं परमीप्सितम्।
परमः सद्विशेषाणामनेकोऽसंयुतः सदा॥
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः।
परमाणुद्वयेनाऽणुस् त्रसरेणुस् तु ते त्रयः॥
त्रसरेणुत्रिकेणाऽपि त्रुटिरुक्ता मनीषिभिः।
वेधस् त्रुटिशतेनैव त्रिविधेन लवस् तथा॥
त्रिलवेन निमेषश् च त्रिनिमेषेण च क्षणः।
काष्ठा पञ्चक्षणेनैव लघुश् च दशकाष्ठया॥
लघुपञ्चदशं दण्डस् तत्प्रमाणं निशामय।
द्वादशार्धपलोन्मानं चतुर्भिश् चतुरङ्गुलैः॥
स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलप्लुतम्।
दण्डद्वये मुहूर्तः स्यात् षष्टिदण्डात्मिका *तिथिः*॥
तदष्टभागः प्रहरः प्रमाणं च निरूपणम्।
चतुर्भिः प्रहरैर् रात्रिश् चतुर्भिर् दिनमुच्यते॥
तिथिपञ्चदशेनैव पक्षमानं प्रकीर्तितम्।
पक्षद्वयेन मासः स्याच् *छुक्लकृष्णाभिधेन च॥*
ऋतुर् मासद्वयेनैव तत्षट्केनैव वत्सरः। इति (९६।४७-५६)।

ब्रह्माण्डपुराणे पूर्वभागे–

लवाः काष्ठाः कलाश्चैव मुहूर्तान् सन्धिरात्र्यहान्।
अर्धमासाँश्च मासाँश्च अयनाब्दान् युगानि च॥ इति (७।१९-२०)।

भविष्यपुराणे—

निमेषा दश चाऽष्टौ च अक्ष्णः काष्ठा निगद्यते॥
त्रिंशत् काष्ठाः कलामाहुः क्षणस् त्रिंशत् कलाः स्मृताः।
मुहूर्तमथ मौहूर्ता वदन्ति द्वादश क्षणम्॥
त्रिंशन्मुहूर्तमुद्दिष्टमहोरात्रं मनीषिभिः।
मासस् त्रिंशदहोरात्रं द्वौद्वौ मासावृतुः स्मृतः॥
ऋतुत्रयमप्ययनमयने द्वे तु वत्सरः। इति (१।२।८६-८९)।

भागवते तृतीयस्कन्धे—

पक्षः पञ्चदशाऽहानि शुक्लः कृष्णश्च मानद।
तयोः समुच्चयो मासः पितॄणां तदहर्निशम्॥
द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि।
अयने चाहनी प्राहुर् वत्सरो द्वादश स्मृतः॥ इति (११।१०-१२)।

मार्कण्डेयपुराणे—

अहोरात्रं मुहूर्तानां नृणां त्रिंशत् तु वै स्मृतम्।
अहोरात्रैश् च त्रिंशद्भिः *पक्षौ द्वौ मास उच्यते॥*
तैः षड्भिरयनं वर्षं द्वेऽयने दक्षिणोत्तरे।
तद् देवानामहोरात्रं दिनं तत्रोत्तरायणम्॥ इति (४३।२४-२५)।

वायुपुराणे पूर्वार्धे—

द्वौ पक्षौ तु भवेन् मासो द्वौ मासावन्तरावृतुः॥
ऋतुत्रयमयनं स्याद् द्वेऽयने वर्षमुच्यते। इति (५०।१७७)।

विष्णुपुराणे प्रथमेंऽशे—

काष्ठा पञ्चदशाऽऽख्याता निमेषा मुनिसत्तम।
काष्ठात्रिंशत् कला त्रिंशत् कला मौहूर्तिको विधिः॥
तावत्सङ्ख्यैरहोरात्रं मुहूर्तैर् मानुषं स्मृतम्।
अहोरात्राणि तावन्ति *मासः पक्षद्वयात्मकः*॥
तैः षड्भिरयनं वर्षं द्वेऽयने दक्षिणोत्तरे।
अयनं दक्षिणं रात्रिर् देवानामुत्तरं दिनम्॥ इति (३।८-१०)।

हेममाषैः कृतच्छिद्रा चतुर्भिश् चतुरङ्गुलैः।
मागधेन प्रमाणेन जलप्रस्थस् तु स स्मृतः॥
नाडिकाभ्यामथ द्वाभ्यां मुहूर्तो द्विजसत्तमाः।
अहोरात्रं मुहूर्तास् तु त्रिंशन् मासो दिनैस् तथा॥
मासैर् द्वादशभिर् वर्षमहोरात्रं तु तद् दिवि।
त्रिभिर् वर्षशतैर् वर्षं षष्ट्या चैवाऽसुरद्विषाम्॥ इति

–ब्रह्मपुराणे (१२४।६-१०), विष्णपुराणे च (६।३।६-१०)।

ब्रह्मवैवर्तपुराणे उत्तरभागे चतुर्थे कृष्णजन्मखण्डे–

सर्वस्माच् च परं सूक्ष्मं परमाणुं निशामय॥
कालारम्भात्मकं सर्वमनूहं परमीप्सितम्।
परमः सद्विशेषाणामनेकोऽसंयुतः सदा॥
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः।
परमाणुद्वयेनाऽणुस् त्रसरेणुस् तु ते त्रयः॥
त्रसरेणुत्रिकेणाऽपि त्रुटिरुक्ता मनीषिभिः।
वेधस् त्रुटिशतेनैव त्रिविधेन लवस् तथा॥
त्रिलवेन निमेषश् च त्रिनिमेषेण च क्षणः।
काष्ठा पञ्चक्षणेनैव लघुश् च दशकाष्ठया॥
लघुपञ्चदशं दण्डस् तत्प्रमाणं निशामय।
द्वादशार्धपलोन्मानं चतुर्भिश् चतुरङ्गुलैः॥
स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलप्लुतम्।
दण्डद्वये मुहूर्तः स्यात् षष्टिदण्डात्मिका *तिथिः*॥
तदष्टभागः प्रहरः प्रमाणं च निरूपणम्।
चतुर्भिः प्रहरैर् रात्रिश् चतुर्भिर् दिनमुच्यते॥
तिथिपञ्चदशेनैव पक्षमानं प्रकीर्तितम्।
पक्षद्वयेन मासः स्याच् *छुक्लकृष्णाभिधेन च॥*
ऋतुर् मासद्वयेनैव तत्षट्केनैव वत्सरः। इति (९६।४७-५६)।

ब्रह्माण्डपुराणे पूर्वभागे–

लवाः काष्ठाः कलाश्चैव मुहूर्तान् सन्धिरात्र्यहान्।
अर्धमासाँश्च मासाँश्च अयनाब्दान् युगानि च॥ इति (७।१९-२०)।

महाभारत एवाऽनुशासनपर्वणि—

ऋतुः संवत्सरो मासः *पक्षः सङ्ख्यासमापनः*।
कला काष्ठा लवा मात्रा मुहूर्ताऽहःक्षपाः क्षणाः ॥ इति (१७।१४२)।

अनुशासनपर्वण्येव पुनः—

स वत्सरः स ऋतुः *सोऽर्धमासः* **सोऽहोरात्रः स कला वै स काष्ठाः**।
मात्रा मुहूर्ताश् च लवाः क्षणाश् च विष्वक्सेनः सर्वमेतत् प्रतीहि॥
इति (१५८।३२)।

हरिवंशे च—

निमेषैः पञ्चदशभिः काष्ठा त्रिंशत् तु ताः कलाः।
त्रिंशत्कलो मुहूर्तस् तु त्रिंशता तैर् मनीषिणः॥
अहोरात्रमिति प्राहुश् चन्द्रसूर्यगतिं नृप।
विशेषेण तु सर्वेषु अहोरात्रे च नित्यशः॥
अहोरात्राः पञ्चदश पक्षः इत्यभिशब्दितः।
द्वौ पक्षौ तु स्मृतो मासो मासौ द्वावृतुरुच्यते॥
अब्दं ह्ययनमुक्तं च अयनं त्वृतुभिस् त्रिभिः।
दक्षिणं चोत्तरं चैवं सङ्ख्यातत्त्वविशारदैः॥ इति (१।८।३-६)।

सुश्रुतसंहितायाम्—

कालो हि नाम भगवान् स्वयम्भूरनादिमध्यनिधनः। अत्र रसव्यापत्-सम्पत्ती जीवितमरणे च मनुष्याणामायत्ते। स सूक्ष्मामपि कलां न लीयत इति कालः, सङ्कलयति कालयति वा भूतानीति कालः। तस्य संवत्सरात्मनो भगवानादित्यो गतिविशेषेणा-ऽक्षिनिमेषकाष्ठाकलामुहूर्ताहोरात्र-पक्ष-मासर्त्वयन-संवत्सरयुग-प्रविभागं करोति। तत्र लघ्वक्षरोच्चारणमात्रोऽक्षिनिमेषः। पञ्चदशाक्षिनिमेषाः काष्ठा। त्रिंशत् काष्ठाः कला। विंशतिकलो मुहूर्तः कलादशभागश् च। त्रिंशन्-मुहूर्तमहोरात्रम्। *पञ्चदशाहोरात्राणि पक्षः। स च द्विविधः शुक्लः कृष्णश् च। तौ मासः*। तत्र माघादयो द्वादश मासा द्विमासिकमृतुं कृत्वा षडृतवो भवन्ति। ते शिशिर-वसन्त-ग्रीष्म-वर्षा-शरद्-धेमन्ताः। तेषां तपस्-तपस्यौ शिशिरः। मधु-माधवौ वसन्तः। शुचि-शुक्रौ (शुक्र-शुची) ग्रीष्मः। नभो-नभस्यौ वर्षाः। इषोर्जौ शरत्। सहस्-सहस्यौ हेमन्तः इति। त एते शीतोष्णवर्षलक्षणाश् *चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरं च।* तयोर् दक्षिणं वर्षा-शरद्-

स्कन्दपुराणसूतसंहितायाम्—

काष्ठा पञ्चदश प्रोक्ता निमेषाः पण्डितोत्तमाः।
तासां त्रिंशत् कला तासां त्रिंशन् मौहूर्तिकी गतिः॥
मुहूर्तानां द्विजास् त्रिंशद् दिवारात्रं तु मानवम्।
अहोरात्राणि विप्रेन्द्राः *पक्षः पञ्चदश स्मृतः*॥
पक्षद्वयेन मासः स्यान् **मासैः षड्भिर् द्विजोत्तमाः।**
अयनं द्वेऽयने वर्षं क्रमात् ते दक्षिणोत्तरे॥ इति (१।८।३-६)।

महाभारते आदिपर्वणि—

त्वं सर्वममृतं देव त्वं सोमः परमार्चितः।
त्वं मुहूर्तस् तिथिस् त्वं च त्वं लवस् त्वं पुनः क्षणः॥
शुक्लस् त्वं बहुलस् त्वं च **कला काष्ठा त्रुटिस् तथा।**
संवत्सरर्तवो मासा रजन्यश् च दिनानि च॥ इति (२५।१३-१४)।

महाभारते एव सभापर्वणि—

क्षणा लवा मुहूर्ताश् च दिवा रात्रिस् तथैव च।
अर्धमासाश् च मासाश् च **ऋतवः षट् च भारत॥**
संवत्सराः पञ्च युगमहोरात्रश् चतुर्विधः।
कालचक्रं च तद् दिव्यं नित्यमक्षयमव्ययम्॥ इति (११।३७,३८)।

महाभारते एव शान्तिपर्वणि—

काष्ठा निमेषा दश पञ्च चैव त्रिंशत् तु काष्ठा गणयेत् कलां ताम्।
विंशत्कलश् चाऽपि भवेन् मुहूर्तो भागः कलाया दशमश् च यः स्यात्॥
त्रिंशन्मुहूर्तं तु भवेदहश् च रात्रिश् च सङ्ख्या मुनिभिः प्रणीता।
मासः स्मृतो रात्र्यहनी च त्रिंशत् संवत्सरो द्वादशमास उक्तः।
संवत्सरं द्वे त्वयने वदन्ति संख्याविदो दक्षिणमुत्तरं च॥

इति (२३१।१२-१४)।

शान्तिपर्वणि एव पुनः—

अव्यक्तप्रकृतिरयं कलाशरीरः सूक्ष्मात्मा क्षणत्रुटिशो निमेषरोमा।
ऋत्वास्यः समबल-*शुक्ल-कृष्ण-नेत्रो* **मासाङ्गो द्रवति वयोहयो नराणाम्॥**

—इति (३२१।२५)।

महाभारत एवाऽनुशासनपर्वणि—

ऋतुः संवत्सरो मासः *पक्षः सङ्ख्यासमापनः*।
कला काष्ठा लवा मात्रा मुहूर्ताऽहःक्षपाः क्षणाः॥ इति (१७।१४२)।

अनुशासनपर्वण्येव पुनः—

स वत्सरः स ऋतुः *सोऽर्धमासः* सोऽहोरात्रः स कला वै स काष्ठाः।
मात्रा मुहूर्ताश् च लवाः क्षणाश् च विष्वक्सेनः सर्वमेतत् प्रतीहि॥
इति (१५८।३२)।

हरिवंशे च—

निमेषैः पञ्चदशभिः काष्ठा त्रिंशत् तु ताः कलाः।
त्रिंशत्कलो मुहूर्तस् तु त्रिंशता तैर् मनीषिणः॥
अहोरात्रमिति प्राहुश् चन्द्रसूर्यगतिं नृप।
विशेषेण तु सर्वेषु अहोरात्रे च नित्यशः॥
अहोरात्राः पञ्चदश पक्षः इत्यभिशब्दितः।
द्वौ पक्षौ तु स्मृतो मासो मासौ द्वावृतुरुच्यते॥
अब्दं द्व्ययनमुक्तं च अयनं त्वृतुभिस् त्रिभिः।
दक्षिणं चोत्तरं चैवं सङ्ख्यातत्त्वविशारदैः॥ इति (१।८।३-६)।

सुश्रुतसंहितायाम्—

कालो हि नाम भगवान् स्वयम्भूरनादिमध्यनिधनः। अत्र रसव्यापत्-सम्पत्ती जीवितमरणे च मनुष्याणामायत्ते। स सूक्ष्मामपि कलां न लीयत इति कालः, सङ्कलयति कालयति वा भूतानीति कालः। तस्य संवत्सरात्मनो भगवानादित्यो गतिविशेषेणा-ऽक्षिनिमेषकाष्ठाकलामुहूर्ताहोरात्र-पक्ष-मासर्त्वयन-संवत्सरयुग-प्रविभागं करोति। तत्र लघ्वक्षरोच्चारणमात्रोऽक्षिनिमेषः। पञ्चदशाक्षिनिमेषाः काष्ठा। त्रिंशत् काष्ठाः कला। विंशतिकलो मुहूर्तः कलादशभागश् च। त्रिंशन्-मुहूर्तमहोरात्रम्। *पञ्चदशाहोरात्राणि पक्षः। स च द्विविधः शुक्लः कृष्णश् च। तौ मासः*। तत्र माघादयो द्वादश मासा द्विमासिकमृतुं कृत्वा षड्ऋतवो भवन्ति। ते शिशिर-वसन्त-ग्रीष्म-वर्षा-शरद्-धेमन्ताः। तेषां तपस्-तपस्यौ शिशिरः। मधु-माधवौ वसन्तः। शुचि-शुक्रौ (शुक्र-शुची) ग्रीष्मः। नभो-नभस्यौ वर्षाः। इषोर्जौ शरत्। सहस्-सहस्यौ हेमन्तः इति। त एते शीतोष्णवर्षलक्षणाश् ***चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरं च।*** तयोर् दक्षिणं वर्षा-शरद्-

स्कन्दपुराणसूतसंहितायाम्—

काष्ठा पञ्चदश प्रोक्ता निमेषाः पण्डितोत्तमाः।
तासां त्रिंशत् कला तासां त्रिंशन् मौहूर्तिकी गतिः॥
मुहूर्तानां द्विजास् त्रिंशद् दिवारात्रं तु मानवम्।
अहोरात्राणि विप्रेन्द्राः *पक्षः पञ्चदश स्मृतः*॥
***पक्षद्वयेन मासः स्यात्* मासैः षड्भिर् द्विजोत्तमाः।**
अयनं द्वेऽयने वर्षं क्रमात् ते दक्षिणोत्तरे॥ इति (१।८।३-६)।

महाभारते आदिपर्वणि—

त्वं सर्वममृतं देव त्वं सोमः परमार्चितः।
त्वं मुहूर्तस् तिथिस् त्वं च त्वं लवस् त्वं पुनः क्षणः॥
शुक्लस् त्वं बहुलस् त्वं च कला काष्ठा त्रुटिस् तथा।
संवत्सरर्तवो मासा रजन्यश् च दिनानि च॥ इति (२५।१३-१४)।

महाभारते एव सभापर्वणि—

क्षणा लवा मुहूर्ताश् च दिवा रात्रिस् तथैव च।
अर्धमासाश् च मासाश् च ऋतवः षट् च भारत॥
संवत्सराः पञ्च युगमहोरात्रश् चतुर्विधः।
कालचक्रं च तद् दिव्यं नित्यमक्षयमव्ययम्॥ इति (११।३७,३८)।

महाभारते एव शान्तिपर्वणि—

काष्ठा निमेषा दश पञ्च चैव त्रिंशत् तु काष्ठा गणयेत् कलां ताम्।
विंशत्कलश् चाऽपि भवेन् मुहूर्तो भागः कलाया दशमश् च यः स्यात्॥
त्रिंशन्मुहूर्तं तु भवेदहश् च रात्रिश् च सङ्ख्या मुनिभिः प्रणीता।
मासः स्मृतो रात्र्यहनी च त्रिंशत् संवत्सरो द्वादशमास उक्तः।
संवत्सरं द्वे त्वयने वदन्ति संख्याविदो दक्षिणमुत्तरं च॥

इति (२३१।१२-१४)।

शान्तिपर्वणि एव पुनः—

अव्यक्तप्रकृतिरयं कलाशरीरः सूक्ष्मात्मा क्षणत्रुटिशो निमेषरोमा।
ऋत्वास्यः समबल-*शुक्ल-कृष्ण-नेत्रो* मासाङ्गो द्रवति वयोहयो नराणाम्॥

—इति (३२१।२५)।

आधुनिकसूर्यसिद्धान्तस्य वैदिककालगणनापरम्परायाः प्रतिकूलत्वात् तस्य श्रौत-स्मार्त-धर्मकर्म-कालनिर्णयेऽनादेयत्वं स्फुटतरं भवति। सूर्यसिद्धान्तस्य **"भानोर् मकरसङ्क्रान्तेः षण् मासा उत्तरायणम्। कर्क्यादिस् तु तथैव स्यात् षण् मासा दक्षिणायनम्"** इति कथनं निश्चितनक्षत्रसमूहविशेषरूपमकरादिराशिदृष्ट्या तु प्राकृत-वस्तुस्थितेरनुरूपमपि नास्तीति चाऽत्र स्मरणीयम्।

वैदिकपरम्परायां सूर्यस्य दृक्सिद्धस्योदङ्मुखीभावस्य प्रारम्भात् (सायन-मकरमासप्रारम्भात्) प्रभृत्येवोदगयनस्य प्रवृत्तिरिति उदगयनं देवानां दिनमिति च स्वीक्रियते। तत्र प्रमाणभूतानि वचनानि यथा—

स (सूर्यः) यत्रोदङ्ङावर्तते देवेषु तर्हि भवति। इति
—माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशतपथब्राह्मणे (२।१।३।३)।

मघाद्यं श्रविष्ठार्धमाग्नेयम्। इति
—मैत्रायणीयकृष्णयजुर्वेदारण्यके (६।१४)।

माघमासे धनिष्ठाभिरुत्तरेणैति भानुमान्। इति
—बौधायनश्रौतसूत्रे (१६।२९)।

स्यात् तदादियुगं माघस् तपश्शुक्लोऽयनं ह्युदक्। इति
—वेदाङ्गज्योतिषग्रन्थे (श्लो.६)।

प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक्।
सार्पार्धे दक्षिणाऽर्कस् तु माघश्रावणयोः सदा॥ इति च
—तत्रैव (श्लो.७)।

शिशिराद्युत्तरायणम्। इति
—कौटलीये अर्थशास्त्रे (२।२०)।

शिशिरवसन्तावुदगयनस्थौ। इति
—पातञ्जले पाणिनीयव्याकरणभाष्ये (२।२।३४, वा.३)।

तत्राऽऽदित्यस्योदगयनमादानं च त्रीनृतून् छिशिरादीन् व्यवस्येत्। इति
—चरकसंहितायाम् (१।६।४)।

त एते शीतोष्णवर्षलक्षणाश् चन्द्राऽऽदित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरं च, तयोर् दक्षिणं वर्षाशरद्धेमन्ताः ... ... उत्तरं च शिशिरवसन्तग्रीष्माः। इति
—सुश्रुतसंहितायाम् (१।६।७)।

तदुत्तरायणे कार्यं माघादिष्वेव केवलम्। इति
—लौगाक्षिस्मृतौ, स्मृतिसन्दर्भे, षष्ठे भागे (पृ.२४४)।

(१४।९।१।१९), **"उदगयनऽ आपूर्यमाणपक्षे पुण्याहे द्वादशाहमुपसद्व्रती भूत्वा"** इति (१४।९।३।१), **आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायां** च **"पूर्वपक्षे सुत्या सम्पद्यते पूर्वपक्षं मासा अभिसम्पद्यन्ते ते पूर्वपक्ष उत्तिष्ठन्ति"** इति (७।४।८।३), काठककृष्ण-यजुर्वेदसंहितायां (७।५) **कपिष्ठलकठकृष्णयजुर्वेदसंहितायां** (५।४) च **"अग्नीषोमीयया पूर्वपक्ष उपतिष्ठेत"** इति, "अग्नीषोमा एवैनं पूर्वपक्षाय परिदत्त इन्द्राग्नी अपरपक्षाय" इति (का. ७।५ क. ५।४), **जैमिनीयसामवेदब्राह्मणे** च "पञ्चदशाऽऽपूर्यमाणस्याऽर्ध-मासस्य रात्रयः" इति (१।२५।१), **ताण्डिकौथुमराणायनीयसामवेदपञ्चविंशब्राह्मणे** च "तमपक्षीयमाणपक्षं पौर्णमासेन यन्ति" इति (२५।१०।८) चेत्येवंविधानां प्रयोगाणां दर्शनात् पक्षशब्दो मुख्यतया चान्द्र-शुक्लपक्ष-कृष्णपक्षविषय एवेत्यवगम्यते। तस्मादुपरिप्रदर्शितेषु प्रयोगेषु अर्धमासशब्दः पक्षशब्दश् च चान्द्रशुक्लपक्ष-कृष्ण-पक्षविषय एवेति ज्ञेयम्।

उक्तात् कारणाद् वैदिकानां धर्मकृत्यार्थकानां प्राकृतानां मासानामृतूनामय-नानां च मुख्यतया चान्द्रत्वाच् च तद्घटितं वैदिकानां धर्मकृत्यवर्षं च मुख्यतया प्रकृतिसम्मतं चान्द्रमस्तीति स्पष्टं भवति। तस्यैतस्य वैदिकानां प्रकृतिसम्मतस्य धर्मकृत्यार्थकवर्षस्य प्रारम्भो माघशुक्लप्रतिपदि भवतीति च वेदाङ्गज्योतिषग्रन्थे **"माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः"** इति वचने (श्लो.५) प्रतिपादितमस्ति। एतर्हि प्रचलिते सूर्यसिद्धान्तग्रन्थे तु मुख्यतया मासा ऋतवोऽयने वर्षं च सौरमानेनैव प्रतिपाद्यन्ते इति तस्य ग्रन्थस्य **"द्विराशिनाथा ऋतवस् ततोऽपि शिशिरादयः। मेषा-दयो द्वादशैते मासास् तैरेव वत्सरः"** (मानाध्याये, श्लो.१०) इति वचनादवगम्यते। नववर्षारम्भस् तु तन्मते शिशिरर्तौ भवतीति स्वीक्रियतेऽथवा मेषमासे भवतीति स्वीक्रियत इति उक्तवचनान् नाऽतिस्पष्टं भवति। तस्मिन् ग्रन्थे **"युता मासैर् मधु-शुक्लादिभिर् गतैः"** (मध्यमाधिकारे, श्लो.४८) इत्युल्लेखस्य च दर्शनात् तस्मिन् ग्रन्थे वस्तुतः सौरमकरमासप्रारम्भे वा सौरमेषमासप्रारम्भे वा चान्द्रमधुमासप्रारम्भे वा नववर्षारम्भः स्वीक्रियत इति निश्चयेन वक्तुं दुःशकं प्रतीयते। एवं चाऽस्य सूर्य-सिद्धान्तस्य **"माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः"** (श्लो.५) इति वचनेन माघ-शुक्लप्रतिपदि नववर्षारम्भं स्वीकुर्वतो वेदाङ्गज्योतिषग्रन्थस्य प्रतिकूलत्वं स्पष्टमि-त्येतस्य सूर्यसिद्धान्तग्रन्थस्य श्रौत-स्मार्तधर्मकर्मकालनिर्णयेऽनादेयत्वं स्फुटं भवति।

वेदाङ्गज्योतिषग्रन्थोक्ता वैदिकपरम्परासिद्धा पुराणादिवैदिकपरम्परानुकूल-वाङ्मयसम्मताऽयनव्यवस्था गते चतुर्विंशे प्रकरणे (पृ.१३३) प्रतिपादिताऽस्ति। सा तत्रैव द्रष्टव्या। एवं चोक्तायाः सौरचान्द्रस्याऽयनस्य व्यवस्थायाः प्रतिकूलां शुद्ध-सौरायनव्यवस्थामेव प्रतिपादयतः **"भानोर् मकरसङ्क्रान्तेः षण् मासा उत्तरायणम्। कर्क्यादेस् तु तथैव स्यात् षण् मासा दक्षिणायनम्"** (मानाध्याये, श्लो.९) इति वदत

आधुनिकसूर्यसिद्धान्तस्य वैदिककालगणनापरम्परायाः प्रतिकूलत्वात् तस्य श्रौत-स्मार्त-धर्मकर्म-कालनिर्णयेऽनादेयत्वं स्फुटतरं भवति। सूर्यसिद्धान्तस्य **"भानोर् मकरसङ्क्रान्तेः षण् मासा उत्तरायणम्। कर्क्यादेस् तु तथैव स्यात् षण् मासा दक्षिणायनम्"** इति कथनं निश्चितनक्षत्रसमूहविशेषरूपमकरादिराशिदृष्ट्या तु प्राकृत-वस्तुस्थितेरनुरूपमपि नास्तीति चाऽत्र स्मरणीयम्।

वैदिकपरम्परायां सूर्यस्य दृक्सिद्धस्योदङ्मुखीभावस्य प्रारम्भात् (सायन-मकरमासप्रारम्भात्) प्रभृत्येवोदगयनस्य प्रवृत्तिरिति उदगयनं देवानां दिनमिति च स्वीक्रियते। तत्र प्रमाणभूतानि वचनानि यथा—

स (सूर्यः) यत्रोदङ्ङावर्तते देवेषु तर्हि भवति। इति

—माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशतपथब्राह्मणे (२।१।३।३)।

मघाद्यं श्रविष्ठार्धमाग्नेयम्। इति

—मैत्रायणीयकृष्णयजुर्वेदारण्यके (६।१४)।

माघमासे धनिष्ठाभिरुत्तरेणैति भानुमान्। इति

—बौधायनश्रौतसूत्रे (१६।२९)।

स्यात् तदादियुगं माघस् तपश्शुक्लोऽयनं ह्युदक्। इति

—वेदाङ्गज्योतिषग्रन्थे (श्लो.६)।

प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक्।
सार्पार्धे दक्षिणाऽर्कस् तु माघश्रावणयोः सदा॥ इति च

—तत्रैव (श्लो.७)।

शिशिराद्युत्तरायणम्। इति

—कौटलीये अर्थशास्त्रे (२।२०)।

शिशिरवसन्तावुदगयनस्थौ। इति

—पातञ्जले पाणिनीयव्याकरणभाष्ये (२।२।३४, वा.३)।

तत्राऽऽदित्यस्योदगयनमादानं च त्रीनृतूञ् छिशिरादीन् व्यवस्येत्। इति

—चरकसंहितायाम् (१।६।४)।

त एते शीतोष्णवर्षलक्षणाश् चन्द्राऽऽदित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरं च, तयोर् दक्षिणं वर्षाशरद्धेमन्ताः ... ... उत्तरं च शिशिरवसन्तग्रीष्माः। इति

—सुश्रुतसंहितायाम् (१।६।७)।

तदुत्तरायणे कार्यं माघादिष्वेव केवलम्। इति

—लौगाक्षिस्मृतौ, स्मृतिसन्दर्भे, षष्ठे भागे (पृ.२४४)।

(१४।९।१।१९), "उदगयनऽ आपूर्यमाणपक्षे पुण्याहे द्वादशाहमुपसद्व्रती भूत्वा" इति (१४।९।३।१), **आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायां** च "पूर्वपक्षे सुत्या सम्पद्यते पूर्वपक्षं मासा अभिसम्पद्यन्ते ते पूर्वपक्ष उत्तिष्ठन्ति" इति (७।४।८।३), काठककृष्ण-यजुर्वेदसंहितायां (७।५) **कपिष्ठलकठकृष्णयजुर्वेदसंहितायां** (५।४) च "अग्नीषोमीयया पूर्वपक्ष उपतिष्ठेत" इति, "अग्नीषोमा एवैनं पूर्वपक्षाय परिदत्त इन्द्राग्नी अपरपक्षाय" इति (का. ७।५ क. ५।४), **जैमिनीयसामवेदब्राह्मणे** च "पञ्चदशाऽऽपूर्यमाणस्याऽर्ध-मासस्य रात्रयः" इति (१।२५१), **ताण्डिकौथुमराणायनीयसामवेदपञ्चविंशब्राह्मणे** च "तमपक्षीयमाणपक्षं पौर्णमासेन यन्ति" इति (२५।१०।८) चेत्येवंविधानां प्रयोगाणां दर्शनात् पक्षशब्दो मुख्यतया चान्द्र-शुक्लपक्ष-कृष्णपक्षविषय एवेत्यवगम्यते। तस्मादुपरिप्रदर्शितेषु प्रयोगेषु अर्धमासशब्दः पक्षशब्दश् च चान्द्रशुक्लपक्ष-कृष्ण-पक्षविषय एवेति ज्ञेयम्।

उक्तात् कारणाद् वैदिकानां धर्मकृत्यार्थकानां प्राकृतानां मासानामृतूनामय-नानां च मुख्यतया चान्द्रत्वाच् च तद्घटितं वैदिकानां धर्मकृत्यवर्षं च मुख्यतया प्रकृतिसम्मतं चान्द्रमस्तीति स्पष्टं भवति। तस्यैतस्य वैदिकानां प्रकृतिसम्मतस्य धर्मकृत्यार्थकवर्षस्य प्रारम्भो माघशुक्लप्रतिपदि भवतीति च वेदाङ्गज्योतिषग्रन्थे **"माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः"** इति वचने (श्लो.५) प्रतिपादितमस्ति। एतर्हि प्रचलिते सूर्यसिद्धान्तग्रन्थे तु मुख्यतया मासा ऋतवोऽयने वर्षं च सौरमानेनैव प्रतिपाद्यन्ते इति तस्य ग्रन्थस्य **"द्विराशिनाथा ऋतवस् ततोऽपि शिशिरादयः। मेषा-दयो द्वादशैते मासास् तैरेव वत्सरः"** (मानाध्याये, श्लो.१०) इति वचनादवगम्यते। नववर्षारम्भस् तु तन्मते शिशिरर्तौ भवतीति स्वीक्रियतेऽथवा मेषमासे भवतीति स्वीक्रियत इति उक्तवचनान् नाऽतिस्पष्टं भवति। तस्मिन् ग्रन्थे **"युता मासैर् मधु-शुक्लादिभिर् गतैः"** (मध्यमाधिकारे, श्लो.४८) इत्युल्लेखस्य च दर्शनात् तस्मिन् ग्रन्थे वस्तुतः सौरमकरमासप्रारम्भे वा सौरमेषमासप्रारम्भे वा चान्द्रमधुमासप्रारम्भे वा नववर्षारम्भः स्वीक्रियत इति निश्चयेन वक्तुं दुःशकं प्रतीयते। एवं चाऽस्य सूर्य-सिद्धान्तस्य **"माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः"** (श्लो.५) इति वचनेन माघ-शुक्लप्रतिपदि नववर्षारम्भं स्वीकुर्वतो वेदाङ्गज्योतिषग्रन्थस्य प्रतिकूलत्वं स्पष्टमि-त्येतस्य सूर्यसिद्धान्तग्रन्थस्य श्रौत-स्मार्तधर्मकर्मकालनिर्णयेऽनादेयत्वं स्फुटं भवति।

वेदाङ्गज्योतिषग्रन्थोक्ता वैदिकपरम्परासिद्धा पुराणादिवैदिकपरम्परानुकूल-वाङ्मयसम्मताऽयनव्यवस्था गते चतुर्विंशे प्रकरणे (पृ.१३३) प्रतिपादिताऽस्ति। सा तत्रैव द्रष्टव्या। एवं चोक्तायाः सौरचान्द्रस्याऽयनस्य व्यवस्थायाः प्रतिकूलां शुद्ध-सौरायनव्यवस्थामेव प्रतिपादयतः **"भानोर् मकरसङ्क्रान्तेः षण् मासा उत्तरायणम्। कर्क्यादेस् तु तथैव स्यात् षण् मासा दक्षिणायनम्"** (मानाध्याये, श्लो.९) इति वदत

एतद् दिव्यमहोरात्रमिति शास्त्रस्य निश्चयः।
दक्षिणं चाऽयनं रात्रिस् तथोदगयनं दिनम्॥ इति

–शिवपुराणे (७।१।८।८)।

देवासुराणामन्योन्यमहोरात्रं विपर्ययात्।
उत्तरं दक्षिणं भानोरयने ते यथाक्रमम्॥ इति

–स्कन्दपुराणे वैष्णवखण्डे (१।३६।३२)।

मानुषेण तु मानेन यो वै संवत्सरः स्मृतः।
देवानां तदहोरात्रं दिवा चैवोत्तरायणम्॥ इति

–तत्रैव आवन्त्यखण्डे (१।४८।१४-१५), हरिवंशे च (१।८।९)।

अयनं चोत्तरं शुक्लं यद् देवानां दिनं तु तत्।
यद् दक्षिणं तु सा रात्रिः शुभकर्मविगर्हिता॥ इति

–स्कन्दपुराणे, नागरखण्डे (२७२।८)।

अयनं द्वेऽयने वर्षं क्रमात् ते दक्षिणोत्तरे।
रात्रिर् दिवौकसां पूर्वं दिवा चैवोत्तरायणम्॥ इति

–स्कन्दपुराणसूतसंहितायाम् (१।८।६)।

उक्तविधायां वैदिकशास्त्रीयपरम्परायां सत्यां यद् आधुनिकसूर्यसिद्धान्तग्रन्थे भूगोलाध्याये **"देवासुराणामन्योन्यमहोरात्रं विपर्ययात्। किमर्थं तत् कथं वा स्याद् भानोर् भगणपूरणात्"** इति (श्लो.४), **"मेषादौ देवभागस्थे देवानां याति दर्शनम्। असुराणां तुलादौ तु सूर्यस् तद्भागसञ्चरः"** इति (श्लो.४५), **"मेषादावुदितः सूर्यस् त्रीन् राशीनुदगुत्तरम्। सञ्चरन् प्रागहर्मध्यं पूरयेन् मेरुवासिनाम्॥ कर्क्यादीन् सञ्चरँस् तद्वदह्नः पश्चार्धमेव सः। तुलादींस् त्रीन् मृगादींश् च तद्वदेव सुरद्विषाम्"** इति (श्लो.४८,४९), **"ऊने भूवृत्तपादे तु द्विज्यापक्रमयोजनैः। धनुर्-मृगस्थः सविता देवभागे न दृश्यते॥ तथा चाऽसुरभागे तु मिथुने कर्कटे स्थितः"** इति (श्लो.६३-६४), **"मेरौ मेषादिचक्रार्धे देवाः पश्यन्ति भास्करम्। सकृदेवोदितं तद्वदसुराश् च तुलादिगम्"** इति (श्लो.६७) चोक्त्वा देवाऽसुरदिनविभागादिकं प्रतिपादितं तदपि वैदिकपरम्पराप्रतिकूलमेवाऽवसीयते। यच्च सूर्यसिद्धान्तोक्तविषयसमर्थनाय भास्करेण सिद्धान्तशिरोमणिगोलाध्यायत्रिप्रश्नवासनायां (श्लो.८-१२) जल्पितं तदपि श्रुति-स्मृति-पुराणविरुद्धत्वात् श्रुतिस्मृतिपुराणानुसारिभिः सर्वथा हेयमेव। वैदिकपरम्परायां सौरायनसापेक्षस्याऽपि सतश् चान्द्रस्यैव चान्द्रर्तुत्रयात्मकस्याऽयनस्य ग्राह्यत्वात् तादृशस्य चाऽयनस्य आधुनिके सूर्यसिद्धान्तेऽप्रतिपादितत्वाच् च सूर्यसिद्धान्तोक्ता-

यनव्यवस्थायाः श्रौतस्मार्तधर्मकृत्यार्थमनादेयत्वाच् चाऽऽधुनिकसूर्यसिद्धान्तग्रन्थस्य श्रौत-स्मार्त-धर्म-कर्मकालनिर्णयेऽनादेयत्वं बोध्यम्।

यथेदानीं सौरमासप्रारम्भः सूर्यस्य सङ्क्रममेव विचार्य न स्वीक्रियते, गताया रात्रेरर्धात् पश्चाद् रात्रावेव सूर्यस्य सङ्क्रमे जातेऽपि सूर्योदयकालात् प्रभृत्येव सौरमासदिवसगणना प्रारभ्यते, आगामिन्या रात्रेरर्धात् प्राग् रात्रावेव सूर्यस्य सङ्क्रमे भाविनि सत्यपि सूर्योदयकालात् प्रभृत्येव सौरमासदिवसगणना प्रारभ्यते तथैव वैदिकं धर्मकर्मार्थकं सौरचान्द्रमयनमपि यस्मिँश् चान्द्रमासे सूर्यस्य दृक्सिद्ध-मुदगयनं दक्षिणायनं वा प्रारभ्यते तस्य चान्द्रमासस्य शुक्लपक्षस्य प्रतिपद्येव प्रवृत्तं स्वीक्रियते। कदाचित् अधिकमासयुते वर्षे तु सूर्यस्य दृक्सिद्धे उदगयने दक्षिणायने वाऽपि जातेऽपि ततः पश्चाद् एकद्वेषु वा द्वित्रेषु वा त्रिचतुरेषु वा चतुःपञ्चेषु वा पञ्चषेषु वाऽपि दिनेषु आगामिन्यां शुक्लप्रतिपद्यपि वैदिकधर्मकृत्यार्थस्य सौरायन-सापेक्षस्य चान्द्रस्याऽयनस्य प्रवृत्तिः स्वीक्रियते इति वेदितव्यम्।

वैदिकानां श्रौत-स्मार्त-धर्म-कर्मार्थानामृतूनां मुख्यतया चान्द्रत्वं गते षड्विंशे प्रकरणे (पृ.१४८) प्रतिपादितमस्ति। तत् तत्रैव द्रष्टव्यम्। प्रचलिते आधुनिके सूर्य-सिद्धान्ते तु वैदिकानां चान्द्राणामृतूनां कोऽप्युल्लेखो नास्तीति चैतस्य सूर्यसिद्धान्त-ग्रन्थस्य श्रौतस्मार्तधर्मकर्मकालनिर्णयेऽनादेयत्वं बोध्यम्।

वैदिकानां श्रौत-स्मार्त-धर्मकर्मार्थानां तपस्-तपस्य-मधु-माधवादीनां मासानां मुख्यतया चान्द्रत्वं गते त्रयोविंशे प्रकरणे (पृ.१२७) प्रतिपादितमस्ति। तत् तत्रैव द्रष्टव्यम्। मेष-वृषादीनां राशीनामुल्लेखो वेदमन्त्रसंहितासु, ब्राह्मणग्रन्थेषु, श्रौतसूत्रेषु, गृह्यसूत्रेषु, धर्मसूत्रेषु, मनुस्मृतौ, याज्ञवल्क्यस्मृतौ, महाभारते च नास्ति। तस्मान् मेष-वृषादिराशिविभागमूलका **मेषमास-वृषमासादयो मासा अवैदिका एव**। तस्मात् सङ्क्रान्तिपुण्यकालादयो विषया मुख्यायां वैदिकधार्मिकपरम्परायां नैव सन्तीत्यव-गम्यते। यद्यपि याज्ञवल्क्यस्मृतौ **"विषुवत्सूर्यसङ्क्रमः"** (१।२१७) इत्युल्लेखो दृश्यते, विश्वरूपादिभिस् तस्य पदस्य सूर्यस्य राशिषु सङ्क्रान्तीनां बोधकत्वस्य च प्रति-पादनं कृतं दृश्यते, तथापि ते सूर्यसिद्धान्त-ब्राह्मस्फुटसिद्धान्तादीनाम् अर्वाचीनानां ग्रन्थानां प्रभावे पतिता भ्रान्ता अवगम्यन्ते। तत्र वस्तुतो विषुवति सूर्यस्य सम्प्राप्ति-रेव प्रतिपादिताऽवगम्यते, वैदिकपरम्परायां विषुवत्कालस्य प्रसिद्धत्वान् महत्त्व-पूर्णत्वाच्च। मत्स्यपुराणेऽपि **"अयने विषुवे वाऽपि सङ्क्रान्तिव्रतमाचरेत्"** इत्युल्लेखो दृश्यते (९८।२)। अयनसङ्क्रान्तिरूपयोः कर्कटसङ्क्रान्ति-मकरसङ्क्रान्त्योः, विषुव-सङ्क्रान्तिरूपयोर् मेषसङ्क्रान्ति-तुलासङ्क्रान्त्योः, षडशीतिमुखरूपाणां मिथुन-सङ्क्रान्ति-कन्यासङ्क्रान्ति-धनुःसङ्क्रान्ति-मीनसङ्क्रान्तीनां चोल्लेखो महाभारते

वनपर्वणि द्विशततमेऽध्यायेऽस्तीति **'भारतीय ज्योतिष'** इत्युक्ते ग्रन्थे (पृ.१५९) शङ्कर-बालकृष्णदीक्षितेनोक्तमस्ति। तेन तस्मिन्नेव ग्रन्थे अधोलिखितं वचनं प्रदर्शितमस्ति–

पर्वसु द्विगुणं दानमृतौ दशगुणं भवेत्॥ २४॥
अयने विषुवे चैव षडशीतिमुखेषु च।
चन्द्र-सूर्योपरागे च दत्तमक्षयमुच्यते॥ २५॥ इति।

यद्यप्युक्तं वचनं नीलकण्ठकृतभारतभावदीपयुते पुण्यपत्तनस्थ-चित्रशाला-मुद्रणालयमुद्रिते महाभारतसंस्करणे दृश्यते, तथापि भाण्डारकरप्राच्यविद्यासंशोधन-मन्दिरप्रकाशिते महाभारतस्य शोधसंस्करणे तु तद् वचनं नैव दृश्यते। तस्मान् महा-भारतस्थतया तद् वचनं निश्शङ्कतया ग्रहीतुमसाम्प्रतमेव।

एवं च मेषादिराशिविभागमूलकाः सौरमासा अवैदिका एवाऽवगम्यन्ते। अत एव लौगाक्षिस्मृतौ प्रोक्तम्–

पक्षद्वयात्मको मास ऋतुर् मासद्वयात्मकः।
ऋतुषट्कात्मकश् चाऽब्दो मधुर् माधव एव च॥
वसन्त इति वेदोक्तः शुक्रश् च शुचिरप्यथ।
ऋतुर् ग्रीष्म इति प्रोक्तो नभा नभस्य एव च॥
वर्षा इति समाख्यात इषश् चोर्जश् च शारदः।
सहाश् चाऽपि सहस्यश् च हेमन्त इति चोदितः॥
तपश् चाऽपि तपस्यश् च शिशिराख्यो महात्मभिः।
मासपक्षर्तवः सर्वे तिथयो निखिला अपि॥
पक्षद्वयनिदानानि चान्द्रमानं तदात्मनि।
सम्यग् घटन्ते ते सर्वे न सौरे तु कदाचन॥
ततस् तेनैव मार्गेण श्रुत्युक्ताश् चाऽखिलाः क्रियाः।
विशेषज्ञः प्रकुर्वीत न चेत् कर्माऽखिलं तु तत्।
वैगुण्यमेव लभते अतः श्राद्धं च तादृशम्॥ इति

–स्मृतिसन्दर्भे षष्ठे भागे, पृ.३८२।

वैक्रमाब्दानां दशमे शतके स्थितत्वेन सम्भावितेन राजशेखरेणाऽपि वैदिक-धर्मकर्मणां सर्वेषामेव चान्द्रमानाश्रितत्वमुक्तमस्ति। तथाहि–

पञ्चदशाहोरात्रः पक्षः। वर्धमानसोमः शुक्लः, वर्धमानकृष्णिमा कृष्ण इति पित्र्यं मासमानम्। अमुना च वेदोदितः कृत्स्नोऽपि क्रियाकल्पः। पित्र्यमेव

व्यत्ययितपक्षं चान्द्रमसम्। इदमार्यावर्त्तवासिनश् च कवयश् च मानमाश्रिताः। एवं च द्वौ पक्षौ मासः। द्वौ मासावृतुः। षण्णामृतूनां परिवर्त्तः संवत्सरः। इति
–काव्यमीमांसायाम् अष्टादशेऽध्याये (पृ.२९४-२९५)।

उक्तविधायां वैदिकपरम्परायां सत्यां प्रचलिते सूर्यसिद्धान्ते मानाध्याये (श्लो.३-११) तु—

सौरेण द्युनिशोर् मानं षडशीतिमुखानि च।
अयनं विषुवच् चैव सङ्क्रान्तेः पुण्यकालता॥
तुलादि षडशीत्यह्नां षडशीतिमुखं क्रमात्।
तच्चतुष्टयमेव स्याद् द्विस्वभावेषु राशिषु॥
षड्विंशे धनुषो भागे द्वाविंशेऽनिमिषस्य च।
मिथुनाष्टादशे भागे कन्यायास् तु चतुर्दश॥
ततः शेषाणि कन्याया यान्यहानि तु षोडश।
क्रतुभिस् तानि तुल्यानि पितॄणां दत्तमक्षयम्॥
भचक्रनाभौ विषुवद्द्वितयं समसूत्रगम्।
अयनद्वितयं चैव चतस्रः प्रथितास् तु ताः॥
तदन्तरेषु सङ्क्रान्तिद्वितयं द्वितयं पुनः।
नैरन्तर्यात् तु सङ्क्रान्तेर् ज्ञेयं विष्णुपदीद्वयम्॥
भानोर् मकरसङ्क्रान्तेः षण् मासा उत्तरायणम्।
कर्क्यादेस् तु तथैव स्यात् षण् मासा दक्षिणायनम्॥
द्विराशिनाथा ऋतवस् ततोऽपि शिशिरादयः।
मेषादयो द्वादशैते मासास् तैरेव वत्सरः॥
अर्कमानकलाः षष्ट्या गुणिता भुक्तिभाजिताः।
तदर्धनाड्यः सङ्क्रान्तेरर्वाक् पुण्यं तथा परे॥

इति सन्दर्भेण मासर्त्वयनवर्षाणि सर्वाणि मेषादिराशिविभागमूलकतयोक्त्वा सङ्क्रान्तीनां पुण्यकाला अपि प्रतिपादिताः। तत्र कन्यां गते सूर्ये पूर्वाणि चतुर्दश दिनानि त्यक्त्वाऽवशिष्टानि षोडश दिनानि क्रतुभिस् तुल्यानि प्रतिपाद्य तत्र पितृभ्यो दत्तमक्षयं भवतीत्यप्युक्तम् (श्लो. ६)। किन्तु श्रुति-स्मृति-पुराणानुसारिभिर् वैदिकैः शिष्टैः शुद्धसौरमानानुसारिणां तेषां षोडशानां दिनानां पितृकर्मणः कृते ग्राह्यत्वमादृतं न दृश्यते। ते हि चान्द्रमानेन भाद्रपदापरपक्षं वा आश्वयुजापरपक्षं वाऽपि पितृकर्मणः कृते ग्राह्यं प्रतिपादयन्ति। **"आषाढीमवधिं कृत्वा यः स्यात् पक्षस् तु पञ्चमः। श्राद्धं तत्र प्रकुर्वीत कन्यां गच्छतु वा न वा"** इति वचनं च वीरमित्रोदये समयप्रकाशे (पृ.१६७) हेमाद्रिकृते चतुर्वर्गचिन्तामणौ परिशेषखण्डे श्राद्धकल्पे (पृ.१९८) च

दृश्यते। एतेन चान्द्रमानस्य प्राधान्यमत्यन्तमेव स्पष्टं भवति। एवं चाऽस्य सौरमान-प्राधान्यवादिनः सूर्यसिद्धान्तग्रन्थस्य वैदिकमूलपरम्पराबाह्यत्वमेव प्रकटं भवति।

वैदिकपरम्परायां तिथिः खलु सामान्यतयाऽहोरात्रात्मिकैव स्वीक्रियते। एतच् च वेदेषु अहोरात्रा-ऽर्धमास-मासादीनां क्रमबद्धरूपेणोल्लेखस्य दर्शनादवगम्यते। तादृशस्य क्रमबद्धोल्लेखस्य स्थलानि च पूर्वमेव त्रयोविंशे (पृ.१२८) चतुर्विंशे (पृ.१४४) च प्रकरणे प्रदर्शितानि सन्ति तानि तत्रैव द्रष्टव्यानि। मूले वैदिकवाङ्मये तिथिशब्द एव दुर्लभः, तत्र तिथिशब्दस्थानेऽहश्शब्दो वाऽहोरात्रशब्दो वैव प्रयुक्तो दृश्यते। तिथिमहोरात्रात्मिकां स्वीकृत्य शुक्लपक्षप्रतिपदो दिने कौस्तुभकरणस्य स्थितिः रात्रौ ववकरणस्य स्थितिरित्येवंप्रकारेण प्रतिपादनं कुर्वत आथर्वणज्योतिषग्रन्थस्य (श्लो.४१, श्लो.३०) वचनेभ्योऽपि वैदिकानां तिथेः सामान्यतयाऽहोरात्रात्मकत्वं बोद्धुं शक्यम्। ब्रह्मगुप्तस्य ब्राह्मस्फुटसिद्धान्ते **"स्फुटतिथ्यज्ञानतस् तदसत्"** (११।२) इति वदतो वचनादपि वेदाङ्गज्योतिषेऽपि स्फुटतिथेः खण्डतिथेर् वाऽङ्गीकारो नाऽऽसीदित्यवगम्यत एव। तिथिरूपेऽहोरात्रेऽपि वैदिकपरम्परायाम् अह्नः प्रथमं स्थानं रात्रेर् द्वितीयं स्थानमिति माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथ-ब्राह्मणस्य **"विष्णुक्रमैर् वै प्रजापतिरहरसृजत, वात्सप्रेण रात्रिम्"** इति (६।७।४।७) वचनादवगम्यमानत्वात् सृष्टिक्रमतः, "अहः पूर्वं ततो रात्रिः" इति महाभारताश्वमेधिकपर्ववचनात् (४४।२); ब्रह्माण्डपुराणस्य (१।२४।१४२), लिङ्गपुराणस्य (१।६१।५४), वायुपुराणस्य (१।५३।११४) च **"अहोरात्रविभगानामहश्चाऽपि (आद्यं) प्रकीर्तितम्"** इति वचनाच् च स्पष्टं भवति। महाभारताश्वमेधिकपर्वणः **"अहान्यस्तमयान्तानि उदयान्ता च शर्वरी"** (४४।१८) इति वचनाच् च वैदिक-परम्परायामहोरात्रस्य गणना सूर्योदयसमयादारभ्यत इति स्पष्टतयाऽवगम्यते। एतादृश्यां वैदिकाहोरात्रात्मकतिथिगणनास्थितौ अर्धरात्रपरिच्छिन्नमहर्गणं प्रतिपादयतः (मध्यमाधिकारे, श्लो.५०), वारप्रवृत्तिं चाऽर्धरात्रादेव प्रभृति प्रतिपादयतः (मध्यमाधिकारे, श्लो.६६) प्रचलित-सूर्यसिद्धान्तग्रन्थस्य वैदिककालगणना-सिद्धान्तप्रतिकूलत्वं स्पष्टम्। सूर्यसिद्धान्तस्थस्य अर्धरात्रपरिच्छिन्नाऽहर्गणसिद्धान्तस्य वाराणामर्धरात्रे प्रवृत्तेः सिद्धान्तस्य च आर्यभटीयस्य **"बुधाह्न्यजार्कोदयाच् च लङ्कायाम्"** (गीतिकापादे, श्लो.४) इति वचनस्य, ब्राह्मस्फुटसिद्धान्तस्य **"चैत्रसितादेरुदयाद् भानोर् दिन-मास-वर्ष-युग-कल्पाः। सृष्ट्यादौ लङ्कायां समं प्रवृत्ता दिनेऽर्कस्य"** (१।४) इति वचनस्य, लल्लकृतस्य शिष्यधीवृद्धिदस्य **"अर्काभ्युदयादहर्गणः"** (१।१४) इति वचनस्य, सिद्धान्तशिरोमणेः **"लङ्कानगर्यामुदयाच् च भानोस् तस्यैव वारे प्रथमं बभूव। मधोः सितादेर् दिन-मास-वर्ष-युगादिकानां युगपत् प्रवृत्तिः"** (ग्रहगणिताध्याये १।१।१५) इति वचनस्य, विष्णुधर्मोत्तरपुराणस्य ब्रह्मसिद्धान्तस्य **"लङ्कायामर्कोदये"** (२।६८।१) इति वचनस्य,

ब्राह्मस्फुटसिद्धान्तस्य **"जगति तमोभूतेऽस्मिन् सृष्ट्यादौ भास्करादिभिः सृष्टैः। यस्माद् दिनप्रवृत्तिर् दिनवारोऽर्कोदयात् तस्मात्"** (१।३३) इति वचनस्य चाऽपि प्रतिकूलत्वमिति प्रचलितसूर्यसिद्धान्तग्रन्थस्य वैदिक-परम्पराबाह्यत्वं श्रौतस्मार्तधर्मकर्मकालनिर्णयेऽग्राह्यत्वं च सुस्पष्टं भवति।

आथर्वणज्योतिषग्रन्थे स्थिरकरणानां क्रमः शकुनिः, चतुष्पदम्, नागम्, कौस्तुभम् इत्यस्ति (करणप्रकरणे, श्लो.३५)। विष्णुधर्मोत्तरपुराणे (२।१७०।१), बृहत्संहितायाम् (९९।१-४), पञ्चसिद्धान्तिकायाम् (१।१९), ब्राह्मस्फुटसिद्धान्ते (२।६५) शिष्यधीवृद्धिदे मध्यमाधिकारे (श्लो.२५), सिद्धान्तशिरोमणिवासनायाम् (स्पष्टाधिकारे श्लो.६६-६७), जगन्मोहने करणफलाध्याये (प्रथमभागे, पृ.२३६), मुहूर्तचिन्ताणिपीयूषधारायाम् (१।४४), शीघ्रबोधे (पृ.८०) च तादृश एव क्रमोऽस्ति। धार्मिकपरम्परायां कर्मकाण्डिभिः पञ्चाङ्गपत्रककारैश् चापि स एव क्रम आश्रितो दृश्यते। आधुनिके प्रचलिते सूर्यसिद्धान्तग्रन्थे तु **"ध्रुवाणि शकुनिर् नागं तृतीयं च चतुष्पदम्। किंस्तुघ्नं तु चतुर्दश्याः कृष्णायाश्चाऽपरार्धतः"** (स्पष्टाधिकारे, श्लो.६७) इत्युक्त्वा चतुष्पद-नागकरणयोः क्रमो विपर्यस्तः कृतो दृश्यते। एतस्य क्रमस्य च रङ्गनाथ-विश्वनाथादिभिः पुराणैर् व्याख्याकारैर् यथाश्रुतरूपेणैव ग्रहणं कृत्वा सूर्यसिद्धान्तोक्तकरणक्रमे वैदिकपरम्पराऽऽगतकरणक्रमे च भेदः स्वीकृतः प्रतीयते। सुधाकरद्विवेदमहाशयेन तु हठादन्यथा व्याख्यानं चिकीर्षितं दृश्यते। तत्रभवता **"प्रथमं शकुनिः तृतीयं तु नागं चतुष्पदं द्वितीयमित्यध्याहार्यम्"** इत्युक्तमस्ति। द्विवेदमहाशयस्येयं व्याख्या मूलग्रन्थाऽननुरूपेत्यस्वीकार्या दृश्यते। तस्मादेतस्मिन् विषयेऽपि वैदिकपरम्पराया आथर्वणज्योतिषग्रन्थेन तदनुकूलैरन्यैर् ग्रन्थैर् वैदिकधार्मिकपरम्परया च सह आधुनिकप्रचलितसूर्यसिद्धान्तग्रन्थस्य सामञ्जस्यस्याऽभावाद् एष सूर्यसिद्धान्तग्रन्थो वैदिकपरम्पराऽनुकूलो नास्त्येवेति गम्यते। एतेनाऽप्यस्य ग्रन्थस्य श्रौत-स्मार्त-धर्म-कर्म-कालनिर्णयेऽग्राह्यत्वं व्यक्तीभवति।

मुख्याया वैदिक-परम्पराया ब्राह्मणा वेदाध्ययन-यजनादिषु श्रौत-स्मार्त-धर्मकृत्येषु यवनादीनां बाह्यजनानामधिकारं न स्वीकुर्वन्ति। वैष्णवास् तु विष्णुपूजनादिषु धर्मकृत्येषु यवनादीनामपि अधिकारं स्वीकुर्वन्तः प्रतीयन्ते। भागवतेऽपि द्वितीयस्कन्धे **"किरात-हूणा-ऽन्ध्र-पुलिन्द-पुल्कसा आभीर-कङ्का यवनाः खसादयः। येऽन्ये च पापा यदपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः"** (४।१८) इत्युक्तं दृश्यते। नारदीयपुराणे (२।५५।७८,७९) ब्रह्मपुराणे (५५।५९-६१) च **"ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्राऽन्त्यजादयः। सम्पूज्य तु सुरश्रेष्ठं भक्ताः सिंहवपुर्धरम्॥ मुच्यन्ते चाशुभाद् दुःखाज् जन्मकोटिसमुद्भवात्। सम्पूज्य तं सुरश्रेष्ठं प्राप्नुवन्त्यभिवाञ्छितम्"** इति दृश्यते। ब्रह्मवैवर्तपुराणे प्रकृतिखण्डे च **"कृष्णमन्त्रोपासकश् च**

ब्राह्मणः श्वपचोऽपि वा। ब्रह्मलोकं समुल्लङ्घ्य याति गोलोकमुत्तमम्" इति (३६।८०) प्राप्यते। मौर्योत्तरकाले यवनशासकदूतेन हेलियोदोरसनामकेन यवनेन भारतस्य मध्यप्रदेशस्य वेसनगरग्रामे विष्णुमन्दिरसम्मुखे स्थापितो गरुडस्तम्भलेखः प्राप्यते। स च लेखो वाराणसीस्थेन भारतीय-विद्याप्रकाशन-नामकेन निकायेन १९७८तमे क्रैस्ताब्दे प्रकाशिते 'एस.एस.राणा' इत्याख्येन जनेन सम्पादिते 'भारतीय अभिलेख' इति नामके ग्रन्थे (पृ.६१-६२) प्रकाशितोऽस्ति। वैष्णवाः खलु ब्रह्म वासुदेवशब्देन व्यवहरन्ति। भागवते हि **"भगवान् वासुदेवेति यं गृणन्ति हि सात्वताः"** (९।९।४९) इत्युक्तं दृश्यते। वैष्णवसम्प्रदाये वासुदेव-सङ्कर्षण-प्रद्युम्ना-ऽनिरुद्धघटितश् चतुर्व्यूहः कल्प्यते। एतस्य वैष्णवसिद्धान्तस्य च कुमारिलभट्टमहाभागेन तन्त्रवार्तिके **"यद् वा यान्येतानि त्रयीविद्भिर् न** परिगृहीतानि किञ्चित्तन्मिश्र-**धर्मकञ्चुकच्छायापतितानि लोकोपसङ्ग्रह-लाभपूजाख्यातिप्रयोजनपराणि त्रयीविपरीताऽसम्बद्ध-दृष्टशोभादि-प्रत्यक्षानुमानोपमानार्थापत्तिप्राययुक्तिमूलोपनिबद्धानि साङ्ख्य-योग-पाञ्चरात्र-पाशु-पत-शाक्यग्रन्थपरिगृहीतधर्माधर्मनिबन्धनानि विषचिकित्सा-वशीकरणोच्चाटनोन्-मादनादि-समर्थ-कतिपयमन्त्रौषधिकादाचित्कसिद्धिनिदर्शन-बलेन अहिंसा-दम-दान-दयादि-श्रुति-स्मृति-संवादि-स्तोकार्थ-गन्धवासितजीविकाप्रायार्थान्तरोपदेशीनि यानि च बाह्यतराणि म्लेच्छाचार-मिश्रक-भोजनाचरणनिबन्धनानि तेषामेवैतच्छ्रुति-विरोधहेतुदर्शनाभ्यामनपेक्षणीयत्वं प्रतिपाद्यते"** इति (तन्त्रवार्तिके १।३।७, आनन्दाश्रम-संस्करणे, पृ.१२२) वैदिकैरनपेक्षणीयत्वं प्रतिपादितमस्ति। शङ्करभगवत्पादेन च ब्रह्ममीमांसासूत्रे चतुर्व्यूहवादिनां पाञ्चरात्रिकाणां वैष्णवानां सिद्धान्तस्य **"उत्पत्त्य-सम्भवात्** (२।२।४२), **न च कर्तुः करणम्** (२।२।४३), **विज्ञानादिभावे वा तदप्रतिषेधः** (२।२।४४), **विप्रतिषेधाच् च** (२।२।४५)" इति सूत्रैर् निराकृततायाः प्रतिपादनेन तस्य सिद्धान्तस्याऽवैदिकत्वं प्रतिपादितमस्ति। आधुनिके प्रचलिते सूर्यसिद्धान्तग्रन्थे तु भूगोलाध्याये **"वासुदेवः परं ब्रह्म तन्मूर्तिः पुरुषः परः। अव्यक्तो निर्गुणः शान्तः पञ्चविंशात् परोऽव्ययः॥ प्रकृत्यन्तर्गतो देवो बहिरन्तश् च सर्वगः। सङ्कर्षणोऽपः सृष्ट्वाऽऽदौ तासु वीर्यमवासृजत्॥ तदण्डमभवद् धैमं सर्वत्र तमसाऽऽवृतम्। तत्रा-ऽनिरुद्धः प्रथमं व्यक्तीभूतः सनातनः"** (श्लो.१२-१४) इत्यादिना सूर्यसिद्धान्तकारस्य चतुर्व्यूहवादिवैष्णवत्वं प्रकटीकृतं दृश्यते। एतस्मात् कारणाच् च सूर्यसिद्धान्तकारो मूलवैदिकपरम्परावादिब्राह्मणेभ्यो भिन्न एव कश्चन बाह्यो जन इति प्रतीयते।

"भूरिति वै प्रजापतिरिमामजनयत" इति माध्यन्दिनीयवाजसनेयिशुक्ल-यजुर्वेदशतपथब्राह्मणे (२।१।४।११) वचनमस्ति। **"स भूरिति व्याहरद् भुवमसृजत्"** इति तैत्तिरीयकृष्णयजुर्वेदब्राह्मणग्रन्थे (२।२।४।२) दृश्यते। काण्ववाजसनेयि-शुक्ल-यजुर्वेदशतपथब्राह्मणान्तर्गतायां बृहदारण्यकोपनिषदि च (२।४।१०) **"अस्य महतो**

भूतस्य निश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः" इत्यादिकं पठ्यते। वैदिका हि विद्वांसः **"निःश्वसितमस्य वेदा वीक्षितमेतस्य पञ्च भूतानि। स्मितमेतस्य च चराचरमस्य च सुप्तं महाप्रलयः"** इति (ब्रह्ममीमांसासूत्र-शारीरकमीमांसाभाष्यव्याख्यायां भामत्यां मङ्गलपाठे) वदन्ति। एतादृशे वैदिकानां सिद्धान्ते वर्तमाने सूर्यसिद्धान्तस्य ग्रहनक्षत्रादीनां सर्जने यथास्थानं नियोजने च ब्रह्मणः कृते ४७४०० दिव्यानि वर्षाणि आवश्यकान्यभूवन्निति प्रतिपादनं हि **"ग्रहर्क्षदेवदैत्यादि सृजतोऽस्य चराचरम्। कृताऽद्रिवेदा दिव्याब्दाः शतघ्ना वेधसो गताः"** (१।२४) इति वचनेन कृतं वेदानुकूलमिव नाऽऽलक्ष्यते। ब्रह्मगुप्तादिभिरपि कल्पादावेव सृष्टिः प्रतिपादिताऽस्तीति च स्मरणीयमत्र। अतश् च प्रचलितसूर्यसिद्धान्तग्रन्थस्य वैदिकसिद्धान्ताऽननुकूलत्वमिति श्रौत-स्मार्त-धर्म-कर्म-कालनिर्णयेऽनादेयत्वमेतस्य वेदितव्यम्।

वेदाङ्गानि खलु वेदमन्त्रसंहितासु ब्राह्मणग्रन्थेषु च विहितानाम्, उक्तानाम्, आकाङ्क्षितानां सूचितानां च विषयाणाम् अनुगमनाय व्यवस्थापनाय स्पष्टीकरणाय च मुख्यतया प्रवृत्तानि भवन्ति। अतश् च तानि मुख्यतया ब्राह्मणग्रन्थेभ्य एव विषयान् सङ्कलितान् व्यवस्थितांश् च कृत्वा साधारणानां जनानां कृते वेदार्थबोधाय, वेदार्थानुष्ठानाय सुकरतां सम्पादयितुमेव प्रवृत्तानि ज्ञेयानि। अत एव वेदाङ्गग्रन्थाः साधारणानां जनानामुपकारायैव मुनिभी रचिता इति वैदिकपरम्परायां स्वीक्रियते। एतच् च वैदिकधर्ममीमांसकशिरोमणिना कुमारिलभट्टेनापि तन्त्रवार्तिके **"वेदे व्याकरणादीनि सन्त्येवाभ्यन्तराणि नः। भवेद् वा तदभिप्राया षडङ्गाध्ययनस्मृतिः"** (१।३।२४, आनन्दाश्रमसंस्करणे, पृ.१९८) इति वदता सूचितमेव। ऋग्वेदप्रातिशाख्यसंलग्नवर्गद्वयवृत्तौ विष्णुमित्रेण तु **"यस्मात् केवलैर् वेदवाक्यैर् न शक्यतेऽनुष्ठातुं विक्षिप्तत्वाद् वेदवाक्यानां गूढार्थत्वाच् च, अतः कविभिराद्यैर् वेदार्थकुशलैर् वेदार्थेभ्यो निष्कृष्य कर्मार्थं सुबोधानीमानि विद्यास्थानानि प्रवर्तितानि शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषं धर्मशास्त्रं पुराणं न्यायविस्तरो मीमांसादीनि"** (१।४) इति स्फुटतयोक्तम्। पाणिनीयशिक्षाप्रकाशकारेणाऽपि **"वैदिकधर्मानुष्ठानात् पुरुषो निश्श्रेयसार्थफलवान् इत्येष सिद्धान्तः। अतिगूढार्थस्य वेदस्याऽज्ञानान् नाऽनुष्ठातुं शक्यो वेदमार्गः। अतः साक्षात्कृतधर्मभिर् वेदार्थेभ्यो निष्कृष्य अर्थार्थिसुखबोधाय विद्यास्थानानि प्रवर्तितानि"** इति (श्लो.१) सोऽर्थः स्पष्टतयैवोक्त एव।

एतादृश्यां वस्तुस्थितौ वेदाङ्गज्योतिषशास्त्रग्रन्थतयोक्ते ज्योतिषग्रन्थेऽपि वेदमन्त्रसंहिता-ब्राह्मणग्रन्थ-श्रौतसूत्र-गृह्यसूत्राद्यपेक्षितयज्ञविवाहादिकालनिरूपणमेव मुख्यतया कार्यं भवतीति न तिरोहितं भवितुमर्हति।

एतच् च सिद्धान्तरूपेण तु अर्वाचीनैर् ज्योतिषग्रन्थकारैरपि स्वीकृतमेव दृश्यते। तथाहि—

भास्करकृते सिद्धान्तशिरोमणौ—

वेदास् तावद् यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास् ते तु कालाश्रयेण।
शास्त्रादस्मात् कालबोधो यतः स्याद् वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात्॥
शब्दशास्त्रं मुखं ज्यौतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ।
या तु शिक्षाऽस्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर् बुधैः॥
वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाऽङ्गमध्येऽस्य तेनोच्यते।
संयुतोऽपीतरैः कर्णनासादिभिश् चक्षुषाऽङ्गेन हीनो न किञ्चित्करः॥
तस्माद् द्विजैरध्ययनीयमेतत् पुण्यं रहस्यं परमं च तत्त्वम्।
यो ज्यौतिषं वेत्ति नरः स सम्यग् धर्मार्थकामाल्ँ लभते यशश् च॥

इति (१।१।९-१२)

लक्ष्मणाचार्यकृते जगन्मोहनेऽपि ग्रन्थारम्भ एव—

दृष्ट्वाऽऽद्यशास्त्रं मुनिसम्प्रणीतं वेदाङ्गमग्र्यं च महासमासम्।
कुर्याद् ग्रहज्ञाऽऽभरणार्थमेतां मुक्तावलीं निर्मलवृत्तचित्राम्॥ इत्यादि

क्रतुक्रियार्थं श्रुतयः प्रवृत्ताः कालाश्रयास् ते क्रतवो निरुक्ताः।
शास्त्रादमुष्मात् किल कालबोधो वेदाङ्गताऽमुष्य ततः प्रसिद्धा॥ इति च।

रामदैवज्ञकृतमुहूर्तचिन्तामणिव्याख्यायां गोविन्ददैवज्ञकृतपीयूषधारायां च—

ननु कथं ज्योतिषं श्रौत-स्मार्तकर्मौपयिकमिति चेदुच्यते— "अष्टवर्षं ब्राह्मण-मुपनयीत तमध्यापयीत" तथा "वसन्ते ब्राह्मणोऽग्नीनादधीत" "दर्शपूर्णमासाभ्यां यजेत" इत्यादिश्रुतयः सन्ति। तत्र वर्षज्ञानमादित्यादि-ग्रहचारपरिच्छेदसाध्यम्, तस्य वसन्ताद्यृतूनां च दर्शपौर्णमासयोश् च ज्ञानं ज्योतिषं विना सर्वथैव न निर्वहतीत्यवश्यमध्येतव्यं ज्योतिःशास्त्रम्। इति (१।२)।

एवं च ज्यौतिषिकैर् मुख्यतया मन्त्रसंहिता-ब्राह्मणग्रन्थ-श्रौतसूत्र-गृह्यसूत्रा-पेक्षितस्य तदनुकूलस्य च कालस्य निरूपणं कार्यम्। एतादृश्यां स्थितौ वेदमन्त्र-संहितादिभिराकाङ्क्षितानां विहितानामुक्तानां च पञ्चवर्षात्मकयुग-तदनुकूलवर्ष-सौरचान्द्रायन-चान्द्रर्तु-चान्द्रमासादीनां निरूपणे उदासीना आधुनिकप्रचलित-सूर्य-सिद्धान्तग्रन्थादयो ग्रन्थाः कथं वेदाङ्गज्योतिषग्रन्थत्वेन स्वीकर्तुं शक्याः स्युः।

उक्तविधायां वस्तुस्थितौ सत्यां प्रचलिताऽऽधुनिकसूर्यसिद्धान्तग्रन्थस्य **"अल्पावशिष्टे तु कृते मयो नाम महासुरः। रहस्यं परमं पुण्यं जिज्ञासुर् ज्ञानमुत्तमम्॥**

वेदाङ्गमग्र्यमखिलं ज्योतिषां गतिकारणम्। आराधयन् विवस्वन्तं तपस् तेपे सुदुश्चरम्" (१।२-३) इति वैदिकलोकप्रतारणपरं कथनं लोकवञ्चकवणिग्विज्ञापन-तुल्यमेव भाति। तथैव "युगमाहुः पञ्चाब्दं रविशशिनोः संहिताङ्गकारा यत्। अधिमासा-ऽवमरात्र-स्फुटतिथ्यज्ञानतस् तदसत्" इति वचनेन ब्राह्मस्फुटसिद्धान्त-ग्रन्थे (११।२) वेदाङ्ग-ज्योतिषकारस्य लगधमुनेरविवेकपूर्णां निन्दां कृतवन्तं नास्तिकशिरोमणिं ब्रह्मगुप्तं "कृती जयति जिष्णुजो गणकचक्रचूडामणिः" इति प्रशंसतो भूम्ना तस्यैवाऽनुगमनं कुर्वतः, "मधोः सितादेर् दिनमासवर्ष-युगादिकानां युगपत् प्रवृत्तिः" (१।१।१५) इति वेदाङ्गज्योतिषग्रन्थविरुद्धां चैत्रशुक्लादिवर्षगणनां प्रतिपादयतः, वैदिकानां सौरचान्द्र-वर्षा-ऽयनर्तु-मास-पक्ष-तिथिव्यवस्थामुपेक्ष्य "वर्षायनर्तुयुगपूर्वकमत्र सौरान् मासास् तथा च तिथयस् तुहिनांशुमानात्" (१।१।३१) इत्युक्त्वा वर्षादीन् सौरानेव मासपक्षतिथींश् चान्द्रानेव च प्रतिपादयतः, "दिनं सुराणामयनं यदुत्तरं निशेतरत् सांहितिकैः प्रकीर्तितम्। दिनोन्मुखेऽर्के दिनमेव तन् मतं निशा तथा तत्फलकीर्तनाय तत्॥ द्वन्द्वान्तमारोहति यैः क्रमेण तैरेव वृत्तैरव-रोहतीनः। यत्रैव दृष्टः प्रथमं स देवैस् तत्रैव तिष्ठन् न विलोक्यते किम्" इत्युक्त्वा (गोलाध्याये, त्रिप्रश्नवासनाप्रकरणे, श्लो.११, १२) श्रुति-स्मृति-पुराणोक्त-देवदिन-व्यवस्थायाः प्रतिकूलेऽर्थेऽभिनिवेशं प्रदर्शयतः सिद्धान्तशिरोमणिकारस्य भास्करस्य सिद्धान्तशिरोमणेर् द्विजैरध्ययनीयतायाः प्रतिपादनाय प्रवृत्तं "वेदचक्षुः किलेदं स्मृतं ज्योतिषं *मुख्यता चाऽङ्गमध्येऽस्य* तेनोच्यते। संयुतोपीतरैः कर्णनासादिभिश् चक्षुषाऽङ्गेन हीनो न किञ्चित्करः॥ तस्माद् *द्विजैरध्ययनीयमेतत्* पुण्यं रहस्यं परमं च तत्त्वम्। यो ज्यौतिषं वेत्ति नरः स सम्यग् धर्मार्थकामालँ लभते यशश्च" (१।१।११,१२) इति वचनमपि वैदिकलोकप्रवञ्चनायैव प्रवृत्तं वेदितव्यम्।

एवं च प्रचलितसूर्यसिद्धान्तग्रन्थस्य तदनुयायिनामन्येषां चाऽऽधुनिक-सिद्धान्तज्योतिषग्रन्थानां श्रौत-स्मार्त-धर्म-कर्म-कालनिर्णयेऽनादेयत्वं बोद्धव्यम्। वेदाङ्गज्योतिषाऽविरोधिनामर्थानां प्रतिपादने ग्रह-राशि-लग्नादीनां निरूपणे, सूर्य-चन्द्रादिग्रहणानां निर्देशने जन्मपत्रीणां लेखने विविधभौतिकप्रयोजनकखगोलादि-वर्णने च नवीनसूर्यसिद्धान्त-सिद्धान्तशिरोमण्यादिग्रन्थानामुपयोगो यथौचिति कर्तु-मुचितोऽपि भवेत्। श्रौतस्मार्तधर्मकर्मकालनिर्णये तु तेषां सर्वथाऽनादेयत्वं बोध्यम्।

३७. आर्यभटीय-ब्राह्मस्फुटसिद्धान्तादीनां पितामहप्रोक्त-वेदाङ्ग-ज्योतिषग्रन्थानुकूलत्वस्याऽभावः

आर्यावर्त पुस्तकालय

आर्यभटीयादीनां वेदाङ्गज्योतिषग्रन्थप्रतिकूलत्वं प्रदर्शितमेव। एवं च आर्यभटादिभिस् तेषां ग्रन्थानां ब्रह्मप्रोक्तज्योतिषशास्त्रग्रन्थत्वं यदुक्तं तदपि लोक-

प्रतारणमात्रमेव। ते हि स्वप्रणीतग्रन्थमाहात्म्यप्रदर्शनाय तद्ग्रन्थप्रतिपादितविषयाणां ब्रह्मप्रोक्तज्योतिषग्रन्थानुगामित्वं सूर्यप्रोक्तशास्त्रानुगामित्वं वेदतुल्यत्वं वाऽपि प्रतिपादयन्ति। तथाहि—

आर्यभटीयं नाम्ना पूर्वं स्वायंभुवं सदा सत्यम्।
सुकृतायुषोः प्रणाशं कुरुते प्रतिकञ्चुकं योऽस्य॥ इति

—आर्यभटीये गोलपादे (श्लो.५०)।

ब्रह्मोक्तं ग्रहगणितं महता कालेन यत् खिलीभूतम्।
अभिधीयते स्फुटं तज् जिष्णुसुत-ब्रह्मगुप्तेन॥ इति

—ब्राह्मस्फुटसिद्धान्ते (१।२)।

शास्त्रमाद्यं तदेवेदं यत् पूर्वं प्राह भास्करः।
युगानां परिवर्तेन कालभेदोऽत्र केवलः॥ इति

—सूर्यसिद्धान्ते मध्यमाधिकारे (श्लो.९)।

स तेभ्यः प्रददौ प्रीतो ग्रहाणां चरितं महत्।
अत्यद्भुततमं लोके रहस्यं ब्रह्मसम्मितम्॥ इति च

—तत्रैव मानाध्याये (श्लो.२७)।

एवं चाऽऽर्यभट-ब्रह्मगुप्त-नवीनसूर्यसिद्धान्तकाराणां तदनुयायिनामन्येषां च विविधे स्व-स्वग्रन्थप्रशंसने सत्यपि तेषां ग्रन्थानां वेदाङ्गज्योतिषशास्त्रग्रन्थत्वाऽभावो विवेचकैरवगन्तव्यः।

३८. श्रौत-स्मार्त-धर्म-कर्मार्थ-नाक्षत्र-नामकरणेऽवकहड-चक्रस्याऽननुसरणीयत्वम् वेदाङ्गज्योतिषस्यैवाऽनुसरणीयत्वम्

व्यवहारार्थं नामाऽऽवश्यकं भवति। अत एव निरुक्तकारेण मुनिना यास्केन **"अणीयस्त्वाच् च शब्देन सञ्ज्ञाकरणं व्यवहारार्थं लोके"** इति (१।१।२) प्रोक्तम्। मनुष्यनामकरणस्य व्यवहारोऽनादेः प्राचीनात् कालात् प्रभृत्येव प्रवृत्तो दृश्यते। तथाहि वेदेष्वपि नामकरणस्य सङ्केताः प्राप्यन्ते। यथा—

तुरीयं नाम यज्ञियं यदाकरस् तदुश्मसि। आदित् पतिर् न ओहसे। इति

—शैशिरीयशाकलऋग्वेदमन्त्रसंहितायाम् (८।८०।९),

दधाति पुत्रः पित्रोरपीच्यं नाम तृतीयमधिरोचने दिवः। इति च

—तत्रैव (९।७५।२)।

मम नाम प्रथमं जातवेदः पिता माता च दधतुर् यदग्रे। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायाम् (१।५।१०।१)।

तान् देवा अब्रुवन् द्वेद्वे नामनी कुरुध्वमथ प्र वाऽऽप्स्यथ न वेत्यग्नयो वा अथ धिष्णियास् तस्माद् द्विनामा ब्राह्मणोऽर्धुकः। इति च

–तत्रैव (६।३।१।३)।

तस्माद् ब्राह्मणो द्विनामाऽर्धुकः। इति

–काठककृष्णयजुर्वेदसंहितायाम् (२६।१), कपिष्ठलकठ-कृष्णयजुर्वेदसंहितायां च (४०।४)।

एत उ हैतद् दध्रिरे न वाऽ एभिर् नामभिररात्स्म येषां नः सोममपाहार्षुर् हन्त द्वितीयानि नामानि करवामहाऽ इति ते द्वितीयानि नामान्यकुर्वत तैरराध्नुवन् यानपहृतसोमपीथान् त्सतोऽथ यज्ञऽ आभजँस् तस्माद् द्विनामानस् तस्माद् ब्राह्मणोऽनृध्यमाने द्वितीयं नाम कुर्वीत राध्नोति हैव यऽ एवं विद्वान् द्वितीयं नाम कुरुते। इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणे (३।६।२।२४)।

तं प्रजापतिरब्रवीत् कुमार किं रोदिषि यच् छ्रमात् तपसोऽधिजातोऽसीति, सोऽब्रवीदनपहतपाप्मा वाऽ अस्म्यहितनामा नाम मे धेहीति, तस्मात् पुत्रस्य जातस्य नाम कुर्यात् पाप्मानमेवाऽस्य तदपहन्त्यपि द्वितीयमपि तृतीयमभि पूर्वमेवाऽस्य तत् पाप्मानमपहन्ति। तमब्रवीत् रुद्रोऽसीति। इति च

–तत्रैव (६।१।३।९-१०)।

अथाऽस्य नामधेयङ् करोति वेदोऽसीति तदस्यैतद् गुह्यमेव नाम स्यात्। इति च

–तत्रैव (१४।९।४।२५)।

तत्र यज्ञकर्मसु नाम्न आवश्यकता भवति। दर्शपूर्णमासयागाऽग्निष्टोमसोमयागादि-यागकर्मसु पुत्रनामग्रहणं वा स्वनामग्रहणं वा यजमान-यजमानपूर्वजाऽवरजनामग्रहणं वाऽपि कर्तव्यं भवति। तथाहि–

पुत्रस्य नाम गृह्णात्यन्नादमेवैनं करोति। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायाम् (१।७।५।५)।

अथ पुत्रस्य नाम गृह्णातीदं मेऽयं वीर्यं पुत्रोऽनुसन्तनवदिति यदि पुत्रो न स्यादप्यात्मन एव नाम गृह्णीयात्। इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणे (१।९।३।२१)।

स्वं नामाऽऽदिशेत। इति

[redacted] (१।२।१)।

असावसावित्यस्याऽऽदिश्य नामनी। इति च

–तत्रैव (१।९।५)।

असावसाविति नामनी यजमानस्याऽभिव्याहृत्योत्तरां देवयज्यामाशास्ते। इति

–शाङ्खायनीयश्रौतसूत्रे (१।१४।१७)।

ततोऽसि तन्तुरस्यनु मा तनुह्यस्मिन् यज्ञेऽस्यां साधुकृत्यायामस्मिन्नन्नेऽस्मिल्लोकऽ इदं मे कर्मेदं वीर्यं पुत्रोऽनुसन्तनोत्विति पुत्रस्य नाम गृह्णाति। आत्मनोऽविद्यमाने तन्तवे त्वा ज्योतिषे त्वेति वा। इति

–कात्यायनश्रौतसूत्रे (३।८।२२, २३)।

प्राक् सुत्यादेशान् नामग्राहः, अग्नीषोमीयवपायां हुतायां परिहतासु वसतीवरीषु प्रातरनुवाकोपक्रमवेलायामसौ यजत इति प्रत्येकं गृह्णीयाद्यजमाननामधेयान्यमुष्य पुत्रः पौत्रो नप्तेति पूर्वेषाम्, अथाऽवरेषां यथाज्येष्ठं स्त्रीपुंसां ये जीवेयुः। इति

–लाट्यायनश्रौतसूत्रे (१।३।१७-१९), द्राह्यायणश्रौतसूत्रे (१।३।१८-२१) च।

अस्यामृधेद् धोत्रायां देवङ्गमायामाशास्तेऽयं यजमानोऽसाविति नामादेशः। इति

–कातीयहौत्रिकसूत्रे (१।८।१),

वा नामधेयस्य। वा नामधेयस्याऽन्तस्योपोत्तममुदात्तं भवति देवदत्तस्य पिता यजते, देवदत्तस्य पिता यजते। इति

–पाणिनीयव्याकरणभाष्ये (१।२।३७, वा.९)।

एवं च त्रैवर्णिकानां जनानां यज्ञकर्मार्थमपि नामाऽवश्यकं भवति। तत्र यज्ञकर्मार्थं नाम कीदृशं कार्यमित्यत्र कापि विशिष्टा व्यवस्था न दृश्यते सम्प्रति प्रसिद्धेषु मुहूर्तचिन्तामण्यादिषु ग्रन्थेषु। तत्र मुहूर्तचिन्तामणिपीयूषधारायामपि नाम्न आवश्यकतायाः प्रदर्शने "प्रयोजनं च स्मर्यते– नामाऽखिलस्य व्यवहारहेतुः शुभावहं कर्मसु भाग्यहेतुः। नाम्नैव कीर्तिं लभते मनुष्यस् ततः प्रशस्तं खलु नामकर्म" इत्युक्त्वा "चूचेचोला अश्विनीत्यादि शतपदचक्रं तदक्षरादिकमेव नाम कार्यम्। तच्च नाम जन्मनक्षत्रचरणलक्षितस्वरोदयाऽभिहितशतपदचक्रान्तर्गताऽक्षरादिकमेव कार्यम्। उक्तं च गृह्यपरिशिष्टे– तदक्षरादिकं नाम यस्मिन् धिष्ण्ये तदक्षरम्" इत्युक्तम् (संस्कारप्रकरणे, श्लो.११)। एतच् चाऽर्वाचीने काले नानाविधैर् वैदिकराष्ट्रविप्लवैर् वेदवेदाङ्गाध्ययनवैधुर्यं प्राप्तानां कर्मकाण्डिनां विवेकशैथिल्याद् वैदिकेषु जनेष्वपि प्रायेण प्रवृत्तमवगम्यते। तथाहि १३२३तमे वैक्रमेऽब्दे कृते कातीयगृह्यकारिकाग्रन्थे रेणुदीक्षितोऽपि– **"तदक्षरादिकं नाम यस्मिन् धिष्ण्ये यदक्षरम्। शङ्करोक्ताऽऽगमादेस् तदुपायं कथयाम्यहम्"** इत्यादि नामकरणप्रकरणे ब्रवीति (श्लो.१२)। लघ्वाश्वलायनस्मृतावपि **"नक्षत्रपादतो जातजन्मनाम तदुच्यते"** (६।२)

इति दृश्यते। तदनुगामिनो निर्णयसिन्धुकार-संस्कारमयूखकार-संस्कारगणपति-कारादयोऽपि अवकहडचक्रानुसारं नक्षत्रनाम करणीयमिति वदन्ति। तत्र पारस्कर-गृह्यसूत्रभाष्ये पदार्थक्रमे (१।१७।६) गदाधरोऽपि "ततः स्वकुलदेवताभक्त इति नाम कृत्वा जन्मकालीनमासनाम कुर्यात्। तच् च— कृष्णोऽनन्तोच्युतश् चक्री वैकुण्ठोऽथ जनार्दनः। उपेन्द्रो यज्ञपुरुषो वासुदेवस् तथा हरिः। योगीशः पुण्डरीकाक्षो मास-नामान्यनुक्रमात्। अत्र यथाऽऽचारं चैत्रादिर् मार्गशीर्षादिर्वा क्रमः। ततोऽवकहडाख्य-ज्योतिःशास्त्रोक्तचक्रानुसारेण जन्मनक्षत्रपादप्रयुक्ताक्षरादि नाम। ततो व्यावहारिकं स्वेष्टं नामेति" इति वदति। वस्तुतस् त्विदमवकहडचक्रं यावनवर्णमालामूलक-मवैदिकमितीदानीं विवेचका जना जानन्त्येव। लखनऊनगरस्थेन उत्तरप्रदेशहिन्दी-संस्थानेन प्रकाशिते (१९८९ क्रै.) **"हमारा ज्योतिष और धर्मशास्त्र"** इत्युक्ते ग्रन्थे **"नामकरण संस्कार और अवकहडाचक्र"** (पृ.२८९-२९०) इति प्रकरणे हरिहरपाण्डेय-महाशयेनाऽवकहडचक्रस्य यावनवर्णमालामूलकत्वं महाप्राणवर्णरहितत्वाद् वैदिक-संस्कृतवर्णमालादृष्ट्या निहीनत्वं च स्पष्टीकृतमस्त्येव। रेणुदीक्षितेनाऽपि अस्या-ऽवकहडचक्रस्य वेदमूलकत्वमनुक्त्वा आगममूलकत्वं (तन्त्रमूलकत्वं) प्रोक्तमेवा-ऽस्ति। अतश्चाऽऽधुनिकैर् ज्यौतिषिकैः कर्मकाण्डिभिर् निबन्धकारैश्च वैदिकानामपि नाक्षत्रनामकरणेऽवकहडचक्रस्याऽऽश्रयणीयत्वं यदुक्तं तद् वैदिकैः सर्वथा हेयम्।

एवं तर्हि वैदिकानां नक्षत्रनामकरणे का रीतिराश्रयणीयेति प्रश्न उत्तिष्ठति। नक्षत्रनामकरणं तु गृह्यसूत्रकारैर् गृह्यसूत्रपरिशिष्टकारैश् चोक्तं सूचितं वाऽप्यस्ति हि। तथाहि--

अथैनं मूर्ध्न्यभिजिघ्रति अश्मा भव परशुर् भव हिरण्यमश्रुतं भव। पशूनां त्वा हिङ्कारेणाऽभिजिघ्राम्यसौ इति नक्षत्रनामधेयेन। इति

—बौधायनगृह्यसूत्रे (२।१।५)।

नक्षत्रनाम च निर्दिशति। इति

—आपस्तम्बगृह्यसूत्रे (१५।२)।

नक्षत्रनाम द्वितीयं स्यात्। इति

—हिरण्यकेशिगृह्यसूत्रे (२०।१।३२), भारद्वाजगृह्यसूत्रे (१।२६), आग्निवेश्यगृह्यसूत्रे च (२।१।५)।

नामाऽस्मै दधाति, नक्षत्रनामधेयेन द्वितीयमस्य नामधेयं गुह्यम्। इति

—बौधायनगृह्यशेषसूत्रे (१।११।५)।

को नामासीत्युक्तो देवताश्रयं नक्षत्राश्रयं वाऽभिवादनीयं नाम ब्रूया-दसावस्मीति। इति

—खादिरगृह्यसूत्रे (२।४।१२), द्राह्यायणगृह्यसूत्रे (३।४।१२) च; गोभिलगृह्यसूत्रं (२।१०।२१) च द्रष्टव्यम्।

तस्य नामधेयं दद्याद् द्व्यक्षरं चतुरक्षरं वा घोषवदाद्यन्तरन्तस्थम् अनुनक्षत्रमनुदैवतमनुनामाऽतद्धितम्। इति

–जैमिनीयगृह्यसूत्रे (१।९)।

तत्र नाक्षत्रनामकरणस्यैकः प्रकारस् "तत्र जातः" (४।३।२५) इत्यधिकारे पाणिनिनाऽन्वाख्यातो दृश्यते। तथाहि–

श्रविष्ठा-फल्गुन्यनुराधा-स्वाति-तिष्य-पुनर्वसु-हस्त-विशाखा-ऽषाढा-बहुलाल् लुक्, (स्थानान्तगोशालखरशालाच् च), वत्सशाला-ऽभिजिदश्वयुक्-छतभिषजो वा, नक्षत्रेभ्यो बहुलम्। इति

–पाणिनीयव्याकरणाष्टाध्याय्याम् (४।३।३४-३७)।

एतस्य प्रकरणस्य व्याख्यायां काशिकायां जयादित्येनोक्तम्- "श्रविष्ठादिभ्यः शब्देभ्यो नक्षत्रेभ्य आगतस्य जातार्थे लुग् भवति। तस्मिन् स्त्रीप्रत्ययस्याऽपि लुक् तद्धितलुकीति भवति। श्रविष्ठासु जातः श्रविष्ठः, फल्गुनः, अनुराधः, स्वातिः, तिष्यः, पुनर्वसुः, हस्तः, विशाखः, अषाढः, बहुलः। लुक्प्रकरणे चित्रा-रेवती-रोहिणीभ्यः स्त्रियामुपसङ्ख्यानम्। चित्रायां जाता चित्रा, रेवती, रोहिणी। स्त्रीप्रत्ययस्य लुकि कृते गौरादित्वान् ङीष्। फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ। फल्गुनी, अषाढा। श्रविष्ठाषाढाभ्यां छणपि वक्तव्यः। श्राविष्ठीयः, आषाढीयः। (स्थानान्तात् प्रातिपदिकाद् गोशालशब्दात् खरशालशब्दाज् जातार्थे प्रत्ययस्य लुग् भवति। गोस्थाने जातः गोस्थानः, अश्वस्थानः, गोशालः, खरशालः)। वत्सशालादिभ्यः परस्य जातार्थे प्रत्ययस्य लुग् वा भवति। वत्सशालायां जातः वत्सशालः, वात्सशालः। अभिजित्, आभिजितः; अश्वयुक्, आश्वयुजः; शतभिषक्, शातभिषजः। बहुलग्रहणस्याऽयं प्रपञ्चः। नक्षत्रेभ्यः उत्तरस्य जातार्थे प्रत्ययस्य बहुलं लुग् भवति रोहिणः, रौहिणः; मृगशिराः, मार्गशीर्षः" इति।

एष एव प्रकारो बौधायनगृह्यशेषसूत्रकारेण भूम्नाऽनुसृतोऽवगम्यते। तथाहि **"नामाऽस्मै दधाति नक्षत्रनामधेयेन; द्वितीयमस्य नामधेयं गुह्यमस्याऽन्यदभिवादनीयम्"** इत्युक्त्वा तेनोक्तम्–

अथ नक्षत्राणि– रोहिणी-मृगशीर्ष-मघा-चित्रा-ज्येष्ठा-श्रवण-शतभिषग्-रेवत्यश्वयुक्षु प्रथमाक्षरवृद्धिः स्याद् रोहिण्यां रौहिणायेति, तथेतराणि। तिष्याश्लेषाहस्तविशाखानुराधाषाढाश्रविष्ठासु प्रकृतिवत् तिष्यायेति, तथेतराणि। फल्गुन्यां फाल्गुनायेति। स्वातीपुनर्वस्वोः स्वातये पुनर्वसव इति। मूलार्द्रयोर् मूलकाया-ऽऽर्द्रकायेति। प्रोष्ठपदासु प्रोष्ठपदाय प्रौष्ठपदायेति वा। अपभरण्यामपभरणाया-

ऽऽपभरणायेति वा। अग्नये कृत्तिकाय कार्त्तिकायेति वा व्याख्यातान्यग्नेर् होतुः। स्त्रीविषये कुमार्यै रोहिण्यै सुश्रियै गौर्यै स्वस्तीति। इति (१।११)।

एतमेव प्रकारमादाय आपस्तम्बगृह्यसूत्रव्याख्यायामनाकुलायां हरदत्तेन तात्पर्यदर्शने सुदर्शनेन च "नक्षत्रनाम च निर्दिशति" (१५।२) इति सूत्रे नक्षत्रनाम-प्रकारः प्रतिपादितो दृश्यते। तथाहि अनाकुलायाम्—

अभिजिघ्राम्यसौ इत्यत्राऽसौशब्दस्य स्थाने नक्षत्रनामनिर्देशः। तत् सम्बुद्ध्या निर्दिशेत्। पशूनां त्वा हिङ्कारेणाभिजिघ्राम्याश्वयुजेत्यादि। तत्र नक्षत्रशब्देषु जातार्थे रूपनिर्णयार्थः श्लोकः

रोरेममृज्येचिषु वृद्धिरादौ ष्ठात् पे च वान्त्यश्रवशाश्वयुक्षु।
शेषेषु नाम्वोः कपरस् स्वरोन्त्यः स्वाप्वोरदीर्घस् सविसर्गः इष्टः॥

रोहिण्यादिशब्दानामयमाद्यक्षरैर् निर्देशः, तेषामादौ वृद्धिः कर्तव्येत्यर्थः। रौहिणः, रैवतः, माघः, मार्गशीर्षः, ज्यैष्ठ्यः, चैत्रः। ष्ठात् परो यः पशब्दस् तत्र वृद्धिः। प्रोष्ठपदासु जातः प्रोष्ठपादः। "जे प्रोष्ठपदानाम्" (पाणिनीयव्याकरणाष्टाध्याय्याम् ७।३।१८) इत्युत्तरपदवृद्धिः। एषु "नक्षत्रेभ्यो बहुलम्" इति (पा.व्या.अ.४।३।३७) बहुलवचनाल् लुङ् न भवति। नक्षत्रेषु अन्त्यमपभरण्याख्यं तत्र विकल्पः। अपभरणः आपभरणो वा। तथा श्रवणः श्रावणो वा। अनयोर् बहुलवचनादेव लुको विकल्पः। शतभिषजि जातः शतभिषक् शातभिषजो वा। अत्र टिलोपोऽपि पक्षे भवति शतभिषः इति। तथा अश्वयुक् आश्वयुजः। अनयोर् "वत्स-शालाऽभिजिदश्वयुक्शतभिषजो वा" (पा.व्या.अ.४।३।३६) इति लुको विकल्पः। शेषेषु उक्तादन्येषु नक्षत्रेषु आदौ वृद्धिर् न भवति। अत्र "श्रविष्ठा-फल्गुन्यनु-राधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल् लुक्" (पा.व्या.अ.४।३।३४) इति, "नक्षत्रेभ्यो बहुलम्" (पा.व्या.अ.४।३।३७) इति च लुगेव भवति। श्रविष्ठः, फल्गुनः, अनुराधः, स्वातिः, तिष्यः, पुनर्वसुः, अषाढः, बहुलः, कृत्तिकः इति। आम्वोः आर्द्रा मूल इत्येतयोः अन्त्यः स्वरः कशब्दपरो भवति। आर्द्रकः मूलकः। "पूर्वाह्णाऽपराह्णाऽऽर्द्रामूल(प्रदोषावस्कराद् वुन्)" इति [दीर्घः] वुन् प्रत्ययः। स्वाप्वोः स्वाति पुनर्वसू इत्येतयोः अन्त्यस्वरो ह्रस्वः सविसर्गश् चेष्टः। स्वातिः पुनर्वसुः। श्रविष्ठाफल्गुनीत्यादिना लुक्। सविसर्गत्वं सूक्तवाकादिषु प्रथमया नक्षत्र[नाम]निर्देशे। इह तु सम्बुद्ध्या निर्देशः स्वाते पुनर्वसो इति। प्राङ् नाम-करणात् अग्न्युपस्थानादिषु चाऽस्यैव नक्षत्रनाम्नो निर्देशः कर्तव्यः। यत्र च नामद्वयनिर्देशस् तत्राऽप्येवंविधं नक्षत्रनामैकं दशम्यां कृतमपरम् इति।

मातृदत्तेनाऽपि हिरण्यकेशिगृह्यसूत्रव्याख्याने (२०।१।३०-३४) एतमेव पक्षमाश्रित्य नक्षत्रनामानि प्रदर्शितानि। तथाहि—

नक्षत्रनामान्यपि स्त्रीपुंसयोरबुधबोधनायाऽनुक्रमिष्यामः। कार्त्तिकः, कार्त्तिकी। रौहिणः रौहिणी। मार्गशीर्षः मार्गशीर्षी। आर्द्रकः आर्द्रिका। पुनर्वसुः पुनर्वसू। तिष्यः, तिष्या। आश्लेषः आश्लेषा। माघः माघी। फल्गुनः, फल्गुनी। हस्तः, हस्ता। चैत्रः, चित्रा। स्वातिः, स्वातिः। विशाखः, विशाखा। अनुराधः, अनुराधा। ज्यैष्ठः, ज्यैष्ठी। मूलकः, मूलिका। अषाढः, अषाढा। आभिजितः, आभिजिता (ती?)। श्रावणः, श्रावणी। श्रविष्ठः, श्रविष्ठा; श्राविष्ठीयः, श्राविष्ठीया। शतभिषक्, शातभिषः, शातभिषजः; शतभिषक्, शातभिषी, शातभिषजी। प्रोष्ठपादः, प्रोष्ठपादी। रैवतः, रेवती। अश्वयुक्, आश्वयुजः, अश्वयुक्, आश्वयुजी। आपभरणः, आपभरणी इति। यथार्थं विभक्तयः। इति।

भट्टनारायणेनाऽपि गोभिलगृह्यसूत्रव्याख्याने "अभिवादनीयं नामधेयं कल्पयित्वा देवताश्रयं वा नक्षत्राश्रयं वा, गोत्राश्रयमप्येके" इति सूत्रस्य व्याख्याने (२।१०।२१) उक्तम्—

कीदृशं नाम कल्पयित्वा? देवताश्रयं वा यथा विष्णुदत्तनामाऽस्मीति। नक्षत्राश्रयं वा यथा फल्गुननामाऽस्मीति। गोत्राश्रयं वा वत्सगोत्रोऽस्मीति। इति।

एतमपि पक्षमादाय सायणेनाऽपि छान्दोग्यब्राह्मणस्य (मन्त्रब्राह्मणस्य) **'को नामाऽसि, असौनामाऽस्मि'** इति वचनयोर् व्याख्याने (१।६।१७,१८) उक्तम्—

उपनयनार्थं गुरुं प्रार्थयमानो माणवकस् तेनैव को नामासीति पृष्टः स्वनाम ब्रूयात्। तथा च सूत्रम् 'को नामाऽसीत्युक्तो देवताश्रयं नक्षत्राश्रयं वाऽभिवादनीयं नाम ब्रूयादसावस्मीति। देवताश्रयं स्वजन्मनक्षत्रं यद्देवत्यं तद्देवताश्रयमाग्नेय इतिवत् नक्षत्राश्रयं स्वजन्मनक्षत्राश्रयमाश्विन इतिवत्। अभिवादनीयमिति विष्णुशर्मेतिवत्। पाठस् तु को नामास्यसाविति। यजुरिदम्। सम्भाष्यमाणमाणवको देवता। हे माणवक त्वं को नामासि किंनामा भवसि। एवं पृष्टः असौ नामास्मि आग्नेयो विष्णुशर्माऽहम् आश्विनो विष्णुशर्माऽहमिति ब्रूयात्। इति।

एवमेव रुद्रस्कन्देनाऽपि खादिरगृह्यसूत्रस्य (२।४।१२) द्राह्यायणगृह्यसूत्रस्य (३।४।१२) वाऽपि व्याख्याने "को नामासीत्युक्तो देवताश्रयं नक्षत्राश्रयं वाऽभिवादनीयं नाम ब्रूयादसावस्मीति" इति सूत्रस्य वृत्तौ उक्तम्—

आचार्येणोक्तस् सन् देवताश्रयं स्वजन्मनक्षत्रं यद्देवत्यं तद्देवताश्रयं नाम आग्नेय इतिवत्, नक्षत्राश्रयं स्वजन्मनक्षत्राश्रयम् अश्वयुग् विष्णुशर्मनामाऽह-

मस्मीतिवत् प्रतिब्रूयान् माणवकः। अभिवादनीयं गुह्यम्। अश्वयुग्, अपभरणीः, कृत्तिकाः, रोहिणी, मृगशीर्षम्, आर्द्रा, पुनर्वसू, पुष्यः, आश्लेषाः, मघाः, पूर्वा फल्गुनी, उत्तरा फल्गुनी, हस्तः, चित्रा, स्वाती, विशाखा, अनुराधाः, ज्येष्ठा, मूलम्, पूर्वा अषाढाः, उत्तरा अषाढाः, श्रवणम्, धनिष्ठा (श्रविष्ठा), शतभिषक्, प्रोष्ठपदा, उत्तरा प्रोष्ठपदा, रेवती एतानि नक्षत्राणि।

अश्विनौ, यमः, अग्निः, प्रजापतिः, सोमः, रुद्रः, अदितिः, बृहस्पतिः, सर्पाः, पितरः, अर्यमा, भगः, सविता, इन्द्रः, वायुः, इन्द्राऽग्नी, मित्रः, इन्द्रः, प्रजापतिः पितरो वा, आपः, विश्वेदेवाः, विष्णुः, वसवः, इन्द्रः(?), अजएकपात्, अहिर्बुध्न्यः, पूषा एतानि दैवतानि।

आश्वयुजः, आपभरणः, कार्त्तिकेयः, रौहिणेयः, मार्गशीर्षः, आर्द्रकः, पौनर्वसुः, पौषः, आश्रेषः, माघः, फाल्गुनः, औत्तरफाल्गुनः, हस्तः, चैत्रः, स्वातिः, वैशाखः, अनूराधः, ज्यैष्ठः, मौलः, आषाढः, औत्तराषाढः, श्रावणः, श्रविष्ठः, शातभिषजः, प्रौष्ठपदः, औत्तरप्रौष्ठपदः, रैवतः इति नक्षत्राश्रयनिर्देशः।

आश्विनः, याम्यः, आग्नेयः, प्राजापत्यः, सौम्यः, रौद्रः, आदित्यः, बार्हस्पत्यः, सार्पः, पित्र्यः, आर्यमणः, भागः, सावित्रः, ऐन्द्रः, वायव्यः, ऐन्द्राग्नः, मैत्रः, ऐन्द्रः, पित्र्यः, आप्यः, वैश्वदेवः, वैष्णवः, वासवः, ऐन्द्रः, अजएकपादः, अहिर्बुध्न्यः, पौष्णः इति देवताश्रयनिर्देशः। इति।

नक्षत्रनामकरणस्याऽन्यः प्रकारो लगधमुनिप्रोक्तवेदाङ्गज्योतिषे प्रोक्तः। तथाहि—

अग्निः प्रजापतिः सोमो रुद्रोऽदितिर् बृहस्पतिः।
सर्पाश् च पितरश् चैव भगश् चैवाऽर्यमाऽपि च॥
सविता त्वष्टाऽथ वायुश् चेन्द्राऽग्नी मित्र एव च।
इन्द्रो निर्ऋतिरापो वै विश्वेदेवास् तथैव च॥
विष्णुर् वसवो वरुणो-ऽजएकपात् तथैव च।
अहिर्बुध्न्यस् तथा पूषा अश्विनौ यम एव च॥
नक्षत्रदेवता ह्येता एताभिर् यज्ञकर्मणि।
यजमानस्य शास्त्रज्ञैर् नाम नक्षत्रजं स्मृतम्॥ इति (श्लो.३२-३५)।

अत्र यज्ञकर्मार्थं यजमानस्य नक्षत्रनाम नक्षत्रदेवताभिः कार्यमित्युक्तम्। तत्र नक्षत्रदेवताभिर् यजमानस्य नाम केन प्रकारेण कार्यमिति सोमाकरादिभिर् न स्पष्टीकृतम्। गृह्यसूत्रकारोक्तनक्षत्रनामस्पष्टीकरणे बौधायनगृह्यशेषसूत्रकारमतानुसरणं

कृत्वा हरदत्त-सुदर्शन-मातृदत्त-रुद्रदत्तादिभिः पाणिनीयव्याकरणोक्तप्रकारेण नक्षत्र-नामकरणं मुख्यतया प्रतिपादितम्। कृष्णयजुर्वेदीयगृह्यसूत्रेषु नक्षत्रनाम साक्षान्-नक्षत्राश्रयं वा नक्षत्रदेवताद्वारा नक्षत्राश्रयमिति स्पष्टतयोक्तं न दृश्यते। केवलं वाराह-मैत्रायणीयगृह्यसूत्रे "नक्षत्रदेवतेष्टनामानो वा" इति (३।१) उक्तं दृश्यते। बौधायनगृह्य-शेषसूत्रेऽपि "अग्नये कृत्तिकाय कार्त्तिकायेति वा व्याख्यातान्यग्नेर् होतुः" (१।११।१८) इत्युक्त्वा नक्षत्रदेवतासम्बद्धमपि नाम भवतीति सूचितमेव केवलम्।

लगधमुनिप्रोक्तस्य यज्ञकर्मार्थस्य नक्षत्रदेवतया सम्बद्धस्य नाम्नः करणस्य प्रकारस् तु चरकसंहितादिषु तद्व्याख्यादिषु च प्रदर्शितोऽवगम्यते। तथाहि—

कुमारस्य पिता द्वे नामनी कारयेन् नाक्षत्रिकं नामाऽऽभिप्रायिकं च। तत्रा-ऽऽभिप्रायिकं घोषवदाद्यन्तस्थान्तमूष्मान्तं वाऽवृद्धं त्रिपुरुषानूकमनवप्रतिष्ठितम्, नाक्षत्रिकं तु नक्षत्रदेवतासमानाख्यं द्व्यक्षरं चतुरक्षरं वा। इति

—चरकसंहितायां शारीरस्थाने (८।५०)।

नक्षत्रदेवतासंयुक्तमिति यस्मिन् नक्षत्रे कुमारो जातस् तस्य नक्षत्रस्य या देवता ज्योतिःशास्त्रे तस्या नाम कर्तव्यमित्यर्थः। इति

—तत्रैव चक्रपाणिदत्तकृता आयुर्वेददीपिकाख्या व्याख्या।

नक्षत्राणि अश्विन्यादीनि तत्कुमारजन्मकालिकानि। नक्षत्रदेवता अश्वि-यम-दहनादयः, तत्र यज् जन्मनक्षत्रं तस्य नामसंयुक्तम् अन्यतरनामसंयुक्तं द्व्यक्षरं चतुरक्षरं वा कृतं नाम नाक्षत्रिकम्। इति

—गङ्गाधरकृता जल्पकल्पतरुसमाख्या चरकसंहिता-व्याख्या (शारीरस्थाने ८।४५)।

ततो दशमेऽहनि मातापितरौ कृतमङ्गलकौतुकौ स्वस्तिवाचनं कृत्वा नाम कुर्यातां यदभिप्रेतं नक्षत्रनाम वा। इति

—सुश्रुतसंहितायां शारीरस्थाने (१०।२४)।

नक्षत्रनामेति नक्षत्रदेवताकृतं नामेत्यर्थः। इति

—तत्रैव, डल्हणकृता निबन्धसङ्ग्रहाख्या व्याख्या।

दशमे द्वादशे वाऽह्नि गोत्राचारैः शुभैः शुभे।
सूता स्नानोत्सवं कुर्यात् पिताऽपत्यस्य नाम च॥
दिने शततमे वाऽऽख्यां पूर्णे संवत्सरेऽथवा।
बिभ्रतोऽङ्गैर् मनोह्वालरोचनागरुचन्दनम्॥
पूज्यं त्रिपुरुषानूकमादौ घोषवदक्षरम्।
अवृद्धं कृतमूष्मान्तमनरातिप्रतिष्ठितम्॥

नक्षत्रदेवतायुक्तं तदेव तु न केवलम्।
मङ्गल्यमन्तरन्तस्थं न दुष्टं न च तद्धितम्॥ इति

–अष्टाङ्गसङ्ग्रहे वृद्धवाग्भटकृते उत्तरतन्त्रे प्रथमेऽध्याये।

एता नक्षत्रदेवता यादृश्यस् ताभिर् युक्तं नाम कारयेत्, तदेवेति न केवलं तदेव पूर्वोक्तलक्षणमेव किन्तु मङ्गल्यत्वादिविशिष्टमपि। इति

–तत्रैव इन्दुव्याख्या।

दशमे दिवसे पूर्णे विधिभिः स्वकुलोचितैः।
कारयेत् सूतिकोत्थानं नाम बालस्य चाऽर्चितम्॥
बिभ्रतोऽङ्गैर् मनोह्वालरोचनागुरुचन्दनम्।
नक्षत्रदेवतायुक्तं बान्धवं वा समाक्षरम्॥ इति

–अष्टाङ्गहृदये उत्तरस्थाने (१।२२,२३)।

किम्भूतं नाम? नक्षत्रस्य याऽसौ देवता तया युक्तम्। इति

–तत्रैव अरुणदत्तकृता सर्वाङ्गसुन्दराख्या व्याख्या।

सर्वत्रेति वचनादिह नक्षत्रदेवताश्रयं पूर्वं व्यावहारिकमुत्तरम्। इति

–शाङ्खायनश्रौतसूत्रभाष्ये वरदत्तसुतानर्तीयगोविन्दकृते 'असावसाविति नामनी यजमानस्याऽभिव्याहृत्योत्तरां देवयज्यामाशास्ते' इत्यादेः (१।१४।१) सूत्रस्य व्याख्याने।

नाक्षत्रनामानि तु चूचेचोलाऽश्विनी प्रोक्तेत्यादिज्योतिर्ग्रन्थोक्ताऽवकहडाचक्रानुसारेणाऽश्विन्यादिचतुश्चरणेषु चूडामणिश् चेदीशश् चोलेशो लक्ष्मण इत्यादिकानि कुर्वन्ति। कातीयानां कृत्तिकोत्पन्नस्याऽग्निशर्मेति नक्षत्रदेवतासम्बद्धं नाक्षत्रं नाम कुर्यात्। इति

–ऋषिभट्टेन १७५६तमे वैक्रमाब्दे कृते संस्कारभास्करे नामकरणप्रकरणे, १२३तमे १२४तमे च पत्रे।

जन्मनक्षत्रदेवतानाम ज्यौतिषे– नक्षत्रदेवता एता एताभिर् यज्ञकर्मणि। यजमानस्य शास्त्रज्ञैर् नाम नक्षत्रजं स्मृतम्॥ इति एतच्छब्दपरामृष्टा नक्षत्रदेवतास् तु– अग्निः प्रजापतिः सोमो रुद्रोऽदितिर् बृहस्पतिः। सर्पाश् च पितरश् चैव भगश् चैवाऽर्यमाऽपि च॥ सविता त्वष्टाऽथ वायुश् चेन्द्राऽग्नी मित्र एव च। इन्द्रो निर्ऋतिरापो वै विश्वेदेवास् तथैव च॥ विष्णुर् वसवो वरुणो-ऽज एकपात् तथैव च। अहिर्बुध्न्यस् तथा पूषा अश्विनौ यम एव च॥ इति, एता देवताः कृत्तिकाप्रभृति ज्ञेयाः। अभिजिद्देवता तु ब्रह्म श्रुतितो ज्ञेयम्। अत्र कृत्तिकादावुत्पन्नस्याऽऽग्नेयः प्राजापत्य इत्येवमादीन्युदाहरणानि। इति

–भट्टगोपीनाथविरचितायां संस्काररत्नमालायाम् (पृ.८५८)।

के चित् तु चूचेचोलाऽश्विनी प्रोक्तेत्यादिज्योतिर्ग्रन्थोक्ताऽवकहडाचक्रानुसारेणाऽश्विन्यादेश् चतुर्षु चरणेषु चूडामणिश् चेदीशश् चोलेशो लक्ष्मण इत्यादिकानि नाक्षत्रनामानि कुर्वन्ति। ***तन् न श्रौतग्रन्थादिबहुसम्मतम्। सांख्यायनास् तु कृत्तिकोत्पन्नस्याऽग्निशर्मेति नक्षत्रदेवतासम्बद्धं नाक्षत्रं नाम कुर्वन्ति। एवं कातीया अपि।*** इति

–काशीनाथोपाध्यायेन १८४८तमे वैक्रमेऽब्दे कृते धर्मसिन्धौ तृतीय-परिच्छेदपूर्वार्धे नामकरणप्रकरणे (पृ.१४४)।

अत्र प्राचीनैर् हरदत्त-सुदर्शन-मातृदत्तादिभिर् नक्षत्रनामकरणे पाणिनीय-व्याकरणसम्मतानि साक्षान् नक्षत्रैः सम्बद्धानि नामानि करणीयानीति प्रतिपादितं दृश्यते, प्राचीनतरैश् चरकसंहिताकारा-ऽष्टाङ्गसङ्ग्रहकारा-ऽष्टाङ्गहृयकार-चक्रपाणिदत्त-डल्हणा-ऽरुणदत्तादिभिस् तु नक्षत्रनामकरणे लगधप्रोक्तवेदाङ्गज्योतिषसम्मतानि नक्षत्रदेवतासम्बद्धानि नामानि करणीयानीति प्रतिपादितं दृश्यते। तैरुभयैः अवकहडचक्रानुसारिनाक्षत्रनाम्नां तु चर्चैव न कृता। अवकहडचक्रानुसारिनाक्षत्रनाम्नां सङ्केतो **लघ्वाश्वलायनस्मृतौ** दृश्यते। तेषां पूर्णतया विधानमागमानुसारं **रेणुदीक्षितेन** कृतं दृश्यते। तेन साक्षान्नक्षत्रसम्बद्धानां नक्षत्रदेवतासम्बद्धानां वाऽपि नाम्नां काऽपि चर्चा न कृता। तदनुयायिना पारस्करगृह्यसूत्रभाष्यकारेण **गदाधरेणा**-ऽपि अवकहडचक्रानुसारिणां नाक्षत्रनाम्नामेवोल्लेखः कृतो दृश्यते। **निर्णयसिन्धु-कारेण** अवकहडचक्रानुसारिणां पाणिनीयव्याकरणानुकूलानां च नक्षत्रनाम्नां चोल्लेखः कृतो दृश्यते। वीरमित्रोदय-संस्कारप्रकाशकारेण **मित्रमिश्रेण** तु नक्षत्रनामकरणे साक्षान्नक्षत्रसम्बद्धानां नक्षत्रदेवतासम्बद्धानाम् अवकहडचक्रानुसारिणां च नाक्षत्रनाम्नामुल्लेखः कृतो दृश्यते (पृ.२३८-२४०)। **ऋषिभट्टेन** संस्कारभास्करे तु नाक्षत्रनामकरणे अवकहडचक्रानुसारिणां नक्षत्रदेवतासम्बद्धानां चैव नाक्षत्रनाम्नामुल्लेखः कृतो दृश्यते। संस्कारगणपतिनामकपारस्करगृह्यसूत्रभाष्यपद्धतिकारेण १८१८तमे वैक्रमाब्दे श्राद्धगणपतिं कृतवता **रामकृष्णेनाऽपि** रेणुदीक्षित-गदाधराद्यनुयायिना नाक्षत्रनामकरणे अवकहडचक्रानुसारिणामेव नाक्षत्रनाम्नां करणं प्रतिपादितमस्ति। **नित्यानन्दपर्वतीयेनाऽपि** संस्कारदीपके "अवकहडचक्रानुसारेण तृतीयं नक्षत्रनाम" इत्येवोक्तम् (पृ.२४१)। संस्काररत्नमालाकारेण **भट्टगोपीनाथेन** तु संस्काररत्नमालायां नामकरणप्रकरणे (पृ.८५६) "नक्षत्रनाम त्रिविधं जन्मनक्षत्रनाम, जन्मनक्षत्रदेवतानाम, जन्मनक्षत्रपादचतुष्टयभूताऽक्षराद्याक्षरकं नामेति" इत्युक्त्वा तेषां त्रिविधानामपि नाक्षत्रनाम्नां विस्तरेण प्रतिपादनं कृतं दृश्यते (पृ.८५६-८६१)। एवमेव धर्मसिन्धु-कारेण **काशीनाथोपाध्यायेनाऽपि** सङ्क्षेपेण त्रिविधान्येव नाक्षत्रनामान्युल्लिखितानि दृश्यन्ते (पृ.१४४)। **अण्णाशास्त्रिवारेमहाशयेन** तु कर्मकाण्डप्रदीपे संस्कारप्रकरणे

नामकरणप्रतिपादने नक्षत्रनामविषये "तृतीयं नक्षत्रनामाऽऽह बौधायनः नाक्षत्रनामधेयेन तृतीयं नामधेयं गुह्यमस्यान्यत्। अन्यद् व्यावहारिकात्। तथा च शाङ्खायनाः कृत्तिकासूत्पन्नस्य अग्निशर्मेत्येवं नाक्षत्राणि नामानि मन्यन्ते। उदाहृतं च श्रुतिभाष्ये वचनम्— नक्षत्रदेवता एता एताभिर् यज्ञकर्मणि। यजमानस्य शास्त्रज्ञैर् नाम नक्षत्रजं स्मृतम्। शर्मान्तं ब्राह्मणस्योक्तमिति। कातीया अपि देवतासम्बद्धमेव नाक्षत्रनाम मन्यन्ते। नक्षत्रदेवतास्तु अग्निः प्रजापतिः सोमो रुद्रोऽदितिर् बृहस्पतिः। सर्पाश्च पितरश् चैव भगश् चैवाऽर्यमाऽपि च। सविता त्वष्टाऽथ वायुश् चेन्द्राग्नी मित्र एव च। इन्द्रो निर्ऋतिरापो वै विश्वेदेवास् तथैव च। विष्णुर् वसवो वरुणोऽज एकपात् तथैव च। अहिर्बुध्न्यस् तथा पूषा अश्विनौ यम एव चेति। कृत्तिकादिक्रमः। गदाधररेणुभाष्यादौ अवकहडाख्य-ज्योतिःशास्त्रोक्तचक्रानुसारेण जन्मनक्षत्रपादप्रयुक्ताक्षरादि नाम नाक्षत्रं नाम इत्युक्तम्। स प्रकारः चूचेचोलाऽश्विनीत्यादिः प्रसिद्धः। एवं च नाक्षत्रनामविधाने पक्षद्वयम्। अग्निशर्मा इत्येवमादि। अथवा चूडामणिः चेदिपतिः चोलपतिः लाटपतिरित्येवमादिर् वा। स्त्रीणामप्येवम् अग्निशर्मा प्रजापतिशर्मा इत्यादि पुंवत्। चूडामणिः चेदीशा चोलेशा लाटेशेत्यादि स्त्रीप्रत्ययान्तमूह्यम्" इत्युक्तं दृश्यते (७४तमे पत्रे उत्तरपृष्ठे, ७५तमे पत्रे पूर्वपृष्ठे च)।

उक्तविधे व्यतिकरे नक्षत्रनाम वैदिकैः कीदृशं स्वीकार्यमिति प्रश्नो विचारपथमायाति। तत्र अवकहडचक्रानुसारिणो नक्षत्रनाम्नो विधानं वेदाङ्गेषु नास्तीति, प्राचीनतरेषु अन्येषु ग्रन्थेष्वपि नास्तीति च तादृशं नक्षत्रनाम वैदिकैरस्वीकरणीयमेवेति स्पष्टमेव। साक्षान्नक्षत्रेण सम्बद्धस्य नक्षत्रनाम्नः वेदाङ्गे पाणिनीयव्याकरणेऽन्वाख्यानस्य दर्शनाद्, वेदाङ्गे मूले ज्योतिषग्रन्थे नक्षत्रदेवतासम्बद्धस्य नक्षत्रनाम्नः प्रतिपादनस्य दर्शनाच् च तयोर् मध्ये कतरद् ग्राह्यमिति विचारणा भवति। एतस्मिन् विषये पूर्वैरपि निर्णीतं दृश्यते। तथाहि—

संस्कारकौस्तुभेऽनन्तदेवः—

"तृतीयमप्याह बौधायनः नक्षत्रेति (नक्षत्रनामधेयेन द्वितीयमस्य नामधेयं गुह्यम् इति)। अन्यत् व्यावहारिकात्। नक्षत्रनामधेयेनेति तृतीयया 'तत्र जातः' इत्यधिकारे विहिततद्धितान्तेन कृत्तिकादिनाम्ना निष्पन्नमित्यर्थो लभ्यते। अत एव 'नक्षत्रनाम द्वितीयं स्यात्' इति हिरण्यकेशिसूत्रव्याख्यावसरे मातृदत्तग्रन्थः 'किं तत्? जन्मनक्षत्रप्रकृतिकम्, तत्रजातार्थतद्धितान्तम्, यथा रौहिणः श्रविष्ठ आर्द्रक इति' इति। उक्तश् चाऽस्य नाम्नो विनियोगः सूक्तवाके आश्वलायनेन 'असावसावित्यस्याऽऽदिश्य नामनी' (आश्वलायनश्रौतसूत्रे १।९।५) **इति। उक्तं चैतद्व्याख्यानावसरे नाम्नोः क्रमनियमाय देवत्रातेन 'तत्रजात इत्यस्मिन्नर्थे तद्धित उत्पद्यते' इति प्रकृत्य 'तस्मादेवं प्रयोगो भवति अनूराधो देवदत्तः' इति।**

तथा बौधायनेन 'पुत्रस्य नाम गृह्णाति' इति प्रक्रम्य 'रौहिणाय तिष्याय' इति यथानुशासनं प्रयोगोऽभ्यधायि। तथोपनयनप्रकरणस्थस्य 'को नामासीति नामधेयं पृच्छति तस्याऽऽचार्यः, अभिवादनीयनामधेयं कल्पयित्वा देवताश्रयं नक्षत्राश्रयं गोत्राश्रयमप्येके' इति सूत्रस्य (गोभिलगृह्यसूत्रे २।१०।२२-२५) व्याख्यावसरे छन्दोगसूत्रभाष्यकृतोक्तम् 'नक्षत्राश्रयं फल्गुननामासीति'। एवं च ज्योतिर्वित्प्रसिद्धस्वरोदयाभिहितशतपदचक्रसारोद्धारो यो ज्योतिषार्केऽभिहितः 'चूचेचोलापदेष्वाद्ये लीलूलेलो यमस्य च।' इत्यादि, तत्र 'इति प्रोक्ता इमे पद्ये वर्णनामादिजाः स्फुटाः' इत्युपसंहाराद् अश्विन्यां पदेषु चरणेषु ये चू इत्यादयो वर्णास् तदादीनि नामानि चूडामणिः चेदिपतिः चोलपतिः लाटपति इत्येवं कार्याणीति प्रतीतेः ज्योतिर्विदां नक्षत्र-तच्चरणज्ञानफलानि सन्तु तान्यपि नामानि। यदि नामकरणप्रकरणे क्वचिद् गृह्यग्रन्थे तादृशनक्षत्रनाम कार्यमिति स्फुटो विधिर् भवेत् तदाऽपि सूक्तवाकादिसम्बद्धकर्माऽनधिकृतजात्यन्धविषयोऽसाविति ज्ञेयम्, तदधिकृतान् प्रति व्याकरणानुसारिनाक्षत्रनाम्नामेवाऽवश्यकताया दर्शितत्वात्" इति (पृ.१०२-१०३)।

याज्ञवल्क्यस्मृतिमिताक्षराव्याख्यायां बालम्भट्टश् च—

"अत्रेदं बोध्यम्—देशभाषानुसारेण क्रियमाणनाम्नः सूक्तवाकादौ सङ्कल्पादौ चोल्लेखो बर्बराणां भ्रान्त्यैव। तस्माद् 'घोषवदाद्यन्तरन्तस्थं द्व्यक्षरं चतुरक्षरं वा नाम कर्तव्यम्, कृतं कुर्यान् न तद्धितम्' इत्याश्वलायनगृह्यसूत्रोक्तनाम्नैव साधुना तदुचितम्। किं च अग्न्यादिनक्षत्रदेवता उक्त्वा 'नक्षत्रदेवता एता एताभिर् यज्ञकर्मणि। यजमानस्य शास्त्रज्ञैर् नाम नक्षत्रजं स्मृतम्' इति वेदाङ्गज्योतिषोक्तनक्षत्रनाम च तदुपयोगि। नामकरणे नाक्षत्रं नाम नक्षत्रपादाक्षरादि कार्यमिति वृद्धाः। गृह्यपरिशिष्टे च क्वचित् तथैवोक्तम्। एतदेव नामकरणप्रकरणे 'नक्षत्रनाम च निर्दिशति, तद् रहस्यं भवति' इत्यापस्तम्बेनोक्तम् (१५।२,३)। तदेव च 'अभिवादनीयं च समीक्षेत तन् मातापितरौ विद्यातामोपनयात्' इत्याश्वलायनेनोक्तम्। एवमेव नामकरणे वृद्धशिष्टानामाचारः। अत एव ज्योतिषे 'यज्ञकर्मणि' इत्युक्तम्। तत्तन्नक्षत्रवाचकेभ्यो जातार्थप्रत्यये निष्पन्नं तत्तन्नक्षत्रजं नामेति केचित्। तत्र 'पुत्रस्य नाम गृह्णाति रौहिणाय तिष्याय' इति बौधायनसूत्रं मूलम्। यत् तु 'असावसावित्यादिश्य नामनी' इत्याश्वलायनेनोक्तं तत् तु सन्दिग्धम्। यत् तु देवत्रातेन 'अनुराधो देवदत्तः इति प्रयोक्तव्यम्' इत्युक्तम् तत्र सूत्राऽक्षरानुग्रश् चिन्त्यः। शाङ्खायनादयस् तु ज्यौतिषोक्तमेवाऽऽद्रियन्ते। इदानीमाश्वलायना देवत्रातोक्त्या *'निर्दिशेद् यज-*

मानस्य नाम सांव्यवहारिकम्। नाक्षत्रं च यथा कृष्णशर्मा रौहिण इत्यपि' इत्याश्वलायनश्रौतकारिकोक्त्या च तथैवाऽऽचरन्ति। नामकरणेऽपि तदेव नाक्षत्रं नामेति च वदन्ति। गुरुचरणास् तु 'बौधायनादिवाक्ये रौहिणादिपदं तत्तन्नक्षत्रजातत्वेन तत्तद्देवतानामुपलक्षणम्। एवं हि ज्यौतिषेण तेषामेक-मूलकल्पनालाघवं भवति, विकल्पस्याऽनौचित्याच् च, संज्ञापर्यायनामशब्देन पाचकादिशब्दवत् केवलयौगिकश्रावणादिशब्दानां ग्रहीतुमनौचित्याच् च, अभिवादनं प्रयोजनम् अस्य इत्यर्थकाभिवादनीयशब्देन तस्य वक्तुमशक्यत्वाच् च तस्य साधारणत्वात्' इत्याहुः" इति (१।१२, पृ.२९)।

एवं च वेदाङ्गज्योतिषे 'यज्ञकर्मणि' इति विशेषितत्वाद् वेदाङ्गज्योतिष-प्रतिपादितं नक्षत्रदेवतासम्बद्धं नक्षत्रनामैव धर्मकृत्यसङ्कल्प-सूक्तवाका-ऽऽशीःप्रार्थन-सुब्रह्मण्याह्वानादिषु प्रयोज्यमिति सूक्तवाकादिप्रयोगाधिकारिणां द्विजातीनां नामकरणे नक्षत्रनाम नक्षत्रदेवतासम्बद्धमेव कार्यम्; पाणिनीयव्याकरणं तु लौकिकशब्दानामप्य-न्वाख्यानाय प्रवृत्तमिति आपामरं लोके प्रयोज्यानां नैपालीयभाषाप्रसिद्धानां व्यावहारि-काणाम् 'आइते' 'मङ्गले' 'बुधे' 'सुके' इत्यादिकानां तत्तद्वासरजातानां जनानां नाम्ना-मिव पाणिनीयव्याकरणान्वाख्यातानाम् आर्द्रकः, मूलकः, श्रविष्ठः, फल्गुनः, अनुराधः, स्वातिः, तिष्यः, पुनर्वसुः, हस्तः, विशाखः, अषाढः, बहुलः, चित्रा (चैत्रः), रेवती (रैवतः), (रोहिणी, रोहिणः, रौहिणः), फल्गुनी, अषाढा, श्राविष्ठीयः, आषाढीयः, अभिजित्, आभिजितः, अश्वयुक्, आश्वयुजः, शतभिषक्, शातभिषजः, मृगशिराः, मार्गशीर्षः इत्येवंविधानां यौगिकानां नक्षत्रनाम्नाम् आपामरलोकव्यवहारमात्रेणाऽपि चरितार्थ-त्वात् तेषां धर्मकृत्यसङ्कल्प-सूक्तवाका-ऽऽशीःप्रार्थन-सुब्रह्मण्याह्वानादिषु श्रौतस्मार्त-धर्मकृत्येषु प्रयोक्तव्यनामताया अस्वीकारेऽपि पाणिनीयव्याकरणप्रामाण्ये क्षतेरभा-वात् तानि नक्षत्रनामानि साधारणलोकव्यवहारविषयाणीति सूक्तवाकादिप्रयोगाधि-कारिणां द्विजातीनां नामकरणे नक्षत्रनामरूपेण पाणिन्यन्वाख्यातं साक्षान्नक्षत्रसम्बद्धं नाम नैव कार्यमित्येवोचितमवगम्यते। बौधायनगृह्यशेषसूत्राद्युक्तो नाक्षत्रनामकरण-पक्षो वेदाङ्गमहास्मृतिरूपलगधप्रोक्तज्योतिषग्रन्थप्रतिकूलत्वादुपेक्षणीयोऽवगम्यते। एतेनाऽर्वाचीनजनसङ्कलितत्वज्ञापकलिङ्गयुतबौधायानगृह्यशेषसूत्रादिप्रतारित-हरदत्त-सुदर्शन-मातृदत्त-सायण-भट्टनारायण-रुद्रदत्तादिव्याख्यानान्यपि व्याख्यातानि।

एवं च अवकहडचक्रानुसारिणां नक्षत्रनाम्नां प्राचीनतरैर् ग्रन्थकारैरनुल्लि-खितत्वात् तेषां यवनवर्णमाला-मूलकताया अवगम्यमानत्वाच् च श्रौत-स्मार्त-धर्म-कृत्यमुख्याधिकारिणां त्रैवर्णिकानां कृते याज्ञे कर्मणि तु तेषामनादेयत्वमेवेत्यव-गन्तव्यम्। श्रौतस्मार्तधर्मकर्माधिकारहीनानां जनानां कृते ग्रहदशाफलादिज्ञानाय तेषामुपयोगो दैवज्ञादिभिः क्रियते चेन् न तत्र वैदिकानां जनानां काऽपि क्षतिः।

३९. अस्माभिरदृष्टानि दृष्टानि च वेदाङ्गज्योतिषसंस्करणानि

आङ्लः सेनानीर् **जर्विसः** १८९१तमे वैक्रमाब्दे (१८३४तमे क्रैस्ताब्दे) ऋग्-वेदिनां परम्परयाऽऽगतं वेदाङ्गज्योतिषं भारतीयभारमानपद्धतिः (Indian Metrology) इत्याख्यस्य ग्रन्थस्य परिशिष्टत्वेन प्रकाशयामास किल। एतच् च **बालेन गाङ्गाधरिणा तिलकान्वयजेन** (१९१३-१९७८वै.) "वेदिक् क्रोनोलजि याण्ड् वेदाङ्गज्योतिष" इत्याख्ये ग्रन्थे (पृ.४५-१०४) स्थिते स्वकीये "नोट् अन् दि इण्टर्-प्रिटेशन् अव् द वेदाङ्गज्योतिष" इत्याख्ये आङ्लभाषामये निबन्धे कथितमस्ति। एतज् जर्विससंस्करणमस्माभिर् न दृष्टम्।

शर्मण्यदेशजोऽध्यापको **व्रेबरः** (१८८२-१९५८वै.) खलु १९२९तमे वैक्रमेऽब्दे (१८७२तमे क्रैस्ताब्दे) ऋग्वेदिनां परम्परयाऽऽगतं वेदाङ्गज्योतिषम्, यजुर्वेदिनां परम्परयाऽऽगतं वेदाङ्गज्योतिषं चाऽनेकहस्तलिखितपुस्तकानामुपयोगं कृत्वा विविधपाठान्तराणि च सङ्गृह्य पाठसमीक्षात्मकसंस्करणरूपेण प्रकाशयामास किल। एतदपि बालगङ्गाधरतिलकमहाशयेनैव तत्रैवोक्तम्। एतत् संस्करणं १९१९तमे वैक्रमेब्दे (१८६२तमे क्रैस्ताब्दे) प्रकाशितमिति, एतस्मिन् संस्करणे सोमाकरटीकाऽपि प्रकाशितेति, सोमाकरटीकानुसारं टिप्पण्यश्च योजिताः शर्मण्य-भाषानुवादश् च योजित इति, सर्वेषां श्लोकानामर्थस् तु व्रेबरेण न सम्यगाकलित इति च नगेन्द्रनाथवसुमहाशयेन सम्पादिते हिन्दीविश्वकोशग्रन्थे अष्टमे भागे ज्योतिःशास्त्रशब्दे भारतीयज्योतिषप्रकरणे (पृ.६२४) लिखितमस्ति। बालगङ्गाधर-महाशयेन त्वेतादृशं विवरणं न दत्तम्। शङ्करबालकृष्णदीक्षितेन तु भारतीय-ज्योतिषग्रन्थे वेदाङ्गकालप्रकरणारम्भे व्रेबरसंस्करणस्य कोऽप्युल्लेखो न कृतः। अस्माभिस् तु एतद् व्रेबरसंस्करणमपि न दृष्टम्।

थिबोमहाशयः (१९०८वै.-) १९३४तमे वैक्रमाब्दे (१८७७तमे क्रैस्ताब्दे) वङ्गदेशस्थाया एसियाटिक-समित्याः शोधपत्रिकायां वेदाङ्गज्योतिषस्य विषये लिखन् यजुर्वेदिपरम्परयाऽऽगतस्य वेदाङ्गज्योतिषस्य सोमाकराऽनुद्घाटितार्थकानां कठिनानां पञ्चषाणां श्लोकानामर्थमाविश्चकार किल। एतदपि बालगङ्गाधर-तिलकमहाशयेन तत्रैव लिखितमस्ति। शङ्करबालकृष्णदीक्षितेनाऽपि वेदाङ्ग-ज्योतिषविषये थिबोमहाशयेन कृतस्य कार्यस्योल्लेखः कृतोऽस्ति। एतद्विषये थिबोमहाशयस्य लघ्व्याः पुस्तिकायाः मुद्रणस्योल्लेखोऽपि शङ्करेण कृतोऽस्ति। शामशास्त्रिमहाशयोऽपि वेदाङ्गज्योतिषग्रन्थस्य आङ्लभाषामये उपोद्घाते एकत्र (पृ.iii) वेदाङ्गज्योतिषस्य १-१०, १८, २१, २४, २८, ३०-४० श्लोकान् थिबो-महाशयः स्पष्टतया व्याचख्यौ इति वदति, अन्यत्र पुनः (पृ.xv) ११, १३-१७, १९-

२३, २५-२७, २९, ४१ श्लोकान् विहायाऽन्येषां श्लोकानामर्थः थिबोमहाशयेनोद्घाटित इति ब्रवीति। अस्माभिस् तु थिबोमहाशयस्यैतत् संस्करणमपि नैव दृष्टम्।

जनार्दन-बालाजि-मोडकमहाशयः १९४२तमे वैक्रमाब्दे (१८८५तमे क्रैस्ताब्दे) ऋग्वेदिपरम्परयाऽऽगतस्य वेदाङ्गज्योतिषस्य यजुर्वेदिपरम्परयाऽऽगतस्य वेदाङ्गज्योतिषस्य च महाराष्ट्रभाषानुवादं प्रकाशयामास किल। तत्र स थिबोमहाशयाऽनुद्घाटितार्थकानां द्वित्राणां कठिनानां श्लोकानामर्थमुद्घाटयामास किल। एतस्य संस्करणस्योल्लेखः शङ्करबालकृष्णदीक्षितमहाशयेन भारतीयज्योतिषनामके ग्रन्थे कृतोऽस्ति (हिन्दीभाषानुवादरूपे ग्रन्थे, पृ.९३)। अस्माभिस्तु एतदपि संस्करणं नैव दृष्टम्।

मुम्बयीस्थेन तत्त्वविवेकमुद्रणालयेन १९४९तमे वैक्रमाब्दे मुद्रिते वेदषडङ्गे वेदाङ्गज्योतिषमपि मुद्रितं बभूव किल। एतदपि संस्करणमस्माभिस्तु नैव दृष्टम्।

अभियन्ता लाला-छोटेलाल-बार्हस्पत्य-महाशयः १९६३तमे वैक्रमेऽब्दे (१९०६तमे क्रैस्ताब्दे) इण्डियन-रिव्यु-नामके मासिकपत्रे स्वकीयामाङ्लभाषामयीं सम्पूर्णवेदाङ्गज्योतिषग्रन्थव्याख्यां क्रमेण प्रकाशयामास किल। एतत् संस्करणमपि अस्माभिर् नैव दृष्टम्। रामदासगौडकृते हिन्दुत्व-नामके १९९५तमे वैक्रमेऽब्दे काश्यां ज्ञानमण्डलयन्त्रालये मुद्रिते हिन्दीभाषामये ग्रन्थे (पृ.१२१-१२३) वर्णितश् छोटेलालबार्हस्पत्यकृतवेदाङ्गज्योतिषव्याख्यासारस् तु अस्माभिर् दृष्टः।

गोरखपुरजनपदाभिजनो वाराणसीनिवासी सुधाकरद्विवेदमहाशयो (१९०७-१९६७वै.) लालाछेटेलालबार्हस्पत्यमहाशयस्य व्याख्यां प्रायेणाऽस्वीकुर्वाणः १९६३-तमे वैक्रमाब्दे सुधाकरभाष्यसहितं याजुषज्योतिषम् आर्चज्योतिषं च प्रकाशयामास किल। एतदपि संस्करणमस्माभिर् नैव दृष्टम्।

सुधाकरद्विवेदमहाशयेन कृतं भाष्यं विलोक्य स्वकीयव्याख्यायां परिष्कारं कृत्वा सुधाकरव्याख्याविशेषानुपपत्तिं च प्रदर्श्य अभियन्ता लालाछोटेलालबार्हस्पत्यः स्वकीयां वेदाङ्गज्योतिषव्याख्यां स्वतन्त्रपुस्तकरूपेण प्रयागनगरे मुद्रापयित्वा १९६३तमे वैक्रमाब्दे प्रकाशयामास किल। एतत् संस्करणमप्यस्माभिर् नैव दृष्टम्।

अध्यापको **बी.एल्.उपाध्यायो** नवदेहलीस्थ-विज्ञान-भारतीद्वारा प्राकाश्यं नीते प्राचीनभारतीय-गणितनामके ग्रन्थे (पृ.३८४-३८८) यजुर्वेदिपरम्परयाऽऽगतं वेदाङ्गज्योतिषं मूलमात्रं २०२७तमे वैक्रमेऽब्दे प्रकाशयामास किल। एतदपि संस्करणमस्माभिर् नैव दृष्टम्।

सीतेशचन्द्रभट्टाचार्यः कालीघट्टस्थ-बोधि-प्रेसे मुद्रापयित्वा २०३१तमे वैक्रमेऽब्दे वेदाङ्गज्योतिषं सम्पाद्य प्रकाशयामास किल। एतदपि संस्करणमस्माभिर नैव दृष्टम।

अहमदावादनगरे १९८५तमे क्रैस्ताब्दे **एच्.एम्.याज्ञिक**महाशयो वेदाङ्ग-ज्योतिषग्रन्थं प्रकाशयामास किल। एतदपि संस्करणमस्माभिर् नैव दृष्टम्।

नवदेहलीनगरे १९८५तमे क्रैस्ताब्दे एव **टी.एस्.कुप्पान्नाशास्त्रि**महाशयः वेदाङ्गज्योतिषं 'वेदाङ्गज्योतिष अव् लगध' इति नाम्ना प्रकाशयामास किल। एतदपि संस्करणमस्माभिर् नैव दृष्टम्।

म्याक्समूलरः (१८८०-१९५७वै.) १९१९तमे वैक्रमेऽब्दे (१८६२तमे क्रैस्ताब्दे) प्रकाशितस्य सायणव्याख्यायुतस्य ऋग्वेदस्य चतुर्थखण्डस्य भूमिकायां वेदकाल-निर्णयप्रसङ्गे यजुर्वेदिनां परम्परयाऽऽगतस्य वेदाङ्गज्योतिषस्याऽऽद्यानामष्टानां श्लोकानामाङ्लभाषानुवादं प्रकाशयामास। एतत् त्वस्माभिर् दृष्टम्।

प्रथमं महाराष्ट्रभाषायां १९५३तमे वैक्रमाब्दे (१८९६तमे क्रैस्ताब्दे) **शङ्कर-बालकृष्णदीक्षितेन** (१९१०-१९५५वै.) प्रकाशिते, ततः परं १९८८तमे वैक्रमाब्दे (१९३१तमे क्रैस्ताब्दे) शङ्करपुत्त्रेण परिष्कृत्य पुनर् महाराष्ट्रभाषायामेव प्रकाशिते, प्रथमं २०१४तमे वैक्रमाब्दे लखनऊ-नगरस्थया हिन्दीसमित्या हिन्द्यनुवादरूपेण प्रकाशिते भारतीयज्योतिषनामके ग्रन्थे, तृतीयवारं च २०३२तमे वैक्रमाब्दे प्रकाशिते तस्मिन्नेव ग्रन्थे (पृ.९६-१२१) ऋग्वेदिपरम्परयाऽऽगतस्य वेदाङ्गज्योतिषस्य १, २, ४, ५, ६, ७, ८, ९, १४, १६, १७, १८, १९, २१, २२, २३, २५, २६, २७, २८, ३१, ३२, ३३, ३४ श्लोकाः शङ्करबालकृष्णदीक्षितेन पाठविवेचनपूर्वकं व्याख्याताः सन्ति। तत्रैव यजुर्वेदिपरम्परयाऽऽगतस्य वेदाङ्गज्योतिषस्य ११, २५, २८, २९, ३०, ३१, ३६, ३७ श्लोका अपि तथैव व्याख्याताः सन्ति। शङ्करबालकृष्णदीक्षितमहाशयस्यैतेन व्याख्यानेन अमेरिकाभिजनस्य **ह्विट्नि**महाशयस्य (१८९४-१९५१वै.) "वेदाङ्गज्योतिषम् अबोध्येना-ऽवकरेण पूर्णमस्ति (Vedanga Jyotisha is filled with unintelligible rubbish)" इति गालिदानं निराधारमिति प्रमाणितमिति **बालगङ्गाधरतिलक**महाशयो (१९१३-१९७८वै.) ब्रवीति। *शङ्करबालकृष्णदीक्षितस्येदं पूर्वसंस्करणव्याख्यानादिकं गतार्थीकुर्वद् वेदाङ्गज्योतिषसंस्करणं त्वस्माभिर् उक्ते २०३२तमे वैक्रमाब्दे (१९७५तमे क्रैस्ताब्दे) प्रकाशिते हिन्दीभाषामये ग्रन्थे समाविष्टं दृष्टं परिशीलितं च।*

'वाराणस्यां मेडिकल् हाल् नाम्नि मुद्रायन्त्रालये १९६४तमे वैक्रमाब्दे (१९०८तमे क्रैस्ताब्दे) मुद्रितम्', **'याजुष-ज्यौतिषं सोमाकर-सुधाकरभाष्यसहितम्, आर्चज्यौतिषं च सुधाकरभाष्येण तल्लघुविवरणेन च सहितम्, महामहोपाध्याय-सुधाकरद्विवेदिसंशोधितम्'** इत्युक्तं मुरलीधरझामहाशयलिखितेन आङ्लभाषा-मयेन अनुबन्धेन च सहितं लाला-छोटेलाल-बार्हस्पत्य-व्याख्याऽऽलोचनपरं वेदाङ्ग-ज्योतिषसंस्करणमप्यस्माभिर् दृष्टं परिशीलितं च।

बालगङ्गाधरतिलकविरचितः "वेदिक् क्रोनोलजि याण्ड् वेदाङ्गज्योतिष" इति नाम्नाऽङ्कितः पुण्यपत्तननगरे १९२५तमे क्रैस्ताब्दे (१९८२तमे वैक्रमाब्दे) प्रकाशितः आङ्लभाषामयो ग्रन्थोऽप्यस्माभिर् दृष्टः। तत्र 'नोट् अन् दि इण्टर्प्रिटेशन् अव् वेदाङ्गज्योतिष, क्रिटिसिजम् याण्ड् सजेशञ्ज्' इति प्रकरणे (पृ.४५-१०४) अर्वाचीनाया वेदाङ्गज्योतिषव्याख्यापरम्परायाः परिचयो दत्तोऽस्ति, तत्र बालगङ्गाधरतिलकमहाशयेन लालाछोटेलालबार्हस्पत्यस्य सुधाकरद्विवेदस्य च व्याख्यानयोर् विशिष्टेन वैमत्येन युक्तानां कठिनानां वेदाङ्गज्योतिषस्थानाम् एकादशानां श्लोकानां बार्हस्पत्य-द्विवेदयोर् व्याख्यानयोर् विवेचनं तेषां श्लोकानां स्वाभिमतं व्याख्यानं च कृतमस्ति। एतस्य ग्रन्थस्याऽप्यस्माभिर् विशेषेणाऽनुशीलनं कृतमस्ति।

निर्णयसागरमुद्रणालये १९९१तमे वैक्रमेब्दे (१९३४तमे क्रैस्ताब्दे) मुद्रिते शिक्षादिवेदषडङ्गे स्थितम् 'अथ ज्योतिषं-लगधः' इत्यङ्कितम् ऋग्वेदिनां परम्परयाऽऽगतं वेदाङ्गज्योतिषमप्यस्माभिर् दृष्टम्।

मैसूरुस्थ-राजकीयशाखामुद्रणालये १९९३तमे वैक्रमेऽब्दे (१९३६तमे क्रैस्ताब्दे) सम्मुद्रितं डाक्टराह्वेन शामशास्त्रिणा विरचितया दीपिकाख्यव्याख्यया आङ्लभाषानुवाद-व्याख्यानाभ्यां च युक्तं स्वपूर्ववर्तिजनकृतव्याख्यासमीक्षायुतं वेदाङ्गज्यौतिषसंस्करणं चाऽस्माभिर् दृष्टं परिशीलितं च। तत्र शास्त्रिमहाभागेन जैनग्रन्थानां सूर्यप्रज्ञप्ति-कालालोकप्रकाश-ज्योतिष्करण्ड-मलयगिरिव्याख्याणां साहाय्येन च वेदाङ्गज्योतिषग्रन्थस्य कठिनानां श्लोकानां व्याख्यानं कृतमस्ति। **किन्त्वेतद् व्याख्यानं सर्वत्र वेदाङ्गज्योतिषग्रन्थ-शब्द-वाक्य-प्रकरणानां सर्वथाऽनुकूलं तु न दृश्यते। एतस्य पक्षस्य स्पष्टीकरणमस्माकं व्याख्यानेन कृतमस्ति।**

डा.सत्यप्रकाश डी.एस्सी. इत्याख्येन विदुषा रचितस्य 'फाउण्डर्ज् अव् साइन्सेज् इन् एन्सण्ट् इण्डिया' इत्याख्यस्य आङ्लभाषामयस्य ग्रन्थस्य हिन्द्यनुवादरूपेण प्रस्तुते नवदेहलीस्थेन 'रिसर्च् इन्स्टिच्युट् अव् एन्सण्ट् साइण्टिफिक् ष्टडीज्' इत्याख्येन निकायेन २०२३तमे वैक्रमाब्दे (१९६७तमे क्रैस्ताब्दे) प्रकाशिते **'भारतीय विज्ञान के कर्णधार'** इत्याख्ये ग्रन्थे (पृ.४०९-४६०) स्थितं 'लगध—ज्योतिष को युक्तिसङ्गत बनाने वाले प्रथम ऋषि' इति प्रकरणं चाऽस्माभिर् दृष्टम्। तत्र यजुर्वेदिनां परम्परयाऽऽगतस्य वेदाङ्गज्योतिषग्रन्थस्य हिन्द्यामनुवदनं व्याख्यानं च कृतमस्ति। ऋग्वेदिनां परम्परयाऽऽगतस्य वेदाङ्गज्योतिषस्य विशिष्टाः श्लोका अपि तत्र तत्तत्स्थाने समाविष्टाः सन्ति। टिप्पणीरूपेण सर्वो वेदाङ्गज्योतिषग्रन्थोऽपि तत्र दत्तोऽस्ति। तत्र संस्कृतश्लोकेषु मुद्रणाशुद्धयस् तु बह्व्य एव दृश्यन्ते। एतस्मिन् प्रकरणे प्रथमं युगवर्षमासादिवैदिकशब्दावल्या व्याख्यानं कृतमस्ति। एतस्मिन् पक्षे शङ्करबालकृष्णदीक्षितग्रन्थस्याऽनुकरणं कृतं प्रतीयते।

वेदाङ्गज्योतिषग्रन्थरचनाकालविचारोऽपि तत्र कृतोऽस्ति। ततः यजुर्वेदिनां परम्परयाऽऽगतस्य वेदाङ्गज्योतिषग्रन्थस्य श्लोकानां क्रमेणाऽनुवदनं व्याख्यानं च कृतमस्ति। एतस्मिन् पक्षे सर्वथा शामशास्त्रिव्याख्यानस्याऽनुसरणं कृतं प्रतीयते।

४०. अस्माभिर् दृष्टानि वेदाङ्गज्योतिषग्रन्थस्य हस्तलिखितानि पुस्तकानि

नैपाल-काष्ठमण्डपमहानगरस्थ-राष्ट्रियाभिलेखालये B ५०८/६ इत्यङ्किते A ११३७/८ इत्यङ्किते च सूक्ष्मच्छायाचित्राधारपत्रके स्थितम्, B ३४८/१८ इत्यङ्किते A १०६८/१० इत्यङ्किते च सूक्ष्मच्छायाचित्राधारपत्रके स्थितं च यजुर्वेदिनां परम्परयाऽऽगतं हस्तलिखितं वेदाङ्गज्योतिषम्, E ९७९/५ इत्यङ्किते सूक्ष्मच्छायाचित्राधारपत्रके स्थितम्, E १९९०/५ इत्यङ्किते सूक्ष्मच्छायाचित्राधारपत्रके स्थितम्, B ३४८/१७ इत्यङ्किते सूक्ष्मच्छायाचित्राधारपत्रके स्थितं च ऋग्वेदिनां परम्परयाऽऽगतं हस्तलिखितं वेदाङ्गज्योतिषं चाऽस्माभिर् दृष्टम्। B ३४८/१७ इत्यङ्किते सूक्ष्मच्छायाचित्राधारपत्रके त्रिचतुराणां हस्तलिखितानां वेदाङ्गज्योतिषग्रन्थपुस्तकानां छायाप्रतिलिपयः सन्ति।

४१. वेदाङ्गज्योतिषपाठविमर्शः

वेदाङ्गज्योतिषपाठविषये शङ्करबालकृष्णदीक्षितेन 'अद्यत्वे यद् वेदाङ्गज्योतिषं प्रचलितमस्ति तस्य बहवः श्लोका अर्थदृष्ट्या अशुद्धाः प्रतीयन्ते, किन्तु विचित्रमेतदस्ति यद् अशुद्धत्वेऽपि भारतस्य सर्वेषु प्रदेशेषु ब्राह्मणानां पाठ एकरूपोऽस्ति, वैदिका जना एतद् वेदाङ्गज्योतिषं साक्षाद् वेदान् न्यूनं न मन्यन्ते, यदि तान् प्रति 'वेदाङ्गज्योतिषग्रन्थस्याऽयं पाठोऽशुद्धोऽस्ति, तस्य स्थाने इमं शुद्धं पाठं कुर्वन्तु भवन्तः' इत्युच्येत तदा ते तथा कर्तुं कदाऽपि तत्परा न स्युः। एतावत् तु निश्चितमस्ति यदयं ग्रन्थः प्रारम्भे शुद्ध एव स्थितो भवेत्, अशुद्धयोऽत्र पश्चादागताः स्युः, किन्तु न ज्ञायते कदा कथं वेमा अशुद्धय आगता इति। एतस्य विषयस्याऽन्वेषणं वेद-वेदाङ्गानामितिहासस्यैकं महत्त्वपूर्णं कार्यं भवेत्। वयं तु मन्यामहे यद् मूलवेदाङ्गज्योतिषग्रन्थः कदाचिल् लुप्तो जातो भवेत्, ततः पश्चात् कस्यचन सङ्ग्रहे सुरक्षितमशुद्धं दुष्पठं वा हस्तलिखितपुस्तकमाधारीकृत्य केनाऽप्यर्थानभिज्ञेन सर्वप्रथमं तस्याऽध्ययनमारब्धं भवेत्, ततः सर्वत्र तस्यैवाऽशुद्धपाठस्य प्रचारो जातो भवेत्' इत्युक्तमस्ति तदीये भारतीयज्योतिषेतिहासग्रन्थे वेदाङ्गकालप्रकरणारम्भे।

धूलिपालकुलजेन अर्कसोमयाजिना आन्ध्रदेशजेन वैदिकेन ज्यौतिषिकेण च वेदाङ्गज्योतिषपाठविषये "वेदाङ्गज्योतिषमिति कश्चिद् ग्रन्थो वर्तते महात्मना लगधेन प्रवर्तित इति प्रतिपादितः। यद्यपि याजुषमार्चं चेति वेदाङ्गज्योतिषं द्विविधं प्रसिद्धं वैदिकलोके। यथा वेदस् तथैवेदमद्यापि कण्ठे वर्तते बहूनां वेदपण्डितानाम्। तत्रार्चज्यौतिष एव लगधनामोदाहृतं न याजुषे। तथापि ग्रन्थद्वयेऽपि प्रतिपादितानां विषयाणां किञ्चिदेव भिन्नत्वाद् उभयमपि लगधसम्बन्धीति वक्तुं शक्यते" इत्युक्तमस्ति ज्योतिर्विज्ञानम् इत्याख्ये वाराणस्यां वाराणसेय-(सम्पूर्णानन्द)-संस्कृत-विश्वविद्यालयेन २०२१तमे वैक्रमाब्दे (१९६४तमे क्रैस्ताब्दे) प्रकाशिते ग्रन्थे (पृ.५)।

मूलवेदाङ्गज्योतिषग्रन्थविषये शङ्करबालकृष्णेन कृता 'मूलवेदाङ्ग-ज्योतिषग्रन्थः कदाचिल् लुप्तो जातो भवेत्' इति 'ततः पश्चात् हस्तलिखितपुस्तक-माधारीकृत्य केनाऽप्यर्थानभिज्ञेन पुनः तस्याऽध्ययनमारब्धं भवेत्' इति च कल्पना असङ्गता दृश्यते। हस्तलिखितपुस्तकेष्वपि पाठभेदा दृश्यन्त एवेति वयं तु अर्थानुसन्धानं विना प्रवचनादध्ययनाच् च सुदीर्घे काले दुरुच्चारणाद् दुश्श्रवणाच् च वेदाङ्गज्योतिषग्रन्थे पाठभ्रंशो जातो भवेत्, तत्र सर्वप्रथमं लेखने प्रवृत्ता जनाः पाठ-भ्रंशयुतं वेदाङ्गज्योतिषग्रन्थं लिलिखुः किल। ततः कदाचिद् गुरुमुखोच्चारणा-नूच्चारणपरम्परायां शिथिलायां जातायां यथालिखितपाठपरम्परा कथञ्चित् प्रवृत्ता भवेदिति मन्यामहे। सम्भावयति हि कुमारिलभट्टमहाशयोऽपि वेदाङ्गस्मृतिषु दुश्श्रुतत्वादिना पाठभ्रंशं **"न हि प्रमादपाठत्वं शक्यं कल्पयितुं श्रुतेः। दुश्श्रुतस्वप्न-विज्ञानमूला त्वापद्यते स्मृतिः"** इति वदन् (तन्त्रवार्तिके १।३।३, आनन्दाश्रमसंस्करणे, पृ.९९)। एवं च दुश्श्रुतत्वादिमूलमेव स्थानेस्थाने वेदाङ्गज्योतिषस्य पाठदौष्ठवं मन्तव्यम्। तथा च **"संयोगो विप्रयोगश् च साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्याऽन्यस्य सन्निधिः॥ सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्याऽनवच्छेदे विशेषस्मृतिहेतवः"** इति (२।३१५,३१६) वाक्यपदीयप्रदर्शितान् अर्थावगमहेतून् विचार्य, **"शास्त्रं विप्रतिपद्येत धर्मन्यायेन केन चित्। न्यायस् तत्र प्रमाणं स्यात् तत्र पाठो हि नश्यति"** इति न्यायं च कौटलीयार्थशास्त्रोक्तं (३।१।२२८) समाश्रित्य, **"आगमेषु पुराणेषु स्मृतिष्वपि कथासु च। अर्थमेव तु गृह्णीयान् न च शब्दं विचारयेत्"** इति भारद्वाजस्मृतिवचनम् (७।१२३), **"द्वैधीभावे समुत्पन्ने लक्षणान् निर्णयो भवेत्। लक्षणं त्वविनाशि स्यात् सम्प्रदायो विनश्यति"** इति वर्णरत्नप्रदीपि-कायाः शिक्षाया वचनं (श्लो. २१३) च विचार्य वेदाङ्गज्योतिषग्रन्थस्थपदविशेषपाठ-परिष्करणमपि यथौचिति कर्तुं शक्यमेवाऽवसीयते। तत्र बहुषु श्लोकेषु यजुर्वेदिनां पाठोऽर्थदृष्ट्या युक्ततरः, कतिपयेषु श्लोकेषु च ऋग्वेदिनां पाठोऽर्थदृष्ट्या युक्ततर

इति द्वयोः पाठयोर् मेलनेन श्लोकविशेषे पाठविशेषस्य निर्धारणं कर्तुमुचितमेव भवतीति च मन्तव्यम्। श्लोकक्रमस्तु यजुर्वेदिनां पाठे एव समुचिततरो दृश्यते।

अत्र व्याख्यानावसरेऽस्माभिः परिष्कृतं पाठमादाय व्याख्यानं कृतमस्ति। पाठपरिष्कारस्यौचित्यं च तत्रतत्रैव प्रतिपादितमस्ति। हस्तलिखितग्रन्थस्थपाठज्ञानाय परिशिष्टे हस्तलिखितग्रन्थानुसारी पाठश् छायाप्रतिलिपिरूपेणाऽपि प्रदर्शितोऽस्ति। यजुर्वेदिनां परम्परयाऽऽगतस्य वेदाङ्गज्योतिषग्रन्थस्य ऋग्वेदिनां परम्परयाऽऽगतस्य वेदाङ्गज्योतिषग्रन्थस्य च तुलनात्मकायाऽध्ययनाय सौकर्यं कर्तुं तदनुकूलोऽस्माभिरसंस्कृतः पाठोऽपि परिशिष्टे दत्तोऽस्ति।

आथर्वणज्योतिषं तु १६५ पद्यात्मकमपि प्रायेण फलितज्योतिषरूपम्, मन्त्रब्राह्मणरूपे वेदेऽन्येषु वेदाङ्गेषु लगधप्रोक्तवेदाङ्गज्योतिषे चाऽनुल्लिखितानां करणवारादीनां नवीनविषयाणां प्रतिपादनं कुर्वत्, वेदवेदाङ्गाऽप्रतिकूलमपि, अन्येभ्यो ज्योतिषग्रन्थेभ्यः प्राचीनमपि लगधप्रोक्तवेदाङ्गज्योतिषादर्वाचीनम्, शान्तिकपौष्टिककर्मपराणामाथर्वणिकानां विशेषत उपकारकम्, वेदाङ्गज्योतिषात् सर्वथा भिन्नं चेति तस्य परिशिष्टेऽपि सङ्ग्रहो न कृत इति बोध्यम्।

४२. सोमाकरस्य सोमाकरभाष्यस्य च परिचयः

यद्यपि शङ्करबालकृष्णदीक्षितेन तदीये भारतीयज्योतिषेतिहासग्रन्थे वेदाङ्गकालविचारप्रकरणप्रारम्भभागे 'सोमाकरटीका केवलं नाममात्रस्य टीका वर्तते, ये श्लोकाः सर्वथा सरलाः सन्ति येषां श्लोकानां गणितेन सह कोऽपि सम्बन्धो नास्ति तान् श्लोकान् विहायाऽवशिष्टानां श्लोकानामर्थः सोमाकरं प्रति सर्वथाऽनुद्घाटितोऽस्ति' इत्युल्लिखितमस्ति, तथापि सोमाकरभाष्यं बहुषु विषयेषु महत्त्वपूर्णं वर्तते।

सोमाकरभाष्यं प्राचीनं प्रतीयते। मङ्गलाचरणशैल्याऽपीदमवगम्यते। अर्वाचीने काले मङ्गलाचरणे प्रायो गणेशवन्दनं कुर्वन्ति। किन्तु सोमाकरभाष्ये वेदस्य प्रणामः कृतो दृश्यते। इदानीमनुपलभ्यमानाद् गर्गग्रन्थाद् बहूनि वचनानि उद्धरन् (श्लो.५, ८, १०, ११, १७, ३७, ३८, ३९, ४४), इदानीमप्रसिद्धग्रन्थकानां कृष्णात्रेय-भागुरि-क्रौष्टुकि-शुनकादीनां प्राचीनानामाचार्याणामुल्लेखं कुर्वन् (श्लो.१०, २३), लाटदेवाऽऽर्यभट-वराहमिहिर-ब्रह्मगुप्त-लल्ल-मुञ्जाल-श्रीपति-भास्करादिज्यौतिषिकग्रन्थानस्पृशन् सोमाकरः प्राचीन एव प्रतीयते। यद्यपि शङ्करबालकृष्णदीक्षितेन तदीये भारतीयज्योतिषेतिहासग्रन्थे "टीकाकारस्य सोमाकरस्य उत्पत्तिकालादीनां किमपि ज्ञानं न भवति, अन्यस्मिन् कस्मिन्नपि ग्रन्थे अन्यस्यां कस्यामपि टीकायां वाऽपि तस्य नाम नाऽस्ति" इत्युक्तं तथाऽपि धर्मशास्त्रेतिहासलेखकेन पाण्डुरङ्गवामनकाणे-

महाशयेन १८४१तमे वैक्रमेऽब्दे विष्णुभट्टेन रचितत्वेन प्रतिपादितस्य पुरुषार्थचिन्तामणेः कालखण्डे (आनन्दाश्रमसंस्करणे, पृ.४०९) तु वेदाङ्गज्योतिषभाष्यकारस्योल्लेखः कृतो दृश्यते। तेन हि "अभ्युदितेष्टिदर्शनादकालोपक्रमे दोष उपसत्समासदर्शनादकालापवर्गे दोषः। तस्मात् तथा यतितव्यं यथोपक्रमापवर्गौ न नश्यतः, अन्यथा 'दुरिष्टैर् दुरधीतैश् च दुराचारैर् दुरागमैः। विप्राणां कर्मदोषैस् तैः प्रजानां जायते भयम्' इति स्मृत्युक्तो दोष इति ज्योतिषभाष्यं सङ्गच्छते" इत्युल्लिखितमस्ति। सोमाकरभाष्ये हि "तस्मादुभयसम्भवे ये चतुर्दशीमुपवसन्ति ते निष्फलमेवात्मना यागं कृत्वा प्रजानां महान्तं दोषं जनयन्ति, यदाह स्मृतिः" इत्युक्त्वा (श्लो.१७) "दुरिष्टैर् दुरधीतैश् च" इत्यादिकं वचनं प्रदर्शितमस्ति। तथैव "सोमसूर्यस्तृचरितम्" (श्लो.४४) इत्यादेर् वेदाङ्गज्योतिषश्लोकस्य व्याख्याने च सोमाकरेण "वृथाभिमानिनां त्वसर्वज्ञानां वृथोपदेशिनां वृथानुष्ठानप्रवर्तकानामकालयागचोदनादकालयागप्रवर्तकत्वादौपमन्यवादिवन् मूर्धपातादिदोषपरम्परा, 'नक्षत्रैर् यश् च जीवति' (मनुस्मृतौ ३।१६२) इत्यश्राद्धीयत्वम्, तथा प्रदोषज्ञापकत्वाच्च परत्राऽप्यसिद्धिः, तथा च स्मृतिः 'दुरिष्टैर् दुरधीतैश् च दुराचारैर् दुरागमैः। विप्राणां कर्मदोषैस् तैः प्रजानां जायते भयम्' इति (कूर्मपुराणे १।३०।४, ब्रह्माण्डपुराणे २।३१।३६, मत्स्यपुराणे १४४।३५-३६, लिङ्गपुराणे (१।४०।४-५, वायुपुराणे १।५८।३६, स्कन्दपुराणे १।२।४०।२२१)। तस्मात् तथा यागकर्मणि वर्तितव्यं यथोपक्रमापवर्गावुभावपि न नश्यतः, अभ्युदितेष्टिदर्शनादकालोपक्रमदोषः, उपसत्समासदर्शनादकालापवर्गदोषः" इत्युक्तमस्तीति ज्ञेयम्।

सोमाकरो हि शेषकुलोत्पन्न इति सोमाकरभाष्यान्ते "इति शेषकृतं (शेषनागकृतं) ज्योतिःशास्त्रभाष्यं समाप्तम्" इत्युल्लिखितत्वादवगम्यते। शेषकुलं हि वैक्रमाब्दानां षोडशे शतके जातस्य पाणिनीयव्याकरणप्रक्रियाकौमुदीप्रकाशकारस्य शेषकृष्णस्य च कुलमस्ति। युधिष्ठिरमीमांसकादयस् तु आन्ध्रदेशजस्य प्रक्रियाकौमुदीकारस्य रामचन्द्रस्य कुलमपि शेषकुलं मन्यन्ते। भागीरथत्रिपाठिमहाशयस् तु प्रक्रियाप्रकाशग्रन्थोपोद्घाते रामचन्द्रकुलस्य शेषकुलत्वे प्रमाणाभासस्यैव सत्त्वं प्रमाणस्याऽसत्त्वमुक्त्वा प्रक्रियाकौमुदी-प्रकाशकारस्य शेषकृष्णस्यैव शेषकुलजत्वे प्रमाणस्य सत्त्वं प्रतिपादयति। स हि शेषकृष्णस्य महाराष्ट्राभिजनत्वं च प्रतिपादयति। यथा वा तथा वाऽस्तु दाक्षिणात्यं शेषकुलं वैयाकरणनिकाये प्रसिद्धम्। एवं शेषकुलजस्य सोमाकरस्य अभिजनोऽपि आन्ध्रदेशो वा महाराष्ट्रं वा सम्भाव्यते।

सोमाकरः श्रौती प्रव्रजिष्यन् निर्मत्सराणां श्रौतकर्मप्रवृत्तानां कृते देशकालविपर्ययादुत्सन्नतामिव प्राप्तस्याऽऽकुलस्याऽऽद्यस्य प्रधानस्य तदाऽनुपलभ्यमानपूज्यमानव्याख्यान्तरकस्य यजुर्वेदिनां परम्परयाऽऽगतस्य वेदाङ्गज्योतिषग्रन्थस्य भाष्यं प्रायेण स्वप्रतिभया चकारेति तदीयमङ्गलपाठपद्यसमाप्तिपद्यानामवलोकनादवगम्यते।

सोमाकरः **"एते वै यज्ञस्येन्द्राः"** इति काठकसंहितायाः (३५।१६) वचनम् (श्लो.१-२), **"न वै सुविदुरिव मनुष्या नक्षत्रम्"** इति च काठकसंहितायाः (८।३) वचनम् (श्लो.३), **"तेऽसुरा अयज्ञा अदक्षिणा अनक्षत्रा यत् किंचाऽकुर्वत तां कृत्यामेवाऽकुर्वत"** इति च काठकसंहितायाः (३७।१२) वचनम् (श्लो.३, १७, ४४), **"शिशिरं वा अग्नेर् जन्म"** इति च काठकसंहितायाः (९।१) वचनम् (श्लो.६), **"ऋतुयाजी वा अन्यश् चातुर्मास्ययाज्यन्यः"** इति च काठकसंहितायाः (३६।३) वचनम् (श्लो.१९), **"य एवाऽसा आग्नेयोऽष्टाकपालः पूर्णमासे योऽमावास्यायां तमग्नये पथिकृते कुर्यात्"** इति च काठकसंहितायाः एव (१०।५) वचनं च (श्लो.४४) प्रदर्शयन् काठककृष्णयजुर्वेदशाखाध्यायीव प्रतीयते, अन्यत्र दुर्लभानां काठककृष्णयजुर्वेदसंहितायाः वाक्यानां स्वभाष्ये सङ्ग्राहकत्वात्, काठकसूत्रकार-लौगाक्षिवचनानां तद्भाष्ये दर्शनाच्च (श्लो. ५,१९)।

सोमाकरकृते वेदाङ्गज्योतिषभाष्ये वेदाङ्गज्योतिषग्रन्थस्य प्रथम-द्वितीय-श्लोकयोर् व्याख्याने "स एष संवत्सरः प्रजापतिः षोडशकलस् तस्य रात्रय एव पञ्चदश कला ध्रुवैव षोडशी कला" इति माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणवचनम् (१४।४।३।२२) उद्धृतं दृश्यते, "मासाश् चाऽर्धमासाश् च परूंषि (पर्वाणि) ऋतवोऽङ्गानि संवत्सरो महिमा" इति आत्रेय-तैत्तिरीय-कृष्ण-यजुर्वेदसंहितावचनं च (५।७।२५।१) उद्धृतमस्ति; तृतीयस्य श्लोकस्य व्याख्याने **"पञ्चशारदीयो भवति"** (तै.ब्रा.२।७।१०।२) इत्यस्य वा **"पञ्चशारदीयो वा एष यज्ञः"** (तै.ब्रा.२।७।११।३) इत्यस्य वा वचनस्योद्धरणं कृतमस्ति, तथैव वैदिकेष्वपि प्रायेणाऽप्रसिद्धस्य कातीयतृतीयगोत्रचरणपृच्छाप्रतिज्ञासूत्रपरिशिष्टस्य **"मन्त्रपादपदसन्धि-विधिज्ञो धातुनामवचनप्रकृतिज्ञः। ईदृशो भवति यज्ञविधिज्ञः पक्षमासतिथिचन्द्रगति-ज्ञः"** (३५।४) इति वचनं च प्रदर्शितमस्ति; पञ्चमस्य श्लोकस्य व्याख्याने **"एषा ह संवत्सरस्य प्रथमा रात्रिर् यत् फाल्गुनी पौर्णमासी योत्तरैषोत्तमा"** इति माध्यन्दिनीय-वाजसनेयिशुक्लयजुर्वेद-शतपथब्राह्मणस्य (६।२।२।१८) वचनमुपात्तमस्ति; दशमस्य श्लोकस्य व्याख्याने **"पञ्चर्तवः (संवत्सरस्य)"** इति ऐतरेयिब्राह्मणस्य (१।१) वा **"संवत्सरस्य पञ्चर्तवः"** इति माध्यन्दिनीयवाजसनेयि-शुक्लयजुर्वेदशतपथब्राह्मणस्य (१।३।५।१०) वा **"पञ्चर्तवः संवत्सरस्य"** इति वा शतपथस्यैव (२।१।१।१३) वचनं प्रदर्शितमस्ति, षोडशस्य श्लोकस्य व्याख्याने **"पुरस्ताच् चन्द्रमा अभ्युदियात्"** इति श्रुतिवचनस्य (द्रष्टव्या- आत्रेयतैत्तिरीयसंहिता २।२।५।१-२), सप्तदशस्य श्लोकस्य व्याख्याने **"पूर्वां पौर्णमासीमुत्तरां वोपवसेत्"** इति कात्यायनश्रौतसूत्रस्य (२।१।१) वचनस्य, **"या पूर्वा पौर्णमासी साऽनुमतिः"** (ऐ.ब्रा. ३२।९[७।११], काठकसंहितायाम् १२।८, मैत्रायणीयसंहितायाम् ४।३।५) इति ऐतरेयिब्राह्मणादिवचनस्य, **"यस्याऽग्निहोत्र-**

मदर्शमपौर्णमासमचातुर्मास्यमनाग्रयणमतिथिवर्जितं च। अहुतमवैश्वदेवमविधिना हुतमा सप्तमाँस् तस्य लोकान् हिनस्ति" इति मुण्डकोपनिषद्वचनस्य (१।२।३), पञ्चविंशस्य श्लोकस्य व्याख्याने **"तमभ्युदितेष्टिपथिकृती दशमीप्रक्रान्ते वेदनिष्पत्तिं विद्यादिति श्रुतेः"** इति अज्ञायमानाकरस्य श्रुतिवचनस्य चोद्धरणस्य दर्शनाद् वेदाङ्गज्योतिषभाष्यकारः सोमाकरः शाखान्तराणां विशेषविधानानामपि ज्ञानेन युक्तो दृश्यते।

सोमाकरः खलु वेदाङ्गज्योतिषस्य अष्टमस्य श्लोकस्य व्याख्याने **"घर्म इत्यहर्नाम घर्मः घ्रंसः घृणिरित्यहर्नामसु पठितम्"** इति निघण्टुपाठं (१।९), **"रात्रिः, क्षपा, श्यावी, शर्वरीति रात्रिनामसु पठितम्"** इति च (१।७) निघण्टुपाठं परामृशति, (सुधाकरस्तु घ्रंश इति वैदिकपदमजानन् निघण्टुग्रन्थपरिचयाभावं च स्वस्य प्रकटयन् घस्र इति शोधनं चिकीर्षति), द्वादशस्य श्लोकस्य व्याख्याने निरुक्तस्य **"अर्धमासः पर्व देवानस्मिन् प्रीणन्तीति"** (१।६।६) इति वचनं प्रदर्शयति, तथैवाऽष्टाविंशस्य श्लोकस्य व्याख्याने स **"पञ्च वा ऋतव इति श्रुतिमभिप्रेत्य निरुक्तकृत् पञ्चर्तवः संवत्सरस्येत्याह"** इति वक्ति, निरुक्ते चैष विषयो दृश्यते (४।४।६), ऊनत्रिंशस्य श्लोकस्य व्याख्याने च निरुक्तस्य **"ऋक्षास् स्तृभिरिति नक्षत्राणाम्"** (३।४।३) इति वचनमुद्धरति। तस्मात् सोमाकरो निघण्टु-निरुक्तपरिचयेनाऽपि युक्त एव प्रतीयते।

वेदाङ्गज्योतिषग्रन्थस्य तृतीयश्लोकस्य व्याख्याने **"पुण्याहे दीक्षा"**, **"वसन्ते ज्योतिष्टोमेन यजेत"**, **"यजेत वाजपेयेन ग्रीष्मे"** इति वचनानाम्, चतुर्थश्लोकस्य व्याख्याने **"इष्टका शोषपाकाभ्याम्"** इत्यादेर् विष्णुवचनस्य, पञ्चमश्लोकस्य व्याख्याने **"माघ्याः पौर्णमास्याश् चतुरहे संवत्सराय दीक्षन्ते"** इति लौगाक्षिवचनस्य चोद्धरणं कुर्वन्, षष्ठस्य श्लोकस्य व्याख्याने वसन्तस्याऽऽद्यर्तुत्वे हेतुं शिशिरस्याऽऽद्यर्तुत्वे हेतुं च प्रदर्श्य विविच्य शिशिरस्याऽऽद्यर्तुत्वस्य समर्थनं कुर्वन्, **"अत एवाऽत्र सर्ववर्णानां कर्माधिकारः"** इत्युक्त्वा नानावेदशाखाश्रौतसूत्रविधानपरिचयं स्वस्य प्रकटीकुर्वन्, चतुर्दशस्य श्लोकस्य व्याख्याने **"आद्याः प्रतिपदस् त्रयः"** इति वचनं प्रदर्शयन्; सप्तदशस्य, ऊनत्रिंशस्य, चतुश्चत्वारिंशस्य च श्लोकस्य व्याख्याने परिशिष्टकृद्-वचनपरामर्शं कुर्वन्, चतुश्चत्वारिंशश्लोकस्य व्याख्याने सूत्रकारवचनं प्रदर्शयन्, वेदाङ्गज्योतिषाध्ययनस्य युक्त्या समर्थनं कुर्वन्, **"येषां तु सूत्रकारो विकल्पेनाऽऽह पूर्वां पौर्णमासीमुपवसेदुत्तरां वेत्यादि, कात्यायनसूत्रवशेन स्वेच्छया प्रवृत्तिः"** इति स्वसूत्रकारोक्तव्यवस्थाया विशेषतोऽनुसरणीयतां च प्रदर्शयन् सोमाकरो वेद-वेदाङ्ग-वेदोपाङ्ग-स्मृतिपुराणव्यवस्थाविज्ञो विचक्षणः श्रौतस्मार्तकर्मविशेषविद् विशिष्टो वैदिकः पण्डितोऽवगम्यते, न तु शङ्करबालकृष्णदीक्षितोक्तविधः साधारण-योग्यतायाः पण्डितः।

श्रौतयज्ञसम्प्रदायश्रद्धाधनेन विप्रवर्येण सोमाकरेण हि श्रौतयज्ञकाल-व्यवस्थावस्तुसाररूपज्ञानसम्प्रदायपरिरक्षणकामेन मङ्गलपाठपूर्विकायां प्रतिज्ञायां **"देशस्य कालस्य विपर्ययाद् यदुत्सन्नार्थं चाङ्गमाद्यं तु शास्त्रम्। ज्योतिषं नामाऽऽकुलकं प्रधानं सोमाकरोऽहं विवृणोमि शक्त्या॥ लब्ध्वा ज्ञानं प्रातिभं बुद्धियोगात् तद्वच् च भाष्यप्रचयोऽस्य नाऽस्ति। सर्वज्ञता नास्ति ममेति मत्त्वा ज्योतिर्विदो नॄन् प्रणिपत्य मूर्ध्ना॥ यस्मादहं स्वप्रभावात् प्रवृत्तोऽहोरात्रीये गणिते चाऽप्रगल्भः। तस्मादन्ये** वस्तुसारं **विदित्वा कृत्स्नार्थाप्त्यै कल्पयिष्यन्ति शेषम्"** इति वदता, विंश-श्लोकव्याख्याने च **"यदि त्वेवं सर्वासां तिथीनां नक्षत्रानयनमिच्छेत् तदा नष्टकालानयनानि अन्यानि करणान्यनुसृत्योहापोहाभ्यां कल्पयेदस्याऽकृत्स्नत्वात्, तेनेहोपकारकृत्। यस्मादिह पर्वचोदनया पक्षद्वयचोदितो यागकाल एव प्रकृतस् तस्मादेतदेवोच्यते"** इति च स्फुटीकुर्वता, चत्वारिंशश्लोकव्याख्याने च **"तस्मादिह यत् सूचितं तदन्यज् ज्योतिषशास्त्रमपेक्ष्य प्रकल्प्यमेव तु"** इति वदता वेदाङ्गज्योतिषग्रन्थ-प्रतिपाद्यवस्तुसारं विदित्वा तदनुसारमेव तदपरित्यज्यैव चाऽन्यद् गणितज्ञैः सम्यग् व्याख्येयमिति वेदाङ्ग-ज्योतिषग्रन्थव्याख्यानदिक्प्रदर्शनं च कृतमिति सोमाकरो विवेकशाली वैदिको विद्वानस्ति, तद्भाष्यं च तदनुरूपमेवाऽस्ति, पाठभ्रंशाद् दुर्बोधं विकलं च जातमस्तीति तु वेदितव्यम्।

उक्तप्रकारकं महत्त्वपूर्णं सोमाकरभाष्यं पुरा १९६४तमे वैक्रमाब्दे वाराणस्यां मुद्रितमपीदानीं दुर्लभमित्यस्माभिस् तत् सुधाकरद्विवेदिसंस्करणात् सङ्गृह्य श्रुति-वचनादीनां संशोधनेन स्थलनिर्देशनेन च परिष्कृत्याऽत्र समावेशितमस्ति।

४३. अर्वाचीने काले वेदाङ्गज्योतिषग्रन्थाध्ययने प्रगतिः

आङ्लशासकप्रतिनिधिना **व्हारेन्हेष्टिङ्स**नामकेन जनेन यथा मुसलबाणानां कृते हदीसफैकाद्यनुसारं विवादपदनिर्णयस्य व्यवस्थां कृत्वा तान् रञ्जयित्वा मुसल-बाणान् वशीकर्तुं प्रयासः कृतस् तथैव हिन्दूनां कृतेऽपि तेषामेव शास्त्रमनुसृत्य विवादपदनिर्णयस्य व्यवस्थां कृत्वा तान् रञ्जयित्वा हिन्दूनपि वशीकर्तुं भारतीयान् संस्कृतज्ञान् धर्मशास्त्रविदो दश ब्राह्मणान् संयोज्य तैर् विवादपदनिर्णयरूपव्यव-हारोपयोगिनां विषयाणां सङ्ग्रहम् (विवादार्णवसेतुनामकम्?) १८३०तमे वैक्रमाब्दे कारयित्वा तस्य सङ्ग्रहस्य पारसीकभाषायामनुवादमपि कारयित्वा ततः पारसीक-भाषामयस्य तस्य ग्रन्थस्य आङ्लभाषायामनुवादे च कारिते, तस्मिन्ननुवादे च १८३३तमे वैक्रमाब्दे प्रकाशिते तस्य ग्रन्थस्य प्रस्तावनां पठित्वा पाश्चात्त्या जनाः संस्कृतवाङ्मयस्य विषये वस्तुस्थितेः प्रामाणिकं ज्ञानं प्रापुः किल। एतच् च प्रायेण म्याक्डोनेल-लिखिताद् वैदिकवाङ्मयेतिहासादवगम्यते।

ततः परं तेनैव व्रारेन्हेष्टिङ्सनामकेन आङ्लशासकप्रतिनिधिना प्रेरितेन वाराणसीमधिवसता चार्ल्स-विल्किन्सनाम्ना पाश्चात्त्येन जनेन संस्कृतभाषाधिगमनं प्रारभ्य संस्कृतभाषाप्रावीण्यं च प्राप्तं कृत्वा १८४२तमे वैक्रमेऽब्दे भगवद्गीताया-माङ्लभाषायामनूद्य प्रस्तुतायां पाश्चात्त्यानां जनानां संस्कृतग्रन्थाभ्यासे सर्वप्रथमं मार्गदर्शनं बभूव किल।

व्रिलियम्-जोन्सनामकः (१८०३-१८५१वै.) आङ्लको न्यायाधीशोऽपि स्वयं संस्कृतभाषां महता प्रयासेन शिक्षकजनं तोषयित्वा समधिगम्य वङ्गदेशे १८४१तमे वैक्रमेऽब्दे एसियाटिक-सोसाइटि-नामकं निकायं स्थापयित्वा पाश्चात्त्यान् जनान् संस्कृतग्रन्थानुशीलने प्रेरयामास किल। स हि १८४९तमे वैक्रमेऽब्दे कालिदास-कृतम् ऋतुसंहारकाव्यं मुद्रापयित्वा सर्वप्रथमं संस्कृतग्रन्थमुद्रापणमपि प्रारेभे किल।

ततः परं वेदाङ्गज्योतिषग्रन्थेऽपि पाश्चात्त्यानां दृष्टिः पपात किल। तत्र वेदाङ्गज्योतिषग्रन्थे वर्तमान उत्तरायण-दक्षिणायनप्रवृत्तिनक्षत्रविशेषोल्लेखः खलु पाश्चात्त्यानां दृष्टिं विशेषतश् चकर्ष किल।

तत्र सर्वप्रथमम् आङ्लसेनानीर् जर्विसः १८९१तमे वैक्रमेऽब्दे ऋग्वेदिनां परम्परायाऽऽगतं वेदाङ्गज्योतिषग्रन्थं भारतीयभारमानपद्धतिः (Indian Metrology) इत्याख्यस्य ग्रन्थस्य परिशिष्टे मुद्रापयामासेति बालगङ्गाधरतिलकमहाशयः कथयति।

ततश् च १९१९तमे वैक्रमेऽब्दे (१८६२तमे क्रैस्ताब्दे) अध्यापको व्रेबरः (१८८२-१९५८वै.) ऋग्वेदिनां परम्परयाऽऽगतं वेदाङ्गज्योतिषं यजुर्वेदिनां परम्परया-ऽऽगतं वेदाङ्गज्योतिषं च पाठसमीक्षात्मकसंस्करणरूपेण प्रकाशयामास, तत्र सोमाकरटीकाऽपि संलग्ना कृता, टिप्पण्योऽपि योजिताः, शर्मण्यभाषायामनुवादश् च योजित इति, सर्वेषां श्लोकानामर्थस् तु व्रेबरेण सम्यङ् नाऽऽकलित इति च हिन्दीविश्वकोशसम्पादको नगेन्द्रनाथवसुः कथयति। तिलकमहाशयोऽपि "वेदिक् क्रोनोलजि याण्ड् वेदाङ्गज्योतिष" इति नामके ग्रन्थे एकत्र (पृ.२२) १९१९तमे वैक्रमाब्दे (१८६२तमे क्रैस्ताब्दे) कृतत्वेनाऽन्यत्र (पृ.४५) तु १९२९तमे वैक्रमेऽब्दे (१८७२तमे क्रैस्ताब्दे) कृतत्वेन व्रेबरकृतं वेदाङ्गज्योतिषमूलपाठसम्पादनकार्य-मुल्लिखति। सुधाकरेणाऽपि "याजुषज्योतिषे सोमाकरशेषेण विरचितं भाष्यं यच् च यूरोपदेशे व्रेबरादिमहाशयेभ्यः प्रसिद्धं तस्यैव मुद्रणाय मम प्रयासः" इति ज्यौतिष-भूमिकायामुक्तमस्ति। किन्तु शङ्करबालकृष्णदीक्षितः शामशास्त्रिमहोदयश् च व्रेबरकार्यस्योल्लेखं नैव कुरुतः।

१९३४तमे वैक्रमेऽब्दे थिबोमहाशयः (१९०८ वै.-) अल्पानां कठिनानां वेदाङ्ग-ज्योतिषश्लोकानामर्थान् प्रकाशयामासेति तिलकमहाशयः कथयति। शङ्करबाल-कृष्णदीक्षितोऽपि १९३६तमस्य वैक्रमाब्दस्य (१९७९तमस्य क्रैस्ताब्दस्य) आसन्ने

काले थिबोमहाशयः सोमाकराऽनुद्घाटितार्थकानां पञ्चषाणां वेदाङ्गज्योतिष-श्लोकानामर्थानाविरकरोदिति वदति।

१९४२तमे वैक्रमेऽब्दे (१८८५तमे क्रैस्ताब्दे) महाराष्ट्रदेशजो **जनार्दन-बालाजी-मोडकः** ऋग्वेदज्योतिषस्य यजुर्वेदज्योतिषस्य च महाराष्ट्रभाषायामनुवादं मुद्रापयामास, तत्र तेन थिबोमहाशयाऽनुद्घाटितार्थकानां द्वित्राणां वेदाङ्गज्योतिष-श्लोकानामर्थ उद्घाटित इति शङ्करबालकृष्णदीक्षितः कथयति।

ततः १९५३तमे वैक्रमेऽब्दे (१८९६तमे क्रैस्ताब्दे) प्रथमं प्रकाशिते **"भारतीय ज्योतिष शास्त्रा चा इतिहास आणि परिचय"** इत्याख्ये महाराष्ट्रभाषामये ग्रन्थे (अस्माभिर् दृष्टे तस्य ग्रन्थस्य भारतीयोत्तरप्रदेशस्थ-शासकीयहिन्दीसमित्या तृतीय-संस्करणतया २०३२तमे वैक्रमाब्दे [१९७५तमे क्रैस्ताब्दे] प्रकाशिते शिवनाथ-झारखण्डिकृते भारतीय ज्योतिष इत्याख्ये हिन्द्यनुवादे [पृ.९३]) **शङ्करबालकृष्ण-दीक्षित**महाशयः (१९१०-१९५५वै.) 'अद्य यावद् द्वयोरेव ऋग्वेदवेदाङ्गज्योतिष-यजुर्वेदवेदाङ्गज्योतिषग्रन्थयोः ४९ श्लोकेषु २८ श्लोकानां व्याख्याऽन्यैः कृताः, किन्तु मया ३६ श्लोका इदानीं व्याख्याताः सन्ति' इति कथयति। तद्व्याख्याता वेदाङ्गज्योतिषश्लोका उक्तग्रन्थे द्रष्टव्याः।

उक्तप्रकारेण वेदाङ्गज्योतिषग्रन्थयोः सङ्कलितेषु कठिनेषु १३ श्लोकेषु अव्याख्यातेषु सत्सु मेरठनिवासी अभियन्ता **लाला-छोटेलालो 'बार्हस्पत्यः'** १९६२तमे वैक्रमाब्दे १९६३तमे वैक्रमाब्दे च (१९०६तमे क्रैस्ताब्दे) इण्डियन्-रिव्यु-नामके मासिकपत्रे चैत्रमासात् प्रभृति कार्त्तिकमासं यावत् क्रमेण प्रकाशितेषु आङ्ल-भाषामयेषु लेखेषु वेदाङ्गज्योतिषस्य सर्वान् श्लोकान् व्याचख्यौ किल।

ततश् छोटेलालव्याख्यासमीक्षां कुर्वाणः **सुधाकरो द्विवेदी** (१९०७-१९६९ वै.) १९६३तमे वैक्रमाब्दे सुधाकरभाष्यसहितं याजुषज्योतिषम् आर्चज्योतिषं च प्रकाश-यामास किल।

ततः सुधाकरसमीक्षां विलोक्य **छोटेलाल-बार्हस्पत्य**महोदयः स्वव्याख्यां परिष्कृत्य स्वतन्त्रपुस्तकतया १९६३तमे वैक्रमेऽब्दे तां प्रकाशयामास किल।

ततः **सुधाकरो द्विवेदः** पुनश् छोटेलाल-बार्हस्पत्यव्याख्यामालोचयन् याजुष-वेदाङ्गज्योतिषम् आर्चवेदाङ्गज्योतिषं च व्याख्याय स्वग्रन्थं १९६४तमे वैक्रमेऽब्दे प्रकाशयामास किल।

सुधाकरद्विवेदिशिष्यो मैथिलो **मुरलीधरझाः** १९६४तमे वैक्रमेऽब्दे मुद्रितस्य **'याजुषज्यौतिषं सोमाकरसुधाकरभाष्यसहितम्, आर्चज्यौतिषं च सुधाकरभाष्येण**

तल्लघुविवरणेन च सहितम्' इत्युक्ते ग्रन्थे आङ्लभाषामये परिशिष्टे तु 'यजुर्वेद-ज्योतिषस्य १-१२,१४,१७,१८, २४, २८, ३०-३६, ३८, ४२, ४३ श्लोकाः सोमाकरेण प्रायः साधुतया व्याख्याताः, १३, २३, २५ श्लोकाः शङ्करबालकृष्णदीक्षितेन प्रायः साधुतया व्याख्याताः, १८, ३९, ४० श्लोकाः थिबोनामकेन जनेन प्रायः साधुतया व्याख्याताः, बार्हस्पत्येन तु केवलं थिबोप्रकाशितस्य नियमस्योपपत्तिरेव विशेषतः स्वोपज्ञतया प्रकाशिता, ११, १२, १४, १७ श्लोकेषु बार्हस्पत्यादिभिः स्वस्वरीत्या व्याख्यातेष्वपि तत्र गणितापेक्षाभावात् तेषां श्लोकानां व्याख्याः सोमाकरोक्ता एव ग्राह्याः, गणितोपपत्त्यपेक्षायुक्तानां सर्वेषां श्लोकानां गणितोपपत्तयस् तु सुधाकर-द्विवेदमहाभागेनैव प्रदर्शिताः' इति वदति। मुरलीधरस्योक्तिः **"पितुर् गुरोर् नरेन्द्रस्य सुतशिष्यपदातयः। अविविच्यैव काव्यानि स्तुवन्ति च पठन्ति च"** इति राज-शेखरोक्तिं स्मारयति।

ततो **बालगङ्गाधरतिलकमहाशयो** (१९१३-१९७८ वै.) लालाछोटेलाल-बार्हस्पत्यस्य सुधाकरद्विवेदस्य च व्याख्यानयोर् विशिष्टेन वैमत्येन युक्तानां कठि-नानां वेदाङ्गज्योतिषस्य एकादशानां श्लोकानां बार्हस्पत्य-द्विवेदयोर् व्याख्यानयोर् विवेचनं कृत्वा तान् श्लोकान् स्वाभिमतरूपेण १९७१तमे वैक्रमाब्दे (१९१४तमे क्रैस्ताब्दे) व्याचख्यौ किल।

ततः परं १९९२तमे वैक्रमेऽब्दे (१९३५तमे क्रैस्ताब्दे) **शामशास्त्रिमहाशयो** वेदाङ्गज्योतिषग्रन्थं विशेषतः सूर्यप्रज्ञप्ति-कालालोकप्रकाश-ज्योतिष्करण्ड-मलय-गिर्याचार्यव्याख्यारूपजैनग्रन्थानां साहाय्येन व्याचख्यौ। तदीयां भणितिं वयमत्रो-पस्थापयामः—

चिरादित्थं सुप्रसिद्धं वेदाङ्गज्यौतिषं द्वयम्।
ब्रह्मसिद्धान्तादिभिश् च निरस्तं पठनाद् बहिः॥
अशुद्धपाठसङ्कीर्णं विद्वद्भिस् समुपेक्षितम्।
दुर्गमावगमं जातमैन्द्रजालिकमन्त्रवत्॥
जिज्ञासया चरित्रस्य थीबोनाम्ना विपश्चिता।
श्लोका हि विवृता हित्वा चैकादशतदुत्तरौ॥
चतुर्दशं पञ्चदशं षोडशं षोडशोत्तरम्।
एकोनविंशं विंशं च द्वाविंशं सत्रिविंशकम्॥
आ पञ्चविंशादेकोनत्रिंशान्तं नाऽष्टविंशकम्।
तथैकचत्वारिंशं च ततोऽन्ये विशदीकृताः॥
शङ्करबालकृष्णेन दीक्षितेन ततः कृतः।
यत्नस् तेषां विवरणे बार्हस्पत्येन धीमता॥

सुधाकरद्विवेदाख्यविदुषा च यशस्विना।
बालगङ्गाधराख्येण तिलकेन विपश्चिता॥
ग्रन्थकाराशयादेतैरन्योऽर्थः कल्पितो मुधा।
विनाऽप्यन्योन्यसम्बन्धं श्लोकानां प्रक्रमोचितम्॥
द्वारीकृत्य विपश्चितां तमखिलं यत्नं तथा ज्योतिषीं
प्राचीनार्यसुसम्प्रदायतटिनीवीचीकणैः प्रोक्षिताम्।
सूर्यज्ञप्तिसुभाषितैस् सुमचयैरम्लानमालां कृतां
धृत्वा मूर्ध्नि कृतो मयाऽस्य विवृतौ यत्नस् सतां सम्मुदे॥
यदि व्याख्या सैषा भवति विदुषां तृप्तिजननी
तदाऽऽर्षज्ञानान् मे भवतु पुनरुज्जीवितगुणात्।
परं श्रेयो वैषा यदि च न तथा स्यात् समुचिता
परेषां सामग्री प्रभवतु तदा सुष्ठु विवृतौ॥ इति।

शामशास्त्रिव्याख्यानानन्तरमन्येन केनाऽपि विदुषा वेदाङ्गज्योतिषस्य सम्पूर्णस्य स्वोपज्ञं सम्यग् व्याख्यानं कर्तुं प्रयासः कृतोऽस्माभिर् न दृष्टः। **डा. सत्यप्रकाश डी.एस्सी.** इत्याख्येन विदुषा रचिते 'फाउण्डर्ज् अव् साइन्सेज् इन् इण्डिया' इत्याख्ये ग्रन्थे समाविष्टं वेदाङ्गज्योतिषव्याख्यानमपि शामशास्त्रिव्याख्यानानुसरणमात्ररूपमवगम्यते। नेपालदेशे लिच्छविकालेतिहासाध्ययने उपयोगं कर्तुं केनचित् कृतो वेदाङ्गज्योतिषग्रन्थस्याऽर्थस्याऽधिगमने प्रयासोऽपि मुख्यं प्रयोजनमवज्ञाय गौणं प्रयोजनमादायाऽसमीचीनां पद्धतिमनुसृत्य च कृत इति सम्पूर्णवेदाङ्गज्योतिषग्रन्थव्याख्यानदृष्ट्या तु निष्फलप्रायो हताशतायां विश्रान्तो दृश्यते।

इदानीं भारतवर्षे बहुषु संस्कृतविश्वविद्यालयेषु वर्तमानेषु, तत्र वेद-धर्मशास्त्र-ज्योतिषविभागेषु च सत्सु, तत्राऽनेकेषु वेदाचार्येषु धर्मशास्त्राचार्येषु ज्योतिषाचार्येषु चाऽध्यापकेषु सौविध्यपूर्णां जीविकां लब्ध्वा विराजमानेष्वपि तत्र भवद्भिर् लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थार्थस्य ज्ञानाय तस्य प्रचाराय च विशिष्टः प्रयासः कृतः क्रियमाणो वाऽप्यस्माभिर् न दृष्टो न च श्रुतः।

४४. अस्माकं व्याख्यानस्य वैशिष्ट्यम्

वेद-वेदाङ्ग-वेदोपाङ्ग-स्मृति-पुराण-धर्मशास्त्रनिबन्धग्रन्थानां यथाशक्ति सम्यगध्ययनं कृत्वाऽस्माभिरेतद् व्याख्यानं प्रस्तुतमस्ति। अस्माभिर् लगधमुनिप्रोक्त-वेदाङ्गज्योतिषग्रन्थतात्पर्यार्थमादाय तत्र प्रतिपादितानां सिद्धान्तानां यथेदानीमपि श्रौत-स्मार्त-धर्मकृत्याऽपेक्षित-युग-वर्षा-ऽयनर्तु-मास-पक्ष-तिथि-निरूपणे प्रयोगः कर्तुं शक्यते तथा व्याख्यानं कृतमस्ति। एतादृशं व्याख्यानं शङ्करबालकृष्णदीक्षित-

सुधाकरद्विवेदि-बालगङ्गाधरतिलक-शामशास्त्र्यादिषु केनाऽपि पूर्वमकृतं ज्ञेयम्। इदानीमपि सूर्यस्योदगयनारम्भस्य तिथौ नक्षत्रे च सम्यङ् निरीक्षणेन निर्धारिते लगधमुनिप्रोक्तकालगणनापद्धत्यनुसारं युग-वर्षा-ऽयनर्तु-मास-पक्ष-तिथि-पर्व-नक्षत्रादीनां गणना श्रौतस्मार्तधर्मकृत्येषूपयोगाय कर्तुं शक्येति अस्माभिरत्र प्रतिपादितं ज्ञेयम्। आधुनिक-खगोलवित्-कृतान् वास्तविकस्य सूर्योदगयनस्य कालान्, सूर्यचन्द्रयुतिकालाँश् चाऽऽदायाऽपि लगधमुनिप्रोक्तज्योतिषग्रन्थतात्पर्यार्थभूतस्य कालगणनासिद्धान्तस्य श्रौतस्मार्तधर्मकृत्येषूपयोगाय प्रयोगः कर्तुं शक्य इति चाऽस्माभिरस्मिन् व्याख्याने प्रतिपादितमस्ति। तदर्थं लगधमुनिप्रणीतग्रन्थतात्पर्यं चाऽस्माभिरत्र स्पष्टीकृतं श्रुतिस्मृतिपुराणवचनैर् दृढतया समर्थितं चाऽस्ति। लगधमुनिप्रोक्तो ग्रन्थ आदियुगस्यैव वर्षाऽयनर्तुमासपक्षतिथिपर्वनक्षत्राणां गणितं मुख्यतया प्रतिपादयति, अन्येषां युगानां गणितं तु उदगयनारम्भतिथिनक्षत्राणां सम्यङ् निरीक्षणं कृत्वा कार्यमिति च प्रतिपादयतीति चास्माभिः स्पष्टतया प्रतिपादितमस्ति। एतत् तत्त्वमबुद्ध्वाऽन्यैः कृतस्य लगधमुनिग्रन्थे दोषारोपणस्य निराकरणं चाऽस्माभिः कृतमस्ति। सोमाकरेणाऽपि लगधमुनिप्रोक्तकालगणनापद्धतेः सर्वेषु कालेषु सामान्यतया प्रयोक्तुं शक्यता सम्यक् स्पष्टीकृता नास्ति। सर्वेषां श्लोकानामर्थाश् च सोमाकरेण स्पष्टतया प्रतिपादिता न सन्ति। अस्माकं व्याख्याने तु लगधमुनिप्रोक्तकालगणनापद्धतेः समुचिते परिष्कारे कृते तस्याः सामान्यतया सर्वेषु कालेषु प्रयोक्तुं शक्यता सम्यक् प्रतिपादिता अस्ति। वेदाङ्गज्योतिषस्य प्रायः सर्वेषां श्लोकानामर्था अपि अस्माभिः स्पष्टतया प्रतिपादिताः सन्ति। एवं च लगधमुनिप्रोक्तस्य वेदाङ्गज्योतिषग्रन्थस्य संस्कृतभाषायां समुचितं श्रुतिस्मृतिपुराणादिवचनपरिपुष्टं सोदाहरणं सम्पूर्णं स्पष्टं चैतद् व्याख्यानमैदम्प्राथम्येनाऽस्माभिः प्रस्तुतमवगन्तव्यम्। अन्यानि उच्चावचानि वैशिष्ट्यानि व्याख्याने एव सुधीभिर् द्रष्टव्यानि। तथापि कानि चन प्रमुखाणि वैशिष्ट्यानि सूत्ररूपेणाऽध उपस्थाप्यन्ते—

(१) श्रौतस्मार्त-धर्मकृत्यकाल-निरूपणार्थं लगधमुनिप्रोक्त-वेदाङ्गज्योतिष-सिद्धान्तस्य समुचितं परिष्कारं कृत्वाऽधुनाऽप्यनुसरणीयत्वस्य प्रदर्शनम्।

(२) लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थतात्पर्यस्य श्रुति-स्मृति-पुराणवचनैः स्पष्टीकरणं समर्थनं च।

(३) लगधमुनिप्रोक्त-वेदाङ्गज्योतिषग्रन्थसारांशस्य सर्वेषु कालेषु प्रयोज्यतायाः प्रदर्शनम्।

(४) प्रायः सर्वेषां पद्यानां स्पष्टतयाऽर्थस्य प्रतिपादनम्।

(५) श्रौत-स्मार्त-धर्मकृत्यार्थकायनर्तुमासादि-निरूपणाऽऽधारभूतस्य प्रकृति-सम्मतस्य वैदिकानां वर्षस्य शिशिरर्तावारम्भस्य समर्थकस्य सोमाकरभाष्यस्य दृढतया समर्थनम्।

(६) चान्द्राणां प्रभवादीनां षष्टेः संवत्सराणामेव वैदिक-संवत्सरपरिवत्सरादिभिः सह समन्वयस्य प्रतिपादनम्, वराहमिहिरादिभिः प्रतिपादितस्य बार्हस्पत्यानां षष्टेः संवत्सराणां वैदिकसंवत्सर-परिवत्सरादिभिः सह संयोजनस्य खण्डनं च।

(७) कलिवर्षसङ्ख्यामादाय संवत्सरपरिवत्सरादीनां चान्द्राणां प्रभवादीनां च ज्ञानस्योपायस्योहापोहपूर्वकं स्पष्टीकरणम्।

(८) आदियुगशब्दस्य बार्हस्पत्य-सुधारकाद्युक्तमर्थं निराकृत्य सोमाकरोक्तस्याऽर्थस्य समर्थनम्।

(९) वैदिक-नववर्षारम्भदिनस्य स्पष्टीकरणम्, माघफाल्गुनादीनां तपस्-तपस्याऽभिन्नत्वस्य, ऋतुबद्धत्वस्य, नक्षत्रबद्धत्वस्याऽभावस्य च प्रतिपादनम्।

(१०) सप्तमे श्लोके उदगयनस्य मुख्यताया उदगयनारम्भनक्षत्रस्योपलक्षणतायाश् च प्रतिपादनेन लगधप्रोक्तवेदाङ्गज्योतिषग्रन्थस्य वैदिककालगणनोपायप्रदर्शकतया सदोपयोज्यत्वस्य प्रतिपादनम्।

(११) एकादशे श्लोके उत्तरार्धस्य पूर्वव्याख्यातृभिरव्याख्यातस्य परम्परागतं पाठमेवादाय सम्यग् व्याख्यानम्।

(१२) पूर्वव्याख्यातृभिरन्यथा व्याख्यातस्य द्वादशस्य श्लोकस्य श्रुतिस्मृतिपुराणधर्मशास्त्रसम्मतस्याऽर्थस्य प्रतिपादनम्।

(१३) आदियुगस्य सावनदिनानाम् १२४ पर्वान्तानां विस्तृताया व्याख्यासहितायाः सारण्या उपस्थापनम्।

(१४) नेपालदेशे सुरक्षितानां शिलालेखानां ग्रन्थानामन्येषां च लेख्यानां चाऽपि साहाय्येन वेदाङ्गज्योतिषोक्ताया अधिमासव्यवस्थाया युक्तियुक्ताया व्यावहारिक्याश् च व्याख्याया उपस्थापनेनाऽन्यैरप्रकाशितस्य वस्तुगतस्य तथ्यस्य प्रकाशनम्, वेदाङ्गज्योतिषोक्ताधिमासपद्धतेः सर्वेषु कालेषूपयोज्यतायाः साधनं च।

(१५) श्रौतस्मार्तधर्मकृत्याधिकारिणां द्विजातीनां नाक्षत्रनामकरणे लगधप्रोक्तव्यवस्थाया एवाऽनुसरणीयतायाः प्रतिपादनम्।

(१६) हस्तलेखानां युक्तीनां च साहाय्येन मूलग्रन्थस्य कतिपयानां शुद्धतरपाठानां च समावेशनम् (द्रष्टव्याः श्लोकाः ११,१३,१४,१६,२६,२७,३१,३७,३८,४२)।

(१७) लगधस्योल्लेखेन युतस्य त्रिचत्वारिंशस्य श्लोकस्य हस्तलिखितपुस्तकपाठसाहाय्येन च यजुर्वेदिनां वेदाङ्गज्योतिषग्रन्थे पठितत्वस्य साधनम्।

(१८) यजुर्वेदिनां वेदाङ्गज्योतिषग्रन्थस्य हस्तलेखयोश् छायाप्रतिलिप्योरपि समावेशनम्।

(१९) आदियुगस्य पञ्चानामेव वर्षाणां संवत्सरपञ्जीनां तिथिपञ्जीनां वाऽप्युपस्थापनम्।

(२०) यजुर्वेदिनां वेदाङ्गज्योतिषग्रन्थस्य शब्दानामकाराद्यनुक्रमणिकायाश् च समावेशनम्।

(२१) विस्तृतायाः वेदाङ्गज्योतिषसम्बद्धविषयाणां प्रतिपादिकायाः संस्कृतभूमिकाया योजनम्।

(२२) लगधमुनिप्रोक्तवेदाङ्गज्योतिषप्रतिकूलांशे आर्यभटीय-ब्राह्मस्फुटसिद्धान्त-सूर्यसिद्धान्तादीनां श्रौतस्मार्तधर्मकृत्यकालनिर्णयेऽप्रमाणत्वस्य स्पष्टीकरणम्। इति।

४५. श्रौतस्मार्तधर्मकृत्यायावलम्बनीया वैदिककालगणनाव्यवस्था

अत्र लगधमुनिप्रोक्तवेदाङ्गज्योतिषव्याख्यानावसरे लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थानुसारं श्रौत-स्मार्त-धर्मकृत्यायाऽवलम्बनीयाया वैदिककालगणनाव्यवस्थायाः सारांशश् च सङ्क्षेपेणोपस्थाप्यते।

वेद-मन्त्रसंहिता-ब्राह्मण-श्रौतसूत्र-गृह्यसूत्रेषु समुल्लिखितानाम्, श्रौतयज्ञविशेषस्वरूपज्ञानायाऽऽवश्यकानाम् (द्र.- लौगाक्षिस्मृतौ, स्मृतिसन्दर्भे षष्ठे भागे, पृ.३७७), मार्कण्डेयस्मृतौ (स्मृतिसन्दर्भे षष्ठे भागे, पृ.१३४) विष्णुधर्मोत्तरपुराणे (३।१२०।२, ३।१५३।१-९, ३।३१७।२,३), हेमाद्रेर् दानखण्डे (पृ.८९०), कालमाधवे संवत्सरनिर्णयप्रकरणे (पृ.३५) च निर्दिष्टस्य तंस्मिंस्तस्मिन् वत्सरविशेषे कार्यस्य कृत्यविशेषस्य कृते परमावश्यकानां च संवत्सर-परिवत्सरादीनां पञ्चानां वैदिकानां वत्सराणाम्, पञ्चवर्षात्मकस्य वैदिकस्य युगस्य च प्रतिपादनेन रहिताः मगब्राह्मणत्वाद् मुख्यवैदिकपरम्पराबाह्यत्वेन सम्भावितानाम् आर्यभट-वराहमिहिर-ब्रह्मगुप्त-नव्यसूर्यसिद्धान्तकारादीनाम् आर्यभटीय–बृहत्संहिता–ब्राह्मस्फुटसिद्धान्त–नव्यसूर्यसिद्धान्तादयो ज्योतिषग्रन्थाः, तदनुयायिनां लल्ल-श्रीपति-भास्कर-कमलाकरादीनां ज्योतिषग्रन्थाश्च वैदिकैर् द्विजवरैर् नित्यपञ्चमहायज्ञान्तर्गते ब्रह्मयज्ञेऽपि पठ्यमानेन **"पञ्चसंवत्सरमयम्"** इत्यादिकेन लगधमुनिप्रोक्तमूलवेदाङ्गज्योतिषग्रन्थेन विरुद्धत्वाद् अर्वाक्कालिकत्वाच् चाऽनादिपरम्परासिद्ध-श्रौत-स्मार्त-धर्मकृत्यकालानां वत्सराऽयनर्तुमासाऽधिमासपक्षतिथीनां निर्णये प्रमाणत्वं नैव भजन्ते इति **"या वेदबाह्याः स्मृतयः"** (१२।९५,९६) इत्यादिना प्रतिपादिताद् मनुस्मृतिसिद्धान्तादवगम्यते। आर्यभटीयादिग्रन्थाः श्रौतधर्मकृत्यानपेक्षित-मेषादिराशि-भौमादिग्रहचार-सूर्यचन्द्रग्रहणादिविचारे तु मूलवेदाङ्गज्योतिषग्रन्थाऽविरोधेन उपयोक्तव्या अपि स्युः। तस्मात् श्रौत-स्मार्त-धर्मकृत्यार्थं कालव्यवस्थाऽधोवर्णितरूपा स्वीकार्या—

(१) सर्वप्रथमं वैदिक-नववत्सरारम्भदिनं निर्णेयम्। तच्च शङ्कुच्छायादि-वेद्यस्य दृक्सिद्धस्य सौरस्योत्तरायणस्याऽऽरम्भस्य दिनात् (सायनमकरसङ्क्रान्ति-दिनात्) प्रायेण पूर्वम्, अधिमासयुते वर्षे तु कदाचित् परमपि आसन्नं शुक्लप्रतिपद्-दिनं ज्ञेयम्। एतच्च लगधमुनेः याजुषवेदाङ्गज्योतिषस्य **"माघशुक्लप्रपन्नस्य पौष-कृष्णसमापिनः"** (श्लो.५), **"उपजायेते मध्ये चाऽन्तेऽधिमासकौ"** (श्लो.३७) इत्यादिभ्यो वचनेभ्य एवार्थात् सिद्धतया ज्ञातं भवति। एतदेव **"माघमासे धनिष्ठाभिरुत्तरेणैति भानुमान्। अर्धाश्लेषस्य श्रावणस्य दक्षिणेनोपनिवर्तते"** (२६।२९) इति बौधायनश्रौत-सूत्रवचनस्याऽप्यनुकूलं वर्तते।

(२) उक्तविधायां शुक्लप्रतिपदि प्रवृत्तो वैदिकवत्सरः संवत्सर-परिवत्सरा-दिषु **पञ्चसु** वत्सरेषु कतमो वत्सर इति च विष्णुधर्मोत्तरपुराणस्य **"पञ्चभक्ते तु यच्छेषम्"** (१।८२।५३) इत्यादिकस्य वचनस्य, वराहमिहिरकृत-पञ्चसिद्धान्तिकायाः **"द्व्यूनं शकेन्द्रकालम्"** इत्यादिकस्य वचनस्य च समन्वयेन वैदिकाधिमासव्यवस्था-संवादेन च निर्णेयम्। तदनुसारं चेदानीं वर्तमानः एतस्य (२००१ क्रैस्तवर्षस्य) दिसम्बरमासस्य पञ्चदशे दिवसे स्थितायाः शुक्लप्रतिपदः प्रभृति प्रवृत्तो वैदिको वत्सरः वैदिकपञ्चाब्दकयुगद्वादशकचक्रस्य षष्ठस्य आहिर्बुध्न्यस्य युगस्य द्वितीयः परिवत्सराख्यो वत्सरोऽस्तीति ज्ञेयम्। एतस्या एव प्रतिपदः कलियुगाब्दानाम् ५०६७ तमोऽब्दश्च प्रवृत्त इति च बोध्यम्।

(३) उक्तप्रकारेण निर्णीतो वैदिको वत्सरो मुख्यतया चान्द्रोऽस्तीति वेदे (मा.वा.शु.य.वे.म.सं.७।३०, २२।३१, तै.कृ.य.वे.सं.१।४।१४।१, ६।५।३।४) त्रयोदशानां मासानामुल्लेखाद् ज्ञायते। कालमाधवे संवत्सरनिर्णयप्रकरणे **"अथ चान्द्रस्या-ऽवान्तरभेदा उच्यन्ते"** इत्युक्त्वा संवत्सर-परिवत्सरादीनां पञ्चानां वैदिकवत्सराणा-मुल्लिखितत्वात्, कालमाधवे (उपोद्घाते, श्लो.१३) कोषकल्पतरौ च (पृ.५१) **"चान्द्राणां प्रभवादीनाम्"** इत्यादिकस्य वचनस्य दर्शनाच्च तद् बोद्धुं शक्यते। एतेषां वैदिकानां पञ्चानां वर्षाणां द्वादशभिश् चक्रैर् वैष्णवयुगादिनामकैश् चान्द्राः प्रभवादयः षष्टिः संवत्सरा भवन्तीति च हेमाद्रिकृतश्राद्धकल्पविवरणात् (पृ.११५२-११५३) स्फुटतयाऽवगम्यते। प्रभवादयश्चान्द्राः षष्टिः संवत्सरा निर्णयसिन्धौ धर्मसिन्धौ च प्रतिपादिता एव सन्ति। एतर्हि पञ्चाङ्गपत्रकेषु लिख्यमाना वत्सरास्तु बार्हस्पत्याः सन्ति, न चान्द्राः। चान्द्र-बार्हस्पत्य-वत्सराणां समाननामकत्वेऽपि गणिते प्रारम्भे च स्पष्टो भेदोऽस्ति। संवत्सर-परिवत्सरादीनि वैदिकवत्सरनामानि चान्द्रप्रभवादिषु समन्वितानि भवन्ति, न बार्हस्पत्यप्रभवादिष्विति सम्यग् बोद्धव्यम्, वराहमिहिरादि-प्रचारिते भ्रमे नैव पतितव्यम्। एतर्हि वस्तुतो मन्मथनामको बार्हस्पत्यो वत्सरोऽस्ति; चान्द्रो वत्सरस्तु उक्तायाः शुक्लप्रतिपदः प्रभृति विजयनामकः प्रवृत्तोऽस्ति। श्रौत-

स्मार्तकर्मादौ सङ्कल्पे चान्द्रा एव वत्सराः स्मर्तव्या न तु बार्हस्पत्या इति च निर्णयसिन्धौ अब्दनिर्णयप्रकरणे स्थितात् **"स्मरेत् सर्वत्र कर्मादौ चान्द्रं संवत्सरं सदा। नाऽन्यं यस्माद् वत्सरादौ प्रवृत्तिस् तस्य कीर्तिता।"** इत्यार्ष्टिषेणवचनात्, धर्मसिन्धोः प्रारम्भे स्थितात् **"कर्मादौ सङ्कल्पे चान्द्रवत्सर एव स्मर्तव्यो नाऽन्यः"** इति निर्विकल्पात् निर्णयाच्च ज्ञायते। मूलवैदिकपरम्परानुकूलोऽयमेव पक्षो वैदिकैः सदा सर्वत्र चाऽऽश्रयणीयो न तु **"जैवो वा नर्मदोत्तरे"** इत्युक्तः क्वाचित्क आनुकल्पिकः पक्षः, **"प्रथमत्यागे मानाभावात्"** इति न्यायात्। तस्माद् धर्मकृत्यार्थपञ्चाङ्गपत्रकेषु प्रथमकल्पतया चान्द्राणामेव संवत्सराणामुल्लेखस्य व्यवस्था वैदिकैर् विद्वद्भिः कार्या।

(४) अर्वाचीनाऽवैदिकज्योतिषग्रन्थप्रभावाभिभूततया यद्यपि कालमाधवकारेण अयननिरूपणप्रकरणे **"के चित् तु चान्द्रमानेनाऽयनद्वयमभ्युपगच्छन्ति"** इति चान्द्रमयनमुपेक्षणीयतयोक्तम्, तथापि पुराणादिषु च **"त्रिभिर् ऋतुभिरयनम्"** इति चान्द्रैस् त्रिभिर् ऋतुभिरयनस्य निष्पत्तेः प्रतिपादितत्वाद् वैदिकानामृतूनां च चान्द्रत्वात्, सुश्रुतसंहितायामपि **"चन्द्रादित्ययोः कालविभागकरत्वाद् अयने द्वे भवतः"** (१।६।७) इति चन्द्रस्याऽपि अयनविभागहेतुत्वेनोल्लिखितत्वाच् च श्रौतस्मार्तधर्मकृत्येषु अयनमपि सूर्यायनसापेक्षमपि चान्द्रर्तुत्रयात्मकं चान्द्रमेव ग्राह्यमित्यवगम्यते। तत्र चान्द्रमुदगयनमपि उक्तविधशुक्लप्रतिपदात एव प्रवर्तते। अत एव वैदिकेषु धर्मकृत्यार्थकपञ्चाङ्गपत्रकेषु मुख्यतया तादृशमेव चान्द्रमयनं लेख्यम्।

(५) वेदोक्ता ऋतवश्चान्द्रा एवेति वेदोक्तमधुमाधवादिमासानां चान्द्रत्वाद्, **"मधुश्च माधवश्च बासंन्तिकावृतू"** इत्यादिकाद् वेदवचनाच् चैव स्पष्टं भवति। एवं च चान्द्रः शिशिर ऋतुरपि उक्तविधशुक्लप्रतिपदात एव प्रवर्तते। ततो यथायथं क्रमेण वसन्तादयः प्रवर्तन्ते। एवं च सति **"श्रौतस्मार्तक्रियाः सर्वाः कुर्याच् चान्द्रमसर्तुषु। तदभावे तु सौरर्तुष्विति ज्योतिर्विदां मतम्"** इति निर्णयसिन्ध्वादिधृतवचनाच्च अपरिहार्यं बलवन् निमित्तं विना प्रथमकल्पं त्यक्त्वाऽनुकल्पं प्रत्यनुधावने **"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते"** (मनुस्मृतौ ११।३०) इत्यादिकाद् मन्वादिवचनाद् ज्ञायमानाद् धर्मकृत्यफललोपस्य प्रसङ्गात् श्रौतस्मार्तक्रियासु प्रथमकल्पतया चान्द्र एव ऋतुर् ग्राह्यः, न तु वेदाङ्गज्योतिषनिन्दकब्रह्मगुप्तानुसरणपरभास्करादीनां **"वर्षायनर्तुयुगपूर्वकमत्र सौरात्"** इत्यादिकैर् वचनैर् वञ्चितैर् वैदिकैः सौर ऋतुः स्वीकर्तव्यः। तस्मात् श्रौतस्मार्त-धर्मकृत्यार्थकपञ्चाङ्गपत्रकेषु मुख्यतया चान्द्र एव ऋतुर् लेख्यः।

(६) नवीनसूर्यसिद्धान्तस्य **"भानोर् मकरसङ्क्रान्तेः"** इत्यादिना (मानाध्याये श्लो.९-१०) वचनेन प्रतिपादिता मेषमासादयः शुद्धाः सौरा मासास्तु मुख्ये वैदिकवाङ्मये मेषादिराशीनामुल्लेखस्यैवाऽभावात् सर्वथा अवैदिका ज्ञेयाः। वेदोक्ता

मधुमाधवादयो मासास्तु चान्द्रा एवेति वेदे मधुमाधवादिभिः सहैव अंहसस्पतेः संसर्पस्य वाऽपि त्रयोदशस्य मासस्योल्लेखात् (मा.वा.शु.य.वे.म.सं.७।३०,२२।३१, तै.कृ.य.वे.सं.१।४।१४।१) स्फुटतया बुध्यते। लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थस्य **"माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः"** इति वचनाच् च वैदिकाश्चान्द्रा मासाः अमान्ताः (शुक्लादयः कृष्णान्ताः) सन्तीति स्पष्टतया ज्ञायते। चैत्रशुक्लप्रतिपदि वत्सरारम्भस्य प्रसिद्धिः अधिमासस्य शुक्लादित्वस्य स्थितिश्च वैदिकचान्द्रमासानां शुक्लादिकृष्णान्तत्वं सूचयत एव। एवं च चान्द्रस् तपोमासः (माघः) उक्तविध-शुक्लप्रतिपदात एव प्रवर्तते। ततो यथायथं तपस्यादयः (फाल्गुनादयः) मासाः क्रमेण प्रवर्तन्ते। तस्माद् धर्मकृत्यार्थकपञ्चाङ्गपत्रकेषु सार्वत्रिकास् त्रैविद्यसम्मता अमान्ताश् चान्द्रास् तपोमासादयो (माघमासादयो) मासा एव प्राधान्येन लेख्याः, न तु क्वाचित्काः पूर्णान्ताश्चैत्रादयो मासाः। तत्र पूर्णान्ता मासास्तु गौणत्वेनैवोल्लेखितुमुचिता भवन्ति।

(७) अयनविषुवविज्ञेयशीतोष्णवर्षहेतु-वास्तविकसौरर्तुभिः सह चान्द्राणामृतूनां दूरविप्रकर्षं परिहृत्य सामञ्जस्यस्य स्थापने च मूलवेदाङ्गज्योतिषोक्तायाः कौटलीयार्थशास्त्रानुसृताया हिमवत्खण्डेतिहासप्रसिद्धायाश् चाऽयनान्ताधिमास-व्यवस्थाया एव समर्थतरत्वाच् च वेदाङ्गज्योतिषानुसारी अयनान्तमात्रवर्ती अधि-मास एव श्रौतस्मार्तकृत्यार्थकपञ्चाङ्गपत्रकेषु प्रधानतयाऽवलम्बनीयः। अन्योऽधि-मासस्तु तत्र गौणतयैव सूचयितुमुचितः स्यात्।

(८) ब्रह्मगुप्तादिप्रचारितः स्फुटतिथिपक्षोऽवैदिकोऽस्तीति सम्यग् बुद्ध्वा वेदाङ्गयाजुषज्योतिषाऽऽथर्वणज्योतिषाऽनुसारिणो वेदोल्लिखिताऽनुमति-राका-सिनी-वाली-कुहू-व्यवस्थानुकूलाश्चाखण्डतिथयः श्रौतस्मार्तधर्मार्थपञ्चाङ्गपत्रकेषु मुख्यतया लेख्याः। तत्र पूर्णमासेष्टिदिनं दर्शेष्टिदिनं च तिथि-मास-व्यवस्थास्पष्टत्वार्थमप्यवश्यं लेख्यम्।

(९) यवन-शक-हूण-कुषाणादीनामनुकूलैर् मगब्राह्मणैः तदनुसारिभिरन्यैश्च कृतानां ज्योतिषग्रन्थानां प्रभावेणाऽभिभवाल् लगधमुनिप्रोक्तवेदाङ्गज्योतिषोक्त-मुख्यवैदिककालगणनाव्यवस्थामुपेक्ष्य वेदवेदाङ्गवाङ्मयमनादृत्य धर्मकामैर् द्विज-वरैर् नास्तिकत्वं नैवाऽनुमोदनीयम्।

५०६७तमस्य कलियुगाब्दस्य तपःशुक्लप्रतिपदि (२०५८।८।३० वै.=२००१-१२-१५ क्रै. इत्यङ्कनीये दिने) प्रकाशिता विद्वज्जनेषु प्रचारिता चेयं व्यवस्थाऽत्र समावेशिता बोध्या।)

४६. उपसंहारः

उक्तविधायां वस्तुस्थितौ सत्यां च वेदानां वेदाङ्गानां च प्रामाण्यं रक्षितु-कामैः शिष्टैर् द्विजोत्तमैरस्माकं व्याख्याने सम्यग् विचारः कर्तव्यः। वेदाङ्गानां

प्रामाण्यस्य रक्षणं विना वेदानां प्रामाण्यस्य रक्षणं दुश्शकमिति वैदिकशिरोमणिभूत आचार्यः कुमारिलभट्ट आह स्म। तथाहि—

परत्राऽविनयं कुर्वन् पितृभ्यां वार्यते सुतः।
तयोरेवाऽविनीतस्य को भवेद् विनिवारकः॥
तथा बहिरसम्बद्धं वदन् वेदेन वार्यते।
साऽङ्गेन तं पुनर् निघ्नन् केनाऽन्येन निवार्यते॥
क्रुद्धो यो नाम यं हन्ति स तस्याऽङ्गानि कृन्तति।
कृत्ताङ्गस्य ततस् तस्य विनाशः कियता भवेत्॥
तेन त्रयीं द्विषन् पूर्वं वेदाङ्गान्येव लुम्पति।
ततस् तेनैव मार्गेण मूलान्यन्यस्य कृन्तति॥ इति।

—तन्त्रवार्तिके (१।३।२७, आनन्दाश्रमसंस्करणे, १९७०, पृ. २२४)।

वेदाङ्गज्योतिषप्रामाण्यदृढीकरणाय च वैदिकैः सार्थस्य वेदाङ्गज्योतिष-ग्रन्थस्याऽध्ययनाऽध्यापनपरम्परा पुनरुज्जीवनीया। वेद-धर्मशास्त्र-ज्योतिषाध्ययना-ध्यापनप्रक्रियायां "पञ्चसंवत्सरमयम्" इत्यादिकस्य वेदाङ्गज्योतिषग्रन्थस्या-ऽध्ययनमध्यापनं च प्रचारणीयम्। पञ्चाङ्गपत्रककारैरपि वैदिकसंवत्सराद्यारम्भ-दिनम्, वैदिकोदगयन-दक्षिणायनारम्भदिने, वैदिकशिशिरर्त्वादिकर्त्वारम्भदिनानि, वैदिकतपस्तपस्यादिमासारम्भदिनानि, वैदिकपूर्णमासेष्टिदर्शेष्टिदिनानि, वैदिकाधि-मासप्रारम्भदिनं च स्वस्वपञ्चाङ्गपत्रकेषु वेदाङ्गज्योतिषानुसारं समावेशनीयानि।

अस्माकं वेदाङ्गज्योतिषव्याख्यानस्य च निर्मत्सरैः सद्भिर् वेद-वेदाङ्गो-पाङ्ग-कुशलैः शास्त्ररसिकैर् वैदिक-सनातन-वर्णाश्रम-धर्मानुयायिभिर् विद्वद्भिः सम्यक् परीक्ष्याऽऽकलनं कार्यम्, अत्राऽस्माकं विवेचने काऽपि त्रुटिर् दृश्यते तर्हि परया कृपयाऽस्मदीया मतिः शास्त्रयुक्तिप्रदर्शनेन परिशोधनीया चेति शम्।

"आगमप्रवणश् चाऽहं नाऽपवाद्यः स्खलन्नपि।
न हि सद्वर्त्मना गच्छन् स्खलितेष्वप्यपोद्यते॥"

व्याख्यानकारस्य पञ्चषष्टितमं जन्मदिनम्,
मधुशुक्लषष्ठी, ५०७० तमस्य कलियुगाब्दस्य,
(२०६१।११।३ वै.=२००५।२।१४ क्रै.),

Email : svadhyaya@hotmail.com

वेदवेदाङ्गोपाङ्गस्मृतिपुराणादिशास्त्रवशवृँवदः
शिवराज आचार्यः कौण्डिन्न्यायनः
स्वाद्ध्यायशाला,
१६८, शिवभक्तमार्गः (नीलसरस्स्वतीमार्गसंलग्नः),
लाजिम्पाट्, काष्ठमण्डपमहानगरम्-२, नेपालदेशः।
☎ ००९७७-१-४४३३३२७।

अथ

यजुर्वेदिनां परम्परयाऽऽगतं परिष्कृतं

वेदाङ्गज्योतिषम्

पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम्।
दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः ॥१॥

ज्योतिषामयनं पुण्यं प्रवक्ष्याम्यनुपूर्वशः।
सम्मतं ब्राह्मणेन्द्राणां यज्ञकालार्थसिद्धये ॥२॥

वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश् च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ॥३॥

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद् वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम् ॥४॥

माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः।
युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते ॥५॥

स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ।
स्यात् तदाऽऽदियुगं माघस् तपःशुक्लोऽयनं ह्युदक् ॥६॥

प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक्।
सार्पार्धे दक्षिणार्कस् तु माघश्रावणयोः सदा ॥७॥

घर्मवृद्धिरपां प्रस्थः क्षपाह्रास उदग्गतौ।
दक्षिणेतौ विपर्यासः षण्मुहूर्त्ययनेन तु ॥८॥

प्रथमं सप्तमं चाहुरयनाद्यं त्रयोदशम्।
चतुर्थं दशमं चैव द्विर् युग्मं बहुले त्वृतौ ॥९॥

वसुस् त्वष्टा भवोऽजश् च मित्रः सर्पोऽश्विनौ जलम्।
धाता कश् चाऽयनाद्याः स्युरर्धपञ्चमभस् त्वृतुः ॥१०॥

एकान्तरेऽह्नि मासे च पूर्वान् कृत्वाऽऽदिरुत्तरः।
अर्धयोः पञ्चपर्वाणावृतू पञ्चदशाऽष्टमौ ॥११॥

द्यु हेयं पर्व चेत् पादे पादस् त्रिंशत् तु सैकिका।
भागात्मनाऽपमृज्याऽंशान् निर्दिशेदधिको यदि ॥१२॥

निरेकं द्वादशाभ्यस्तं द्विगुणं चाऽऽप्तसंयुतम्।
षष्ट्याषष्ट्या युतं द्वाभ्यां पर्वणां राशिरुच्यते ॥१३॥

स्युः पादोर्ध्वं त्रिपद्यायास् त्रिर् द्व्येकेऽह्नः कृते स्थितिम्।
साम्येनेन्दोः स्तृणोऽन्ये तु पञ्चकाः पर्वसम्मिताः ॥१४॥

भाऽंशाः स्युरष्टकाः कार्याः पक्षद्वादशकोद्गताः।
एकादशगुणश् चोनः शुक्लेऽर्धं चैन्दवा यदि ॥१५॥

नवकैरुद्गतोऽंशः स्यादूनः सप्तगुणो भवेत्।
आवापस् त्वयुजेऽर्धं स्यात् पौलस्त्येऽस्तङ्गतेऽपरम् ॥१६॥

जावाद्यंशैः समं विद्यात् पूर्वार्धे पर्वसूत्तराः।
भादानं स्याच् चतुर्दश्यां द्विभागेभ्योऽधिको यदि ॥१७॥

१जौ २द्रा ३गः ४खे ५श्वे ६ही ७रो ८षाश्
९चिन् १०मू ११षक् १२ण्यः १३सू १४मा १५धा १६णः।
१७रे १८मृ(म्रे) १९घाः २०स्वा २१पो २२जः २३कृ २४ष्यो
२५ह २६ज्ये २७ष्ठा इत्यृक्षा लिङ्गैः ॥१८॥

कार्या भांशाष्टकस्थाने कला एकान्नविंशतिः।
ऊनस्थाने तु सप्ततिमुद्वपेद् युक्तिसम्भवे ॥१९॥

तिथिमेकादशाभ्यस्तां पर्वभांशसमन्विताम्।
विभज्य भसमूहेन तिथिनक्षत्रमादिशेत् ॥२०॥

याः पर्वभादानकलास् तासु सप्तगुणा तिथिः।
युक्ता ताश् च विजानीयात् तिथिभादानिकाः कलाः ॥२१॥

अतीतपर्वभागेभ्यः शोधयेद् द्विगुणां तिथिम्।
तेषु मण्डलभागेषु तिथिनिष्ठां गतो रविः ॥२२॥

विषुवन्तं द्विरभ्यस्तं रूपोनं षड्गुणीकृतम्।
पक्षा यदर्धं पक्षाणां तिथिः स विषुवान् स्मृतः ॥२३॥

पलानि पञ्चाशदपां धृतानि तदाढकं द्रोणमतः प्रमेयम्
त्रिभिर् विहीनं कुडवैस्तु कार्यं तन् नाडिकायास्तु भवेत् प्रमाणम् ॥२४॥

एकादशभिरभ्यस्य पर्वाणि नवभिस् तिथिम्।
युगलब्धं सपर्व स्याद् वर्तमानार्कभं क्रमात् ॥२५॥

सूर्यर्क्षभागान् नवभिर् विभज्य शेषं द्विरभ्यस्य दिनोपभुक्तिः।
तिथेर् युता भुक्तिदिनेषु कालोऽयोगे दिनैकादशकेन तद् भम् ॥२६॥

त्रिंशी भशेषो दिवसांशभागश् चतुर्दशस्याऽप्युपनीय भिन्नम्।
भार्धाऽधिके चाऽपि गते परोऽंशो द्वावुक्तमेकं नवकै रवेर् द्यु ॥२७॥

त्रिशत्यह्नां सषट्षष्टिरब्दः षट् चर्तवोऽयने।
मासा द्वादश सौराः स्युरेतत् पञ्चगुणं युगम् ॥२८॥

उदया वासवस्य स्युर् दिनराशिः सपञ्चकः।
ऋषेर् द्विषष्ट्या हीनः स्याद् विंशत्या सैकया स्तृणाम् ॥२९॥

पञ्चत्रिंशं शतं पौष्णमेकोनमयनान्यृषेः।
पर्वणां स्याच् चतुष्पादी काष्ठानां चैव ताः कलाः ॥३०॥

सावनेन्दुस्तृमासानां षष्टिः सैकद्विसप्तिका।
द्युत्रिंशत् सावनः साऽर्धः सौरः स्तृणां स पर्ययः ॥३१॥

अग्निः प्रजापतिः सोमो रुद्रोऽदितिर् बृहस्पतिः।
सर्पाश् च पितरश् चैव भगश् चैवाऽर्यमाऽपि च ॥३२॥

सविता त्वष्टाऽथ वायुश् चेन्द्राऽग्नी मित्र एव च।
इन्द्रो निर्ऋतिरापो वै विश्वेदेवास् तथैव च ॥३३॥

विष्णुर् वसवो वरुणोऽज एकपात् तथैव च।
अहिर्बुध्न्यस् तथा पूषा अश्विनौ यम एव च॥३४॥

नक्षत्रदेवता ह्येता एताभिर् यज्ञकर्मणि।
यजमानस्य शास्त्रज्ञैर् नाम नक्षत्रजं स्मृतम्॥३५॥

उग्राण्यार्द्रा च चित्रा च विशाखा श्रवणोऽश्वयुक्।
क्रूराणि तु मघाः स्वातिर् ज्येष्ठा मूलं यमस्य यत्॥३६॥

द्व्यूनं द्विषष्टिभागेन दिनं सौराच् च पार्वणम्।
यत्कृतावुपजायेते मध्येऽन्ते चाऽधिमासकौ॥३७॥

कला दश सविंशाः स्यान् नाडिका ते मुहूर्तकः।
द्यु त्रिंशत् तत् कलानां तु षट्शती त्र्यधिका भवेत्॥३८॥

ससप्तकं भयुक् सोमः सूर्यो द्यूनि त्रयोदश।
नवमानि च पञ्चाऽह्नः काष्ठा पञ्चाक्षरा भवेत्॥३९॥

यदुत्तरस्याऽयनतो गतं स्याच् छेषं तथा दक्षिणतोऽयनस्य।
तदेकषष्ट्या द्विगुणं विभक्तं सद्वादशं स्याद् दिवसप्रमाणम्॥४०॥

यदर्धं दिनभागानां सदा पर्वणिपर्वणि।
ऋतुशेषं तु तद् विद्यात् संख्याय सह पर्वणाम्॥४१॥

इत्युपायसमुद्देशो भूयोऽप्येनं प्रकल्पयेत्।
ज्ञेयराशिं गताभ्यस्तं विभजेज् ज्ञातराशिना॥४२॥

इत्येतन् मासवर्षाणां मुहूर्तोदयपर्वणाम्।
दिनर्त्वयनमासानां व्याख्यानं लगधोऽब्रवीत्॥४३॥

सोमसूर्यस्तृचरितं विद्वान् वेदविदश्नुते।
सोमसूर्यस्तृचरितं लोकं लोके च सन्ततिम्,
लोकं लोके च सन्ततिमिति॥४४॥

❋

अथ

यजुर्वेदिनां परम्परयाऽऽगतम्

सोमाकरभाष्येण कौण्डिन्न्यायनव्याख्यानेन च सहितम्

लगधमुनिप्रोक्तम्

वेदाङ्गज्योतिषम्

[प्रणामः प्रतिज्ञा च]

पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम्।
दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः॥१॥
ज्योतिषामयनं पुण्यं प्रवक्ष्याम्यनुपूर्वशः।
सम्मतं ब्राह्मणेन्द्राणां यज्ञकालार्थसिद्धये॥२॥

(सोमाकरभाष्यम्)

अव्याकृताद् व्याकृतं यत् तदाद्यं त्रय्यात्मकं शब्दराशिं विशिष्टैः।
कालस्येदं कारणं यज्ञसारं भोगावाप्तेः साधनं सम्प्रणम्य॥१॥
देशस्य कालस्य विपर्ययाद् *यदुत्सन्नार्थं चाऽऽगमाद्यं तु शास्त्रम्।*
ज्योतिषं नामाऽऽकुलकं प्रधानं *सोमाकरोऽहं* विवृणोमि शक्त्या॥२॥
लब्ध्वा ज्ञानं प्रातिभं बुद्धियोगात् तद्वच् च भाष्यप्रचयोऽस्य नाऽस्ति।
सर्वज्ञता नास्ति ममेति मत्त्वा ज्योतिर्विदो नॄन् प्रणिपत्य मूर्ध्ना॥३॥
यस्मादहं स्वप्रभावात् प्रवृत्तोऽहोरात्रीये गणिते चाऽप्रगल्भः।
तस्मादन्ये *वस्तुसारं* विदित्वा कृत्स्नार्थाप्त्यै कल्पयिष्यन्ति शेषम्॥४॥

पञ्चसंवत्सरमयमिति। एतेन श्लोकद्वयेन शास्त्रकारोऽभिधेयभूतामिष्टदेवतां नमस्कृत्य वस्तूपन्यासं करोति। तद् यथा। शुचिरहं वाङ्मनःकायशुद्धो ज्योतिषामयनं सूर्य-चन्द्र-नक्षत्राणां गमनं प्रवक्ष्यामि कथयिष्यामि। कथम्? अनुपूर्वशो यथाक्रमेणेत्यर्थः। कीदृशम्? पुण्यम्। यागकालविधिज्ञानतया पापापहम्। तथा सम्मतम् ब्राह्मणेन्द्राणां यजमानानाम् अभिप्रेतम्। **"एते वै यज्ञस्येन्द्राः"** इति श्रुतेः (काठकसं ३५।१६)। किमर्थम्? यज्ञकालार्थसिद्धये। यागचोदितकालविधानार्थमित्यर्थः। किं कृत्वा? प्रणम्य नमस्कृत्य। कम्? प्रजापतिम् स्रष्टारम्। केन? शिरसा उत्तमाङ्गेन। कीदृशम्? पञ्चसंवत्सरमयम् **संवत्सर-परिवत्सरेदावत्सराऽनुवत्सरेद्वत्सरात्मकम्**। तथा युगाध्यक्षं कृतादीनां **वैष्णव-बार्हस्पत्यैन्द्राग्न-त्वाष्ट्राहिर्बुध्न्य-पित्र्य-सौम्य-वैश्वदेव-सार्पार्यम्ण-दास्र-भाग्यान्तानां**

द्वादशानां च स्रष्टारम्। तथा दिनर्त्वयनमासाङ्गम्। कालावयवा दिनादयो मुहूर्तकाल-पुरुषस्याऽङ्गानि। तथा **"स एष संवत्सरः प्रजापतिः षोडशकलस् तस्याऽहोरात्रय एव पञ्चदश कला ध्रुवैकाऽस्य षोडशी कला"** इति (शत.१४।४।३।२२)। **"मासाश् चाऽर्धमासाश् च परूंषि (पर्वाणि) ऋतवोऽङ्गानि संवत्सरो महिमा"** (द्र.- तै.सं. ५।७।२५।१) इति। एवमहं प्रवृत्त इत्यर्थः॥१-२॥

(कौण्डिन्न्यायनव्याख्यानम्)

नमो धर्माय महते वेदाय च स्वयम्भुवे।
ऋषिभ्यश् च ब्राह्मणेभ्यो वेदविद्भ्यो नमोनमः ॥१॥
सरस्वतीं च ब्रह्माणं लक्ष्मीं नारायणं तथा।
शिवां शिवं तथाऽम्बां चाऽऽवुकं च कलये हृदि ॥२॥
वेदाङ्गं ज्योतिषं शास्त्रं मुनिना लगधेन हि।
प्रोक्तं पुरातनं ज्येष्ठं पूजितं वेदसम्मितम् ॥३॥
पुराकालात् प्रभृत्येव स्वाध्यायाध्यायिभिर् द्विजैः।
श्रद्धयाऽधीयमानं च ब्रह्मयज्ञे प्रयत्नतः ॥४॥
तथाऽपि प्राज्ञम्मन्यैस् तु बलवद्भिर् दुरात्मभिः।
नास्तिकैश् चतुरैर् बाह्यैर् जनैर् बाह्यनृपाश्रितैः ॥५॥
हठाल् लोकव्यवहृतिमार्गाद् दूरेऽपसारितम्।
दुश्श्रुतत्वादिना पाठभ्रंशाद् दुर्बोधतां गतम् ॥६॥
श्रद्धाधनेन विप्रेण व्याख्यादिग्दर्शकेन च।
सोमाकरेण व्याख्यातं कुशकाशावलम्बिना ॥७॥
स्वपाण्डित्यं दर्शयितुमितिहासदृशैव हि।
व्याचिख्यासितमन्यैश् च प्राच्यपाश्चात्त्यकैर् बुधैः ॥८॥
वेदेषु च तदङ्गेषु श्रद्धया परया दृढम्।
प्रेरितोऽहं स्वधर्मे च वर्तमानो यथाबलम् ॥९॥
व्याख्यास्यामि प्रयोक्तुं तच् श्रौतस्मार्तेषु कर्मसु।
इदानीमपि ग्राह्यस्य कालस्य हि निरूपणे ॥१०॥

शास्त्रकारः श्लोकद्वयेन प्रतिपाद्यवस्त्वधिष्ठातारं नमस्कृत्य प्रतिपाद्यवस्तु-निर्देशं करोति पञ्चसंवत्सरमयमित्यादिना।

काय-वाङ्-मनस्सु शुद्धोऽहं पञ्चसंवत्सरात्मकम् अहोरात्रर्त्वयनमासरूपै-रङ्गैर् युक्तं पञ्चवर्षात्मकस्य युगस्याधिष्ठातारं प्रजापतिं मस्तकेन नमस्कृत्य

अग्न्याधान-पौर्णमासयाग-दर्शयागा-ऽग्रयण-चातुर्मास्य-निरूढपशुबन्धा-ऽग्निष्टोम-सोमयागादिश्रौतयज्ञानाम् उपनयन-विवाहादीनां स्मार्तयज्ञानां च कृते आवश्यकानां पर्व-मासर्त्वयनाब्दादीनां कालानां प्रयोजनभूतानां ज्ञानाय श्रेष्ठानां श्रौत-स्मार्तकर्माधिकारिणां ब्राह्मणानां सम्मतं पुण्यजनकं चन्द्र-सूर्य-नक्षत्ररूपाणां ज्योतिषां गतीनां प्रतिपादकं शास्त्रं यथाक्रमं प्रकृष्टतया कथयिष्यामीत्यर्थः। मुनयो हि आत्मनश् च विशेषेण शुचित्वं सम्पाद्य शुचौ स्थाने उपविश्य शास्त्राणां प्रणयनं प्रवचनं च कुर्वन्ति स्मेति "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता यत्नेन सूत्रं प्रणयति स्म" इति पाणिनीय-व्याकरण-भाष्यकार-पतञ्जलिमुनिवचनाच् चाऽवगम्यते (१।१।१, वा.७)।

विशेषः— प्रथमादि-दशमान्तानां श्लोकानामर्थाः सोमाकरेणैव प्रायः स्पष्टतया प्रतिपादिता ज्ञेयाः ॥१-२॥

हिन्दी– पाँच संवत्सररूप शरीर से युक्त और उसी पाँच संवत्सरयुक्त युग के अध्यक्ष तथा अहोरात्र, ऋतु, अयन और मास इत्यादि अङ्गों से युक्त प्रजापति को मस्तक से प्रणाम करके शरीर, वाणी और मन से शुद्ध मैं अग्न्याधान, पौर्णमासयाग, दर्शयाग, आग्रयण, चातुर्मास्य, निरूढपशुबन्ध, अग्निष्टोमसोमयाग इत्यादि श्रौत यज्ञों के और उपनयन-विवाहादि स्मार्त यज्ञों के लिए भी आवश्यक तिथि, पक्ष, पर्व, मास, ऋतु, अयन, वर्ष इत्यादि कालरूप प्रयोजन के ज्ञानार्थ श्रेष्ठ श्रौत-स्मार्तकर्माधिकारी ब्राह्मणों के सम्मत पुण्यजनक चन्द्र-सूर्य-नक्षत्ररूप ज्योतियों की गति के प्रतिपादक शास्त्र को क्रम से उत्तम रूप से बताउंगा ॥१-२॥

[ज्योतिषज्ञानस्याऽऽवश्यकता]

वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्व्या विहिताश् च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं
यो ज्योतिषं वेद स वेद यज्ञान्॥३॥

(सोमाकरभाष्यम्)

वेदा हि यज्ञार्थमिति। वेदा ऋग्वेदादयः किल यस्माद् यज्ञार्थमभिप्रवृत्ताः प्रगता उत्पन्नाः। यथा च स्मृतिः–

अग्निवायुरविभ्यश् च त्रयं ब्रह्म सनातनम्।
दुदोह यज्ञसिद्ध्यर्थमृग्-यजुः-सामलक्षणम्॥ (मनु.१।२३)।

तथा कालानुपूर्वा विहिताश् च यज्ञाः। दिनर्त्वयनेषु यज्ञा विहिता विभक्ताः श्रुताः। यथाह **"पुण्याहे दीक्षा, वसन्ते ज्योतिष्टोमेन यजेत, यजेत वाजपेयेन ग्रीष्मे"** इति। तथा **"पञ्चशारदीयः"** इति (द्र.- तै.ब्रा.२।७।११।३)। तस्मादिदं कालविधानशास्त्रम्। अनेन हि कालावयवा विज्ञायन्ते। यो ज्योतिषं वेद स वेद यज्ञम्। ज्योतिःशास्त्रज्ञः काल-स्वरूपज्ञः। तथा यथोक्तयज्ञफलभाग् भवतीत्यर्थः। **"न वै सुविदुरिव मनुष्या नक्षत्रम्"** इति श्रुतिः (काठकसं. ८।३)। तथा **"तेऽसुरा अयज्ञा अदक्षिणा अनक्षत्रा यत् किञ् चाऽकुर्वत तां कृत्यामेवाऽकुर्वत"** इति (काठकसं. ३७।१२)। तथा च परिशिष्टकृत्–

मन्त्रपादपदसन्धिविधिज्ञो धातुनामवचनप्रकृतिज्ञः।
ईदृशो भवति यज्ञविधिज्ञः पक्षमासतिथिचन्द्रगतिज्ञः॥ इति तृतीयः॥३॥

(कौण्डिन्न्यायनव्याख्यानम्)

प्रवचनीयस्य शास्त्रस्य वेदोपकारकत्वाद् वेदाङ्गत्वमिति प्रतिपादयति शास्त्रकारो वेदा हि यज्ञार्थमित्यादिना पद्येन।

ऋग्वेद-यजुर्वेद-सामवेदा-ऽथर्ववेदरूपाः मन्त्रब्राह्मणात्मका वेदा हि विवि-धानां यज्ञानां प्रतिपादनाय प्रवृत्ताः सन्ति, यज्ञाश्च वेदेषु कालक्रमानुसारं विहिताः सन्ति, तस्मात् कालानुपूर्वयज्ञानुविधानज्ञानसाधनानुशासनरूपमिदं ज्योतिषं शास्त्रं यो जानाति स यज्ञान् जानाति। एवं च वेदाङ्गमिदं शास्त्रमिति भावः।

विशेषः– एतत् पद्यं जीमूतवाहनेन कालविवेके, सूर्यदेवयज्वना आर्यभटीय-व्याख्यायां भटप्रकाशिकायाम्, गोविन्ददैवज्ञेन मुहूर्तचिन्तामणिपीयूषधारायां चोल्लि-खितं दृश्यते। भास्करेण सिद्धान्तशिरोमणावप्येतस्य पद्यस्याऽर्थानुवादः कृतोऽस्ति।

ज्योतिषस्य वेदाङ्गत्वं च "तस्मै स होवाच– द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवाऽपरा च। तत्राऽपरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्व-वेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षर-मधिगम्यते" इति आथर्वणानां मुण्डकोपनिषदि (१।१।४-५) प्रतिपादितं दृश्यते। आपस्तम्बधर्मसूत्रे च **"षडङ्गो वेदः, छन्दःकल्पो व्याकरणं ज्योतिषं निरुक्तं शीक्षा छन्दोविचितिरिति"** (२।४।१।१०, ११) इति वेदाङ्गेषु ज्योतिषमुक्तमस्ति।

वेदाध्ययने वेदाङ्गान्तर्गतस्य ज्योतिषस्याऽप्यध्येयत्वं पारस्करगृह्यसूत्रे "वेदं समाप्य स्नायात्, ब्रह्मचर्यं वाऽष्टाचत्वारिंशकम्, द्वादशकेऽप्येके, गुरुणाऽनुज्ञातः, विधिर् विधेयस् तर्कश् च वेदः, षडङ्गमेके" इति (२।६।१-६) प्रतिपादितमस्ति। पाणिनीयशिक्षायामपि **"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषा-मयनं चक्षुर् निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**

तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते" (श्लो. ४१, ४२) **इति वेदाङ्गान्तर्गत-ज्योतिषसहितस्य वेदस्याऽध्येयत्वं प्रतिपादितमस्त्येव। पाणिनीयशिक्षायां दृश्य-मानावेतौ श्लोकौ शौनकीयचरणव्यूहसूत्रे कात्यायनचरणव्यूहसूत्रे च यजुर्वेदखण्डे पठ्येते। वस्तुतः पाणिनीयशिक्षायां तत एवैतावाहृताविति प्रतीयते॥३॥**

हिन्दी – ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेदरूप मन्त्रब्राह्मणात्मक वेद विविध यज्ञों के प्रतिपादन और सम्पादन के लिए प्रवृत्त हैं, यज्ञ वेदों में कालक्रमानुसार विहित हैं, अतः कालानुपूर्वयज्ञानुविधान के ज्ञान के साधन के अनुशासनरूप इस ज्योतिष शास्त्र को जो जानता है वह यज्ञों को जानता है। इस प्रकार यह वेदाङ्गशास्त्र है, यह भाव है।

विशेष – ज्योतिष की वेदाङ्गता मुण्डकोपनिषद् में (१।१।४-५) और आपस्तम्ब-धर्मसूत्र में (२।४।१।१०, ११) प्रतिपादित है। वेदाङ्गान्तर्गत ज्योतिष का अध्ययन पारस्कर-गृह्यसूत्र में (२।६।१-६) विहित है॥३॥

[ज्योतिषप्रशंसा]

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद् वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम्॥४॥

(सोमाकरभाष्यम्)

यथा शिखेति। यथा मयूराणां शिखा चूलिका मूर्धनि तिष्ठति। शिरसि यथा नागानां सर्पाणां मणयो रत्नानि। तद्वदत्र वेदाङ्गशास्त्राणां गणितं क्षेत्रसङ्ख्याविज्ञानं देवयजनादीनाम्।

यथाऽऽह विष्णुः–

इष्टका शोषपाकाभ्यां त्रिंशन्मात्रा तु हीयते।
तत् क्षेत्राणि चतुर्भागं विहीने दापयेच् छिरः॥ इति
(मानवश्रौतसूत्रे १०।३।४।१७, १८)।

एवमधिकृत्याभिधेयमाह॥४॥

(कौण्डिन्न्यायनव्याख्यानम्)

वेदाङ्गेषु ज्योतिषस्य श्रेष्ठत्वं कथयति ग्रन्थकारो यथा शिखेत्यादिना।

शिखा यथा मयूराणां मूर्धनि स्थिता भवति, मणयो यथा सर्पाणां मूर्धनि स्थिता भवन्ति, तद्वदेव गणितरूपं ज्योतिषं शिक्षा-कल्प-व्याकरणादिरूपाणां वेदाङ्ग-शास्त्राणां मूर्धनि स्थितं भवतीत्यर्थः। ज्योतिषरूपवेदाङ्गप्रशंसैषा।

विशेषः— एतत् पद्यं जीमूतवाहनेन कालविवेके, सूर्यदेवयज्वना आर्यभटीय-व्याख्यायां भटप्रकाशिकायाम्, गोविन्ददैवज्ञेन मुहूर्तचिन्तामणिपीयूषधारायां चोल्लिखितं दृश्यते। गणितमित्यस्य स्थाने कैश्चिज् ज्योतिषमिति पाठान्तरं प्रदर्शितम्। अस्माभिस् तु मुद्रितपाठेषु हस्तलेखेषु च यजुर्वेदिनां पाठे भूम्ना गणितम् इत्येव पाठो दृष्टः ऋग्वेदिनां पाठ एव ज्योतिषम् इति पाठो दृष्ट इति गणितमित्येवात्र पाठः स्वीकृतः ॥४॥

हिन्दी – शिखा जैसा मयूरों के शिर में होती है, मणि जैसे नागों के मूर्धा में स्थित होते हैं, उसी प्रकार गणितरूप ज्योतिष शिक्षा-कल्प-व्याकरणादिरूप वेदाङ्गशास्त्रों के मूर्धा में स्थित होता है। यह ज्योतिषरूप वेदाङ्ग की प्रशंसा है॥४॥

[वेदाङ्गज्योतिषप्रतिपाद्यविषयः]

माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः।
युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते॥५॥

(सोमाकरभाष्यम्)

माघशुक्लप्रपन्नस्येति। एवमिह ज्योतिर्विदः कालज्ञानं तत्स्वरूपप्रतिपादनं प्रचक्षते कथयन्ति। कस्य? युगस्य। कीदृशस्य? पञ्चवर्षस्य। संवत्सरादीनां चैकीकृत्य यतश् चत्वारि मानानि वक्ष्यमाणानि सौर-सावन-चान्द्राऽऽर्क्षाणि। तेषां च यतः परस्परवैषम्येण कालवैषम्यम्। यतः सावनस्य संवत्सरस्य प्रकृत्यैव षड् दिनानि लुप्यन्ते सौरमानापेक्षया चान्द्रमानापेक्षया षड् दिनानि वर्धन्ते युगे च तानि अधिकमासाभ्यां पूर्यन्ते। यतस् तौ द्वौ युगमध्ये भवतः। **ते च युगा द्वादश वैष्णव-बार्हस्पत्यैन्द्राऽग्न-त्वाष्ट्राऽहिर्बुध्न्य-पित्र्य-सौम्य-वैश्वदेव-सार्पा-ऽर्यम्ण-दास्र-भाग्याः**। तैः षष्ट्यब्दनिष्पत्तिस् ततः काम्यं भवति। सौरमानापेक्षया तस्य कुतः प्रवृत्तिरित्याह **माघशुक्लेति**। तदादिकालगणनेत्यर्थः। तथा च लौगाक्षिः—

"माघ्याः पौर्णमास्याश् चतुरहे संवत्सराय दीक्षन्ते" इति।

तथा च गर्गः—

कालज्ञानं महत् पुण्यं कालश् चाऽऽदित्य उच्यते।
स च माघस्य शुक्लस्य सोमवासवयोः सह॥
सहोदयं श्रविष्ठाभिः प्रस्थमह्नामुदङ्मुखे। इति।

एवमेव **पौषकृष्णसमापिनः**। ततस् तदा तस्य समापनं पञ्चानामन्ते एव। अतः शुक्लपक्षादिकालप्रवृत्तिरिति सिद्धं भवति। यत एवमतोऽधिमासमृतानां कृष्णपक्षादिकालप्रवृत्त्यपेक्षयैव मृताहानुष्ठानं कुर्वन्ति।

तथा च गर्गः– "तेषां च सर्वेषां नक्षत्राणां कर्मसु कृत्तिकाः प्रथममाचक्षते। श्रविष्ठा तु सङ्ख्यायाः पूर्वा लग्नानाम्। अनुराधं पश्चिमम्। विघ्नानां रोहिणी सर्वनक्षत्राणाम्। मघाः सौर्याणाम्। भोग्यानां चार्यमा। नक्षत्राणां सर्वासां षड्राशीतानामादिः श्रविष्ठा। एवं पञ्चवर्षस्य युगस्यादिः संवत्सरः। वसन्त ऋतूनाम्। माघो मासानाम्। पक्षाणां शुक्लः। अयनयोरुत्तरम्। दिवसानां शुक्लप्रतिपत्। मुहूर्तानां रौद्रः। करणानां किंस्तुघ्नः। ग्रहाणां ध्रुवः" इति। ननु कथमेषा शातपथी श्रुतिः– "एषा ह संवत्सरस्य प्रथमा रात्रिर् यत् फाल्गुनी पौर्णमासी योत्तरैषोत्तमा" (६।२।२।१८) इति, मानुषाणां च विषयापेक्षया, यतस् तेषां यथा चोदनास् ते फाल्गुन्यां पौर्णमास्यां लभन्त इति। ततो नैतेषां नैसर्गिकी कालव्यवस्था यस्मादघमर्षणसूक्ते–

अहोरात्रं सूर्याचन्द्रमसां पुरा कल्पव्यवस्थया।
कालानां च स्थितिः प्राप्ता या सा चेहावधार्यते॥ इति॥५॥

(कौण्डिन्न्यायनव्याख्यानम्)

वेदाङ्गज्योतिषविद्भिर् मुनिभिः क्रियमाणस्य कालज्ञानोपदेशस्य मुख्य-विषयभूतं कालखण्डमुल्लिखन्नाह ग्रन्थकारो माघशुक्लप्रपन्नस्येत्यादि।

माघमासस्य शुक्ले पक्षे (प्रतिपदि) प्रवृत्तस्य पौषमासस्य कृष्णे पक्षे (अमावास्यायां) समाप्तिं गच्छतः पञ्चभिर् वर्षैर् युक्तस्य युगस्य कालस्य ज्ञानं वेदाङ्गज्योतिषज्ञा मुनय उपदिशन्तीत्यर्थः।

एवं च वैदिकेषु संवत्सर-परिवत्सरादिषु वर्षेषु प्रथम ऋतुः शिशिर इत्य-प्युक्तं भवति। एतस्मिन् विषये सोमाकरेणाऽपि षष्ठस्य श्लोकस्य व्याख्यायां विचारः कृतोऽस्ति। उक्तं हि तेन "ननु यद्येवं कथमृतूनां वसन्तो जायते आद्यस् तत्पूर्वाः सर्वाः श्रुतय इति। उच्यते। तास्तु वर्णानां क्रमानुष्ठानाभिधायकत्वेन प्रवृत्ताः, यस्माच् छिशिरस्यैवाऽऽद्यं जन्म श्रूयते शिशिरं वा अग्नेर् जन्मेति" इत्यादि। इदानीं मुद्रितरूपेणोपलभ्यमानायां काठककृष्णयजुर्वेदसंहितायां दृश्यते च "शिशिर आधेयश् शिशिरं वा अग्नेर् जन्म प्रजातमेवैनमाधत्ते" इति (८।१)। शिशिरस्य वर्ष-प्रथमर्तुत्वाच् शिशिरे सर्ववर्णानां कर्माधिकार इत्यपि सोमाकरेण तत्रैव प्रतिपादितम् "अत एवाऽत्र सर्ववर्णानां कर्माधिकारः" इति। अग्न्याधानर्तुविषये "शिशिरः सर्व-वर्णानाम्" इति शाङ्खायनश्रौतसूत्रे (२।१।५), "शिशिरः सार्ववर्णिकः" इत्यापस्तम्ब-श्रौतसूत्रे (५।१।३।२०), "सर्वेषां शिशिरः" इति सत्याषाढश्रौतसूत्रे (३।२), "शिशिरः सार्ववर्णिकः" इति भारद्वाजश्रौतसूत्रे (५।२।५), "सार्ववर्णिकं शिशिरम्" इति वाराह-मैत्रायणीयश्रौतसूत्रे (१।४।२), "अग्नीनादधीत वसन्ते ब्राह्मणो ग्रीष्मे राजन्यः शरदि

वैश्यः, शिशिरं सर्वेषाम्" इति मानवमैत्रायणीयश्रौतसूत्रे (१।५।१।१), "सर्वे शिशिर इत्येके" इति वैखानसश्रौतसूत्रे (१।१) च दृश्यते। भारद्वाजगृह्यसूत्रे तूपनयनविषयेऽपि "शिशिरे वा सर्वान्" इति सूत्रं दृश्यते (१।१)। एवं च वैदिकपरम्परायां शिशिरर्तोर् वर्षप्रथमर्तुत्वं सर्वथा प्रसिद्धं स्वीकृतं चेत्यवगम्यते। उदगयनेन शिशिरर्तुना सह नववर्षारम्भस्य स्वीकारे एव वर्षस्याऽयनस्य ऋतोर् मासस्य च युगपदारम्भो भवति, दिव्यकालमानेन सामञ्जस्यं च भवतीति च सर्वथा श्रुतिसम्मतं युक्तियुक्तं च लगधमुनिकृतं शिशिरर्त्वाम्भे वैदिकानां प्रकृतिसम्मतस्य धर्मकृत्यार्थक-मासर्त्वादिगणनाधारभूतस्य नववर्षारम्भस्य प्रतिपादनं बोद्धव्यम्।

विशेषः— अत्र ग्रन्थे यद्यपि युगस्य पञ्चानां वर्षाणां पृथक् नामानि नोल्लि-खितानि तथापि तानि संवत्सरः परिवत्सरः इदावत्सरः इद्वत्सरः (अनुवत्सरः) वत्सरः (उद्वत्सरः) इत्यादीनि सन्तीति वेदेषु तेषामुल्लेखादवगम्यते। वेदेषु तेषामुल्लेखाश् च भूमिकायां द्वादशे चतुर्दशे च प्रकरणे प्रदर्शिताः सन्ति। ते तत एवाऽवगन्तव्याः।

माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहिताव्याख्याकारेण उव्वटेन "पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिमिति यदुक्तं ज्योतिःशास्त्रे तदिहोच्यते"(२७।४५) इत्युक्त्वा वेदोक्तानां पञ्चानां संवत्सराणां वेदाङ्गज्योतिषोक्तानां पञ्चानां संवत्सराणां च समानत्वं स्पष्टीकृतमस्ति। महीधरेणाऽपि तदेवाऽनुसृतं दृश्यते।

एतेषां पञ्चानां वर्षाणां नाम्नां निर्वचनानि च आदर्शभूतं प्रथमं पञ्चर्षात्मकं युगमादायेव वाचस्पत्यम् इत्युक्ते बृहति संस्कृतशब्दकोशे इदावत्सरशब्दे दर्शितानि यथा— "समकालाऽऽरब्धसौरचान्द्रमासयुक्तो वत्सरः संवत्सरः, चान्द्रसौरमासयोरारम्भे समत्वपरिवर्ज्जितमासारब्धो वत्सरः परिवत्सरः, इद् इत्थं परिवत् आरम्भे समत्व-परिवर्ज्जनवत्त्वेऽपि अन्ते तयोः समत्वस्याऽऽगतिमान् वत्सर इदावत्सरः, अनुगतः सौर-सङ्क्रान्तिं चान्द्रो मासो यत्र तादृशो वत्सरः अनुवत्सरः, अस्य वर्षस्याऽसङ्क्रान्त-मासशून्यतया सङ्क्रान्त्यनुगतचान्द्रमासघटितत्वेन तथात्वम्। उत्क्रान्तो रविसङ्-क्रान्तिं चान्द्रमासोऽत्र पुनः समकालारम्भाऽऽगतिमांश् च यो वत्सरः स उदावत्सरः। अस्यैव इद्वर्षत्वं चान्द्रसौरयोर् मासयोरारम्भे समकालप्राप्त्यैव। एवमेषामन्वर्थकता द्रष्टव्या" इति। एतानि च निर्वचनानि वेदाङ्गज्योतिषप्रक्रियायाः यथार्थेन परिचयेन रहितेनार्वाचीनेन जनेन कृतानीति एतानि दिक्प्रदर्शनमात्रत्वेन ग्राह्याणि न यथार्थत्वेन।

एतेषां संवत्सरादीनां शुक्लयजुर्वेदे दृष्टानि नामानि तु मुख्यरूपेण पूर्व-मुल्लिखितान्येव। कृष्णयजुर्वेदे तु संवत्सरः, परिवत्सरः, इदावत्सरः, अनुवत्सरः,

उद्वत्सर इति काठकसंहितायाम्; संवत्सरः, परिवत्सरः, इदावत्सरः, उद्वत्सरः, वत्सर इति मैत्रायणीयसंहितायाम्, तैत्तिरीयसंहितायाम्, तैत्तिरीयब्राह्मणे च, तैत्तिरीयारण्यके तु संवत्सरः परिवत्सरः, इदावत्सरः, इदुवत्सरः, इद्वत्सरः (वत्सरः) इति नामानि दृश्यन्ते इति च बोध्यम्।

आर्यावर्त पुस्तकालय

एतेषामेव पञ्चानां वर्षाणां यानि युगानि तेषां युगानां द्वादशकेन षष्टिवर्षात्मकं युगं भवतीत्यपि वैदिकानां व्यवहारोऽस्ति। तेषां द्वादशानां युगानां वैष्णवं बार्हस्पत्यम् इत्यादीनि पृथक् नामान्यपि वैदिकानां व्यवहारे सन्ति। तेषामुल्लेखः सोमाकरेणाऽपि कृतोऽस्ति, हेमाद्रिणाऽपि कृतोऽस्ति। बृहत्संहितायां वराहमिहिरेण कृत उल्लेखस् त्वन्य एव। एतस्मिन् विषये भूमिकायामेव पञ्चदशे प्रकरणे बहु प्रपञ्चितमेव। तत् तत्रैव द्रष्टव्यम्। वराहमिहिरादयो गणका हि बाह्या अवैदिकाः सूर्योपासका भोजकापरपर्याया मगब्राह्मणा इति भट्टोत्पलेनाऽपि सूचिता इति ते वैदिकाभ्यन्तरतां वाञ्छन्तः स्वसिद्धान्तस्य वैदिकसिद्धान्ततां प्रदर्शयितुं यतमानाः प्रतीयन्ते। तस्मादेव वराहमिहिरेण वेदाङ्गज्योतिषेऽनुल्लिखितस्य, सोमाकरधृतेषु प्राचीनगर्गवचनेषु चाऽचर्चितस्य, शबरस्वामिनाऽप्यनुल्लिखितस्य(६।७।३८), निर्णयसिन्धावपि बार्हस्पत्यमानस्य धर्मशास्त्रे उपयोगो नास्तीति हेमाद्रिणोक्तमस्तीत्युक्तस्य बार्हस्पत्यमानस्य प्रभवादिषु षष्टौ संवत्सरेषु वैदिक-संवत्सर-परिवत्सराद्यभिन्नत्वं बलादारोपितं प्रतीयते। भोजका हि फलितज्योतिषविज्ञाः शासकसम्मताश्च भवन्ति स्मेति वैक्रमाब्दानां सप्तमे शतके वर्तमानेन गद्यकविना बाणभट्टेन हर्षचरिते कृतादुल्लेखादप्यवगम्यते। तथा हि— "एतस्मिन्नेव काले राज्ञः परमसम्मतः शतशः संवादितातीन्द्रियादेशो दर्शितप्रभावः सङ्कलिती ज्योतिषि सर्वासां ग्रहसंहितानां पारदृश्वा सकलगणकमध्ये महितो हितश् च त्रिकालज्ञानभाग् भोजकस् तारको नाम गणकः समुपसृत्य विज्ञापितवान्" इति (चतुर्थे उच्छ्वासे, पृ.२१८)। जैनेन कालकाचार्य इत्युक्तेन जनेन शकशासको वशीकृतो गर्दभिल्लश् च दण्डित इति (पृ.८६), कालकेन यवनदेशाद् रमलविद्याऽऽनीतेति भोजसागरगणिना रमलविद्याविषयके ग्रन्थे लिखितमस्तीति, वराहमिहिरेणाऽपि बृहज्जातके कालकसंहितोल्लिखिताऽस्तीति च (पृ.८६) भारतीयज्योतिषनामके ग्रन्थे नेमिचन्द्रेण लिखितं दृश्यते। एतस्मादुल्लेखादपि बाह्या फलितज्योतिषविद्या प्रथमं वर्णाश्रमधर्मनिरपेक्षैरवैदिकैर् जनैर् भारतवर्षे आनीता प्रयुक्ता चेति चाऽवगम्यत एव।

उक्तानां वैदिकानां द्वादशानां युगानां षष्टेश् चान्द्राणां वर्षाणाम् प्रभवः विभव इत्यादीनि नामान्यपि गार्ग्यवचनेन प्रतिपादितानि सन्तीति तु निर्णयसिन्धावप्युल्लिखितमस्ति।

एतस्य विषयस्याऽस्माभिः कृतः सङ्ग्रहो यथा—

संवत्सरस् तु प्रथमो द्वितीयः परिवत्सरः।
ततश् चेदावत्सरश् च तुर्य इद्वत्सरः श्रुतः॥
वत्सरः पञ्चमोऽब्दः स्यात् पञ्चाब्दं तु युगं स्मृतम्।
१ २
वैष्णवम् प्रथमन् तत्र बार्हस्पत्यन् ततः परम्॥
३ ४ ५ ६ ७
ऐन्द्रमाग्नेयञ् च त्वाष्ट्रमाहिर्बुध्न्यञ्च पित्र्यकम्।
८ ९ १० ११
वैश्वदेवञ्च सौम्यञ् च ऐन्द्राग्नञ्चाऽऽश्विनन् तथा॥
१२
भाग्यञ् च द्वादश क्रमात् पञ्चाब्दानि युगानि हि।
वैष्णवादि युगेष्वब्दाः प्रभवाद्याः क्रमात् स्मृताः॥
१ २ ३ ४ ५
प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः।
६ ७ ८ ९ १०
अङ्गिराः श्रीमुखो भावो युवा धाता तथैव च॥
११ १२ १३ १४ १५
ईश्वरो बहुधान्यश् च प्रमाथी विक्रमो वृषः।
१६ १७ १८ १९ २०
चित्रभानुः सुभानुश् च तारणः पार्थिवोऽव्ययः॥
२१ २२ २३ २४ २५
सर्वजित् सर्वधारी च विरोधी विकृतिः खरः।
२६ २७ २८ २९ ३०
नन्दनो विजयश् चैव जयो मन्मथ-दुर्मुखौ॥
३१ ३२ ३३ ३४ ३५
हेमलम्बो विलम्बोऽथ विकारी शार्वरी प्लवः।
३६ ३७ ३८ ३९ ४०
शुभकृच् छोभनः क्रोधी विश्वावसु-पराभवौ॥
४१ ४२ ४३ ४४ ४५
प्लवङ्गः कीलकः सौम्यः साधारण-विरोधकृत्।
४६ ४७ ४८ ४९ ५०
परिधावी प्रमादी च आनन्दो राक्षसोऽनलः॥
५१ ५२ ५३ ५४ ५५
पिङ्गलः कालयुक्तश् च सिद्धार्थी रौद्र-दुर्मती।
५६ ५७ ५८ ५९ ६०
दुन्दुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः॥ इति।

अत्र सङ्गृहीताश् चान्द्रप्रभवादिसंवत्सरप्रतिपादकाः श्लोका निर्णयसिन्धौ गार्ग्यवचनत्वेन धृता ज्ञेयाः ॥५॥

हिन्दी – माघ मास के शुक्ल पक्ष (की प्रतिपदा) में शुरु होने वाले और पौष मास के कृष्णपक्ष (की अमावास्या) में समाप्त होने वाले पाँच सालों वाले युग के काल का ज्ञान (वैदिक ज्योतिषज्ञ मुनि लोग) बताते हैं। [यद्यपि इस ग्रन्थ में युग के पाँच वर्षों के पृथक् नाम उल्लिखित नहीं हैं तथापि युगान्तर्गत वर्षों के संवत्सर, परिवत्सर, इदावत्सर, इद्वत्सर (अनुवत्सर/उद्वत्सर/इदुवत्सर), वत्सर (उद्वत्सर) ये नाम वेदों में उल्लिखित हैं] ॥५॥

[आदियुगनिरूपणम्]

स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ।
स्यात् तदाऽऽदियुगं माघस् तपःशुक्लोऽयनं ह्युदक् ॥६॥

(सोमाकरभाष्यम्)

स्वराक्रमेते सोमार्कौविति। स्वर् दिवं यस्मिन् काले आक्रमेते व्याप्नुतः। कौ? सोमार्कौ। कस्य साकं सह। तथा सवासवौ धनिष्ठायां नक्षत्र इत्यर्थः। तथा च तत्र यदि बृहस्पतिरास्ते। तदा किमित्याह। स्यात् तदाऽऽदियुगम्। तदाऽऽदियुगप्रारम्भो भवेत्। तथा तदैव माघो मास ऋतुर् वा भवेत्। तथा स एव तपो मासो भवेत्। **"तपश् च तपस्यश् च"** (तैत्तिरीयसं. १।४।१४।१, ४।४।११।१; मैत्रायणीयसं. २।८।१२, काठकसं. १७।१०, ३५।९; माध्यन्दिनीयसं. १५।५७) इति श्रुतौ। तथा शुक्लः पक्ष इति वाक्यशेषः। तथा तदेव यस्मादुदगयनं भवेदिति प्रतिज्ञा। ननु यद्येवं कथमृतूनां वसन्तो जायते आद्यस् तत्पूर्वाः सर्वाः श्रुतय इति। उच्यते तास् तु वर्णानां क्रमानुष्ठानाभिधायकत्वेन प्रवृत्ताः। यस्माच् छिशिरस्यैवाद्यं जन्म श्रूयते **"शिशिरं वा अग्नेर् जन्म"** इति (काठकसं. ८।१)। तस्मादग्निरभिसृज्यतेऽभ्याजमाग्निजन्म यतः स्वयमनभिव्यक्तरूपमासीत् पश्चाच् च तेषामभिव्यक्तिं गतस् ततोऽस्य पश्चिमजन्मैतदित्यभिगतत्वादत एवाऽत्र सर्ववर्णानां कर्माधिकारस् तस्मात् तदाद्यैव मुख्यप्रवृत्तिस् तथाप्येवम्॥६॥

आर्यावर्त पुस्तकालय

(कौण्डिन्न्यायनव्याख्यानम्)

इदानीं कालगणनाव्यवहाराय स्वकृतपञ्चवर्षात्मकयुगपरिवर्तगणनाप्रारम्भविशेषकालं निर्दिशति शास्त्रकारः स्वराक्रमेते **इत्यादिना श्लोकेन।**

यदा वसुदेवताकेन श्रविष्ठाख्येन नक्षत्रेण सहितौ सूर्याचन्द्रमसौ सहैव आकाशमुद्गच्छतस् तदा इदानीमस्माकं कालगणनाव्यवहाराय आद्यं युगं स्यात्,

माघो मासः स्यात्, तपोमासशुक्लपक्षः स्यात्, उदगयनं च स्यादित्यर्थः। अत्र सुधाकरेण "य एव माघः स एव तपः, माघस् तपश्चैकार्थवाचिनौ शब्दावित्यर्थः" इति यदुक्तं यच्च संस्कृतवाक्यरचनास्वभावविवेकविधुरेण गतानुगतिकेनाऽन्येन च तदनुसारमेवोक्तं तदसङ्गतमेव बोध्यम्। यद्यपि तपःशुक्लः इत्यनुक्त्वा शुक्लः इत्येवोक्तेऽपि प्रसङ्गान् माघशुक्ल इत्यवगन्तुं शक्यत एव तथाऽपि वृत्तपूरणाया-ऽऽवश्यकत्वात् शब्दान्तरोपादाने पुनरुक्तिवैरस्यपरिहारस्य सम्भवाच् चर्तुसूचनाय च ग्रन्थकारेण तपःशुक्ल इति प्रयुक्तं बोध्यम्। अत्र शिशिरर्त्तोरनुल्लेखेऽपि "तपश् च तपस्यश् च शैशिरावृतू" (मा.वा.शुक्लयजुर्वेदसंहितायाम् १५।१६) इति वेद एव समुल्-लिखितत्वाच् च तपश्शब्दोपादानान् नान्तरीयकतयैव शिशिरर्तुश् चाऽवगम्यत एव।

विशेषः— आदियुगस्य प्रथमे वर्षे शुक्लप्रतिपदया सहैव सूर्यस्योदगयने प्रवृत्तेऽपि सर्वेषु वर्षेषु तथा न भवति। तस्मात् लगधमुनेः "घर्मवृद्धिरपां प्रस्थः क्षपाह्रास उदग्गतौ। दक्षिणेतौ विपर्यासः" (श्लो.८) इत्यादिकम्, "उपजायेते मध्ये-ऽन्ते चाऽधिमासकौ" (श्लो.३७) इत्यादिकं च वचनजातं विचार्य यस्मिन् शुक्लादौ कृष्णपक्षान्ते चान्द्रे मासे शुक्लपक्षप्रतिपदः प्रभृति कृष्णपक्षनवमीं यावत् सूर्यस्य दृक्सिद्धस्योदगयनस्याऽऽरम्भो भवति स चान्द्रो मासो माघमासः (तपोमासः) भवतीति स्वीकार्यं भवति। अत्र विशेषोऽधिमासव्याख्याने (श्लो.३७) द्रष्टव्यः।

वेदे मन्त्रभागे तपस्-तपस्यादीनामेवोल्लिखितत्वाद् ब्रह्मणग्रन्थाद्युक्ता माघफाल्गुनादयस् तपस्-तपस्याद्यभिन्ना एव मन्तव्याः। एवं च राष्ट्रियपञ्चाङ्गे शुद्धस्य सौरवासन्तविषुवदिनादनन्तरे दिने प्रारभ्यस्य सौरस्य मासस्य वैदिकमाधव-मासत्वं यदुक्तं यच्च 'लाहिरिज् इण्डियन् एफेमरिज्' इति नामके ग्रन्थे आधुनिक-राशिविभागमूलकमासपरिभाषाऽनुसारिणो माघमासस्य शुक्लप्रतिपदो वेदाङ्ग-ज्योतिषोक्तनववर्षारम्भदिनत्वमुक्तं तदुभयमयुक्तमेव बोध्यम्। एतस्मिन् विषये भूमिकायामेव सम्यक् प्रतिपादनं कृतम्, तत् तत्रैव द्रष्टव्यम् (पृ.१२५)।

अत्र सोमाकरेण "स्यात् तदादियुगम्, तदादियुगप्रारम्भो भवेत्" इत्युक्तम्। तस्याऽर्थश् च तदा आदियुगस्य प्रारम्भोऽभूत् इत्यर्थ एवाऽवगन्तव्यः। यथा महा-भारतादौ आद्यं पर्व इत्यादिकेऽर्थे आदिपर्व इत्यादिकं प्रयुक्तं तथैवाऽत्र शास्त्रकारेण आद्यं युगम् इत्यर्थे आदियुगम् इति प्रयुक्तं बोध्यम्। अत्र सुधाकरेण आदियुगम् इत्यस्य 'आदिर् युगस्य' इति छोटेलाल-बार्हस्पत्यकृतोऽर्थोऽनुमोदितो दृश्यते। तस्यै-वाऽनुसरणं कुर्वताऽन्येन च केन चित् प्राप्तिज्ञेन देवानाम्प्रियेण "आदियुगं युगस्य आदिः इति षष्ठीसमासः। पूर्वनिपातार्हस्य युगशब्दस्य राजदन्तादिषु परम् (२।२।३१) इति परप्रयोगः" इति, "राजदन्तादिः आकृतिगणः इति सिद्धान्तकौमुद्यां वर्तते। अतः

युगादिशब्दस्य राजदन्तादिषु पाठः विकल्पेन अभ्युपगन्तव्यः" इति च जल्पितं तत् तु हेयमेव, शास्त्रकाराभिप्रायप्रतिकूलत्वात्, "अतश् च प्रकृतं बुद्ध्वा देशकालान्तराणि च। तन्त्रकर्तुरभिप्रायानुपायाँश् चाऽर्थमादिशेत्" इति चरकसंहितायाम् (१।२६।३७) उक्तस्य मुनिकृतग्रन्थार्थनिरूपणसिद्धान्तस्याऽनुसरणीयत्वाच् च। न हि उक्तस्य मुनिवचनस्य सर्वेषां पञ्चवर्षकाणां वैदिकानां युगानामादिरुक्तप्रकारको भवतीत्यर्थं स्वीकृत्य शास्त्रकारमुनिवचनस्य वितथीभावस्य प्रतिपादनं वैदिकानां मुनिमतानुयायिनामास्तिकानां कृते शोभते।

उदगयन-दक्षिणायनज्ञानं च घर्मवृद्धि-क्षपाह्रास-क्षपावृद्धि-घर्मह्रास-विचारेण, मध्याह्नशङ्कुच्छायाविलोकनेन च कार्यम्। शङ्कुच्छायया कालज्ञानस्य परम्परा भारतवर्षेऽनादिकालादनुवृत्ताऽवगम्यते। तथाहि—

आदित्यस् त्वेव सर्वऽ ऋतवो यदैवोदेत्यथ वसन्तो यदा सङ्गवोऽथ ग्रीष्मो यदा मध्यन्दिनोऽथ वर्षा यदाऽपराह्णोऽथ शरद् यदैवाऽस्तमेत्यथ हेमन्तस् तस्मादु मध्यन्दिनऽ एवाऽऽदधीत तर्हि ह्येषोऽस्य लोकस्य नेदिष्ठादेवैनमेतन् मध्यान् निर्मिमीते। छायेव वाऽ अयं पुरुषः पाप्मनाऽनुषक्तः सोऽस्याऽत्र कनिष्ठो भवत्यधस्पदमिवेयस्यते तत् कनिष्ठमेवैतत् पाप्मानमवबाधते तस्मादु मध्यन्दिनऽ एवाऽऽदधीत॥ इति

—माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशतपथब्राह्मणे (२।२।३।९,१०)।

त्रुटीनां तु भवेत् त्रिंशन् मुहूर्तस्य प्रयोजनम्।
द्वादशाङ्गुलमुच्छेषं तस्य च्छायाप्रमाणतः॥
नवतिषडङ्गुलश् चैव प्रतीचीं तां प्रकाशयेत्।
पुरस्तान् सन्धिवेलायां मुहूर्तो रौद्र उच्यते॥
श्वेतः षष्टिः समाख्यातो मैत्रो वै द्वादशाङ्गुलः।
षट्सु सारभटो ज्ञेयः सावित्रः पञ्चसु स्मृतः॥
चतुर्षु चैव वैराजस् त्रिषु विश्वावसुस् तथा।
मध्याह्ने चाऽभिजिन् नाम यस्मिन् छाया प्रतिष्ठति॥
प्राचीं वै गामिनीं छायां रौहिणस् त्रिषु वर्तते।
बलश् चतुर्षु विख्यातो विजयः पञ्चसु स्मृतः॥
नैर्ऋतस् तु षडङ्गुल्यो वारुणो द्वादशाङ्गुलः।
सौम्यः षष्टिः समाख्यातो भगस् तु परमस् तथा॥ इति

—आथर्वणज्योतिषे (१।५-१०)।

यथायथा च ह्रस्वत्वं पुंसः स्थानेन सम्भवेत्।
तथातथा पवित्रः स्यात् कालः श्राद्धार्चनादिषु॥
छायेयं पुरुषस्यैवं तत्पादाधो भवेद् यथा।
आधानश्राद्धदानादेः स कालोऽक्षयकृत् स्मृतः॥
अयुतं तु महूर्तानामर्धमष्टदशाधिकम्।
त्रिंशद्भिस् तैरहोरात्रमिति माध्यन्दिनी श्रुतिः॥
मध्याह्ने तु गते सूर्ये न पूर्वे न च पश्चिमे।
तुल्याग्रसंस्थिते चैव सोऽष्टमो भाग उच्यते॥ इति

–बृहत्पराशरस्मृतौ (७।९२-९५)।

चक्षुः शास्त्रं जलं लेख्यं गणितं बुद्धिवित्तमाः।
पञ्चैते हेतवो विप्रा ज्योतिर्गणविवेचने॥ इति

–ब्रह्मण्डपुराणे (१।२४।१५२) लिङ्गपुराणे (१।६१।६२-६३), वायुपुराणे (१।५३।१२३) च।

एते दिनमुहूर्ताश् च दिवाकरविनिर्मिताः।
शङ्कुच्छायाविषेण वेदितव्याः प्रमाणतः॥ इति

–ब्रह्माण्डपुराणे (२।३।४१), वायुपुराणे (२।५।४२) च।

छायायामष्टपौरुष्यामष्टादशभागश् छेदः, षट्पौरुष्यां चतुर्दशभागः, चतुष्पौरुष्यामष्टभागः, द्विपौरुष्यां षड्भागः, पौरुष्यां चतुर्भागः, अष्टाङ्गुलायां त्रयो दशभागाः, चतुरङ्गुलायामष्टभागाः, अच्छायो मध्याह्न इति। परावृत्ते दिवसे शेषमेवं विद्यात्। आषाढे मासि नष्टच्छायो मध्याह्नो भवति। अतः परं श्रावणादीनां षण्मासानां द्व्यङ्गुलोत्तरा, माघादीनां द्व्यङ्गुलावरा छाया॥ इति

–कौटलीयेऽर्थशास्त्रे (२।२०)।

रुतैर् मृगशकुन्तानां स्थावराणां च वृत्तिभिः।
छायादिपरिणामैश् च ऋतुधामा निरूप्यते॥

–इति वाक्यपदीये तृतीयकाण्डे कालसमुद्देशे (श्लो.४५)।

कुत्रचिद् वेदाङ्गज्योतिषकोशे "ये बृहस्पतिना भुक्ता मीनात् प्रभृति राशयः। ते हताः पञ्चभिर् याता यः शेषः स परिग्रहः" इति श्लोक इदानीं दृश्यते। किन्त्वयं श्लोकः सोमाकरेणाऽव्याख्यात इति क्षेपक एवेति सर्वसम्मतम्। सुधाकरेणाऽपीमं श्लोकं व्याख्यायाऽन्ते "अत्र पञ्चवर्षात्मकयुग एव सर्वा गणनाऽत इदं पद्यं क्षेपकम्, बृहस्पतिभुक्तराशीनां *पञ्चाल्पत्वात्* सोमाकरभाष्येऽस्य पाठाभावाच् चेति स्फुटं ज्योतिर्विदामिति" इति प्रोक्तम्।

यदा लगधप्रोक्तादियुगप्रारम्भात् प्रभृति वैदिकवर्षगणनापरम्पराऽविच्छिना वैदिकेषु विद्वत्सु यजमानेषु ऋत्विक्षु याज्ञिकेषु लौकिकेषु च जनेषु प्रसिद्धाऽऽसीत् तदा वैदिकेषु पञ्चवर्षात्मकेषु वैष्णवादिषु युगेषु कतमद् युगं तस्मिन् काले वर्तमानमस्ति, तस्य युगस्य पञ्चसु वर्षेषु च कतमद् वर्षं वर्तमानमस्ति इति च ज्ञातुं किमपि करणसूत्रमावश्यकं नाऽऽसीत्। यथा यदा शकाब्दानां कतिथं वर्षं प्रवर्तमानमस्तीति लोकप्रसिद्धाया अविच्छिन्नपरम्परायाः सत्त्वाल् लोकादेव ज्ञायमानं भवति तदा शकाब्दानां कतिथं वर्षं वर्तमानमस्तीति ज्ञानाय किमपि करणसूत्रमावश्यकं न भवति, अत एव ब्राह्मस्फुटसिद्धान्ते, भास्वत्याम्, सिद्धान्तशिरोमणौ च वर्तमानशकाब्दज्ञानाय किमपि करणसूत्रं प्रदत्तं नास्ति, एवमेव वैदिकानां पञ्चवर्षात्मकस्य युगस्य पञ्चसु वर्षेषु इष्टे काले कतमद् वर्षं वर्तमानमस्ति इति ज्ञानाय किमपि पृथक् करणसूत्रं लगधप्रोक्ते वेदाङ्गज्योतिषग्रन्थे दत्तं नास्ति। आदियुगप्रवृत्तेर् यः कालोऽस्मिन् ग्रन्थे प्रोक्तः सोऽपि श्रविष्ठाऽऽद्यबिन्दुसंशयात् निश्चितवर्षात्मकरूपेणेदानीं वक्तुं दुश्शक एव। यदा तु विविधैः कारणैर् भारतवर्षीयवैदिकराष्ट्रविप्लवाः समयेसमये बभूवुः, वेदाध्ययनरम्परा शिथिला बभूव, वैदिकयज्ञपरम्परा च विच्छिन्ना लुप्तप्राया च बभूव तदा तु लगधमुनिप्रोक्ताऽऽदियुगप्रारम्भात् प्रभृति प्रवृत्ता वैदिकवर्षगणनापरम्परा लोकेऽप्रसिद्धा बभूव, तदा इष्टे काले वैदिकपञ्चवर्षात्मकस्य युगस्य कतमद् वर्षं वर्तमानमस्तीति ज्ञातुं करणसूत्रमावश्यकं बभूव।

एतस्मिन् विषये वाचस्पत्यम् इत्याख्ये महाकाये संस्कृतभाषाशब्दकोशे अनुवत्सरशब्दे "शकाङ्कात् पञ्चभिः शेषात् समाद्याद्यास् तु वत्सराः। सम्परीदानुपूर्वाश् च तथोदापूर्वका मताः" इति वचनं दत्तमस्ति। किन्तु तत्र तस्य वचनस्याऽऽकरग्रन्थो निर्दिष्टो नास्ति, अर्थोऽपि प्रतिपादितो नास्ति। इदं वचनं तस्मिन् कोशे इदावत्सरशब्देऽपि दत्तमस्ति। तत्राऽऽकरग्रन्थनिर्देशे ज्यो. इत्येवोल्लेखो दृश्यते। तत्राऽस्य वचनस्याऽर्थोऽपि वर्णितोऽस्ति। शब्दकल्पद्रुमनामकेऽन्यस्मिन्नपि महाकाये संस्कृतशब्दकोशे अनुवत्सरशब्दे संवत्सर-परिवत्सरादिज्ञानोपायः प्रतिपादितोऽस्ति। किन्तु तत्रोक्तस्य वचनस्योल्लेखो न दृश्यते। तथापि तस्मिन्नेव शब्दकोशे संवत्सरशब्दे तु उक्तं वचनं दत्तमस्ति। तस्याऽऽकरनिर्देशे 'मलमासतत्त्वम्' इत्युल्लिखितमस्ति। एतच् च मलमासतत्त्वं निर्णयसिन्धुतः प्राचीनस्य वाङ्गकधर्मशास्त्रनिबन्धकाररघुनन्दनकृतस्याऽष्टाविंशत्या तत्त्वैर् युक्तस्य स्मृतितत्त्वस्यैकं तत्त्वमस्ति। तत्रोक्तं वचनं कस्याऽस्ति कुत उद्धृतमस्तीति च रघुनन्दनेनोक्तं नास्ति। तथापि उक्ताद् वचनात् शकाब्दानां पञ्चभिर् विभागे कृते शशिनि शेषे संवत्सरः नेत्रयोः शेषयोः परिवत्सरः, गुणेषु शेषेषु इदावत्सरः, वेदेषु शेषेषु

अनुवत्सरः (इद्वत्सरः), निश्शेषे उदावत्सरः (वत्सरः) ज्ञातव्य इति वाचस्पत्यकोषादवगम्यते। एतच्च वचनं वैदिकानां पक्षस्याऽस्तीति रघुनन्दनलेखादवगम्यते। ज्यौतिषिकाणां तु भिन्नं मतं प्रदर्शयता रघुनन्दनेन मलमासतत्त्वे (पृ.७६४) "ज्योतिर्विदस् त्विज्यमध्यात् प्रभवादेश् च संभवम्। ऊचुस् तद्वत् समाद्यादिवर्षाणामपि सम्भवम्" इत्युल्लिखितमस्ति। तस्माद् रघुनन्दनेनोल्लिखितं "शकाङ्कात् पञ्चभिः शेषात्" इत्यादिकं वचनं वराहमिहिरेण बृहत्संहितायां बृहस्पतिचाराध्याये प्रदर्शितानां बार्हस्पत्यसंवत्सरमूलकानां वैष्णवादियुगानां तेषां संवत्सर-परिवत्सरादीनां वत्सराणां च वैदिकाभिमतेभ्यो वैष्णवादियुगेभ्यः संवत्सर-परिवत्सरादिभ्यश् च भिन्नत्वं स्पष्टतयैवाऽवगमयति।

अत्रेदं विचार्यम्- रघुनन्दनोल्लिखिते उक्ते वचने साक्षात् शकाब्दानां पञ्चभिर् विभजनेन संवत्सर-परिवत्सरादीनां ज्ञातव्यत्वं प्रतिपादितमस्ति, किन्तु वराहमिहिरकृतायाः पञ्चसिद्धान्तिकायाः द्वादशस्य पैतामहसिद्धान्ताध्यायस्य सम्पादक-संशोधकस्वीकृते पाठे दृष्टे "द्व्यूनं शकेन्द्रकालं पञ्चभिरुद्धृत्य शेषवर्षाणाम्। द्युगणं माघसिताद्यं कुर्याद् द्युगणस् तदहन्युदयात्" इति (पृ.३१) वचने तु द्वाभ्यामूनानां शकाब्दानां पञ्चभिर् विभजनेन संवत्सर-परिवत्सरादीनां ज्ञातव्यत्वं प्रतिपादितमवगम्यते। पञ्चसिद्धान्तिकायास् तादृशमेव पाठं स्वीकृत्य तमेव च पाठं प्रमाणतयोपादाय नूनं सर्वानन्दकरणकारेण गोविन्दगणकेन च सर्वानन्दकरणे वेदाङ्गमञ्जरीप्रकरणे "शकाब्दं याततिष्यस्य भूनं भक्तं खभूमिपैः (१६०)। फलमादियुगव्रातः शेषं वर्षगणं विदुः" (पृ.१६६) इत्युक्तमस्ति।

उक्तयोर् मतयोर् वस्तुतो विरोध एवाऽस्ति उत केनाऽपि व्याख्यानेन तयोः समन्वयः कर्तुं शक्यते इति सम्यग् विचिन्तनीयं दृश्यते। एतस्मिन् विषये विष्णुधर्मोत्तरपुराणस्य "पञ्चभक्ते तु यच् छेषं तिष्ठेदब्दगणे गते। संवत्सराद्यः स ज्ञेयो नित्यं संवत्सरो बुधैः" (१।८२।५३) इति वचनं च विचारणीयम्। अत्रोल्लिखितोऽब्दगणो नूनं कलियुगाब्दगण एव मन्तव्यः, वेदव्यासकृष्णद्वैपायनमुनिरचितत्वेनाऽभिमते विष्णुधर्मोत्तरपुराणे वैक्रमाब्दानां वा शकान्ताब्दानां वाऽन्येषां वा लौकिकानामर्वाचीनानां शासकविशेषप्रवर्तितानामब्दानां गणस्य ग्रहीतुमशक्यत्वात्। विष्णुधर्मोत्तरपुराणोक्तस्य संवत्सर-परिवत्सरादिज्ञानोपायप्रतिपादकवचनस्य वैदिकसंवत्सर-परिवत्सरादिज्ञानोपायप्रतिपादनपरत्वमेवाऽवगम्यते बार्हस्पत्यसंवत्सरविशेषसंवत्सरपरिवत्सरादिज्ञानोपायस्य तद्भिन्नताया बृहत्संहितास्थबृहस्पतिचाराध्यायादिभ्योऽवगम्यमानत्वात्। एवं च "शकाङ्कात् पञ्चभिः शेषात् समाद्यास् तु वत्सराः" इत्यत्र रघुनन्दनधृते वचने शकशब्दस्य ज्योतिर्विदाभरणाख्ये ग्रन्थे

दृष्टे "युधिष्ठिरो विक्रम-शालिवाहनौ नराधिनाथौ विजयाभिनन्दनः। इमे नु नागार्जुन-मेदिनीविभुर् बलिः क्रमात् षट् शककारकाः कलौ" इति पद्ये इव संवत्सरमात्र-वाचकत्वं यदि स्वीक्रियते तर्हि तु विष्णुधर्मोत्तरपुराणवचनस्य रघुनन्दनधृतस्य वचनस्य च सुखेन समन्वयः स्यात्। तथापि विष्णुधर्मोत्तरपुराणवचन-रघुनन्दन-धृतवचनयोः पञ्चसिद्धान्तिकोक्तपैतामहसिद्धान्तस्य द्व्यूनं शकेन्द्रकालमित्यादिना वचनेन सह समन्वयस् तु प्रथमतो दुष्कर इव भाति। तथा हि प्रचलितपञ्चाङ्ग-पत्रकेषु ब्रह्मगुप्त-भास्करादिवचनानुसारम् अङ्किते ५१०६तमे कलिगताब्दे १९२७तमः शकाब्दो भवतीति दृश्यते। तत्र कलिगताब्दानां पञ्चभिर् विभागे कृते शेषः १ भवति। तथा च विष्णुधर्मोत्तरपुराणवचन-रघुनन्दनधृतवचनानुसारं ५१०६ तमे कलिगताब्दे वैदिकस्य पञ्चवर्षात्मकस्य युगस्य संवत्सर-परिवत्सरादिषु अब्देषु परिवत्सराख्यो द्वितीयोऽब्दो भवतीति मन्यते। वराहमिहिरकृतपञ्चसिद्धान्तिकास्थ-पैतामहसिद्धान्तवचनानुसारं द्व्यूनेषू (१९२७-२) शकाब्देषु (१९२५) पञ्चभिर् विभक्तेषु शेषः ० (शून्यम्) भवति। तथा च पैतामहसिद्धान्तवचनानुसारं ५१०६तमे कलिगताब्दे १९२७तमे शकाब्दे वैदिकस्य पञ्चवर्षात्मकस्य युगस्य संवत्सर-परि-वत्सरादिषु अब्देषु संवत्सराख्यः प्रथमोऽब्दो भवतीति मन्यते। एवं च द्वयोरेव पक्षयोर् गतवर्षत्वेन समानया रीत्या प्रयोगे संवत्सरपरिवत्सरादिनिरूपणे तयोः पक्षयोरसमन्वयः स्फुटः। एतादृशे व्यतिकरे को निस्तारः? वराहमिहिरकाले वैदिकेषु विशिष्टेषु ब्राह्मणेषु प्रसिद्धाम् अविच्छिन्नपरम्परागतां वैदिकपञ्चवर्षात्मक-युगाब्दगणनामादायैव वराहमिहिरेण 'द्व्यूनं शकेन्द्रकालम्' इत्यादिकं पैतामह-सिद्धान्तकरणसूत्रं रचितं स्यादिति तस्य पक्षस्य प्रबलत्वमिवाऽत्याज्यत्वमिव च प्रतीयते। एतादृश्यां स्थितौ कल्यब्दानां विषये विशिष्टो विचारः करणीयो भवति। तत्र भारतीयदक्षिणभागस्थे पुलकेशिनः एहोडेशिलालेखे "त्रिंशत्सु त्रिसहस्रेषु भारतादाहवादितः। सप्ताऽब्दशतयुक्तेषु गतेष्वब्देषु पञ्चसु (३०+३०००+७००+५= ३७३५)॥ पञ्चाशत्सु कलौ काले षट्सु पञ्चशतासु च (५०+६+५००=५५६)। समासु समतीतासु शकानामपि भूभुजाम्" इति उल्लेखो दृश्यते। अतो येऽब्दा ब्रह्मगुप्त-भास्करादिभिः कलियुगाब्दा उक्तास् ते एवाऽब्दाः पुलकेशिशिलालेखे भारताद् आहवात् (युद्धात्) प्रभृति गणिताः अब्दा उक्ताः सन्तीति गम्यते। कलि-युगप्रवृत्तिस् तु भारताद् युद्धात् प्रभृति गणितेषु षट्त्रिंशति वर्षेषु गतेषु कृष्णे मेदिनीं त्यक्त्वा दिवं गते जातेति महाभारतयुद्धाब्दगणनायां कलियुगाब्दगणनायां च भेदो-ऽस्तीति गम्यते। तत्र भारतयुद्धात् प्रभृति गणितेषु षट्त्रिंशति वर्षेषु गतेषु कृष्णः पृथिवीं त्यक्त्वा दिवं गत इति, कृष्णे दिवं गते कलिः प्रवृत्त इति च पुराण-महा-भारतादिवचनेभ्योऽवगम्यते। तथाहि वचनानि—

यस्मिन् दिने हरिर् यातो दिवं सन्त्यज्य मेदिनीम्।
तस्मिन् दिनेऽवतीर्णोऽयं कालकायः कलिः किल॥ इति

–ब्रह्मपुराणे वेङ्कटेश्वरसंस्करणे (२१२।८)।

यस्मिन् कृष्णो दिवं यातस् तस्मिन्नेव तदा दिने।
प्रतिपन्नः कलियुगस् (तस्य सङ्ख्यां निबोधत)॥ इति

–ब्रह्माण्डपुराणे (३।७४।२४१)।

यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः।
तदाऽहरेवाऽप्रतिबुद्धचेतसा मधर्महेतुः कलिरन्ववर्तत॥ इति

–भागवते (१।१५।३६)।

यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गाम्।
तदैवेहाऽनुवृत्तोऽसावधर्मप्रभवः कलिः॥ इति च

–तत्रैव (१।१८।६)।

विष्णोर् भगवतो भानुः कृष्णाख्योऽसौ दिवंगतः।
तदाऽविशत् कलिर् लोकं पापे यद् रमते जनः॥
यावत् स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः।
तावत् कलिर् वै पृथिवीं पराक्रान्तुं न चाऽशकत्॥ इति च

–तत्रैव (१२।२।२९,३०)।

यस्मिन् कृष्णो दिवं यातस् तस्मिन्नेव तदाऽहनि।
प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः॥ इति च

–तत्रैव (१२।२।३३)।

आ कृष्णनिर्गमात् त्रिंशद्वर्षाधिकगते कलौ।
नवमीतो नभस्ये च कथारम्भं शुकोऽकरोत्॥ इति

–भागवतमाहात्म्ये पद्मपुराणोक्ते (६।९४)।

यस्मिन् कृष्णो दिवं यातस् तस्मिन्नेव तदाऽहनि।
प्रतिपन्नं कलियुगं प्रमाणं तस्य मे शृणु॥ इति

–मत्स्यपुराणे (२७३।४८-४९)।

यस्मिन् कृष्णो दिवं यातस् तस्मिन्नेव तदा दिने।
प्रतिपन्नः कलियुगस् तस्य सङ्ख्यां निबोधत॥ इति

–वायुपुराणे वेङ्कटेश्वरसंस्करणे (२।३७।४२२-४२३)।

यदैव भगवान् विष्णोरंशो यातो दिवं द्विज।
वसुदेवकुलोद्भूतस् तदैवाऽत्राऽऽगतः कलिः॥
यावत् स पादपद्माभ्यां पस्पर्शेमां वसुन्धराम्।
तावत् पृथ्वीपरिष्वङ्गे समर्थो नाऽभवत् कलिः॥ इति
–विष्णुपुराणे (४।२४।१०८, १०९)।

यस्मिन् कृष्णो दिवं यातस् तस्मिन्नेव तदाऽहनि।
प्रतिपन्नं कलियुगं तस्य सङ्ख्यां निबोध मे॥ इति च
–तत्रैव (४।२४।११३)।

यस्मिन् दिने हरिर् यातो दिवं सन्त्यज्य मेदिनीम्।
तस्मिन्नेवाऽवतीर्णोऽयं कालकायो बली कलिः॥ इति च
–तत्रैव (५।३८।८)

त्वमप्युपस्थिते वर्षे षट्त्रिंशे मधुसूदन।
कुत्सितेनाऽभ्युपायेन निधनं समवाप्स्यसि॥ इति
–महाभारते स्त्रीपर्वणि (२५।४४-४५)।

षट्त्रिंशे त्वथ सम्प्राप्ते वर्षे कौरवनन्दनः।
ददर्श विपरीतानि निमित्तानि युधिष्ठिरः॥ इति
–महाभारते मौसलपर्वणि (१।१)।

षट्त्रिंशेऽथ ततो वर्षे वृष्णीनामनयो महान्।
अन्योन्यं मुसलैस् ते तु निजघ्नुः कालचोदिताः॥ इति च
–मौसलपर्वण्येव (१।१३)।

चतुर्दशी पञ्चदशीकृतेयं राहुणा पुनः।
प्राप्ते वै भारते युद्धे प्राप्ता चाऽऽप क्षयाय च॥
विमृशन्नेव कालं तं परिचिन्त्य जनार्दनः।
मेने प्राप्तं स षट्त्रिंशं वर्षं वै केशिसूदनः॥
पुत्रशोकाऽभिसन्तप्ता गान्धारी हतबान्धवा।
यदनुव्याजहाराऽऽर्ता तदिदं समुपागतम्॥ इति च
–मौसलपर्वण्येव (२।१९-२१)।

षट्त्रिंशे च कलौ वर्षे सम्प्राप्तेऽन्धकवृष्णयः।
अन्योन्यं मुसलैस् ते हि निजघ्नुः कालनोदिताः॥ इति
–स्कन्दपुराणे प्रभासखण्डे (१।२३७।५)।

षट्त्रिंशेऽथ गते वर्षे कौरवाणां क्षयात् पुनः।
प्रभासे यादवाः सर्वे विप्रशापात् क्षयं गताः॥ इति

–देवीभागवते (१।८।३)।

एवं च महाभारतयुद्धगताब्देभ्यः कलिगताब्दाः षट्त्रिंशताऽब्दैर् न्यूना इति, ब्रह्मगुप्तेन तदनुयायिभिर् लल्ल-शतानन्द-भास्करादिभिर् ज्यौतिषिकैराधुनिकैस् तिथिपञ्जीकारैश् च वस्तुतो महाभारतयुद्धगताब्दाः युधिष्ठिरगताब्दा वा दुर्योधन-युधिष्ठिरगताब्दा वैव कलिगताब्दत्वेनाऽविवेकेन प्रतिपादिता इत्यवगम्यते। प्राप्यते हि ब्रह्मगुप्त-लल्ल-शतानन्द-भास्करादिभिः कलिगतवर्षत्वेनोक्तानां वर्षाणां महा-भारतयुद्धगताब्दत्वेन युधिष्ठरगताब्दत्वेन दुर्योधन-युधिष्ठिरगताब्दत्वेन वाऽप्युल्लेखः प्राचीनैः कृतः। आर्यभटेन आर्यभटीये दशगीतिकायाम् (श्लो.३) "गुरुदिवसाच् च भारतात् पूर्वम्" इत्यत्र भारतयुद्धगतकालस्यैव कालगणनावधित्वेनोल्लेखः कृतो-ऽस्तीति शङ्करबालकृष्णदीक्षितोऽपि भारतीयज्योतिषनामके हिन्द्यनुवादरूपे ग्रन्थे (१९७५) वदत्येव (पृ.२६५,टि.१)। पण्डित-गौरीशङ्कर-हिराचन्द-ओझा-महाशयेना-ऽपि कल्यब्दाः भारतयुद्धाब्दाः युधिष्ठिराब्दाश् चोच्यन्ते इति भारतीय-प्राचीन-लिपिमाला-नामके देहलीस्थ-मुन्सीराम-मनोहरलालपुनर्मुद्रिते ग्रन्थे (१९७१, पृ.१६१) लिखितं दृश्यत एव। सुमतितन्त्रे इदानीं कल्यब्दत्वेनोच्यमाना अब्दा दुर्योधन-युधिष्ठिराब्दत्वेनोक्ता दृश्यन्ते। एवं च भारतयुद्धाब्दानां कल्यब्दानां चाऽर्वाचीने कालेऽविवेको जातोऽवगम्यते। तस्माद् इदानीं कल्यब्दत्वेन गृह्यमाणा अब्दा आर्य-भट-पुलकेशिशिलालेख-सुमतितन्त्रादिकथनानुसारं भारतयुद्धाब्दत्वेन ग्राह्याः, कल्यब्दास् तु ततो षट्त्रिंशताऽब्दैर् न्यूना मन्तव्याः। ततश् च इदानींतनैर् ज्यौतिषि-कैस् तिथिपत्रेषु ५१०६ इति लिख्यमानेषु कलिगतवर्षेषु षट्त्रिंशता वर्षैर् न्यूनीकृतेषु ५०७० इति सङ्ख्याऽवशिष्यते। तस्यां सङ्ख्यायां पञ्चभिर् विभक्तायां शेषं शून्यं (०) भवति। यस्मिन् वर्षे इदानीन्तनैर् ज्यौतिषिकैस् तिथिपत्रे कलिगतवर्षसङ्ख्या ५१०६ इति लिख्यते तस्मिन् वर्षे तैः शकाब्दसङ्ख्या १९२७ इति लिख्यते। तस्यां शकाब्दसङ्ख्यायां द्व्यूनायां कृतायां १९२५ इति सङ्ख्याऽवशिष्यते। तस्यां च सङ्ख्यायां पञ्चभिर् विभक्तायां शेषं शून्यमेव (०) भवति। एवं च विष्णुधर्मोत्तर-पुराणवचन-रघुनन्दनधृतवचनयोः पञ्चसिद्धान्तिकोक्तपैतामहसिद्धान्तस्य द्व्यूनं शकेन्द्रकालम् इत्यादिना वचनेन सह समन्वयो भवति। तस्माद् वैदिकैः कलि-गताब्दत्वेन वर्तमानकाले ब्रह्मगुप्ताद्यनुयायिभिर् ज्यौतिषिकैस् तिथिपञ्जीकारैश् च गृह्यमाणा अब्दा भारतयुद्धाब्दत्वेन ग्राह्याः। ततः षट्त्रिंशता न्यूना अब्दाश् च कलि-वर्षत्वेन ग्राह्याः। तत्रापि भारतयुद्धसमाप्तितः प्रभृति प्रवृत्तायां वा कलियुगप्रारम्भतः प्रभृति प्रवृत्तायां वा कस्य चन शासककुलस्य वा शासकस्य वा शासनस्य प्रारम्भात्

प्रभृति प्रवृत्तायां वा वर्षगणनायां प्रथमे वर्षे वर्षसङ्ख्या एका (१) इत्येव भवितुमर्हति इति अर्वाचीनैर् ज्यौतिषिकैस् तेषां ग्रहगणनादिसौविध्याय गतवर्षत्वेन गृह्यमाणा अपि भारतयुद्धाद्यब्दाः वैदिकैर् वर्तमानवर्षत्वेनैव ग्राह्या इत्यवगम्यते। दृश्यन्ते हि अशोकस्याऽभिलेखेषु "दशवर्षाभिषिक्तः सन्", "द्वादशवर्षाभिषिक्तेन मया", "विंशतिवर्षाभिषिक्तेन", "षड्विंशतिवर्षाभिषिक्तेन", "सप्तविंशतिवर्षाभिषिक्तेन मया", इति प्रयोगाः 'दशमवर्षाय शासनकर्माधिकारेऽभिषिक्तः' इत्यादेरर्थस्य बोधकाः। हेलियोदोरसाऽभिलेखे च "राज्ञः कौत्सपुत्रस्य भागभद्रस्य त्रातुः वर्षेण चतुर्दशेन राज्येन वर्धमानस्य" इति प्रयोगो दृश्यते। पभोसागुहालेखे च "लयनं कारितम् उदाकस्य दशमे संवत्सरे" इति प्रयोग उपलभ्यते। गोण्डोफर्नीसाऽभिलेखे च "संवत्सरे त्रिशततमके" इति दृश्यते। सुइ-विहार-ताम्रपट्टाभिलेखे च "कनिष्कस्य संवत्सरे एकादशे दैसिकस्य मासस्य दिवसे अष्टाविंशे" इत्युल्लेखः प्राप्यते। अन्धाऊयष्ट्यभिलेखे च "राज्ञः रुद्रदाम्नः जयदामपुत्रस्य वर्षे द्विपञ्चाशे" इति दृश्यते। श्रीधरवर्मणः साँचीशिलालेखे च "स्वराज्याभिवृद्धिकरे वैजयिके संवत्सरे त्रयोदशे" इत्युल्लिखितं प्राप्यते। नासिकगुहाभिलेखे च "राज्ञः गौतमीपुत्रस्य स्वामिश्रीयज्ञसातकर्णेः संवत्सरे सप्तमे" इत्युल्लेखो दृश्यते। लिच्छविभिः शकाब्दोऽपि वर्तमान एवोल्लिखितोऽवगम्यते। एवं च व्यवहारे तेषांतेषां वर्षाणां प्रवृत्तस्य वर्तमानस्य वर्षस्यैवोल्लेखो न्याय्यः स्वाभाविकश् चेत्यवगम्यते। शङ्कर-बालकृष्णदीक्षितस्य हिन्द्यामनूदिते भारतीयज्योतिषनामके ग्रन्थेऽपि (१९७५ सन्, पृ.४८८) "सभी वर्ष वर्तमान ही हैं" (सर्वाणि वर्षाणि वर्तमानान्येव सन्ति) इत्युक्तमेव दृश्यते। एवं च वराहमिहिरोपात्तशकाब्दस्य कलियुगाब्दस्य च समानरूपेण वर्तमानवर्षत्वेन ग्रहणं कृत्वा संवत्सरपरिवत्सरादिज्ञानायोपयोगोऽपि समानरीत्यैव कार्योऽवगम्यते।

अत्रेदमस्माकं संवत्सरपरिवत्सरादिज्ञानाय करणसूत्रम्—

चैत्रशुक्लप्रतिपदि कलेरब्दः प्रवर्तते।
अन्येषां तु मते यावतिथः षट्त्रिंशता ततः ॥१॥
न्यूनः कृष्णयुगाब्दस् तु वैदिकानां प्रवर्तते।
तपश्शुक्लप्रतिपदि तत्पूर्वस्यामिति स्थितिः ॥२॥
तष्टाः कलियुगाब्दास्तु षष्ट्याऽऽदियुगसञ्चयः।
लब्धः, शेषे पञ्चभिस् तु तष्टे लब्धं युगं गतम् ॥३॥
शिष्टेऽत्र खे पञ्चमोऽब्दोऽन्यत्र तत्सङ्ख्यवत्सरः।
सवॅंत्सरादिषु ज्ञेयो वैदिकैर् ब्राह्मणैस् सदा ॥४॥
एतेन वैष्णवादीनि ज्ञेयानि हि युगान्यपि।
प्रभवाद्याः पञ्चकाश् च ज्ञेयाः संवत्सरादिकाः ॥५॥ इति ॥६॥

हिन्दी – जब श्रविष्ठा (धनिष्ठा) नक्षत्र से युक्त (धनिष्ठा नक्षत्र के आदि में वर्तमान) चन्द्रमा और सूर्य आकाश में साथसाथ उदित होते हैं, उसी समय में आद्य पञ्चवर्षात्मक युग, माघमास, तपश्शुक्लपक्ष (-प्रतिपदा) और उदगयन भी साथ साथ शुरू होते हैं।

विशेष – इस श्लोक से वैदिक नववर्ष का आरम्भ माघशुक्ल-प्रतिपदा में होता है, चैत्रशुक्लप्रतिपदा में नहीं, यह बात स्पष्ट हो जाती है, और प्रमाणित भी होती है। इस विषय में संस्कृतव्याख्या और भूमिका में विस्तार से प्रतिपादन किया गया है। सूर्य के वास्तविक दृक्सिद्ध उत्तरायणप्रारम्भ के आसन्न काल में पडने वाली शुक्लप्रतिपदा ही तपश्शुक्लप्रतिपदा अथवा माघशुक्लप्रतिपदा है यह बात भी इसी श्लोक से और अधिमासव्यवस्था से अवगत होती है। इस स्थिति में लाहिरी का अर्वाचीन राशिपद्धति में आधृत मासपरिभाषा को मानकर निर्धारित माघशुक्लप्रतिपदा में वेदाङ्गज्योतिषोक्त नववर्षारम्भ मानना अयुक्त ही सिद्ध होता है।

वर्तमान वर्ष वैदिक संवत्सर-परिवत्सरादि वर्षों में कौन सा वर्ष है और चान्द्र प्रभवादि ६० वर्षों में वर्तमान वर्ष कौन सा वर्ष है, इस बात को जानने के लिए वर्तमान काल में प्रसिद्ध कलिवर्षसङ्ख्या को महाभारतयुद्धाब्द मान कर उस में ३६ घटाकर उस को वर्तमान कलिवर्ष मानकर उस में ६० का भाग देकर शेष से चान्द्र प्रभवादि संवरत्सरों को जानना चाहिए और उस शेष को ५ का भाग देकर लब्धि तथा शेष से बीते हुए तथा वर्तमान वैष्णवादि युगों को और शेष से वर्तमान वैष्णवादि युग के संवत्सर-परिवत्सरादि वैदिक वर्षों को जानना चाहिए। जैसे उक्त प्रकार के कलिवर्ष में ६० का भाग देने से २९ शेष रहने पर चान्द्र प्रभवादि में २९ वां मन्मथ संवत्सर होगा, २९ में ५ का भाग देने से लब्धि ५ और शेष ४ होने से वैष्णवादि ५ युग बीतने पर छठा आहिर्बुध्न्य युग वर्तमान होगा और उसका चौथा वर्ष वैदिक ५ वर्षों में से चौथा इद्वत्सर होगा॥६॥

[उदगयन-दक्षिणायनकालनिर्देशः]

प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक्।
सार्पार्ऽर्धे दक्षिणाऽर्कस् तु माघश्रावणयोः सदा॥७॥

(सोमाकरभाष्यम्)

प्रपद्येते श्रविष्ठादावितिः। सर्वेषु युगेषु सूर्याचन्द्रमसावुदक् प्रवृत्तिं प्रपद्येते। श्रविष्ठादौ प्रथमेऽंशे। तथा सार्पार्धेऽश्लेषामध्ये ग्रीष्मान्ते सूर्यो दक्षिणां प्रपद्यते। एवं तस्याऽयने माघश्रावणयोः सर्वकालं पञ्चस्वपि संवत्सरेष्वित्यर्थः। एवं भूतस्य॥७॥

(कौण्डिन्न्यायनव्याख्यानम्)

अथ शिष्यबुद्धिवैशद्याय आद्ययुगप्रवृत्तिसन्निकृष्टस्य कालस्य वैशिष्ट्यं शास्त्रकारो वर्णयति प्रपद्येते श्रविष्ठादा**वित्यादिना।**

श्रविष्ठादौ स्थितौ सूर्यचन्द्रौ उदगयनं प्राप्नुतः, आश्लेषार्धे स्थितो सूर्यो दक्षिणायनं प्राप्नोति, सूर्यः सदा माघे श्रावणे च क्रमेण उदगयनं दक्षिणायनं च प्राप्नोतीत्यर्थः। माघे उदगयनं शाङ्खायनब्राह्मणे (१९।३) मैत्रायणीयारण्यकादिषु चोक्तमेव।

विशेषः— अत्र 'प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक्' इति वाक्ये आदियुगस्यादौ सूर्यस्य चन्द्रस्य चोत्तरायणप्रवृत्तिः सहैव भवतीति प्रतिपादितम्। चन्द्रस्य अयनानां प्रतिपादनं शास्त्रकारः पश्चात् करिष्यति। ६२ चान्द्रमासेषु चन्द्रस्याऽयनानि १३४ सङ्ख्याकानि भवन्तीति च तत्र प्रतिपादयिष्यते (श्लो. ३०)। मुख्यरूपेण त्वत्र सूर्यस्यैवोदगयनप्राप्तिर् विवक्षितेति 'अर्कस् तु माघश्रावणयोः सदा' इत्यत्र सूर्यस्य पृथगुल्लेखादवगम्यते। आद्ययुगप्रवृत्तिकाले पौर्णमासीनक्षत्रमूलकचान्द्रमासनाम्नां माघफाल्गुनादीनाम् ऋतुबद्धचान्द्रमासनाम्नां तपस्तपस्यादीनां च सुसमन्वितत्वस्य स्थितत्वम् उभयेषां नाम्नां समन्वयस्य ऋतु-बद्धताप्राधान्येन सदा स्थापनीयत्वं च सूचयितुम् 'अर्कस् तु सदा माघे श्रावणे च क्रमेण उदगयनं दक्षिणायनं च प्राप्नोति' इत्युक्तं बोध्यम्। एवं च माघश्रावणयोर् मासयोरपि सदा वास्तविकसूर्योदगयन-दक्षिणायन-सम्बद्धत्वस्य स्थापनीयत्वं विशेषेणाऽवगन्तव्यम्।

अत्र वास्तविकर्तुनियामकत्वं सूर्योदगयनस्य सूर्यदक्षिणायनस्यैव न सूर्यनक्षत्रयोगस्येति, वेदमन्त्रोक्तानां तपस्-तपस्य-मधु-माधवादीनां मासानां "तपश् च तपस्यश् च शैशिरावृतू" "मधुश् च माधवश् च वासन्तिकावृतू" इत्यादीनां मन्त्रवाक्याणां प्रामाण्याद् ऋतुबद्धत्वमवगम्यते इति, ब्राह्मणग्रन्थ-श्रौतसूत्रादिषु माघफाल्गुनादीनां मासनाम्नां प्रयुक्तत्वेऽपि "मन्त्रचोदनयोर् मन्त्रबलं प्रयोगित्वात्" इति कात्यायनश्रौतसूत्रस्य (१।५।७) "मन्त्रतस् तु विरोधे स्यात् प्रयोगरूपसामर्थ्यात् तस्मादुत्पत्तिदेशः सः" इति जैमिनीयधर्ममीमांसासूत्रस्य च (५।१।१६) वचनात् मन्त्रप्रयोगस्यैव प्राधान्यं स्वीकर्तव्यमिति, पाणिनीयव्याकरणादिकृतस्य प्रकृतिप्रत्ययकल्पनामूलकमाघादिपदनिर्वचनस्य च वैदिकधर्ममीमांसकशिरोमणेः कुमारिलभट्टस्य तन्त्रवार्तिके (२।१।१७) स्थितस्य "यत्राऽर्थस्य विसंवादः प्रत्यक्षेणोपलभ्यते। स्वरसंस्कारमात्रार्था तत्र व्याकरणस्मृतिः" इति वचनस्य विचारेण विषयव्यवस्थायाः स्वीकर्तव्यत्वमिति चाऽत्र "प्रपद्येते श्रविष्ठादौ" इत्यादिके लगधमुनिश्लोके युगव्यवच्छेदकत्वेन, वर्षपरिमाणव्यवच्छेदकत्वेन च मुख्यं प्रतिपाद्यं सूर्यस्योदगयनं दक्षिणायनं चैवेत्यवगन्तव्यम्। यथा 'काकवद् देवदत्तस्य गृहम्' इत्यत्र परिचेयं देवदत्तस्य गृहमेव प्रधानम्, काकस् तूपलक्षणमेवेति प्रथममुपलक्षणेन देवदत्तगृहे परिचिते काके उड्डीय गतेऽपि प्रथमं परिचितं देवदत्तगृहं परिचितमेव भवति, तथैव उदगयनोपलक्षणभूते नक्षत्रे कालान्तरे उदगयनेनाऽसम्बद्धे जातेऽपि उदगयन-

मुदगयनत्वेन परिचितमेव भवतीति शास्त्रस्याऽवितथत्वं मन्तव्यम्। 'काकवद् देवदत्तस्य गृहम्' इति कथयत आप्तस्य वचनं कालान्तरे देवदत्तगृहस्य काकाऽसम्बन्धमुपलभ्य वितथमिति न हि निन्द्यते। लगधमुनिप्रोक्ते वेदाङ्गज्योतिषग्रन्थे श्रविष्ठास्थस्य सूर्यस्योदगयनं प्रतिपादितमस्ति, सूर्यप्रज्ञप्तौ कालालोकप्रकाशे च अभिजिन्नक्षत्रस्थस्य सूर्यस्योदगयनं प्रतिपादितमस्तीति शामशास्त्री वक्ति, बृहत्संहिताया आदित्यचाराध्याये वराहमिहिरेण उत्तराषाढास्थस्य (मकरादिस्थस्य) सूर्यस्योदगयनं प्रतिपादितमस्ति, इदानीं तु मूलनक्षत्रस्थस्य (धनुःस्थस्य) सूर्यस्योदगयनं भवति। एवं च सूर्योदगयननक्षत्रं कालक्रमेण परिवर्तितं भवतीति ज्ञायते। महाभारतेऽपि शोधसंस्करणे वनपर्वणि (आरण्यकपर्वणि) "धनिष्ठादिस् तदा कालो ब्रह्मणा परिनिर्मितः। रोहिण्याद्योऽभवत् पूर्वमेवं सङ्ख्या समाऽभवत्" इति (२१९।१०) धनिष्ठादिकस्य कालस्योल्लेखो दृश्यते, आदिपर्वणि "अतिनक्षत्रवंशाच् च क्रुद्धो नक्षत्रसम्पदा। प्रति श्रवणपूर्वाणि नक्षत्राणि ससर्ज यः" (६५।३४) इति श्रवणादिकस्य कालस्य चोल्लेखो दृश्यते इति कालक्रमेण सूर्योदगयननक्षत्रं परिवर्तितं भवतीति महाभारतेऽपि स्वीकृतमेव प्रतीयते। यद्यपि आश्वमेधिकपर्वण्यपि पुण्यपत्तनस्थचित्रशालासंस्करणे "श्रवणादीनि ऋक्षाणि" इति (४८।२) पाठो दृश्यते, तथापि तत्र शोधसंस्करणे तु "श्रविष्ठादीनि ऋक्षाणि" इति पाठो दृश्यते इति विज्ञैः परिचिन्तनीयोऽयं पाठः। नीलकण्ठेन त्वयं श्लोको व्याख्यातो न दृश्यते। मैत्रायणीयारण्यके "मघाद्यं श्रविष्ठार्धमाग्नेयम्" इत्यादिना (६।१४) श्रविष्ठार्धेऽयनप्रारम्भः प्रतिपादितः, वेदाङ्गज्योतिषे तु श्रविष्ठादावयनप्रारम्भः प्रतिपादित इति वैदिकैरार्यैरयनचलनं ज्ञातं स्वीकृतं चाऽवगम्यत एव। अतः शङ्करबालकृष्णदीक्षित-बालगङ्गाधरतिलकादीनां वेदाङ्गज्योतिषकालेऽयनचलनज्ञानं नाऽऽसीदिति कथनम्[1] अविचारितरमणीयं दृश्यते। "अयनं मघा मे" इति अथर्ववेदेऽपि (१९।७।२) मघादिकमयनं सूचितमस्ति। ऋग्वेदेऽपि "द्वे स्रुती" इति (१०।८८।१५) अयनं सूचितमेवास्ति। एतादृश्यां स्थितौ केचन मन्दाः पञ्चसिद्धान्तिकायाः प्रारम्भे वराहमिहिरेण "पौलिश-रोमक-वासिष्ठ-सौर-पैतामहास् तु सिद्धान्ताः। पञ्चभ्यो द्वावाद्यौ व्याख्यातौ लाटदेवेन॥ पौलिशकृतः स्फुटोऽसौ तस्याऽऽसन्नस् तु रोमकः प्रोक्तः। स्पष्टतरः सावित्रः परिशेषौ दूरविभ्रष्टौ" इत्युक्तम्, बृहत्संहितायाम् आदित्यचाराध्यायस्यादौ "आश्लेषार्धाद् दक्षिणमुत्तर-

---

१. १९५३तमे वैक्रमेऽब्दे (१८९६तमे क्रैस्ताब्दे) प्रथमं प्रकाशिते "भारतीय ज्योतिष शास्त्रा चा इतिहास आणि परिचय" इत्याख्ये महाराष्ट्रभाषामये ग्रन्थे, अस्माभिर् दृष्टे तस्य ग्रन्थस्य भारतीयोत्तरप्रदेशस्थ-शासकीयहिन्दीसमित्या तृतीयसंस्करणतया २०३२तमे वैक्रमाब्दे [१९७५तमे क्रैस्ताब्दे] प्रकाशिते शिवनाथझारखण्डिकृते भारतीय ज्योतिष इत्याख्ये हिन्द्यनुवादे [पृ. १२६], १९२५तमे क्रैस्ताब्दे प्रकाशिते "वेदिक् क्रोनोलजि याण्ड् वेदाङ्गज्योतिष" इत्याख्ये ग्रन्थे [पृ.२४]।

मयनं रवेर् धनिष्ठाद्यम्। नूनं कदाचिदासीद् येनोक्तं पूर्वशास्त्रेषु॥ साम्प्रतमयनं सवितुः कर्कटकाद्यं मृगादितश् चाऽन्यत्। उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणैर् व्यक्तिः" इत्युक्तं चोपलभ्य पैतामहसिद्धान्तस्य तन्मूलभूतस्य लगधमुनिसिद्धान्तस्य च दूर-विभ्रष्टत्वं विकृतत्वं च स्वीकृत्य हेयत्वं मन्यन्ते। वस्तुतस् तु यथा वराहमिहिरेण बृहत्संहितायामादित्यचाराध्याये "अप्राप्य मकरमर्को विनिवृत्तो हन्ति सापरां याम्याम्। कर्कटकमसम्प्राप्तो विनिवृत्तश् चोत्तरां सैन्द्रीम्॥ उत्तरमयनमतीत्य व्यावृत्तः क्षेम-सस्यवृद्धिकरः। प्रकृतिस्थश् चाऽप्येवं विकृतगतिर् भयकृदुष्णांशुः" इति मूढतापूर्णं जल्पितम्, न तथा लगधमुनिना किमपि प्रतिपादितमिति लगधमुनिकृतस्य ग्रन्थस्य वैदिककालगणनापद्धतिदिक्प्रदर्शनमात्रपरस्य विभ्रष्टत्वं विकृतत्वं च नैव मन्त-व्यम्। स्वग्रन्थस्य दिक्प्रदर्शनमात्रपरत्वं च लगधमुनिना "इत्युपायसमुद्देशो भूयो-ऽप्येनं प्रकल्पयेत्" (श्लो.४२) इति वचनेन प्रतिपादितमेव॥७॥

हिन्दी – (उस आदियुग में) धनिष्ठा नक्षत्र के आदि में स्थित सूर्य और चन्द्रमा उत्तर की ओर चलते हैं और आश्लेषा नक्षत्र के अर्धभाग में स्थित सूर्य तो में दक्षिण की ओर चलता है। सदाकाल माघ मास में (सूर्यका) उत्तरायण और श्रावणमास में दक्षिणायन होता है।

आद्ययुगप्रवृत्तिकाल में पौर्णमासीनक्षत्रमूलक चान्द्रमासनाम माघफाल्गुनादि की और ऋतुबद्ध चान्द्रमासनाम तपस्तपस्यादिकों की सुसमन्वितता होने की बात तथा दोनों प्रकार के नामों का समन्वय का ऋतु-बद्धता-प्रधानतया सदा स्थापनीयत्व भी सूचित करने के लिए सूर्य का सदा माघ और श्रावण में क्रमशः उदगयन और दक्षिणायन होने की बात बताई गई है। इस से वेदाङ्गज्योतिषकार को माघ-श्रावणादि मास की ऋतुबद्धता मान्य होने की बात अवगत होती है।

वास्तविक ऋतुनियामकत्व सूर्य के उदगयन और दक्षिणायन का ही है, न कि सूर्य के नक्षत्रयोग का, वेदमन्त्रोक्त तपस्-तपस्य-मधु-माधवादि मासों का *"तपश् च तपस्यश् च शैशिरावृतू"* *"मधुश् च माधवश् च वासन्तिकावृतू"* इत्यादि मन्त्रवाक्य के प्रामाण्यसे ऋतुबद्धता अवगत होती है। ब्राह्मणग्रन्थ-श्रौतसूत्रादि में माघ-फाल्गुनादि मासनामों का प्रयुक्त होने पर भी *"मन्त्रचोदनयोर् मन्त्रबलं प्रयोगित्वात्"* इस कात्यायनश्रौतसूत्र के वचन से (१।५।७) और *"मन्त्र-तस् तु विरोधे स्यात् प्रयोगरूपसामर्थ्यात् तस्मादुत्पत्तिदेशः सः"* इस जैमिनीय धर्ममीमांसासूत्र के (५।१।१६) वचन से भी मन्त्रप्रयोग का ही प्राधान्य स्वीकर्तव्य होता है, अतः पाणिनीय-व्याक-रणादिकृत प्रकृतिप्रत्ययकल्पनामूलक माघादिपदनिर्वचन का वैदिकधर्ममीमांसकशिरोमणि कुमारिलभट्टकृत तन्त्रवार्तिक में (२।१।१७) स्थित *"यत्राऽर्थस्य विसंवादः प्रत्यक्षेणोपलभ्यते। स्वरसंस्कारमात्रार्था तत्र व्याकरणस्मृतिः"* इस वचन के विचार से विषयव्यवस्था स्वीकर्तव्य होती है। *"प्रपद्येते श्रविष्ठादौ"* इत्यादि लगधमुनिश्लोक में युगवर्षपरिच्छेदक के रूप में सूर्य का उदगयन और दक्षिणायन ही मुख्य प्रतिपाद्य है, ऐसा जानना चाहिए। लगधमुनिप्रोक्त वेदाङ्ग-ज्योतिषग्रन्थ में धनिष्ठास्थ सूर्य का उदगयन प्रतिपादित है, सूर्यप्रज्ञप्ति और कालालोकप्रकाश

में अभिजिन्नक्षत्रस्थ सूर्य का उदगयन प्रतिपादित होने की बात शामशास्त्री ने कही है, बृहत्-संहिता में आदित्यचाराध्याय में वराहमिहिरद्वारा उत्तराषाढास्थ (मकरादिस्थ) सूर्य का उदगयन प्रतिपादित है, इस समय तो मूलनक्षत्रस्थ (धनुःस्थ) सूर्य का उदगयन होता है। इस प्रकार सूर्योदगयननक्षत्र कालक्रम से परिवर्तित होता रहता है, यह बात अवगत होती है। अतः लगध-मुनिकृत ग्रन्थ का वैदिककालगणनापद्धति के दिक्प्रदर्शनमात्र में तात्पर्य होने से विभ्रष्टत्व वा विकृतत्व नहीं मानना चाहिए। अपने ग्रन्थ की दिक्प्रदर्शनमात्रपरता को लगधमुनि ने *"इत्यु-पायसमुद्देशो भूयोऽप्येनं प्रकल्पयेत्"* (श्लो.४२) इस वचन से प्रतिपादित भी किया है।

मैत्रायणीयारण्यक में *"मघाद्यं श्रविष्ठार्धमाग्नेयम्"* इत्यादि वचन से (६।१४) धनिष्ठा के मध्य में सूर्य के पहुँचने पर उदगयन का प्रारम्भ प्रतिपादित है, वेदाङ्गज्योतिष में तो धनिष्ठा के आदि में उदगयन का प्रारम्भ प्रतिपादित है। अतः वैदिक आर्यों से अयनचलन ज्ञात और स्वीकृत भी था, यह बात अवगत होती है। अतः शङ्करबालकृष्ण दीक्षित (भारतीय ज्योतिष, उत्तरप्रदेश हिन्दी समिति, सन् १९७५, पृ. १२६) , बालगङ्गाधर तिलक ("वेदिक् क्रोनोलजि याण्ड् वेदाङ्गज्योतिष" नामक ग्रन्थ, सन् १९२५, पृ.२४) इत्यादि अध्येताओं का वेदाङ्ग-ज्योतिषकाल में अयनचलन का ज्ञान नहीं था, यह कथन अविचारितरमणीय दीखता है॥७॥

[दिनवृद्धि-क्षपाह्रासादिप्रतिपादनम्]

घर्मवृद्धिरपां प्रस्थः क्षपाह्रास उदग्गतौ।
दक्षिणेतौ विपर्यासः षण्मुहूर्त्ययनेन तु॥८॥

(सोमाकरभाष्यम्)

घर्मवृद्धिरपां प्रस्थ इति। तस्य सूर्यस्य उदग्गतौ निमित्ते घर्मवृद्धिर् भवतीति वाक्यशेषः। घर्म इत्यहर्नाम। **"घर्मः, घ्रंसः, घृणिः"** इत्यहर्नामसु पठितम्। तथा क्षपाह्रासः। **"रात्रिः, क्षपा, श्यावी, शर्वरी"** इति रात्रिनामसु पठितम्। तदाप्रभृति दिनानि वर्धन्ते रात्रिश् चाऽपचीयते। एवमेव तस्य दक्षिणेतौ विपर्यासः। दक्षिणायने दिनह्रासो रात्रिवृद्धिश् चेत्युक्तं भवति। कियती वृद्धिरित्याह षण्मुहूर्त्ती षण् मुहूर्ताः।

तथा च गर्गः –

उदग्गतेऽर्के षण्मासास् तपादीनार्कमानजाः।
क्रमादेद्रात्रयः षट्सङ्ख्या दिनवृद्धिमिति॥
उदग्गतेऽर्के षण्मासास् तपाद्या अर्कमानजाः।
क्रमादह्नां मुहूर्ताः स्युः षट्सङ्ख्या दिनवृद्धये॥

एवमयने वृद्धिह्रासौ। तथा च साऽपि कियतीत्याह प्रस्थो द्वात्रिंशत्पुलाकम् इत्यर्थः। एवं पञ्चानामपि युगानामहःसामान्यलक्षणमाह॥८॥

(कौण्डिन्यायनव्याख्यानम्)

सूर्यस्य उदगयने दिनवृद्धेः क्षपाह्रासस्य सूर्यस्य दक्षिणायने क्षपावृद्धेर् दिनह्रासस्य च निदर्शनाय देशविशेषे तद्व्यवस्थां वर्णयति शास्त्रकारः घर्मवृद्धिरपां प्रस्थ इत्यादिना।

सूर्यस्योदगयने दिनस्य वृद्धिः प्रत्यहं घटीयन्त्रे अपां प्रस्थस्याऽऽगमनेन मितेन कालेन भवति, क्षपाह्रासोऽपि प्रत्यहं तावतैव कालेन मितो भवति। सूर्यस्य दक्षिणतो गमने दिनवृद्धिक्षपाह्रासयोर् विपर्यासो भवति, दिनह्रासः क्षपावृद्धिश् च भवतः। उदगयने रात्रिपक्षाद् दिनपक्षं प्रति षण्णां मुहूर्तानां क्रमशो गमनेन, दक्षिणायने च दिनपक्षाद् रात्रिपक्षं प्रति षण्णां मुहूर्तानां क्रमशो गमनेन च दिनवृद्धिक्षपाह्रासौ क्षपावृद्धि-दिनह्रासौ च भवतः इत्यर्थः। सूर्यस्य दक्षिणायने रात्रिवृद्धिः प्रत्यहं घटीयन्त्रे अपां प्रस्थस्याऽऽगमनेन मितेन कालेन सम्मिता भवति, दिनह्रासोऽपि प्रत्यहं तावतैव कालेन सम्मितो भवतीत्यर्थः। एवं च दिनक्षपयोर् दैर्घ्यस्याऽन्तरमयनयोरन्ते मुहूर्तषट्कमितं भवति। पाणिनीयव्याकरणभाष्येऽपि "षण् मुहूर्ताश् चराचराः। ते कदाचिदहर् गच्छन्ति कदाचिद् रात्रिम्" (२।१।२९,वा.२) इत्युल्लिखितं दृश्यते। एतादृशी स्थितिश् च कश्मीरदेशे सम्भवतीति वदन्ति। उदगयने दिनवृद्धिः शाङ्खायनब्राह्मणेऽपि (१९।३) उल्लिखिताऽस्ति। एतच् च वस्तुकथनं चान्द्राणां मासानां चान्द्राणामृतूनां च सौरैर् ऋतुभिः सह चान्द्रमासषट्कात्मकस्य चान्द्रर्तुत्रयात्मकस्य च चान्द्रस्याऽयनस्य सौरेणाऽयनेन सह च सम्बन्धस्याऽवबोधनायोपायविशेषस्य प्रदर्शनाय कृतमवगम्यते। प्रस्थजलमितः कालश् च सार्धद्वादशपलात्मक इति सुधाकरेण स्पष्टीकृतमस्ति। एतच् च 'पलानि पञ्चाशदपां धृतानि' इत्यादिकात् मूलग्रन्थश्लोकादेवावगम्यते (श्लो.२४) इति च तेनोक्तमस्ति। प्रस्थरूपस्य मानस्य परिचयस् तु 'प्रस्थो द्वात्रिंशत्पुलाकम्' इति सोमाकरभाष्ये दृश्यते। तत्र द्वात्रिंशत्पलकमिति पाठः साधुः प्रतीयते। अत्र गोपथब्राह्मणवचनत्वेन दानसागरे (पृ.६८) "माषकाणि चतुःषष्टिः पलमेकं विधीयते। द्वात्रिंशत्पलिकं प्रस्थं स्वयमुक्तमथर्वणा। आढकस् तु चतुःप्रस्थैश् चतुर्भिर् द्रोणमाढकैः। द्रोणप्रमाणं विज्ञेयं ब्रह्मणा निर्मितं पुरा। द्वादशाभ्यधिकैर् नित्यं पलानां पञ्चभिः शतैः" इति वचनं धृतं दृश्यते, तथैव गोपथब्राह्मणवचनत्वेनैव हेमाद्रिणा दानखण्डे (पृ.१२०) "पञ्चकृष्णलको माषस् तैश् चतुष्षष्टिभिः पलम्। पलैर् द्वात्रिंशद्भिः प्रस्थो मागधेषु प्रकीर्तितः। आढकस् तैश् चतुर्भिश् च द्रोणः स्याच् चतुराढकः" इति वचनं धृतं दृश्यते। तथाऽपि लगधमुनिना तु गोपथब्राह्मणवचनत्वेनोद्धृतमधुना गोपथब्राह्मणेऽनुपलभ्यमानमेतद् वचमनुसृतं नाऽवगम्यते।

विशेषः—एतेन श्लोकेन चान्द्रवर्षायनर्तुमासाधिमासव्यवस्थापकत्वेन दृक्-सिद्धं दिनवृद्धिक्षपाह्रासयुतं क्षपावृद्धिदिनह्रासयुतं सौरमयनं निपुणं निरीक्ष्य गृह्यते वैदिकैरित्यपि सूचितं ज्ञेयम्। एवं च युगस्य श्रविष्ठादित्वादीनां प्रतिपादनादुत्तर-मागतमेतत् प्रतिपादनम् अयनविषयकशाश्वतनिष्कर्षात्मकं बलवत्तमं च बोध्यम्। दिनमानप्रतिपादनेनाऽपि (श्लो. ४०) **एतदेव सूचितमवगन्तव्यम्॥८॥**

हिन्दी– सूर्य के उत्तर की ओर चलने पर नाडीयन्त्र में एक प्रस्थ पानी आने में जितना समय लगता है उतना समय (प्रतिअहोरात्र) दिन की वृद्धि और रात का ह्रास (क्षय) होता है, सूर्य की दक्षिण की ओर गति होने पर उलटा (दिन में ह्रास और रात में वृद्धि) होता है। यह दिन की वृद्धि और रात का ह्रास तथा रात की वृद्धि तथा दिनका ह्रास छह मुहूर्तों के समूह का इधर-उधर (कभी दिन की ओर और कभी रात की ओर) चलने से होता है।

विशेष– इस श्लोक से चान्द्र वर्ष, अयन, ऋतु, मास, अधिमास के व्यवस्थापक के रूप में दृक्सिद्ध दिवसवृद्धि तथा रात्रिह्रास से युक्त और रात्रिवृद्धि तथा दिवसह्रास से युक्त सौर अयन को सूक्ष्म रूप में निरीक्षण करके ही वैदिकों से लिया जाता है, यह बात भी सूचित हुई है। दिवसप्रमाण (दिनमान) के प्रतिपादन से भी (श्लो. ४०) यह बात सूचित होती है। वेदाङ्गज्योतिष के अन्य व्याख्याता और समीक्षक लोग इस श्लोक के मर्म को ठीक प्रकार से न समझने से और वेदाङ्गज्योतिष की शैली को भी ठीक प्रकार से अवगत न कर सकने से वेदाङ्गज्योतिषकार को वस्तुतः सौर वर्ष अयन ऋतु इत्यादि का सर्वथा वास्तविक मान ही अभीष्ट है, तथापि प्रयोग में चान्द्रमान ही प्रधान होने से केवल गणितलाघवादि के लिए ही आसन्न सौर मान को लेकर गणित प्रदर्शित किया गया है, इस बात को हृदयङ्गम न कर सके और अनेक अयुक्तियुक्त कल्पना कर बैठे, इस तथ्य में ध्यान देना चाहिए॥८॥

[सौरायनारम्भस्थायिनस् तिथयः]

प्रथमं सप्तमं चाहुरयनाद्यं त्रयोदशम्।
चतुर्थं दशमं चैव द्विर् युग्मं बहुले त्वृतौ॥९॥

(सोमाकरभाष्यम्)

प्रथमं सप्तमं चाऽऽहुरिति। एतानि आद्यानि दिनानि द्वेद्वे युगाब्दानां पञ्चानाम्। कथम्? प्रथमं सप्तमं चाऽऽद्यस्य माघशुक्लप्रतिपत् श्रावणशुक्लसप्तमी च। तयोरुदगयन-दक्षिणायने। संवत्सरस्येत्याहुर् गर्गादयः। तथा द्वितीयस्य त्रयोदशं शुद्धं चतुर्थं कृष्णम्। एवं तृतीयस्य दशमं कृष्णम्। द्विरेवं पुनर् बहुलेऽप्यृतौ कृष्णपक्षकाले बहुलचन्द्रस्य कलास् ततो लीयन्ते। ततो बहुलमपरपक्षः। कथम्? प्रतिपदि द्वेद्वे इत्यर्थः। एतत् तूत्तरस्मिन् श्लोके स्फुटतरं गर्गवाक्यैः प्रतिपादयिष्यामः॥९॥

(कौण्डिन्न्यायनव्याख्यानम्)

पुनरपि चान्द्राणां मासानां चान्द्रमासद्वयात्मकानां चान्द्राणामृतूनां च सौरैर् ऋतुभिः सह, चान्द्रमासषट्कात्मकस्य चान्द्रर्तुत्रयात्मकस्य च चान्द्रस्याऽयनस्य सौरेणाऽयनेन सहाऽपि सम्बन्धस्याऽवबोधनायोपायविशेषस्य प्रदर्शनं कुर्वन्नाह ग्रन्थकारः प्रथमं सप्तमं चाऽऽहुरित्यादि।

प्रथमं तिथिम्, सप्तमं तिथिम्, त्रयोदशं तिथिम्, चतुर्थं तिथिम्, दशमं तिथिं च प्रत्येकं द्विर्द्विः क्रमेण सौराणामयनानामाद्यं तिथिमाहुः पञ्चवर्षात्मकयुगरूपकाल-गणनाविज्ञाः, तत्र चतुर्थ-दशमरूप-युग्मतिथिं तु बहुले काले कृष्णपक्षरूपे अव-स्थायिनमाहुरित्यर्थः। एतच् च सोमाकरेण दशमश्लोकव्याख्याने धृतैः गर्गश्लोकैः प्रातिस्विकतया स्पष्टरूपेणोक्तमस्ति। ऋतुशब्दोऽत्र ऋग्वेदादिष्विव कालसामान्य-वाची। गमनशीलत्वात् काल ऋतुरुच्यते। एतच् च पञ्चवर्षात्मकयुगगणनाधार-भूताऽऽदर्शरूपपञ्चवर्षात्मकयुगमादाय निदर्शनमात्ररूपेणोक्तमवगन्तव्यम्। एवं च पञ्चवर्षात्मकयुगगणनाधारभूताऽऽदर्शरूपपञ्चवर्षात्मके युगे दशसु सौरायनानामादिषु माघशुक्लप्रतिपत्, नभश्शुक्लसप्तमी, माघशुक्लत्रयोदशी, नभस्यकृष्णचतुर्थी, माघकृष्णदशमी, नभश्शुक्लप्रतिपत्, माघशुक्लसप्तमी, श्रावणशुक्लत्रयोदशी, तपःकृष्णचतुर्थी, श्रावणकृष्णदशमी च क्रमेण भवन्तीति ज्ञेयम्।

विशेषः— एतस्मिन् श्लोके कृतोऽयनादितिथिनिर्देशो गणितानुसारं शुक्ल-पक्षस्य चतुर्दश्यपि त्रुट्यतीति स्वीकृत्य कृतोऽवगम्यते। अस्माभिस् तु वैदिक-संवत्सरपञ्ज्यां गवामयनसत्रादिविधायकब्राह्मणादिविचारेण तिथयः प्रदर्शिताः ॥९॥

हिन्दी – (उक्त आदियुग में) प्रथम, सप्तम, त्रयोदश, चतुर्थ और दशम तिथि को क्रमशः दो वार (सूर्य के) अयन (दूसरे अयन में गमन) के आदि में रहने वाले तिथि (वैदिक ज्योतिषज्ञ मुनि लोग) बताते हैं। उन में समसङ्ख्या के तिथि (चतुर्थ और दशम तिथि) तो कृष्ण पक्षके समय में पडते हैं॥९॥

[सौरायनारम्भस्थायीनि चान्द्रनक्षत्राणि]

वसुस् त्वष्टा भवोऽजश् च मित्रः सर्पोऽश्विनौ जलम्।
धाता कश् चाऽयनाद्याः स्युरर्धपञ्चमभस् त्वृतुः॥१०॥

(सोमाकरभाष्यम्)

वसुस् त्वष्टा भवोऽजश् चेति। वसुर् धनिष्ठा देवतोपलक्षिता। एवं त्वष्टा चित्रा। भवो रुद्र आर्द्रा। अजः पूर्वप्रोष्ठपदाः। मित्रोऽनुराधाः। सर्प आश्लेषाः। अश्विनावश्वयुजौ।

जलं पूर्वाषाढाः। धाता उत्तरफल्गुनी **"धाताऽर्यमा"** (द्रष्टव्यं तैत्तिरीयारण्यकम् १।१३।३) इति मन्त्रवर्णात्। को रोहिणी। एवमेते ऋक्षाः। एतेनैव क्रमेणाऽयनाद्याः स्युर् भवेयुः। एवमप्यर्धपञ्चमभस् त्वृतुः। ऋतौऋतौ सार्धाश् चत्वार ऋक्षा भवन्ति। वक्ष्यमाणनक्षत्रैर् जावाद्यैः। एतस्मिन्नर्थे प्रतिपत्त्यर्थं विस्तरेणाऽऽह गर्गः। तद् यथा–

अयनान्यृतवो मासाः पक्षास् तृक्षं तिथिर् दिनम्।
तत्त्वतो नाधिगम्यन्ते यदाऽब्दो नाधिगम्यते॥१॥
यदा तु तत्त्वतोऽब्दस्य क्रियतेऽधिगमो बुधैः।
तदैवैषाममोहः स्यात् क्रियाणाज् चाऽपि सर्वशः॥२॥
तस्मात् संवत्सराणां तु पञ्चानां लक्षणानि च।
कर्माणि च पृथक्त्वेन दैवतानि च वक्ष्यति॥३॥
यदा माघस्य शुक्लस्य प्रतिपद्युत्तरायणम्।
सहोदयं श्रविष्ठाभिः सोमार्कौ प्रतिपद्यतः॥४॥
तदा *नभस्य*(नाभस-)सप्तम्यां क्रियते दक्षिणायनम्।
सार्पार्धे कुरुते युक्तिं चित्रायां च निशाकरे॥५॥
प्रथमः सोऽग्निदैवत्यो नाम्ना संवत्सरः स्मृतः।
यदा माघस्य शुक्लस्य त्रयोदश्यामुदग् रविः॥६॥
युक्ते चन्द्रमसा रौद्रे वासत्वं प्रतिपद्यते।
चतुर्थ्यां नभसः कृष्णे तदाऽर्को दक्षिणायनम्॥७॥
सार्पार्धे कुरुते सूर्यस् त्वजयुक्ते निशाकरे।
द्वितीयश् चाऽर्कदैवत्यः स नाम्ना परिवत्सरः॥८॥
कृष्णे माघस्य दशमी वासवादौ दिवाकरः।
उदीचीं दिशमातिष्ठेत् मैत्रस्थेऽकृष्णतेजसि॥९॥
नभसश् चातिवर्तेत शुक्लस्य प्रथमे तिथौ।
चन्द्रार्काभ्यां सुयुक्ताभ्यां सार्पार्धे वायुदैवतम्॥१०॥
तदा तृतीयं तं प्राहुरिदासंवत्सरं जनाः।
सप्तम्यां माघशुक्लस्य वासवादौ दिवाकरः॥११॥
अश्विनीसहिते सोमे यदाऽऽशामुत्तरां व्रजेत्।
सौम्ये चाऽऽप्ये च संयुक्ते सार्पार्धस्थो दिवाकरः॥१२॥
व्रजेत याम्यां शुक्लस्य श्रावणस्य त्रयोदशीम्।
चतुर्थमिन्दुदैवत्यं प्राहुश् चाऽप्यनुवत्सरम्॥१३॥
फल्गुनीमुत्तरां प्राप्ते सोमे सूर्ये च वासवे।
यद्युत्तरायणं कृष्णे चतुर्थ्यां तपसो भवेत्॥१४॥
श्रावणस्य च कृष्णस्य सार्पार्धे दशमीं पुनः।
रोहिणीसहिते सोमे रवेः स्याद् दक्षिणायनम्॥१५॥

इद्वत्सरः स विज्ञेयः पञ्चमो मृत्युदैवतः।
एवमेतद् विजानीयात् पञ्चवर्षस्य लक्षणम्॥१६॥
दृष्ट्वा स्वरूपं युक्तस्य तद् वर्षमिति निर्दिशेत्। इति॥

अर्धपञ्चमभस् त्वृतुरितीह प्रतिज्ञा यस्मादृतुसङ्ख्यायां विप्रतिपत्तिराचार्याणाम्। **"पञ्चर्त्तवः संवत्सरस्य"** इति च ब्राह्मणम्। तथा गर्गस् त्रय ऋतव इत्याह। कृष्णात्रेयः षट्। द्वादशेति नारदः। चतुर्विंशतिरित्याह भागुरिः। त्रीणि शतानि षषट्ष्टीनीत्याह क्रौष्टुकिः। न सर्वे ह्येते मता ऋतव ऋषिभिरिति। एवमिहोक्त ऋतुर् ऋक्षं च॥१०॥

(कौण्डिन्न्यायनव्याख्यानम्)

अथ पुनरपि चान्द्राणां मासानां चान्द्रमासद्वयात्मकानां चान्द्राणामृतूनां च सौरैर् ऋतुभिः सह, चान्द्रमासषट्कात्मकस्य चान्द्रर्तुत्रयात्मकस्य च चान्द्रस्याऽयनस्य सौरेणायनेन सह च सम्बन्धस्याऽवबोधनायाऽन्यस्याऽप्युपायविशेषस्य प्रदर्शनं कुर्वन्नाह ग्रन्थकारः वसुस् त्वष्टा भवोऽजश् चेत्यादि।

आदियुगे श्रविष्ठा, चित्रा, आर्द्रा, पूर्वभद्रपदे, अनुराधाः, आश्लेषाः, अश्वयुजौ, पूर्वाषाढाः उत्तरफल्गुन्यौ, रोहिणी इति दश क्रमेण सूर्यस्याऽयनानामारम्भाणां तिथिषु चन्द्रयोगनक्षत्राणि स्युः; सौर ऋतुस् तु सूर्यस्य पञ्चमनक्षत्रार्धसहितनक्षत्रचतुष्टयभोगस्य कालो ज्ञेय इत्यर्थः। श्रुतौ तु लक्षणैर् ऋतवः प्रतिपादिता दृश्यन्ते। तथा हि—

(क) एतावेव वासन्तिकौ स यद् वसन्त ओषधयो जायन्ते वनस्पतयः पच्यन्ते तेनो हेतौ मधुश् च माधवश् च। इति
—मा. वा. शु. य. वे. शतपथब्राह्मणे (४।३।१।१४)।

(ख) एतावेव ग्रैष्मौ स यदेतयोर् बलिष्ठं तपति तेनो हैतौ शुक्रश्च शुचिश्च। इति च
—तत्रैव (४।३।१।१५)।

(ग) एतावेव वार्षिकावमुतो वै दिवो वर्षति तेनो हैतौ नभश्च नभस्यश्च। इति च
—तत्रैव (४।३।१।१६)।

(घ) एतावेव शारदौ स यच् छरद्यूरग् रसऽ ओषधयः पच्यन्ते तेनो हैताविषश् चोर्जश् च। इति च
—तत्रैव (४।३।१।१७)।

(ङ) एतावेव हैमन्तिकौ स यद् धेमन्तऽ इमाः प्रजाः सहसेव स्वं वशमुपनयते तेनो हैतौ सहश् च सहस्यश् च। इति च
—तत्रैव (४।३।१।१८)।

(च) **एतावेव शैशिरौ स यदेतयोर् बलिष्ठं श्यायति तेनो हेतौ तपश् च तपस्यश् च।** इति च

–तत्रैव (४।३।१।१९)।

(छ) **एतस्य (शरदः) ऋतोः पुरस्ताद् वर्षति नोपरिष्टात्।** इति च

–तत्रैव (८।३।२।६)।

(ज) **वसन्तऽआग्नीध्रस् तस्माद् वसन्ते दावाश् चरन्ति तद् ध्यग्निरूपम्।** इति च

–तत्रैव (११।२।७।३२)।

(झ) **ग्रीष्मोऽध्वर्युस् तप्त इव वै ग्रीष्मस् तप्त इवाऽध्वर्युर् निष्क्रामति।** इति च

–तत्रैव (११।२।७।३२)।

(ञ) **वर्षाऽउद्गाता तस्माद् यदा बलवद् वर्षति साम्नऽइवोपब्दिः क्रियते।** इति च

–तत्रैव (११।२।७।३२)।

(ट) **शरद् ब्रह्मा तस्मात् यदा सस्यम् पच्यते ब्रह्मण्वत्यः प्रजा इत्याहुः।** इति च

–तत्रैव (११।२।७।३२)।

(ठ) हेमन्तो होता तस्माद् धेमन् वषट्कृताः पशवः सीदन्ति। इति च

–तत्रैव ११।२।७।३२)।

तैत्तिरीयारण्यके आरुणकेतुके ब्राह्मणे च (१।२।१–१।४।३) **ऋतुलक्षणानि वर्णितानि सन्ति, तानि विशिष्टैर् जिज्ञासुभिस् तत्रैव द्रष्टव्यानि।**

अत एव श्रुतिवाक्योक्तानामृतूनामवस्थितेर् ज्ञानाय सौरर्तूनां प्रतिपादनं शास्त्रकारेण कृतमिति बोध्यम्॥१०॥

अयनम्	पक्षः	तिथिः	नक्षत्रदेवता	चन्द्रनक्षत्रम्
१	शुक्लः	प्रथमः	वसुः	धनिष्ठा
२	"	सप्तमः	त्वष्टा	चित्रा
३	"	त्रयोदशः	भवः	आर्द्रा
४	कृष्णः	चतुर्थः	अजः	पूर्वभद्रपदे
५	"	दशमः	मित्रः	अनुराधाः
६	शुक्लः	प्रथमः	सर्पः	आश्लेषाः
७	"	सप्तमः	अश्विनौ	अश्वयुजौ
८	"	त्रयोदशः	जलम्	पूर्वाषाढाः
९	कृष्णः	चतुर्थः	धाता (अर्यमा)	उत्तरफल्गुन्यौ
१०	"	दशमः	कः	रोहिणी

हिन्दी – (उस आदियुग में) धनिष्ठा, चित्रा, आर्द्रा, पूर्वभद्रपद, अनुराधा, आश्लेषा, अश्विनी, पूर्वाषाढा, उत्तरफल्गुनी और रोहिणी क्रमशः सूर्य के दश अयनों (दूसरे अयन में गमनों) के आदि में रहने वाले चान्द्रनक्षत्र होते हैं। (सौर) ऋतु तो (सूर्य के) पूरे चार नक्षत्रों के और पञ्चम नक्षत्र के आधे के भोग का काल होता है॥१०॥

[सौरर्त्वारम्भतिथयः, पञ्चपर्वाणौ ऋतू च]

एकान्तरेऽह्नि मासे च पूर्वान् कृत्वाऽऽदिरुत्तरः।
अर्धयोः पञ्चपर्वाणावृतू पञ्चदशाऽष्टमौ॥११॥

(सोमाकरभाष्यम्)

पुनरेकान्तरेऽह्नि यस्मिन्नहनि सूर्यसङ्क्रमणं तस्मादह्नस् तृतीयेऽह्नि ऋतुरन्यो भवतीति वाक्यशेषः। कथम्? मासे च मासमतिक्रम्य तं द्वितीयं तृतीयमिति। तस्मादर्धपञ्चमभस् त्वृतुरिति द्वावेवोक्तौ। यस्माद् भचोदनमप्याह। पूर्वान् कृत्वादिरुत्तरः। उत्तर आर्द्रादिर् वक्ष्यमाण ऋक्षः। स एकान्तरेऽह्नि मासे चाऽपि भवेत्। तत् अश्विन्युपलक्षितमाश्वयुज्यां तत एकमतिक्रम्यान्तराणां कृत्तिकायुक्ता कार्त्तिकी भवेदित्युत्तरमेव। अथवाऽन्यो वा ऋतुः। एकान्तरे च दिने मासे च। एवमृतावन्यस्मिन्। कथम्? पूर्वान् जावादीन् पञ्च पूर्वान् कृत्वा अतिक्रम्येत्यर्थः। क्व? पञ्चपर्वाणां पक्षाणामर्धसन्धीनां वक्ष्यमाणांशकल्पनया मध्ये पञ्चदशीप्रतिपदोर् भवेदित्यर्थः। एतदुक्तं भवति। *जाविति चोदिताऽश्विनी यस्मिन् पर्वणि विहिता तस्मादुत्तरं पञ्चपञ्चर्क्षान् पञ्च पर्वण्यतिक्रम्य भरण्यादींश् च ऋक्षाँस् ततो द्रेति चोदिताऽऽर्द्रा भवति। भरण्यादयश्चाऽन्तरपर्वसु यागदिवसेष्वित्युक्तं भवति।* ते च पुनरेकान्तरेऽह्नि मासे च पौर्वापर्येण भवन्ति। तद् यथा च। यत्र ह्यश्विनी। ततः पुनः षड्विंशेऽह्नि पञ्चविंशे वा भवेत्।

तथा च गर्गः–

यावता त्वेव कालेन भवर्गं त्रिणवात्मकम्।
भुङ्क्ते चन्द्रः स आर्क्षो मास् तस्यार्धं पक्ष उच्यते॥

यतश् चत्वारि मानानि तानि तु गर्गवाक्यैर् दर्शयिष्यामि। तद् यथा–

सावनं चापि सौर्यं च चान्द्रं नाक्षत्रमेव च।
चत्वार्येतानि मानानि यैर् युगं प्रविभज्यते॥१॥
अहोरात्रात्मकं लोक्यं मानं च सावनं स्मृतम्।
अतश्चैतानि मानानि प्रकृतानीह सावनात्॥२॥
ततः सिद्धान्यहोरात्राण्युदयाश्चाप्यथार्कजाः।
[illegible]शच् चाष्टादशशती दिनानां च (१८३०) युगे स्मृता॥३॥

मासस् त्रिंशदहोत्राः (३०) पक्षोऽर्धं (१५) सावनं स्मृतम्।
अहोरात्रलवानां तु चतुर्विंशं शतात्मकम् (१२४)॥४॥
सौर्यं तु सूर्यसम्भूतं परिसर्पति भास्करे।
यावता ह्युत्तरां काष्ठां गत्वा गच्छति दक्षिणाम्॥५॥
कालेन सोऽब्दस् तस्यार्धमयनं तु त्रयोर्त्तवः।
ऋतोरर्धो भवेन् मासस् त्रिंशद्भागो दिनोऽर्कजः॥६॥
तस्यार्धमर्कजः पक्षस् तस्मात् पञ्चदशं दिनम्।
शतं लवानां षड्विंशं लवाः पञ्चदशस् (लवपञ्चदशस्) (१२६$\frac{1}{15}$) तथा॥
यतश् चाऽष्टादशशतं (१८००) युगमार्कैर् दिनैः स्मृतम्।
वृद्धिक्षयाभ्यां सम्भूतं चान्द्रं मानं हि चन्द्रतः॥८॥
लवं लवमथोनेन सावनेन निशाकरः।
क्षयवृद्धिमवाप्नोति स चान्द्रो मास उच्यते॥९॥
तस्यार्धं *पार्वणः पक्षस्* तस्मात् पञ्चदशी तिथिः।
प्रमाणेन लवानां तु द्वाविंशं शतमुच्यते (१२२)॥१०॥
सोमस्याष्टादशशती युगे षष्ट्यधिका (१८६०) स्मृता।
यावता त्वेव कालेन भवर्गं त्रिणवात्मकम्॥११॥
भुङ्क्ते चन्द्रः स आर्क्षो मास् तस्यार्धं पक्ष उच्यते।
आर्क्षात् पक्षात् पञ्चदशं नाक्षत्रं दिनमुच्यते॥१२॥
प्रमाणेन लवानां तु द्वादशं शतमुच्यते (११२)।
षष्ट्या तु सप्तषष्ट्यंशेना-($\frac{60}{67}$)ऽधिकोऽस्मिन् परो लवः॥१३॥
दशोत्तरे द्वे सहस्रे (२०१०) युगमार्क्षैर् दिनैः स्मृतम्।

एतदुत्तरप्रतिपत्त्यर्थमाश्वलायनोदाहृतम्। यस्मादेतदेवाभिप्रेत्येदं शास्त्रं प्रवृत्तम्। वक्ष्यति च–"**उदया वासवस्य स्युर्**" (श्लो. २९) इति। एतेनोत्तरमन्यदूहितुं शक्यते। तेषां वक्ष्यमाणानामृक्षाणां मृदू पञ्चदशाष्टमौ अनुराधा तिष्यं च। "**अनुराधा चतुस्तारं मृदु मित्रोऽत्र दैवतम्**" इति। एतत् स्वरूपसूचनं "**क्रूराण्युग्राणि च**" (इति) वक्ष्यति (श्लो. ३६)। यस्मादेवं तस्मात्॥११॥

(कौण्डिन्न्यायनव्याख्यानम्)

अथ पुनरपि चान्द्राणां मासानां चान्द्रमासद्वयात्मकानां चान्द्राणामृतूनां च सौरैर् ऋतुभिः सह, चान्द्रमासषट्कात्मकस्य चान्द्रर्तुत्रयात्मकस्य च चान्द्रस्याऽयनस्य सौरेणाऽयनेन सह च सम्बन्धस्याऽवबोधनायाऽन्यस्याऽप्युपायविशेषस्य प्रदर्शनं कुर्वन्नाह शास्त्रकारः एकान्तरेऽह्नि मासे चेत्यादि।

पूर्वान् ऋत्वारम्भतिथीन् एकान्तरे तिथौ एकान्तरे मासे च कृत्वा उत्तर ऋत्वादिस् तिथिर् भवति। आदर्शभूते पञ्चवर्षात्मके युगे पूर्वान् ऋत्वारम्भतिथीन् एकेन तिथिना एकेन मासेन च व्यवहितान् कृत्वोत्तर ऋत्वारम्भतिथिः प्रवृत्तो भवतीत्यर्थः। माघशुक्लप्रतिपदि सौरः शिशिरर्तुः प्रवृत्तश् चेत् फाल्गुनं मासं द्वितीयां तिथिं चाऽन्तरे कृत्वा चैत्रशुक्लतृतीयायामुत्तरः सौरऋतुर् वसन्तः प्रवृत्तो भवति। पञ्चवर्षात्मकस्य युगस्य पञ्चदशसौरर्त्वात्मकयोरर्धयोः पञ्चदशाऽष्टमौ सौरौ ऋतू पञ्चपर्वाणौ भवतः इत्युत्तरार्धार्थः। पञ्चपर्वाणौ पूर्णिमा-ऽमावास्या-पूर्णिमा-ऽमावास्या-पूर्णिमारूपैः पञ्चभिः पर्वभिः, अमावास्या-पूर्णिमा-ऽमावास्या-पूर्णिमाऽमावास्यारूपैः पञ्चभिः पर्वभिश्च क्रमेण युक्तौ भवत इति स्पष्टतरोऽर्थः। चान्द्रमासादीनां सौरर्तुना सह सम्बन्धं स्पष्टं कर्तुं ग्रन्थकारेणेदं सैद्धान्तिकं कथनं कृतं बोध्यम्।

विशेषः— अस्य श्लोकस्याऽर्थः सोमाकरेण सम्यङ् न कृत इव प्रतीयते। शङ्कर-बालकृष्णदीक्षितेन तु पूर्वाऽर्धस्यैवाऽर्थो लिखितः (पृ.११७)। बार्हस्पत्येन सुधाकरेण च स्वकपोलकल्पितोऽर्थः कृतोऽवगम्यते। तिलकान्वयजेन गाङ्गाधरिणा बालेन त्वस्य श्लोकस्याऽर्थस्य विचारः कृतो न दृश्यते। शामशास्त्रिणा चाऽस्मिन् श्लोके स्वमनीषिकया पाठान्तरं कल्पयित्वाऽयथार्थोऽर्थो वर्णितः। अस्माभिस् तु "पञ्चपर्वाणामृदू" इत्यस्य स्थाने "पञ्चपर्वाणावृतू" इति न्याय्यं पाठमुन्नीयाऽर्थः कृतो बोध्यः। एवं च यस्मिन्नादर्शभूते पञ्चवर्षात्मके आदियुगे प्रथमेऽर्धे माघशुक्लप्रतिपदि प्रथम ऋतुः शिशिरः प्रवर्तते तस्मिन् युगे चैत्रशुक्लपूर्णिमायां प्रवृत्तो ज्येष्ठकृष्णप्रतिपदि समाप्तोऽष्टम ऋतुः पूर्णिमा-ऽमावास्या-पूर्णिमा-ऽमावास्या-पूर्णिमारूपैः पञ्चभिः पर्वभिर् युक्त इति पञ्चपर्वा भवति, ज्येष्ठकृष्णचतुर्दश्यां प्रवृत्तोऽधिकाषाढामावास्यायां समाप्तः पञ्चदश ऋतुश् च अमावास्या-पूर्णिमा-ऽमावास्या-पूर्णिमा-ऽमावास्यारूपैः पञ्चभिः पर्वभिर् युक्त इति पञ्चपर्वा भवति। एवमष्टमपञ्चदशावृतू पञ्चपर्वाणौ भवतः। एवमेव तस्मिन्नादर्शभूते पञ्चवर्षात्मके युगे श्रावणशुक्लप्रतिपदि प्रवृत्तस्य युगद्वितीयार्धस्य आश्विनशुक्लपूर्णिमायां प्रवृत्तो मार्गकृष्णप्रतिपदि समाप्तोऽष्टम ऋतुः पूर्णिमा-ऽमावास्या-पूर्णिमा-ऽमावास्या-पूर्णिमारूपैः पञ्चभिः पर्वभिर् युक्त इति पञ्चपर्वा भवति, मार्गकृष्णचतुर्दश्यां प्रवृत्तोऽधिकपौषामावास्यायां समाप्तः पञ्चदश ऋतुश् च अमावास्या-पूर्णिमा-ऽमावास्या-पूर्णिमा-ऽमावास्यारूपैः पञ्चभिः पर्वभिर् युक्त इति पञ्चपर्वा भवति। एवं चोभयोर् युगार्धयोर् अष्टम-पञ्चदशौ सौरौ ऋतू पञ्चपर्वाणौ भवतः। श्लोके पञ्चदशाष्टमौ इति प्रयोगो वृत्तानुरोधात् कृतो वेदितव्यः। एवं चाऽत्र श्लोके 'पञ्चवर्षाणाम्' इति 'पञ्चदशेऽष्टमौ' इति च पाठकल्पनाऽपार्थिकैव।

यद्यपि ऋतुलक्षणानुसारम् ऋत्वारम्भः कस्मिन् दिने भवतीति निर्णयो दुष्करः, तस्मादेव श्रुतावापि "उभयतोमुखमृतुपात्रं भवति को हि तद् वेद यदृतूनां मुखम्" इति आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायाम् (६।५।३।१-२) **उक्तम्, माध्यन्दिनीय-वाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मणेऽपि "उभयतोमुखाभ्यां पात्राभ्यां गृह्णाति कुतस् तयोरन्तो ये उभयतोमुखे"** (४।३।१।७) **इत्युक्तम्, कात्यायनश्रौतसूत्रेऽपि ऋतूनां मुखानां दुर्ज्ञेयत्वस्य सूचकतया ऋतुपात्रयोर् निर्मेयत्वम् "ऋतुपात्रे पूर्वे स्रुक्पुष्कराकृती उभयतोमुखे कार्ष्मर्यमये आश्वत्थे वा"** (९।२।१३) **इत्युक्तम्, ऋतुपात्रयोरुभयतोमुखतायास् तस्य विधानस्य प्रयोजनमबुद्ध्वा महामहोपाध्यायविद्याधर-गौडेन व्याख्याने कृतेऽपि कर्क-देवयाज्ञिकाभ्यां तु तथा व्याख्यानं न कृतमिति ऋतु-मुखानां दुर्निरूपत्वं यज्ञप्रक्रिययाऽपि सूचितमेव, तथापि श्रुतिस्मृतिकृतर्तुविधानस्य निर्वाहाय सौरचान्द्राणां शुद्धसौराणां चर्तूनां मुखानामत्र शास्त्रे लगधमुनिना व्यवस्था प्रतिपादिता बोध्या ॥११॥**

हिन्दी – पूर्व ऋतुओं के आरम्भ के तिथियों को और मासों को एक तिथि से और एक मास से व्यवहित बनाकर (तीसरे मास में और तीसरे तिथि में) अगला ऋतु का आदि तिथि होता है। अर्थात् पूर्व ऋतु के आरम्भ के चान्द्र मास से तृतीय चान्द्र मास में और पूर्व ऋतु के आरम्भ के तिथि के तीसरे तिथि में उत्तर ऋतु की प्रवृत्ति (शुरुआत) होती है। पञ्चवर्षात्मक आदियुग के पूर्वार्ध में (पूर्वार्ध के पन्द्रह ऋतुओं में) और उत्तरार्ध में (उत्तरार्ध के पन्द्रह ऋतुओं में) पन्द्रहवां ऋतु और आठवां ऋतु पाँच पर्व वाले (पाँच पक्षसन्धियों से युक्त) होते हैं।

विशेष – शङ्करबालकृष्ण दीक्षित ने इस श्लोक के पूर्वार्ध का ही अर्थ लिखा है (पृ.११७)। बार्हस्पत्य से स्वकपोलकल्पित अर्थ किया गया मालूम होता है। सुधाकर ने भी स्वकपोलकल्पित अर्थ ही किया है। बालगङ्गाधर तिलक ने तो इस श्लोक के अर्थ का विचार नहीं किया। शामशास्त्री ने इस श्लोक का मनमाना पाठान्तर की कल्पना करके अयथार्थ अर्थ दिया है। हमने तो *"पञ्चपर्वाणामृदू"* इस पाठ के स्थान पर *"पञ्चपर्वाणावृतू"* इस न्याय्य पाठ को मानकर अर्थ किया है। जिस आदर्शभूत पञ्चवर्षात्मक आदियुग में पूर्वार्ध में माघशुक्लप्रतिपदा में प्रथम ऋतु (शिशिर) का आरम्भ होता है, उस युग में चैत्रशुक्लपूर्णिमा में प्रवृत्त और ज्येष्ठकृष्णप्रतिपदा में समाप्त आठवां ऋतु पूर्णिमा, अमावास्या, पूर्णिमा, अमावास्या, पूर्णिमा इन पाँच पर्वों से युक्त अत एव पञ्चपर्वा होता है; ज्येष्ठकृष्णचतुर्दशी में आरब्ध और अधिकाषाढ की अमावास्या में समाप्त पन्द्रहवां ऋतु अमावास्या, पूर्णिमा, अमावास्या, पूर्णिमा, अमावास्या इन पाँच पर्वों से युक्त अत एव पञ्चपर्वा होता है। इस प्रकार आठवां और पन्द्रहवां ऋतु पञ्चपर्वा होते हैं। इसी प्रकार उसी आदर्शभूत पञ्चवर्षात्मक युग में श्रावणशुक्लप्रतिपदा में प्रवृत्त युग के द्वितीयार्ध का आश्विनशुक्लपूर्णिमा में प्रवृत्त और मार्गकृष्णप्रतिपदा में समाप्त आठवां ऋतु पूर्णिमा, अमावास्या, पूर्णिमा, अमावास्या, पूर्णिमा

इन पाँच पर्वों से युक्त अत एव पञ्चपर्वा होता है, मार्गकृष्णचतुर्दशी में प्रवृत्त और अधिकपौषामावास्या में समाप्त पन्द्रहवां ऋतु भी अमावास्या, पूर्णिमा, अमावास्या, पूर्णिमा, अमावास्या इन पाँच पर्वों से युक्त अत एव पञ्चपर्वा होता है। इस प्रकार दोनों युगार्धों के आठवें और पन्द्रहवें सौर ऋतु पञ्चपर्वा होते हैं। श्लोक में पञ्चदशाष्टमौ यह प्रयोग वृत्त के अनुरोध से किया गया है। इस प्रकार इस श्लोक में 'पञ्चवर्षाणाम्' और 'पञ्चदशेऽष्टमौ' पाठ की कल्पना निरर्थक ही है।

यद्यपि ऋतुलक्षणानुसार ऋतु का आरम्भ किस दिन में होता है यह निर्णय दुष्कर है, यह बात श्रुति में भी कही गई है (आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहिता ६।५।३।१-२, माध्यन्दिनीय-वाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मण ४।३।१।७)। कल्पसूत्र में भी ऋतुमुखों के दुर्ज्ञेयत्व के सूचक के रूप में ऋतुपात्र का निर्माण करने की व्यवस्था है (कात्यायनश्रौतसूत्र ९।२।१३)। [ऋतुपात्र के उभयतोमुखता के विधान के प्रयोजन को न समझकर महामहोपाध्याय विद्याधर गौड ने व्याख्यान किया है, कर्क और देवयाज्ञिक ने तो उस प्रकार का अयुक्त व्याख्यान नहीं किया है।] इस प्रकार ऋतुमुख का दुर्निरूपत्व यज्ञप्रक्रिया से भी सूचित ही है, तथापि श्रुतिस्मृतिकृत ऋतुविधान के निर्वाह के लिए सौरचान्द्र और शुद्ध सौर ऋतुमुखों की व्यवस्था प्रस्तुत वेदाङ्गज्योतिषशास्त्र में लगधमुनि ने प्रतिपादित की है॥११॥

[पक्षद्युहानव्यवस्था, पादपरिभाषादिकं च]

द्यु हेयं पर्व चेत् पादे पादस् त्रिंशत् तु सैकिका।
भागात्मनाऽपमृज्याऽंशान् निर्दिशेदधिको यदि॥१२॥

(सोमाकरभाष्यम्)

दुहेयं पर्व चेत् पाद इति। पर्वाऽर्धमासः। यथाह नैरुक्तः–"**अर्धमासः पर्व देवा अस्मिन् प्रीणन्तीति वचनात्**" (१।६।६)। तच् चेद् यदि दुहेयं गर्गोक्तलवादिकल्पनया-ऽधिकमासार्थं यच् छिष्यते तत् सङ्ख्यायैकं कल्पयेत्।

यथाह गर्गः–

ततः प्रक्षीयमाणस्य तिथिरित्येव सञ्ज्ञिता।
द्विलवोनमहोरात्रं सोमस्य गतिरुत्तमा॥ इति।

एतदूनं कियद् भवेदित्याह पाद इति। तदप्यप्रतीतमित्याह पादस् त्रिंशत् तु सैकिका नाडिकेति वाक्यशेषः। तत्राधिकमासनिष्पत्तिः।

यथाह गर्गः–

द्विलवक्षयसम्भूतो द्वाषष्टिर् भवते तिथिः।
ऋतोरन्तमनुप्राप्य हीनरात्रेति नामतः॥

यस्मात् तस्मादेतावन्मात्रमर्धमासस्याऽह्ना ह्रसते तस्य भागात्मनाऽपवृज्याऽंशान् निर्दिशेत्। सङ्कलितं व्यवस्थाप्यैकत्र सङ्कलयेदंशं लवानां कुतस् तदधिकदिनानां लुप्तत्वादिति वाक्यशेषः। एवं तूक्तभागानां विसूचितानामुत्तरत्र वक्ष्यमाणानामंशानाम्॥१२॥

(कौण्डिन्न्यायनव्याख्यानम्)

अथ इष्टिदिनविशेषनिरूपणं कुर्वन् शास्त्रकार आह— द्यु हेयं पर्व चे**दित्यादि।**

पूर्वयागदिवसात् पञ्चदशे दिवसे दिनस्य प्रथमे पादे पञ्चदशी-प्रतिपदोः सन्धिर् भवति चेत् एकं दिनं त्याज्यम्, अर्थात् पूर्वां चतुर्दशीं त्यक्त्वा पूर्वदिनमेव पञ्चदशीरूपं स्वीकृत्य तत्रैवोपसथो वा तदपराह्णे पिण्डपितृयज्ञो वा कर्तव्यः, पञ्चदशे दिने एव यागः कर्तव्य इति भावः। चतुर्विंशशतांशकस्य दिनस्य पादस् तु सैका त्रिंशत् (३१) अंशा ज्ञेयाः। यदि पर्वदिनांशराशिसङ्कलने समागतो दिनाऽंशराशिर् दिनसम्पूर्णांशेभ्योऽधिको भवति तर्हि दिनसम्पूर्णांशभागरूपेण राशिना तं राशिमपमृष्टं कृत्वाऽवशिष्टानंशान् तत्पर्वदिनांशरूपेण निर्दिशेदित्यर्थः।

अथवा वक्ष्यमाणम् "अतीतपर्वभागेभ्यः शोधयेद् द्विगुणां तिथिम्" (श्लो.२२) इति श्लोकोक्तप्रकारेण ज्ञातं दिनांशरूपपर्वसमाप्तिकालमपेक्ष्येदमुच्यते— 'दिनस्य प्रथमे पादे पञ्चदशी-प्रतिपदोः सन्धिर् भवति चेत् एकं दिनं त्याज्यम्' इति। तत्र यदि शोधनीयदिनाऽंशराशिर् अतीतपर्वदिनांशेभ्योऽधिको भवति तर्हि अतीतपर्वभागान् सम्पूर्णभागात्मना राशिना (१२४) संयोज्य ततोऽधिकराशिना तं राशिमपमृष्टं कृत्वाऽवशिष्टानंशान् तद्दिनांशरूपेण निर्दिशेदित्यर्थः। यथा आदियुगे चतुर्थे पर्वणि अतीतपर्वभागाः ४ सन्ति, पञ्चमे पर्वणि शोधनीया भागाः ३० सन्ति। तत्र अतीतपर्वभागान् (४) सम्पूर्णभागात्मना राशिना (१२४) संयोज्य (४+१२४=१२८) ततस् तमधिकराशिमपमृष्टं कृत्वा (१२८-३०) अवशिष्टा अंशाः (९८) पञ्चमपर्वांशत्वेन निर्देश्या भवन्ति। एवं च शोधनीयांशानामतीतपर्वभागसङ्ख्यासमधिकत्वे तानंशान् भागात्मना युक्तेभ्योऽतीतपर्वभागेभ्योऽपमृज्य अंशनिर्देशः कर्तव्य इत्येवार्थः स्वीकर्तव्यः।

अत्र तावत् पूर्णमासेष्टि-दर्शेष्टि-पक्षादिस्थालीपाक-कालविवेकाय तत्तच्छाखा-ब्राह्मण-श्रौतसूत्रादिवचनानि प्रदर्श्यन्ते—

> यद् दर्शपूर्णमासयोरुपवसति, न ह वा अव्रतस्य देवा हविरश्नन्ति तस्मादुपवसत्युत मे देवा हविरश्नीयुरिति, पूर्वां पौर्णमासीमुपवसेदिति पैङ्ग्यम्, उत्तरामिति कौषीतकम्, यां पर्यस्तमयमुत्सर्पेदिति सा स्थितिः, उत्तरां पौर्णमासीमुपवसेद्, अनिर्ज्ञाय पुरस्तादमावास्यायां चन्द्रमसं यदुपवसति तेन पूर्वां

प्रीणाति, यद् यजते तेनोत्तराम्, उत्तरामुपवसेद्, उत्तरामु ह वै समुद्रो विजते सोममनु दैवतमेतद् वै देवसत्यं यच् चन्द्रमास् तस्मादुत्तरामुपवसेत्। इति

–शाङ्खायनीयऋग्वेदब्राह्मणे (३।१।)।

तदाहुर् यद् दर्शपूर्णमासयोरुपवसति न ह वा अव्रतस्य देवा हविरश्नन्ति तस्मादुपवसत्युत मे देवा हविरश्नीयुरिति, पूर्वां पौर्णमासीमुपवसेदिति पैङ्ग्यम्, उत्तरामिति कौषीतकम्, *या पूर्वा पौर्णमासी साऽनुमतिः, योत्तरा सा राका, या पूर्वाऽमावास्या सा सिनीवाली योत्तरा सा कुहूः,* यां पर्यस्तमियादभ्युदियादिति सा तिथिः, पूर्वां पौर्णमासीमुपवसेत्, अनिर्ज्ञाय पुरस्तादमावास्यायां चन्द्रमसं यदुपैति यद् यजते तेन सोमं क्रीणन्ति तेनोत्तरामुत्तरामुपवसेद्, उत्तराणि ह वै सोमो यजते, सोममनु दैवतम्, एतद् वै देवसोमं यच् चन्द्रमास् तस्मादुत्तरामुपवसेत्। इति

–ऐतरेयिऋग्वेदब्राह्मणे (३२।११[७।११])।

या पूर्वा पौर्णमासी साऽनुमतिर् योत्तरा सा राका, या पूर्वाऽमावास्या सा सिनीवाली योत्तरा सा कुहूः। इति

–मैत्रायणीयकृष्णयजुर्वेदसंहितायाम् (४।३।५), काठककृष्णयजुर्वेदसंहितायाम् (१२।८), षड्विंशब्राह्मणे (५।६।४), गोपथब्राह्मणे (२।१।१०), वौधायनश्रौतसूत्रे (२४।२०), कौशिकसूत्रे च (१।२९।३०)।

स वै सम्प्रत्येवोपवसेत् सम्प्रति वृत्रं हनानि सम्प्रति द्विषन्तं भ्रातृव्यं हनानीति॥ स वाऽउत्तरामेवोपवसेत् समिव वाऽ एष क्रमते यः सम्प्रत्युपवसति, अनद्धा वै सङ्क्रान्तयोर् यदीतरो वेतरमभिभवतीतरो वेतरमथ यऽ उत्तरामुपवसति यथा पराञ्चमावृत्तं सम्पिंष्यादप्रत्यालभमानं सोऽन्यतोघात्येव स्यादेवं तद् यऽ उत्तरामुपवसति॥ स वै सम्प्रत्येवोपवसेद् यथा वाऽ अन्यस्य हतं सम्पिंष्यादेवं तद् यऽ उत्तरामुपवसति सोऽन्यस्यैव कृतानुकरोऽन्यस्योपावसायी भवति तस्मादु सम्प्रत्येवोपवसेत्॥ इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशतपथब्राह्मणे (१।६।३।३२-३४)।

ते देवाऽ अब्रुवन् न वाऽ इममन्यत् सोमाद् धिनुयात् सोममेवाऽस्मै सम्भरामेति तस्मै सोमं समभरन्, एष वै सोमो राजा देवानामन्नं यच् चन्द्रमाः स यत्रैषऽ एतां रात्रिं न पुरस्तान् न पश्चाद् ददृशे तदिमं लोकमागच्छति स इहाऽपश् चौषधीश् च प्रविशति स वै देवानां वसु, अन्नं ह्येषां तद्,यदेषऽ एतां रात्रिमिहाऽमा वसति तस्मादमावास्या नाम॥ तं गोभिरनुप्रविष्ठाप्य

समभरन् यदोषधीराश्नँस् तदोषधिभ्यो यदपोऽपिबँस् तदद्भ्यस् तमेवं सम्भृत्याऽऽतच्य तीव्रीकृत्य तमस्मै प्रायच्छन्॥ इति च

–तत्रैव (१।६।४।५,६)।

अथातोऽभ्युदिताया एति ह वा एष यज्ञपथाद् यस्योपवसथे पुरस्ताच् चंन्द्रो दृश्यते सोऽग्नये दात्रेऽष्टाकपालं पुरोडाशं निर्वपत्यग्निर् वै दाता स एवाऽस्मै यज्ञं ददाति, इन्द्राय प्रदात्रे सायं दोहितं दधीन्द्रो वै प्रदाता स एवाऽस्मै यज्ञं प्रयच्छति, विष्णवे शिपिविष्टाय प्रातर् दोहिते पयसि चरुं यज्ञो वै विष्णुः स एवाऽस्मै यज्ञं ददाति, तद् यदेता देवता यजति नेद् यज्ञपथादयानीति तिसृधन्वं दक्षिणा, तत् स्वस्त्ययनस्य रूपम्। इति

–शाङ्खायनीयऋग्वेदब्राह्मणे (४।२)।

अथातोऽभ्युद्दृष्टाया एति ह वा एष यज्ञपथाद् यस्योपवसथे पश्चाच् चन्द्रो दृश्यते सोऽग्नये पथिकृतेऽष्टाकपालं पुरोडाशं निर्वपत्यग्निर् वै पथिकृत् स एवैनं पुनर् यज्ञपथमपि पाथयति, इन्द्राय वृत्रघ्न एकादशकपालमिन्द्रो वै वृत्रहा स एवैनं पुनर् यज्ञपथमपि पाथयति, वैश्वानरीयं द्वादशकपालमसौ वै वैश्वानरो योऽसौ तपत्येष एवैनं पुनर् यज्ञपथमपि पाथयति तद् यदेता देवता यजति नेद् यज्ञपथादयानीति, दण्डोपानहं दक्षिणा, तदभयस्य रूपम्। इति च

–तत्रैव (४।३)।

यस्य सान्नाय्यं चन्द्रमा अभ्युदियाद् ये पुरोडाश्याः स्युस् ताँस् त्रेधा कुर्याद्, ये मध्यमास् तमग्नये दात्रेऽष्टाकपालं निर्वपेद्, ये स्थविष्ठास् तमिन्द्राय प्रदात्रे दधँश् चरुम्, ये क्षोदिष्ठास् तं विष्णवे शिपिविष्टाय शृते चरुम्, अग्निर् वै मध्यमस्य दाता, इन्द्रो ज्येष्ठस्य प्रदाता, अथ यत् क्षोदिष्ठं तच् शिपिविष्टम्, तदाप्नोति पशूनेव, सोमो वा एतस्याऽतिरिच्यते यस्य सान्नाय्यं चन्द्रमा अभ्युदेति। इति

–मैत्रायणीय-कृष्णयजुर्वेदसंहितायाम् (२।२।१३)।

यस्य हविर् निरुप्तं पुरस्ताच् चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेद्,ये मध्यमाः स्युस् तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्, ये स्थविष्ठास् तानिन्द्राय प्रदात्रे दधँश् चरुम्, येऽणिष्ठास् तान् विष्णवे शिपिविष्टाय शृते चरुम्, अग्निरेवाऽस्मै प्रजां प्रजनयति, वृद्धामिन्द्रः प्रयच्छति, यज्ञो वै विष्णुः पशवः शिपिर् यज्ञ एव पशुषु प्रतितिष्ठति। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायाम् (२।५।५।१-२)।

तद् धैके दृष्ट्वोपवसन्ति श्वो नोदेतेत्यभ्रस्य वा हेतोरनिर्ज्ञाय वाऽथोतोप-वसन्त्यथैनमुताभ्युदेति स यद्यगृहीतं हविरभ्युदियात् प्रज्ञातमेव तदेवैषैव व्रतचर्या यत् पूर्वेद्युर् दुग्धं दधि हविरातञ्चनं तत् कुर्वन्ति प्रति प्रमुञ्चन्ति, वत्साँस् तान् पुनरपाकुर्वन्ति॥ तानपराह्णे पर्णशाखयाऽपाकरोति, तद् यथैवादः प्रज्ञातमामावास्यं हविरेवमेव तद् यद्यु व्रतचर्यां नोदाशंसेत गृहीतं वा हविरभ्युदियादितरथो तर्हि कुर्यादेतानेव तण्डुलान् सुफलीकृतान् कृत्वा स येऽणीयांसस् तानग्नये दात्रेऽष्टाकपालम् पुरोडाशं श्रपयति॥ अथ यत् पूर्वेद्युर् दुग्धं दधि तदिन्द्राय प्रदात्रेऽथ तदानीं दुग्धे विष्णवे शिपिविष्टायैताँस् तण्डुलाञ् छृते चरुं श्रपयति चरुरु ह्येव स यत्र क्व च तण्डुलानावपन्ति॥ तद् यदेवम् भवत्येष वै सोमो राजा देवानामन्नं यच् चन्द्रमास् तमेतदुपैत्सीत् तस्मा अग्निर् दाता ददाति, इन्द्रः प्रदाता प्रयच्छति, तमस्मा इन्द्राग्नी यज्ञं दत्तस् तेनेन्द्राग्निभ्यां दत्तेन यज्ञेन यजतेऽथ यद् विष्णवे शिपिविष्टायेति यज्ञो वै विष्णुरथ यच् छिपिविष्टायेति यमुपैत्सीत् तमपारात्सीत् तच् छिपितमिव यज्ञस्य भवति तस्माच् छिपिविष्टायेति तत्रो यच् छक्नुयात् तद् दद्यात्, नाऽदक्षिणं हविः स्यादिति ह्याहुरथ यदैव नोदियादथोपवसेत्॥ इति

—माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणे (११।१४।१-४)।

अद्याऽमावास्येति मन्यमान उपवसति, अथैष पश्चाद् ददृशे स हैष दिव्यः श्वा, स यजमानस्य पशूनभ्यवेक्षते तदपशव्यं स्यादप्रायश्चित्तिकृत एतस्मादु हैतद् भीषावचन्द्रमसादिति॥ छायामुपसर्पन्ति, एतेनो हैतदुपतपदाचक्षते श्वलुचितमित्येतमु हैवैतदाचक्षते॥ शशश् चान्द्रमस इति, चन्द्रमा वै सोमो देवानामन्नम्, तम् पौर्णमास्यामभिषुण्वन्ति, सोऽपरपक्षेऽपऽ ओषधीः प्रविशति, पशवो वाऽ अपऽ ओषधीरदन्ति, तदेनमेतां रात्रिम् पशुभ्यः सन्नयति॥ सोऽद्याऽमावास्येति मन्यमानऽ उपवसत्यथैष पश्चाद् ददृशे तद् यजमानो यज्ञपथादेति, तदाहुः कथङ् कुर्यादित्वा यज्ञपथाद् यजेताइ न यजेताइ इति, यजेत हैव न ह्यन्यदपक्रमणम् भवति श्वःश्वऽ एवैष ज्याया-नुदेति, सऽ आमावास्यविधिनैवेष्ट्वाऽथेष्टिमनुनिर्वपति तदहर् वैव श्वो वा॥ तस्यै त्रीणि हवींषि भवन्ति, अग्नये पथिकृतेऽष्टाकपालम् पुरोडाशमिन्द्राय वृत्रघ्नऽ एकादशकपालमग्नये वैश्वानराय द्वादशकपालम् पुरोडाशम्॥ स यदग्नये पथिकृते निर्वपति, अग्निर् वै पथः कर्ता, स यस्मादेवादो यजमानो यज्ञपथादेति तमेनमग्निः पन्थानमापादयति॥ अथ यदिन्द्राय वृत्रघ्ने, पाप्मा वै वृत्रो यो भूतेर् वारयित्वा तिष्ठति कल्याणात् कर्मणः साधोः, तमेतदिन्द्रेणैव

वृत्रघ्ना पाप्मानं वृत्रं हन्ति, तस्मादिन्द्राय वृत्रघ्ने॥ अथ यदग्नये वैश्वानराय द्वादशकपालम् पुरोडाशं निर्वपति, यत्र वा इन्द्रो वृत्रमहँस् तमग्निना वैश्वानरेण समदहत् तदस्य सर्वम् पाप्मानं समदहत्, तथोऽ एवैष एतदिन्द्रेणैव वृत्रघ्ना पाप्मानं वृत्रं हत्वा तमग्निना वैश्वानरेण सन्दहति, तदस्य सर्वम् पाप्मानं सन्दहति, स यो हैवं विद्वानेतयेष्ट्या यजेत न हाऽस्याऽल्पश् चन पाप्मा परिशिष्यते॥ तस्यै सप्तदश सामिधेन्यो भवन्ति, उपांशु देवता यजति, याः कामयते ता याज्यानुवाक्याः करोति, एवमाज्यभागौ, एवं संयाज्ये॥ तिसृधन्वं दक्षिणां ददाति, धन्वना वै श्वानम् बाधन्ते, तदेतमेवैतद् बाधते यत् तिसृधन्वं दक्षिणां ददाति॥ दण्डं दक्षिणां ददाति,दण्डेन वै श्वानं बाधन्ते, तदेतमेवैतद् बाधते यद् दण्डं दक्षिणां ददाति, एषा न्वादिष्टा दक्षिणा, दद्यात् त्वेवाऽस्यामप्यन्यद् याऽ इतरा दक्षिणास् तासां यत् सम्पद्येत, सा हैषा पशव्येष्टिः, तयाऽप्यनभ्युद्दृष्टो यजेतैव॥ इति च

–तत्रैव (११।१।५।१-११)।

यस्य हविर् निरुप्तं पुरस्ताच् चन्द्रमा अभ्युदियात् ताँस् त्रेधा तण्डुलान् विभजेद् ये मध्यमास् तानग्नये दात्रेऽष्टाकपालं निर्वपेद् ये स्थविष्ठास् तानिन्द्राय प्रदात्रे दधनि चरुम्, ये क्षोदिष्ठास् तान् विष्णवे शिपिविष्टाय शृते चरुम्, पशवो वा एतेऽतिरिच्यन्ते तानेवाऽऽप्नोति तानवरुन्धे, अग्निर् वै मध्यमस्य दाता इन्द्रो वै ज्येष्ठस्य प्रदाता यदेवेदं क्षुद्रं पशूनां तद् विष्णोः शिपिविष्टं तदेवाऽऽप्नोति पशूनेवाऽवरुन्धे। इति

–आथर्वणिकानां गोपथब्राह्मणे (२।१।९)।

द्वे पौर्णमास्यौ। अमावास्ये च। यां पर्यस्तमयं पूर्ण उदियाद् यां चास्तमिते ते पौर्णमास्यौ। श्वो न द्रष्टेति यदहश् च न दृश्येत ते अमावास्ये। तत्रेज्यायां यथाकामी। इति

–शाङ्खायनश्रौतसूत्रे (१।३।३-७)।

चन्द्रमसं वाऽनिर्ज्ञाय सम्पूर्णं वा विज्ञायाऽग्नीनन्वादधाति। इति

–बौधायनश्रौतसूत्रे (१।१)।

स ह स्माऽऽह बौधायनो यत्रैतदुपवसतोऽस्तमित आदित्ये पुरस्ताच् चन्द्रमा लोहितीभवन्निवोदियात् तमप्युपवसथं जानीयादिति। अत्रो ह स्माऽऽह शालीकिरतिपन्नः खल्वेष भवति। स सन्ध्यं वैवोपपादयिषेत् पूर्णं वाऽभियजेत। तस्य चेदुपवसतोऽस्तमित आदित्ये पुरस्ताच् चन्द्रमा लोहितीभवन्-

निवोदियादारमताऽग्निहोत्रेणेत्युक्त्वा पार्वणेन प्रक्रामेत्। संस्थिते पार्वणेऽग्निहोत्रं जुहुयात्। इति च

–तत्रैव (२०।१)।

स ह स्माऽऽह बौधायनोऽदृश्यमान एवोपवसेन् न दृश्यमान इति। एवं चैव खलु कुर्यादिति शालीकिरस्ति त्वपि दृश्यमान उपवसथः। यत्रैतद् रात्रीभिरुपपन्नोऽणुश् चन्द्रमाः परिनक्षत्रमुपव्युषं भवति न स श्वो भूते दृश्यते तमप्युपवसथं जानीयादिति। इति च

–तत्रैव (२०।१)।

अथेमौ दर्शपूर्णमासौ पौर्णमास्युपक्रमावमावास्यासंस्थावाचार्या ब्रुवते। तत्रोदाहरन्त्यूर्ध्वं मध्यरात्रात् पौर्णमास्यां चन्द्रमाः पूर्यते स एतं चाऽपररात्रं पूर्णो भवति सर्वं चाऽहरुत्तरस्याश्च रात्रेरा मध्यरात्रादथामावास्याया उपवसथीयेऽहन्यूर्ध्वं मध्यन्दिनाच् चन्द्रमसमादित्यो लभते स एतं चाऽपररात्रं लब्धो भवति सर्वां च रात्रिमुत्तरस्य चाह्न आ मध्यन्दिनादेतं सन्धिमभियजेतेति। रात्रिर् ह पौर्णमास्यां सन्धेया भवत्यहरमावास्यायां द्वे पौर्णमास्यौ द्वे अमावास्ये पूर्वांपूर्वां पौर्णमासीमुत्तरामुत्तराममावास्याम्, *या पूर्वा पौर्णमासी साऽनुमतिर् योत्तरा सा राका या पूर्वाऽमावास्या सा सिनीवाली योत्तरा सा कुहूर्* गायत्री वा अनुमतिस् त्रिष्टुब् राकेति पौर्णमास्यै नामधेये जगती सिनीवाल्यनुष्टुप् कुहूरित्यमावास्यायै नामधेये। इति च

–तत्रैव (२४।२०)।

यदहः पुरस्ताच् चन्द्रमाः पूर्ण उत्सर्पेत् तां पौर्णमासीमुपवसेच् छ्वः पूरितेति वा खर्विकां तृतीयां वाजसनेयिनः समामनन्ति, यदहर् न दृश्यते तदहरमावास्यां श्वो न द्रष्टार इति वा। इति

–आपस्तम्बश्रौतसूत्रे (परिभाषासूत्रे[क.२])।

पूर्णे चन्द्रमस्युपवसेत् पौर्णमासीम्, अदर्शनेऽमावास्याम्, पूर्वे वा। इति

–मानवमैत्रायणीयश्रौतसूत्रे (१।४।१।१)।

यदहः पूर्णश् चन्द्रमाः स्यात् तां पौर्णमासीमुपसेत्, श्वः पूरितेति वा; यदहर् न दृश्येत तामावास्याम्, श्वो नोदेतेति वा। इति

–भारद्वाजश्रौतसूत्रे (१।१।५-८)।

पूर्वां पौर्णमासीमुपवसेत्, सम्पूर्णं वा; पूर्वाममावास्याम्, यदहर् वा न दृश्यते। इति

–सत्याषाढश्रौतसूत्रे [हिरण्यकेशिश्रौतसूत्रे] (१।१)।

चन्द्रमसमूनं पूर्णं वा विज्ञाय पूर्वस्मिन् पर्वणि पौर्णमासेन यक्ष्य इत्युक्त्वा केशश्मश्रूणि वापयित्वोपवसति, चन्द्रमसं दृष्टमदृष्टं वा विज्ञाय चैव दर्शेन यक्ष्य इत्युक्त्वोपवसति। इति

–वैखानसश्रौतसूत्रे (३।१)।

पूर्वां पौर्णमासीमुत्तरां वोपवसेत्। इति

–कात्यायनश्रौतसूत्रे (२।१।१)।

सद्यो वा प्रातः। इति च

–तत्रैव (२।१।१६)।

अपराह्णे पिण्डपितृयज्ञश् चन्द्राऽदर्शनेऽमावास्यायाम्। इति च

–तत्रैव (४।१।१)।

श्वो नोदेतेत्यदृष्टे वा पर्णशाखां छिनत्ति शामीलीं वेषेत्वेत्यूर्जे त्वेति वा। इति च

–तत्रैव (४।२।४४)।

सन्ध्यां पौर्णमासीमुपवसेत्, उत्तरामित्येके, अथ यदहश् चन्द्रमा न दृश्येत तामावास्याम्, पक्षान्ता उपवस्तव्याः पक्षादयोऽभियष्टव्याः, आमावास्येन हविषा पूर्वपक्षमभियजते पौर्णमासेनाऽपरपक्षम्, यः परमो विकर्षः सूर्याचन्द्रमसोः सा पौर्णमासी यः परमः सङ्कर्षः साऽमावास्या, यदहस् त्वेव चन्द्रमा न दृश्येत तामावास्यां कुर्वीत, दृश्यमानेऽप्येकदा, गताध्वा भवतीति, त्रयः पौर्णमासीकाला भवन्ति सन्ध्या वाऽस्तमितोदिता वोच्चैर् वा, अथ यदहः पूर्णो भवति; पृथगेवैतस्य ज्ञानस्याऽध्यायो भवति, अधीयीत वा तद्विद्भ्यो वा पर्वाऽऽगमयेत। इति

–गोभिलगृह्यसूत्रे (१।५।२-१३)।

***या पूर्वा पौर्णमासी साऽनुमतिर् योत्तरा सा राका, या पूर्वाऽमावास्या सा सिनीवाली योत्तरा सा कुहूः,* अद्योपवसथ इत्युपवत्स्यद्भक्तमश्नाति।** इति

–आथर्वणिकानां कौशिकसूत्रे (१।२९-३१)।

विक्रम-सन्निपातौ दर्शपूर्णमासयोरिज्याकालस् तत्संयोगात्। इति

–जैमिनीयधर्ममीमांसासूत्रसङ्कर्षकाण्डे (३।१।१)।

पर्वणि सद्यस्काला। इति

–ऋक्तन्त्रे (३।७।९[१२९])।

पर्वणि सकारमापद्यते। सद्यस्काला पौर्णमासी। (सद्यस्कालाऽमावास्या) सद्यःकालमन्यत्। इति

–तत्रैव वृत्तौ।

यदा त्वस्तमियात् सूर्यः पूर्णश् चेन्दुरुपागमत्।
युगपत् सोत्तरा राका तदा भवति पूर्णिमा॥ इति

–कात्यायश्रौतसूत्रकर्कभाष्ये (२।१।१)।

सन्धिश् चेत् सङ्गवादूर्ध्वं प्राक् पर्यावर्तनाद् रवेः।
सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिः॥ इति

–कात्यायनवचनम्, कात्यायनश्रौतसूत्रदेवयाज्ञिकभाष्ये (२।१।१७)।

विकृतेः प्रकृतिकालत्वात् सद्यस्कालोत्तरा विकृतिस्तयोः प्रत्यक्षशिष्टत्वात्। इति

–जैमिनीयधर्ममीमांसासूत्रे (५।४।२२)।

यदा चर्तुदशीयामं तुरीयमनुपूरयेत्।
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते॥ इति

–कात्यायनस्मृतौ [गोभिलस्मृतौ, कर्मप्रदीपे] (२।६।२ [१६।२]),
बौधायनवचनं च सभाष्यगोभिलगृह्यसूत्रटिप्पण्याम् (पृ.१५५)।

पर्वप्रतिपदोः सन्धिरर्वागावर्तनाद् यदि।
तस्मिन्नहनि यष्टव्यं पूर्वेद्युस् तदुपक्रमः॥ इति

–गोभिलवचनम्, सभाष्यगोभिलगृह्यसूत्रटिप्पण्याम् (पृ.१४६)।

पूर्वाह्णे वाऽथ मध्याह्ने यदि पर्व समाप्यते।
उपोष्य तत्र पूर्वेद्युस् तदहर् याग इष्यते॥ इति

–लौगाक्षिवचनं च तत्रैव।

पूर्वाह्णे मध्यमे वाऽपि यदि पर्व समाप्यते।
तदोपवासः पूर्वेद्युस् तदहर् याग इष्यते॥ इति

–शातातपवचनं च तत्रैव।

अर्धं चतुर्दशी यत्र परे पञ्चदशी यदि।
चतुर्दश्यवसाने तु पितृयज्ञं तु कारयेत्॥ इति

–परिशिष्टकृद्-वचनम्, सोमाकरभाष्ये (श्लो.१७)।

चतुर्दश्यां यदा कृष्णे क्षयमभ्येति चन्द्रमाः।
दृश्यो भवति वाऽप्युच्चैः सिनीवाली ततस् तदा॥

अमावास्यामदृष्टेऽपि केचित् तेन गताध्वनि।
निश्युद्गतोऽथवाऽप्युच्चैरस्तं वाऽप्युपगच्छति।
तदा पूर्वेऽप्यृतौ ह्येतत् कार्यं चन्द्रवशाद् भवेत्॥ इति
–गर्गवचनं च तत्रैव।

यत्रौपवसथं कर्म यजनीयात् त्रयोदशम्।
भवेत् सप्तदशं वाऽपि तत् प्रयत्नेन वर्जयेत्॥ इति
–बौधायनवचनं च सभाष्यगोभिलगृह्यसूत्रटिप्पण्याम् (पृ.१४९)।

षोडशेऽहन्यभीष्टेष्टिर् मध्या पञ्चदशेऽहनि।
चतुर्दशे जघन्येष्टिः पापा सप्तदशेऽहनि॥ इति च
–बौधायनवचनं तत्रैव।

आदित्येऽस्तमिते चन्द्रः प्रतीच्यामुदियाद् यदा।
प्रतिपद्यतिपत्तिः स्यात् पञ्चदश्यां यजेत् तदा॥ इति
–स्मृत्यन्तरवचनं तत्रैव (पृ.१४८)।

राका चाऽनुमतिश् चैव पौर्णमासीद्वयं विदुः।
राका सम्पूर्णचन्द्रा स्यात् कलोनाऽनुमतिः स्मृता॥ इति
–वृद्धवसिष्ठवचनं हेमाद्रिकृते चतुर्वर्गचिन्तामणौ
परिशेषखण्डे कालनिर्णये (पृ.३१४)।

दृष्टचन्द्राममावास्यां सिनीवालीं प्रचक्षते।
तामेव च कुहूमाहुर् नष्टचन्द्रां महर्षयः॥ इति च
–वृद्धवसिष्ठवचनं तत्रैव (पृ.३१५)।

यदि सन्ध्यागतः सोमो मृणालमिव दृश्यते।
अपराह्णे क्षयस् तस्यां पिण्डानां करणं ध्रुवम्॥ इति
–कातीयानां द्वितीये यज्ञपार्श्वे (श्लो.१०५), हारीतवचनं च सभाष्य-
गोभिलगृह्यसूत्रटिप्पण्याम् (पृ.१५३)।

सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि।
स्त्रीभिः शूद्रैः कुहूः कार्या तथा चाऽनग्निकैर् द्विजैः॥ इति
–लौगाक्षिवचनं सभाष्यगोभिलगृह्यसूत्रटिप्पण्याम् (पृ.१५३),
गोपीनाथभट्टकृतसंस्काररत्नमालायां च (पृ.१०३९)।

अपराह्णद्वयव्यापी यदि दर्शस् तिथिक्षये।
आहिताऽग्नेः सिनीवाली निरग्न्यादेः कुहूर् मता॥ इति
–जाबालिवचनम्, सभाष्यगोभिलगृह्यसूत्रटिप्पण्याम् (पृ.१५३)।

दृष्टचन्द्रा सिनीवाली नष्टचन्द्रा कुहूः स्मृता।
अमावास्या द्विधा प्रोक्ता विद्वद्भिर् धर्मलिप्सुभिः॥
सिनीवाली द्विजैर् ग्राह्या साग्निकैः श्राद्धकर्मणि।
कुहूः स्त्रीभिस् तथा शूद्रैरपि वाऽनग्निकैस् तथा॥ इति
–नारदीयपुराणे (१।२९।२६-२८)।

मध्याह्नद्वितये स्यातामामावास्या च पूर्णिमा।
परेद्युरेव विप्रेन्द्र सद्यःकालो विधीयते॥ इति च
–तत्रैव (१।२९।३८)।

यच् चोक्तं दृश्यमानेऽपि तच् चतुर्दश्यपेक्षया।
अमावास्यां प्रतीक्षेत तदन्ते वाऽपि निर्वपेत्॥
अष्टमेऽंशे चतुर्दश्याः क्षीणो भवति चन्द्रमाः।
अमावास्याऽष्टमांशे च पुनः किल भवेदणुः॥
आग्रहायण्यमावास्या तथा ज्यैष्ठस्य या भवेत्।
विशेषमाभ्यां ब्रुवते चन्द्रचारविदो जनाः॥
अत्रेन्दुराद्ये प्रहरेऽवतिष्ठते चतुर्थभागोनकलावशिष्टः।
तदन्त एव क्षयमेति कृत्स्नमेवं ज्योतिश्चक्रविदो वदन्ति॥
यस्मिन्नब्दे द्वादशैकश् च यव्यस्
तस्मिँस् तृतीयया परिदृश्यो न जायते।
एवं चारं चन्द्रमसो विदित्वा
क्षीणे तस्मिन्नपराह्णे च दद्यात्॥ इति
–कात्यायनस्मृतौ [गोभिलस्मृतौ, कर्मप्रदीपे] (२।६।४-८[१६।४-८])।

राजवर्षं मासाः पक्षो दिवसश् च व्युष्टम्, वर्षा-हेमन्त-ग्रीष्माणां तृतीय-सप्तमा दिवसोनाः पक्षाः शेषाः पूर्णाः, पृथगधिमासक इति कालः। इति
–कौटलीयेऽर्थशास्त्रे (२।६)।

वैदिकानामियं द्युहानव्यवस्था अवैदिकैर् जैनैर् बौद्धैरपि स्वीकृताऽनुसृता चाऽऽसीदित्यवगम्यते। तथाहि–

वर्षाशीतोष्णकालेषु चतुर्मासमितेषु यत्।
अधिरात्रं भवेत् पर्व तृतीयमथ सप्तमम्॥ इति

–कालालोकप्रकाशवचनम्, शामशास्त्रिकृतवेदाङ्गज्योतिषव्याख्याने (पृ.१३)।

हेमन्तानामिति। यथा वर्षा इत्येकस्मिन्नप्यर्थे बहुवचनं प्रसिद्धम्, तथा हेमन्ता ग्रीष्मा इति द्रष्टव्यम्। प्रवचने त्रय एवर्तवः, न यथा लोके षडिति। शिशिरो हि शीतसामान्याद् धेमन्त इत्युक्तः, वसन्तोऽप्यूष्मसामान्याद् ग्रीष्म इत्युक्तः, शरदपि वृष्टिसामान्याद् वर्षा इत्युक्तेति।

[हेमन्तग्रीष्मवर्षाणामध्यर्धे मासि निर्गते।
शेषेऽर्धमासे विद्वद्भिरूनरात्रो निपात्यते॥]

हेमन्तग्रीष्मवर्षाणामिति। सर्वबौद्धानां हेमन्ताः प्रथम ऋतुः, ग्रीष्मा द्वितीयः, वर्षास् तृतीयः। अधिकमर्धमस्येत्यध्यर्धो मासः, तस्मिन्नध्यर्धे मासि निर्गते। मार्गशीर्षे सपौषार्धेऽधि(ति)क्रान्ते। शेषेऽर्धमासे पौषस्याऽर्धेऽवशिष्टे कृष्ण-चतुर्दश्याम् ऊनरात्रो निपात्यते त्यज्यत इत्यर्थः। चातुर्दशिकोऽत्र भिक्षुभिः पोषधः क्रियते। एवं माघे फाल्गुनावशिष्टे पुनरपर ऊनरात्रो निपात्यते। तथा ग्रीष्मेषु वैशाखकृष्णचतुर्दश्याम्, आषाढकृष्णचतुर्दश्यां चाऽपरावूनरात्रौ निपात्येते। वर्षास्वपि भाद्रपदकृष्णचतुर्दश्यां कार्त्तिककृष्णचतुर्दश्यां चापरा-वूनरात्रौ निपात्येते। इति

–स्फुटार्थव्याख्यायाम्, अभिधर्मकोशे वसुबन्धुविरचितस्वोपज्ञभाष्यसहिते, यशोमित्रकृत-स्फुटार्थ-व्याख्योपेते, तृतीये कोशस्थाने लोकधातु-निर्देशप्रकरणे (श्लो. ८८-८९)।

एवं च द्यु हेयं पर्व चेत् पाद इत्यादेः श्लोकस्योक्तोऽर्थः श्रुति-स्मृति-पुराणादि-वचनानामनुकूल इति बोध्यम्। चान्द्रसंवत्सर-सम्मिते गवामयनसत्रे युग्ममासेषु ऊनत्रिंशतो दिनानामेव यागदिनत्वं प्रतिपादयतां लाट्यायानश्रौतसूत्र-द्राह्यायणश्रौत-सूत्र-निदानसूत्राणामप्ययमर्थोऽनुकूल एवेति च स्मरणीयम्। लाट्यायनश्रौतसूत्रा-दिषु हि "युग्ममासेष्वाद्यस्याऽभिप्लवस्य स्थाने तत्पञ्चाहः स षडूनश् चान्द्रमसः" (४।८।६) इत्याद्युक्तमवगन्तव्यम्।

पञ्चसिद्धान्तिकायां द्वादशेऽध्याये प्रतिपादिते पैतामहसिद्धान्तेऽपि "प्रागर्धे पर्व यदा तदोत्तराऽतोऽन्यथा तिथिः पूर्वा" इत्युक्त्वा लगधमुनिप्रोक्ता एव पर्वयागदिननिर्णयरीतिः प्रतिपादिता बोध्या।

विशेषः– द्यु हेयमित्यादिकः श्लोकः ऋग्वेदिनां परम्परयाऽऽगते वेदाङ्ग-ज्योतिषे नास्ति। एष श्लोकः शङ्करबालकृष्णदीक्षितेन (१९१०–१९५५वै.)

व्याख्यातो न दृश्यते। अतस् तत्पूर्वैर् आधुनिकैर् व्याख्यातृभिः व्हेबर-थिबो-जनार्दन-बालाजीमोडकैश् चाऽव्याख्यात एवाऽवगम्यते। शामशास्त्री तु एकत्राऽऽङ्ल-भूमिकायाम् (पृ.xv) एष श्लोकः थिबोमहाशयेन व्याख्यात इति भणति, अन्यत्र तु आङ्लभूमिकायाम् (पृ.iii) दीपिकाख्यव्याख्याप्रारम्भे च थिबोमहाशयेनैष श्लोको न व्याख्यात इति भणति। सोमाकरभाष्यमस्फुटम्। सुधाकरभाष्यमपि अयथार्थ-मेव। छोटेलालबार्हस्पत्य-व्याख्यानमपि सुधाकरव्याख्यानतुल्यमेवेति बालगङ्गाधर-तिलकलेखादवगम्यते। बालगङ्गाधरतिलकेनाऽप्येष श्लोको ब्राह्मणग्रन्थ-श्रौत-सूत्र-गृह्यसूत्रादिवैदिकधर्मशास्त्रव्यवस्थाज्ञानवैधुर्यादन्यथैव व्याख्यातो दृश्यते। "दु" इत्यस्य "द्यु" इति तत्कृतं पाठसंशोधनं तु समीचीनमस्ति। श्रौतसूत्र-गृह्यसूत्रा-द्यध्ययनवैधुर्यादेवाऽयं श्लोकः शामशास्त्रिमहाभागेनाऽपि न सम्यग् व्याख्यातः। उत्तरार्धस्य तत्कृतोऽर्थस् त्वस्फुट एव। पञ्चसिद्धान्तिकोक्तपैतामहसिद्धान्त-संवादबलेन च तेन स्वकृतोऽर्थः समर्थितोऽस्ति। शामशास्त्र्यनुगामिना सत्यप्रकाश-महाभागेनाऽप्येष श्लोकः सम्यङ् न व्याख्यातः। अस्माभिस् तु श्रुति-स्मृति-पुराणा-द्यध्ययनबलेनाऽस्य श्लोकस्य स्फुटतरतयाऽर्थः प्रतिपादितो बोध्यः।

अस्मद्व्याख्यानस्य स्पष्टतयाऽवबोधायाऽत्र श्रविष्ठादौ सूर्योदयकाले शुक्ल-पक्षप्रतिपदारम्भे उदगयनादौ प्रवृत्तस्य पञ्चवर्षात्मकस्य आदियुगस्य १२४ पर्वणां (१२४ पक्षाणां) सम्बद्धेषु सावनदिनेषु समाप्तेः कालस्य प्रदर्शिका सारणी अध उपस्थाप्यते। तत्र युगे पञ्च वर्षाणि भवन्तीति "पञ्चसंवत्सरमयं युगाध्यक्षं प्रजा-पतिम्" (श्लो.१) इत्युल्लेखात्, "त्रिंशत्यह्नां सषट्षष्टिरब्दः षट् चर्तवोऽयने। मासा द्वादश सौराः स्युरेतत् पञ्चगुणं युगम्" (श्लो.२८) इति कथनाच् चाऽवगम्यते। युगे १२४ पर्वाणि पक्षा वाऽपि भवन्तीति च "निरेकं द्वादशाभ्यस्तं द्विगुणं चाऽऽप्तसंयुतम्। षष्ट्याषष्ट्या युतं द्वाभ्यां पर्वणां राशिरुच्यते" (श्लो.१३) इति वचनात्, "पर्वणां स्याच् चतुष्पादी" (श्लो. ३०) इति वचनाच् च ज्ञायते। पर्वशब्दः पक्षशब्दश् च प्रतिपदादि-पूर्णिमान्तस्य प्रतिपदाद्यमावास्यान्तस्य वा कालस्य वाचक इति शास्त्रान्तराल् लोकाच् चैवाऽवगम्यते। एकस्मात् सूर्योदयाद् अन्यं सूर्योदयं यावत् स्थितः कालो दिनशब्दवाच्योऽहोरात्रशब्दवाच्यो वाऽपि भवतीति च शास्त्रान्तराल् लोकाच् चैवापि ज्ञायते। दिनस्यैव सावनदिनशब्दवाच्यत्वं च "सावनेन्दुस्तृमासानां षष्टिः सैकद्विसप्तिका। द्यु-त्रिंशत् सावनः साऽर्धः सौरस् स्तृणां स पर्ययः" (श्लो. ३१) इति श्लोकादवगम्यते। युगे १२४ पर्वणां स्वीकृतत्वाद् गणितसौविध्याय एकस्य सावन-दिनस्य एकस्य नक्षत्रस्याऽपि १२४ अंशाः कल्प्यन्ते। एतच् च "पादस् त्रिंशत् तु सैकिका" (श्लो.१२) इति वचनादप्यवगम्यते। एवं च उपर्युल्लिखितेभ्यो वेदाङ्ग-

ज्योतिषवचनेभ्य एकस्मिन् युगे १२४ पर्वाणि, १८३० सावनदिनानि च भवन्तीति ज्ञाते, १२४ पर्वभिस् तु १८३० सावनदिनानि प्राप्यन्ते तर्हि एकेन पर्वणा कति सावन-दिनानि लभ्यन्ते इति त्रैराशिके कृते $\frac{१८३०}{१२४}=१४\frac{९४}{१२४}$ सावनदिनानि लभ्यन्ते इति ज्ञायते। एतस्या एव सङ्ख्याया इष्टपर्वसङ्ख्यया गुणने अन्येषां पर्वणां गतसावन-दिनमानं च लभ्यते। एवमेव १२४ पर्वभिस् तु १८०९ नक्षत्राणि प्राप्यन्ते (श्लो.२९, ३१) तर्हि एकेन पर्वणा कति नक्षत्राणि लभ्यन्ते इति त्रैराशिके कृते $\frac{१८०९}{१२४}=१४\frac{७३}{१२४}$ नक्षत्राणि लभ्यन्ते इति ज्ञायते। एतस्या एव सङ्ख्याया इष्टपर्वसङ्ख्यया गुणने अन्येषां पर्वणां गतनक्षत्रमानं च लभ्यते। एवं चोक्ता सारणी एवंविधा भवति—

(१) $१४\frac{९४}{१२४}$ युगप्रवृत्तिदिनात् १५शे दिने उपवसथः, १६शे दिने पूर्णमासेष्टिः। ($१४\frac{७३}{१२४}$ युगादिश्रविष्ठातः १४ नक्षत्रेषु व्यतीतेषु मघानां ७३तमेऽंशे गते प्रथम-पर्वसमाप्तिः)।

(२) $२९\frac{६४}{१२४}$ युगप्रवृत्तिदिनात् ३०शे दिने उपवसथः, ३१शे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। ($२९\frac{२२}{१२४}$ युगादिश्रविष्ठातः २९ नक्षत्रेषु व्यतीतेषु पूर्व-भद्रपदयोर् २२तमेऽंशे गते द्वितीयपर्वसमाप्तिः)।

(३) $४४\frac{३४}{१२४}$ युगप्रवृत्तिदिनात् ४५तमे दिने उपवसथः, ४६तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। ($४३\frac{९५}{१२४}$ युगादिश्रविष्ठातः ४३ नक्षत्रेषु व्यतीतेषु उत्तरफल्गुन्योः ९५ तमेऽंशे गते तृतीयपर्वसमाप्तिः)।

(४) $५९\frac{४}{१२४}$ युगप्रवृत्तिदिनात् ५९तमे दिने उपवसथः, ६०तमे दिने पूर्वेष्टिदिनात् १५शे दिने दर्शेष्टिः। ($५८\frac{४४}{१२४}$ युगादिश्रविष्ठातः ५८ नक्षत्रेषु व्यतीतेषु रेवत्याः ४४तमेऽंशे गते चतुर्थपर्वसमाप्तिः)।

(५) $७३\frac{९८}{१२४}$ युगप्रवृत्तिदिनात् ७४तमे दिने उपवसथः, ७५तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। ($७२\frac{११७}{१२४}$ युगादिश्रविष्ठातः ७२ नक्षत्रेषु व्यतीतेषु चित्रायाः ११७ तमेऽंशे गते पञ्चमपर्वसमाप्तिः)।

(६) $८८\frac{६८}{१२४}$ युगप्रवृत्तिदिनात् ८९तमे दिने उपवसथः, ९०तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। ($८७\frac{६६}{१२४}$ युगादिश्रविष्ठातः ८७ नक्षत्रेषु व्यतीतेषु अप-भरणीनां ६६तमेऽंशे गते षष्ठपर्वसमाप्तिः)।

(७) १०३$\frac{३८}{१२४}$ युगप्रवृत्तिदिनात् १०४तमे दिने उपवसथः, १०५तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (१०२$\frac{१५}{१२४}$ युगादिश्रविष्ठातः १०२ नक्षत्रेषु व्यतीतेषु अनुराधानां १५शेऽंशे गते सप्तमपर्वसमाप्तिः)।

(८) ११८$\frac{८}{१२४}$ युगप्रवृत्तिदिनात् ११८तमे दिने उपवसथः, ११९तमे दिने पूर्वेष्टि-दिनात् १५शे दिने दर्शेष्टिः। (११६$\frac{८८}{१२४}$ युगादिश्रविष्ठातः ११६ नक्षत्रेषु व्यतीतेषु रोहिण्याः ८८तमेऽंशे गते अष्टमपर्वसमाप्तिः)।

(९) १३२$\frac{१०२}{१२४}$ युगप्रवृत्तिदिनात् १३३तमे दिने उपवसथः, १३४तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (१३१$\frac{३७}{१२४}$ युगादिश्रविष्ठातः १३१ नक्षत्रेषु व्यतीतेषु मूलस्य ३७तमेऽंशे गते नवमपर्वसमाप्तिः)।

(१०) १४७$\frac{७२}{१२४}$ युगप्रवृत्तिदिनात् १४८तमे दिने उपवसथः, १४९तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (१४५$\frac{११०}{१२४}$ युगादिश्रविष्ठातः १४५ नक्षत्रेषु व्यतीतेषु आर्द्रायाः ११०तमेऽंशे गते दशमपर्वसमाप्तिः)।

(११) १६२$\frac{४२}{१२४}$ युगप्रवृत्तिदिनात् १६३तमे दिने उपवसथः, १६४तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (१६०$\frac{५९}{१२४}$ युगादिश्रविष्ठातः १६० नक्षत्रेषु व्यतीतेषु उत्तराषाढानाम् ५९तमेऽंशे गते एकादशपर्वसमाप्तिः)।

(१२) १७७$\frac{१२}{१२४}$ युगप्रवृत्तिदिनात् १७७तमे दिने उपवसथः, १७८तमे दिने पूर्वेष्टि-दिनात् १५शे दिने दर्शेष्टिः। (१७५$\frac{८}{१२४}$ युगादिश्रविष्ठातः १७५ नक्षत्रेषु व्यतीतेषु आश्लेषाणाम् ८मेऽंशे गते द्वादशपर्वसमाप्तिः)।

(१३) १९१$\frac{१०६}{१२४}$ युगप्रवृत्तिदिनात् १९२तमे दिने उपवसथः, १९३तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (१८९$\frac{८१}{१२४}$ युगादिश्रविष्ठातः १८९ नक्षत्रेषु व्यतीतेषु श्रविष्ठानाम् ८१तमेऽंशे गते त्रयोदशपर्वसमाप्तिः)।

(१४) २०६$\frac{७६}{१२४}$ युगप्रवृत्तिदिनात् २०७तमे दिने उपवसथः, २०८तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (२०४$\frac{३०}{१२४}$ युगादिश्रविष्ठातः २०४ नक्षत्रेषु व्यतीतेषु पूर्वफल्गुन्योः ३०तमेऽंशे गते चतुर्दशपर्वसमाप्तिः)।

(१५) २२१$\frac{४६}{१२४}$ युगप्रवृत्तिदिनात् २२२तमे दिने उपवसथः, २२३तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (२१८$\frac{१०३}{१२४}$ युगादिश्रविष्ठातः २१८ नक्षत्रेषु व्यतीतेषु पूर्वभद्रपदयोः १०३तमेऽंशे गते पञ्चदशपर्वसमाप्तिः)।

(१६) २३६$\frac{१६}{१२४}$ युगप्रवृत्तिदिनात् २३६तमे दिने उपवसथः, २३७तमे दिने पूर्वेष्टि-दिनात् १५शे दिने दर्शेष्टिः। (२३३$\frac{५२}{१२४}$ युगादिश्रविष्ठातः २३३ नक्षत्रेषु व्यतीतेषु हस्तस्य ५२तमेऽंशे गते षोडशपर्वसमाप्तिः)।

(१७) २५०$\frac{११०}{१२४}$ युगप्रवृत्तिदिनात् २५१तमे दिने उपवसथः, २५२तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (२४८$\frac{१}{१२४}$ युगादिश्रविष्ठातः २४८ नक्षत्रेषु व्यतीतेषु अश्वयुजोः प्रथमेऽंशे गते सप्तदशपर्वसमाप्तिः)।

(१८) २६५$\frac{८०}{१२४}$ युगप्रवृत्तिदिनात् २६६तमे दिने उपवसथः, २६७तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (२६२$\frac{७४}{१२४}$ युगादिश्रविष्ठातः २६२ नक्षत्रेषु व्यतीतेषु स्वातेः ७४तमेऽंशे गते अष्टादशपर्वसमाप्तिः)।

(१९) २८०$\frac{५०}{१२४}$ युगप्रवृत्तिदिनात् २८१तमे दिने उपवसथः, २८२तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (२७७$\frac{२३}{१२४}$ युगादिश्रविष्ठातः २७७ नक्षत्रेषु व्यतीतेषु कृत्तिकानां २३तमेऽंशे गते ऊनविंशपर्वसमाप्तिः)।

(२०) २९५$\frac{२०}{१२४}$ युगप्रवृत्तिदिनात् २९५तमे दिने उपवसथः, २९६तमे दिने पूर्वेष्टि-दिनात् १५शे दिने दर्शेष्टिः। (२९१$\frac{९६}{१२४}$ युगादिश्रविष्ठातः २९१ नक्षत्रेषु व्यतीतेषु अनुराधानां ९६तमेऽंशे गते विंशपर्वसमाप्तिः)।

(२१) ३०९$\frac{११४}{१२४}$ युगप्रवृत्तिदिनात् ३१०तमे दिने उपवसथः, ३११तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (३०६$\frac{४५}{१२४}$ युगादिश्रविष्ठातः ३०६ नक्षत्रेषु व्यतीतेषु मृगशीर्षस्य ४५तमेऽंशे गते एकविंशपर्वसमाप्तिः)।

(२२) ३२४$\frac{८४}{१२४}$ युगप्रवृत्तिदिनात् ३२५तमे दिने उपवसथः, ३२६तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (३२०$\frac{११८}{१२४}$ युगादिश्रविष्ठातः ३२० नक्षत्रेषु व्यतीतेषु मूलबर्हण्याः ११८तमेऽंशे गते द्वाविंशपर्वसमाप्तिः)।

(२३) ३३९$\frac{५४}{१२४}$ युगप्रवृत्तिदिनात् ३४०तमे दिने उपवसथः, ३४१तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (३३५$\frac{६७}{१२४}$ युगादिश्रविष्ठातः ३३५ नक्षत्रेषु व्यतीतेषु पुनर्वस्वोः ६७तमेऽंशे गते त्रयोविंशपर्वसमाप्तिः)।

(२४) ३५४$\frac{२४}{१२४}$ युगप्रवृत्तिदिनात् ३५४तमे दिने उपवसथः, ३५५तमे दिने पूर्वेष्टि-दिनात् १५शे दिने दर्शेष्टिः। (३५०$\frac{१६}{१२४}$ युगादिश्रविष्ठातः ३५० नक्षत्रेषु व्यतीतेषु श्रवणस्य १६शेऽंशे गते चतुर्विंशपर्वसमाप्तिः)।

(२५) ३६८$\frac{११८}{१२४}$ युगप्रवृत्तिदिनात् ३६९तमे दिने उपवसथः, ३७०तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (३६४$\frac{८९}{१२४}$ युगादिश्रविष्ठातः ३६४ नक्षत्रेषु व्यतीतेषु आश्लेषाणाम् ८९तमेऽंशे गते पञ्चविंशपर्वसमाप्तिः)।

(२६) ३८३$\frac{८८}{१२४}$ युगप्रवृत्तिदिनात् ३८४तमे दिने उपवसथः, ३८५तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (३७९$\frac{३८}{१२४}$ युगादिश्रविष्ठातः ३७९ नक्षत्रेषु व्यतीतेषु शतभिषजः ३८तमेऽंशे गते षड्विंशपर्वसमाप्तिः)।

(२७) ३९८$\frac{५८}{१२४}$ युगप्रवृत्तिदिनात् ३९९तमे दिने उपवसथः, ४००तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (३९३$\frac{१११}{१२४}$ युगादिश्रविष्ठातः ३९३ नक्षत्रेषु व्यतीतेषु पूर्वफल्गुन्योः १११तमेऽंशे गते सप्तविंशपर्वसमाप्तिः)।

(२८) ४१३$\frac{२८}{१२४}$ युगप्रवृत्तिदिनात् ४१३तमे दिने उपवसथः, ४१४तमे दिने पूर्वेष्टि-दिनात् १५शे दिने दर्शेष्टिः। (४०८$\frac{६०}{१२४}$ युगादिश्रविष्ठातः ४०८ नक्षत्रेषु व्यतीतेषु उत्तरभद्रपदयोः ६०तमेऽंशे गते अष्टाविंशपर्वसमाप्तिः)।

(२९) ४२७$\frac{१२२}{१२४}$ युगप्रवृत्तिदिनात् ४२८तमे दिने उपवसथः, ४२९तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (४२३$\frac{९}{१२४}$ युगादिश्रविष्ठातः ४२३ नक्षत्रेषु व्यतीतेषु चित्रायाः ९तमेऽंशे गते ऊनत्रिंशपर्वसमाप्तिः)।

(३०) ४४२$\frac{९२}{१२४}$ युगप्रवृत्तिदिनात् ४४३तमे दिने उपवसथः, ४४४तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (४३७$\frac{८२}{१२४}$ युगादिश्रविष्ठातः ४३७ नक्षत्रेषु व्यतीतेषु अश्वयुजोः ८२तमेऽंशे गते त्रिंशपर्वसमाप्तिः)।

(३१) $४५७\frac{६२}{१२४}$ युगप्रवृत्तिदिनात् ४५८तमे दिने उपवसथः, ४५९तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। ($४५२\frac{३१}{१२४}$ युगादिश्रविष्ठातः ४५२ नक्षत्रेषु व्यतीतेषु विशाखयोः ३१तमेऽंशे गते एकत्रिंशपर्वसमाप्तिः)।

(३२) $४७२\frac{३२}{१२४}$ युगप्रवृत्तिदिनात् ४७३तमे दिने उपवसथः, ४७४तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। ($४६६\frac{१०४}{१२४}$ युगादिश्रविष्ठातः ४६६ नक्षत्रेषु व्यतीतेषु कृत्तिकायाः १०४तमेऽंशे गते द्वात्रिंशपर्वसमाप्तिः)।

(३३) $४८७\frac{२}{१२४}$ युगप्रवृत्तिदिनात् ४८७तमे दिने उपवसथः, ४८८तमे दिने पूर्वेष्टि-दिनात् १५शे दिने पूर्णमासेष्टिः। ($४८१\frac{५३}{१२४}$ युगादिश्रविष्ठातः ४८१ नक्षत्रेषु व्यतीतेषु ज्येष्ठायाः ५३तमेऽंशे गते त्रयस्त्रिंशपर्वसमाप्तिः)।

(३४) $५०१\frac{९६}{१२४}$ युगप्रवृत्तिदिनात् ५०२तमे दिने उपवसथः, ५०३तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। ($४९६\frac{२}{१२४}$ युगादिश्रविष्ठातः ४९६ नक्षत्रेषु व्यतीतेषु आर्द्रायाः द्वितीयेऽंशे गते चतुस्त्रिंशपर्वसमाप्तिः)।

(३५) $५१६\frac{६६}{१२४}$ युगप्रवृत्तिदिनात् ५१७तमे दिने उपवसथः, ५१८तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। ($५१०\frac{७५}{१२४}$ युगादिश्रविष्ठातः ५१० नक्षत्रेषु व्यतीतेषु पूर्वाषाढानां ७५तमेऽंशे गते पञ्चत्रिंशपर्वसमाप्तिः)।

(३६) $५३१\frac{३६}{१२४}$ युगप्रवृत्तिदिनात् ५३२तमे दिने उपवसथः, ५३३तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। ($५२५\frac{२४}{१२४}$ युगादिश्रविष्ठातः ५२५ नक्षत्रेषु व्यतीतेषु पुष्यस्य २४तमेऽंशे गते षट्त्रिंशपर्वसमाप्तिः)।

(३७) $५४६\frac{६}{१२४}$ युगप्रवृत्तिदिनात् ५४६तमे दिने उपवसथः, ५४७तमे दिने पूर्वेष्टि-दिनात् १५शे दिने पूर्णमासेष्टिः। ($५३९\frac{९७}{१२४}$ युगादिश्रविष्ठातः ५३९ नक्षत्रेषु व्यतीतेषु श्रवणस्य ९७तमेऽंशे गते सप्तत्रिंशपर्वसमाप्तिः)।

(३८) $५६०\frac{१००}{१२४}$ युगप्रवृत्तिदिनात् ५६१तमे दिने उपवसथः, ५६२तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। ($५५४\frac{४६}{१२४}$ युगादिश्रविष्ठातः ५५४ नक्षत्रेषु व्यतीतेषु मघानां ४६तमेऽंशे गते अष्टात्रिंशपर्वसमाप्तिः)।

(३९) ५७५$\frac{७०}{१२४}$ युगप्रवृत्तिदिनात् ५७६तमे दिने उपवसथः, ५७७तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (५६८$\frac{११९}{१२४}$ युगादिश्रविष्ठातः ५६८ नक्षत्रेषु व्यतीतेषु शतभिषजः ११९तमेऽंशे गते ऊनचत्वारिंशपर्वसमाप्तिः)।

(४०) ५९०$\frac{४०}{१२४}$ युगप्रवृत्तिदिनात् ५९१तमे दिने उपवसथः, ५९२तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (५८३$\frac{६८}{१२४}$ युगादिश्रविष्ठातः ५८३ नक्षत्रेषु व्यतीतेषु उत्तरफल्गुन्योः ६८तमेऽंशे गते चत्वारिंशपर्वसमाप्तिः)।

(४१) ६०५$\frac{१०}{१२४}$ युगप्रवृत्तिदिनात् ६०५तमे दिने उपवसथः, ६०६तमे दिने पूर्वेष्टि-दिनात् १५शे दिने पूर्णमासेष्टिः। (५९८$\frac{१७}{१२४}$ युगादिश्रविष्ठातः ५९८ नक्षत्रेषु व्यतीतेषु रेवत्याः १७शेऽंशे गते एकचत्वारिंशपर्वसमाप्तिः)।

(४२) ६१९$\frac{१०४}{१२४}$ युगप्रवृत्तिदिनात् ६२०तमे दिने उपवसथः, ६२१तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (६१२$\frac{९०}{१२४}$ युगादिश्रविष्ठातः ६१२ नक्षत्रेषु व्यतीतेषु चित्रायाः ९०तमेऽंशे गते द्विचत्वारिंशपर्वसमाप्तिः)।

(४३) ६३४$\frac{७४}{१२४}$ युगप्रवृत्तिदिनात् ६३५तमे दिने उपवसथः, ६३६तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (६२७$\frac{३९}{१२४}$ युगादिश्रविष्ठातः ६२७ नक्षत्रेषु व्यतीतेषु अपभरणीनाम् ३९तमेऽंशे गते त्रिचत्वारिंशपर्वसमाप्तिः)।

(४४) ६४९$\frac{४४}{१२४}$ युगप्रवृत्तिदिनात् ६५०तमे दिने उपवसथः, ६५१तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (६४१$\frac{११२}{१२४}$ युगादिश्रविष्ठातः ६४१ नक्षत्रेषु व्यतीतेषु विशाखयोः ११२तमेऽंशे गते चतुश्चत्वारिंशपर्वसमाप्तिः)।

(४५) ६६४$\frac{१४}{१२४}$ युगप्रवृत्तिदिनात् ६६४तमे दिने उपवसथः, ६६५तमे दिने पूर्वेष्टि-दिनात् १५शे दिने पूर्णमासेष्टिः। (६५६$\frac{६१}{१२४}$ युगादिश्रविष्ठातः ६५६ नक्षत्रेषु व्यतीतेषु रोहिण्याः ६१तमेऽंशे गते पञ्चचत्वारिंशपर्वसमाप्तिः)।

(४६) ६७८$\frac{१०८}{१२४}$ युगप्रवृत्तिदिनात् ६७९तमे दिने उपवसथः, ६८०तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (६७१$\frac{१०}{१२४}$ युगादिश्रविष्ठातः ६७१ नक्षत्रेषु व्यतीतेषु मूलबर्हण्याः १०मेऽंशे गते षट्चत्वारिंशपर्वसमाप्तिः)।

(४७) ६९३$\frac{७८}{१२४}$ युगप्रवृत्तिदिनात् ६९४तमे दिने उपवसथः, ६९५तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (६८५$\frac{८३}{१२४}$ युगादिश्रविष्ठातः ६८५ नक्षत्रेषु व्यतीतेषु आर्द्रायाः ८३तमेऽंशे गते सप्तचत्वारिंशपर्वसमाप्तिः)।

(४८) ७०८$\frac{४८}{१२४}$ युगप्रवृत्तिदिनात् ७०९तमे दिने उपवसथः, ७१०तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (७००$\frac{३२}{१२४}$ युगादिश्रविष्ठातः ७०० नक्षत्रेषु व्यतीतेषु उत्तराषाढानां ३२तमेऽंशे गते अष्टचत्वारिंशपर्वसमाप्तिः)।

(४९) ७२३$\frac{१८}{१२४}$ युगप्रवृत्तिदिनात् ७२३तमे दिने उपवसथः, ७२४तमे दिने पूर्वेष्टि-दिनात् १५शे दिने पूर्णमासेष्टिः। (७१४$\frac{१०५}{१२४}$ युगादिश्रविष्ठातः ७१४ नक्षत्रेषु व्यतीतेषु पुष्यस्य १०५तमेऽंशे गते ऊनपञ्चाशत्तमपर्वसमाप्तिः)।

(५०) ७३७$\frac{११२}{१२४}$ युगप्रवृत्तिदिनात् ७३८तमे दिने उपवसथः, ७३९तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (७२९$\frac{५४}{१२४}$ युगादिश्रविष्ठातः ७२९ नक्षत्रेषु व्यतीतेषु श्रविष्ठानां ५४तमेऽंशे गते पञ्चाशत्तमपर्वसमाप्तिः)।

(५१) ७५२$\frac{८२}{१२४}$ युगप्रवृत्तिदिनात् ७५३तमे दिने उपवसथः, ७५४तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (७४४$\frac{३}{१२४}$ युगादिश्रविष्ठातः ७४४ नक्षत्रेषु व्यतीतेषु पूर्वफल्गुन्योः तृतीयेऽंशे गते एकपञ्चाशत्तमपर्वसमाप्तिः)।

(५२) ७६७$\frac{५२}{१२४}$ युगप्रवृत्तिदिनात् ७६८तमे दिने उपवसथः, ७६९तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (७५८$\frac{७६}{१२४}$ युगादिश्रविष्ठातः ७५८ नक्षत्रेषु व्यतीतेषु पूर्वभद्रपदयोः ७६तमेऽंशे गते द्विपञ्चाशत्तमपर्वसमाप्तिः)।

(५३) ७८२$\frac{२२}{१२४}$ युगप्रवृत्तिदिनात् ७८२तमे दिने उपवसथः, ७८३तमे दिने पूर्वेष्टि-दिनात् १५शे दिने पूर्णमासेष्टिः। (७७३$\frac{२५}{१२४}$ युगादिश्रविष्ठातः ७७३ नक्षत्रेषु व्यतीतेषु हस्तस्य २५तमेऽंशे गते त्रिपञ्चाशत्तमपर्वसमाप्तिः)।

(५४) ७९६$\frac{११६}{१२४}$ युगप्रवृत्तिदिनात् ७९७तमे दिने उपवसथः, ७९८तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (७८७$\frac{९८}{१२४}$ युगादिश्रविष्ठातः ७८७ नक्षत्रेषु व्यतीतेषु रेवत्याः ९८तमेऽंशे गते चतुष्पञ्चाशत्तमपर्वसमाप्तिः)।

(५५) ८११$\frac{८६}{१२४}$ युगप्रवृत्तिदिनात् ८१२तमे दिने उपवसथः, ८१३तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (८०२$\frac{४७}{१२४}$ युगादिश्रविष्ठातः ८०२ नक्षत्रेषु व्यतीतेषु स्वातेः ४७तमेऽंशे गते पञ्चपञ्चाशत्तमपर्वसमाप्तिः)।

(५६) ८२६$\frac{५६}{१२४}$ युगप्रवृत्तिदिनात् ८२७तमे दिने उपवसथः, ८२८तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (८१६$\frac{१२०}{१२४}$ युगादिश्रविष्ठातः ८१६ नक्षत्रेषु व्यतीतेषु अपभरणीनां १२०तमेऽंशे गते षट्पञ्चाशत्तमपर्वसमाप्तिः)।

(५७) ८४१$\frac{२६}{१२४}$ युगप्रवृत्तिदिनात् ८४१तमे दिने उपवसथः, ८४२तमे दिने पूर्वेष्टि-दिनात् १५शे दिने पूर्णमासेष्टिः। (८३१$\frac{६९}{१२४}$ युगादिश्रविष्ठातः ८३१ नक्षत्रेषु व्यतीतेषु अनुराधानाम् ६९तमेऽंशे गते सप्तपञ्चाशत्तमपर्वसमाप्तिः)।

(५८) ८५५$\frac{१२०}{१२४}$ युगप्रवृत्तिदिनात् ८५६तमे दिने उपवसथः, ८५७तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (८४६$\frac{१८}{१२४}$ युगादिश्रविष्ठातः ८४६ नक्षत्रेषु व्यतीतेषु मृगशीर्षस्य १८शेऽंशे गते अष्टपञ्चाशत्तमपर्वसमाप्तिः)।

(५९) ८७०$\frac{९०}{१२४}$ युगप्रवृत्तिदिनात् ८७१तमे दिने उपवसथः, ८७२तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (८६०$\frac{९१}{१२४}$ युगादिश्रविष्ठातः ८६० नक्षत्रेषु व्यतीतेषु मूलबर्हिण्याः ९१तमेऽंशे गते ऊनषष्टितमपर्वसमाप्तिः)।

(६०) ८८५$\frac{६०}{१२४}$ युगप्रवृत्तिदिनात् ८८६तमे दिने उपवसथः, ८८७तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (८७५$\frac{४०}{१२४}$ युगादिश्रविष्ठातः ८७५ नक्षत्रेषु व्यतीतेषु पुनर्वस्वोः ४०तमेऽंशे गते षष्टितमपर्वसमाप्तिः)।

(६१) ९००$\frac{३०}{१२४}$ युगप्रवृत्तिदिनात् ९००तमे दिने उपवसथः, ९०१तमे दिने पूर्वेष्टि-दिनात् १५शे दिने पूर्णमासेष्टिः। (८८९$\frac{११३}{१२४}$ युगादिश्रविष्ठातः ८८९ नक्षत्रेषु व्यतीतेषु उत्तराषाढानां ११३तमेऽंशे गते एकषष्टितमपर्वसमाप्तिः)।

(६२) ९१५ युगप्रवृत्तिदिनात् ९१५तमे दिने उपवसथः, ९१६तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (९०४$\frac{६२}{१२४}$ युगादिश्रविष्ठातः ९०४ नक्षत्रेषु व्यतीतेषु आश्लेषाणां ६२तमेऽंशे गते द्विषष्टितमपर्वसमाप्तिः)।

(६३) ९२९$\frac{९४}{१२४}$ युगप्रवृत्तिदिनात् ९३०तमे दिने उपवसथः, ९३१तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (९१९$\frac{११}{१२४}$ युगादिश्रविष्ठातः ९१९ नक्षत्रेषु व्यतीतेषु शतभिषजः एकादशेऽंशे गते त्रिषष्टितमपर्वसमाप्तिः)।

(६४) ९४४$\frac{६४}{१२४}$ युगप्रवृत्तिदिनात् ९४५तमे दिने उपवसथः, ९४६तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (९३३$\frac{८४}{१२४}$ युगादिश्रविष्ठातः ९३३ नक्षत्रेषु व्यतीतेषु पूर्वफल्गुन्योः ८४तमेऽंशे गते चतुष्षष्टितमपर्वसमाप्तिः)।

(६५) ९५९$\frac{३४}{१२४}$ युगप्रवृत्तिदिनात् ९६०तमे दिने उपवसथः, ९६१तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (९४८$\frac{३३}{१२४}$ युगादिश्रविष्ठातः ९४८ नक्षत्रेषु व्यतीतेषु उत्तरभद्रपदयोः ३३तमेऽंशे गते पञ्चषष्टितमपर्वसमाप्तिः)।

(६६) ९७४$\frac{४}{१२४}$ युगप्रवृत्तिदिनात् ९७४तमे दिने उपवसथः, ९७५तमे दिने पूर्वेष्टि-दिनात् १५शे दिने दर्शेष्टिः। (९६२$\frac{१०६}{१२४}$ युगादिश्रविष्ठातः ९६२ नक्षत्रेषु व्यतीतेषु हस्तस्य १०६तमेऽंशे गते षट्षष्टितमपर्वसमाप्तिः)।

(६७) ९८८$\frac{९८}{१२४}$ युगप्रवृत्तिदिनात् ९८९तमे दिने उपवसथः, ९९०तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (९७७$\frac{५५}{१२४}$ युगादिश्रविष्ठातः ९७७ नक्षत्रेषु व्यतीतेषु अश्वयुजोः ५५तमेऽंशे गते सप्तषष्टितमपर्वसमाप्तिः)।

(६८) १००३$\frac{६८}{१२४}$ युगप्रवृत्तिदिनात् १००४तमे दिने उपवसथः, १००५तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (९९२$\frac{४}{१२४}$ युगादिश्रविष्ठातः ९९२ नक्षत्रेषु व्यतीतेषु विशाखयोः चतुर्थेऽंशे गते अष्टषष्टितमपर्वसमाप्तिः)।

(६९) १०१८$\frac{३८}{१२४}$ युगप्रवृत्तिदिनात् १०१९तमे दिने उपवसथः, १०२०तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (१००६$\frac{७७}{१२४}$ युगादिश्रविष्ठातः १००६ नक्षत्रेषु व्यतीतेषु कृत्तिकानां ७७तमेऽंशे गते ऊनसप्ततितमपर्वसमाप्तिः)।

(७०) १०३३$\frac{८}{१२४}$ युगप्रवृत्तिदिनात् १०३३तमे दिने उपवसथः, १०३४तमे दिने पूर्वेष्टि-दिनात् १५शे दिने दर्शेष्टिः। (१०२१$\frac{२६}{१२४}$ युगादिश्रविष्ठातः १०२१ नक्षत्रेषु व्यतीतेषु ज्येष्ठायाः २६तमेऽंशे गते सप्ततितमपर्वसमाप्तिः)।

(७१) १०४७$\frac{१०२}{१२४}$ युगप्रवृत्तिदिनात् १०४८तमे दिने उपवसथः, १०४९तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१०३५$\frac{९९}{१२४}$ युगादिश्रविष्ठातः १०३५ नक्षत्रेषु व्यतीतेषु मृगशीर्षस्य ९९तमेऽंशे गते एकसप्ततितमपर्वसमाप्तिः)।

(७२) १०६२$\frac{७२}{१२४}$ युगप्रवृत्तिदिनात् १०६३तमे दिने उपवसथः, १०६४तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (१०५०$\frac{४८}{१२४}$ युगादिश्रविष्ठातः १०५० नक्षत्रेषु व्यतीतेषु पूर्वाषाढानाम् ४८तमेऽंशे गते द्विसप्ततितमपर्वसमाप्तिः)।

(७३) १०७७$\frac{४२}{१२४}$ युगप्रवृत्तिदिनात् १०७८तमे दिने उपवसथः, १०७९तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१०६४$\frac{१२१}{१२४}$ युगादिश्रविष्ठातः १०६४ नक्षत्रेषु व्यतीतेषु पुनर्वस्वोः १२१तमेऽंशे गते त्रिसप्ततितमपर्वसमाप्तिः)।

(७४) १०९२$\frac{१२}{१२४}$ युगप्रवृत्तिदिनात् १०९२तमे दिने उपवसथः, १०९३तमे दिने पूर्वेष्टिदिनात् १५शे दिने दर्शेष्टिः। (१०७९$\frac{७०}{१२४}$ युगादिश्रविष्ठातः १०७९ नक्षत्रेषु व्यतीतेषु श्रवणस्य ७०तमेऽंशे गते चतुस्सप्ततितमपर्वसमाप्तिः)।

(७५) ११०६$\frac{१०६}{१२४}$ युगप्रवृत्तिदिनात् ११०७तमे दिने उपवसथः, ११०८तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१०९४$\frac{१९}{१२४}$ युगादिश्रविष्ठातः १०९४ नक्षत्रेषु व्यतीतेषु मघानाम् १९तमेऽंशे गते पञ्चसप्ततितमपर्वसमाप्तिः)।

(७६) ११२१$\frac{७६}{१२४}$ युगप्रवृत्तिदिनात् ११२२तमे दिने उपवसथः, ११२३तमे दिने पूर्वेष्टि-दिनात् १६शे दिने दर्शेष्टिः। (११०८$\frac{९२}{१२४}$ युगादिश्रविष्ठातः ११०८ नक्षत्रेषु व्यतीतेषु शतभिषजः ९२तमेऽंशे गते षट्सप्ततितमपर्वसमाप्तिः)।

आर्यावर्त पुस्तकालय

(७७) ११३६$\frac{४६}{१२४}$ युगप्रवृत्तिदिनात् ११३७तमे दिने उपवसथः, ११३८तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (११२३$\frac{४१}{१२४}$ युगादिश्रविष्ठातः ११२३ नक्षत्रेषु व्यतीतेषु उत्तरफल्गुन्योः ४१तमेऽंशे गते सप्तसप्ततितमपर्वसमाप्तिः)।

(७८) ११५१$\frac{१६}{१२४}$ युगप्रवृत्तिदिनात् ११५१तमे दिने उपवसथः, ११५२तमे दिने पूर्वेष्टिदिनात् १५शे दिने दर्शेष्टिः। (११३७$\frac{११४}{१२४}$ युगादिश्रविष्ठातः ११३७ नक्षत्रेषु व्यतीतेषु उत्तरभद्रपदयोः ११४तमेऽंशे गते अष्टसप्ततितमपर्वसमाप्तिः)।

(७९) ११६५$\frac{११०}{१२४}$ युगप्रवृत्तिदिनात् ११६६तमे दिने उपवसथः, ११६७तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (११५२$\frac{६३}{१२४}$ युगादिश्रविष्ठातः ११५२ नक्षत्रेषु व्यतीतेषु चित्रायाः ६३तमेऽंशे गते ऊनाशीतितमपर्वसमाप्तिः)।

(८०) ११८०$\frac{८०}{१२४}$ युगप्रवृत्तिदिनात् ११८१तमे दिने उपवसथः, ११८२तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (११६७$\frac{१२}{१२४}$ युगादिश्रविष्ठातः ११६७ नक्षत्रेषु व्यतीतेषु अपभरणीनां द्वादशेऽंशे गते अशीतितमपर्वसमाप्तिः)।

(८१) ११९५$\frac{५०}{१२४}$ युगप्रवृत्तिदिनात् ११९६तमे दिने उपवसथः, ११९७तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (११८१$\frac{८५}{१२४}$ युगादिश्रविष्ठातः ११८१ नक्षत्रेषु व्यतीतेषु विशाखयोः ८५तमेऽंशे गते एकाशीतितमपर्वसमाप्तिः)।

(८२) १२१०$\frac{२०}{१२४}$ युगप्रवृत्तिदिनात् १२१०तमे दिने उपवसथः, १२११तमे दिने पूर्वेष्टिदिनात् १५शे दिने दर्शेष्टिः। (११९६$\frac{३४}{१२४}$ युगादिश्रविष्ठातः ११९६ नक्षत्रेषु व्यतीतेषु रोहिण्याः ३४तमेऽंशे गते द्व्यशीतितमपर्वसमाप्तिः)।

(८३) १२२४$\frac{११४}{१२४}$ युगप्रवृत्तिदिनात् १२२५तमे दिने उपवसथः, १२२६तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१२१०$\frac{१०७}{१२४}$ युगादिश्रविष्ठातः १२१० नक्षत्रेषु व्यतीतेषु ज्येष्ठायाः १०७तमेऽंशे गते त्र्यशीतितमपर्वसमाप्तिः)।

(८४) १२३९$\frac{८४}{१२४}$ युगप्रवृत्तिदिनात् १२४०तमे दिने उपवसथः, १२४१तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१२२५$\frac{५६}{१२४}$ युगादिश्रविष्ठातः १२२५नक्षत्रेषु व्यतीतेषु आर्द्रायाः ५६तमेऽंशे गते चतुरशीतितमपर्वसमाप्तिः)।

(८५) १२५४$\frac{५४}{१२४}$ युगप्रवृत्तिदिनात् १२५५तमे दिने उपवसथः, १२५६तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१२४०$\frac{५}{१२४}$ युगादिश्रविष्ठातः १२४० नक्षत्रेषु व्यतीतेषु उत्तराषाढानां पञ्चमेऽंशे गते पञ्चाशीतितमपर्वसमाप्तिः)।

(८६) १२६९$\frac{२४}{१२४}$ युगप्रवृत्तिदिनात् १२६९तमे दिने उपवसथः, १२७०तमे दिने पूर्वेष्टिदिनात् १५शे दिने दर्शेष्टिः। (१२५४$\frac{७८}{१२४}$ युगादिश्रविष्ठातः १२५४ नक्षत्रेषु व्यतीतेषु पुष्यस्य ७८तमेऽंशे गते षडशीतितमपर्वसमाप्तिः)।

(८७) १२८३$\frac{११८}{१२४}$ युगप्रवृत्तिदिनात् १२८४तमे दिने उपवसथः, १२८५तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१२६९$\frac{२७}{१२४}$ युगादिश्रविष्ठातः १२६९ नक्षत्रेषु व्यतीतेषु श्रविष्ठानां २७तमेऽंशे गते सप्ताशीतितमपर्वसमाप्तिः)।

(८८) १२९८$\frac{८८}{१२४}$ युगप्रवृत्तिदिनात् १२९९तमे दिने उपवसथः, १३००तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१२८३$\frac{१००}{१२४}$ युगादिश्रविष्ठातः १२८३ नक्षत्रेषु व्यतीतेषु मघानाम् १००तमेऽंशे गते अष्टाशीतितमपर्वसमाप्तिः)।

(८९) १३१३$\frac{५८}{१२४}$ युगप्रवृत्तिदिनात् १३१४तमे दिने उपवसथः, १३१५तमे दिने पूर्वेष्टि-दिनात् १६शे दिने पूर्णमासेष्टिः। (१२९८$\frac{४९}{१२४}$ युगादिश्रविष्ठातः १२९८ नक्षत्रेषु व्यतीतेषु पूर्वभद्रपदयोः ४९तमेऽंशे गते ऊननवतितमपर्वसमाप्तिः)।

(९०) १३२८$\frac{२८}{१२४}$ युगप्रवृत्तिदिनात् १३२८तमे दिने उपवसथः, १३२९तमे दिने पूर्वेष्टिदिनात् १५शे दिने दर्शेष्टिः। (१३१२$\frac{१२२}{१२४}$ युगादिश्रविष्ठातः १३१२ नक्षत्रेषु व्यतीतेषु उत्तरफल्गुन्योः १२२ तमेऽंशे गते नवतितमपर्वसमाप्तिः)।

(९१) १३४२$\frac{१२२}{१२४}$ युगप्रवृत्तिदिनात् १३४३तमे दिने उपवसथः, १३४४तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१३२७$\frac{७१}{१२४}$ युगादिश्रविष्ठातः १३२७ नक्षत्रेषु व्यतीतेषु रेवत्याः ७१तमेऽंशे गते एकनवतितमपर्वसमाप्तिः)।

(९२) १३५७$\frac{९२}{१२४}$ युगप्रवृत्तिदिनात् १३५८तमे दिने उपवसथः, १३५९तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१३४२$\frac{२०}{१२४}$ युगादिश्रविष्ठातः १३४२ नक्षत्रेषु व्यतीतेषु स्वातेः २०तमेऽंशे गते द्विनवतितमपर्वसमाप्तिः)।

(९३) १३७२$\frac{६२}{१२४}$ युगप्रवृत्तिदिनात् १३७३तमे दिने उपवसथः, १३७४तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१३५६$\frac{९३}{१२४}$ युगादिश्रविष्ठातः १३५६ नक्षत्रेषु व्यतीतेषु अपभरणीनां ९३तमेऽंशे गते त्रिनवतितमपर्वसमाप्तिः)।

(९४) १३८७$\frac{३२}{१२४}$ युगप्रवृत्तिदिनात् १३८८तमे दिने उपवसथः, १३९९तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१३७१$\frac{४२}{१२४}$ युगादिश्रविष्ठातः १३७१ नक्षत्रेषु व्यतीतेषु अनुराधानां ४२तमेऽंशे गते चतुर्नवतितमपर्वसमाप्तिः)।

(९५) १४०२$\frac{२}{१२४}$ युगप्रवृत्तिदिनात् १४०२तमे दिने उपवसथः, १४०३तमे दिने पूर्वेष्टिदिनात् १५शे दिने पूर्णमासेष्टिः। (१३८५$\frac{११५}{१२४}$ युगादिश्रविष्ठातः १३८५ नक्षत्रेषु व्यतीतेषु रोहिण्याः ११५तमेऽंशे गते पञ्चनवतितमपर्वसमाप्तिः)।

(९६) १४१६$\frac{९६}{१२४}$ युगप्रवृत्तिदिनात् १४१७तमे दिने उपवसथः, १४१८तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१४००$\frac{६४}{१२४}$ युगादिश्रविष्ठातः १४०० नक्षत्रेषु व्यतीतेषु मूलबर्हिण्याः ६४तमेऽंशे गते षण्णवतितमपर्वसमाप्तिः)।

(९७) १४३१$\frac{६६}{१२४}$ युगप्रवृत्तिदिनात् १४३२तमे दिने उपवसथः, १४३३तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१४१५$\frac{१३}{१२४}$ युगादिश्रविष्ठातः १४१५ नक्षत्रेषु व्यतीतेषु पुनर्वस्वोस् त्रयोदशेऽंशे गते सप्तनवतितमपर्वसमाप्तिः)।

(९८) १४४६$\frac{३६}{१२४}$ युगप्रवृत्तिदिनात् १४४७तमे दिने उपवसथः, १४४८तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१४२९$\frac{८६}{१२४}$ युगादिश्रविष्ठातः १४२९ नक्षत्रेषु व्यतीतेषु उत्तराषाढानां ८६तमेऽंशे गते अष्टनवतितमपर्वसमाप्तिः)।

(९९) १४६१$\frac{६}{१२४}$ युगप्रवृत्तिदिनात् १४६१तमे दिने उपवसथः, १४६२तमे दिने पूर्वेष्टिदिनात् १५शे दिने पूर्णमासेष्टिः। (१४४४$\frac{३५}{१२४}$ युगादिश्रविष्ठातः १४४४ नक्षत्रेषु व्यतीतेषु आश्लेषाणां ३५तमेऽंशे गते ऊनशततमपर्वसमाप्तिः)।

(१००) १४७५$\frac{१००}{१२४}$ युगप्रवृत्तिदिनात् १४७६तमे दिने उपवसथः, १४७७तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१४५८$\frac{१०८}{१२४}$ युगादिश्रविष्ठातः १४५८ नक्षत्रेषु व्यतीतेषु श्रविष्ठानाम् १०८तमेऽंशे गते शततमपर्वसमाप्तिः)।

(१०१) १४९०$\frac{७०}{१२४}$ युगप्रवृत्तिदिनात् १४९१तमे दिने उपवसथः, १४९२तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१४७३$\frac{५७}{१२४}$ युगादिश्रविष्ठातः १४७३ नक्षत्रेषु व्यतीतेषु पूर्वफल्गुन्योः ५७तमेऽंशे गते एकोत्तरशततमपर्वसमाप्तिः)।

(१०२) १५०५$\frac{४०}{१२४}$ युगप्रवृत्तिदिनात् १५०६तमे दिने उपवसथः, १५०७तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१४८८$\frac{६}{१२४}$ युगादिश्रविष्ठातः १४८८ नक्षत्रेषु व्यतीतेषु उत्तरभद्रपदयोः षष्ठेऽंशे गते द्व्युत्तरशततमपर्वसमाप्तिः)।

(१०३) १५२०$\frac{१०}{१२४}$ युगप्रवृत्तिदिनात् १५२०तमे दिने उपवसथः, १५२१तमे दिने पूर्वेष्टिदिनात् १५शे दिने पूर्णमासेष्टिः। (१५०२$\frac{७९}{१२४}$ युगादिश्रविष्ठातः १५०२ नक्षत्रेषु व्यतीतेषु हस्तस्य ७९तमेऽंशे गते त्र्युत्तरशततमपर्वसमाप्तिः)।

(१०४) १५३४$\frac{१०४}{१२४}$ युगप्रवृत्तिदिनात् १५३५तमे दिने उपवसथः, १५३६तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१५१७$\frac{२८}{१२४}$ युगादिश्रविष्ठातः १५१७ नक्षत्रेषु व्यतीतेषु अश्वयुजोः २८तमेऽंशे गते चतुरुत्तरशततमपर्वसमाप्तिः)।

(१०५) १५४९$\frac{७४}{१२४}$ युगप्रवृत्तिदिनात् १५५०तमे दिने उपवसथः, १५५१तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१५३१$\frac{१०१}{१२४}$ युगादिश्रविष्ठातः १५३१ नक्षत्रेषु व्यतीतेषु स्वातेः १०१तमेऽंशे गते पञ्चोत्तरशततमपर्वसमाप्तिः)।

(१०६) १५६४$\frac{४४}{१२४}$ युगप्रवृत्तिदिनात् १५६५तमे दिने उपवसथः, १५६६तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१५४६$\frac{५०}{१२४}$ युगादिश्रविष्ठातः १५४६ नक्षत्रेषु व्यतीतेषु कृत्तिकानां ५०तमेऽंशे गते षडुत्तरशततमपर्वसमाप्तिः)।

(१०७) १५७९$\frac{१४}{१२४}$ युगप्रवृत्तिदिनात् १५७९तमे दिने उपवसथः, १५८०तमे दिने पूर्वेष्टिदिनात् १५शे दिने पूर्णमासेष्टिः। (१५६०$\frac{१२३}{१२४}$ युगादिश्रविष्ठातः १५६० नक्षत्रेषु व्यतीतेषु अनुराधानां १२३तमेऽंशे गते सप्तोत्तरशततमपर्वसमाप्तिः)।

(१०८) १५९३$\frac{१०८}{१२४}$ युगप्रवृत्तिदिनात् १५९४तमे दिने उपवसथः, १५९५तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१५७५$\frac{७२}{१२४}$ युगादिश्रविष्ठातः १५७५ नक्षत्रेषु व्यतीतेषु मृगशीर्षस्य ७२तमेऽंशे गते अष्टोत्तरशततमपर्वसमाप्तिः)।

(१०९) १६०८$\frac{७८}{१२४}$ युगप्रवृत्तिदिनात् १६०९तमे दिने उपवसथः, १६१०तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१५९०$\frac{२१}{१२४}$ युगादिश्रविष्ठातः १५९० नक्षत्रेषु व्यतीतेषु पूर्वाषाढानाम् २१तमेऽंशे गते नवोत्तरशततमपर्वसमाप्तिः)।

(११०) १६२३$\frac{४८}{१२४}$ युगप्रवृत्तिदिनात् १६२४तमे दिने उपवसथः, १६२५तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१६०४$\frac{९४}{१२४}$ युगादिश्रविष्ठातः १६०४ नक्षत्रेषु व्यतीतेषु पुनर्वस्वोः ९४तमेऽंशे गते दशोत्तरशततमपर्वसमाप्तिः)।

(१११) १६३८$\frac{१८}{१२४}$ युगप्रवृत्तिदिनात् १६३८तमे दिने उपवसथः, १६३९तमे दिने पूर्वेष्टिदिनात् १५शे दिने पूर्णमासेष्टिः। (१६१९$\frac{४३}{१२४}$ युगादिश्रविष्ठातः १६१९ नक्षत्रेषु व्यतीतेषु श्रवणस्य ४३तमेऽंशे गते एकादशोत्तरशततमपर्वसमाप्तिः)।

(११२) १६५२$\frac{११२}{१२४}$ युगप्रवृत्तिदिनात् १६५३तमे दिने उपवसथः, १६५४तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१६३३$\frac{११६}{१२४}$ युगादिश्रविष्ठातः १६३३ नक्षत्रेषु व्यतीतेषु आश्लेषाणां ११६तमेऽंशे गते द्वादशोत्तरशततमपर्वसमाप्तिः)।

(११३) १६६७$\frac{८२}{१२४}$ युगप्रवृत्तिदिनात् १६६८तमे दिने उपवसथः, १६६९तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१६४८$\frac{६५}{१२४}$ युगादिश्रविष्ठातः १६४८ नक्षत्रेषु व्यतीतेषु शतभिषजः ६५तमेऽंशे गते त्रयोदशोत्तरशततमपर्वसमाप्तिः)।

(११४) १६८२$\frac{५२}{१२४}$ युगप्रवृत्तिदिनात् १६८३तमे दिने उपवसथः, १६८४तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१६६३$\frac{१४}{१२४}$ युगादिश्रविष्ठातः १६६३ नक्षत्रेषु व्यतीतेषु उत्तरफल्गुन्योः चतुर्दशेऽंशे गते चतुर्दशोत्तरशततमपर्वसमाप्तिः)।

(११५) १६९७$\frac{२२}{१२४}$ युगप्रवृत्तिदिनात् १६९७तमे दिने उपवसथः, १६९८तमे दिने पूर्वेष्टिदिनात् १५शे दिने पूर्णमासेष्टिः। (१६७७$\frac{८७}{१२४}$ युगादिश्रविष्ठातः १६७७ नक्षत्रेषु व्यतीतेषु उत्तरभद्रपदयोः ८७तमेऽंशे गते पञ्चदशोत्तरशततमपर्वसमाप्तिः)।

(११६) १७११$\frac{११६}{१२४}$ युगप्रवृत्तिदिनात् १७१२तमे दिने उपवसथः, १७१३तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१६९२$\frac{३६}{१२४}$ युगादिश्रविष्ठातः १६९२ नक्षत्रेषु व्यतीतेषु चित्रायाः ३६तमेऽंशे गते षोडशोत्तरशततमपर्वसमाप्तिः)।

(११७) १७२६$\frac{८६}{१२४}$ युगप्रवृत्तिदिनात् १७२७तमे दिने उपवसथः, १७२८तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१७०६$\frac{१०९}{१२४}$ युगादिश्रविष्ठातः १७०६ नक्षत्रेषु व्यतीतेषु अश्वयुजोः १०९तमेऽंशे गते सप्तदशोत्तरशततमपर्वसमाप्तिः)।

(११८) १७४१$\frac{५६}{१२४}$ युगप्रवृत्तिदिनात् १७४२तमे दिने उपवसथः, १७४३तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१७२१$\frac{५८}{१२४}$ युगादिश्रविष्ठातः १७२१ नक्षत्रेषु व्यतीतेषु विशाखयोः ५८तमेऽंशे गते अष्टादशोत्तरशततमपर्वसमाप्तिः)।

(११९) १७५६$\frac{२६}{१२४}$ युगप्रवृत्तिदिनात् १७५६तमे दिने उपवसथः, १७५७तमे दिने पूर्वेष्टिदिनात् १५शे दिने पूर्णमासेष्टिः। (१७३६$\frac{७}{१२४}$ युगादिश्रविष्ठातः १७३६ नक्षत्रेषु व्यतीतेषु रोहिण्याः सप्तमेऽंशे गते ऊनविंशत्युत्तरशततमपर्वसमाप्तिः)।

(१२०) १७७०$\frac{१२०}{१२४}$ युगप्रवृत्तिदिनात् १७७१तमे दिने उपवसथः, १७७२तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१७५०$\frac{८०}{१२४}$ युगादिश्रविष्ठातः १७५० नक्षत्रेषु व्यतीतेषु ज्येष्ठायाः ८०तमेऽंशे गते विंशत्युत्तरशततमपर्वसमाप्तिः)।

(१२१) १७८५$\frac{९०}{१२४}$ युगप्रवृत्तिदिनात् १७८६तमे दिने उपवसथः, १७८७तमे दिने पूर्वेष्टिदिनात् १६शे दिने पूर्णमासेष्टिः। (१७६५$\frac{२९}{१२४}$ युगादिश्रविष्ठातः १७६५ नक्षत्रेषु व्यतीतेषु आर्द्रायाः २९तमेऽंशे गते एकविंशत्युत्तरशततमपर्वसमाप्तिः)।

(१२२) १८००$\frac{६०}{१२४}$ युगप्रवृत्तिदिनात् १८०१तमे दिने उपवसथः, १८०२तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१७७९$\frac{१०२}{१२४}$ युगादिश्रविष्ठातः १७७९ नक्षत्रेषु व्यतीतेषु पूर्वाषाढानां १०२तमेऽंशे गते द्वाविंशत्युत्तरशततमपर्वसमाप्तिः)।

(१२३) १८१५$\frac{३०}{१२४}$ युगप्रवृत्तिदिनात् १८१५तमे दिने उपवसथः, १८१६तमे दिने पूर्वेष्टिदिनात् १५शे दिने पूर्णमासेष्टिः। (१७९४$\frac{५१}{१२४}$ युगादिश्रविष्ठातः १७९४ नक्षत्रेषु व्यतीतेषु पुष्यस्य ५१तमेऽंशे गते त्रयोविंशत्युत्तरशततमपर्वसमाप्तिः)।

(१२४) १८३० युगप्रवृत्तिदिनात् १८३०तमे दिने उपवसथः, १८३१तमे दिने पूर्वेष्टिदिनात् १६शे दिने दर्शेष्टिः। (१८०९ युगादिश्रविष्ठातः १८०९ नक्षत्रेषु व्यतीतेषु चतुर्विंशत्युत्तरशततमपर्वसमाप्तिः)।

[अत्र वेदाङ्गज्योतिषोक्तगणितानुसारं १२४ पर्वणां समाप्तिः १८३० सावनदिनेषु, सूर्यसिद्धान्तानुसारं १८३०.८९६४५ सावनदिनेषु, आधुनिकदृक्सिद्धगणितानुसारं तु १८३०.८९६४८ दिनेषु (१८३१तमस्य दिनस्य १११.१६३५ अंशेषु गतेषु) भवतीत्यवगम्यते इति, वेदाङ्गज्योतिषगणितानुसारं पक्षमानम् १४ सावनदिनानि ९४ दिनांशाः (४५ घटिकाः २९$\frac{१}{३१}$ पलानि च) भवन्ति, सूर्यसिद्धान्ताद्याधुनिकगणितानुसारं तु मध्यममानेन पक्षमानम् १४ सावनदिनानि ९४$\frac{२६}{२९}$ दिनांशाः (४५ घटिकाः ५५$\frac{३}{५०}$ पलानि) च भवन्तीति चाऽवगम्यते इति च स्मरणीयम्।]

उक्तसारण्यनुसारं युगारम्भदिनाद् ऊनषष्टितमे दिने पूर्णतया व्यतीते षष्टितमस्य दिनस्य १२४ अंशेषु केवलं चतुर्षु अंशेष्वेव व्यतीतेषु पर्वसमाप्तिर् भवतीति ज्ञायते। एतादृश्यामवस्थायां च सामान्यतया पक्षान्ततिथेश् चतुर्थे पादे वा पक्षादितिथेराद्येषु पादेषु वा पूर्णमासेष्टेर् दर्शेष्टेः पक्षादिस्थालीपाकस्य वाऽपि आरभ्यत्वस्य श्रौतसूत्र-गृह्यसूत्र-परिशिष्ट-स्मृत्यादिषु धर्मशास्त्रेषु प्रतिपादितत्वात् षष्टितमे दिवसे पूर्वेष्टिदिनात् पञ्चदशे दिने यागः कार्यो भवति, तदर्थं पूर्वं चतुर्दशं तिथिं हित्वा (चतुर्दशीं त्रुटितां मत्वा) तं तिथिं पञ्चदशं तिथिं स्वीकृत्य तत्रैवोपवसथोऽपराह्णे पिण्डपितृयज्ञश् चापि वा करणीयो भवति। एतदेवोक्तं "द्यु हेयं पर्व चेत् पादे" इति। एवमेव अष्टमे, द्वादशे, षोडशे, विंशे, चतुर्विंशे च पर्वणि बोध्यम्। त्रयस्त्रिंशं पर्व तु पौर्णमासीपर्व वर्तते इति, तच् च पर्व ४८८ तमे दिवसे तस्य दिनस्य द्वयोरेवांशयोर् गतयोः समाप्यते इति च "पूर्वां पौर्णमासीमुत्तरां वोपवसेत्" (कात्यायनश्रौत. २।१।१) इति वचनमनुसृत्य ४८७ तमे दिने उपवसथं कृत्वा ४८८ तमे दिवसे पौर्णमासेष्टिः कार्या, अथवा "सद्यो वा प्रातः" (कात्यायनश्रौतसूत्रे २।१।१६) इति वचनमनुसृत्य ४८८तमे दिवस एव प्रातःकाले अग्न्यन्वाधानादि कर्मापवर्गान्तम् इष्टिकर्म कर्तव्यं भवति। एतादृशी पौर्णमास्येव "पर्वणि सद्यस्काला" इत्यन्वाख्यायते (ऋक्तन्त्रे ३।७।९ [१२९])। एतादृश्येव स्थितिः सप्तत्रिंशे एकचत्वारिंशे, पञ्चचत्वारिंशे, ऊनपञ्चाशे, त्रिपञ्चाशे, सप्तपञ्चाशे, एकषष्टे, पञ्चनवतितमे, ऊनशततमे, त्र्युत्तरशततमे, सप्तोत्तरशततमे, एकादशोत्तरशततमे, पञ्चदशोत्तरशततमे, ऊनविंशत्युत्तरशततमे, त्रयोविंशत्युत्तरशततमे पर्वणि च भवति। दर्शेष्टिविषये च षट्षष्टितमे, सप्ततितमे, चतुस्सप्ततितमे, अष्टसप्ततितमे, द्व्यशीतितमे, षडशीतितमे, नवतितमे च पर्वणि चतुर्था-ऽष्टम-द्वादश-षोडश-विंशा-ऽष्टाविंशपर्ववद् भवतीति बोध्यम्।

अत्र लगधमुन्युक्तगणितानुसारमेव उपवसथदिनानि इष्टिदिनानि च सारण्यामुल्लिखितानि; प्रयोगस् तु लगधमुनिग्रन्थस्य दिक्प्रदर्शनमात्रपरत्वात् 'यथाशाखं व्यवस्था' इति सिद्धान्ताच् च "पूर्वां पौर्णमासीमुत्तरां वोपवसेत्" (कात्यायनश्रौतसूत्रे २।१।१), "सद्यो वा प्रातः" (कात्यायनश्रौतसूत्रे २।१।१६) इत्यादीनि वचनान्यनुसृत्य यथाशाखं व्यवस्थया भवति, ज्योतिश्शास्त्राद् धर्मशास्त्रस्य बलीयस्त्वस्य "अप्राप्ते भास्करे कन्यां सत्रिभागैस् त्रिभिर् दिनैः इत्यादिवाक्यं ज्योतिश्शास्त्रीयमनादेयं धर्मशास्त्रस्य ततो बलवत्त्वाद्" इत्यादि वदद्भिः शिष्टैः (कृत्यरत्नाकरे, पृ.२९९) स्वीकृतत्वात् श्रुति-श्रौतसूत्रगृह्यसूत्रादिधर्मशास्त्रानुकूलतयैव ज्योतिश्शास्त्रस्य व्याख्यानं च कर्तव्यं भवतीति च बोध्यम्। व्यवहारे च प्रायेण पौर्णमासप्रयोगे तु पूर्वेष्टिदिनात् पञ्चदशे दिने एवोपवसथं कृत्वा षोडशे दिने एवेष्टिरिति स्वीकृत्य मासतिथिगणना क्रियते इति च कौटलीयार्थशास्त्रात् प्रभृति कायस्थैः प्रयुक्तं

पुराकालात् प्रभृति ह्यस्तनकालपर्यन्तमनुवृत्तं कायस्थीयतिथिमितिपत्रं यावद् दृष्टाद् मासतिथिगणनाप्रकारादवगम्यते। संवत्सरसत्रप्रयोगाच् च तथैवाऽवगम्यते।

ब्राह्मणग्रन्थेषु श्रौतसूत्रेषु स्मृतिवचनेषु च मुख्यतयाऽमावास्यापर्वण्येव यागकालेऽनागते व्यतीते वाऽपि यजनं विशेषतो निन्दित्वा प्रायश्चित्तरूपस्य यागस्य विधानस्य दर्शनात् पौर्णमासीपर्वणि तु सामान्यतया पूर्वयजनीयदिनात् षोडशे दिने यागेऽदोष इति मुनिभिः स्वीकृतं वैदिकसमाजे प्रसिद्धं चाऽवगम्यते।

थिबोप्रस्तुतायां शामशास्त्रिप्रकाशितायां पर्वभांशसारण्यां भांशानुसारं पर्वदिनस्य हेयोपादेयते प्रतिपादिते दृश्येते। वस्तुतस् तु पर्वसमाप्तिकालस्य सावनदिनांशान् विलोक्यैव तस्य दिनस्योपवसथाय यागाय वा हेयोपादेयते निर्णेये इति वेदितव्यम् ॥१२॥

हिन्दी – यदि अहोरात्र के पाद (प्रथम चतुर्थांश) में किसी पर्व (पक्ष) की समाप्ति होती है तो उस पर्व (पक्ष) के एक दिन (चतुर्दशी तिथि) को छोडना (टूटाना) चाहिए। अहोरात्र का पाद ३१ अंशो से परिमित होता है ($\frac{३१}{१२४}$)। गत पर्वों के अन्तों के अहोरात्रांशो को सङ्कलित कर के यदि वह सङ्कलित अहोरात्रांशसमूह एक अहोरात्र के पूर्ण अंशों से (१२४ अंशों से) अधिक होता है तो उस को अहोरात्र के पूर्ण अंशों की सङ्ख्या से तष्ट (विभक्त) करके अवशिष्ट अंशों का निर्देश करे।

अथवा वक्ष्यमाण *"अतीतपर्वभागेभ्यः शोधयेद् द्विगुणां तिथिम्"* (श्लो. २२) इस श्लोक में बताए गए प्रकार से ज्ञात दिनांशरूप पर्वसमाप्तिकाल को लेकर 'यदि अहोरात्र के पाद (प्रथम चतुर्थांश) में किसी पर्व (पक्ष) की समाप्ति होती है तो उस पर्व (पक्ष) के एक दिन (चतुर्दशी तिथि) को छोडना (टूटाना) चाहिए' यह बात कही गई है। वहां यदि घटाए जाने वाले दिनांशराशि अतीत पर्व के दिनांशराशि से अधिक हो तो अतीत पर्व के भागों को सम्पूर्णभागात्मक राशि (१२४) से जोड कर अतीतपर्वदिनांशराशि बनाकर उस राशि से द्विगुणित तिथि को घटाने पर अवशिष्ट अंशों को उस दिन के पर्वसमाप्त्यंश के रूप में निर्देश करे। जैसे आदियुग के चतुर्थ पर्व में पर्वभाग ४ हैं, पञ्चम पर्व में घटाए जाने वाले भाग ३० हैं। वहां अतीतपर्वभाग को सम्पूर्णभागात्मक राशि (१२४) से जोडने पर ४+१२४=१२८, उस के वाद उस राशि से उस पञ्चम पर्व के द्विगुणित तिथिरूप (अधिक) राशि को घटाने पर १२८-३०=९८, अतः ये ही पांचवें पर्वसमाप्ति के भाग (सावनदिनांश) के रूप में निर्देश्य भाग हैं। (प्रस्तुत श्लोक के हमारे व्याख्यान के स्पष्टतया अवबोध के लिए धनिष्ठादि में सूर्योदयकाल में शुक्लपक्षप्रतिपदारम्भ में उदगयन के आदि में प्रवृत्त पञ्चवर्षात्मक आदियुग के १२४ पर्वों के (१२४ पक्षों के) सम्बद्ध सावनदिनों में समाप्तिकाल की प्रदर्शिका सारणी ऊपर संस्कृतव्याख्या में देखें। उसी सारणी में पर्वनक्षत्र और पर्वसमाप्तिनक्षत्रांश भी दिए गए हैं) ॥१२॥

[पर्वराशिज्ञानोपायः]

निरेकं द्वादशाभ्यस्तं द्विगुणं चाऽऽप्तसंयुतम्।
षष्ट्याषष्ट्या युतं द्वाभ्यां पर्वणां राशिरुच्यते॥१३॥

(सोमाकरभाष्यम्)

निरेकं द्वादशाभ्यस्तमिति। अर्धयोः पञ्चपर्वाणां जावाद्युक्तं प्रकृतं यस्मिन् पर्वणि तस्मिन् वक्ष्यमाणचोदनया यावन्तोऽंशा भवन्ति द्वौ त्रयश् चत्वारो वा तेषां निरेकम् एकं निरस्य त्यक्त्वेत्यर्थः। ततः शेषं द्वादशाभ्यस्तं द्वादशभिर् गुणयेत्। यद्येकस् तदा द्वादश। यदि द्वौ तदा चतुर्विंशतिः। यदि त्रयस् तदा षट्त्रिंशत्। ततस् तदेतद् द्विगुणं कुर्यात्। चतुर्विंशतिरष्टचत्वारिंशद् द्वासप्ततिर् वा। ततश् चापसंयुतम् कुर्यात्। आपो युगाः कृतादयश् चत्वारः। "**कृतमापानाम्**" इति श्रुतेः। चत्वारस् तदुपरि भवन्त्यन्ये। ततस् तेषामेव षष्ट्याषष्ट्या युतं द्वाभ्यां तदुपरि द्वाभ्यां षष्टिर् द्वाषष्टिर् ६२ भवति। एवमेतत् सर्वं तदेकीकृत्य यावद् भवति स पर्वणां यागकर्मणि राशिरुच्यते ज्योतिर्विद्भिरापर्वणस् तदा वा समाप्तेः। एतदुक्तं भवति– द्व्यंशस्य चोदितस्य जावादीनां मध्यात् ऋक्षस्य नवतिर् नाडिकाः ९० पर्वकालराशिः। त्र्यंशस्य चतुर्दशाधिकं शतम् ११४। चतुरंशस्य अष्टात्रिंशदधिकं शतम् १३८। तस्य राशेः पर्वसन्धिकालात् पूर्वं पञ्चदश्युत्तरार्धे कार्यम्। उत्तरं प्रतिपदि यागाय। एवं त्वेष पर्वराशिः पौर्णमास एव पर्वर्क्षेन्दुसम्बन्धात्। अमावास्यायां तूपरिष्टाद् वक्ष्यति "**एकादशभिरभ्यस्य**" (श्लो. २५) इति सूर्यसम्बन्धेनान्तरालमृक्षाश्रये। अत एवमुभयमेतत् तु राकाकुहूकालगत इति चोदितेन तत्त्वादनुवादिनापि किञ्चित् सङ्गतं विशेषमुत्तरत्र ऋक्षविधाने दर्शयिष्याम एवमपि॥१३॥

(कौण्डिन्न्यायनव्याख्यानम्)

तत्तत्पर्वगतविशेषताः प्रतिपादयिष्यन् शास्त्रकारः पर्वराशिज्ञानरीतिं प्रतिपादयति– निरेकं द्वादशाभ्यस्तम् **इत्यादिना।**

पञ्चवर्षात्मकस्य युगस्य वर्तमानवर्षसङ्ख्यानं निर्गतैकं कृत्वा द्वादशभिर् गुणितं विधाय द्विगुणं कृत्वा वर्तमानवर्षस्य गतैः पर्वभिः संयुक्तं कृतं ततश् च प्रतिषष्टिसङ्ख्यानं द्वाभ्यां युतं च सद् गतपर्वणां राशिरुच्यते इत्यर्थः। उदाहरणं यथा– पञ्चवर्षात्मकस्य युगस्य तृतीये वर्षे अष्टममासस्याऽन्ते पर्वराशिर् ज्ञेयोऽस्ति, तत्र वर्तमानवर्षसङ्ख्यानम् ३, तन् निर्गतैकं सत् ३–१=२, द्वादशभिर् गुणितं २×१२=२४, तद् द्विगुणं कृतम् २४×२=४८, वर्तमाने वर्षेऽष्टमस्य मासस्याऽन्ते गतानि पर्वाणि १६, तैर् युतं कृतं सत् ४८+१६=६४, तत्र एका षष्टिर् वर्तत इति

एकवारं द्वाभ्यां युतं कृतम् ६४+२=६६। एवं च तृतीयवर्षस्याऽष्टमस्य मासस्यान्ते पर्वराशिः ६६ इति। पर्वराशिज्ञानं पर्वभांश-पर्वनक्षत्रादिज्ञानायोपयुज्यते।

विशेषः— एतस्य श्लोकस्य सोमाकरकृतं व्याख्यानमयथार्थं प्रतीयते। शङ्करबालकृष्णदीक्षित-छोटेलालबार्हस्पत्य-सुधाकरद्विवेदिकृतं व्याख्यानमेव साधु, शामशास्त्रिकृतं व्याख्यानमसाध्वेवेत्यस्माकं मतं बोध्यम्। पूर्वैः कृतं साधु व्याख्यानमपि सम्यगबुद्ध्वा तस्य असाधुत्वेन शामशास्त्रिणा कृतं प्रतिपादनं तु सर्वथैवाऽनुचितं दृश्यते॥१३॥

हिन्दी– युग के प्रथमादि वर्ष की एक से न्यून वर्षसङ्ख्या को बारह से गुणित करके प्राप्त फल को द्विगुणित करने पर उस में वर्तमान वर्ष के प्राप्त (गत) पर्वों को मिला करके प्राप्त पर्वसङ्ख्या साठ से ऊपर होने पर प्रत्येक साठ में दोदो मिलाने से प्राप्त सङ्ख्या पर्वराशि (गतपर्वसङ्ख्या) कहा जाता है। उदाहरण— पञ्चवर्षात्मक युग के तृतीय वर्ष में अष्टममास के अन्त में पर्वराशि ज्ञेय है, वहाँ वर्तमानवर्षसङ्ख्या ३, उस में एक घटाने पर ३-१=२, बारह से गुणन करने पर २×१२=२४, उस को द्विगुणित करने पर २४×२=४८, वर्तमान वर्ष में अष्टम मास के अन्त में गत पर्व (८×२=)१६, उस को भी मिलाने पर ४८+१६=६४, उस में एक षष्टिपर्वसमूह घूसा है, अतः एकवार दो जोडने पर ६४+२=६६। इस प्रकार तृतीय वर्ष के अष्टम मास के अन्त में पर्वराशि ६६। [पर्वराशि का ज्ञान पर्वभांश-पर्वनक्षत्र इत्यादि के ज्ञान के लिए आवश्यक होता है]।

विशेष– इस श्लोक का शङ्करबालकृष्ण दीक्षित का, छोटेलाल बार्हस्पत्य का और सुधाकर द्विवेदी का व्याख्यान ही यथार्थ है, शामशास्त्री का व्याख्यान सर्वथा अयुक्तियुक्त है। पूर्ववर्ती व्याख्याताओं से किए गए सही व्याख्यान को भी ठीक से समझे विना असाधु कहना शामशास्त्री का सर्वथा अनुचित कार्य है। शामशास्त्री ने जो पर्वध्रुवराशि की बात की है, उस की अवधारणा का वेदाङ्गज्योतिष में सर्वथा अभाव है॥१३॥

[मतभेदेन पर्वसम्मिताः कालाः]

स्युः पादोर्ध्वं त्रिपद्यायास् त्रिर् द्व्येकेऽह्नः कृते स्थितिम्।
साम्येनेन्दोः स्तृणोऽन्ये तु पञ्चकाः पर्वसम्मिताः॥१४॥

(सोमाकरभाष्यम्)

एवं जावादिचोदितानामृक्षाणामेकैकस्मिन् पञ्चपञ्च चोदिताः क्रमश्रुताः स्तृण ऋक्षाः स्युर् भवेयुः। कीदृशाः? पर्वसम्मिताः चोदितपर्वर्क्षसदृशा इत्यर्थः। किमेत एव? न। अन्यदपि। किम्? त्रिपद्यायाः पञ्चदश्याः पादः पश्चिमो दिनभाग उपवसनीयः सोमः सोऽपि भवेत्। तथाऽर्धमपि। यः पर्वभाविराशेरुत्तरार्धविभागः सोऽपि तथैव भवेदित्यर्थः। किमेक-

वारम्? न। त्रिद्विः त्रीन् वारान् द्विवारान्। पञ्चवर्षाणि पौनःपुन्येनेत्यर्थः। तथैवापि त्रिपद्यायास् त्रिपदोपलक्षितायाः प्रतिपदः। **"आद्याः प्रतिपदस् त्रयः"** इति यदुक्तं तदपि भवेत्। किमेवं सर्व आहुः? न। एकेऽह्नः कृते स्थितिम्। अह्नो यागदिवसस्यैवं कृते कल्पनायामेतां स्थितिं व्यवस्थामाहुर् न सर्वे। अन्ये तु जावाद्यृक्षव्यवस्थां पञ्चस्वपि एवमाहुः। स्तृण इति वा षष्ठी। तत्सम्बन्धिनी व्यवस्थेत्यर्थः। तस्य तत्र॥१४॥

(कौण्डिन्न्यायनव्याख्यानम्)

पर्वकालविशेषस्योपादेयतां स्पष्टीकुर्वन्नाह— स्युः पादोर्ध्वं त्रिपद्यायाः **इत्यादि।**

पञ्चदश्याश् चतुर्थात् पादादूर्ध्वं वर्तमानत्वेऽपि दिनस्य द्वयोर् भागयोर् मध्ये प्रथमे भागे (पूर्वाह्णे) आत्मीयां स्थितिं कृतवत्सु सत्सु त्रिपद्येति दर्शपूर्णमासयाजिभिः शिष्टैरुच्यमानायाः प्रतिपदस् त्रिर् एकैकमुपात्ताः पादाः(प्रतिपदाया आद्येषु त्रिषु पादेषु मध्ये यः कोऽपि पाद इति सर्वेऽपि पादाः) पर्वसम्मिताः (पर्वतुल्याः, पर्वकृत्यार्हाः, यागयोग्याः) स्युः, अन्ये केचन मुनयस् तु स्तृणः पञ्चकाः इन्दोः साम्येन पर्वसम्मिताः स्युरित्याहुरित्यर्थः। एवं च पर्वकालज्ञाने इन्दोः पर्वकालानुकूलतया स्थितेरुपलब्धेः प्रधानोपायत्वं प्रदर्शितं भवति। नक्षत्रविशेषसम्बन्धस् तूपलक्षणतयैवाऽऽदेयो भवतीत्यप्युक्तं भवति। कात्यायनमुनिरपि तृतीये परिशिष्टे प्रतिज्ञासूत्रे "ईदृशो भवति यज्ञविधिज्ञः पक्षमासतिथिचन्द्रगतिज्ञः" इति **वदन् पर्वनिर्णयादौ चन्द्रस्थितेरेव प्राधान्यं सूचयत्येव।**

अत्र दर्शपूर्णमासयागकालनिर्णयविषयकाणि अधोलिखितानि **वचनानि च स्मरणीयानि। तथाहि—**

> **अर्धं चतुर्दशी यत्र परे पञ्चदशी यदि।**
> **चतुर्दश्यवसाने तु पितृयज्ञं तु कारयेत्॥** इति।
>
> —सोमाकरभाष्ये (श्लो. १७) स्थितं परिशिष्टकृद्वचनम्।

> **त्रीनंशानौपवस्तस्य यागस्य चतुरो विदुः।**
> **द्वावंशावुत्सृजेदन्त्यौ यागे च व्रतकर्मणि॥** इति
>
> —लौगाक्षिवचनम्, सभाष्यगोभिलगृह्यसूत्रटिप्पण्याम् (पृ.१४५)।

> **पञ्चदश्याः परः पादः पक्षादेः प्रथमास् त्रयः।**
> **कालः पार्वणयागे स्यादथान्त्ये तु न विद्यते॥** इति
>
> —यज्ञपार्श्ववचनं च तत्रैव।

पर्वणो यश् चतुर्थोऽंश आद्याः प्रतिपदस् त्रयः।
यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः।। इति
–वृद्धशातातपवचनं च तत्रैव, नारदीयपुराणे च (१।२९।३६-३७)।

न यष्टव्यं चतुर्थांशे यागैः प्रतिपदः क्वचित्।
रक्षांसि तद् विलुम्पन्ति श्रुतिरेषा सनातनी॥ इति
–कात्यायनवचनं च सभाष्यगोभिलगृह्यसूत्रटिप्पण्याम् (पृ.१४५)।

निश्युद्गतोऽथवाऽप्युच्चैरस्तं वाऽप्युपगच्छति।
तदा पूर्वेऽप्यृतौ ह्येतत् कार्यं चन्द्रवशाद् भवेत्॥ इति।
–गर्गवचनम्, सोमाकरभाष्ये (श्लो. १७)।

प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते।
पुनः प्रणीय कृत्स्नेष्टिः कर्तव्या यागवित्तमैः॥ इति
–गार्ग्यवचनं च सभाष्यगोभिलगृह्यसूत्रटिप्पण्याम् (पृ.१४६)

यस् तु न प्रारभेतेष्टिमन्त्यांशे पर्वणो द्विजः।
प्रतिपद्या चतुर्थांशात् प्राग् यश् च न समापयेत्॥
कृता वाऽप्यकृतैवेष्टिस् तयोः स्यान् नाऽत्र संशयः।
पुनरेवाऽऽचरेदिष्टिं शुभेऽहनि यथाविधि॥ इति
–प्रयोगपारिजातोदाहृताश्वलायनवचनम्, विष्णुभट्टकृत-पुरुषार्थचिन्तामणौ, कालखण्डे (पृ.४१०)।

उदित आदित्ये पौर्णमास्यास् तन्त्रं प्रक्रमयति प्रागुदयादमावास्यायाः। इति
–आपस्तम्बश्रौतसूत्रे (१।१५।१)।

एवं च पूर्वाह्णस्थस्य पञ्चदशीचतुर्थपादस्य प्रतिपत्पादत्रयस्य च यागकालस्य श्रुतिस्मृतिसम्मतस्य विशेषतो निरूपणाय प्रवृत्तं "स्युः पादोर्ध्वम्" इत्यादिकं लगधमुनिवचनमवसीयते इति तदनुकूलतयैवाऽस्माभिर् व्याख्यातमवगन्तव्यम्।

वेदाङ्गज्योतिषस्य ऋग्वेदिनां पाठे स्थितं "चतुर्दशीमुपवसथस् तथा भवेद् यथोदितो दिनमुपैति चन्द्रमाः" (श्लो ३४) इति वचनमप्येतदाह। सामान्यतया कृष्णपक्षचतुर्दश्यामतीव क्षीणे चन्द्रे उदिते मुहूर्तानन्तरं सूर्ये उदिते दिनं प्रवर्तते। यदा तु कृष्णपक्षचतुर्दश्यामत्यन्तमेव क्षीणो मृणालमिव रेखामात्ररूपेण दृश्यमानश् चन्द्र उदित एव दिनमुपैति, तादृशस्य चन्द्रस्योदयाद् घट्यनन्तरं वा ततोऽल्पे काले वा सूर्ये उदिते दिनं प्रवर्तत इति उदितमात्रस् तादृशश् चन्द्रो दिनं प्राप्नोति, तदा चतुर्दश्यामुपवसथो भवति, पिण्डपितृयज्ञश् च भवतीति ऋग्वेदिनां तस्य पाठस्याऽर्थः।

"तेऽसुरा अयज्ञा अदक्षिणा अनक्षत्रा यत् किं चाऽकुर्वत तां कृत्यामेवाऽकुर्वत" इति काठकसंहितायां (३७।१२) श्रुतत्वाद् यथासंभवं चन्द्रस्थितिविशेषस्य नक्षत्रयोगस्य च समन्वयेन यागः कर्तव्य इत्यत्र वैदिकानां तात्पर्यमवगन्तव्यम्। तथापि वस्तुतस्तु नक्षत्रमुपलक्षणमेव, कर्मणि चन्द्रस्थितिवशान् निश्चेयस् तिथिरेव प्रधानमिति वैदिकानां परम्पराऽस्ति। तथा हि "चन्द्रप्रमाणास् त्वेव पर्वसु स्युः" इति लाट्यायनश्रौतसूत्रे (१०।१६।१३), द्राह्यायणश्रौतसूत्रे च (३१।२।७); "ईदृशो भवति यज्ञविधिज्ञः पक्ष-मास-तिथि-चन्द्रगतिज्ञः" इति कातीयानां तृतीये परिशिष्टे प्रतिज्ञासूत्रे; "तिथिः शरीरं तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनम्। तिथिं विना नैव शशी प्रदृश्यते विनेन्दुना चापि न कर्म सिद्ध्यति" इति लल्लकृतरत्नकोशवचनं जगन्मोहने सप्तविंशस्य तिथिफलाध्यांयस्याऽन्ते (पृ.२११), निर्णयसिन्धौ आश्विनमासान्तर्गतनवरात्रारम्भनिरूपणप्रकरणे च; "तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितम्। तस्मात् तिथिं प्रशंसन्ति नक्षत्रं न तिथिं विना" इति विद्यापतिलिखितवचनं च निर्णयसिन्धौ आश्विननवरात्रान्तर्गतषष्ठीकृत्यबिल्वनिमन्त्रणनिरूपणे।

विशेषः— 'त्रिर् द्व्येके' इत्यत्र त्रय इत्यर्थे त्रि इति वाऽविभक्तिको निर्देशः। भवन्ति ह्यार्षग्रन्थेषु अविभक्तिका निर्देशाः। तथाहि पाणिनीयव्याकरणे "हनो वध लिङि" (२।४।४२) इत्यत्र वध इत्यस्याऽविभक्तिको निर्देशः, प्रत्ययस्याऽऽदीनाम् इत्यर्थे "प्रत्यय+आदीनाम्" इति (७।१।२, ७।१।३, वा.२,३) प्रत्यय इत्यस्याऽविभक्तिको निर्देशः। द्व्येके इत्यत्र च सर्वनामकार्याभावोऽप्यार्ष एव। दृश्यन्ते हि "अग्निहोत्रैर् न तच् छ्रेयो नाऽग्निष्टोमादिभिर् मखैः। यच् छ्रेयः प्राप्यते मर्त्यैर् द्विजे चैके प्रतिष्ठिते" (स्कन्दपुराणे काशीखण्डे ४०।३२) इत्यादौ तादृशाः प्रयोगाः। दृश्यन्ते हि पाणिनीयव्याकरणाष्टाध्याय्यामपि "तिर्यच्यपवर्गे" (३।४।६०) "अन्वच्यानुलोम्ये" (३।४।६४) इत्यादयोऽन्येऽप्यपाणिनीयाः प्रयोगाः। "चतुर्दशीमुपवसथः" इत्यत्र ऋग्वेदिनां वेदाङ्गज्योतिषपाठे (श्लो.३४) च चतुर्दश्याम् इत्यर्थे चतुर्दशीमित्यार्षः प्रयोगो दृश्यत इति चाऽत्र स्मर्तव्यम्। शङ्करबालकृष्णदीक्षितेन तु वैदिकयज्ञप्रक्रियायाः सम्यक् परिचयस्याऽभावाच् चतुर्दशीमुपवसथ इत्यत्रोपवसथशब्दार्थस्याऽज्ञानेनाऽन्यथार्थः कृतो दृश्यते (हिन्द्यनुवादे, पृ. ११६)। कृते इति च कृतवत्सु इत्यर्थे आर्षः प्रयोगः।

एष श्लोक ऋग्वेदिनां पाठे नाऽस्ति। एष श्लोकः शङ्करबालकृष्णदीक्षितेन न व्याख्यात इति तत्पूर्ववर्तिभिराधुनिकैरप्यव्याख्यात एवाऽवगम्यते। बार्हस्पत्य-सुधाकर-तिलकादीनां व्याख्यानान्यप्ययथार्थान्येव दृश्यन्ते। सोमाकरव्याख्यानमपि स्पष्टं नाऽस्ति। अस्माभिर् धर्मशास्त्रानुकूलतयैष श्लोको व्याख्यातोऽस्ति ॥१४॥

हिन्दी – पञ्चदशी के चतुर्थ पाद के अंश से ऊपर रहते हुए भी दिन के दो भागों में से प्रथम भाग में अपनी स्थिति बनाने वाले प्रतिपदा के तीन पाद (प्रतिपदा के आद्य तीन पादों में से कोई भी पाद) पर्वतुल्य (पर्वकृत्य के लिए अर्थात् याग के लिए योग्य) होते हैं। अन्य कोई मुनि लोग तो चन्द्रमा के स्थिति के अनुकूलता से जावादि पद्य में बताए गए नक्षत्रों के पञ्चक पर्वतुल्य (पर्वकृत्य के लिए अर्थात् याग के लिए योग्य) होते हैं, ऐसा मानते हैं।

विशेष – इस श्लोक में लगधमुनि मुख्य पक्ष के रूप में चन्द्रस्थितिविशेषानुकूल तिथिविशेष का ही पक्षान्तेष्टि के लिए विशेष ग्राह्यता बताकर अन्य मुनिमत में नक्षत्रविशेषों के विचार से भी पर्वान्तेष्टिकाल निरूपित होने की बात बताते हैं॥१४॥

[पर्वान्तेषु सूर्यचन्द्राभ्यां चन्द्रेण वा भुक्तानां भांशानां ज्ञानस्योपायः]

भाऽंशाः स्युरष्टकाः कार्याः पक्षद्वादशकोद्गताः।
एकादशगुणश् चोनः शुक्लेऽर्धं चैन्दवा यदि॥१५॥

(सोमाकरभाष्यम्)

भांशास् स्युरष्टकाः कार्या इति। यदृक्षो जावादिः। तस्य येऽंशाः स्युर् भवेयुः। चत्वारस् ४ त्रयो ३ द्वौ २ वा तेऽष्टकाः कार्याः अष्टनाडिका इत्यर्थः। एवं सामान्यव्यवस्था। एवमेव यागकालापेक्षया कल्पना च ततो व्याप्तिः। तेषामन्यथैवोपरिष्टाद् वक्ष्यति "**ससप्तकं भयुक् सोमः**"(श्लो.३९) इति। द्व्यष्टकावेर्तिं पाठः। दिवसाष्टभागा इत्यर्थः। तथापि पक्षा द्वादशकोद्गता द्वादशदिवसाभ्यधिकाः सार्धास् त्रयोदश वा। किं सर्वे ? न। आर्क्षा एव वक्ष्यमाणभेदविधानात्। यतो जावादिना ये पञ्च चोदितास् तदा स्थितानि पञ्च पर्वाण्यतिक्रम्य आर्क्षचोदना ततश् च षष्टितमेऽह्नि इत्यन्ते च भवति। एवमेषाऽऽर्क्षी व्याप्तिः पाञ्चवार्षिक्युक्तैकेन प्रयत्नेनेति तस्मादेवं चोदना। किं च एकादशगुणश् चोनः। यदि पक्षाद् भागस् तदैकादशगुणो भवेत् एकादशदिवस इत्यर्थः। किं च शुक्लेऽर्धं भवेदिति वाक्यशेषः। यदि शुक्लपक्षस् तदार्धं भवेन् मासस्येति वाक्यशेषः। एवमैन्दवा यदि। यदि चान्द्रो मासोऽभिप्रेतस् तदा तिथिसङ्ख्या या पूर्वपक्षादिचोदना सावनसौराणां तत एव व्यवस्था॥१५॥

(कौण्डिन्न्यायनव्याख्यानम्)

पञ्चवर्षात्मकस्य युगस्य चतुर्विंशस्य शतस्य (१२४) पर्वणां मध्ये यस्यकस्याऽपि पर्वणोऽन्ते सूर्यचन्द्रभुक्तस्य चन्द्रभुक्तस्य वा भांशस्य ज्ञानाय लघ्वीं गणनारीतिं प्रदर्शयति शास्त्रकारः— भांशाः स्युरष्टकाः कार्या **इत्यादिना।**

इष्टानां पक्षाणां द्वादशकेन कृता उच्चया अष्टगुणिताः कार्याः, इष्टसङ्ख्याकेषु पक्षेषु द्वादशकेनोच्चितेषु द्वादशभ्यो न्यूना अवशिष्टाः पक्षा एकादशगुणिताः

कार्याः, एवं द्वयोर् गुणनफलयोर् योग इष्टपक्षान्ते सूर्यचन्द्रभुक्ताः भांशा ज्ञेयाः। प्रथमपक्षद्वादशकपूर्तेः प्राक् स्थितेषु पक्षेषु तु प्रतिपक्षमेकादश भांशा एव ग्राह्याः। एषा चाऽमान्तपक्षान्तभांशविषया गणना ज्ञेया। पूर्णिमान्तपक्षान्ते चन्द्रभुक्तभांशा यदि ज्ञेयास् तदा एकादशके तद्गुणनफले वा सम्पूर्णानां भांशानां चतुर्विंशति-शतसङ्ख्याकानामर्धं (६२)च योज्यमित्यर्थः।

उदाहरणं यथा श्रविष्ठादेः पञ्चवर्षात्मकस्य युगस्य चतुर्दशस्य पक्षस्याऽन्ते सूर्यचन्द्रभुक्तभांशज्ञानमावश्यकं तर्हि तत्र गतं पक्षद्वादशकम् १, तस्य अष्टभिर् गुणने १×८=८, तत्र ऊनपक्षौ द्वौ इति तयोर् एकादशभिर् गुणने २×११=२२, युक्ताः भांशाः ८+२२=३०, ते एव चतुर्दशस्य पक्षस्यान्ते सूर्यचन्द्रभुक्तभांशा ज्ञेयाः। तस्मिन् पक्षान्ते नक्षत्रं च, पर्वभांशाः ३०, तेषां भसमूहेन विभागे $\frac{३०}{२७}=१\frac{३}{२७}$ इति (श्लो.१७) जावादिक्रमे (श्लो.१८) तृतीयं नक्षत्रं पूर्वफल्गुन्यौ इति तत्र पूर्वफल्गुन्योर् नक्षत्रस्य ३० अंशेषु व्यतीतेषु पर्वसमाप्तिर् भवतीति ज्ञेयम्।

तथैव ऊनत्रिंशपक्षान्ते चन्द्रभुक्तभांशज्ञानमावश्यकं तर्हि तत्र गते पक्ष-द्वादशके २, तयोः अष्टभिर् गुणने २×८=१६, तत्र ऊनपक्षाः पञ्च इति ५×११ =५५, युक्ताः भांशाः १६+५५=७१, ऊनत्रिंशपक्षस्य शुक्लपक्षत्वात् भांशार्धयोगे ७१+६२= १३३, तत्र पूर्णनक्षत्रभांशरूपायाः १२४ सङ्ख्याया उद्वापे १३३-१२४=९, ते एव ऊनत्रिंशस्य पक्षस्यान्ते चन्द्रभुक्तभांशा ज्ञेयाः। तस्मिन् पक्षान्ते नक्षत्रं च, पर्वभांशाः ९ इति जावादिक्रमे नवमं नक्षत्रं चित्रा इति तत्र चित्रायाः नक्षत्रस्य ९ अंशेषु व्यतीतेषु पर्वसमाप्तिर् भवतीति ज्ञेयम्।

तथैव आदियुगस्य चतुर्थस्य पक्षस्यान्ते सूर्यचन्द्रभुक्तभांशज्ञानमावश्यकं तर्हि तत्र गतपक्षद्वादशकं नाऽस्ति, तत्र ऊनपक्षाः चत्वारः इति ४×११=४४, ते एव चतुर्थस्य पक्षस्यान्ते सूर्यचन्द्रभुक्तभांशा ज्ञेयाः। तस्मिन् पक्षान्ते नक्षत्रं च, पर्व-भांशाः ४४, तेषां भसमूहेन विभागे $\frac{४४}{२७}=१\frac{१७}{२७}$ इति जावादिक्रमे सप्तदशं नक्षत्रं रेवती इति तत्र रेवत्याः नक्षत्रस्य ४४ अंशेषु व्यतीतेषु पर्वसमाप्तिर् भवतीति ज्ञेयम्।

तथैव नवमपक्षान्ते चन्द्रभुक्तभांशज्ञानमावश्यकं तर्हि तत्र गतपक्षद्वादशकं नाऽस्ति, तत्र ऊनपक्षाः नव इति ९×११=९९, नवमस्य पक्षस्य शुक्लपक्षत्वात् भांशार्धयोगे ९९+६२=१६१, अस्याः सङ्ख्याया सम्पूर्णभांशाधिकत्वात् ततः १२४ सङ्ख्याया उद्वापे १६१-१२४=३७ इति ते एव नवमस्य पक्षस्यान्ते चन्द्रेण भुक्ता भांशा ज्ञेयाः। तस्मिन् पक्षान्ते नक्षत्रं च, पर्वभांशाः ३७, तेषां नक्षत्रसङ्ख्याधिक-

त्वात् भसमूहेन विभागे $\frac{३७}{२७}=१\frac{१०}{२७}$ इति जावादिक्रमे दशमं नक्षत्रं मूलबर्हणी इति तत्र मूलबर्हण्या नक्षत्रस्य ३७ अंशेषु व्यतीतेषु पर्वसमाप्तिर् भवतीति ज्ञेयम्।

अत्रोपपत्तिः— पञ्चवर्षात्मके युगे ६२ चान्द्रमासाः ६७ नाक्षत्रमासाश् च स्वीक्रियन्ते इति शास्त्रकारेण "सावनेन्दुस्तृमासानां षष्टिः सैकद्विसप्तिका" (श्लो. ३१) इति श्लोकेनोक्तमस्ति। एवं च एकश् चान्द्रमासः $\frac{६७}{६२}$ नाक्षत्रमाससमपरिमाणो भवतीति ज्ञायते। एकस्मिन् नाक्षत्रमासे चन्द्रः २७ नक्षत्रेषु चारं करोति। ततश् च एकस्मिँश् चान्द्रमासे चन्द्रः $\frac{६७}{६२}\times२७=२९\frac{११}{६२}$ नक्षत्रेषु चारं करोति। अतः एकस्मिन् पक्षे चन्द्रः $२९\frac{११}{६२}\div२=\frac{१८०९}{१२४}=१४\frac{७३}{१२४}$ नक्षत्रेषु (चतुर्दशसु नक्षत्रेषु पञ्चदशस्य नक्षत्रस्य चतुर्विंशे शते भागेषु मध्ये त्रिसप्ततौ पूर्वभागेषु च) चारं करोति। अथवा एकस्मिन् युगे ५ वर्षाणि भवन्तीति अस्यैव वेदाङ्गज्योतिषग्रन्थस्य प्रथमात् श्लोकाद् अष्टाविंशात् श्लोकाच् च ज्ञायते। एकस्मिन् युगे १२४ पर्वाणि पक्षा वाऽपि भवन्तीति च त्रयोदशात् श्लोकात्, "पर्वणां स्याच् चतुष्पादी" (श्लो. ३०) इति वचनात्, "सावनेन्दुस्तृमासानां षष्टिः सैकद्विसप्तिका" (श्लो. ३१) इति वचनाच् च ज्ञायते। एकस्मिन् युगे ६७ नाक्षत्रमासाः स्वीक्रियन्त इति "सावनेन्दुस्तृमासानां षष्टिः सैकद्विसप्तिका" (श्लो.३१) इति वचनाद् ज्ञायते। चन्द्रकृतेनैकेन पूर्णनक्षत्रचक्रपरिभ्रमणेन युक्तः कालो नाक्षत्रमास इत्युच्यते इति च "स्तृणां स पर्ययः" इति वचनाद् (श्लो.३१) ज्ञायते। नक्षत्रचक्रे नक्षत्राणि २७ सन्तीति "जौ द्रा गः खे श्वे ही" इत्यादिकाद् वचनाद् (श्लो.१८) ज्ञायते। एवं च एकस्मिन् युगे १२४ पर्वसु चन्द्रः ६७ कृत्वः २७ नक्षत्राणि परिभ्रमतीति १२४ पर्वसु (२७×६७=) १८०९ नक्षत्राणि परिभ्रमतीति स्वीकृत्य सरलतया गणितं प्रदर्श्यते इति स्पष्टतया ज्ञायते। ततश् च यदि चन्द्रः १२४ पर्वसु १८०९ नक्षत्राणि चरति तर्हि एकस्मिन् पर्वणि कति नक्षत्राणि चरतीति त्रैराशिके कृते $(\frac{१८०९}{१२४})=१४\frac{७३}{१२४}$ इत्युत्तरं भवति। ततश्च एकस्मिन् पर्वणि चन्द्रः $१४\frac{७३}{१२४}$ नक्षत्राणि चरतीति ज्ञायते। एवं च पक्षाणां द्वादशके चन्द्रः $१४\frac{७३}{१२४}\times१२=१७५\frac{८}{१२४}$ नक्षत्रेषु चारं करोति। द्वादशः पक्षोऽमान्तो भवतीति तस्य पक्षस्याऽन्ते सूर्याचन्द्रमसौ सह वसतः। अत एव तदा सूर्याचन्द्रमसौ कस्याऽपि नक्षत्रस्याऽष्टममंशं भुक्तवन्तौ भवतः। यदि पक्षाणां द्वयोर् द्वादशकयोरन्ते सूर्य-चन्द्रभुक्तभांशज्ञानमावश्यकं तर्हि अष्टकं द्विगुणितं कार्यम्, यदि पक्षाणां त्रयाणां द्वादशकानामन्ते सूर्य-चन्द्रभुक्तभांशज्ञानमावश्यकं तर्हि अष्टकं त्रिगुणितं कार्यम्, एवमेवोर्ध्वमपि। द्वादशपक्षकादूनानां पक्षाणामन्ते सूर्यचन्द्रभुक्त-भांशज्ञानाय च ते द्वादशकादूना यावन्तः

पक्षाः ते एकादशगुणाः कार्याः। एकस्मिन् पक्षे चन्द्रः १४$\frac{७३}{१२४}$ नक्षत्रेषु (चतुर्दशसु नक्षत्रेषु पञ्चदशस्य नक्षत्रस्य चतुर्विंशे शते भागेषु मध्ये त्रिसप्ततौ पूर्वभागेषु च) चारं करोति। तत्र चतुर्दश पूर्णानि नक्षत्राणि, एकं नक्षत्रार्धम्, एकादश भांशाश् च सन्ति। अत एव समपक्षे भांशज्ञानाय इष्टपर्वसङ्ख्याया एकादशभिर् गुणनं कर्तव्यं भवति। समे पक्षे भांशार्धमपि गुणितं भूत्वा पूर्णनक्षत्रतां प्रप्नोति। अतस् तत्र सम्पूर्णभांशार्धसङ्ख्याया योजनमावश्यकं न भवति। विषमे पक्षे तु सम्पूर्णभांशार्धमपि योज्यं भवति। तत्रोनः पक्ष एक एवाऽस्ति तर्हि द्वादशकागतभांशेषु एकादशभांशयोगः कार्यः, स चाऽयं विषमः पक्षः शुक्लः पक्ष इति तस्यान्ते चन्द्रः सूर्यात् परमविप्रकृष्टो भवतीति तत्र चन्द्रभुक्तभांशज्ञानाय सम्पूर्णभांशार्धमपि (६२) योज्यम्। अर्थात् अस्य पक्षस्यान्ते चन्द्रः कस्याऽपि नक्षत्रस्य त्रिसप्ततितममंशं गतपक्षद्वादशकागतभांशयुक्तं भुक्तवान् भवति। यथा आदियुगस्य त्रयोदशपक्षस्याऽन्ते एकस्यैव पक्षद्वादशकस्य व्यतीतत्वात् चन्द्रभुक्तभांशाः (८+११+ ६२=) ८१ भवन्ति, पञ्चविंशपक्षस्यान्ते द्वयोः पक्षद्वादशकयोर् व्यतीतत्वात् चन्द्रभुक्तभांशाः (८+८+११+६२=) ८९ भवन्ति। तत्रोनपक्षौ द्वौ तर्हि द्वादशकागतभांशेषु द्विवारमेकादशानां भांशानां योगः कार्यः। स चाऽयं समः पक्षोऽमान्त इति नाऽत्र भांशार्धयोगः कार्यः। तत्र पक्षद्वयसंख्याने भांशानां योगात् (७३+७३=) १४६ भांशाः, तत्र सम्पूर्णभांशापचये (१४६-१२४=) २२ भांशा अवशिष्यन्ते इति तानेव गतपक्षद्वादशकोद्गतभांशयुक्तान् सूर्याचन्द्रमसौ भुक्तवन्तौ भवतः। यद्यूनपक्षास् त्रयस् तर्हि द्वादशकागतभांशेषु त्रिवारमेकादशानां भांशानां योगः कार्यः। तत्र पक्षत्रयान्तस्थभांशानां योगात् (७३+ ७३+ ७३=) २१९ भांशाः, तत्र सम्पूर्णभांशापचये (२१९-१२४=) ९५ भांशा अवशिष्यन्ते इति तृतीयस्य पक्षस्य शुक्लपक्षत्वात् तत्र (११×३=३३+६२=९५) भार्धांशयोगोऽपि जातो भवति। तत्र पक्षद्वादशकलब्धभांशयुक्तान् तान् भांशान् चन्द्रो भुक्तवान् भवतीति ज्ञेयम्। प्रथमपक्षद्वादशकपूर्तेः प्राक् स्थितेषु पक्षेषु तु प्रतिपक्षमेकादश भांशा एव ग्राह्याः। तेषां यथायथं योगात् सूर्यचन्द्रभुक्तभांशा ज्ञेयाः। शुक्लपक्षान्तेषु तु सम्पूर्णभांशार्धम् (१२४÷२=६२) अपि योजयित्वा चन्द्रभुक्तभांशा ज्ञेयाः। इत्थं व्याख्यातेऽस्मिन् श्लोके पर्वभांशस्य ज्ञानं सरलया रीत्या कर्तुमुपायः प्रतिपादितो वर्तते। पर्वभांशज्ञानेन पर्वनक्षत्रज्ञानस्योपायं तु शास्त्रकारः पश्चाद् वक्ष्यति (श्लो.२०)।

अथ आदियुगस्य १२४ पर्वणामन्तेषु व्यतियायिनां भांशानां स्पष्टतया ज्ञानायाऽधः सारणी प्रदर्श्यते। पूर्वं थिबोनाम्नाऽध्येत्रा प्रकारान्तरेण प्रस्तुता शामशास्त्रिणाऽपि तथैव कतिपयमुद्रणाशुद्धियुक्ततया चोपस्थापिताऽपीयं सारणी

अस्माभिस् तु व्याख्यातश्लोकानुसारमेवाऽत्र प्रस्तुता ज्ञेया। एवं च श्रविष्ठादौ सूर्योदयकाले शुक्लपक्षप्रतिपदारम्भे उदगयनादौ प्रवृत्तस्य पञ्चवर्षात्मकस्य आदि-युगस्य १२४ पर्वणां (पक्षाणां) सम्बद्धनक्षत्रांशेषु समाप्तेः प्रदर्शिका सारणी प्रस्तुत-श्लोकोक्तरीत्या पर्वसमाप्तिनक्षत्रांशं च स्पष्टतयोक्त्वा प्रस्तुता चेयम्—

(१) ११×१+६२=७३भांशाः (७३-२७×२=१९ इति जावादिक्रमे ऊनविंशस्य नक्षत्रस्य मघानां ७३तमेऽंशे गते प्रथमपर्वसमाप्तिः)।

(२) ११×२=२२ (जावादिक्रमे द्वाविंशस्य नक्षत्रस्य पूर्वभद्रपदयोः २२तमेऽंशे गते द्वितीयपर्वसमाप्तिः)।

(३) ११×३+६२=९५ (९५-२७×३=१४ इति जावादिक्रमे १४शस्य नक्षत्रस्य उत्तरफल्गुन्योः ९५तमेऽंशे गते तृतीयपर्वसमाप्तिः)।

(४) ११×४=४४ (४४-२७=१७ इति जावादिक्रमे सप्तदशस्य नक्षत्रस्य रेवत्याः ४४तमेऽंशे गते चतुर्थपर्वसमाप्तिः)।

(५) ११×५+६२=११७ (११७-२७×४=९ इति जावादिक्रमे नवमस्य नक्षत्रस्य चित्रायाः ११७ तमेऽंशे गते पञ्चमपर्वसमाप्तिः)।

(६) ११×६=६६ (६६-२७×२=१२ इति जावादिक्रमे द्वादशस्य नक्षत्रस्य अप-भरणीनां ६६ तमेऽंशे गते षष्ठपर्वसमाप्तिः)।

(७) ११×७+६२=१३९-१२४=१५ (जावादिक्रमे पञ्चविंशस्य नक्षत्रस्य अनु-राधानां १५शेऽंशे गते सप्तमपर्वसमाप्तिः)।

(८) ११×८=८८ (८८-२७×३=७ जावादिक्रमे सप्तमस्य नक्षत्रस्य रोहिण्याः ८८तमेऽंशे गते अष्टमपर्वसमाप्तिः)।

(९) ११×९+६२=१६१-१२४=३७ (३७-२७=१० इति जावादिक्रमे दशमस्य नक्षत्रस्य मूलबर्हण्याः ३७तमेऽंशे गते नवमपर्वसमाप्तिः)।

(१०) ११×१०=११० (११०-२७×४=२ इति जावादिक्रमे द्वितीयस्य नक्षत्रस्य आर्द्रायाः ११०तमेऽंशे गते दशमपर्वसमाप्तिः)।

(११) ११×११+६२=१८३-१२४=५९ (५९-२७×२=५ इति जावादिक्रमे पञ्चमस्य नक्षत्रस्य उत्तराषाढानाम् ५९तमेऽंशे गते एकादशपर्वसमाप्तिः)।

(१२) ८×१=८ (जावादिक्रमे अष्टमस्य नक्षत्रस्य आश्लेषाणाम् ८मेऽंशे गते द्वादश-पर्वसमाप्तिः)।

(१३) ८×१+११×१+६२=८१ (८१-२७×२=२७ तमस्य नक्षत्रस्य श्रविष्ठानाम् ८१तमेऽंशे गते त्रयोदशपर्वसमाप्तिः)।

(१४) ८×१+११×२=३० (३०-२७=३ इति जावादिक्रमे तृतीयस्य नक्षत्रस्य पूर्व-फल्गुन्योः ३०तमेऽंशे गते चतुर्दशपर्वसमाप्तिः)।

(१५) ८×१+११×३+६२=१०३ (१०३-२७×३=२२ इति जावादिक्रमे २२तमस्य नक्षत्रस्य पूर्वभद्रपदयोः १०३तमेऽंशे गते पञ्चदशपर्वसमाप्तिः)।

(१६) ८×१+११×४=५२ (५२-२७=२५ इति जावादिक्रमे २५शस्य नक्षत्रस्य हस्तस्य ५२तमेऽंशे गते षोडशपर्वसमाप्तिः)।

(१७) ८×१+११×५+६२=१२५-१२४=१ (जावादिक्रमे प्रथमस्य नक्षत्रस्य अश्व-युजोः प्रथमेऽंशे गते सप्तदशपर्वसमाप्तिः)।

(१८) ८×१+११×६=७४ (७४-२७×२=२० युगादिश्रविष्ठातः २०तमस्य नक्षत्रस्य स्वातेः ७४तमेऽंशे गते अष्टादशपर्वसमाप्तिः)।

(१९) ८×१+११×७+६२=१४७-१२४=२३ (जावादिक्रमे २३ तमस्य नक्षत्रस्य कृत्तिकानां २३तमेऽंशे गते ऊनविंशपर्वसमाप्तिः)।

(२०) ८×१+११×८=९६ (९६-२७×३=१५ इति जावादिक्रमे १५शस्य नक्षत्रस्य अनुराधानां ९६तमेऽंशे गते विंशपर्वसमाप्तिः)।

(२१) ८×१+११×९+६२=१६९-१२४=४५ (४५-२७=१८ इति जावादिक्रमे १८स्य नक्षत्रस्य मृगशीर्षस्य ४५तमेऽंशे गते एकविंशपर्वसमाप्तिः)।

(२२) ८×१+११×१०=११८ (११८-२७×४=१० इति जावादिक्रमे दशमस्य नक्षत्रस्य मूलबर्हण्याः ११८तमेऽंशे गते द्वाविंशपर्वसमाप्तिः)।

(२३) ८×१+११×११+६२=१९१-१२४=६७ (६७-२७×२=१३ इति जावादिक्रमे त्रयोदशस्य नक्षत्रस्य पुनर्वस्वोः ६७तमेऽंशे गते त्रयोविंशपर्वसमाप्तिः)।

(२४) ८×२=१६ (जावादिक्रमे षोडशस्य नक्षत्रस्य श्रवणस्य १६शेऽंशे गते चतुर्विंशपर्वसमाप्तिः)।

(२५) ८×२+११×१+६२=८९ (८९-२७×३=८ इति जावादिक्रमे अष्टमस्य नक्षत्रस्य आश्लेषाणाम् ८९तमेऽंशे गते पञ्चविंशपर्वसमाप्तिः)।

(२६) ८×२+११×२=३८ (३८-२७=११ इति जावादिक्रमे एकादशस्य नक्षत्रस्य शतभिषजः ३८तमेऽंशे गते षड्विंशपर्वसमाप्तिः)।

(२७) ८×२+११×३+६२=१११ (१११-२७×४=३ इति जावादिक्रमे तृतीयस्य नक्षत्रस्य पूर्वफल्गुन्योः १११तमेऽंशे गते सप्तविंशपर्वसमाप्तिः)।

(२८) ८×२+११×४=६० (६०-२×२७=६ इति जावादिक्रमे षष्ठस्य नक्षत्रस्य उत्तरभद्रपदयोः ६०तमेऽंशे गते अष्टाविंशपर्वसमाप्तिः)।

(२९) ८×२+११×५+६२=१३३-१२४=९ (जावादिक्रमे नवमस्य नक्षत्रस्य चित्रायाः नवमेऽंशे गते ऊनत्रिंशपर्वसमाप्तिः)।

(३०) ८×२+११×६=८२ (८२-२७×३=१ इति जावादिक्रमे प्रथमस्य नक्षत्रस्य अश्वयुजोः ८२तमेऽंशे गते त्रिंशपर्वसमाप्तिः)।

(३१) ८×२+११×७+६२=१५५-१२४=३१ (३१-२७=४ इति जावादिक्रमे चतुर्थस्य नक्षत्रस्य विशाखयोः ३१तमेऽंशे गते एकत्रिंशपर्वसमाप्तिः)।

(३२) ८×२+११×८=१०४ (१०४-२७×३=२३ इति जावादिक्रमे त्रयोविंशस्य नक्षत्रस्य कृत्तिकानां १०४तमेऽंशे गते द्वात्रिंशपर्वसमाप्तिः)।

(३३) ८×२+११×९+६२=१७७-१२४=५३ (५३-२७=२६ इति जावादि क्रमे षड्विंशस्य नक्षत्रस्य ज्येष्ठायाः ५३तमेऽंशे गते त्रयस्त्रिंशपर्वसमाप्तिः)।

(३४) ८×२+११×१०=१२६-१२४=२ (जावादिक्रमे द्वितीयस्यस्य नक्षत्रस्य आर्द्रायाः द्वितीयेऽंशे गते चतुस्त्रिंशपर्वसमाप्तिः)।

(३५) ८×२+११×११+६२=१९९-१२४=७५ (७५-२७×२=२१ इति जावादिक्रमे एकविंशस्य नक्षत्रस्य पूर्वाषाढानां ७५तमेऽंशे गते पञ्चत्रिंशत्तमपर्वसमाप्तिः)।

(३६) ८×३=२४ (जावादिक्रमे चतुर्विंशस्य नक्षत्रस्य पुष्यस्य २४तमेऽंशे गते षट्-त्रिंशपर्वसमाप्तिः)।

(३७) ८×३+११×१+६२=९७ (९७-२७×३=१६ इति जावादिक्रमे षोडशस्य नक्षत्रस्य श्रवणस्य ९७तमेऽंशे गते सप्तत्रिंशपर्वसमाप्तिः)।

(३८) ८×३+११×२=४६ (४६-२७=१९ इति जावादिक्रमे ऊनविंशस्य नक्षत्रस्य मघानां ४६तमेऽंशे गते अष्टात्रिंशपर्वसमाप्तिः)।

(३९) ८×३+११×३+६२=११९ (११९-२७×४=११ इति जावादिक्रमे एकादशस्य नक्षत्रस्य शतभिषजः ११९तमेऽंशे गते ऊनचत्वारिंशपर्वसमाप्तिः)।

(४०) ८×३+११×४=६८ (६८-२७×२=१४ इति जावादिक्रमे चतुर्दशस्य नक्षत्रस्य उत्तरफल्गुन्योः ६८तमेऽंशे गते चत्वारिंशपर्वसमाप्तिः)।

(४१) ८×३+११×५+६२=१४१-१२४=१७ (जावादिक्रमे सप्तदशस्य नक्षत्रस्य रेवत्याः १७शेऽंशे गते एकचत्वारिंशपर्वसमाप्तिः)।

(४२) ८×३+११×६=९० (९०-२७×३=९ इति जावादिक्रमे नवमस्य नक्षत्रस्य चित्रायाः ९०तमेऽंशे गते द्विचत्वारिंशपर्वसमाप्तिः)।

(४३) ८×३+११×७+६२=१६३-१२४=३९ (३९-२७=१२ इति जावादिक्रमे द्वादशस्य नक्षत्रस्य अपभरणीनाम् ३९तमेऽंशे गते त्रिचत्वारिंशपर्वसमाप्तिः)।

(४४) ८×३+११×८=११२ (११२-२७×४=४ इति जावादिक्रमे चतुर्थस्य नक्षत्रस्य विशाखयोः ११२तमेऽंशे गते चतुश्चत्वारिंशपर्वसमाप्तिः)।

(४५) ८×३+११×९+६२=१८५-१२४=६१ (६१-२७×२=७ इति जावादिक्रमे सप्तमस्य नक्षत्रस्य रोहिण्याः ६१तमेऽंशे गते पञ्चचत्वारिंशपर्वसमाप्तिः)।

(४६) ८×३+११×१०=१३४-१२४=१० (जावादिक्रमे दशमस्य नक्षत्रस्य मूलबर्हण्याः १०मेऽंशे गते षट्चत्वारिंशपर्वसमाप्तिः)।

(४७) ८×३+११×११+६२=२०७-१२४=८३ (८३-२७×३=२ इति जावादिक्रमे द्वितीयस्य नक्षत्रस्य आर्द्रायाः ८३तमेऽंशे गते सप्तचत्वारिंशपर्वसमाप्तिः)।

(४८) ८×४=३२ (३२-२७=५ इति जावादिक्रमे पञ्चमस्य नक्षत्रस्य उत्तराषाढानां ३२तमेऽंशे गते अष्टचत्वारिंशपर्वसमाप्तिः)।

(४९) ८×४+११×१+६२=१०५ (१०५-२७×३=२४ इति जावादिक्रमे २४तमस्य नक्षत्रस्य पुष्यस्य १०५तमेऽंशे गते ऊनपञ्चाशत्तमपर्वसमाप्तिः)।

(५०) ८×४+११×२=५४ (५४-२७=२७ इति जावादिक्रमे २७ तमस्य नक्षत्रस्य श्रविष्ठानां ५४तमेऽंशे गते पञ्चाशत्तमपर्वसमाप्तिः)।

(५१) ८×४+११×३+६२=१२७-१२४=३ (जावादिक्रमे तृतीयस्य नक्षत्रस्य पूर्व-फल्गुन्योः तृतीयेऽंशे गते एकपञ्चाशत्तमपर्वसमाप्तिः)।

(५२) ८×४+११×४=७६ (७६-२७×२=२२ इति जावादिक्रमे २२ तमस्य नक्षत्रस्य पूर्वभद्रपदयोः ७६तमेऽंशे गते द्विपञ्चाशत्तमपर्वसमाप्तिः)।

(५३) ८×४+११×५+६२=१४९-१२४=२५ (जावादिक्रमे २५तमस्य नक्षत्रस्य हस्तस्य २५तमेऽंशे गते त्रिपञ्चाशत्तमपर्वसमाप्तिः)।

(५४) ८×४+११×६=९८ (९८-२७×३=१७ इति जावादिक्रमे सप्तदशस्य नक्षत्रस्य रेवत्याः ९८तमेऽंशे गते चतुष्पञ्चाशत्तमपर्वसमाप्तिः)।

(५५) ८×४+११×७+६२=१७१-१२४=४७ (४७-२७=२० इति जावादिक्रमे २०तमस्य नक्षत्रस्य स्वातेः ४७तमेऽंशे गते पञ्चपञ्चाशत्तमपर्वसमाप्तिः)।

(५६) ८×४+११×८=१२० (१२०-२७×४=१२ इति जावादिक्रमे द्वादशस्य नक्षत्रस्य अपभरणीनां १२०तमेऽंशे गते षट्पञ्चाशत्तमपर्वसमाप्तिः)।

(५७) ८×४+११×९+६२=१९३-१२४=६९ (६९-२७×२=१५ इति जावादिक्रमे पञ्चदशस्य नक्षत्रस्य अनुराधानाम् ६९तमेऽंशे गते सप्तपञ्चाशत्तमपर्व-समाप्तिः)।

(५८) ८×४+११×१०=१४२-१२४=१८ (जावादिक्रमे अष्टादशस्य नक्षत्रस्य मृग-शीर्षस्य १८शेऽंशे गते अष्टपञ्चाशत्तमपर्वसमाप्तिः)।

(५९) ८×४+११×११+६२=२१५-१२४=९१(९१-२७×३=१० इति जावादिक्रमे दशमस्य नक्षत्रस्य मूलबर्हण्याः ९१तमेऽंशे गते ऊनषष्टितमपर्वसमाप्तिः)।

(६०) ८×५=४० (४०-२७=१३ इति जावादिक्रमे त्रयोदशस्य नक्षत्रस्य पुनर्वस्वोः ४०तमेऽंशे गते षष्टितमपर्वसमाप्तिः)।

(६१) ८×५+११×१+६२=११३ (११३-२७×४=५ इति जावादिक्रमे पञ्चमस्य नक्षत्रस्य उत्तराषाढानां ११३तमेऽंशे गते एकषष्टितमपर्वसमाप्तिः)।

(६२) ८×५+११×२=६२ (६२-२७×२=८ इति जावादिक्रमे अष्टमस्य नक्षत्रस्य आश्लेषाणां ६२तमेऽंशे गते द्विषष्टितमपर्वसमाप्तिः)।

(६३) ८×५+११×३+६२=१३५-१२४=११ (जावादिक्रमे एकादशस्य नक्षत्रस्य शतभिषजः एकादशेऽंशे गते त्रिषष्टितमपर्वसमाप्तिः)।

(६४) ८×५+११×४=८४ (८४-२७×३=३ इति जावादिक्रमे तृतीयस्य नक्षत्रस्य पूर्वफल्गुन्योः ८४तमेऽंशे गते चतुष्षष्टितमपर्वसमाप्तिः)।

(६५) ८×५+११×५+६२=१५७-१२४=३३ (३३-२७=६ इति जावादिक्रमे षष्ठस्य नक्षत्रस्य उत्तरभद्रपदयोः ३३तमेऽंशे गते पञ्चषष्टितमपर्वसमाप्तिः)।

(६६) ८×५+११×६=१०६ (१०६-२७×३=२५ इति जावादिक्रमे पञ्चविंशस्य नक्षत्रस्य हस्तस्य १०६तमेऽंशे गते षट्षष्टितमपर्वसमाप्तिः)।

(६७) ८×५+११×७+६२=१७९-१२४=५५ (५५-२७×२=१ इति जावादिक्रमे प्रथमस्य नक्षत्रस्य अश्वयुजोः ५५तमेऽंशे गते सप्तषष्टितमपर्वसमाप्तिः)।

(६८) ८×५+११×८=१२८-१२४=४ (जावादिक्रमे चतुर्थस्य नक्षत्रस्य विशाखयोः चतुर्थेऽंशे गते अष्टषष्टितमपर्वसमाप्तिः)।

(६९) ८×५+११×९+६२=२०१-१२४=७७ (७७-२७×२=२३ इति जावादिक्रमे २३तमस्य नक्षत्रस्य कृत्तिकानां ७७तमेऽंशे गते ऊनसप्ततितमपर्वसमाप्तिः)।

(७०) ८×५+११×१०=१५०-१२४=२६ (जावादिक्रमे २६तमस्य नक्षत्रस्य ज्येष्ठायाः २६तमेऽंशे गते सप्ततितमपर्वसमाप्तिः)।

(७१) ८×५+११×११+६२=२२३-१२४=९९ (९९-२७×३=१८ इति जावादिक्रमे अष्टादशस्य नक्षत्रस्य मृगशीर्षस्य ९९तमेऽंशे गते एकसप्ततितमपर्वसमाप्तिः)।

(७२) ८×६=४८ (४८-२७=२१ इति जावादिक्रमे २१तमस्य नक्षत्रस्य पूर्वाषाढानाम् ४८तमेऽंशे गते द्विसप्ततितमपर्वसमाप्तिः)।

(७३) ८×६+११×१+६२=१२१ (१२१-२७×४=१३ इति जावादिक्रमे त्रयोदशस्य नक्षत्रस्य पुनर्वस्वोः १२१तमेऽंशे गते त्रिसप्ततितमपर्वसमाप्तिः)।

(७४) ८×६+११×२=७० (७०-२७×२=१६ इति जावादिक्रमे षोडशस्य नक्षत्रस्य श्रवणस्य ७०तमेऽंशे गते चतुस्सप्ततितमपर्वसमाप्तिः)।

(७५) ८×६+११×३+६२=१४३-१२४=१९ (जावादिक्रमे ऊनविंशस्य नक्षत्रस्य मघानां १९तमेऽंशे गते पञ्चसप्ततितमपर्वसमाप्तिः)।

(७६) ८×६+११×४=९२ (९२-२७×३=११ इति जावादिक्रमे एकादशस्य नक्षत्रस्य शतभिषजः ९२तमेऽंशे गते षट्सप्ततितमपर्वसमाप्तिः)।

(७७) ८×६+११×५+६२=१६५-१२४=४१ (४१-२७=१४ इति जावादिक्रमे चतुर्दशस्य नक्षत्रस्य उत्तरफल्गुन्योः ४१तमेऽंशे गते सप्तसप्ततितमपर्वसमाप्तिः)।

(७८) ८×६+११×६=११४ (११४-२७×४=६ इति जावादिक्रमे षष्ठस्य नक्षत्रस्य उत्तरभद्रपदयोः ११४तमेऽंशे गते अष्टसप्ततितमपर्वसमाप्तिः)।

(७९) ८×६+११×७+६२=१८७-१२४=६३ (६३-२७×२=९ इति जावादिक्रमे नवमस्य नक्षत्रस्य चित्रायाः ६३तमेऽंशे गते ऊनाशीतितमपर्वसमाप्तिः)।

(८०) ८×६+११×८=१३६-१२४=१२ (जावादिक्रमे द्वादशस्य नक्षत्रस्य अपभरणीनां द्वादशेऽंशे गते अशीतितमपर्वसमाप्तिः)।

(८१) ८×६+११×९+६२=२०९-१२४=८५ (८५-२७×३=४ इति जावादिक्रमे चतुर्थस्य नक्षत्रस्य विशाखयोः ८५तमेऽंशे गते एकाशीतितमपर्वसमाप्तिः)।

(८२) ८×६+११×१०=१५८-१२४=३४ (३४-२७=७ इति जावादिक्रमे सप्तमस्य नक्षत्रस्य रोहिण्याः ३४तमेऽंशे गते द्व्यशीतितमपर्वसमाप्तिः)।

(८३) ८×६+११×११+६२=२३१-१२४=१०७ (१०७-२७×३=२६ इति जावादिक्रमे २६तमस्य नक्षत्रस्य ज्येष्ठायाः १०७तमेऽंशे गते त्र्यशीतितमपर्वसमाप्तिः)।

(८४) ८×७=५६ (५६-२७×२=२ इति जावादिक्रमे द्वितीयस्य नक्षत्रस्य आर्द्रायाः ५६तमेऽंशे गते चतुरशीतितमपर्वसमाप्तिः)।

(८५) ८×७+११×१+६२=१२९-१२४=५ (जावादिक्रमे पञ्चस्य नक्षत्रस्य उत्तराषाढानां पञ्चमेऽंशे गते पञ्चाशीतितमपर्वसमाप्तिः)।

(८६) ८×७+११×२=७८ (७८-२७×२=२४ इति जावादिक्रमे २४तमस्य नक्षत्रस्य पुष्यस्य ७८तमेऽंशे गते षडशीतितमपर्वसमाप्तिः)।

(८७) ८×७+११×३+६२=१५१-१२४=२७ (जावादिक्रमे २७तमस्य नक्षत्रस्य श्रविष्ठानां २७तमेऽंशे गते सप्ताशीतितमपर्वसमाप्तिः)।

(८८) ८×७+११×४=१०० (१००-२७×३=१९ इति जावादिक्रमे ऊनविंशस्य नक्षत्रस्य मघानां १००तमेऽंशे गते अष्टाशीतितमपर्वसमाप्तिः)।

(८९) ८×७+११×५+६२=१७३-१२४=४९ (४९-२७=२२ इति जावादिक्रमे २२-तमस्य नक्षत्रस्य पूर्वभद्रपदयोः ४९तमेऽंशे गते ऊनाशीतितमपर्वसमाप्तिः)।

(९०) ८×७+११×६=१२२ (१२२-२७×४=१४ इति जावादिक्रमे चतुर्दशस्य नक्षत्रस्य उत्तरफल्गुन्योः १२२तमेऽंशे गते नवतितमपर्वसमाप्तिः)।

(९१) ८×७+११×७+६२=१९५-१२४=७१ (७१-२७×२=१७ इति जावादिक्रमे सप्तदशस्य नक्षत्रस्य रेवत्याः ७१तमेऽंशे गते एकनवतितमपर्वसमाप्तिः)।

(९२) ८×७+११×८=१४४-१२४=२० (जावादिक्रमे विंशस्य नक्षत्रस्य स्वातेः २०तमेऽंशे गते द्विनवतितमपर्वसमाप्तिः)।

(९३) ८×७+११×९+६२=२१७-१२४=९३ (९३-२७×३=१२ इति जावादिक्रमे द्वादशस्य नक्षत्रस्य अपभरणीनां ९३तमेऽंशे गते त्रिनवतितमपर्वसमाप्तिः)।

(९४) ८×७+११×१०=१६६-१२४=४२ (४२-२७=१५ इति जावादिक्रमे पञ्चदशस्य नक्षत्रस्य अनुराधानां ४२तमेऽंशे गते चतुर्नवतितमपर्वसमाप्तिः)।

(९५) ८×७+११×११+६२=२३९-१२४=११५ (११५-२७×४=७ इति जावादिक्रमे सप्तमस्य नक्षत्रस्य रोहिण्याः ११५तमेऽंशे गते पञ्चनवतितमपर्वसमाप्तिः)।

(९६) ८×८+=६४ (६४-२७×२=१० इति जावादिक्रमे दशमस्य नक्षत्रस्य मूलबर्हण्याः ६४तमेऽंशे गते षण्णवतितमपर्वसमाप्तिः)।

(९७) ८×८+११×१+६२=१३७-१२४=१३ (जावादिक्रमे त्रयोदशस्य नक्षत्रस्य पुनर्वस्वोस् त्रयोदशेऽंशे गते सप्तनवतितमपर्वसमाप्तिः)।

(९८) ८×८+११×२=८६ (८६-२७×३=५ इति जावादिक्रमे पञ्चमस्य नक्षत्रस्य उत्तराषाढानां ८६तमेऽंशे गते अष्टनवतितमपर्वसमाप्तिः)।

(९९) ८×८+११×३+६२=१५९-१२४=३५ (३५-२७=८ इति जावादिक्रमे अष्टमस्य नक्षत्रस्य आश्लेषाणां ३५तमेऽंशे गते ऊनशततमपर्वसमाप्तिः)।

(१००) ८×८+११×४=१०८ (१०८-२७×३=२७ इति जावादिक्रमे २७तमस्य नक्षत्रस्य श्रविष्ठानाम् १०८तमेऽंशे गते शततमपर्वसमाप्तिः)।

(१०१) ८×८+११×५+६२=१८१-१२४=५७ (५७-२७×२=३ इति जावादिक्रमे तृतीयस्य नक्षत्रस्य पूर्वफल्गुन्योः ५७तमेऽंशे गते एकोत्तरशततमपर्वसमाप्तिः)।

(१०२) ८×८+११×६=१३०-१२४=६ (जावादिक्रमे षष्ठस्य नक्षत्रस्य उत्तरभद्रपदयोः षष्ठेऽंशे गते द्व्युत्तरशततमपर्वसमाप्तिः)।

(१०३) ८×८+११×७+६२=२०३-१२४=७९ (७९-२७×२=२५ इति जावादिक्रमे २५तमस्य नक्षत्रस्य हस्तस्य ७९तमेऽंशे गते त्र्युत्तरशततमपर्वसमाप्तिः)।

(१०४) ८×८+११×८=१५२-१२४=२८ (२८-२७=१ इति जावादिक्रमे प्रथमस्य नक्षत्रस्य अश्वयुजोः २८तमेऽंशे गते चतुरुत्तरशततमपर्वसमाप्तिः)।

(१०५) ८×८+११×९+६२=२२५-१२४=१०१ (१०१-२७×३=२० इति जावादिक्रमे विंशस्य नक्षत्रस्य स्वातेः १०१तमेऽंशे गते पञ्चोत्तरशततमपर्वसमाप्तिः)।

(१०६) ८×८+११×१०=१७४-१२४=५० (५०-२७=२३ इति जावादिक्रमे २३तमस्य नक्षत्रस्य कृत्तिकानां ५०तमेऽंशे गते षडुत्तरशततमपर्वसमाप्तिः)।

(१०७) ८×८+११×११+६२=२४७-१२४=१२३ (१२३-२७×४=१५ इति जावादिक्रमे पञ्चदशस्य नक्षत्रस्य अनुराधानां १२३तमेऽंशे गते सप्तोत्तरशततमपर्वसमाप्तिः)।

(१०८) ८×९=७२ (७२-२७×२=१८ इति जावादिक्रमे अष्टादशस्य नक्षत्रस्य मृगशीर्षस्य ७२तमेऽंशे गते अष्टोत्तरशततमपर्वसमाप्तिः)।

(१०९) ८×९+११×१+६२=१४५-१२४=२१ (जावादिक्रमे २१तमस्य नक्षत्रस्य पूर्वाषाढानाम् २१तमेऽंशे गते नवोत्तरशततमपर्वसमाप्तिः)।

(११०) ८×९+११×२=९४ (९४-२७×३=१३ इति जावादिक्रमे त्रयोदशस्य नक्षत्रस्य पुनर्वस्वोः ९४तमेऽंशे गते दशोत्तरशततमपर्वसमाप्तिः)।

(१११) ८×९+११×३+६२=१६७-१२४=४३ (४३-२७=१६ इति जावादिक्रमे षोडशस्य नक्षत्रस्य श्रवणस्य ४३तमेऽंशे गते एकादशोत्तरशततमपर्वसमाप्तिः)।

(११२) ८×९+११×४=११६ (११६-२७×४=८ इति जावादिक्रमे अष्टमस्य नक्षत्रस्य आश्लेषाणां ११६तमेऽंशे गते द्वादशोत्तरशततमपर्वसमाप्तिः)।

(११३) ८×९+११×५+६२=१८९-१२४=६५ (६५-२७×२=११ इति जावादिक्रमे एकादशस्य नक्षत्रस्य शतभिषजः ६५तमेऽंशे गते त्रयोदशोत्तरशततमपर्वसमाप्तिः)।

(११४) ८×९+११×६=१३८-१२४=१४ (जावादिक्रमे चतुर्दशस्य नक्षत्रस्य उत्तरफल्गुन्योः चतुर्दशेऽंशे गते चतुर्दशोत्तरशततमपर्वसमाप्तिः)।

(११५) ८×९+११×७+६२=२११-१२४=८७ (८७-२७×३=६ इति जावादिक्रमे षष्ठस्य नक्षत्रस्य उत्तरभद्रपदयोः ८७तमेऽंशे गते पञ्चदशोत्तरशततमपर्वसमाप्तिः।

(११६) ८×९+११×८=१६०-१२४=३६ (३६-२७=९ इति जावादिक्रमे नवमस्य नक्षत्रस्य चित्रायाः ३६तमेऽंशे गते षोडशोत्तरशततमपर्वसमाप्तिः)।

(११७) ८×९+११×९+६२=२३३-१२४=१०९ (१०९-२७×४=१ इति जावादिक्रमे प्रथमस्य नक्षत्रस्य अश्वयुजोः १०९तमेऽंशे गते सप्तदशोत्तरशततमपर्वसमाप्तिः)।

(११८) ८×९+११×१०=१८२-१२४=५८ (५८-२७×२=४ इति जावादिक्रमे चतुर्थस्य नक्षत्रस्य विशाखयोः ५८तमेऽंशे गते अष्टादशोत्तरशततमपर्वसमाप्तिः)।

(११९) ८×९+११×११+६२=२५५-१२४×२=७ (जावादिक्रमे सप्तमस्य नक्षत्रस्य रोहिण्याः सप्तमेऽंशे गते ऊनविंशत्युत्तरशततमपर्वसमाप्तिः)।

(१२०) ८×१०=८० (८०-२७×२=२६ इति जावादिक्रमे २६तमस्य नक्षत्रस्य ज्येष्ठायाः ८०तमेऽंशे गते विंशत्युत्तरशततमपर्वसमाप्तिः)।

(१२१) ८×१०+११×१+६२=१५३-१२४=२९ (२९-२७=२ इति जावादिक्रमे द्वितीयस्य नक्षत्रस्य आर्द्रायाः २९तमेऽंशे गते एकविंशत्युत्तरशततमपर्वसमाप्तिः)।

(१२२) ८×१०+११×२=१०२ (१०२-२७×३=२१ इति जावादिक्रमे २१तमस्य नक्षत्रस्य पूर्वाषाढानां १०२तमेऽंशे गते द्वाविंशत्युत्तरशततमपर्वसमाप्तिः)।

(१२३) ८×१०+११×३+६२=१७५-१२४=५१ (५१-२७=२४ इति जावादिक्रमे २४तमस्य नक्षत्रस्य पुष्यस्य ५१तमेऽंशे गते त्रयोविंशत्युत्तरशततमपर्वसमाप्तिः)।

(१२४) ८×१०+११×४=१२४ (१२४-२७×४=१६ इति जावादिक्रमे षोडशस्य नक्षत्रस्य श्रवणस्य १२४तमेऽंशे गते चतुर्विंशत्युत्तरशततमपर्वसमाप्तिः)।

[अत्राऽऽधुनिकतिथिनक्षत्रगणितानुसारं विचारे कृते श्रविष्ठादौ शुक्लप्रतिपदादौ च प्रारब्धस्य पञ्चवर्षात्मकस्य युगस्य चतुर्विंशत्युत्तरशतसङ्ख्याकानां पर्वणां समाप्तिः मध्यममानेन युगादिश्रविष्ठातः १८१०तमस्य श्रविष्ठानां नक्षत्रस्य ४३तमेऽंशे भवतीत्यवगम्यत इति च स्मरणीयम्।]

विशेषः— एतस्य श्लोकस्याऽपि शङ्करबालकृष्णदीक्षितेन व्याख्यानं कृतं न दृश्यते। अतस् तत्पूर्वैरप्याधुनिकैरस्य श्लोकस्य व्याख्यानमकृतमेवाऽवगम्यते। सोमाकरभाष्यमप्यस्फुटमेव। पूर्वार्धस्य बार्हस्पत्यव्याख्यानं साधु इति बालगङ्गाधरतिलकः कथयति। अत उत्तरार्धस्य तु बार्हस्पत्यव्याख्यानमप्ययथार्थमेवेत्यवगम्यते। किन्तु सुधाकरेण वृथैव पूर्वार्धस्य बार्हस्पत्यव्याख्यानमनुचितरूपेण खण्डयितुं प्रयासः कृतो दृश्यते। सुधाकरेण सम्पूर्णस्य श्लोकस्य यथार्थमर्थमबुद्ध्वा विशेषत ऊनशब्दस्यार्थमबुद्ध्वा अनेकेषु स्थलेष्वनावश्यकान् पुनरुक्तिकरान् पाठभेदान् प्रकल्प्य "भांशाः *स्युरिष्टकाः* कार्याः पक्षा द्वादशकोद्गताः। एकादश*गुणाश्* चेन्दोः शुक्लेऽर्धं चैन्दवा यदि" इति श्लोकपाठं स्वीकृत्य व्याख्यानस्य प्रयासः कृतो दृश्यते। बार्हस्पत्योऽपि श्लोकोत्तरार्धे आगतस्य ऊनशब्दस्याऽर्थं ज्ञातुं तु नाऽशकदिति तिलकः कथति। उत्तरार्धस्य तिलकस्य व्याख्यानं शोभनम्। किन्तु स ऊनशब्दः पक्षद्वादशकानन्तरमागतानां पक्षाणां बोधक इति मन्यते। अस्माभिस्तु प्रथमपक्षद्वादशकपूर्तिपूर्ववर्तिनां पक्षाणामप्यूनशब्देन ग्रहणमिति स्वीकृत्य सम्पूर्णस्य श्लोकस्य यथार्थं पूर्णं च व्याख्यानं कृतं बोध्यम्। अस्य श्लोकस्य शामशास्त्रिणो व्याख्यानमपि तिलकव्याख्यानानुगाम्येव दृश्यते॥१५॥

हिन्दी– बारह पक्षों के समूह के भांशों के योग से प्राप्त भांश आठ-आठ के समूह में होते हैं (प्रतिपक्ष पक्षान्त में रहनेवाले पूर्ण नक्षत्रातिरिक्त ७३ भांशों के योग से प्रत्येक बारह पक्षों के अन्त में प्राप्त पूर्णनक्षत्रातिरिक्त भांश [७३×१२=८७६÷१२४= $७\frac{८}{१२४}$] ८ होते हैं, अतः प्रत्येक बारह पक्षों के समूहों के लिए आठ-आठ भांश लेना चाहिए)। ऊन पक्ष अर्थात् बारह से न्यूनसङ्ख्या के पक्षों के भांशों के ज्ञान के लिए ऊनपक्षसङ्ख्या को ग्यारह से गुणन करना चाहिए, यदि यह न्यूनसङ्ख्या का पक्ष शुक्लपक्ष है और चन्द्रमा से भुक्त भांश का ज्ञान अपेक्षित है तो उस में नक्षत्र के पूर्ण भांशों का (१२४का) आधा (६२) भी जोडना चाहिए।

उदाहरण— धनिष्ठादि पञ्चवर्षात्मक आदियुग के चौदहवें पक्ष के अन्त में सूर्यचन्द्रभुक्तभांश का ज्ञान आवश्यक हो तो वहां गत पक्षद्वादशक (बारह पक्षों का समूह)१, उस का आठ से गुणन करने पर १×८=८, वहां ऊनपक्ष दो हैं, उन का ग्यारह से गुणन करने पर

२×११=२२, जोडने पर भांश ८+२२=३०, इन्हीं को चौदहवें पक्ष के अन्त में सूर्य और चन्द्र से भुक्त भांश जानना चाहिए। अर्थात् चौदहवें पक्ष के अन्त में सूर्य और चन्द्र किसी नक्षत्र के ३० अंश को पार करेंगे ऐसा इस श्लोक में वर्णित सूत्र से सरलता से जाना जा सकता है। [उस पक्ष के अन्त में नक्षत्र कौन होगा यह तो वक्ष्यमाण रीति (श्लो. १७) से जानना चाहिए। जैसे वहां पर्वभांश ३० हैं, अतः उन को भसमूह (२७) से भाग देने पर $\frac{३०}{२७}=१\frac{३}{२७}$ होगा, अतः जावादि-क्रम में तीसरे स्थान में स्थित पूर्वफल्गुनी नक्षत्र उस पर्वान्त में होगा। अतः पूर्वफल्गुनी नक्षत्र के ३० अंश व्यतीत होने पर पूर्वोक्त चौदहवें पक्ष की समाप्ति होगी ऐसा जानना चाहिए]।

आदियुग के उनतीसवें पक्ष के अन्त में चन्द्रभुक्तभांश का ज्ञान आवश्यक हो तो वहां गत पक्षद्वादशक २, उन का आठ से गुणन करने पर २×८=१६, वहां ऊनपक्ष पांच होने से ५×११=५५, जोडने पर भांश १६+५५=७१, ऊनतीसवां पक्ष शुक्लपक्ष होने से भांशार्ध को जोडने पर ७१+६२=१३३, वहां १२४ सङ्ख्या के घटाने पर १३३-१२४=९, इन्हीं को उनतीसवें पक्ष के अन्त में चन्द्र से भुक्त भांश जानना चाहिए। अर्थात् उनतीसवें पक्ष के अन्त में चन्द्रमा को किसी नक्षत्र के ९ अंश को पार कर के स्थित जानना चाहिए, ऐसा इस सूत्र से अवगत होता है। [उस पक्ष के अन्त में नक्षत्र कौन होगा यह तो वक्ष्यमाण रीति से जानना चाहिए। जैसे वहां पर्वभांश ९ हैं, अतः जावादिक्रम में नौवें स्थान में स्थित चित्रा नक्षत्र उस पर्वान्त में होगा। अतः चित्रा नक्षत्र के ९ अंश व्यतीत होने पर पूर्वोक्त उनतीसवें पक्ष की समाप्ति होगी, ऐसा जानना चाहिए]। इसी प्रकार इष्ट अन्य पक्ष के पर्वभांश को जानना चाहिए। [इस श्लोक में प्रदर्शित सूत्र से लाए गए आदियुग के सम्पूर्ण १२४ पक्षों के पर्वभांश और वक्ष्यमाण प्रकार (श्लो.१७) से ज्ञेय पर्वनक्षत्र की सारणी ऊपर संस्कृत व्याख्या में देखें]।

विशेष – इस श्लोक की भी व्याख्या शङ्कर बालकृष्ण दीक्षित ने नहीं की। अतः तत्पूर्ववर्ती आधुनिक अन्य अध्येताओं से भी यह श्लोक अव्याख्यात ही अवगत होता है। सुधाकर द्विवेदी का व्याख्यान अयथार्थ है। पूर्वार्ध का बार्हस्पत्य का व्याख्यान समीचीन है, यह बात बालगङ्गाधरतिलक ने बताई है। अतः उत्तरार्ध का तो बार्हस्पत्यव्याख्यान भी अयथार्थ ही अवगत होता है। किन्तु सुधाकर ने पूर्वार्ध के बार्हस्पत्यव्याख्यान का भी अनुचित रूप से खण्डन करने का वृथा प्रयास किया है। उसी का सुधाकरशिष्य मुरलीधर झा ने भी समर्थन करने की चेष्टा की है। सुधाकर ने सम्पूर्ण श्लोक के यथार्थ अर्थ को न समझ कर विशेषतः 'ऊन' शब्द के अर्थ को न समझ कर अनेक स्थलों में अनावश्यक और पुनरुक्तिकर पाठभेदों की कल्पना करके श्लोकपाठ को *"भांशाः स्युरिष्टकाः कार्याः पक्षा द्वादशकोद्गताः। एकादशगुणाश् चेन्दोः शुक्लेऽर्धं चैन्दवा यदि"* इस प्रकार का बनाकर व्याख्या की है। पुनरुक्तिदोष से भी दूषित सुधाकरकल्पित इस पाठ की आलोचना बालगङ्गाधर तिलक ने भी की है। बार्हस्पत्य से भी श्लोक के उत्तरार्ध में आगत 'ऊन' शब्द का अर्थ उद्घाटित नहीं हो सका था, यह बात भी तिलक ने कही है। उत्तरार्ध का तिलक का व्याख्यान समीचीन है। किन्तु तिलक ने ऊनशब्द को पक्षद्वादशक के अनन्तर आए हुए बारह से निःशेष भाग न जानेवाले सङ्ख्या के पक्षों का बोधक माना है। हमने तो प्रथम

पक्षद्वादशकपूर्ति के पूर्ववर्ती पक्षों का भी ऊनशब्द से ग्रहण है, इस बात को मान कर सम्पूर्ण श्लोक का यथार्थ और पूर्ण व्याख्यान किया है। इस श्लोक का शामशास्त्री और तदनुयायी सत्यप्रकाश का व्याख्यान भी तिलक के व्याख्यान का अनुगामी ही है॥१५॥

[पर्वभांशानां स्थितावन्यो विशेषः]

नवकैरुद्गतोऽंशः स्यादूनः सप्तगुणो भवेत्।
आवापस् त्वयुजेऽर्धं स्यात् पौलस्त्येऽस्तङ्गतेऽपरम्॥१६॥

(सोमाकरभाष्यम्)

नवकैरुद्गतोऽंशः स्यादिति। स पर्वांशः पक्षयोरर्धमासयोर् नवकैरुद्गतोऽंशः स्यान् नव नाडिका ९ इत्यर्थः। ऊनः सप्तगुणः सप्त नाडिका ७ इत्यर्थः। आवापस् त्वयुजे द्वौ स्यात्। यदि स ऋक्षो द्वावंशौ भवेत् तदा त्वयुजे प्रथमश्रावणे विकारः स्यात् "कला एकान्नविंशतिः"(श्लो.१९) वक्ष्यमाणस् तत्रादौ कुर्यात्। कालापेक्षया तथा परमंशं द्वितीयं पौलस्त्ये "पुरस्ताच् चन्द्रमा अभ्युदियाद" इति श्रुतेः। पौलस्त्ये चन्द्रमस्यस्तङ्गते द्वितीयमंशं कल्पयेद् दर्श इति वाक्यार्थशेषः। प्रथम उपवसनीये यजनीय इत्यर्थः। एवमत्र॥१६॥

(कौण्डिन्न्यायनव्याख्यानम्)

पर्वभांशविषयेऽन्यां वस्तुस्थितिं प्रसङ्गात् प्रतिपादयति शास्त्रकारः— नवकैरुद्गतोंशः स्यादित्यादिना।

पर्वान्तेषु भांशो नवकैरुपलक्षितश् चेत् तत्र नक्षत्रमपि नवकैरुद्गतं भवति। यत्र भांशा नवकैरुद्गता दृश्यन्ते, तत्र नक्षत्रमपि जावादिश्लोके नवमम्, अष्टादशम्, सप्तविंशं वा भवतीत्यर्थः। तृतीय-पक्षद्वादशकानन्तरमूनचत्वारिंशोनपञ्चाशादिषु ऊनपर्वान्तेषु तु भांशः सप्तगुणः (सप्तभिर् निश्शेषतया विभाज्यः) स्यादित्यर्थः। उदाहरणं यथा आदियुगे पञ्चमे पर्वणि भांशाः ११७ (९×१३) दृश्यन्ते, तत्र ते च चित्रानक्षत्रस्य भांशाः, तच्च नक्षत्रं जावादिश्लोके नवममस्ति। ऊनचत्वारिंशे पर्वान्ते स्थिता भांशाः ११९ सन्ति, ते च सप्तभिर् निश्शेषतया विभज्यन्ते। एवमूनपञ्चाशादिषु पर्वस्वपि बोध्यम्। भांशगणितशुद्धिपरीक्षणमात्रोपयोगीदं वचनमवगम्यते। पक्षान्ते ७३ भांशा अतिरिच्यन्ते इति सामान्यतया विषमे पक्षे (शुक्ले पक्षे) पूर्वपक्षान्तादर्धं नक्षत्रमतिरिक्ततया ($\frac{६२}{१२४}=\frac{१}{२}$) वर्धते, चन्द्रे सूर्यसान्निध्याददृश्यतां गते दर्शान्ते पक्षे सामान्यतया ततोऽन्यन् नक्षत्रार्धमतिरिक्ततया वर्धते इत्युत्तरार्धार्थः।

विशेषः— अस्य श्लोकस्य सोमाकरभाष्यमस्फुटम्। शङ्करबालकृष्ण-दीक्षितेन त्वयं श्लोको न व्याख्यातः। अतस् तत्पूर्ववर्तिभिराधुनिकैरप्यव्याख्यात एवाऽवगम्यते। बार्हस्पत्य-सुधाकर-शामशास्त्रिणां व्याख्यानानि च युक्तियुक्तानि नाऽवगम्यन्ते। ऋग्वेदिनां पाठे त्वयं श्लोको भिन्नरूपो दृश्यते॥१६॥

हिन्दी – जिस पर्वान्त में भांश नौ से उद्गत (नौ से निश्शेष रूप में विभाज्य) होता है उस भांश का नक्षत्र भी नौ से निश्शेष रूप में विभाज्य होता है, अर्थात् वहां जावादि श्लोक में ९,१८,२७ इन स्थानों में स्थित नक्षत्र होता है; पहले तीन पक्षद्वादशक के आगे के उनचालीसवां उनचासवां इत्यादि पर्वान्तों में स्थित भांश सात गुने (सात के गुणनफलरूप में स्थित अथवा सात से निश्शेष रूप में विभाज्य) होते हैं। (पर्वभांशसारणी में ३९,४९,५९,६९,७९,८९,९९, १०९, ११९ पर्वान्तों के भांशों को देखें।) विषम पक्ष में आधा नक्षत्र प्रक्षेप्य होता है (आधा नक्षत्र बढता है) और चन्द्र अस्त होने पर (सूर्यसमीपस्थ होकर चन्द्र अदृश्य होने पर) अर्थात् अमावास्यान्त पक्ष में दूसरा आधा नक्षत्र प्रक्षेप्य होता है (दूसरा आधा नक्षत्र बढता है) ॥१६॥

[भांशमूलकपर्वनक्षत्रज्ञानोपायादिकम्]

जावाद्यंशैः समं विद्यात् पूर्वार्धे पर्वसूत्तराः।
भादानं स्याच् चतुर्दश्यां द्विभागेभ्योऽधिको यदि॥१७॥

(सोमाकरभाष्यम्)

जावाद्यंशैः समं विद्यादिति। वक्ष्यमाणं जावादिकमृक्षमंशैरवयवैः समं विद्यात्। एतदुक्तं भवति। यमृक्षं चोदयिष्यति जौ-द्रा-ग इत्येवं समं विद्याज् जानीयात्। तदा येनाक्षरेण तद्देवताकेन वा चोदितस् तस्य तावन्तोऽंशा भवन्ति। जावित्याश्वयुजे चत्वारः। द्रा इति द्वौ तदुत्तरस्मिन् निर्देशे वक्ष्यामः। तेषां पूर्वार्धे पर्वसु उत्तरा अंशाः कार्याः। औपवसथादौ यदा तैः पञ्चदशी समग्रा व्याप्यते तदा भादानं स्याच् चतुर्दश्यां तदा तस्याः पूर्वं चतुर्दशीशेषे न्यसेत्। कदैतत्? द्विभागेभ्योऽधिको यदि। यदि स ऋक्षस् त्र्यंशश् चतुरंशो वा भवेत्। एतदेवाऽभिप्रेत्यैकादशीगणना राका कुहूः इत्यादीनां ज्योतिर्विद्भिः कल्पिता।

तथा च परिशिष्टकृत्–

अर्धं चतुर्दशी यत्र परे पञ्चदशी यदि।
चतुर्दश्यवसाने तु पितृयज्ञं तु कारयेत्॥ इति।

तथा च गर्गः–

चतुर्दश्यां यदा कृष्णे क्षयमभ्येति चन्द्रमाः।
दृश्यो भवति वाऽप्युच्चैः सिनीवाली ततस् तदा॥ इति।

अमावास्यामदृष्टेऽपि सोमे प्राधान्यकारणात्।
केचिदिच्छन्ति दृष्टेऽपि केचित् तेन गताध्वनि॥
निश्युद्गतोऽथवाऽप्युच्चैरस्तं वाऽप्युपगच्छति।
तदा पूर्वेऽप्यृतौ ह्येतत् कार्यं चन्द्रवशाद् भवेत्॥ इति।

एतत् सर्वं सूत्रकारापेक्षमेकाङ्गवैकल्यापेक्षं चोत्तरत्र ह्रासदर्शनं **"पूर्वां पौर्णमासीमुत्तरां वोपवसेद्"** (कात्यायनश्रौतसूत्रे २।१।१) इत्यादि। एतेन ज्ञायते चतुर्दशी-पञ्चदश्यौ **"या पूर्णमासी साऽनुमतिः"** ("या पूर्वा पौर्णमासी साऽनुमतिः" ऐतरेयिब्रा. ७।११, निरुक्ते उत्तरषट्के ५।२९) इत्यादौ विवक्षिते न पञ्चदशीप्रतिपदौ। एवं तु दाक्षायणयज्ञसिद्धिः। एवं च पूर्वं कृत्वा उत्तरां सचोदितां सप्रतिपत्त्या प्रतिपदादौ यागः। तदतिक्रमे कालस्य **"आग्नेयमेवाग्नये पथिकृते कुर्याद्"** इति चोदना। पूर्वापरार्धे चाभ्युदिते चाभ्युदितेष्टिरिति। एवमेतत् सुविदितं कृत्वोपवसथादि स्वकाले कार्यम्। पूर्वां पौर्णमासीमुपवसेदिति यथा चोदितम्। अन्यथा तु दोषः। यथाह श्रुतिः– **"तेऽसुरा अयज्ञा अदक्षिणा अनक्षत्राः (यत् किं चाऽकुर्वत तां कृत्यामेवाऽकुर्वत)"** (काठक-संहितायाम् ३७।१२) **"(यस्याऽग्निहोत्रम्) अदर्शमपौर्णमास(मचातुर्मास्य)मना-ग्रयणमतिथिवर्जितं च। अहुतमवैश्वदेवमविधिना हुतमा सप्तमाँस् तस्य लोकान् हिनस्ति"** (मुण्डकोपनिषदि १।२।३) इति। तस्मादुभयसम्भवे ये चतुर्दशीमुपवसन्ति ते निष्फलमेवात्मना यागं कृत्वा प्रजानां महान्तं दोषं जनयन्ति।

यथाह स्मृतिः–

दुरिष्टैर् दुरधीतैश् च दुराचारैर् दुरागमैः।
विप्राणां कर्मदोषैस् तैः प्रजानां जायते भयम्॥ इति।

तस्मादुभयकालसंरक्षणायेदं ज्योतिःशास्त्रं महर्षिणा आम्नातम् ॥१७॥

(कौण्डिन्न्यायनव्याख्यानम्)

जौद्रेत्यादिना पर्वनक्षत्राणि प्रतिपादयिष्यन् शास्त्रकारः पर्वभांशानुसारं पर्वनक्षत्रं तत्क्रमादिकं ज्ञेयमित्यादिकं प्रतिपादयति– जावाद्यंशैरित्यादिना।

पर्वसु स्थितं जौ इत्यादिना सूचितं नक्षत्रजातं पर्वविशेषपरिच्छेदकैर् नक्षत्र-विशेषाऽंशैः समं जानीयात्। यस्य नक्षत्रस्य प्रथमेनाऽंशेनाऽऽदियुगस्य १२४ पर्वसु मध्ये किमपि पर्व परिच्छिन्नं भवति तन् नक्षत्रं जौ इति प्रथमस्थाने पठितम्, यस्य नक्षत्रस्य द्वितीयांशेन किमपि पर्व परिच्छिन्नं भवति तन् नक्षत्रं द्रा इति द्वितीयस्थाने पठितम् इत्यादि दर्शपूर्णमासयाजी बुधो जानीयादित्यर्थः। एवं च यदि किञ्चित् पर्व प्रथमेन भांशेन परिच्छिन्नं स्यात् तदा तस्मिन् पर्वणि जावादिक्रमे प्रथमस्थाने पठितं नक्षत्रं पर्वनक्षत्रं स्यात्, पर्वविशेषभांशेषु भसमूहेन (२७ सङ्ख्यया) तष्टेषु

यदि एकमवशिष्टं भवति तदाऽपि तस्मिन् पर्वविशेषेऽपि जावादिक्रमे प्रथमस्थाने स्थितं नक्षत्रमेव पर्वनक्षत्रं स्यादिति बुधो जानीयात्।

"भांशाः स्युरष्टकाः कार्याः" इत्यादिश्लोकोक्तेन सूत्रेण प्रथमे पर्वणि भांशाः (११×१+६२=) ७३ भवन्ति इति ज्ञायते। तत्र ७३ अंशेषु भसमूहेन (२७ सङ्ख्यया) तष्टेषु ७३-२७=४६-२७=१९ इति भवतीति आदियुगस्य प्रथमस्य पर्वणो नक्षत्रं जावादिक्रमे ऊनविंशे स्थाने स्थितं मघा नक्षत्रमिति ज्ञातव्यम्। एवं द्वितीये पर्वणि पूर्वोक्तेनैव प्रकारेण (११×२=) २२ भांशाः भवन्तीति ज्ञायत इति जावादिक्रमे द्वाविंशे स्थाने स्थितम् (अ)जः इति सूचितं पूर्वभद्रपदे नक्षत्रं द्वितीयस्य पर्वणो नक्षत्रमिति ज्ञातव्यमिति दिक्।

आदियुगस्य १७शे पर्वणि अश्वयुजोः प्रथमेऽंशे, ३४तमे पर्वणि आर्द्राया द्वितीयेऽंशे, ५१तमे पर्वणि पूर्वफल्गुन्योस् तृतीयेऽंशे, ६८तमे पर्वणि विशाखयोश् चतुर्थेऽंशे, ८५तमे पर्वणि उत्तराषाढानां पञ्चमेऽंशे, १०२तमे पर्वणि उत्तरभद्रपदयोः षष्ठेऽंशे, ११९तमे पर्वणि रोहिण्याः सप्तमेऽंशे, १२शे पर्वणि आश्लेषाणामष्टमेऽंशे, २९तमे पर्वणि चित्राया नवमेऽंशे, ४६तमे पर्वणि मूलबर्हण्या दशमेऽंशे, ६३तमे पर्वणि शतभिषज एकादशेऽंशे, ८०तमे पर्वणि अपभरणीनां द्वादशेऽंशे, ९७तमे पर्वणि पुनर्वस्वोस् त्रयोदशेऽंशे, ११४तमे पर्वणि उत्तरफल्गुन्योश् चतुर्दशेऽंशे, ७मे पर्वणि अनुराधानां पञ्चदशेऽंशे, २४शे पर्वणि श्रवणस्य षोडशेऽंशे, ४१तमे पर्वणि रेवत्याः सप्तदशेऽंशे, ५८तमे पर्वणि मृगशीर्षस्याऽष्टादशेऽंशे, ७५तमे पर्वणि मघा-नामेकोनविंशेऽंशे, ९२तमे पर्वणि स्वातेर् विंशेऽंशे, १०९तमे पर्वणि पूर्वाषाढा-नामेकविंशेऽंशे, २तीये पर्वणि पूर्वभद्रपदयोर् द्वाविंशेऽंशे, १९तमे पर्वणि कृत्तिकानां त्रयोविंशेऽंशे, ३६तमे पर्वणि पुष्यस्य चतुर्विंशेऽंशे, ५३तमे पर्वणि हस्तस्य पञ्चविंशेऽंशे, ७०तमे पर्वणि ज्येष्ठायाः षड्विंशेऽंशे, ८७तमे पर्वणि श्रविष्ठानां सप्तविंशेऽंशे गते पर्वसमाप्तिर् भवतीति सारणीतो गणिताच् च ज्ञेयम्।

पर्वसु सावनदिनपूर्वार्धे स्थितेषु तस्मिन् सावनदिने उत्तरास् तिथीर् विद्यात्। एतदेव पञ्चसिद्धान्तिकायां द्वादशाध्याये पैतामहसिद्धान्तेऽपि "प्रागर्धे पर्व यदा तदोत्तराऽतोऽन्यथा तिथिः पूर्वा" इति प्रतिपादितं दृश्यते।

पर्वदिनेषु यदि चतुर्दश्यां प्रारब्धानां भानां कालः सावनदिनद्विभागेभ्यो-ऽधिको भवति तर्हि चतुर्दश्यां तेषां भानामदानं स्यात्, तेषां भानां पर्वदिनभत्वेनैव गणना स्यात्; ततश् च चतुर्दशीपूर्वार्धे स्थितस्य त्रयोदश्यां प्रारब्धस्य भस्यैव चतुर्दशीभत्वेनाऽपि गणना स्यादित्यर्थः। उदाहरणं यथा— आदियुगस्य तृतीये पक्षे

चतुर्दश्यां वक्ष्यमाणेन "तिथिमेकादशाभ्यस्ताम्" (श्लो. २०) इत्यादिकेन करणसूत्रेण [१४×११+२२=१७६, १७६÷२७=६$\frac{१४}{२७}$ इति जावादिक्रमे चतुर्दशे स्थाने स्थितम्] उत्तरफल्गुन्यौ नक्षत्रमादिश्यते, तस्य भस्य च चतुर्दशीदिने तिथिभादानिकाः कलाश् च वक्ष्यमाणेन "याः पर्वभादानकलाः" (श्लो. २१) इत्यादिकेन करणसूत्रेण [पर्वभादानकलाश् च "ऊनस्थाने तु सप्ततिम्" इति (श्लो.१९) करणसूत्रानुसारम् १०५×२-७=२१०-७=२०३+सप्तगुणतिथिश् च १४×७=९८, तयोर् योगे] ३०१ भवन्ति, एवं च चतुर्दशीदिने ३०१ सावनदिनकलासु व्यतीतासु प्रविष्टं उत्तरफल्गुन्यौ नक्षत्रं च पर्वदिने (पञ्चशीदिने) च ३०८ सावनदिनकलापर्यन्तं तिष्ठति। एवं च तस्य नक्षत्रस्य पर्वदिने सावनदिनकलार्धाद् (६०३÷२=३०१$\frac{१}{२}$) अधिकः कालो भवति। अतस् तस्य नक्षत्रस्य चतुर्दश्यै अदानं भवति, तस्माच् चतुर्दशीदिने पूर्वार्धे स्थितस्य (त्रयोदश्यां प्रारब्धस्य) पूर्वफल्गुन्योर् नक्षत्रस्य चतुर्दशीनक्षत्रत्वेन गणना भवति। उत्तफल्गुन्यौ नक्षत्रं तु पञ्चदशीनक्षत्रत्वेनैव गणनीयं भवतीति।

विशेषः— एतस्य श्लोकस्य सोमाकरव्याख्यानं स्फुटं नाऽस्ति। शङ्कर-बालकृष्णदीक्षितेनाऽस्य श्लोकस्य व्याख्यानं कृतं न दृश्यते। अतस् तत्पूर्ववर्तिभि-राधुनिकैरप्येतस्य श्लोकस्य व्याख्यानमकृतमेवाऽवगम्यते। जावाद्यंशैः समं विद्यात् इत्यंशस्य व्याख्यानं बार्हस्पत्य-सुधाकराभ्यां साधु कृतमवगम्यते। अन्यस्यांशस्य तु तयोर् व्याख्यानं यथार्थं नाऽवलोक्यते। बालगङ्गाधरतिलकेनाऽस्य पद्यस्य विषये विचारो न कृतः। अस्य श्लोकस्य शामशास्त्रिणो व्याख्यानमप्ययथार्थमेव। अस्मा-भिस् तु सम्पूर्णस्य श्लोकस्य वस्तुस्थित्यनुकूलं व्याख्यानं कृतं बोध्यम् ॥१७॥

हिन्दी– पर्वकालों में स्थित जावादि क्रमबद्ध नक्षत्रों को पर्वभांशतुल्य जाने। (यदि कोई पर्व किसी नक्षत्र के प्रथम अंश से परिच्छिन्न होता है तो उस नक्षत्र को जावादिक्रम में प्रथमस्थान में, कोई पर्व किसी नक्षत्र के द्वितीय अंश से परिच्छिन्न होता है तो उस नक्षत्र को द्वितीय स्थान में स्थित जाने)। पर्वसमाप्तिकाल सावनदिवस के पूर्वार्ध में रहने पर उस सावन दिन में उत्तरार्ध की तिथियों को ही ग्राह्य जाने। यदि पर्वदिनों में चतुर्दशी में प्रारब्ध नक्षत्रों का काल सावन दिन की कलाओं के आधे से अधिक हो तो, उस नक्षत्र का चतुर्दशी में अदान होगा, अर्थात् उस नक्षत्र का पर्वदिन के नक्षत्र के रूप में ही गणना होगी और चतुर्दशी के पूर्वार्ध में स्थित तथा त्रयोदशी में प्रारब्ध नक्षत्र का ही चतुर्दशी के नक्षत्र के रूप में गणना होगी।

विशेष– शङ्करबालकृष्ण दीक्षित ने इस श्लोक की व्याख्या नहीं की। 'जावाद्यंशैः समं विद्यात्' इस अंश का बार्हस्पत्य और सुधाकर का व्याख्यान ठीक लगता है। अन्य अंश का तो उन का व्याख्यान यथार्थ नहीं दीखता है। बालगङ्गाधर तिलक ने इस पद्य

के विषय में विचार नहीं किया है। इस श्लोक का शामशास्त्री का व्याख्यान भी अयथार्थ ही है। हम ने तो सम्पूर्ण श्लोक का वस्तुस्थित्यनुकूल व्याख्यान किया है॥१७॥

[जावादिनक्षत्रव्यवस्था]

१जौ २द्रा ३गः ४खे ५श्वे ६ही ७रो ८षाश्
९चिन् १०मू ११षक् १२ण्यः १३सू १४मा १५धा १६णः।
१७रे १८मृ(म्रे) १९घाः २०स्वा २१पो २२जः २३कृ २४ष्यो
२५ह २६ज्ये २७ष्ठा इत्यृक्षा लिङ्गैः॥१८॥

(सोमाकरभाष्यम्)

तत्र पञ्चानामपि वर्षाणां मासद्वयचोदनायामेकमेकमृक्षं चतुर्भिरन्तरान्तरा वर्त्तमानैः सहितं निदर्शयति युगपदस्य सकृदेव। तद् यथा-- जौ द्रा गः खे श्वे इति। सप्तविंशतिभिरक्षरैर् नामदेवतावयवभूतैर् नक्षत्राणि, तेषामवयवाः, **तेषां क्रमः, तस्य च कालव्यवस्था, तथा तिथेः, ऋतोः, नक्षत्रस्य, युगस्य चाऽधिमाससम्भवस्य, उत्तरनक्षत्राणाम्, वर्षस्य मानान्येतानि दश वस्तूनि चोदितानि भवन्तीति वाक्यशेषः।** तेषां सङ्ख्याद्योतनार्थं स्थाननियमार्थं चैवं निर्देशः। यस्य पादाक्षरं यत्सङ्ख्याकं प्रतिपदादौ भवति पूर्वं पञ्चदश्यन्ते यदि द्वौ तदोभौ विभज्यौ। यथा द्व्यंशमार्द्रा द्रेति चोदितम्। एवं सर्वाणि द्व्यक्षरचोदितानि। त्र्यक्षराणां तु चोदिताक्षरनिर्दिष्टोंऽशः प्रतिपदादौ स यदि द्वितीयस् तदाऽऽद्यः पञ्चदश्यन्ते द्वावुत्तरे। यथा षेति चोदिते आश्लेषा, तृतीये तु चोदितौ द्वौ पूर्वमुत्तरः प्रतिपदि यथा ण्य इति भरणी। यदि चतुरंशस् तदा चोदितोंऽशः प्रतिपदादौ त्रयः पूर्वम्। यथा जावित्यश्वयुजोपलक्षिताश्विनीति। एतदर्थं **"भादानं स्याच् चतुर्दश्याम्"** इत्युक्तम्। **"पूर्वार्धे पर्वसूत्तराः"** इति वचनात्। सङ्ख्याक्षरचोदितानां पूर्वाक्षरचोदितानां तु प्रथमोंऽशः पञ्चदश्यन्ते शिष्टाः प्रतिपदि यावन्तो भवेयुः। यथा रो इति रोहिणी एवमन्येषां सर्वेषाम्। अथवा सैव प्रतिपदादौ चोदिता रो इत्यादिको भवेत् तदा तु न नववासः पञ्चदश्यन्ते **"नवकैरुद्गतोऽंशः"** इति विधानात्। अथैषा चोदना। अथवा दर्शप्रधाना चैव वा। तेषां तत्र पूर्वाक्षरचोदितापेक्षया च। एवं जावित्यश्विन्यन्तेन निर्देशं पर्व तदैषामपि देवतोपलक्षितानां तयोपलक्षित आश्वयुज्यादौ यागकालस् तस्मिन् सत्यपि वा। ततः प्रभृति पञ्चवर्षाणि सैव व्यवस्था कर्तुं यावत्। तत्र तु अष्टात्रिंशं शतं पर्वराशिर् भवति। ततोऽर्धभागेनैकोनसप्ततिः ६९ पूर्वं पूर्णान्तात् पृष्ठे विहाय पर्वोत्तरमेकोनसप्ततिः ६९ अन्या नाडिका यागकालः। एवमेषां चतुरंशानां व्यवस्था। एषैव तदुत्तराणां चतुर्णामन्येषां पर्वणां व्यवस्थेत्येके आहुः। यस्मादेतदर्थमेवान्यानि चत्वारि नक्षत्राण्यन्तरा नोक्तानि। अन्ये त्वाहुर् यस्मात् पञ्चानामपि पर्वणामेकेनैव प्रयत्नेन सकृदेव व्यवस्थाप्यते। एकेनैवर्क्षपर्वसङ्ग्रहेण। तस्माद् यस्य या व्यवस्था साङ्गतया मुख्ययाऽऽवृत्त्या स्वचोदिते पर्वणि भवत्यन्यत्र तु

गौणी। तस्मात् पर्वर्क्षचोदिता व्यवस्थेत्यन्येषां व्यवस्थामाहुः। एवमुत्तरेषामपि अन्तर्क्षाधिमासे कृत्तिकानां नियतग्रहणं यतस् तयोपलक्षितः कार्तिकः। कालचोदनायामनिर्दिष्टानां भरण्यादीनामपरपक्षपञ्चदशीषु कालावाप्तिस् तृतीया एवमन्येषाम्। एवमेतेनैवैकेन निर्देशेन पञ्च वर्षाणि गम्यन्ते। द्रेत्यार्द्रा द्वावंशौ मार्गशीर्ष्यामुक्तप्रायमन्यत्। ग इति भगदेवतोपलक्षिता पूर्वा फाल्गुनी तस्या द्वंशौ उक्ता व्यवस्था सा तु फाल्गुन्याम्। खे इति विशाखा त्रयोऽंशा वैशाख्यामुक्ता व्यवस्था। श्वे इति विश्वेदेवास् तदुपलक्षितोत्तराषाढी तस्यां चन्द्रगत्यपेक्षयांशकल्पनाश् चत्वारो द्वौ वा। एवमेव हिरित्यहिर्बुध्न्योपलक्षिता प्रोष्ठपदा। रो इति रोहिणी त्र्यंशा। द्वितीये वर्षे ततः पञ्च पर्वाण्यतिक्रम्याऽधिकमासकल्पनार्थे कालव्यत्यासः सा कार्तिक्याम्। षा इत्याश्लेषास् त्र्यंशा इत्येव। चिदिति चित्रा तथा चैत्र्यां द्वौ। मू इति मूले द्वौ। षक् इति शतभिषक् चतुरंशाः। ण्य इति भरणी त्रयोऽंशाः। (ज्यैष्ठ्यां तृतीयवर्षादिः)। सू इति पुनर्वसू चतुरंशोऽधिकमासापेक्षा। मेत्यर्यमोपलक्षितोत्तरा फाल्गुनी त्र्यंशाः। तथैव धेत्यनुराधा चतुरंशकल्पना। ण इति श्रवणं त्र्यंशम्। तथैव रे इति रेवती चतुर्थे संवत्सरे (प्रथम)त्र्यंशाः। मृ इति मृगशिरश् चतुरंशं तथैव। घेति मघा द्व्यंशं तथैव। स्वेति स्वाती तथैव। आपः पूर्वाषाढा तथैव। अज इति पूर्वप्रोष्ठपदा द्व्यंशं चतुरंशं वा। कृ इति कृत्तिका पञ्चमवर्षे त्र्यंशम्। ष्येति तिष्यं द्व्यंशम्। तथैव ह इति हस्तं द्व्यंशम्। ज्ये इति ज्येष्ठा तथैव (ज्यैष्ठ्यां) मासापेक्षया नियमः। ष्ठा इति धनिष्ठा श्रावण्यन्ते त्र्यंशम्। एवमेभिः स्मर्यमाणैर् ऋक्षैर् यागकालः प्रकल्प्यः। एवमेव त्वृक्षं चन्द्रगत्यपेक्षया। अथवैतत् तु ऋक्षं चोदनायामुत्तरोत्तरं षष्टिसङ्ख्याक्रमेणोदाहृता। आर्द्रा पौनःपुन्येन षष्टितमा स्यात्। गेति तस्मात् खे इति एवं सर्वे तस्मात् तयैव सङ्ख्यया पर्व ततस् ततोऽपि प्रकल्प्याः। एवं तु द्विमासान्तरचोदनाय पूर्वर्क्षचोदनायैव व्यवस्था। पौषमाघमासयोर् यथादौ यतः पञ्चानामृतवस् त्र्यंशात् पर्वर्क्षाश् च सप्तविंशतिः। तस्मादर्धपञ्चमभकल्पनयैव सर्वे प्रत्येतव्याः। तस्मादेवं सर्व एव प्रवक्ष्यतेऽस्य मासोपलक्षकाश्चाऽपि भरण्याद्याः। तस्मादेव कालसाम्यम्। एवमेतेषाम्॥१८॥

(कौण्डिन्न्यायनव्याख्यानम्)

पर्वपरिच्छेदादिज्ञानायोपयोक्तुं क्रमविशेषबद्धतया नक्षत्राणि सङ्केतविशेषैः प्रतिपादयति शास्त्रकारो जौ द्रा गः खे **इत्यादिना।**

१.जौ =अश्वयुजौ, २.द्रा=आर्द्रा, ३.गः=भगः=पूर्वफल्गुन्यौ, ४.खे=विशाखे, ५.श्वे=विश्वेदेवाः=उत्तराषाढाः, ६.हिः=अहिर्बुध्न्यः=उत्तरभद्रपदे, ७.रो=रोहिणी, ८.षाः=आश्लेषाः, ९.चित्=चित्त्रा, १०.मू=मूलबर्हणी, ११.षक्=शतभिषक्, १२.ण्यः=अपभरण्यः, १३.सू=पुनर्वसू, १४.मा=अर्यमा=उत्तरफल्गुन्यौ, १५.धाः=अनुराधाः, १६.णः=श्रवणः, १७.रे=रेवती, १८.मृ(म्रे)= मृगशीर्षम्, १९.घाः=मघाः, २०.स्वा=स्वातिः, २१.पः=आपः=पूर्वाषाढाः, २२.जः= अज

एकपात्=पूर्वभद्रपदे, २३.कृ=कृत्तिकाः, २४.ष्यः=पुष्यः(तिष्यः), २५.ह=हस्तः, २६.ज्ये=ज्येष्ठा, २७.ष्ठाः=श्रविष्ठाः (धनिष्ठाः) इति नक्षत्राणि सङ्केतैरुक्तानीत्यर्थः।

अत्र नक्षत्रनामाक्षरविशेषग्रहणेन दश वस्तूनि सूचितानि भवन्तीति सोमाकर आह। तत् स्पष्टतया नाऽवगम्यते। तत् तस्यैव भाष्ये द्रष्टव्यम्।

यस्य नक्षत्रस्य प्रथमेऽंशे गते आदियुगे कदाचित् पर्वसमाप्तिर् भवति तन् नक्षत्रं प्रथमे स्थाने, यस्य नक्षत्रस्य द्वितीयेऽंशे गते कदाचित् पर्वसमाप्तिर् भवति तन् नक्षत्रं द्वितीये स्थाने इत्येवं प्रकारेणाऽत्र क्रमो निर्धारितो दृश्यते। एवं च यस्य नक्षत्रस्य पर्वान्ते गतेष्वंशेषु सप्तविंशत्या हृतेषु एकं शिष्यते तन् नक्षत्रं प्रथमे स्थाने, द्वे शिष्येते तद् द्वितीये स्थाने इत्येवं प्रकारेण नक्षत्राणां क्रमो निर्धारित इत्यपि पूर्वश्लोकव्याख्यायामुक्तमेव। अस्य क्रमस्य तिथिविशेषे चन्द्रनक्षत्रस्य ज्ञानायाऽप्युपयोगो भवति (श्लो. २०)।

जावादिनक्षत्रक्रमः पञ्चवर्षात्मकस्य युगस्य सूर्यनक्षत्रांशमनुसृत्य व्यवस्थापितोऽवगम्यत इति शङ्करबालकृष्णदीक्षितः प्रतिपादयति। एकस्मिन् युगे १२४ पर्वाणि भवन्ति, तस्मादेकस्य नक्षत्रस्याऽपि १२४ अंशाः स्वीक्रियन्ते। एकस्मिन् युगे १८६० तिथयो भवन्ति, सूर्यश् च २७ नक्षत्राणां ५ परिक्रमान् करोति। तस्मात् सूर्यः एकस्यां तिथौ एकस्य नक्षत्रस्य ($२७\times\frac{५}{१८६०}=\frac{९}{१२४}$) ९अंशाँश् चरति। तस्माद् आदियुगप्रारम्भे श्रविष्ठादौ स्थितः सूर्यस् तस्य युगस्य प्रथमस्य पर्वणोऽन्ते $\frac{९\times१५}{१२४}=\frac{१३५}{१२४}=१\frac{११}{१२४}$ नक्षत्रांशाँश् चरति, अर्थात् श्रविष्ठानां सर्वान् १२४ अंशाँश् चरित्वा शतभिषजः ११ अंशाँश् चरति। तस्माज् जावादिश्लोके शतभिषक् एकादशे स्थाने वर्तते। एवं द्वितीयस्य पर्वणोऽन्ते सूर्यः $\frac{९\times१५\times२}{१२४}=\frac{२७०}{१२४}=२\frac{२२}{१२४}$ नक्षत्रांशाँश् चरति, अर्थात् श्रविष्ठानां शतभिषजश् च सर्वानंशाशँ् चरित्वा पूर्वभद्रपदयोर् २२ अंशाँश् चरति। तस्माज् जावादिश्लोके पूर्वभद्रपदे नक्षत्रं द्वाविंशे स्थानेऽस्ति। एवमेव तृतीयस्य पर्वणोन्ते सूर्यः $\frac{९\times१५\times३}{१२४}=\frac{४०५}{१२४}=३\frac{३३}{१२४}$ नक्षत्रांशाँश् चरति, अर्थात् श्रविष्ठानां शतभिषजः पूर्वभद्रपदयोश् च सर्वानंशाँश् चरित्वा उत्तरभद्रपदयोर् नक्षत्रस्य ३३ अंशाँश् चरति। तस्माज् जावादिशलोके उत्तरभद्रपदे नक्षत्रं (३३-२७=६) षष्ठे स्थानेऽस्ति। एवमेव सर्वेषां नक्षत्राणां समावेशस्य क्रमे उपपत्तिर् बोध्येति शङ्करबालकृष्णदीक्षितः। सप्तविंशतिरेव नक्षत्राणि पञ्चकृत्वोऽत्र समावेशितानीति युगगतानां सूर्यभगणानां निर्देशकतया चैष नक्षत्रसमूहो निर्दिष्टोऽवगम्यते।

विशेषः—एतस्य पद्यस्य सोमाकरेण विस्तरेण व्याख्यानं कृतमस्ति। तस्य व्याख्यानस्य सर्वे अंशाः स्पष्टतया तु नाऽवगम्यन्ते। एतस्य पद्यस्य नक्षत्राणामंशानां सारणी थिबोमहाशयेन प्रस्तुताऽवगम्यते। एतस्य पद्यस्य नक्षत्राणां क्रमस्योपपत्तिः शङ्करबालकृष्णदीक्षितेनाऽपि प्रस्तुताऽस्ति। किन्तु एतस्य क्रमस्य सर्वे पक्षास् तु सम्यगवगता न सन्तीति तेनोक्तं दृश्यते। बार्हस्पत्येन स्वकीयया रीत्या एतस्य पद्यस्य नक्षत्राणां क्रमस्योपपत्तिः प्रदर्शिताऽवगम्यते। सुधाकरेण चैतस्य पद्यस्य नक्षत्राणां क्रमस्योपपत्तिः प्रदर्शिताऽस्ति। शामशास्त्रिणा तु एतस्मिन् पक्षेऽवधानं दत्तं नाऽवलोक्यते। अत्र मृ इति विद्युन्मालावृत्तभङ्गेनाऽपि पठनं चिन्त्यम्, मृ इत्यस्य स्थाने वृत्तभङ्गं विनैव शी इति वा षम् इति वा पठितुं शक्यं प्रतीयते, तथाऽपि मृ इत्येव किमिति पठितमिति परिचिन्तनीयं दृश्यते, शुक्लयजुर्वेदे मृ इत्यस्य म्रे इतीवोच्चारणात् तस्यैवोच्चारणस्याऽत्राऽप्यनुकरणाद् वृत्तभङ्गाभाव इति वक्तुमपि शक्यं प्रतीयते॥१८॥

हिन्दी– १.जौ =अश्वयुजौ (अश्विनी), २.द्रा=आर्द्रा, ३.गः=भगः=पूर्वफल्गुनी, ४.खे= विशाखे (विशाखा), ५.श्वे=विश्वेदेवाः=उत्तराषाढा, हिः=अहिर्बुध्न्य=उत्तरभाद्रपद, ७.रो=रोहिणी, ८.षाः=आश्लेषा, ९.चित्=चित्त्रा, १०.मू=मूल, ११.षक्=शतभिषक्=शतभिषा, १२.ण्यः=अपभरण्यः=भरणी, १३.सू=पुनर्वसू, १४.मा=अर्यमा=उत्तरफल्गुनी, १५.धाः=अनुराधा, १६.णः=श्रवण, १७.रे=रेवती, १८.मृ(म्रे)=मृगशीर्ष, १९.घाः=मघा, २०.स्वा=स्वाति, २१.पः=आपः=पूर्वाषाढा, २२.जः=अजएकपात्=पूर्वभद्रपद, २३.कृ=कृत्तिका, २४.ष्यः=पुष्य, २५.हः=हस्त, २६.ज्ये=ज्येष्ठा, २७.ष्ठाः=धनिष्ठा; ये सम्बद्ध नक्षत्र के अथवा नक्षत्रदेवता के नाम के एक-एक अक्षर के लिङ्ग से बताए गए [पर्वान्तविशेष के] नक्षत्र हैं॥१८॥

[पर्वभादानकलाज्ञानोपायः]

कार्या भांशाष्टकस्थाने कला एकान्नविंशतिः।
ऊनस्थाने तु सप्ततिमुद्वपेद् युक्तिसम्भवे॥१९॥

(सोमाकरभाष्यम्)

कार्या भांशेति। तेषामृक्षाणां ये स्थानमुक्तास् तेऽष्टकाः कार्या अष्टनाडिका इत्यर्थः। उक्तमेतद् विशेषार्थं पुनरुच्यते। विशेषस् तु कला एकान्नविंशतिरधिका उद्वपेदादाविति वाक्यशेषः। तथा ऊनस्थाने द्विसप्ततिमपि तत्र दद्यात्। किं सर्वकालम्? ऊनस्थाने युक्तसम्भवे ऊनर्क्षचन्द्रयोग इत्यर्थः। एवमेतेन प्रकारेण चन्द्रगतिमपेक्ष्य पर्वराशिः प्रकल्प्य इत्यर्थः। एवमत्रैषा यागकालचोदना मिश्रिताभिप्रायानुसारिणी तथा **"ऋतु-**

याजी वा अन्यश् चातुर्मास्ययाज्यन्यः" इति (काठकसं.३६।३, मैत्रायणीयसं.१।१०।८)। तथा तामेव चोदितां गणनामभिप्रेत्य **लौगाक्षिणा तान्येव पञ्चवार्षिकाण्याम्नातानि।** संवत्सरस्य षडहेऽतिरिच्यत इत्यादि यथा तस्मात् पञ्चानां वर्षाणामेक एव प्रयत्नः॥१९॥

(कौण्डिन्न्यायनव्याख्यानम्)

पर्वनक्षत्रप्रवेशसम्बद्धानां सावनदिनकलानां ज्ञानस्योपायमाह शास्त्रकारः— कार्या भांशाष्टकस्थाने कला **इत्यादिना।**

यत्र भांशा अष्टका भवन्ति तत्र १९ सावनदिकलाः कार्याः। पक्षद्वादशकान्ते भांशा अष्टका भवन्ति, अतः पक्षद्वादशकान्ते पर्वभादानकलाः १९ भवन्तीति बोध्यम्। अर्थात् पक्षद्वादशकान्ते सावनदिनस्य १९ कलासु व्यतीतासु **पर्वनक्षत्रस्य प्रवेशो भवतीत्यर्थः। एवमेव द्वयोः** पक्षद्वादशकयोरन्ते १९×२=३८, **त्रयाणां पक्षद्वादशकानामन्ते १९×३=५७, चतुर्णां** पक्षद्वादशकानामन्ते १९×४=७६ **इत्यादिरूपेण पर्वभादानकला भवन्तीति बोध्यम्।**

ऊनस्थाने इत्यादिकस्योत्तरार्धस्य तु ऊनपक्षस्थाने प्रतिपक्षं **त्रिसप्ततिर् भांशाः कार्याः, संयुक्तैरूनपक्षभांशैः** पूर्णस्य नक्षत्रस्य सम्भवे **पूर्णानि नक्षत्राणि नक्षत्ररूपेण पृथक् स्थापयित्वाऽतिरिक्तान्** भांशान् **अतिरिक्तरूपेणैव निर्दिशेदित्यर्थः इति द्विसप्ततिमित्यस्य स्थाने** त्रिसप्ततिरिति पाठं कल्पयित्वा **केचिदर्थं वर्णयन्ति। बालगङ्गाधरतिलकस्** तु एतस्य श्लोकस्योत्तरार्धस्य **बार्हस्पत्य-सुधाकरकृतमर्थं त्यक्त्वा ऋग्वेदिनाम्** "ऊनस्थाने द्विसप्ततीरुद्वपेदूनसम्मिताः" **इति पाठं युक्ततरं मत्वा द्वादशकोनपक्षस्थाने तु प्रतिपक्षम् ऊनपक्ष-सङ्ख्यासम्मिताः द्विसप्ततिः** (१+७२=७३) **द्वितीयाद्यूनपक्षार्थमपि पुनःपुनः १+७२=७३ इत्येवं प्रकारेण प्रतिपक्षं त्रिसप्ततिः भांशाः कार्या इत्यर्थं स्वीकरोति। एतेन श्लोकेनोक्तायावस्तुस्थितेरुपयोगश् च "त्र्यंशी(त्रिंशी) भशेषः"** इत्यादिना श्लोकेन (श्लो. २७) **प्रतिपादितस्य विषयस्य गणनायां भवतीति च तिलको ब्रवीति।**

वस्तुतस्तु ऊनपक्षेषु तु प्रत्यूनपक्षं पक्षाणां पञ्चदशतिथ्यात्मकत्वात् तिथेश् च सामान्यतया सावनदिनतुल्यत्वात् वक्ष्यमाणेन "सप्तगुणा तिथिः" (श्लो. २१) **इति न्यायेन प्रतिसावनदिनं सप्त इति कृत्वा १०५ कला योज्या भवन्ति। तत्र च चन्द्रस्य नक्षत्रयुक्तेः सम्भावनां विचार्य कदाचिद् एकं कलासप्तकम्, कदाचिद् द्वे कलासप्तके, कदाचित् त्रीणि कलासप्तकानि, कदाचिच् चत्वारि कलासप्तकानि, कदाचित् पञ्च कलासप्तकानि चोद्वपेत् इति ग्रन्थकारेणोक्तमवगम्यते। इत्थं पर्वनक्षत्रप्रवेशसम्बद्धाः सावनदिनकला ज्ञातुं शक्याः।**

ऊनपक्षेषु हि प्रतिपक्षं १०५ कलानामावापं कृत्वा आवश्यकतानुसारं कला-सप्तकस्योद्वापश् च कार्यो भवति। तत्र प्रथमे ऊनपक्षे १ वा ० कलासप्तकम्, द्वितीये ऊनपक्षे १, तृतीये ऊनपक्षे १ वा २, चतुर्थे ऊनपक्षे २, पञ्चमे ऊनपक्षे २ वा ३, षष्ठे ऊनपक्षे २ वा ३, सप्तमे ऊनपक्षे ३, अष्टमे ऊनपक्षे ३ वा ४, नवमे ऊन-पक्षे ४, दशमे ऊनपक्षे ४ वा ५ तथा एकादशे ऊनपक्षे ४ वा ५ इत्यनेन प्रकारेण कलासप्तकानामुद्वापं कृत्वा पर्वभादानकला जानीयात्। यत्र उद्वपनीयानां कला-सप्तकानां विकल्पोऽस्ति, तत्र भांशानुसारम् उद्वपनीयकलासप्तकसङ्ख्या ज्ञेया भवति। तत्राऽयं नियमोऽस्ति यद् यस्य ऊनपक्षस्य पर्वनक्षत्रस्य प्रवेशस्य कला ज्ञातव्याः भवन्ति तस्य पक्षस्य पर्वभांशाः ५८तो न्यूनास् तर्हि वैकल्पिककलासप्त-केषु न्यूनसङ्ख्याकानि कलासप्तकानि उद्वपनीयानि भवन्ति। यदि पर्वभांशाः ६५तोऽधिकास् तर्हि वैकल्पिककलासप्तकेषु अधिकसङ्ख्याकानि कलासप्तकानि उद्वपनीयानि भवन्ति। यदि पर्वभांशसङ्ख्या ५८तः ६५ पर्यन्ता भवति तर्हि भांशसङ्ख्यायां गतपर्वसङ्ख्यां संयोज्य गतपक्षद्वादशकसङ्ख्याम् ऊनां कुर्यात्। यदि प्राप्ता सङ्ख्या सम्पूर्ण-भांश-सङ्ख्याया अर्धात् अर्थात् ६२तः न्यूना भवति तर्हि वैकल्पिककलासप्तकेषु न्यूनसङ्ख्याकानि कलासप्तकानि उद्वपनीयानि भवन्ति। यदि सा सङ्ख्या ६२तोऽधिका तर्हि वैकल्पिककलासप्तकेषु अधिक-सङ्ख्याकानि कलासप्तकानि उद्वपनीयानि भवन्ति। इत्थमिष्टपर्वणः पर्वभादान-कला ज्ञातुं शक्यन्ते।

कलासप्तकोद्वापसारणी		
ऊनपक्षसंख्या	उद्वपनीय-कला-सप्तकसंख्या	विशेषः
१	१ वा ०	१-५८भांशेषु ०, ६६-१२४ भांशेषु १
२	१	
३	१ वा २	१-५८भांशेषु १, ६६-१२४ भांशेषु २
४	२	
५	२ वा ३	१-५८भांशेषु २, ६६-१२४ भांशेषु ३
६	२ वा ३	१-५८भांशेषु २, ६६-१२४ भांशेषु ३
७	३	
८	३ वा ४	१-५८भांशेषु ३, ६६-१२४ भांशेषु ४
९	४	
१०	४ वा ५	१-५८भांशेषु ४, ६६-१२४ भांशेषु ५
११	४ वा ५	१-५८भांशेषु ४, ६६-१२४ भांशेषु ५

विशेषः— यत्र ५९तः ६५ पर्यन्ता पर्वभांशाः, तत्र यदि भांशसङ्ख्या+गतपर्वसङ्ख्या−गतपक्षद्वादशकसङ्ख्या=<६२, तर्हि वैकल्पिककलासप्तकेषु न्यूनसङ्ख्याकानि कलासप्तकानि उद्वपनीयानि। यदि च भांशसङ्ख्या+गतपर्वसङ्ख्या−गतपक्षद्वादशकसङ्ख्या=>६२, तर्हि वैकल्पिककलासप्तकेषु अधिकसङ्ख्याकानि कलासप्तकानि उद्वपनीयानि।

उदाहरणं यथा— पञ्चदशस्य पक्षस्य पर्वभादानकला ज्ञेयाश् चेत् तत्र गतपक्षद्वादशकसङ्ख्या १, अतो गतपक्षद्वादशकस्य पर्वभादानकलाः १९, त्रयाणामूनपक्षाणां कलाः १०५×३=३१५, युक्ताः १९+३१५=३३४, अत्र ऊनपक्षसंख्या ३, अतः एताभ्यः कलाभ्य एकस्य कलासप्तकस्य द्वयोर् वा कलासप्तकयोरुद्वापः कार्यः। तत्र निर्णयार्थं पर्वभांशा ज्ञातव्याः। पञ्चदशस्य पक्षस्य पर्वभांशाः ८+११×३+६२=८+३३+६२=१०३ भवन्ति। अस्याः सङ्ख्यायाः ६५तोऽधिकत्वाद् द्वयोः कलासप्तकयोरुद्वापः कर्तव्य इति ज्ञातम्। अतः ३३४तो द्वयोः कलासप्तकयोरुद्वापे कृते पर्वभादानकलाः ३३४−७×२=३२०। अतः पञ्चदशस्य पर्वणो यत् नक्षत्रं तत् सावनदिनस्य ३२० कलासु व्यतीतासु प्रविष्टं भवति इति ज्ञातव्यम्। [इष्टपर्वणो नक्षत्रं तु "भांशाः स्युरष्टकाः कार्याः" (श्लो.१५) इत्यादिश्लोकोक्तसूत्रानुसारं पर्वभांशान् ज्ञात्वा "जावाद्यंशैः समं विद्यात्" (श्लो.१७) इत्यादिश्लोकोक्तरीत्या "जौ द्रा गः खे" (श्लो.१८) इत्यादिश्लोकसाहाय्येन ज्ञातव्यम्। यथा उक्तस्य पञ्चदशस्य पर्वणो भांशाः ८+११×३+६२=१०३, अतः १०३−२७=७६−२७=४९−२७=२२ इति जावादिश्लोके द्वाविंशे स्थाने स्थितं पूर्वभद्रपदे नक्षत्रं तस्य पर्वणो नक्षत्रं भवति। तस्यैव पूर्वभद्रपदयोर् नक्षत्रस्य प्रारम्भः सावनदिनस्य ३२० कलासु व्यतीतासु भवति इति अस्मिन् पद्ये प्रतिपादितया पद्धत्या ज्ञातुं शक्यते।]

अष्टाविंशस्य पक्षस्य पर्वभादानकला ज्ञेयाश् चेत् गतपक्षद्वादशके २, गतपक्षद्वादशकयोः पर्वभादानकलाः १९×२=३८, चतुर्णामूनपक्षाणां कलाः १०५×४=४२०, युक्ताः ३८+४२०=४५८, अत्र ऊनपक्षसङ्ख्या ४, अतः एताभ्यः कलाभ्यो द्वयोः कलासप्तकयोरुद्वापे कृते पर्वभादानकलाः ४५८−७×२=४४४। अतोऽष्टाविंशस्य पर्वणो यत् नक्षत्रं तत् सावनदिनस्य ४४४ कलासु व्यतीतासु प्रविष्टं भवति इति ज्ञातव्यम्। [इष्टपर्वणो नक्षत्रं तु पूर्वोक्तरीत्या ज्ञातव्यम्। यथा उक्तस्य अष्टाविंशस्य पक्षस्य पर्वभांशाः ८×२+११×४=१६+४४=६०, अतः ६०-२७=३३-२७=६ इति जावादिश्लोके षष्ठे स्थाने स्थितं उत्तरभद्रपदे नक्षत्रं तस्य पर्वणो नक्षत्रं भवति। तस्यैव उत्तरभद्रपदयोर् नक्षत्रस्य प्रारम्भः सावनदिनस्य ४४४ कलासु व्यतीतासु भवति इति अस्मिन् पद्ये प्रतिपादितया पद्धत्या ज्ञातुं शक्यते।]

अत्रोपपत्तिः— पक्षद्वादशके चन्द्रः १७५$\frac{८}{१२४}$ नक्षत्राणि चरतीति स्वीक्रियते। तत्र नक्षत्रकलाः ६१०, सावनदिनकलाः ६०३ इति १७५ नक्षत्रेषु प्रविष्टाः सम्पूर्ण-सावनदिनकलातोऽतिरिक्ताः सावनदिनकलाः (१७५×७=)१२२५ भवन्ति। अतः (१२२५÷६०३=२$\frac{१९}{६०३}$) १७५+२$\frac{१९}{६०३}$=१७७$\frac{१९}{६०३}$ इति अष्टसप्तत्यधिकशततमसावन-दिनस्य १९ कलाः अपि १७५ नक्षत्रेषु प्रविष्टा भवन्ति। अर्थात् चन्द्रः १७५ नक्षत्राणि चरितुं १७७ दिनानि १९ दिनकलाश् चाऽपेक्षते। तस्माद् आदियुगे द्वादशस्य पक्षस्य पर्वनक्षत्रस्य आश्लेषाणां प्रवेशः १७८तमस्य सावनदिनस्य १९ कलासु व्यतीतासु भवति। एवमेव चतुर्विंशस्य पक्षस्य पर्वनक्षत्रस्य श्रवणस्य प्रवेशः सावनदिनस्य (१९×२=) ३८ कलासु व्यतीतासु भवति। एवमेवोर्ध्वमपि भवति। ऊनपक्षेषु तु पक्षसावनदिनातिरिक्तकलाः (१५×७=१०५) संयोज्य न्यूनदिनसंख्यानुसारं कला-सप्तकस्य उद्वपनं कर्तव्यं भवतीति स्पष्टतयाऽवगन्तुं शक्यते। एकस्मिन् चन्द्रनक्षत्रे ६१० कला भवन्ति, एकस्मिन् सावनदिने च ६०३ कला एव भवन्तीति सामान्यतया पञ्चदशानां तिथीनां पञ्चदश सावनदिनानि इति कृत्वा १५×७=१०५ कला अपि व्यतीतेषु चन्द्रनक्षत्रेष्वेव प्रविष्टा भवन्ति। अतः प्रथमे पक्षे पर्वनक्षत्रस्य प्रवेशः सावनदिनस्य यावतीषु कलासु व्यतीतासु भवति, ततो द्वितीयस्य पक्षस्य पर्व-नक्षत्रस्य प्रवेशः सामान्यतया सावनदिनस्य ततोऽधिकासु १०५ कलासु व्यतीतासु भवति। किन्तु यदा १४ सावनदिनेष्वेव व्यतीतेषु द्वितीयपर्वनक्षत्रस्य प्रवेशो भवति तदा १०५ कलातः ७ कलासु न्यूनास्वेव पर्वनक्षत्रस्य प्रवेशो भवति। अतोऽत्र व्यतीतदिनसङ्ख्यानुसारेण कलासप्तकोद्वापः कर्तव्यो भवतीति ज्ञेयम्।

विशेषः— एष श्लोकः शङ्करबालकृष्णदीक्षितेन न व्याख्यातः। अतस् तत्पूर्ववर्तिभिराधुनिकैर् जनैरप्यव्याख्यात एवाऽवगम्यते। छोटेलालबार्हस्पत्येन पूर्वोऽर्धः सम्यग् व्याख्यातः इति बालगङ्गाधरतिलकः कथयति। सुधाकरेण तु सर्वोऽप्ययं श्लोको न सम्यग् व्याख्यात इति बालगङ्गाधरतिलकोऽपि कथयति, सुधाकरव्याख्यानमयुक्तं दृश्यते च। अस्य श्लोकस्य पूर्वार्धस्य बार्हस्पत्यव्याख्यानं समीचीनमेवेत्यवगम्यते, परन्तु उत्तरार्धव्याख्यानं तु सुधाकरद्विवेदिनः, बालगङ्गा-धरतिलकस्य, शामशास्त्रिणः, सत्यप्रकाशस्य चापि समुचितं न प्रतीयते। तिलकेन उत्तरार्धस्य "त्र्यंशी (त्रिंशी) भशेषो दिवसांशभागः" (श्लो. २७) इत्यादिना श्लोकेन सह तत् संयोज्य कृतं व्याख्यानं च चिन्त्यतरं दृश्यते। तथा व्याख्याने कृतेऽपि पर्व-नक्षत्रप्रवेशकलासु ४ कलापर्यन्ताया अशुद्धेर् विद्यमानत्वं स स्वयं स्वीकरोतीति तदीया व्याख्या तदीयं गणितकौशलं चाऽस्थाने पतितमिति वेदाङ्गज्योतिषशैली-

विज्ञः संस्कृतभाषाभिज्ञो यः कोऽपि गणितज्ञः सरलतयैव ज्ञातुं शक्नोति। अतो बालगङ्गाधरतिलकव्याख्यानमप्ययुक्तम्। शामशास्त्रिणोत्तरार्धोऽन्यथैव व्यतीपात-योगपरकतया व्याख्यातः। तस्य योगस्य ब्राह्मणग्रन्थ-श्रौतसूत्र-गृह्यसूत्रेष्वाकाङ्क्षाया अभावात् तद् व्याख्यानं समीचीनं न प्रतीयते। एतस्य श्लोकस्याऽस्मदुक्तोऽर्थः प्रमोदवर्धनेन सम्मोदवर्धनेन च विशेषतः प्रकटीकृतोऽस्ति।

यथा दशतिशब्दः कौथुमसामवेदसंहिताखण्डविभागेषु निदानसूत्रे च दश-कार्थकतया प्रयुक्तो दृश्यते तथैवाऽत्र सप्ततिशब्दोऽपि सप्तकार्थकतया प्रयुक्तो-ऽवगम्यत इति बोध्यम्। अथवा सप्तकमित्येव पाठः कल्पनीयः ॥१९॥

हिन्दी – भांशाष्टक के स्थान पर अर्थात् पक्षद्वादशक (बारह पक्षों के समुदाय) के अन्त में उन्नीस सावनदिनकला करनी चाहिए। अर्थात् पक्षद्वादशक के अन्त में जिस सावन दिन में बारहवें पर्व के नक्षत्र का आरम्भ होता है उस दिन के १९ कलाओं के बीत जाने पर उस पर्वनक्षत्र का प्रवेश होता है। ये ही कलाएं पर्वभादानकला कही जाती हैं। दो पक्षद्वादशकों के अन्त में १९×२=३८, तीन पक्षद्वादशकों के अन्त में १९×३=५७, चार पक्षद्वादशकों के अन्त में १९×४=७६ इत्यादि रूप से पर्वभादानकलाएं होंगी, ऐसा जानना चाहिए।

इस श्लोक के उत्तरार्ध का "बारह पक्षों के समुदाय के रूप में अवर्तमान ऊनपक्षों के स्थान में ७३ भांश लेना चाहिए। ऐसे भांशों के योग से पूर्ण नक्षत्र बनने पर पूर्ण नक्षत्र से अतिरिक्त भांशो को अलग करके लेना चाहिए" ऐसा अर्थ कोई बताते हैं। बालगङ्गाधर तिलक ने भी इस श्लोक का ऋग्वेदियों के पाठ को युक्ततर मानकर कुछ उसी प्रकार का अर्थ बताया है।

वस्तुतः उत्तरार्ध का अर्थ– 'ऊनपक्षों के स्थान में तो प्रतिपक्ष १०५ कलाओं के अनुपात से कलाओं को जोडकर आवश्यकतानुसार कलासप्तकों का (प्रथम ऊनपक्ष में १ या ० कलासप्तक, द्वितीय ऊनपक्ष में १, तृतीय ऊनपक्ष में १ या २, चतुर्थ ऊनपक्ष में २, पञ्चम ऊनपक्ष में २ या ३, षष्ठ ऊनपक्ष में २ या ३, सप्तम ऊनपक्ष में ३, अष्टम ऊनपक्ष में ३ या ४, नवम ऊनपक्ष में ४, दशम ऊनपक्ष में ४ या ५ और ग्यारहवें ऊनपक्ष में ४ या ५ कलासप्तकों का) उद्वाप करके पर्वभादानकला निकालना चाहिए' ऐसा मानना चाहिए।

जहां उद्वपनीय कलासप्तक की सङ्ख्या में विकल्प है, वहां पर्वभांशानुसार उद्वपनीयकलासप्तकसङ्ख्या व्यवस्थाप्य होती है। इस में यह नियम है कि जिस ऊनपक्ष के पर्वनक्षत्र के प्रवेश की कलाएं जाननी होंगी उस पक्ष के पर्वभांश ५८ से न्यून हों तो वैकल्पिक कलासप्तकसङ्ख्या में से न्यून सङ्ख्या के कलासप्तक का उद्वाप करना होता है। यदि पर्वभांश की सङ्ख्या ६५ से अधिक हो तो वैकल्पिक कलासप्तकसङ्ख्या में से अधिक सङ्ख्या के कलासप्तक उद्वपनीय होते हैं। यदि पर्वभांश की सङ्ख्या ५८ से ६५ तक की हो तो उस पर्वभांश की सङ्ख्या में गत पर्व की सङ्ख्या को जोडकर गत पक्षद्वादशक की

सङ्ख्या को घटाना चाहिए। यदि वह सङ्ख्या सम्पूर्ण भांश की सङ्ख्या से आधे अर्थात् ६२ से कम हो तो वैकल्पिक कलासप्तकसङ्ख्या में से न्यून सङ्ख्या के कलासप्तक का उद्वाप करना होता है, यदि वह सङ्ख्या ६२ से अधिक हो तो वैकल्पिक कलासप्तकसङ्ख्या में से अधिकसङ्ख्यावाले कलासप्तक का उद्वाप करना होता है। इस प्रकार इष्ट पर्व की पर्वभादानकला ज्ञात की जा सकती हैं।

एक नक्षत्र में ६१० कलाएं होती हैं, किन्तु एक सावन दिन में ६०३ कलाएं ही होती हैं, अतः पन्द्रह सावनदिन की १५×७=१०५ कलाएं भी व्यतीत पन्द्रह नक्षत्रों में ही प्रविष्ट होती हैं। अतः सोलहवें सावन दिन के १०५ कलाओं के व्यतीत होजाने पर अगले पर्वनक्षत्र का प्रवेश होता है। कहीं पर केवल १४ सावन दिन बीतने पर ही अगले पर्वनक्षत्र का प्रवेश होने की स्थिति होती है, उसी समय प्राप्त कलाओं में से ७ कलाओं का उद्वाप करने का विधान किया गया है, ऐसा जानना चाहिए। अन्य पक्षों में जितने सावन दिन कम हुए उतने ही कलासप्तकों का उद्वाप करके पर्वनक्षत्रप्रवेश-कलाओं का निर्देश करना चाहिए, यह आशय है। [पर्वभादानकलाओं का उपयोग आगे तिथिभादानकला के ज्ञान में भी होगा।]

उदाहरण— पन्द्रहवें पक्ष की पर्वभादानकलाएं ज्ञेय हों तो पक्षद्वादशक के पर्व-भादानकलाएं १९, तीन ऊनपक्षों की कलाएं १०५×३=३१५, जोडने पर १९+३१५=३३४, यहां ऊनपक्षसङ्ख्या ३ होने से इन कलाओं में से एक या दो कलासप्तकों का उद्वाप करना होगा। इस के निर्णयार्थ पर्वभांश देखना होगा। पन्द्रहवें पक्ष के पर्वभांश ८+११×३+६२ =८+३३+६२=१०३ होते हैं और यह सङ्ख्या ६५ से अधिक होने से दो कलासप्तकों का उद्वाप करना होगा, यह बात अवगत हुई। अतः ३३४ से दो कलासप्तकों का उद्वाप करने पर पर्वभादानकलाएं ३३४-१४=३२०। अतः पन्द्रहवें पर्व का जो नक्षत्र है वह नक्षत्र सावन दिन के ३२० कलाओं के बीतने पर प्रविष्ट होगा, ऐसा जानना चाहिए। [इष्ट पर्व के नक्षत्र को तो *"भांशाः स्युरष्टकाः कार्याः"* (श्लो.१५) इस श्लोक में बताए गए सूत्र के अनुसार पर्वभांश निकाल कर *"जावाद्यंशैः समं विद्यात्"* (श्लो.१७) इत्यादि और *"जौ द्रा गः खे"* (श्लो.१८) इत्यादि श्लोक के सहायता से जानना चाहिए। जैसे उक्त पर्व का भांश ८+११×३+६२=१०३, अतः १०३-२७=७६-२७=४९-२७=२२ होने से जावादि श्लोक में बाइसवें स्थान में स्थित पूर्वभद्रपद नक्षत्र उस पर्व का नक्षत्र होगा। उसी पूर्वभद्रपद नक्षत्र का प्रारम्भ सावनदिन के ३२० कला बीतने पर होगा, ऐसा इस श्लोक में बताई गई पद्धति से जाना जा सकता है।]

अट्ठाईसवें पक्ष की पर्वभादानकलाएं ज्ञेय हों तो दो पक्षद्वादशकों की पर्वभादानकलाएं १९×२=३८, चार ऊनपक्षों की कलाएं १०५×४=४२०, जोडने पर ३८+४२०=४५८, इस से दो कलासप्तकों का उद्वाप करने पर पर्वभादानकलाएं ४५८-१४=४४४। अतः पन्द्रहवें पर्व का जो नक्षत्र है वह नक्षत्र सावन दिन के ४४४ कलाओं के बीतने पर प्रविष्ट होगा, ऐसा जानना चाहिए। [इष्ट पर्व के नक्षत्र को तो पूर्वोक्त रीति से जानना चाहिए। जैसे उक्त पर्व का भांश ८×२+११×४=१६+४४=६०, अतः ६०-२७=३३-२७=६ होने से जावादि श्लोक में

छठे स्थान में स्थित उत्तरभद्रपद नक्षत्र उस पर्व का नक्षत्र होगा। उसी उत्तरभद्रपद नक्षत्र का प्रारम्भ सावनदिन के ४४४ कलाओं के बीतने पर होगा, ऐसा जानना चाहिए।]

विशेष– इस श्लोक के पूर्वार्ध का बार्हस्पत्य का व्याख्यान समीचीन अवगत होता है, परन्तु उत्तरार्ध का तो सुधाकर द्विवेदी, बालगङ्गाधर तिलक, शामशास्त्री, सत्यप्रकाश इत्यादियों में से किसी का भी व्याख्यान समुचित प्रतीत नहीं होता है। तिलक का उत्तरार्ध को *"त्र्यंशी (त्रिंशी) भशेषो दिवसांशभागः"* इत्यादि श्लोक (श्लो. २७) से जोडकर व्याख्यान करने का प्रयत्न करना और भी चिन्त्य दिखाई देता है। और उतना करने पर भी पर्वनक्षत्र के प्रवेश की दिनकलाओं में ४ कला तक की अशुद्धि विद्यमान रहने की बात स्वयं तिलकद्वारा ही स्वीकृत होने से उन की व्याख्या और गणितकौशल अस्थान में ही प्रयुक्त दिखाई देते हैं, इस बात को वेदाङ्गज्योतिष की शैली से परिचित, संस्कृतभाषाभिज्ञ और गणितविज्ञ जो कोई भी सरलता से समझ सकता है॥१९॥

[तिथिनक्षत्रादेशव्यवस्था]

तिथिमेकादशाभ्यस्तां पर्वभांशसमन्विताम्।
विभज्य भसमूहेन तिथिनक्षत्रमादिशेत्॥२०॥

(सोमाकरभाष्यम्)

एवमत्र या तिथिचोदना तामाह **तिथिमेकादशाभ्यस्ता**मिति। पर्वचोदितां तिथिमेकादशाभ्यस्तां पञ्चदशीमेकादशभिर् गुणिताम्। सङ्गुण्य पञ्चषष्टिः शतं भवति १६५। विभज्य भसमूहेन सप्तविंशत्या। भागमपहृत्य त्रीण्यवशिष्यन्ते। एवं पुनस् तृतीयं पर्वर्क्षं तस्माद् भवति प्रागुक्तादेकान्तरेऽह्नीति यदुक्तम्। अथवा तिथिपरिमाणमुत्तरे श्लोके वक्ष्यति **"तासु सप्तगुणां तिथिम्"** (श्लो. २१) इति। एवं तिथेः सप्तावयवास् तानेकादशभिर् गुणयेत् सप्तसप्ततिर् भवति। ततः पर्वभांशसमन्वितां कुर्यादिति वाक्यशेषः। एतदुक्तं भवति– तिथ्यवयवेषूपरि पर्वनक्षत्रावयवान् विन्यसेद् द्वौ वा त्रीन् वा चतुरो वा तत एकान्नाशीतिः ७९ अशीतिः ८० एकाशीतिर् ८१ वा भवति। ततस् तान् विभज्य भसमूहेन ऋक्षगणेन जातं सप्तविंशतिस् तेन भागमपहृत्य पञ्चविंशं षड्विंशं सप्तविंशं वा नक्षत्रं तस्मिन्नहनि तिथिनक्षत्रमादिशेत् कथयेदित्यर्थः। सा च सङ्ख्या पर्वभांशसमन्वितामिति वचनात् तस्मादेव नक्षत्रादारभ्य प्रवर्तते नाऽश्विन्यादेः। एवं तु येन यो मास उपलक्षितस् तस्मिँस् तस्मादेव गणना प्रवर्तते। तथा तूत्तरेषु सर्वेषु स्फुटतरा प्रवृत्तिर् भवति। यतस् तथोपलक्षितं नक्षत्रं नियमेन सर्वकालं भवति। *यदि त्वेवं सर्वासां तिथीनां नक्षत्रानयनमिच्छेत् तदा नष्टकालानयनान्यन्यानि करणान्यनुसृत्योहापोहाभ्यां कल्पयेदस्याऽकृत्स्नत्वात् तेनेहोपकारकृत्। यस्मादिह पर्वचोदनया पक्षद्वयचोदितो यागकाल एव प्रकृतस् तस्मादेतदेवोच्यते* ॥२०॥

(कौण्डिन्न्यायनव्याख्यानम्)

तिथिविशेषे चन्द्रनक्षत्रज्ञानस्योपायमाह शास्त्रकारः— तिथिमेकादशाभ्यस्ता-मित्यादिना।

इष्टतिथिमेकादशगुणितां कृत्वा तत्र पञ्चदशश्लोकेन प्रतिपादितान् भांशान् संयोज्य तस्य नक्षत्रसमूहाधिकत्वे नक्षत्रसमूहेन (सप्तविंशत्या) विभागं कृत्वा शेषेण सूचितं जावादिक्रमोक्तं नक्षत्रं वर्तमानतिथिनक्षत्रत्वेनाऽऽदिशेदित्यर्थः। तस्य नक्षत्रस्य प्रवेशकालस् तु वक्ष्यमाणे "याः पर्वभादालकलाः" (श्लो.२१) **इत्यादिके श्लोके प्रतिपादितेन प्रकारेण ज्ञेयः।**

तत्रोदाहरणं यथा श्रविष्ठादिकस्य पञ्चवर्षस्य युगस्य द्वितीये पक्षे प्रतिपदि नक्षत्रं ज्ञेयम् तर्हि तत्र तिथिः १, एकादशभिर् गुणने १×११=११, तत्र पर्वभांशाः १×११+६२=७३, योगे ११+७३=८४, तस्याः सङ्ख्याया नक्षत्रसमूहाधिकतया तेन विभागे $\frac{८४}{२७}=३\frac{३}{२७}$, अतः शेषः ३, अतो जावादिश्लोके तृतीये स्थाने स्थितं नक्षत्रं पूर्वफल्गुन्यौ नक्षत्रं तस्यां प्रतिपदि तिथौ ज्ञेयम्।

एवमेव तदनन्तरद्वितीयायां तिथौ नक्षत्रं ज्ञेयम्। तत्र तिथिः २, एकादशभिर् गुणने २×११=२२, तत्र पर्वभांशाः १×११+६२=७३, योगे २२+७३=९५, तस्याः सङ्ख्याया नक्षत्रसमूहाधिकतया तेन विभागे $\frac{९५}{२७}=३\frac{१४}{२७}$, अतः शेषः १४, अतो जावादिश्लोके चतुर्दशे स्थाने स्थितम् उत्तरफल्गुन्यौ नक्षत्रं तस्यां द्वितीयायां तिथौ नक्षत्रमिति ज्ञेयम्।

यदि तस्यैव युगस्य त्रयोदशे पक्षे पञ्चम्यां तिथौ नक्षत्रं ज्ञेयं तर्हि तत्र गत-तिथयः ४, एकादभिर् गुणने ४×११=४४, तत्र पर्वभांशाः ८, योगे ४४+८=५२, तस्याः सङ्ख्याया नक्षत्रसमूहाधिकतया तेन विभागे $\frac{५२}{२७}=१\frac{२५}{२७}$ इति जावादिक्रमे पञ्चविंशं नक्षत्रं हस्तः इति उक्तायां पञ्चम्यां तिथौ हस्तः नक्षत्रं ज्ञेयम्।

यदि तस्यैव युगस्य अष्टचत्वारिंशत्तमे पक्षे चतुर्थ्यां नक्षत्रं ज्ञेयम् तर्हि तत्र तिथयः ४, एकादशभिर् गुणने ४×११=४४, तत्र पर्वभांशाः ८×३+११×११+६२ =२४+१२१+६२=२०७-१२४=८३, योगे ४४+८३=१२७, तस्याः सङ्ख्याया नक्षत्रसमूहाधिकतया नक्षत्रसमूहेन विभागे $\frac{१२७}{२७}=४\frac{१९}{२७}$, अतः शेषः १९, अतो जावादिश्लोके ऊनविंशे स्थाने स्थितं नक्षत्रम् मघाः नक्षत्रं तस्यां चतुर्थ्यां तिथौ ज्ञेयम्। एवमेवाऽन्यत्राऽपि ज्ञेयम्।

अत्र पर्वकालस्थितिं पर्वनक्षत्रप्रवेशकालं चाऽपेक्ष्य व्यतीततिथिग्रहणं वर्तमानतिथिग्रहणं वा कृत्वा गणितं कार्यं भवतीति बोध्यम्।

पञ्चसिद्धान्तिकायां द्वादशेऽध्याये वराहमिहिरेण तु पैतामहसिद्धान्तानुसारं तिथिनक्षत्रानयनमेवं प्रतिपादितम्—

दिग्रसभागैः सप्तभिरूनं शशिभं धनिष्ठाद्यम्। इति।

तत्र इष्टेऽहनि चन्द्रनक्षत्रज्ञानाय अहर्गणे दिग्रसभागैः (६१०) विभक्ते, लब्धे सप्तभिर् गुणिते गुणनफलेऽहर्गणादपचिते लब्धं श्रविष्ठातः क्रमेण गणितं नक्षत्रं तस्याऽह्नश् चन्द्रनक्षत्रं भवति। तथाहि माघशुक्लप्रतिपदि श्रविष्ठादौ प्रारब्धस्य पञ्चवर्षात्मकस्य युगस्य षोडशेऽह्नि (प्रतिपदि) चन्द्रनक्षत्रं ज्ञेयं चेत् १५-$\frac{१५}{६१०}$×७= १५-$\frac{१०५}{६१०}$= $\frac{९१५०-१०५}{६१०}$ = $\frac{९०४५}{६१०}$= १४$\frac{५०५}{६१०}$। एवं च पञ्चदशेऽह्नि चन्द्रो श्रविष्ठातश् चतुर्दश नक्षत्राणि चरित्वा पञ्चदशस्य मघानां नक्षत्रस्य ६१० कलासु ५०५ कलाश् चरतीति षोडशेऽह्नि (प्रतिपदि) (६१०-५०५=) १०५ कलापर्यन्तं मघासु अवस्थाय तदनन्तरं पूर्वफल्गुन्योर् नक्षत्रे प्रविशतीति ज्ञेयम्।

विशेषः— अयमपि श्लोकः शङ्करबालकृष्णदीक्षितेन न व्याख्यातः। अतस् तत्पूर्ववर्तिभिराधुनिकैरप्यव्याख्यात एवाऽवगम्यते। छोटेलालबार्हस्पत्यस्य सुधाकरद्विववेदिनश् चैतस्य श्लोकस्य व्याख्यानमयथार्थमिति बालगङ्गाधरतिलकः प्रतिपादयति। शामशास्त्रिणश् चैतस्य श्लोकस्य व्याख्यानं समुचितं न दृश्यते। अस्माकं तु बालगङ्गाधरतिलकव्याख्यानमेव समुचितमिति प्रतिभाति॥२०॥

हिन्दी– इष्ट तिथि को ग्यारह से गुणा करके उस में गतपर्व के भांश को जोडकर योगफल नक्षत्रसङ्ख्या (२७) से अधिक होने पर उस को नक्षत्रसङ्ख्या (२७) से विभक्त करके शेष अङ्क से अङ्कित जावादि क्रम के नक्षत्र को उस तिथिका नक्षत्र बताए, उक्त योगफल नक्षत्रसङ्ख्या (२७) से न्यून होने पर तो उसी योगफलरूप अङ्क से अङ्कित जावादि क्रम के नक्षत्र को उस तिथि का नक्षत्र बताए। उदाहरण— श्रविष्ठादिक पञ्चवर्षात्मक युग के द्वितीय पक्ष में द्वितीया में नक्षत्र ज्ञेय है तो वहां तिथि २, ग्यारह से गुणा करने पर २×११=२२, वहां पर्वभांश ११+६२=७३, योग करने पर २२+७३=९५, उस सङ्ख्या का नक्षत्रसमूह से अधिक होने से २७ से विभाग करने पर $\frac{९५}{२७}$=३$\frac{१४}{२७}$, अतः शेष १४, अतः जावादि-श्लोक में चौदहवें स्थान में स्थित नक्षत्र उत्तरफल्गुनी नक्षत्र उस द्वितीया तिथि में जाने। (अन्य उदाहरण संस्कृत व्याख्या में देखें)। [नक्षत्र का प्रवेशकाल लाने की रीति तो वक्ष्यमाण *"याः पर्वभादालकलाः"* इत्यादि श्लोक (श्लो.२१) में प्रतिपादित है] ॥२०॥

[तिथिभादानिकाः कलाः]

याः पर्वभादानकलास् तासु सप्तगुणा तिथिः।
युक्ता ताश् च विजानीयात् तिथिभादानिकाः कलाः॥२१॥

(सोमाकरभाष्यम्)

एवमत्र चोदितायास् तिथेः परिमाणमाह **याः पर्वभादानकला** इति। याः पूर्वमुक्ताः कथिताः पर्वभादानकलाः। **"भांशाः स्युरष्टकाः कार्या"** (श्लो.१५) इति। सप्तनवकैस् त्वावापो यदि नेह विवक्षितस् तिथीनां समूहत्वात्। कलापरिमाणमुपरिष्टाद् वक्ष्यति **"पर्वणां स्याच् चतुष्पादी काष्ठानां चैव ताः कलाः"** (श्लो. ३०) इति। किं तासामित्याह। तासु सप्तगुणा तिथिर् भवेदिति वाक्यशेषः। एतदुक्तं भवति। पर्वभांशसमन्वितैरंशैः सप्तभिस् तिथिपरिमाणं कल्पयेत्। सप्तांशानि तिथिर् भवतीत्यर्थः। एवमतस् तासामपि कारणभूतानां सम्यग् विजानीयात् कास् तिथिभादानिकाः कला याः पूर्वचोदिताः कलाः। **"पूर्वार्धे पर्वसूत्तराः"** (श्लो. १७) इत्यादौ तिथिभादानिकाः कलास् तस्यां तिथौ पर्वनक्षत्रकल्पना तस्यामेव भवेदित्यर्थः। *पूर्वपूर्णमास्यां तदंशचोदितयागकालकल्पनयौपवसथादि कार्यमित्यर्थः* ॥२१॥

(कौण्डिन्न्यायनव्याख्यानम्)

तिथीनां नक्षत्रप्रवेशसम्बद्धानां सावनदिनकलानां ज्ञानस्योपायमाह **शास्त्रकारः—** याःपर्वभादानकलाः **इत्यादिना।**

पूर्वोक्तरीत्या ज्ञाता याः पर्वभादानकलास् तासु इष्टतिथौ व्यतीता सप्तगुणिता तिथिर् युक्ता कार्या, ताश् च तिथिभादानिकाः कला विजानीयादित्यर्थः।

उदाहरणं यथा श्रविष्ठादेः पञ्चवर्षात्ममकस्य युगस्य त्रयोदशे पक्षे पञ्चम्यां तिथौ नक्षत्रप्रवेशस्य सावनदिनकला ज्ञेयाः सन्ति चेत् अतीतपर्वभादानकलाः १९ (श्लो. १९), **गतास् तिथयः सप्तगुणिताः ४×७=२८, युक्ताः कलाः १९+२८=४७, ता एव पञ्चम्यास् तिथेर् नक्षत्रप्रवेशस्य कला ज्ञेयाः। अत्र अतीतपर्वभादानं प्रतिपदि जातम् अत एव गततिथग्रहणेन तिथिभादानकलागणितं कृतमिति बोध्यम्। एवं च तस्यां पञ्चम्यां नक्षत्रं च, एकादशाभ्यस्तेष्टतिथिः ४×११=४४+पर्वभांशाः ८=५२, तस्याः सङ्ख्याया भसमूहेन विभागे** (श्लो.२०) $\frac{५२}{२७}=१\frac{२५}{२७}$ **इति जावादिक्रमे पञ्चविंशं नक्षत्रं हस्तः इति** (श्लो.१८) **उक्तायां पञ्चम्यां तिथौ ४७ सावनदिनकलासु व्यतीतासु हस्तनक्षत्रस्य प्रवेश इति ज्ञेयम्।**

यदि तस्यैव युगस्य ऊनविंशे पक्षे त्रयोदश्यां तिथौ नक्षत्रप्रवेशस्य सावनदिनकला ज्ञेयास् तर्हि तत्र एकं पक्षद्वादशकं षड् ऊनपक्षाश् च व्यतीतानि सन्ति, अतः पक्षद्वादशकोद्गताः पर्वभादानकलाः १९, ऊनपक्षाणां पर्वभादानकलाः १०५×६=६३०-६०३=२७-२१=६, द्वयोर् योगे अष्टादशपर्वणो भादानकलाः १९+६=२५, एता एव अतीतपर्वभादानकलाः (श्लो. १९), अत्र तिथयः १३, सप्तगुणिताः १३×७=९१, युक्ताः कलाः २५+९१=११६, ता एव त्रयोदश्यास् तिथेर् नक्षत्रप्रवेशस्य कला ज्ञेयाः। एवं च तस्यां त्रयोदश्यां नक्षत्रं च, तिथिः १३, एकादशभिर् गुणने १३×११=१४३, पर्वभांशाः ८+११×६=७४, द्वयोर् योगे १४३+७४=२१७, तस्याः सङ्ख्याया भसमूहेन विभागे (श्लो.२०) $\frac{२१७}{२७}=८\frac{१}{२७}$ इति जावादिक्रमे प्रथमं नक्षत्रम् अश्वयुजौ (श्लो.१८) इति उक्तायां त्रयोदश्यां तिथौ ११६ सावनदिनकलासु व्यतीतासु अश्वयुङ्नक्षत्रस्य प्रवेश इति ज्ञेयम्।

यदि तस्यैव युगस्य षट्सप्ततितमे पक्षे दशम्यां नक्षत्रप्रवेशस्य सावनदिनकला ज्ञेयास् तर्हि तत्र षट् पक्षद्वादशकानि त्रय ऊनपक्षाश् च व्यतीतानि सन्ति, अतः पक्षद्वादशकोद्गताः पर्वभादानकलाः १९×६=११४, ऊनपक्षाणां पर्वभादानकलाः १०५×३=३१५-७ =३०८, द्वयोर् योगे पञ्चसप्ततितमपर्वणो भादानकलाः ११४+३०८=४२२, एता एव अतीतपर्वभादानकलाः सन्ति (श्लो.१९), गतास् तिथयः ९ इति सप्तगुणिताः ९×७=६३, युक्ताः कलाः ४२२+६३=४८५, ता एव दशम्यास् तिथेर् नक्षत्रप्रवेशस्य कला ज्ञेयाः। एवं च तस्यां दशम्यां नक्षत्रं च, गततिथयः ९ इति ९×११=९९+पर्वभांशाः (८×६+११×३+६२=४८+३३+६२=१४३-१२४=) १९=११८, तस्याः सङ्ख्याया भसमूहेन विभागे (श्लो.२०) $\frac{११८}{२७}=४\frac{१०}{२७}$ इति जावादिक्रमे दशमं नक्षत्रं मूलबर्हणी इति (श्लो.१८) ४८५ सावनदिनकलासु व्यतीतासु मूलबर्हण्या नक्षत्रस्य प्रवेश इति ज्ञेयम्।

अत्र पर्वकालस्थितिं पर्वनक्षत्रतिथिप्रवेशकालं वा अपेक्ष्य व्यतीततिथिग्रहणं वर्तमानतिथिग्रहणं वा कृत्वा गणितं कार्यं भवति।

विशेषः— एष श्लोकः शङ्करबालकृष्णदीक्षितेन व्याख्यातोऽस्ति। तदनुसारमेव बार्हस्पत्येन च सम्यग् व्याख्यात इति बालगङ्गाधरतिलकः कथयति। सुधाकरेण तु तत्र परिष्कारं कर्तुमनावश्यकः प्रयासः कृत इत्यपि स एव ब्रवीति। "त्र्यंशी(त्रिंशी) भशेषः" इत्यादिकस्य श्लोकस्य (श्लो.२७) बालगङ्गाधरतिलककृतमर्थमनुपादायाऽस्य श्लोकस्योक्तोऽर्थो न समागच्छतीति च बालगङ्गाधरतिलकः कथयति। किन्तु अस्मद्व्याख्यानानुसारं तु अत्र "कार्या भांशाष्टकस्थाने" (श्लो.१९)

इत्यत्रोक्तानां पर्वभादानकलानामपेक्षितत्वात् तत्र च "त्र्यंशी (त्रिंशी) भशेषः" इत्यादिकं श्लोकमनपेक्ष्यैव सम्पूर्णानां पर्वणां भादानकलानां प्रतिपादितत्वात् "त्रिंशी भशेषः" इत्यादिकस्य श्लोकस्य च पर्वभादानकलाऽसम्बद्धत्वाच् च बालगङ्गाधरतिलककथनमसङ्गतं बोध्यम्। अतश् च ऊनविंशस्य सप्तविंशस्य च श्लोकस्य बालगङ्गाधरतिलकव्याख्यानमप्यसङ्गतमित्यस्माकं मतं बोध्यम्॥२१॥

हिन्दी – जो पूर्वोक्त पर्वभादानकलाएं (पर्व के नक्षत्र को लेनेवाली कलाएं) होती हैं (श्लो. १९), उन में इष्ट दिन (तिथि) में व्यतीत तिथियों को सात से गुणा करने पर प्राप्त गुणनफल योजित किया जाना चाहिए, उस योगफल को ही उस तिथि (सावन दिन) में उस तिथि (सावन दिन) के नक्षत्र के प्रवेश के समय की दिनकला जाने।

उदाहरण– धनिष्ठादि पञ्चवर्षात्मक युग के त्रयोदश पक्ष में पञ्चमी में नक्षत्र-प्रवेश की सावनदिनकला ज्ञेय हो तो अतीतपर्वभादानकला १९ (श्लो.१९), गत तिथियां सप्तगुणित करने पर ४×७=२८, पर्वभादानकलाओं के जोडने पर १९+२८=४७, उन को ही पञ्चमी तिथि के नक्षत्रप्रवेश की कला जाने। उस पञ्चमी में नक्षत्र तो पूर्वप्रतिपादित नियम (श्लो.२०) से गततिथि ४×११=४४ + पर्वभांश ८=५२, भसमूह से भाग लेने पर $\frac{५२}{२७}=१\frac{२५}{२७}$, अतः जावादिक्रम में पच्चीसवां नक्षत्र हस्त होगा, अतः उक्त पञ्चमी तिथि में ४७ सावन-दिनकलाओं के बीत जाने पर हस्त नक्षत्र का प्रवेश होगा, ऐसा जानना चाहिए। (अन्य उदाहरण संस्कृतव्याख्या में देखें।)

विशेष – इस श्लोक की शङ्करबालकृष्णदीक्षित ने व्याख्या की है। तदनुसार ही बार्हस्पत्य ने भी व्याख्या की है यह बात बालगङ्गाधरतिलक ने कही है। सुधाकर ने इस श्लोक में परिष्कार करने के लिए अनावश्यक प्रयास किया है, यह बात भी उन्हों ने कही है। *"त्र्यंशी(त्रिंशी) भशेषः"* इत्यादि श्लोक का (श्लो.२७) बालगङ्गाधरतिलककृत अर्थ लिए विना इस श्लोक का उक्त अर्थ न आ सकने की बात भी बालगङ्गाधरतिलक ने कही है। किन्तु हमारे व्याख्यान के अनुसार इस श्लोक में *"कार्या भांशाष्टकस्थाने"* (श्लो.१९) इस श्लोक में कही गई पर्वभादानकलाएं अपेक्षित होने से और वहां उक्त सताईसवें श्लोक की अपेक्षा के विना ही सभी पर्वों की भादानकलाओं का प्रतिपादन होने से और *"त्रिंशी भशेषः"* (श्लो.२७) इत्यादि श्लोक का पर्वभादानकला से सम्बन्ध न होने से भी बालगङ्गाधरतिलक का कथन असङ्गत दीखाई देता है॥२१॥

[तिथिसमाप्तिकालः]

अतीतपर्वभागेभ्यः शोधयेद् द्विगुणां तिथिम्।
तेषु मण्डलभागेषु तिथिनिष्ठां गतो रविः॥२२॥

(सोमाकरभाष्यम्)

तथा परपक्षार्थमाह– **अतीतपर्वभागेभ्य** इति। द्वौ त्रयश् चत्वारो वा षोडश चतुर्-विंशतिर् द्वात्रिंशद् वा। तेभ्यः शोधयेत् पातयेत्। द्विगुणां तिथिं द्वौ सप्तकौ चतुर्दशेत्यर्थः। ततः किम् ? तेषु मण्डलभागेषु भायावत्सङ्ख्याकेषु तिथिनिष्ठां गतो रविर् भवेदिति वाक्यशेषः। एतदुक्तं भवति– *अमावास्यायां पर्वर्क्षचोदनाभावात् ततः परं पञ्चदशं यत् तदपेक्षयौपवसथादौ प्रवृत्तिः*। पूर्वेऽंशे तिथेर् निष्ठा निष्पत्तिगतो रविः। तद्दिवससूर्यर्क्षभाग-कल्पना एवं वा भवन्तु॥२२॥

आर्यावर्त पुस्तकालय

(कौण्डिन्न्यायनव्याख्यानम्)

सावनदिनभागेषु तिथिसमाप्तिकालं प्रतिपादयति **शास्त्रकारः** अतीतपर्व-भागेभ्यः **इत्यादिना।**

समनन्तराऽतीतपर्वणो ये भोगभागास् तेभ्यो द्विगुणामिष्टतिथिसङ्ख्या-मपचितां कुर्यात्। अवशिष्टेषु दिनभागेषु स्थितो रविस् तस्या इष्टतिथेः **समाप्तिं गतो भवतीत्यर्थः।** तत्र एकस्मिन् पञ्चवर्षात्मके युगे सावनदिनानि १८३० **भवन्ति तिथयश् च १८६० भवन्तीति** एकस्य सावनदिनस्य १२४ भागा **भवन्ति तर्हि एक-स्यास् तिथेस् ततो द्वाभ्यां न्यूना** १२२ भागा **भवन्ति। तस्माच् श्रविष्ठादेः पञ्चवर्षा-त्मकस्य युगस्यादौ प्रथमे** सावनदिने **प्रवृत्ते प्रथमे तिथौ च सहैव प्रवृत्ते सति प्रथ-मायाः पञ्चदश्याः समाप्तिः** पञ्चदशे सावनदिने १२४-(१५×२)=१२४–३०=९४ **दिनभागे भवति, एवमेव द्वितीयायाः** पञ्चदश्याः **समाप्तिः** त्रिंशे सावनदिने ९४–(१५×२)=९४–३०=६४ **दिनभागे भवति।** एवमेवाऽत ऊर्ध्वमपि **भवतीति ज्ञेयम्। एतादृशानां पर्वतिथिसमाप्तिकालांशानां विचारेणैव द्युहानस्य व्यवस्था "द्यु हेयम् पर्व चेत् पादे" इत्यत्र** (श्लो.१२) **शास्त्रकारेण प्रतिपादिता बोध्या।**

विशेषः— एष श्लोकः शङ्करबालकृष्णदीक्षितेन तत्पूर्वैश् चाऽधुनिकै-रप्यव्याख्यातोऽवगम्यते। छोटेलालादिभिस् तु व्याख्यात एवाऽवगम्यते। अत्र मण्डलशब्दः सूर्यपरिभ्रमणमण्डलवत्तया दिनवाचको ज्ञेयः॥२२॥

हिन्दी– अभी व्यतीत पर्व के दिन में जो भोगभाग (अंश) होते हैं उस में द्विगुणित इष्टतिथिसङ्ख्या को घटाए। जो शेष होता है, सूर्यभ्रमणचक्ररूप सावनदिन के उस भाग में स्थित सूर्य उस इष्ट तिथि के अन्त में प्राप्त हुआ होता है। अर्थात् सावनदिन के उस अंश में सम्बद्ध तिथि समाप्त होती है। जैसे– आदियुग की द्वितीय पञ्चदशी की समाप्ति का दिनांश जानना हो तो अतीत पर्व की समाप्ति दिन के ९४ वें अंश में हुआ है, इष्ट तिथि पञ्चदशी (१५) है, अतः ९४-(१५×२)=९४-३०=६४, अतः इष्ट तिथि की समाप्ति तीसवें सावन दिन के ६४ दिनभाग व्यतीत होने पर होगी। [इस श्लोक में वर्णित प्रकार के पर्वसमाप्तिकाल को

लेकर ही किस पक्ष में चतुर्दशी को टूटाना चाहिए, इस बात की व्यवस्था *"द्यु हेयं पर्व चेत् पादे"* इत्यादि श्लोक में (श्लो.१२) प्रतिपादित की गई है] ॥२२॥

[विषुवान् तिथिः]

विषुवन्तं द्विरभ्यस्तं रूपोनं षड्गुणीकृतम्।
पक्षा यदर्धं पक्षाणां तिथिः स विषुवान् स्मृतः॥२३॥

(सोमाकरभाष्यम्)

विषुवन्तं द्विरभ्यस्तमिति। द्विरिति द्वैविध्यमुक्तं तद् विषुवत्संज्ञकमुक्तं दिवस-संज्ञकमुक्तम्। तदेव पक्षा वा तदेव परिमाणं चतुर्दश रूपोनमेकेनोनं त्रयोदशकं तावन्मात्रं दिनद्वयं षड्गुणीकृतं द्वादशगुणनया दिनानि पक्षः असावार्क्ष एव न चान्द्र एतदेवागमतो यदेतत् तद्रूपोनमध्यर्धं मध्यतिथेः स विषुवान् स्मृतः। तिथिदिनानां तु चान्द्रमस एव न सौर्यः। **"पक्षा द्वादशकाः"** इति (श्लो. १५) यदुक्तं तदेव शुनकप्रतिपादितं वक्ष्यमाणतत्-सङ्ख्योपयोग्यम्॥२३॥

(कौण्डिन्न्यायनव्याख्यानम्)

विषुवत्तिथिज्ञानोपायमाह शास्त्रकारः— विषुवन्तं द्विरभ्यस्त**मित्यादिना।**

इष्टं विषुवन्तं द्विगुणं कृत्वा एकोनं विधाय षड्गुणितं कुर्यात्, फलं पक्षा भवन्ति, पक्षाणामर्धं कृत्वा या सङ्ख्या लभ्यते तया सूचितस् तिथिः विषुवान् भवतीत्यर्थः। (यदा पक्षार्धम् पञ्चदशतोऽधिकं भवति तदा पक्षार्धं पञ्चदशभिर् विभज्य लब्धं पक्षेषु योजनीयम्, शेषसङ्ख्यासूचितस् तिथिर् विषुवान् ज्ञेयः)। एवं च पञ्चवर्षात्मकस्य तपःशुक्लप्रतिपदि उदगयनारम्भे प्रवृत्तस्य युगस्य प्रथमे विषुवति तिथिर् ज्ञेयश् चेत् विषुवान् १, स द्विरभ्यस्तः १×२=२, स रूपोनः २-१=१, स षड्गुणीकृतः १×६=६, अतः प्रथमे विषुवति व्यतीताः पक्षाः ६, तदर्धम् ६÷२=३, अतः शुक्लपक्षतृतीया विषुवाँस् तिथिर् ज्ञेयः। एवं द्वितीये विषुवति तिथिश् च २×२=४, ४-१=३, ३×६=१८ पक्षाः, तदर्धम् १८÷२=९ इति अष्टादशसु पक्षेषु व्यतीतेषु शुक्ले पक्षे नवमस् तिथिर् विषुवाँस् तिथिर् ज्ञेयः। एवमेव दशमे विषुवति तिथिश् च १०×२=२०-१=१९, १९×६=११४ पक्षाः, तदर्धम् ११४÷२=५७, सा सङ्ख्या १५तोऽधिकेति ५७÷१५=३$\frac{१२}{२७}$ इति, लब्धा सङ्ख्या पक्षेषु योज्या इति सङ्कलिताः पक्षाः ११४+३=११७, शेषसङ्ख्या च १२ इति ११७ पक्षेषु व्यतीतेषु

पक्षाणां विषमसङ्ख्याकत्वात् शुक्ले पक्षे व्यतीते कृष्णपक्षस्य द्वादशस् तिथिर् विषुवाँस् तिथिर् ज्ञेयः।

विशेषः— विषुवत्कालस्य कालनिरूपणे केनाऽपि रूपेण यजने चोपयोग इति विषुवत्तिथेर् विशिष्टो विचारः कृतो ज्ञेयः। पुराणेऽपि "अयनं विषुवं सूर्यात् कालं चन्द्राच् च लक्षयेत्" इति (ब्राह्माण्डपुराणे १।२१।१४५, वायुपुराणे १।५०।१९८) कथनं दृश्यते। अयनारम्भे विषुवकाले च श्राद्धस्नानदानादीनां विशिष्टपुण्यजनकत्वं च लघुस्मृतिषु पुराणेषु च प्रतिपादितं दृश्यते। तथाहि मत्स्यपुराणेऽपि "अयने विषुवे वाऽपि सङ्क्रान्तिव्रतमाचरेत्" इति वचनं (९८।२) दृश्यते।

ऋग्वेदिनां परम्परयाऽऽगते वेदाङ्गज्योतिषपाठे तु आदियुगस्य दशानामेव विषुवतिथीनां कण्ठरवेण निर्देशोऽपि कृतो दृश्यते। तथाहि—

तृतीया नवमी चैव पौर्णमासी त्रयोदशी।
षष्ठी च विषुवान् प्रोक्तो द्वादश्यां दशमो भवेत्॥ इति (द्र.- श्लो.३३)।

अत्र 'त्रयोदशी' इति पाठस्याऽर्थो न बुध्यते इति बालकृष्णदीक्षितेनोक्तम्। 'च षोडशी' इति पाठः स्यात्। तदा आदियुगस्य पौर्णमासीषु षोडशी पौर्णमासी विषुवाँस् तिथिर् भवेदित्यर्थः स्यात्। एवं चाऽऽदियुगे तृतीया, नवमी, पौर्णमासी, षष्ठी, द्वादशी च क्रमेण विषुवन्तस् तिथयो भवेयुः, ततः पुनरपि ता एव तिथयः क्रमेण विषुवन्तस् तिथयो भवेयुरिति ऋग्वेदिनां पाठस्याऽर्थो बोध्यः।

एतस्य श्लोकस्य सोमाकरव्याख्यानमस्पष्टम्। शङ्करबालकृष्णदीक्षितादिभिस् त्वयं श्लोको व्याख्यात एव॥२३॥

हिन्दी– पञ्चवर्षात्मक युग के इष्ट विषुवान् की सङ्ख्या को दो से गुणा करके उस से एक घटाकर प्राप्त फल को छ से गुणा करने पर इष्ट विषुवत् तक व्यतीत पक्षों की सङ्ख्या आती है, उस सङ्ख्या की आधी सङ्ख्या वाली जो तिथि होती है वही तिथि उस इष्ट विषुवद्दिन की तिथि होती है। यदि पर्वसङ्ख्या का आधा तिथियों की सङ्ख्या (१५) से अधिक है तो उस को १५ से भाग करके लब्धि को पक्षसङ्ख्या में जोडे, शेष को तिथि जाने। उदाहरण— तपःशुक्लप्रतिपदा में उदगयन के आरम्भ में प्रवृत्त पञ्चवर्षात्मक युग के प्रथम विषुवद्दिन का तिथि ज्ञेय हो तो विषुवान् १, उसको दो से गुणन करने पर १×२=२, उस से एक घटाने पर २-१=१, प्राप्त फलं को छ से गुणा करने पर १×६=६, उस सङ्ख्या को आधा करने पर ६÷२=३, अतः छह पक्षों के व्यतीत होने पर शुक्लपक्षतृतीया को विषुवान् तिथि जाने।

विशेष– विषुवत् अथवा विषुव कहने से जिस दिन में दिन और रात बराबर होते हैं वह दिन समझा जाता है। ऐसे दिन एक वर्ष में दो होते हैं। ये वासन्तविषुवत् (अथवा

मेषविषुवत्) और शारदविषुवत् (अथवा तुलाविषुवत्) कहे जाते हैं। ये दिन क्रमशः मार्च २१ तारीख में (आजकल प्रायः निरयण सौर मीनमास के सातवें दिन में) और सेप्टेम्बर २२ तारीख में (आजकल प्रायः निरयण सौर कन्यामास के सातवें दिन में) पडते हैं। ॥२३॥

[नाडिकाप्रमाणम्]

पलानि पञ्चाशदपां धृतानि
तदाढकं द्रोणमतः प्रमेयम्।
त्रिभिर् विहीनं कुडवैस् तु कार्यं
तन् नाडिकायास् तु भवेत् प्रमाणम्॥२४॥

(सोमाकरभाष्यम्)

यस्मात् कलाभिर् नाडिकानिष्पत्तिस् तस्मादन्यथालघुत्वेनाह **पलानि पञ्चाशदपां धृतानीति**। पञ्चाशदपां धृतानि अष्टाब्दानि तस्मिन् परिमाणे ताम्रघटेनाढकं नाम प्रमाणम्। द्रोणमतस् तेन प्रमाणेन प्रमेयं प्रमातव्यम्। तदपि प्रमाणं पलशतद्वयप्रमाणं २०० तदेव पश्चात् त्रिभिर् विहीनं कुडवैस् तु कार्यम्। कुडवजा त्र्यङ्गुला शलाका तयाऽधश् छिद्रयेत् ततश् छिद्रोदकप्रसुत्या यावन्मात्रा कलोपगच्छति तन् नाडिकाया घटिकायाः प्रमाणं भवेत् सा भवतीत्यर्थः॥२४॥

(कौण्डिन्न्यायनव्याख्यानम्)

सावनदिनमानादिप्रतिपादने उपयोगाय नाडिकामानं च प्रतिपादयति शास्त्रकारः— पलानि पञ्चाशदपां धृतानीत्यादिना।

अपां पञ्चाशत् पलानि एव यस्मिन् अमत्रे धृतानि भवन्ति तद् अमत्र-माढकमुच्यते। अस्माद् आढकाद् द्रोणं परिमेयम्। तद् द्रोणं त्रिभिः कुडवैर् हीनं कार्यम्, तज् जलं नियतप्रमाणेन छिद्रेण पात्रविशेषे प्रविशत् पात्रविशेषान् निस्सरद् वाऽपि कालपरिमाणविशेषरूपाया नाडिकायास् तु प्रमाणं भवेदित्यत्यर्थः।

विशेषः— अत्र आढकप्रमाणं तु स्फुटतया प्रोक्तम्, द्रोणप्रमाणं कुडवप्रमाणं च नोक्तम्। तत्राऽऽढकप्रमाणे निर्दिष्टे तन्निर्देशानुकूलानामन्येषां प्रमाणानां लोकादेव ज्ञातुं शक्यत्वात् तेषां प्रतिपादने ग्रन्थकार उदासीनो जात इत्यवगम्यते। लगधोक्त्य-नुकूलानि पुराणवचनानि च दृश्यन्ते। तत्र "तथानेनाऽम्भसश् चापि पलान्यथ त्रयो-दश। मागधेनैव मानेन जलप्रस्थो विधीयते। एते वाराप्लुतप्रस्थाश् चत्वारो नालि-

कोच्चयः। हेममाषैः कृतच्छिद्रैश् चतुर्भिश् चतुरङ्गुलैः" इति ब्रह्माण्डपुराणवचनम् (४।१।२१७, २१८) "द्वादशार्धपलोन्मानं चतुर्भिश् चतुरङ्गुलैः। स्वर्णमासैः कृतच्छिद्रं यावत् प्रस्थं जलप्लुतम्" इति ब्रह्मवैवर्तपुराणवचनम् (४।९६।५२-५३) भागवतवचनं (३।११।९) च, "तत्स्थानेनाऽम्भसश् चाऽपि पलान्यथ त्रयोदश। मागधेनैव मानेन जलप्रस्थो विधीयते। एते चाऽप्युदकप्रस्थाश् चत्वारो नालिको घटः। हेममाषैः कृतच्छिद्रैश् चतुर्भिश् चतुरङ्गुलैः" इति वायुपुराणवचनम् (२।३८।२१९-२२१), "नाडिका तु प्रमाणेन सा कला दश पञ्च च। उन्मानेनाऽम्भसस् सा तु पलान्यर्धत्रयोदश। मागधेन तु मानेन जलप्रस्थस् तु स स्मृतः। हेममाषैः कृतच्छिद्रश् चतुर्भिश् चतुरङ्गुलैः" इति ब्रह्मपुराणवचनम् (१२४।७-८), विष्णुपुराणवचनं (६।३।७,८) च स्मरणीयम्। विष्णुपुराणव्याख्यायां विष्णुचित्तश् च— "एवं चतुर्माषसुवर्णरचितचतुरङ्गुलसूचीकृताधश्छिद्राद् आढकजलपूर्णात् पञ्चाशत्परिमाणाद् घटात् तच्छिद्रेण पञ्चाशत्पलं जलं यावता कालेन निस्सरति तावत्कालो नाडीत्युक्तं भवति। अथवा अहोरात्रेण जलस्य पूरणं निस्सरणं वा षष्टिवारं यथा स्यात् तथा तत् पात्रं कार्यम्। अन्ये तु चतुर्माषहेमनिर्मितया चतुरङ्गुलया सूच्या कृतच्छिद्रे सार्द्धद्वादशपले ताम्रपात्रे तत्प्रमाणं जलं तच्छिद्रेण यावता कालेन प्रविशति स काल एका नाडिका, तानि पलानि मागधमानेन जलप्रस्थ इति वर्णयन्ति" इति वदति। श्रीधरोऽपि तत्र "तदुक्तं भवति— सार्धद्वादशपलताम्रमयं मागधप्रस्थसम्मितम् ऊर्ध्वायतं पात्रं चतुर्माषचतुरङ्गुलहेमशलाकया कृतच्छिद्रं जले स्थापितं तेन च्छिद्रेण यावता कालेन पूर्यते तावत्कालो नाडिकेति। तथा च शुकः— 'द्वादशार्धपलोन्मानं चतुर्भिश् चतुरङ्गुलैः। स्वर्णमासैः कृतच्छिद्रं यावत्प्रस्थं जलप्लुतम्' इति" (भागवते ३।११।९) इति वदति। ६८५तमे वैक्रमेऽब्दे ब्राह्मस्फुटसिद्धान्तं कृतवान् ब्रह्मगुप्तोऽपि घटीयन्त्रं प्रतिपादयन् यन्त्राध्याये "घटिका कलसार्धाकृति ताम्रं पात्रं तलेऽपृथुच्छिद्रम्। मध्ये तज्जलमज्जनषष्ट्या द्युनिशं यथा भवति" (श्लो.४१) इत्याह। लल्लोऽपि शिष्यधीवृद्धिदे यन्त्राध्याये "दशभिः शुल्बस्य पलैः पात्रं कलसार्धसन्निभं घटितम्। हस्तार्धमुखव्यासं समघटवृत्तं दलोच्छ्रायम्। सत्र्यंशमाषकत्रयकृतनलया समसवृत्तया हेम्नः। चतुरङ्गुलया विद्धं मज्जति विमले जले नाड्या॥ अथवा स्वेच्छाघटितं घटीप्रमाभिः प्रसाधितं भूयः। त्रैराशिकसिद्धं वाऽङ्गुलवद् गुरुविपुलरन्ध्रं स्यात्" इत्याह (श्लो.३४-३६)। आधुनिके सूर्यसिद्धान्तेऽपि ज्यौतिषोपनिषदध्याये "ताम्रपात्रमधश्छिद्रं न्यस्तं कुण्डेऽमलाम्भसि। षष्टिर् मज्जत्यहोरात्रे स्फुटं यन्त्रं कपालकम्" (श्लो.२३) इत्युक्तं दृश्यते। भास्करोऽपि सिद्धान्तशिरोमणौ गोलाध्यायान्तर्गते यन्त्राध्याये "घटदलरूपा घटिता घटिका ताम्री तलेऽपृथुच्छिद्रा। द्युनिशनिमज्जनमित्या भक्तं द्युनिशं घटी-

मानम्" इत्युक्त्वा लल्लोक्तिं दूषयन् "अत्र दशभिः शुल्बस्य पलैरित्यादि यद् घटीलक्षणं कैश्चित् कृतं तद् युक्तिशून्यं दुर्घटं चेत्येतदुपेक्षितम्, इष्टप्रमाणाकार-सुषिरं पात्रं घटीसञ्ज्ञमङ्गीकृतम्। द्युनिशनिमज्जनसंख्यया यदि षट्त्रिंशच्छतानि पानीयपलानि लभ्यन्ते तदैकेन निमज्जनेन किमिति त्रैराशिकम्। इति घटीयन्त्रम्" इति चाऽऽह (श्लो.८)। भास्करस्य एकस्मिन् कालपले एकं पानीयपलं यथा विमल-जले कुण्डके ऊर्ध्वमुखतया स्थापितां घटिकां प्रविशति तथा घटिकायन्त्रं कर्तव्य-मिति कथनमवगन्तव्यम्। एवं च घटीयन्त्रं षष्ट्या (६०) पानीयपलैः पूरणीयं विशालं भवति। लगधोक्तं घटीयन्त्रं तु ततोऽपि विशालतरं भवति, तत् तु १९०$\frac{५}{८}$ पानीयपलैः पूरणीयं भवति। एतच्च घटीयन्त्रप्रमाणं लगधमुनिना तथा परिकल्पितं यथा उदगयने प्रतिदिनं प्रस्थमितजलपरिमितेन कालेन दिनवृद्धिः क्षपाह्रासश् च भवेताम्, यथा च दक्षिणायने प्रतिदिनं प्रस्थमितजलपरिमितेन कालेन दिनह्रासः क्षपावृद्धिश् च भवेतामिति। एवं च लगधोक्तघटीयन्त्रानुकरणेनैवाऽर्वाचीनैर् ब्रह्मगुप्तादिभिः स्वस्वमनीषिकया घटीयन्त्रप्रमाणानि कल्पितानीति बोध्यम्।

अथ लगधोक्त-पल-कुडव-प्रस्थ-द्रोणप्रमाणस्पटीकरणाय लगधोक्त्यनु-कूलानि मानपरिभाषावचनानि प्रदर्श्यन्ते—

पलं च कुडवः प्रस्थ आढको द्रोण एव च।
धान्यमानेन बोद्धव्याः क्रमशोऽमी चतुर्गुणाः॥ इति
—स्कन्दपुराणे काशीखण्डे २७।१४८।

षड्ध्वंश्यस् तु मरीचिः स्यात् षण् मरीच्यस् तु सर्षपः।
अष्टौ ते सर्षपा रक्तास् तण्डुलश् चाऽपि तद्द्वयम्॥
धान्यमाषो भवेदेको धान्यमाषद्वयं यवः।
अण्डिका ते तु चत्वारस् ताश् चतस्रस् तु माषकः॥
हेमश् च धान्यकश् चोक्तो भवेच् छाणस् तु ते त्रयः।
शाणौ द्वौ द्रङ्क्षणं विद्यात् कोलं बदरमेव च॥
विद्याद् द्वौ द्रङ्क्षणौ कर्षं सुवर्णं चाऽक्षमेव च।
बिडालपदकं चैव पिचुं पाणितलं तथा॥
तिन्दुकं च विजानीयात् कवलग्रहमेव च।
द्वे सुवर्णे पलार्धं स्याच् छुक्तिरष्टमिका तथा॥

द्वे पलार्धे पलं मुष्टिः प्रकुञ्चोऽथ चतुर्थिका।
बिल्वं षोडशिका चाऽऽम्रं द्वे पले प्रसृतं विदुः॥

अष्टमानं तु विज्ञेयं कुडवौ द्वौ तु मानिका।
पलं चतुर्गुणं विद्यादञ्जलिं कुडवं तथा॥

चत्वारः कुडवाः प्रस्थश् चतुःप्रस्थमथाऽऽढकम्।
पात्रं तदेव विज्ञेयं कंसः प्रस्थाष्टकं तथा॥

कंसश् चतुर्गुणो द्रोणश् चार्मणं नल्वणं च तत्।
स एव कलशः ख्यातो घटमुन्मानमेव च॥

द्रोणस् तु द्विगुणः शूर्पो विज्ञेयः कुम्भ एव च।
गोणीं शूर्पद्वयं विद्यात् खारीं भारं तथैव च॥ इति

–चरकसंहितायाम्, कल्पस्थाने (१२।८७-९६)।

पलकुडवादीनामतो मानं तु व्याख्यास्यामः। तत्र द्वादशधान्यमाषाः मध्यमाः सुवर्णमाषकः, ते षोडश सुवर्णम्, अथवा मध्यमनिष्पावा एकोनविंशतिर् धरणम्, तान्यर्धतृतीयानि कर्षः, ततश् चोर्ध्वं चतुर्गुणमभिवर्धयन्तः पल-कुडव-प्रस्था-ऽऽढक-द्रोणा इत्यभिनिष्पद्यन्ते, तुला पुनः पलशतम्, ता पुनर् विंशतिर् भारः। इति

–सुश्रुतसंहितायाम्,चिकित्सास्थाने (३१।७)।

जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः।
प्रथमं तत् प्रमाणानां त्रसरेणुं प्रचक्षते॥

त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः।
ता राजसर्षपस् तिस्रस् ते त्रयो गौरसर्षपः॥

सर्षपा षड् यवो मध्यस् त्रियवं त्वेककृष्णलम्।
पञ्चकृष्णलको माषस् ते सुवर्णस् तु षोडश॥

पलं सुवर्णाश् चत्वारः पलानि धरणं दश।
द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः॥

ते षोडश स्याद् धरणं पुराणश् चैव राजतः।
कार्षापणस् तु विज्ञेयस् ताम्रिकः कार्षिकः पणः॥ इति

–मनुस्मृतौ (८।१३२-१३६)।

जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतम्।
तेऽष्टौ लिक्षा तु तास् तिस्रो राजसर्षप उच्यते॥
गौरस् तु ते त्रयः षट् ते यवो मध्यस् तु ते त्रयः।
कृष्णलः पञ्च ते माषस् ते सुवर्णस् तु षोडश।
पलं सुवर्णाश् चत्वारः पञ्च वाऽपि प्रकीर्तितम्॥ इति
—याज्ञवल्क्यस्मृतौ (१।३६२-३६३)।

माष-टङ्का-ऽक्ष-बिल्वानि कुडवः प्रस्थमाढकम्।
राशिर् गोणी खारिकेति यथोत्तरचतुर्गुणाः॥ इति
—शार्ङ्गधरसंहितायाम् (१।१।३२-३३)।

मृद्-वृक्ष-वेणु-लोहादेर् भाण्डं यच् चतुरङ्गुलम्।
विस्तीर्णं च तथोच्चं च तन्मानं कुडवं वदेत्॥ इति च
—तत्रैव (१।१।३५-३६)।

हस्तोन्मितैर् विस्तृतिदैर्घ्यपिण्डैर् यद् द्वादशाश्रं घनहस्तसंज्ञम्।
धान्यादिके यद् घनहस्तमानं शास्त्रोदिता मागधखारिका सा॥
द्रोणस् तु खार्याः खलु षोडशांशः स्यादाढको द्रोणचतुर्थभागः।
प्रस्थश् चतुर्थांश इहाऽऽढकस्य प्रस्थाङ्घ्रिराद्यैः कुडवः प्रदिष्टः॥ इति
—सिद्धान्तशिरोमणौ पाटीगणिताध्याये लीलावत्याम् (श्लो.७, ८)।

कुडवस्य प्रस्थचतुर्थभागत्वं महाभारतेऽपि—

अथ षष्ठे गते काले यवप्रस्थमुपार्जयन्।
यवप्रस्थं तु ते सक्तूनकुर्वन्त तपस्विनः॥
कृतजप्याह्निकास् ते तु हुत्वा चाऽग्निं यथाविधि।
कुडवंकुडवं सर्वे व्यभजन्त तपस्विनः॥ इति,
इत्युक्ता सा ततः प्राह धर्मार्थौ नौ समौ द्विज।
सक्तुप्रस्थचतुर्भागं गृहाणेमं प्रसीद मे॥ इत्यादि
चोक्त्वोल्लिखितं दृश्यते (आश्वमेधिके पर्वणि ९०।३२-३४,५०;
सातवलेकरसंस्करणे च ९३।९,१०; २३)।

एवं च लगधमुनिना ३$\frac{1}{8}$ पलानाम् १ कुडवः, ४ कुडवानाम् (१२$\frac{1}{2}$ पलानाम्) १ प्रस्थः, ४ प्रस्थानाम् (५० पलानाम्) १ आढकम्, ४ आढकानाम् (२०० पलानाम्) १ द्रोणम् इति मानमाश्रित्येदं नाडिकायन्त्रं नाडिकामानं च प्रतिपादितमवगन्तव्यम्।

यद्यपि काशीखण्डादिवचनेभ्यः चतुर्णां पलानामेकः कुडवः, चतुर्णां कुडवानाम् (१६ पलानाम्) एकः प्रस्थः, चतुर्णां प्रस्थानाम् (६४ पलानाम्) एक आढको भवतीति गम्यते तथापि लगधमुनिना स्वशास्त्रे व्यवहाराय पञ्चाशतः पलानामेक आढक उक्तो बोध्यः। ब्रह्माण्डपुराणादिषु च तथोक्तम्। लगधमुनिपरिभाषामादायैव वराहमिहिरेण बृहत्संहितायां "पञ्चाशत्पलमाढकमनेन मिनुयाज् जलं पतितम्" (श्लो.२३।२) इत्युक्तम्, तद्व्याख्याने भट्टोत्पलेन च पलशतद्वयात्मकं द्रोणं प्रतिपाद्य तत्र प्रमाणतया "पञ्चाशत्पलमाढकम्, चतुर्भिराढकैर् द्रोणः" इति वचनं प्रदर्शितमवगम्यते।

पल-कुडवयोरुक्तविधे सम्बन्धे स्वीकृते एव द्रोणपलेभ्यः त्रिषु कुडवेषु अपचितेषु $२००-३\frac{१}{८}\times३=२००-\frac{२५}{८}\times\frac{३}{१}=२००-\frac{७५}{८}=\frac{१६००-७५}{८}=\frac{१५२५}{८}=१९०\frac{५}{८}$ पलानि एकस्यां नाडिकायां भवन्ति। तेषां पलानां प्रस्थीकरणे $१९०\frac{५}{८}\div१२\frac{१}{२}=\frac{१५२५}{८}\div\frac{२५}{२}=\frac{१५२५}{८}\times\frac{२}{२५}=\frac{३०५०}{२००}=\frac{३०५}{२०}=\frac{६१}{४}$ प्रस्था भवन्ति। तेषां नाडिकाप्रस्थानां षण्मुहूर्त्याः १२ नाडिकाभिर् गुणने $\frac{६१}{४}\times१२=\frac{७३२}{४}=१८३$ प्रस्था भवन्ति। एवं च वेदाङ्गज्योतिषाऽनुसारं प्रतिदिनं प्रस्थमितजलमितेन कालेन उदगयने दिनवृद्धिः क्षपाह्रासश् च भवतः, दक्षिणायने दिनह्रासः क्षपावृद्धिश् च भवत इत्युक्तमप्युपपन्नं भवतीति च बोध्यम्।

विशेषः— एतत् पद्यं सोमाकरेणाऽपि व्याख्यातमेव। तथापि स्पष्टं सोपपत्तिकं व्याख्यानं तु शङ्करबालकृष्णदीक्षितेन कृतं दृश्यते। तदनुसारमेव बार्हस्पत्यसुधाकरादिभिरपि एतत् पद्यं व्याख्यातमवगम्यते॥२४॥

हिन्दी – पानी का ५० पल में तौला हुआ राशि एक आढक कहा जाता है। इस से द्रोण का परिमाण मापा जाना चाहिए। उस द्रोण को तीन कुडव से न्यून करना चाहिए। अवशिष्ट जल नाडिका को मापने वाला परिमाण होगा।

विशेष – यहां लगधमुनि का कुडव लोकप्रसिद्ध कुडव से भिन्न विशिष्ट पारिभाषिक कुडव है। इसी लिये यहां विशेष रूप से आढक का (और द्रोण का) परिमाणविशेष बताया गया है, अन्यथा लोकप्रसिद्ध द्रोण को ही लेकर नाडिका को मापने वाले जलका परिमाण बताया जा सकता था। इस पद्य में लगधमुनिप्रोक्त जलपरिमाणविशेष का नाडिका के मापन में प्रयोग से ही उत्तरायण में दिन की वृद्धि और रात के क्षय का तथा दक्षिणायन में रात की वृद्धि और दिन के क्षय का परिमाण बताने वाले *"घर्मवृद्धिरपां प्रस्थः"* इत्यादि पद्य में (श्लो.८) प्रतिपादित बात ठीक बैठती है। इस विषयका विशेष स्पष्टीकरण संस्कृतव्याख्यान में है॥२४॥

[इष्टतिथौ सूर्यनक्षत्रज्ञानस्योपायः]

एकादशभिरभ्यस्य पर्वाणि नवभिस् तिथिम्।
युगलब्धं सपर्व स्याद् वर्तमानार्कभं क्रमात्॥२५॥

(सोमाकरभाष्यम्)

तत्प्रसङ्गादुक्त्वा यागकालविधिविशेषमाह **पर्वाणी**ति। तदर्थानामवयवाः कलासमूहा येऽष्टकाः कार्या इत्युक्ताः षोडश वा चतुर्विंशतिर् वा द्वात्रिंशद् वा द्वित्रिचतुरंशानेकादशभिरभ्यस्य सङ्गुण्य षोडशानां षट्सप्तत्यधिकं शतं १७६ भवति। चतुर्विंशतेः शतद्वयं चतुःषष्टिः २६४। द्वात्रिंशतः शतत्रयं द्विपञ्चाशच् च ३५२। तथा नवभिस् तिथिं तिथ्यवयवानपि नवभिरभ्यस्य ते च सप्तानामष्टकानां षट्पञ्चाशत् ५६ भवन्ति। तान् नवभिरभ्यस्य शतपञ्चकं चत्वारि च ५०४। ता एकीकृत्य शतत्रयेण द्वापञ्चाशता च सह शताष्टकं षट्पञ्चाशच् च ८५६ भवति। तेषां युगलब्धं युगा द्वादशेह युगोपन्यासप्राधान्यात्। तैस् ततो भागमपहृत्य यल् लब्धमेकसप्ततिकं ७१ स पर्व स्याच् चतुरंशः स्यादिति शेषः। एवं त्र्यंशावयवैश् चतुःषष्ट्यधिकेन शतद्वयेन सहाष्टषष्ट्यधिकं शतसप्तकं ७६८ भवति। तस्य तथैव भागापहारे लब्धं चतुःषष्टिः ६४। तथैव द्व्यंशस्य शतषट्कमशीतिश् च ६८०। लब्धं तथैतत् षट्पञ्चाशत् ५६। कृत्ये च कदौपवसथे पर्वकाल इत्याह **वर्तमानार्कभक्रमात्**। यस्मिन्नृक्षे अर्क आस्ते तत उत्तरः काल इत्यर्थः। एष एव यागकालः। औपवसथे तु पूर्वोक्त एव। अथवैतमेवार्थमन्यथा। तिथिं त्रिंशत्सङ्ख्याकं नवभिर् गुणयेत् तथा तदा द्वापञ्चाशत् पञ्चचत्वारिंशदेकोनचत्वारिंशत् कला एकोनविंशतिमुद्वापं कृत्वा एवमेतयोः कालयोरुपक्रमापवर्गौ यथा भवतस् तथा वर्तितव्यम्। **"तमभ्युदितेष्टिपथिकृती दशमी प्रक्रान्ते वेदनिष्पत्तिं विद्याद्"** इति श्रुतेश् च। *एतदमावास्यामधिकृत्योक्तम्* ॥२५॥

(कौण्डिन्न्यायनव्याख्यानम्)

अथ तिथिविशेषे सूर्यनक्षत्रस्य ज्ञानस्योपायमाह शास्त्रकारः— एकादशभिरभ्यस्येत्यादिना।

श्रविष्ठादौ माघशुक्लप्रतिपदारम्भे प्रवृत्तस्य पञ्चवर्षात्मकस्य युगस्य गतानि पर्वाणि एकादशभिर् गुणयित्वा इष्टतिथौ गतं तिथिं नवभिर् गुणयित्वा गुणनफले सङ्कलय्य तं राशिं युगपर्वसङ्ख्यया विभज्य लब्धो राशिर् गतपर्वसङ्ख्यया युक्तः कृतश् चेत् श्रविष्ठातो गणितं तावत्सङ्ख्याकं नक्षत्रं वर्तमानसूर्य-नक्षत्रं स्यादित्यर्थः।

उदाहरणं यथा श्रविष्ठादौ माघशुक्लप्रतिपदि प्रवृत्तस्य युगस्य प्रथमपक्षस्य पञ्चदश्या आदौ सूर्यनक्षत्रं ज्ञेयं चेत् गतानि पर्वाणि ०, तस्य एकादशभिर् गुणने ०×११= ०, गततिथयः १४, तेषां नवभिर् गुणने १४×९=१२६, गुणनफलयोर् योगे ०+१२६=१२६, तस्याः सङ्ख्याया युगपर्वसङ्ख्यया विभजने १२६÷१२४=१$\frac{२}{१२४}$, तत्र गतपर्वसङ्ख्यायाः योजने १$\frac{२}{१२४}$+०=१$\frac{२}{१२४}$ इति श्रविष्ठातः प्रथमं नक्षत्रं चरित्वा द्वितीयस्य नक्षत्रस्य शतभिषजः १२४ भागेषु मध्ये द्वितीयं भागं भुक्त्वा सूर्यस् तृतीयभागादौ चरतीति ज्ञेयम्।

यदि तस्यैव युगस्य चतुर्थस्य पक्षस्य द्वितीयाया आदौ सूर्यस्य नक्षत्रं ज्ञेयं तर्हि गतानि पर्वाणि ३, तेषाम् एकादशभिर् गुणने ३×११=३३, गततिथिः १, तस्य नवभिर् गुणने १×९=९, गुणनफलयोर् योगे ३३+९=४२, तस्याः सङ्ख्याया युग-पर्वसंख्यया विभजने ४२÷१२४=$\frac{४२}{१२४}$, तत्र गतपर्वसङ्ख्याया योजने ३+$\frac{४२}{१२४}$=३$\frac{४२}{१२४}$ इति, श्रविष्ठातस् त्रीणि नक्षत्राणि चरित्वा चतुर्थस्य उत्तरभद्रपदयोर् नक्षत्रस्य १२४ भागेषु मध्ये ४२ भागाँश् चरित्वा ४३ तमे भागे सूर्यश् चरतीति ज्ञेयम्।

विशेषः—एतस्य श्लोकस्य शङ्करबालकृष्णदीक्षितेनाऽप्येतादृश एवाऽर्थः प्रतिपादितो दृश्यते। सुधाकरेणाऽपि दीक्षितव्याख्यानमेवाऽनुसृतं दृश्यते। पञ्च-सिद्धान्तिकायामपि द्वादशे पैतामहसिद्धान्ताध्याये तृतीये पद्ये अहर्गणात् तिथिज्ञानं सूर्यनक्षत्रज्ञानं चन्द्रनक्षत्रज्ञानं च प्रतिपादितमस्ति। अस्य श्लोकस्य सोमाकर-व्याख्यानं त्वस्फुटम्। थिबोमहाशयेनाऽयं श्लोकोऽप्यव्याख्यात एवाऽवगम्यते॥२५॥

हिन्दी– श्रविष्ठा (धनिष्ठा) नक्षत्र के आदि में माघशुक्लप्रतिपदा में प्रवृत्त पञ्च-वर्षात्मक युग के गत पर्वों को ११ से गुणा करके इष्ट तिथि में व्यतीत तिथियों की संख्या को ९ से गुणा करके दोनों गुणनफलों के जोड में युगपर्वों की सङ्ख्या (१२४) का भाग देना चाहिए और भागफल में गत पर्वों की सङ्ख्या जोडी जानी चाहिए। अब यह योगफल श्रविष्ठा (धनिष्ठा) से क्रमशः गिने हुए नक्षत्रों का बोधक होगा और यही नक्षत्र सूर्यका नक्षत्र होगा।

उदाहरण– धनिष्ठादि माघशुक्लप्रतिपदा में प्रवृत्त युग के चतुर्थ पक्ष की द्वादशी में सूर्य का नक्षत्र ज्ञेय हो तो गत पर्व ३, ग्यारह से गुणन करने पर ३×११=३३, गत तिथि ११, उस का नौ से गुणन करने पर ११×९=९९, गुणनफल के योग करने पर ३३+९९=१३२, उस का युगपर्वसंख्या से भाग देने पर १३२÷१२४=१$\frac{८}{१२४}$, वहां गतपर्वसङ्ख्या जोडने पर ३+१$\frac{८}{१२४}$= ४$\frac{८}{१२४}$, अतः धनिष्ठा से पांचवें रेवती नक्षत्र को सूर्य के वर्तमान नक्षत्र जाने। उपर्युक्त गणित से

चतुर्थ पक्ष की द्वादशी के आरम्भ में सूर्यद्वारा धनिष्ठा से चार नक्षत्रों को पार करके रेवती के १२४ भागों में से ८वें भाग को भी पार किया गया है, यह बात जानी जाती है॥२५॥

[सूर्यस्य नक्षत्रविशेषे प्रवेशस्य कालस्य ज्ञाने उपायः]

सूर्यर्क्षभागान् नवभिर् विभज्य
शेषं द्विरभ्यस्य दिनोपभुक्तिः।
तिथेर् युता भुक्तिदिनेषु कालो-
ऽयोगे दिनैकादशकेन तद् भम्॥२६॥

(सोमाकरभाष्यम्)

अथ भेदेन परिमाणमाह। यस्मिन् नक्षत्रे सूर्यः स्थितः स सूर्यर्क्षस् तस्य भागान् भुक्तान् भागान् उक्तानष्टसङ्ख्याकान्। अस्य (यस्य?) यावन्तः तान् नवभिर् विभज्य भागं दत्त्वा ततः शेषं द्विरभ्यस्य द्विगुणीकृत्य षोडशानां नव यात्यस्य सप्तांशा अवशिष्यन्ते ते द्विगुणाश् चतुर्दश भवन्ति। चतुर्विंशतेर् द्वौ नवकावष्टादश पात्य षडवशिष्यन्ते। ते द्विगुणा द्वादश भवन्ति। तथा द्वात्रिंशतस् त्रीन् नवकान् सप्तविंशतिं पात्य पञ्चाऽवशिष्यन्ते। ते द्विगुणा दश भवन्ति ततः किम्? सा दिनोपभुक्तिः सूर्यस्येति वाक्यशेषः। कथम्? शेषं तथैव विभज्येति वर्तते। एतदुक्तं भवति– यावद् यस्याऽवशिष्यते तद् द्विगुणं कृत्वा तथा विभज्य यस्य यावती भागावाप्तिस् तस्य तावती सूर्यभुक्तिरित्युक्तं भवति। द्व्यंशस्य द्व्यंशकलना यावत् त्र्यंशस्य त्र्यंशाश् चतुरंशस्य चतुरंशा एव भावः। दिनकालपरिमाणमाह– तिथीयुता भुक्तिदिनेषु कालः। तिथियुता सप्तगुणाष्टकाः सा षट्पञ्चाशत्परिमाणा भुक्तिः। सा च भुक्तिः सहिता द्वाभ्यां त्रिभिश् चतुर्भिर् वा सहिता अष्टपञ्चाशत् ५८। एकोनषष्टिः ५९। षष्टिः ६०। ता भागानां सङ्कलनया दिनेषु स कालो भवतीति वाक्यशेषः। एवं तु स्वपरिमाणेन दिनैकादशकेन तद्भम्। एकादशभिर् दिवसैः सूर्यर्क्षं व्याप्नोतीत्यर्थः। एवमेतद्योगे सभावे सूर्यस्य विचार्यमिति वाक्यशेषः॥२६॥

(कौण्डिन्न्यायनव्याख्यानम्)

सूर्यनक्षत्रज्ञानोपायं प्रदर्श्य शास्त्रकारस् तस्मिन् नक्षत्रे सूर्यस्य प्रवेशात् प्रभृति व्यतीतं सावनदिनमितं कालं ज्ञातुमुपायं प्रतिपादयति– सूर्यर्क्षभागा**नित्यादिना।**

सूर्येण भुज्यमानस्य नक्षत्रस्य अंशान् नवभिर् विभजेत्। (ततो लब्धां तिथिसङ्ख्याम् एकतः स्थापयित्वा) अवशिष्टान् नवमभागरूपान् अंशान् द्विगुणान् कृत्वा लब्धा सङ्ख्या तैरंशैः प्राप्या तिथिभुक्तांशातिरिक्त-दिनभोग्यांशरूपा दिनो-

पभुक्तिर् वेदितव्या। सा सङ्ख्या लब्धतिथेस् तिथिभुक्तांशातिरिक्तदिनभोग्यांश-रूपभुक्तिदिनसङ्ख्यासु युता कार्या। तस्या युताया दिनोपभुक्तेस् तिथीकृताया अयोगे सूर्यर्क्षभागनवविभक्तिफलात् तिथिरूपादपचये कृते फलं सूर्यस्य सम्बद्ध-नक्षत्रप्रवेशात् प्रभृति गतः सावनदिनमितः कालो ज्ञेयः, विचार्यमाणसूर्यप्रवेशसम्बद्धं भं तु दिनविशेषभज्ञानकरणसूत्ररूपेण एकादशशब्दारब्धेन श्लोकेन ज्ञेयमित्यर्थः।

उदाहरणं यथा श्रविष्ठादौ माघशुक्लप्रतिपदारम्भे प्रवृत्तस्य पञ्चवर्षात्मकस्य युगस्य चतुर्थस्य पक्षस्य प्रतिपदोऽन्ते सूर्येण भुक्ता उत्तरभद्रपदनक्षत्रस्य भागाः ४२ इति तान् नवभिर् विभजेत् (४२÷९= $४\frac{६}{९}$)। नवमभागरूपान् अंशान् द्विगुणान् कुर्यात् ($\frac{६}{९}\times२=\frac{१२}{९}=१\frac{३}{९}=१\frac{१}{३}$)। एषा संख्या ($१\frac{१}{३}$) षड्भिर् नवमांशैः प्राप्यायास् तिथिभुक्तांशातिरिक्त-दिनभोग्यांशरूपाया दिनोपभुक्तेर् बोधिका ज्ञेया। एतां सङ्ख्यां ($१\frac{१}{३}$) लब्धतिथीनां तिथिभुक्तांशातिरिक्त-दिनभोग्यांशरूपभुक्तिदिन-शब्दोक्तदिनोपभुक्ति-सङ्ख्यासु (४×२=८) योजयेत् ($१\frac{१}{३}+८=९\frac{१}{३}$)। ततस् तस्याः सङ्ख्यायास् तिथीकृतायाः ($\frac{९\frac{१}{३}}{१२४}$) सूर्यर्क्षभागनवविभक्तिफलात् तिथिरूपात् अपचये कृते फलं [$४\frac{६}{९}-\frac{९\frac{१}{३}}{१२४}=\frac{४२}{९}-(\frac{२८}{३}\div१२४)=\frac{१४}{३}-(\frac{२८}{३}\div\frac{१२४}{१})=\frac{१४}{३}-(\frac{२८}{३}\times\frac{१}{१२४})=\frac{१४}{३}$ $-(\frac{७}{३}\times\frac{१}{३१})=\frac{१४}{३}-\frac{७}{९३}=\frac{१४}{३}\times\frac{३१}{३१}-\frac{७}{९३}=\frac{४३४}{९३}-\frac{७}{९३}=\frac{४३४-७}{९३}=\frac{४२७}{९३}=४\frac{५५}{९३}$] सूर्यस्य तस्मिन् नक्षत्रे प्रवेशात् प्रभृति गतः सावनदिनमितः कालो ज्ञेयः। एवं च उक्तायाः प्रतिपदोऽन्ते सूर्यस्योत्तरभद्रपदनक्षत्र-प्रवेशात् प्रभृति $४\frac{५५}{९३}$ सावनदिनमितः कालो व्यतीत इति ज्ञेयम्। यस्मिन् नक्षत्रे सूर्यस्य प्रवेशस्य विचारः कृतस् तन् नक्षत्रं तु पूर्वश्लोकोक्त-रीत्या ज्ञातम् उत्तरभद्रपदनक्षत्ररूपं नक्षत्रमेवेति ज्ञेयम्।

विशेषः— एतत् पद्यं ऋग्वेदिनां परम्परयाऽऽगते वेदाङ्गज्योतिषग्रन्थे नाऽस्ति। शङ्करबालकृष्णदीक्षितेनेदं पद्यं नैव व्याख्यातम्। अतोऽन्यैरपि तत्पूर्व-वर्तिभिरव्याख्यातमेवाऽवगम्यते। अस्य श्लोकस्य व्याख्यायां बार्हस्पत्येन प्रदर्शिता रीतिः सुधाकरेण प्रत्याख्याता दृश्यते। सुधाकरेण चेदं पद्यं स्वरीत्या व्याख्यातम्। बार्हस्पत्यसुधाकरयोर् निष्कर्षस् तु समान एवेति बालगङ्गाधरतिलकः कथयति। तिलकेनाऽपि स्वोत्प्रेक्षिताऽस्य पद्यस्य व्याख्यानस्य रीतिः प्रदर्शिता। किन्तु तदीयायां रीत्यां प्रथमेन पादेन यत् फलमागच्छति सम्पूर्णेन श्लोकेनाऽपि तदेव फलमागच्छतीति तेन प्रस्तुता सा रीतिर् निष्फलप्राया दृश्यते। अस्माभिस् तु बाल-

गङ्गाधरतिलकरीतिमपि विचार्य सुधाकररीतौ परिष्कारं कृत्वेदं पद्यं व्याख्यातं बोध्यम्। एतस्य पद्यस्य शामशास्त्रिकृता व्याख्या जैनग्रन्थैरनावश्यकरूपेणाऽनुचितरूपेण च प्रभावितत्वादसङ्गता दृश्यते। तद्वर्णितयोगस्य श्रौत-स्मार्तयज्ञप्रतिपादके श्रुति-श्रौतसूत्र-गृह्यसूत्रादिवाङ्मये काऽप्यपेक्षा नाऽस्ति। पञ्चसिद्धान्तिकाया द्वादशेऽध्याये व्यतिपातानामुल्लेखे सत्यपि तेषामपि श्रुतिसूत्रवाङ्मयेऽनपेक्षितत्वं बोध्यम्। वृत्तपूरणाय ग्रन्थकारेणेदं शिथिलरचनं सूत्रं कृतं प्रतीयते। एतस्मिन् पद्ये हस्तलेखे 'योगं' इति लेखो दृश्यते। अस्माभिस् तु अपेक्षितार्थानुसारं 'योगे' इति पाठं स्वीकृत्य 'अयोगे' इति च्छेदं कृत्वाऽर्थः प्रतिपादितो बोध्यः। अत्र वृत्तानुरोधाद् दिनोपभुक्ति-भुक्तिदिनशब्दौ पर्यायतया प्रयुक्तौ ज्ञेयौ॥२६॥

हिन्दी– सूर्य से भोगे जा रहे नक्षत्र के अंशों को ९ का भाग दे और लब्धि को तिथि के रूप में लेकर शेष को तिथीकृत करके २ से गुणा करे, यह गुणनफल उक्त तिथीकृत अंशों से भोगे गए अंशो से अतिरिक्त दिनभुक्तांश होता है, इस को उक्त लब्धि से सूचित तिथियों से भोगे गए अंशों से अतिरिक्तदिनभुक्तांशों में युक्त करे और इस योगफल को सूर्य-भुक्त नक्षत्रांश से सम्बद्ध तिथिकाल से घटाने पर जो फल होता है उस को सूर्य के सम्बद्ध नक्षत्र में प्रवेश से बीते हुए सावनदिनमित काल जाने। सूर्यप्रविष्ट नक्षत्र तो पूर्वोक्त दिनविशेष में सूर्य का नक्षत्रविशेष में प्रवेश को दिखाने वाले करणसूत्ररूप तथा एकादश-शब्द से आरब्ध श्लोक से जाने।

उदाहरण— श्रविष्ठादि में माघशुक्लप्रतिपदा के आरम्भ में प्रवृत्त पञ्चवर्षात्मक युग के चतुर्थ पक्ष के प्रतिपदा के अन्त में सूर्यभुक्त उत्तरभद्रपद नक्षत्र के भाग ४२ हैं। इन भागों को नौ से भाग देने पर ($४२÷९= ४\frac{६}{९}$)। तिथीकृत नवमभागरूप अंशों को दो से गुणन करने पर ($\frac{६}{९}\times२=\frac{१२}{९}= १\frac{३}{९}= १\frac{१}{३}$)। यह सङ्ख्या ($१\frac{१}{३}$) छह नवमांशों से प्राप्य तिथिभुक्तांशातिरिक्त-दिन-भोग्यांशरूप दिनोपभुक्ति की बोधिका है। इस सङ्ख्या को ($१\frac{१}{३}$) लब्ध तिथियों का तिथिभुक्तांशातिरिक्त-दिनभोग्यांशरूप की (दिनोपभुक्ति की) भुक्ति-दिन-सङ्ख्या में ($४\times२=८$) जोडे ($१\frac{१}{३}+८=९\frac{१}{३}$)। इस के वाद तिथीकृत उक्त सङ्ख्या का ($\frac{९\frac{१}{३}}{१२४}$) सूर्यभुक्त नक्षत्रभाग को नौ से भाग देने पर प्राप्त तिथिबोधक सङ्ख्या से घटाने पर [$४\frac{६}{९}-\frac{९\frac{१}{३}}{१२४}=\frac{४२}{९}-(\frac{२८}{३}÷१२४)=\frac{१४}{३}-(\frac{२८}{३}÷\frac{१२४}{१})=\frac{१४}{३}-(\frac{२८}{३}\times\frac{१}{१२४})=\frac{१४}{३}-(\frac{७}{३}\times\frac{१}{३१})=\frac{१४}{३}-\frac{७}{९३}=\frac{१४}{३}\times\frac{३१}{३१}-\frac{७}{९३}=\frac{४३४}{९३}-\frac{७}{९३}=\frac{४३४-७}{९३}=\frac{४२७}{९३}=४\frac{५५}{९३}$] फल को सूर्य का उस नक्षत्र में प्रवेश से व्यतीत सावनदिनमित काल जानना

चाहिए। इस प्रकार उक्त प्रतिपदा के अन्त में सूर्य का उत्तरभद्रपद नक्षत्र में प्रवेश से ४$\frac{५५}{९३}$ सावनदिनतुल्य काल व्यतीत हुआ, ऐसा जानना चाहिए। सूर्य का वर्तमान नक्षत्र तो पूर्वश्लोकोक्त रीति से ज्ञात उत्तरभद्रपद नक्षत्र ही है, ऐसा जाने।

विशेष– यह पद्य ऋग्वेदियों की परम्परा के वेदाङ्गज्योतिषग्रन्थ में नहीं है। शङ्करबालकृष्ण दीक्षित ने इस पद्य की व्याख्या नहीं की। इस श्लोक की व्याख्या की बार्हस्पत्य की रीति में सुधाकर द्विवेदी ने दोष दिखाया है। सुधाकर ने इस पद्य की अपनी रीति से व्याख्या की है। बार्हस्पत्य और सुधाकर दोनों का निष्कर्ष समान होने की बात बालगङ्गाधर तिलक ने कही है। तिलक ने भी इस पद्य की स्वोत्प्रेक्षित व्याख्यानरीति प्रदर्शित की है। किन्तु उन की रीति में प्रथम पाद से जो फल आता है, सम्पूर्ण श्लोक से भी वही फल आता है। अतः उनकी वह रीति निष्फलप्राय दीखती है। हमने तो बालगङ्गाधर तिलक की रीति को भी विचार में रखकर सुधाकरप्रस्तुत रीति में परिष्कार करके इस पद्य का व्याख्यान किया है। इस पद्य की शामशास्त्री की व्याख्या और उसी का सत्यप्रकाश डी. एस्सी. से किया गया अनुकरण दोनों ही जैन ग्रन्थों से अनावश्यक और अनुचित रूप से प्रभावित होने से असङ्गत दिखाई देते हैं। उन लोगों से बताए गए योग का श्रौत-स्मार्त यज्ञों के प्रतिपादक श्रुति-श्रौतसूत्र-गृह्यसूत्रादि वाङ्मय में कोई अपेक्षा नहीं है॥२६॥

[रविदिवसभोग्यनक्षत्रांशमानादिकम्]

त्रिंशी भशेषो दिवसांशभागश्
चतुर्दशस्याऽप्युपनीय भिन्नम्।
भार्धाऽधिके चाऽपि गते परोऽंशो
द्वावुक्तमेकं नवके रवेर् द्यु॥२७॥

(सोमाकरभाष्यम्)

सन्दिग्धकालपरिमाणमाह–**त्र्यंशी भशेषो दिवसांशभाग** इति। तद् रवेर् द्युर् भवेदिति शेषः। तत्परिमाणं त्र्यंशः। तत्परिमाणमष्टौ। तथा दिवसचोदनाः सप्तगुणाः षट्-पञ्चाशत्प्रमाणं तत्सङ्ख्याकां तिथिं किं समग्राम्? त्र्यंशी भशेषं दिवसांशभागं चतुर्दशं चाप्यपनीय तस्या अपनीय यथैकत्वं प्रागुक्तं तथा कल्पनया नवकैर् भिन्नं द्वावुत्तमे तु द्व्यंशाद्यपेक्षया पञ्च षट् सप्त वा भवन्ति। तत्। तथा दिवसांशभागं चतुर्दशं चाप्यपनीय ते अष्टानामर्धे चत्वार एवं षट्पञ्चाशत्। तान् नव वा दश वैकादश वा पात्य सप्त-चत्वारिंशत् ४७। षट्चत्वारिंशत् ४६। पञ्चचत्वारिंशत् ४५ वाऽवशिष्यते। तेषामादौ अंशा अष्टौ तथोपरिष्टादन्यः परोऽंशस् तेऽप्यष्टौ। एवं द्युरेकषष्टिर् द्वाषष्टिस् त्रिषष्टिर् वा नक्षत्रापेक्षया भवति। एतत् तदार्क्षं सौरम्। सोमस्य यस्यां तिथिकल्पनायामिह प्रमाणं

नक्षत्रापेक्षया किमेव भवतीति नाक्षत्री भुक्तिः। नभे गते नभे नक्षत्रेऽतीते अधिके च काले वा सति तत्र किं परोंशो भवेदिति वाक्यशेषः। किं सर्वकाले? न। द्वावुत्तरे एवं कालगत्यपेक्षया पश्चिमे द्वौ पञ्चांशौ भवतः। *एवमेतस्यां कल्पनायां ग्रहगणितं तद् बहुगणितसापेक्षत्वान् न पर्यालोचितम्। तत् तु गणितज्ञाः स्फुटतरं कल्पयिष्यन्ति। तेषां त्वागमप्रतिपत्तये पदार्थमेवं श्रुतिपुराणप्रतिपादितम्* ॥२७॥

(कौण्डिन्न्यायनव्याख्यानम्)

रविदिवसप्रमाणादिकमाह शास्त्रकारः—त्रिंशी भशेष **इत्यादिना।**

चतुर्विंशशतभागरूपसूर्यनक्षत्रांशानामेकस् त्रिंशी भागः ($१\frac{१}{३०}$) **रविदिवसमितस्य सूर्यभोग्यनक्षत्रांशसमूहस्य भागो भवति, स च भागो भिन्नमुपनीयोपात्तस्य** सावनदिनांशचतुर्दशकस्याऽपि ($१४\frac{१}{१३५}$) अनुरूपो भवति। **भुक्तरविनक्षत्रभागेषु व्यतीतानां रविदिनानां ज्ञानार्थं रविणा भार्धाऽधिके चापि भुक्ते सति गणितलाघवाय भुक्तात् परोऽवशिष्टांशो ग्रहीतुं शक्यः।** रविनक्षत्रभागरूपस् त्रिंशी अंशः ($१\frac{१}{३०}$), सावनदिनभागश्च ($१४\frac{१}{१३५}$) द्वौ एव एकम् (तुल्यम्) उक्तम्, **प्रत्येकं नवकैरभ्यासे एतद्द्वयमेव रवेर् द्यु चोक्तमित्यर्थः।** तत्र नवकेन नक्षत्रांशस्य गुणने **रविद्युभोग्यनक्षत्रांशमानम्** ($१\frac{१}{३०}\times९=९\frac{३}{१०}$), सावनदिनांशानां गुणने **सावनदिनांशरूपं रविद्युमानम्** ($१४\frac{१}{१३५}\times९=१२६\frac{१}{१५}$) भवति। सावनदिनाऽंशात्मकं रविद्युमानं तु गर्गेण **"शतं लवानां षड्विंशं लवपञ्चदशस् तथा"** इत्युक्तम् (सोमाकरभाष्ये, श्लो.११)। **तत्र सुधाकरसंस्करणपाठोऽस्माभिः संशोधितो ज्ञेयः।** संस्कृतभाषाज्ञानमान्द्यात् म्याक्समूलरेण तु ऋग्वेदचतुर्थखण्डभूमिकायां तस्य गर्गवाक्यस्याऽर्थोऽन्यथा वर्णितो दृश्यते। **भुक्तसूर्यनक्षत्रभागेषु व्यतीतरविद्युज्ञानाय च सूर्यभुक्तनक्षत्रांशसङ्ख्याया रविद्युनक्षत्रांशमानेन** ($९\frac{३}{१०}$) **विभागः कर्तव्यः।** तेन **सूर्यः त्रयोदश रविदिनानि ततोऽतिरिक्तं रविदिनस्य एकं तृतीयभागमपि** ($१२४\div९\frac{३}{१०}=१२४\div\frac{९३}{१०}=१२४\times\frac{१०}{९३}=\frac{४\times१०}{३}=\frac{४०}{३}=१३\frac{१}{३}$) **च एकेन नक्षत्रेण युक्तो भवतीत्यपि स्पष्टं भवति। रविनक्षत्रभोगस्य सावनदिनात्मकं मानं तु शास्त्रकारः "सूर्यो द्यूनि त्रयोदश। नवमानि च पञ्चाऽहः"** (श्लो.३९) **इति कण्ठरवेणैव वक्ष्यति। भुक्तसूर्यनक्षत्रभागेषु व्यतीतरविद्युज्ञानाय उदाहरणं यथा– श्रविष्ठादौ माघशुक्लप्रतिपदारम्भे प्रवृत्तस्य पञ्चवर्षात्मकस्य युगस्य षष्ठपक्षस्य पञ्चम्या अन्ते सूर्येण भुक्ता अश्वयुजोर् नक्षत्रस्य अंशाः १००**

इति तेषां भार्धाधिकत्वात् परांशग्रहणाय १२४ अंशेभ्यस् तेषामपचये कृते १२४-१००=२४ इति तेषां रविद्युनक्षत्रांशमानेन ($९\frac{३}{१०}$) विभागे ($२४ \div ९\frac{३}{१०} = २४ \div \frac{९३}{१०} = \frac{२४\times१०}{९३} = \frac{८\times१०}{३१} = \frac{८०}{३१} = २\frac{१८}{३१}$)। एषा संख्या ($२\frac{१८}{३१}$) षष्ठनक्षत्रपूरणाय अवशिष्टरविदिनबोधिका ज्ञेया। ततस् तस्याः संख्यायाः ($२\frac{१८}{३१}$) सूर्यस्य रविदिनात्मकनक्षत्रभोगकालरूपायाः सङ्ख्यायाः कृतः अपचयः [$१३\frac{१}{३} - २\frac{१८}{३१} = \frac{४०}{३} - \frac{८०}{३१} = \frac{४०\times३१}{३\times३१} - \frac{८०\times३}{३१\times३} = \frac{१२४०}{९३} - \frac{२४०}{९३} = \frac{१२४०-२४०}{९३} = \frac{१०००}{९३} = १०\frac{७०}{९३}$] सूर्यस्य तस्मिन् नक्षत्रे प्रवेशात् प्रभृति व्यतीतो रविदिनात्मकः कालो ज्ञेयः। एवं च उक्तायाः पञ्चम्या अन्ते सूर्यस्य अश्वयुङ्-नक्षत्र-प्रवेशात् प्रभृति $१०\frac{७०}{९३}$ रविदिनानि व्यतीतानीति ज्ञेयम्। यस्मिन् नक्षत्रे सूर्यस्य प्रवेशस्य विचारः कृतस् तन् नक्षत्रं तु पूर्वोक्तेनैव "एकादशभिरभ्यस्य" इति (श्लो.२५) श्लोकेनोक्तया रीत्या ज्ञातम् अश्वयुङ्नक्षत्ररूपं नक्षत्रमेवेति ज्ञेयम्।

अत्रोपपत्तिः— मूलोक्तस्य रविदिवसादिमानस्योपपत्तिश् चैवं ज्ञेया। एकस्मिन् १८३० सावनदिनात्मके युगे सूर्यः २७×५=१३५ नक्षत्राणि भुङ्क्ते इति स्वीक्रियते। अतः$\frac{१८३०}{१३५} = १३\frac{५}{९}$ इति, सूर्यः त्रयोदशभिर् अहोरात्रैर् अहोरात्रस्य नवानां समभागानां मध्ये पञ्चभिर् भागैश् चैकं नक्षत्रं भुङ्क्ते इति वक्ष्यति शास्त्रकारः (श्लो.३९)। एकस्मिन् नक्षत्रे च १२४ अंशाः भवन्ति। ततः सूर्यस्य १२४ नक्षत्रांशैस् तु $१३\frac{५}{९}$ सावनदिनानि, अर्थात् $१३\frac{५}{९}\times१२४ = \frac{१२२}{९}\times१२४ = \frac{१२२\times१२४}{९}$ सावनदिनांशाः प्राप्यन्ते तर्हि त्रिंशिना एकेन नक्षत्राऽंशेन कति सावनदिनांशाः लभ्यन्ते इति त्रैराशिके कृते $(\frac{१२२\times१२४}{९} \div १२४)\times१\frac{१}{३०} = (\frac{१२२\times१२४}{९} \div \frac{१२४}{१})\times१\frac{१}{३०} = (\frac{१२२\times१२४}{९}\times\frac{१}{१२४})\times१\frac{१}{३०}$ $= \frac{१२२}{९}\times१\frac{१}{३०} = \frac{१२२}{९}\times\frac{३१}{३०} = \frac{६१}{९}\times\frac{३१}{१५} = \frac{६१\times३१}{९\times१५} = \frac{१८९१}{१३५} = १४\frac{१}{१३५}$ सावनदिनांशा लभ्यन्ते इति ज्ञायते। एतस्या एव सङ्ख्याया नवभिर् गुणने कृते सूर्येण एकस्मिन् रविदिवसे भोग्या सावनदिनांशाः $१४\frac{१}{१३५}\times९ = \frac{१८९१}{१३५}\times९ = \frac{१८९१}{१५} = १२६\frac{१}{१५}$ लभ्यन्ते। तथा च सूर्यनक्षत्रभागरूपस्य त्रिंशिनोऽंशस्य ($१\frac{१}{३०}$) नवभिर् गुणने सूर्येण एकस्मिन् रविदिवसे भोग्या नक्षत्रांशाः $१\frac{१}{३०}\times९ = \frac{३१}{३०}\times९ = \frac{३१}{१०}\times३ = \frac{९३}{१०} = ९\frac{३}{१०}$ लभ्यन्ते। अर्धदिनयुक्तः सावनो मासः सौरो मासः स्वीक्रियत इति वक्ष्यति शास्त्रकारः (श्लो.३१)। ततः सूर्यस्य एकेन मासेन (३० रविदिवसैः) तु $३०\frac{१}{२}$ सावनदिनानि

अर्थात् ३०$\frac{१}{२}$×१२४=$\frac{६१}{२}$×१२४ =६१×६२=३७८२ सावनदिनांशाः प्राप्यन्ते तर्हि एकेन रविदिवसेन कति सावनदिनांशाः लभ्यन्ते इति त्रैराशिके कृते ३७८२÷३०=१२६$\frac{१}{१५}$ सावनदिनांशा लभ्यन्ते इति ज्ञायते। इयमेव रविद्युनः सावनदिनांशसङ्ख्या नवभिः पूर्वोक्तसङ्ख्यायाः (१४$\frac{१}{१३५}$) गुणने लभ्या भवतीति सिद्धम्।

विशेषः— एतत् पद्यं शङ्करबालकृष्णदीक्षितेन व्याख्यातं न दृश्यते। अतस् तत्पूर्ववर्तिभिरन्यैराधुनिकैर् व्याख्यातृभिश् चैतत् पद्यमव्याख्यातमवगम्यते। बार्हस्पत्येन यथार्थरूपेण न व्याख्यातमिति बालगङ्गाधरतिलकः कथयति। सुधाकरेणैतत् पद्यं सूर्यस्य नक्षत्रभोगकालपरकरूपेण क्लिष्टकल्पनां कृत्वा व्याख्यातं दृश्यते। किन्तु सूर्यस्य नक्षत्रभोगकालस् तु "ससप्तकं भयुक् सोमः सूर्यो द्यूनि त्रयोदश" (श्लो.३९) इत्यत्र कण्ठरवेणैव प्रतिपादित इति क्लेशेनाऽत्र पुनरुक्ततया सूर्यनक्षत्रभोगकालानयनमयुक्तमिति अस्य पद्यस्य सुधाकरव्याख्यानमयुक्तमिति बालगङ्गाधरतिलकोऽपि कथयति। युज्यते चैतत्। बालगङ्गाधरतिलकेन तु "कार्या भांशाष्टकस्थाने" (श्लो. १९) इत्यादिश्लोकस्य उत्तरार्धेन सह संयोज्य एतत् पद्यम् ऋग्वेदिनां परम्परयाऽऽगते पाठे स्वल्पं संशोधनं च कृत्वा स्वरीत्या विस्तरेण व्याख्यातम्। एतस्य पद्यस्य तदीयोऽर्थश् च 'भिन्नसङ्ख्यां त्यक्त्वा गणितः स्वतृतीयांशेन युक्तः प्रथमपक्षान्ते दृश्यो भांशः (७३+$\frac{१}{३}$×७३=९७[$\frac{१}{३}$], ९८) पक्षगतनक्षत्रचतुर्दशकस्यैव काले प्रविष्टः सावनदिवसकलारूपो भागो ज्ञेयः, द्वितीयादिषु पक्षेषु भार्धेऽधिके चाऽप्यन्यस्मिन् भांशे पर्वनक्षत्रात् पूर्वं व्यतीते सति द्वौ भार्धौ एकं नक्षत्रं भूतं सत् तदपि सर्वं नक्षत्रजातं प्रत्येकं कलानवकेन गणनीयत्वेन वेद्यम्' इत्यस्ति। किन्तु तदीयं व्याख्यानं चिन्त्यतरं दृश्यते। यतो हि "कार्या भांशाष्टकस्थाने" इत्यादिकश्लोकोक्तप्रकारेण अस्मद्व्याख्यातदिशा यथार्था एव पर्वभादानकला आगच्छन्ति। तिलकरीत्या व्याख्याने कृतेऽपि पर्वनक्षत्रप्रवेशकलासु ४ कलापर्यन्ताया अशुद्धेर् विद्यमानत्वं स्वयं तिलकः स्वीकरोतीति तदीया व्याख्या अयथार्था इति सुखेनैव ज्ञातुं शक्यते। अतो बालगङ्गाधरतिलकव्याख्यानमप्ययुक्तमेवेति स्पष्टं भवति। शामशास्त्रिण एतस्य पद्यस्य व्याख्यानं तदनुयायिनः सत्यप्रकाशस्य व्याख्यानं चाऽयथार्थमेव दृश्यते। अस्माभिस् तु प्राचीनहस्तलेखादिस्थं 'त्रिंशी' इत्यादिकान् युक्तियुक्तान् पाठानादाय व्याख्यानं कृतं बोध्यम्। एतस्य पद्यस्याऽस्माभिः प्रतिपादितोऽर्थः सम्मोदवर्धनेन विशेषतः प्रकटीकृतो ज्ञेयः ॥२७॥

हिन्दी – तीसवें भाग से सहित सूर्यनक्षत्रांश का एक भाग ($१\frac{१}{३०}$) एक रविदिन में सूर्यभोग्य नक्षत्रांशसमूह का भाग होता है। वह भाग सावनदिन के भिन्नाङ्कसहित चौदह अंशों के समूह का भी ($१४\frac{१}{१३५}$) अनुरूप होता है। भुक्त रविनक्षत्रभागों में व्यतीत रविदिन के सङ्ख्या के ज्ञान के लिए सूर्य से आधे से अधिक नक्षत्र का भोग किए जाने पर गणित में लाघव करने के लिए भुक्त से अगले अंश का ग्रहण करना चाहिए। रविनक्षत्रभागरूप त्रिंशी अंश ($१\frac{१}{३०}$) और पूर्वोक्त सावनदिनभाग ($१४\frac{१}{१३५}$) दो ही एक (तुल्य) ही बताए गए हैं और प्रत्येक को नौ से गुणन करने पर रविदिवस होता है। वहां नक्षत्रांश का नौ से गुणन करने पर नक्षत्रांशमान में रविदिवस आता है ($१\frac{१}{३०}\times९=\frac{३१}{३०}\times ९ =\frac{३१}{१०}\times३=\frac{९३}{१०}=९\frac{३}{१०}$) और सावनदिनांशों का नौ से गुणन करने पर सावनदिनांशमान में रविदिवस आता है ($१४\frac{१}{१३५}\times९=\frac{१८९१}{१३५}\times९=\frac{१८९१}{१५}=१२६\frac{१}{१५}$), यह बात जाननी चाहिए। [सावनदिनांशों में रविदिवसमान गर्गवचन में (सोमाकरभाष्य, श्लो.११) स्पष्ट रूप में प्रतिपादित है। वह गर्गवचन म्याक्समूलर की ऋग्वेद-चतुर्थखण्ड-भूमिका में भी उद्धृत है, किन्तु संस्कृतभाषाज्ञान की न्यूनता से म्याक्समूलर ने उस का गलत अर्थ किया है।]

विशेष – इस पद्य की व्याख्या शङ्करबालकृष्णदीक्षित ने नहीं की। अतः तत्पूर्ववर्ती अन्य आधुनिक अध्येताओं से भी यह पद्य अव्याख्यात अवगत होता है। बार्हस्पत्य और सुधाकर की व्याख्या में अरुचि दिखाकर बालगङ्गाधर तिलक ने ऋग्वेदियों की परम्परा से आए हुए पाठ में कुछ संशोधन करके *"कार्या भांशाष्टकस्थाने"* इत्यादि श्लोक (श्लो. १९) के उत्तरार्ध से जोडकर अपनी रीति से इस पद्य की व्याख्या की है। किन्तु उस श्लोक के उत्तरार्धका और उस से जोडकर पर्वभादानकला निकालने के विधि के रूप में बालगङ्गाधर तिलक से किया गया इस पद्य का व्याख्यान सर्वथा समुचित प्रतीत नहीं होता है। तिलक के व्याख्यान के अनुसार उतना करने पर भी पर्वनक्षत्र के प्रवेश की दिनकलाओं में ४ कला तक की अशुद्धि विद्यमान रहने की बात स्वयं तिलकद्वारा ही स्वीकार किये जाने से उनकी व्याख्या अयुक्त ही सिद्ध होती है। शामशास्त्री का और तदनुयायी सत्यप्रकाश डी. एस्सी. का व्याख्यान भी अयथार्थ ही दिखाई देता है। हम लोगों ने प्राचीन हस्तलेखादि में प्राप्त 'त्रिंशी' इत्यादि युक्तियुक्त पाठों को लेकर अर्थ किया है॥२७॥

[युगस्याऽवयवानामहरादीनां सङ्ख्या]

त्रिशत्यह्नां सषट्षष्टिरब्दः षट् चर्तवोऽयने।
मासा द्वादश सौराः स्युरेतत् पञ्चगुणं युगम्॥२८॥

(सोमाकरभाष्यम्)

एवमेतत् पूर्णमासस्य दर्शस्य चन्द्रसूर्यसम्बन्धेन पर्वसञ्चोदनया यागकालं प्रतिपाद्याऽवयवानां सङ्ख्या तेन कालनिष्पत्तिप्रतिपत्त्यर्थमाह– **त्रिशत्यह्नां सषट्षष्टिरब्द**

इति। त्रयाणां शतानां समाहारस् त्रिशती या सा सषट्षष्टिः। षट्षष्ट्यधिकानि त्रीणि शतानीत्युक्तं भवति। ततः किम्? तदब्दो वर्षमितिर् भवतीति वाक्यशेषः। स च पञ्चर्तवः **"पञ्च वा ऋतवः"** (ऐतरेयिब्राह्मणे १।१) इति श्रुतिमभिप्रेत्य निरुक्तकृत् **"पञ्चर्तवः संवत्सरस्य"** इत्याह (४।४।६)। तथा तस्यायने द्वे उदग्-दक्षिणे इति तस्य ते। तयोर् मासा द्वादश भवन्तीति वाक्यशेषः। तेषु तु सूर्याश्रयणादर्का द्वादश स्युः। **"मासविभागेन द्वादशादित्याः"** इति श्रुतेः। **"ब्रह्म वा एष इतस् तपति यद्वशतः"** इत्याद्या विभागचोदना। एवमेतत्समग्रमेकीभूतम्। एतत् पञ्चगुणं युगम्। यदिह युगाध्यक्षमित्यादौ युगमधिकृतं तस्यैषा प्रतीतिर् न कृतादीनाम्। एते तु द्वादश पूर्वमेवेह कृतास् तत्प्राधान्येन शास्त्रप्रवृत्तिः। तस्य दिनानि॥२८॥

(कौण्डिन्न्यायनव्याख्यानम्)

ग्रन्थारम्भे उद्दिष्टानां पञ्चवर्षात्मकस्य युगस्य दिनर्त्वयनमासरूपाणामङ्गानां सङ्ख्यां कालगणनाधारभूतां प्रतिपाद्य युगस्वरूपं स्पष्टीकरोति शास्त्रकारः— त्रिशत्यहन्नामित्यादिना।

अह्नां षट्षष्टिसहिता त्रिशती (३६६) वर्षं भवति, षट् च ऋतवो वर्षं भवति, द्वे अयने च वर्षं भवति, सौरा द्वादश मासाश् च वर्षं स्युः, पञ्चगुणम् एतद् युगमुच्यते इत्यर्थः। एवं च एकस्मिन् सौरे ऋतौ ३६६÷६=६१ दिनानि भवन्ति, एकस्मिन् सौरे अयने ३६६÷२=१८३ दिनानि भवन्ति, एकस्मिन् सौरे मासे ३६६÷१२=३०$\frac{1}{2}$ दिनानि भवन्ति, एकस्मिन् युगे च ३६६×५=१८३० दिनानि, ६×५=३० ऋतवः, २×५=१० अयनानि, १२×५=६० सौरमासाश् च भवन्तीति ज्ञेयम्। अत्र यद्यपि "पञ्चर्तवः" इत्यपि पाठो दृश्यते, स च पाठः श्रुतौ श्रुतस्य पञ्चर्तुपक्षस्याऽनुकूलोऽप्यस्ति, तथाऽपि ग्रन्थेऽस्मिन् शास्त्रकारेण श्रुतौ श्रुतस्य षड्ऋतुपक्षस्य **"अर्धपञ्चमभस् त्वृतुः"** (श्लो.१०) इत्यादिनाऽऽश्रयणं कृतमित्यवगम्यते इति **"षट् चर्तवः"** इति पाठ एव समुचितः।

विशेषः— लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थानुसारिणी सौरमानगणना च ब्रह्माण्डपुराणेऽपि दृश्यते। तथाहि—

त्रिंशच्छतं (विंशं शतं) भवेत् पूर्णं पर्वणां तु रवेर् युगे।
शतान्यष्टादश त्रिंशदुदयाद् (या) भास्करस्य च॥
ऋतवस् त्रिंशतः सौरादयनानि दशैव तु।
पंच च त्रिंशतं चाऽपि षष्टि वर्षं च भास्करम्॥

त्रिंशदेव त्वहोरात्रास् तैस् तु मासस् तु भास्करः।
एकषष्टि त्वहोरात्रमृतुरेको विभाव्यते॥
अह्नां तु त्र्यधिकाशीतिः शतं चाऽप्यधिकं भवेत्।
मानं तच् चित्रभानोस् तु विज्ञेयमयनस्य ह॥
सौरं सौम्यं तु विज्ञेयं नाक्षत्रं सावनं तथा।
मानान्येतानि चत्वारि यैः पुराणे हि निश्चयः॥

इति (१।२१।१३३-१३७)।

तथा वायुपुराणेऽपि—

विंशशतं भवेत् पूर्णं पर्वणां तु रवेर् युगम्।
एतान्यष्टादशस् त्रिंशदुदयो भास्करस्य च॥
ऋतवस् त्रिंशतः सौरा अयनानि दशैव तु।
पञ्चत्रिंशत् शतं चाऽपि षष्टिर् मासाश् च भास्करः॥
त्रिंशदेव त्वहोरात्रं स तु मासश् च भास्करः।
एकषष्टिस् त्वहोरात्रा दनुरेको विभाव्यते॥
अह्नान्तु त्र्यधिकाशीतिः शतं चाऽप्यधिकं भवेत्।
मानं तच् चित्रभानोस् तु विज्ञेयं भुवनस्य तु॥
सौर-सौम्यं तु विज्ञेयं नक्षत्रं सावनं तथा।
नामान्येतानि चत्वारि यैः पुराणं विभाव्यते॥

इति (१।५०।१८४-१८८)।

उक्तेषु पुराणवचनेषु लेखकसंशोधकादिकृता अशुद्धयो बह्व्यः प्रतीयन्ते। तथाऽपि तत्र वेदाङ्गज्योतिषोक्तं सौरमानमेव प्रतिपादितमिति तु ज्ञातुं सुशकम्।

एष श्लोकः सुगमः, सोमाकरेणैव व्याख्यातश् च। शुद्धानां सौराणां वर्षायनर्तुमासानां मुख्येषु श्रौत-स्मार्तधर्मकृत्येषूपयोगस्याऽभावात्, चान्द्रवर्षायनर्तु-मासाधिमासानां नियमनस्य च स्थूलैरासन्नैः सौरायनर्तुयुगमासमानैरपि कर्तुं शक्यत्वात्, सौरचान्द्रमानसम्बन्धदिक्प्रदर्शनात्मकगणितसौविध्याय सौरवर्षे ३६६ दिनानां स्वीकारेऽपि अनुसरणीये चान्द्रमाने तस्य दुष्प्रभावस्याऽदर्शनात्, सामा-न्यतया सौरायननिरूपणस्य घर्मवृद्धिक्षपाह्रासयोः क्षपावृद्धिघर्मह्रासयोः (घर्मह्रास-क्षपावृद्ध्योः) वा शङ्कुच्छायाया वा निरीक्षणेनैव कर्तुं शक्यत्वात् केवलेन सौरा-

यनेनैव वाऽपि चान्द्र-वर्षायनर्तुमासाधिमासानां नियमनस्य कर्तुं शक्यत्वाच् च सौरमानस्य सूक्ष्मतायाः साधने वेदाङ्गज्योतिषकारस्याऽनादरोऽवगम्यते। सौरवर्षादीनामेव न, किन्तु चान्द्रमासादीनामप्यन्ततः प्रत्यक्षरूपेणाऽवलोकनेनैव निर्धारणमभीष्टं वैदिकानामिति वेदवचनादेव ज्ञायते। एतादृशीं वस्तुस्थितिमबुद्ध्वा लगधप्रतिपादितसौरवर्षगणनायां स्वीकृतायां १०० वर्षेषु ७५ दिनानामन्तरं भवतीति लगधमुनिग्रन्थे दोषस्यारोपणे प्रयासो नास्तिकानां पामराणामेव कृते शोभते, न वैदिकानामास्तिकानां द्विजवराणामिति बोध्यम्। "अतश् च प्रकृतं बुद्ध्वा देशकालान्तराणि च। ग्रन्थकर्तुरभिप्रायानुपायाँश् चाऽर्थमादिशेत्" इति हि चरकसंहितोक्तः (१।२६।३७) **आर्षग्रन्थार्थावगमसिद्धान्तः ॥२८॥**

हिन्दी- छैसठ से युक्त तीन सौ (३६६) दिन, छ ऋतु, दो अयन एक सौर वर्ष है, इस में बारह सौर मास होंगे, पाँच गुणा यह समुदाय युग कहा जाता है।

विशेष – शुद्ध सौर वर्ष, अयन, ऋतु और मास का श्रौतस्मार्त धर्मकृत्यों में उपयोग न होने से, चान्द्र वर्ष, अयन, ऋतु और मास का नियमन तो स्थूल आसन्न सौर वर्ष, अयन, ऋतु और मास के मान से भी किया जा सकने से, सौर और चान्द्र मानों के बीच के सम्बन्ध का दिक्प्रदर्शनात्मक गणित को सरल बनाने के लिए सौरवर्ष में ३६६ दिन स्वीकार करने पर भी अनुसरणीय चान्द्र मान में उस का कोई दुष्प्रभाव न पडने से, सौर अयन का ज्ञान तो दिनवृद्धि-रात्रिह्रास और रात्रिवृद्धि-दिनह्रास का अथवा शङ्कुच्छाया के निरीक्षण से ही आसानी से किया जाना सम्भव होने से तथा केवल सौर अयन से ही चान्द्र-वर्ष अयन-ऋतु-मास-अधिमास के नियमन किया जाना सम्भव होने से सौर मानों की सूक्ष्मता के साधन में वेदाङ्गज्योतिषकार का अनादर अवगत होता है। चान्द्रमास का भी प्रत्यक्ष अवलोकन से ही निर्धारण करने की वैदिकपरम्परा ब्राह्मणग्रन्थों से और श्रौतसूत्रों से भी विदित होती है। इस प्रकार की वस्तुस्थिति को न समझकर लगधप्रतिपादित सौरवर्षगणना को स्वीकार करने पर १०० वर्षों में ७५ दिन का अन्तर होता है, ऐसा कहकर लगधमुनि के ग्रन्थ में दोष के आरोप का प्रयास करना अनुचित है। प्रकृत को, देश के और काल के फर्क इत्यादि को विचार करके ग्रन्थकर्ता के आशय को ठीक प्रकार से समझ कर ही उस के वचन का अर्थ करना चाहिए, यह आर्षग्रन्थों के अर्थों को समझने का सिद्धान्त चरकसंहिता (१।२६।३७) में स्पष्टतया प्रतिपादित ही है॥२८॥

[वासवादीनाम् (श्रविष्ठादीनाम्) उदयाः]

उदया वासवस्य स्युर् दिनराशिः सपञ्चकः।
ऋषेर् द्विषष्ट्या हीनः स्याद् विंशत्या सैकया स्तृणाम्॥२९॥

(सोमाकरभाष्यम्)

उदया वासवस्य स्युरिति। वासव इन्द्रस्तत्संबन्धेन यज्ञ इति श्रुतेः। ससवनानां प्रातरादीनां संबन्धात् सवनस्य प्राधान्यात् तस्य निर्देशः। तदीयमानस्य प्रमाणमुदया एव ते स्युर्भवेयुः। ते तु सूर्यस्य नान्येषाम्। यथाह परिशिष्टकृत्–

या तिथिस्तदहोरात्रं यस्मादभ्युदितो रविः।
तथा कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्॥ इति।

एवं स मानो दिनराशिर्भवेदिति वाक्यशेषः। तथा तत्पञ्चकाः। ऋषेश् चन्द्रस्य **"ऋषिर् विप्राणाम्"** (शाकलशैशिरीयऋग्वेदसंहितायाम् ९।९६।६, आपस्तम्बोपनिषदि ३।२०) इति मन्त्रवर्णात् तस्य स्वनामनिवृत्तः पञ्चकः। *त्रिपञ्चक इति वा पाठः*। तदा पक्ष एव। परुर् द्विषष्टिहीनं स्यात् प्रत्येकस्यापि तिथेर् द्वाषष्ट्या भागो हीयते।

तथा च गर्गः–

द्विलवोनमहोरात्रं चन्द्रस्य गतिरुत्तमा। इति।

स एष तिथिर् विंशत्या सैकया स्तृणाम्। स्तृणामृक्षाणां **"ऋक्षास् स्तृभिरिति नक्षत्राणाम्"** (निरु. ३।२०) इति नैरुक्ताः। तेषामेकविंशत्या हीनं स्यादिति वर्तते। तास् तु कला एव स्त्रीलिङ्गनिर्देशात्।

तथा च गर्गः–

दिनरात्रिषु यः पक्षपादवृद्ध्या चरेद् रविः।
चरांशप्रमितैरंशैरेकविंशतिभिर् दिनैः॥ इति।

एवमेतानि मया पूर्वमेव गर्गवाक्यैर् विस्तरेण प्रतिपादितानि इहार्थमिदमेतदुदाहृतम्। एवमेतस्य युगस्य॥२९॥

(कौण्डिन्न्यायनव्याख्यानम्)

कालगणनाधारभूतान् युगगतान् नक्षत्रोदयादीन् प्रतिपादयति शास्त्रकारः— उदया वासवस्ये**त्यादिना।**

पञ्चवर्षात्मके युगे दिनराशिः १८३० इति पूर्वश्लोके प्रतिपादितमेव। एकस्मिन् युगे वसुदेवताकस्य श्रविष्ठानां नक्षत्रस्य उदयाः सपञ्चयुगदिनराशिमिताः (१८३०+५=१८३५) स्युः, ऋष्यपरपर्यायस्य चन्द्रस्य एकस्मिन् युगे उदया द्विषष्ट्या हीनेन युगदिनराशिना मिताः (१८३०–६२=१७६८) स्युः, एकस्मिन् युगे चान्द्राणां स्तृणाम् (चन्द्रनक्षत्राणाम्) उदयाश् च सैकया विंशत्या हीनेन युगदिनराशिनामिताः (१८३०–२१=१८०९) स्युरित्यर्थः।

विशेषः— एतस्य श्लोकस्य सोमाकरभाष्यमस्पष्टम्। थिबोमहाशयेनैष श्लोको न व्याख्यात इति शामशास्त्री ब्रूते। शङ्करबालकृष्णदीक्षितेनाऽस्य श्लोकस्य त्रयाणां पादानामर्थं लिखित्वा 'चतुर्थचरणस्याऽर्थो न ज्ञायते' इत्युक्तम्। बार्हस्पत्येनैतस्य श्लोकस्याऽर्थः समीचीनतया लिखितोऽवगम्यते। सुधाकरादिभिश् चाऽस्य श्लोकस्याऽर्थो लिखित एव॥२९॥

हिन्दी– एक युग में धनिष्ठा के उदय ५ से सहित युगदिन सङ्ख्या (१८३०+५ =१८३५) में होंगे। एक युग में चन्द्रमा के उदय युगदिनसंख्या में बासठ कम सङ्ख्या (१८३०-६२=१७६८) में होंगे। एक युग में चान्द्र नक्षत्रोंका उदय युगदिनसंख्या में इक्कीस कम सङ्ख्या (१८३०-२१=१८०९) में होंगे॥२९॥

[युगे सूर्यनक्षत्राणां चन्द्रायनानां पर्वणां च सङ्ख्या, कलाकाष्ठाश् च]

पञ्चत्रिंशं शतं पौष्णमेकोनमयनान्यृषेः।
पर्वणां स्याच् चतुष्पादी काष्ठानां चैव ताः कलाः॥३०॥

(सोमाकरभाष्यम्)

पञ्चत्रिंशं शतं पौष्णमिति। यत् पौष्णं सौरमयनमुदगयनाद्यमुक्तं तदृषेश् चन्द्रस्याऽयनानि पञ्चत्रिंशं शतमेकोनं चतुस्त्रिंशं शतं भवतीति वाक्यशेषः। चन्द्रमासापेक्षया प्रतिमासं द्वेद्वे इत्येतत् चान्द्रमासाः सप्तषष्टिस् तत्र भवति। पर्वणां स्याच् चतुष्पादी। पादस् त्रिंशत् तु सैकिकेत्युक्तम्। तेषां चतुष्पादी चत्वारः पादाश् चतुर्विंशं शतमित्यर्थः। केषां पर्वणां सर्वमासानां यस्मादधिकमासाभ्यां सह तत्र द्वाषष्टिमासास् तस्मादेतेषां तत्र समस् तत्र समस्तसङ्ख्याप्रसङ्गादाह काष्ठानां चैव ताः कलाः। "काष्ठा पञ्चाक्षरा भवेद्" (श्लो. ३९) इति वक्ष्यति। तासां चतुष्पादी च कलानिष्पत्तिरित्यर्थः। स चतुर्विंशं काष्ठाशतं कला भवतीत्यर्थः॥३०॥

(कौण्डिन्न्यायनव्याख्यानम्)

पुनरपि कालगणनाधारभूतानि तत्त्वानि प्रतिपादयति शास्त्रकारः—पञ्चत्रिंशं शत**मित्यादिना।**

एकस्मिन् पञ्चवर्षात्मके युगे सूर्यचारनक्षत्राणि पञ्चत्रिंशं शतं भवन्ति (२७×५=१३५), चन्द्रस्याऽयनानि च एकोनं पञ्चत्रिंशं शतं भवन्ति। युगे नाक्षत्र-मासाः ६७ भवन्ति, एकस्मिन्न् नक्षत्रमासे पूर्णं नक्षत्रमण्डलं चरँश् चन्द्र उदगयन-दक्षिणायनरूपे द्वे अयने करोतीति (६७×२=१३४) एकस्मिन् पञ्चवर्षात्मके युगे

चन्द्रस्याऽयनानि एकोनं पञ्चत्रिंशं शतम् (१३५-१=१३४) भवन्ति। एकस्मिन् युगे पर्वणां चतुष्पादी भवति। चतुर्णां पादानां समाहारः ३१+३१+३१+३१=१२४ इति एकस्मिन् युगे पर्वणां चतुर्विंशं शतं भवतीत्यर्थः। "पादस् त्रिंशत् तु सैकिका" इति (श्लो.१२) उक्तमिति पादशब्देनाऽत्र ३१ सङ्ख्या गृह्यते। काष्ठानां चैव चतुष्पादी (१२४) ताः प्रसिद्धाः कला उच्यन्ते इत्यर्थः।

विशेषः— एतस्य श्लोकस्य सोमाकरेण प्रायः स्पष्टतयैवाऽर्थो लिखितोऽस्ति। शङ्करबालकृष्णदीक्षितेनाऽप्यर्थो लिखित एव। किन्तु पौष्णमिति शब्दस्य निश्चितोऽर्थो नाऽवगम्यते इति तेनोक्तमस्ति। बार्हस्पत्येनाऽप्येतस्य श्लोकस्याऽर्थः स्पष्टतयैव लिखितोऽवगम्यते। सुधाकरादिभिरपि एतस्य श्लोकस्याऽर्थो लिखित एव ॥३०॥

हिन्दी – एक युग में सूर्यचार के नक्षत्र एक सौ पैंतीस (१३५) होते हैं, एक युग में चन्द्रमा के अयन एक से कम एकसौ पैंतीस अर्थात् एक सौ चौतीस होते हैं, एक युग में पर्व चार पादों के समुदाय (३१+३१+३१+३१=१२४) की संख्या में होते हैं (पाद शब्दसे ३१ संख्या लेने की बात *"पादस् त्रिंशत् तु सैकिका"* कहकर [श्लो.१२] बताया गया ही है), काष्ठाओं की चतुष्पादीमित संख्या (१२४) की कलाएं होती हैं (१२४ काष्ठा=१ कला) ॥३०॥

[युगगत-सावनेन्दुस्तृमास-सङ्ख्या सावनादि-
मासगतदिनसङ्ख्या च]

सावनेन्दुस्तृमासानां षष्टिः सैकद्विसप्तिका।
द्युत्रिंशत् सावनः साऽर्धः सौरः स्तृणां स पर्ययः॥३१॥

(सोमाकरभाष्यम्)

सावनेन्दुस्तृमासानां षष्टिरिति। मासानां युगे संख्या। सावनसंख्यापेक्षया सौराणां षष्टिरेव। त्रिंशद्दिवसमाससंख्यया सावनानां षष्टिः सैका एकषष्टिः। तथाऽधिकमासाभ्यां सह द्विषष्टिश्चान्द्राणाम्। तथा ससप्तिका षष्टिर् नाक्षत्राणां सप्तषष्टिरित्यर्थः। स तु मासः सर्वेषां द्युत्रिंशत्। द्युरहर् नाम। त्रिंशद्दिनं मास इत्यर्थः। तथा सावनस्य दिनस्य त्रिंशदेवार्धनाडिका इति वाक्यशेषः। सूर्यस्य विपर्ययः परावृत्तिर् दिनम्। तथा स्तृणां नक्षत्राणां च परावृत्तिरेव स्वकं दिनमित्युक्तं भवति॥३१॥

(कौण्डिन्न्यायनव्याख्यानम्)

पुनरपि कालगणनाधारभूतानि तत्त्वानि श्रौतकर्मार्थमावश्यकानि च वस्तूनि प्रतिपादयति शास्त्रकारः—सावनेन्दुस्तृमासानामित्यादिना।

एकस्मिन् पञ्चवर्षात्मके युगे सावनमासानां चान्द्रमासानां नाक्षत्रमासानां च क्रमेण सैका षष्टिः (६१), सद्विका षष्टिः (६२), ससप्तिका षष्टिः (६७) भवतीति ज्ञेयम्। युगे सौरमासानां षष्टिर् भवतीति तु पूर्वमेव (श्लो.२८) सूचितम्। द्यूनां त्रिंशत् (३० दिनात्मकः) सावनो मासो ज्ञेयः, अर्धदिनयुक्तः सावनो मासः (३०$\frac{1}{2}$ दिनात्मकः) सौरो मासो ज्ञेयः। चन्द्रकृत एको नक्षत्रगणपर्ययो नक्षत्राणां मासो ज्ञेय इत्यर्थः।

विशेषः— नाक्षत्रैर् द्वादशभिर् मासैर् युक्तेन वर्षेण सम्मितम्, नाक्षत्रैस् त्रयोदशभिर् मासैर् युक्तेन वर्षेण सम्मितम्, द्वादशभिश् चान्द्रैर् मासैर् युक्तेन वर्षेण सम्मितम्, त्रयोदशभिश् चान्द्रैर् मासैर् युक्तेन वर्षेण सम्मितम्, द्वादशभिः सावनैर् मासैर् युक्तेन वर्षेण सम्मितम्, अष्टादशभिर् दिनैरधिकेन वत्सरेण सम्मितं चेति गवामयनं सत्रं ताण्डि-कौथुम-राणायनीय-सामवेदाध्यायिनां लाट्यायनकृते श्रौतसूत्रे प्रतिपादितमवगम्यते। तथा हि—

> ज्योतिषामयनविकल्पाः, तत्र यदादितोऽन्ततस् तदूर्ध्वं विषुवतः, मासि-मास्याद्यस्याऽभिप्लवस्य स्थाने त्रिकद्वुकाः, षट्त्रिंशदूनो नाक्षत्रः, सप्त-विंशिनो हि मासाः, षष्ठाद्यस्याऽभिप्लवस्य स्थाने ज्योतिर् गौश् च ज्योति-रेवावृत्ते स नवोनो नाक्षत्र एव त्रयोदशी, युग्ममासेष्वाद्यस्याऽभिप्लवस्य स्थाने तत्पञ्चाहः स षडूनश् चान्द्रमसः, षष्ठादौ त्रिकद्वुकानभिप्लवञ् चोपदध्यात् सोऽष्टादशाऽधिकः पौर्णमासीप्रसवस् तैर्यगयनिक आदित्यस्य।
>
> इति (४।८।१-७)।

उक्तविधान्येव सूत्राणि द्राह्यायणकृते श्रौतसूत्रेऽपि दृश्यन्ते (८।४।१-७)। एते गवामयनस्य प्रकाराः पतञ्जलिकृते निदानसूत्रेऽपि (५।११,१२) प्रतिपादिता दृश्यन्ते। तथापि द्राह्यायणश्रौतसूत्रभाष्यकारेण धन्विना तु "सावनस् तु संवत्सर एको ब्राह्मणक्लृप्तः" इत्युक्त्वा (८।४।७) अन्येषां गवामयनप्रकाराणां ब्राह्मणग्रन्थेष्वप्रति-पादितत्वम्, सावनवर्षसम्मितस्य गवामयनस्यैव ब्राह्मणग्रन्थे प्रतिपादितत्वमुल्लि-खितमस्ति। एतेन धन्विकाले प्राप्येषु ब्राह्मणेषु गवामयनस्याऽन्येषां प्रकाराणा-मप्रतिपादितत्वं स्पष्टं भवति। कात्यायनश्रौतसूत्रेऽपि गवामयनस्याऽनेकेषां प्रकाराणां प्रतिपादनं न दृश्यते। तथापि मुनिना लगधेन लुप्तानि ब्राह्मणानि दृष्ट्वा वा लाट्यायनश्रौतसूत्रादिग्रन्थानेव दृष्ट्वा वाऽपि नाक्षत्र-चान्द्र-सावन-सौरमासानां चतुर्णामेव प्रतिपादनस्य श्रौतयागदृष्ट्याऽप्यावश्यकत्वं स्वीकृत्याऽस्मिन् श्लोके तेषां प्रतिपादनं कृतमवगम्यते।

एतस्य श्लोकस्य पूर्वार्धस्याऽर्थः सोमाकरेण स्पष्टतयैव लिखितो दृश्यते। उत्तरार्धस्याऽर्थस्तु तत्कृतः समीचीनो न दृश्यते। थिबोमहाशयेनाऽप्येतस्य श्लोकस्याऽर्थो लिखितोऽवगम्यते। शङ्करबालकृष्णदीक्षितेनाऽस्य श्लोकस्य समीचीनोऽर्थो लिखितो दृश्यते। तथाऽपि बार्हस्पत्य-सुधाकर-शामशास्त्रि-सत्यप्रकाशादिभिः 'सावनस्याऽब्दः सौरः स्तृणां वि(स)पर्ययः' इत्यशुद्धं पाठं स्वीकृत्य तस्याऽयथार्थोऽर्थः कथं कृत इति न ज्ञायते॥३१॥

हिन्दी – एक युग में सावन मास के, इन्दुमास (चान्द्रमास) के, और नक्षत्रमास के क्रमशः एक से सहित साठ (एकसठ), दो से सहित साठ (बासठ), और सात से सहित साठ (सतसठ) होते हैं। दिनों का तीस (तीस दिन) एक सावन मास होता है, आधा दिन से युक्त वही सावन मास (अर्थात् ३०$\frac{१}{२}$ दिन) एक सौर मास होता है, नक्षत्रचक्र का चन्द्रकृत एक परिभ्रमण (१८३०÷६७= २७$\frac{२१}{६७}$ दिन) नक्षत्रों का एक मास होता है।

विशेष – शङ्करबालकृष्ण दीक्षित ने इस श्लोक का ठीक अर्थ लिखा है। परन्तु बार्हस्पत्य, सुधाकर, शामशास्त्री इत्यादियों ने *'सावनस्याऽब्दः सौरः स्तृणां वि(स)पर्ययः'* ऐसा अशुद्ध पाठ स्वीकार कर उस का अयथार्थ अर्थ कैसे लिखा इस का कारण अवगत नहीं होता॥३१॥

[नक्षत्रदेवताः]

अग्निः प्रजापतिः सोमो रुद्रोऽदितिर् बृहस्पतिः।
सर्पाश् च पितरश् चैव भगश् चैवाऽर्यमाऽपि च॥३२॥
सविता त्वष्टाऽथ वायुश् चेन्द्राऽग्नी मित्र एव च।
इन्द्रो निर्ऋतिरापो वै विश्वेदेवास् तथैव च॥३३॥
विष्णुर् वसवो वरुणोऽज एकपात् तथैव च।
अहिर्बुध्न्यस् तथा पूषा अश्विनौ यम एव च॥३४॥

(सोमाकरभाष्यम्)

अग्निः प्रजापतिरिति। प्रसिद्धा एता देवताः। रुद्रस्य प्रतिरूपः सोमः। *प्रोष्ठपदयोर् विपर्ययः पाठदोषो वा* ॥३२-३४॥

(कौण्डिन्न्यायनव्याख्यानम्)

यज्ञेषु सूक्तवाकाऽऽशीःप्रार्थन-सुब्रह्मण्याह्वानादिषु प्रयोज्यस्य नक्षत्रनाम्नो व्यवस्थायै कृत्तिकादीनां नक्षत्राणां देवताः क्रमेण प्रतिपादयति शास्त्रकारः— अग्निः प्रजापति**रित्यादिना।**

अग्निः कृत्तिकानां देवता, प्रजापतिः रोहिण्या देवता, सोमः मृगशीर्षस्य देवता, रुद्रः आर्द्राया देवता, अदितिः पुनर्वस्वोर् देवता, बृहस्पतिः पुष्यस्य देवता, सर्पाः आश्रेषाणां देवता, पितरः मघानां देवता, भगः पूर्वफल्गुन्योर् देवता, अर्यमा उत्तरफल्गुन्योर् देवता, सविता हस्तस्य देवता, त्वष्टा चित्राया देवता, वायुः स्वातेर् देवता, इन्द्राग्नी विशाखयोर् देवता, मित्रः अनूराधानां देवता, इन्द्रः ज्येष्ठाया देवता, निर्ऋतिः मूलबर्हण्या देवता, आपः पूर्वाषाढानां देवता, विश्वेदेवाः उत्तराषाढानां देवता, विष्णुः श्रोणायाः (श्रवणस्य) देवता, वसवः श्रविष्ठानां देवता, वरुणः शतभिषजो देवता, अज एकपात् पूर्वभद्रपदयोर् देवता, अहिर्बुध्न्यः उत्तरभद्रपदयोर् देवता, पूषा रेवत्या देवता, अश्विनौ अश्वयुजोर् देवता, यमः अपभरणीनां देवता।

नक्षत्राणां नक्षत्रदेवतानां च प्रतिपादनं काठककृष्णयजुर्वेदसंहितादिषु कृतं दृश्यते। तथाहि—

> अग्निर् देवता कृत्तिका नक्षत्रं प्रजापतिर् देवता रोहिणी नक्षत्रं मरुतो देवतेन्वका नक्षत्रं रुद्रो देवता बाहुर् नक्षत्रमदितिर् देवता पुनर्वसुर् नक्षत्रं बृहस्पतिर् देवता तिष्यो नक्षत्रं सर्पा देवताऽऽश्लेषा नक्षत्रं पितरो देवता मघा नक्षत्रं भगो देवता फल्गुनीर् नक्षत्रमर्यमा देवतोत्तराः फल्गुनीर् नक्षत्रं सविता देवता हस्तौ नक्षत्रं त्वष्टा देवता चित्रा नक्षत्रं वायुर् देवता निष्ट्या नक्षत्रमिन्द्राग्नी देवता विशाखं नक्षत्रं मित्रो देवताऽनूराधा नक्षत्रमिन्द्रो देवता ज्येष्ठा नक्षत्रं निरृतिर् देवता मूलं नक्षत्रमापो देवताऽषाढा नक्षत्रं विश्वेदेवा देवतोत्तरा अषाढा नक्षत्रं विष्णुर् देवताऽश्वत्थो नक्षत्रं वसवो देवता श्रविष्ठा नक्षत्रं वरुणो देवता शतभिषङ् नक्षत्रमज एकपाद् देवता प्रोष्ठपदा नक्षत्रमहिरबुध्न्यो देवतोत्तरे प्रोष्ठपदा नक्षत्रं पूषा देवता रेवती नक्षत्रमश्विनौ देवताऽश्वयुजौ नक्षत्रं यमो देवताऽपभरणीर् नक्षत्रमग्ने रुचस् स्थ प्रजापतेस् सोमस्य धातुर् भूयासं प्रजनिषीय तेन ब्रह्मणा तेन छन्दसा तया देवतयाऽङ्गिरस्वद् ध्रुवास् सीदत। इति
>
> —काठककृष्णयजुर्वेदसंहितायाम् (३९।१३)।

कृत्तिका नक्षत्रमग्निर् देवताऽग्ने रुचः स्थ, प्रजापतेः सोमस्य धातुरूचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा, तेन च्छन्दसा तेन ब्रह्मणा तया देवतया-ऽङ्गिरस्वद् ध्रुवा सीद, रोहिणी नक्षत्रं प्रजापतिर् देवतेन्वगा नक्षत्रं मरुतो देवता, बाहुर् नक्षत्रं रुद्रो देवता, पुर्वसुर् नक्षत्रमदितिर् देवता, तिष्यो नक्षत्रं बृहस्पतिर् देवताऽऽश्लेषा नक्षत्रं सर्पा देवता, मघा नक्षत्रं पितरो देवता, फल्गुनीर् नक्षत्रं भगो देवता, फल्गुनीर् नक्षत्रमर्यमा देवता, हस्तो नक्षत्रं सविता देवता, चित्रा नक्षत्रं त्वष्टा देवता, निष्ट्यं नक्षत्रं वायुर् देवता, विशाखं नक्षत्रमिन्द्राग्नी देवताऽनूराधा नक्षत्रं मित्रो देवता, ज्येष्ठा नक्षत्रं वरुणो देवता, मूलं नक्षत्रं निर्ऋतिर् देवताऽऽषाढा नक्षत्रमापो देवताऽऽषाढा नक्षत्रं विश्वेदेवा देवताऽभिजिन् नक्षत्रं ब्रह्मा देवता, श्रोणा नक्षत्रं विष्णुर् देवता, श्रविष्ठा नक्षत्रं वसवो देवता, शतभिषं नक्षत्रमिन्द्रो देवता, प्रोष्ठपदा नक्षत्रमहिर्बुध्न्यो देवता, प्रोष्ठपदा नक्षत्रमजएकपाद् देवता, रेवती नक्षत्रं पूषा देवताऽश्वयुजौ नक्षत्रमश्विनौ देवता, भरणीर् नक्षत्रं यमो देवता, ब्राह्मणो नक्षत्रं सोमो देवता-ऽग्ने रुचः स्थ प्रजापतेः सोमस्य धातुरूचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा तेन च्छन्दसा तेन ब्राह्मणा तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद। इति

–मैत्रायणीयकृष्णयजुर्वेदसंहितायाम् (२।१३।२०)।

कृत्तिका नक्षत्रमग्निर् देवताऽग्ने रुचः स्थ प्रजापतेर् धातुः सोमस्यर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा, रोहिणी नक्षत्रं प्रजापतिर् देवता मृगशीर्षं नक्षत्रं सोमो देवताऽऽर्द्रा नक्षत्रं रुद्रो देवता, पुनर्वसू नक्षत्रमदितिर् देवता तिष्यो नक्षत्रं बृहस्पतिर् देवताऽऽश्रेषा नक्षत्रं सर्पा देवता मघा नक्षत्रं पितरो देवता फल्गुनी नक्षत्रमर्यमा देवता फल्गुनी नक्षत्रं भगो देवता हस्तो नक्षत्रं सविता देवता चित्रा नक्षत्रमिन्द्रो देवता स्वाती नक्षत्रं वायुर् देवता विशाखे नक्षत्रमिन्द्राग्नी देवताऽनूराधा नक्षत्रं मित्रो देवता रोहिणी नक्षत्र-मिन्द्रो देवता विचृतौ नक्षत्रं पितरो देवताऽषाढा नक्षत्रमापो देवताऽषाढा नक्षत्रं विश्वेदेवा देवता श्रोणा नक्षत्रं विष्णुर् देवता श्रविष्ठा नक्षत्रं वसवो देवता शतभिषङ् नक्षत्रमिन्द्रो देवता प्रोष्ठपदा नक्षत्रमजएकपाद् देवता प्रोष्ठ-पदा नक्षत्रमहिर्बुध्नियो देवता रेवती नक्षत्रं पूषा देवताऽश्वयुजौ नक्षत्र-मश्विनौ देवताऽपभरणीर् नक्षत्रं यमो देवता पूर्णा पश्चाद् यत् ते देवा अदधुः। इति

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहितायाम् (४।४।१०।१-३)।

अग्नेः कृत्तिकाः। शुक्रं परस्ताज् ज्योतिरवस्तात्।
प्रजापते रोहिणी। आपः परस्तादोषधयोऽवस्तात्।
सोमस्येन्वका। विततानि परस्ताद् वयन्तोऽवस्तात्।
रुद्रस्य बाहू। मृगयवः परस्ताद् विक्षारोऽवस्तात्।
अदित्यै पुनर्वसू। वातः परस्तादार्द्रमवस्तात्॥
बृहस्पतेस् तिष्यः। जुह्वतः परस्ताद् यजमाना अवस्तात्।
सर्पाणामाश्रेषाः। अभ्यागच्छन्तः परस्तादभ्यानृत्यन्तोऽवस्तात्।
पितॄणां मघाः। रुदन्तः परस्तादपभ्रंशोऽवस्तात्।
अर्यम्णः पूर्वे फल्गुनी। जाया परस्तादृषभोऽवस्तात्।
भगस्योत्तरे। वहतवः परस्ताद् वहमाना अवस्तात्॥
देवस्य सवितुर् हस्तः। प्रसवः परस्तात् सनिरवस्तात्।
इन्द्रस्य चित्रा। ऋतं परस्तात् सत्यमवस्तात्।
वायोर् निष्ट्या। व्रततिः परस्तादसिद्धिरवस्तात्।
इन्द्राग्नियोर् विशाखे। युगानि परस्तात् कृषमाणा अवस्तात्।
मित्रस्याऽनूराधाः। अभ्यारोहत् परस्तादभ्यारूढमवस्तात्॥
इन्द्रस्य रोहिणी। शृणत् परस्तात् प्रतिशृणदवस्तात्।
निर्ऋत्यै मूलबर्हणी। प्रतिभञ्जन्तः परस्तात् प्रतिशृणन्तोऽवस्तात्।
अपां पूर्वा अषाढाः। वर्चः परस्तात् समितिरवस्तात्।
विश्वेषां देवानामुत्तराः। अभिजयत् परस्तादभिजितमवस्तात्।
विष्णोः श्रोणा। पृच्छमानाः परस्तात् पन्था अवस्तात्॥
वसूनां श्रविष्ठाः। भूतं परस्ताद् भूतिरवस्तात्।
इन्द्रस्य शतभिषक्। विश्वव्यचाः परस्ताद् विश्वक्षितिरवस्तात्।
अजस्यैकपदः पूर्वे प्रोष्ठपदाः। वैश्वानरं परस्ताद् वैश्वावसवमवस्तात्।
अहेर् बुध्नियस्योत्तरे। अभिषिञ्चन्तः परस्तादभिषुण्वन्तोऽवस्तात्।
पूष्णो रेवती। गावः परस्ताद् वत्सा अवस्तात्।
अश्विनोरश्वयुजौ। ग्रामः परस्तात् सेनाऽवस्तात्।

यमस्याऽपभरणीः। अपकर्षन्तः परस्तादपवहन्तोऽवस्तात्।
पूर्णा पश्चाद् यत् ते देवा अदधुः॥ इति।

–आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदब्राह्मणे (१।५।१।१-५)।

अग्निर् नः पातु कृत्तिकाः। नक्षत्रं देवमिन्द्रियम्।
इदमासां विचक्षणम्। हविरासं जुहोतन॥

यस्य भान्ति रश्मयो यस्य केतवः। यस्येमा विश्वा भुवनानि सर्वा।
स कृत्तिकाभिरभिसंवसानः।अग्निर् नो देवः सुविते दधातु॥

प्रजापते रोहिणी वेतु पत्नी। विश्वरूपा बृहती चित्रभानुः।
सा नो यज्ञस्य सुविते दधातु। यथा जीवेम शरदः सवीराः॥

रोहिणी देव्युदगात् पुरस्तात्। विश्वा रूपाणि प्रतिमोदमाना।
प्रजापतिं हविषा वर्धयन्ती। प्रिया देवानामुपयातु यज्ञम्॥

सोमो राजा मृगशीर्षिण आगन्। शिवं नक्षत्रं प्रियमस्य धाम।
आप्यायामानो बहुधा जनेषु। रेतः प्रजां यजमाने दधातु॥

यत् ते नक्षत्रं मृगशीर्षमस्ति। प्रियं राजन् प्रियतमं प्रियाणाम्।
तस्मै ते सोम हविषा विधेम। शं न एधि द्विपदे शं चतुष्पदे॥

आर्द्रया रुद्रः प्रथमान एति। श्रेष्ठो देवानां पतिरघ्नियानाम्।
नक्षत्रमस्य हविषा विधेम। मा नः प्रजां रीरिषन् मोत वीरान्॥

हेती रुद्रस्य परि णो वृणक्तु। आर्द्रा नक्षत्रं जुषतां हविर् नः।
प्रमुञ्चमानौ दुरितानि विश्वा। अपाऽघशंसं नुदतामरातिम्॥

पुनर् नो देव्यदितिः स्पृणोतु। पुनर्वसू नः पुनरेतां यज्ञम्।
पुनर् नो देवा अभियन्तु सर्वे। पुनःपुनर् वो हविषा यजामः॥

एवा न देव्यदितिरनर्वा। विश्वस्य भर्त्री जगतः प्रतिष्ठा।
पुनर्वसू हविषा वर्धयन्ती। प्रियं देवानामप्येतु पाथः॥

बृहस्पतिः प्रथमं जायमानः। तिष्यं नक्षत्रमभिसम्बभूव।
श्रेष्ठो देवानां पृतनासु जिष्णुः। दिशो नु सर्वा अभयं नो अस्तु॥

तिष्यः पुरस्तादुत मध्यतो नः। बृहस्पतिर् नः परिपातु पश्चात्। बाधेतां द्वेषो अभयं कृणुताम्। सुवीर्यस्य पतयः स्याम॥

इदं सर्पेभ्यो हविरस्तु जुष्टम्। आश्रेषा येषामनुयन्ति चेतः।
ये अन्तरिक्षं पृथिवीं क्षियन्ति। ते नः सर्पासो हवमागमिष्ठाः॥

ये रोचने सूर्यस्याऽपि सर्पाः। ये दिवं देवीमनुसञ्चरन्ति।
येषामाश्रेषा अनुयन्ति कामम्। तेभ्यः सर्पेभ्यो मधुमज् जुहोमि॥

उपहूताः पितरो ये मघासु। मनोजवसः सुकृतः सुकृत्याः।
ते नो नक्षत्रे हवमागमिष्ठाः। स्वधाभिर् यज्ञं प्रयतं जुषन्ताम्॥

ये अग्निदग्धा येऽनग्निदग्धाः। येऽमुं लोकं पितरः क्षियन्ति।
याँश् च विद्म याँ उ च न प्रविद्म। मघासु यज्ञं सुकृतं जुषन्ताम्॥

गवां पतिः फल्गुनीनामसि त्वम्। तदर्यमन् वरुण मित्र चारु।
तं त्वा वयं सनितारं सनीनाम्। जीवा जीवन्तमुपसंविशेम॥

येनेमा विश्वा भुवनानि सञ्जिता। यस्य देवा अनुसंयन्ति चेतः।
अर्यमा राजाऽजरस् तुविष्मान्। फल्गुनीनामृषभो रोरवीति॥

श्रेष्ठो देवानां भगवो भगाऽसि। तत् त्वा विदुः फल्गुनीस् तस्य वित्तात्।
अस्मभ्यं क्षत्त्रमजरं सुवीर्यम्। गोमदश्ववदुप संनुदेह॥

भगो ह दाता भग इत् प्रदाता। भगो देवीः फल्गुनीराविवेश।
भगस्येत् तं प्रसवं गमेम। यत्र देवैः सधमादं मदेम॥

आयातु देवः सवितोपयातु। हिरण्ययेन सुवृता रथेन।
वहन् हस्तं सुभगं विद्मनापसम्। प्रयच्छन्तं पपुरिं पुण्यमच्छ॥

हस्तः प्रयच्छत्वमृतं वसीयः। दक्षिणेन प्रतिगृभ्णीम एनत्।
दातारमद्य सविता विदेय। यो नो हस्ताय प्रसुवाति यज्ञम्॥

त्वष्टा नक्षत्रमभ्येति चित्राम्। सुभंससं युवतिं रोचमानाम्।
निवेशयन्नमृतान् मर्त्याँश् च। रूपाणि पिंशन् भुवनानि विश्वा॥

तन् नस् त्वष्टा तदु चित्रा विचष्टाम्। तन् नक्षत्रं भूरिदा अस्तु मह्यम्।
तन् नः प्रजां वीरवतीं सनोतु। गोभिर् नो अश्वैः समनक्तु यज्ञम्॥

वायुर् नक्षत्रमभ्येति निष्ट्याम्। तिग्मशृङ्गो वृषभो रोरुवाणः।
समीरयन् भुवना मातरिश्वा। अप द्वेषांसि नुदतामरातीः॥

तन् नो वायुस् तदु निष्ट्या शृणोतु। तन् नक्षत्रं भूरिदा अस्तु मह्यम्।
तन् नो देवासो अनुजानन्तु कामम्। यथा तरेम दुरितानि विश्वा॥

दूरमस्मच् छत्रवो यन्तु भीताः। तदिन्द्राग्नी कृणुतां तद् विशाखे।
तन् नो देवा अनुमदन्तु यज्ञम्। पश्चात् पुरस्तादभयं नो अस्तु॥
नक्षत्राणामधिपत्नी विशाखे। श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ।
विषूचः शत्रूनपबाधमानौ। अप क्षुधं नुदतामरातिम्॥ इति च

–तत्रैव (३।१।१।१-१२)।

ऋध्यास्म हव्यैर् नमसोपसद्य। मित्रं देवं मित्रधेयं नो अस्तु।
अनूराधान् हविषा वर्धयन्तः। शतं जीवेम शरदः सवीराः॥
चित्रं नक्षत्रमुदगात् पुरस्तात्। अनूराधास इति यद् वदन्ति।
तन् मित्र एति पथिभिर् देवयानैः। हिरण्ययैर् विततैरन्तरिक्षे॥
इन्द्रो ज्येष्ठामनु नक्षत्रमेति। यस्मिन् वृत्रं वृत्रतूर्ये ततार।
तस्मिन् वयममृतं दुहाना। क्षुधं तरेम दुरितिं दुरिष्टिम्॥
पुरन्दराय वृषभाय धृष्णवे। अषाढाय सहमानाय मीढुषे।
इन्द्राय ज्येष्ठा मधुमद् दुहाना। उरुं कृणोतु यजमानाय लोकम्॥
मूलं प्रजां वीरवतीं विदेय। पराच्येतु निर्ऋतिः पराचा।
गोभिर् नक्षत्रं पशुभिः समक्तम्। अहर् भूयाद् यजमानाय मह्यम्॥
अहर् नो अद्य सुविते दधातु। मूलं नक्षत्रमिति यद् वदन्ति।
पराचीं वाचा निर्ऋतिं नुदामि। शिवं प्रजायै शिवमस्तु मह्यम्॥
या दिव्या आपः पयसा सम्बभूवुः। या अन्तरिक्ष उत पार्थिवीर् याः।
यासामषाढा अनुयन्ति कामम्। ता न आपः शं स्योना भवन्तु॥
याश्च कूप्या याश्च नाद्याः समुद्रियाः। याश्च वैशन्तीरुत प्रासचीर् याः।
यासामषाढा मधु भक्षयन्ति। ता न आपः शं स्योना भवन्तु॥
तन् नो विश्वे उपशृण्वन्तु देवाः। तदषाढा अभिसंयन्तु यज्ञम्।
तन् नक्षत्रं प्रथतां पशुभ्यः। कृषिर् वृष्टिर् यजमानाय कल्पताम्॥
शुभ्राः कन्या युवतयः सुपेशसः। कर्मकृतः सुकृतो वीर्यावतीः।
विश्वान् देवान् हविषा वर्धयन्तीः। अषाढा काममुपयान्तु यज्ञम्॥
यस्मिन् ब्राह्माऽभ्यजयत् सर्वमेतत्। अमुं च लोकमिदमू च सर्वम्।
तन् नो नक्षत्रमभिजिद् विजित्य। श्रियं दधात्वहृणीयमानम्॥
उभौ लोकौ ब्रह्मणा संजितेमौ। तन् नो नक्षत्रमभिजिद् विचष्टाम्।
तस्मिन् वयं पृतनाः संजयेम। तं नो देवासो अनुजानन्तु कामम्॥

शृण्वति श्रोणाममृतस्य गोपाम्। पुण्यामस्या उपशृणोमि वाचम्।
महीं देवीं विष्णुपत्नीमजूर्याम्। प्रतीचीमेनां हविषा यजाम॥

त्रेधा विष्णुरुरुगायो विचक्रमे। महीं दिवं पृथिवीमन्तरिक्षम्।
तच् छ्रोणैति श्रव इच्छमाना। पुण्यं श्लोकं यजमानाय कृण्वती॥

अष्टौ देवा वसवः सोम्यासः। चतस्रो देवीरजराः श्रविष्ठाः।
ते यज्ञं पान्तु वसवः परस्तात्। संवत्सरीणममृतं स्वस्ति॥

यज्ञं नः पान्तु वसवः पुरस्तात्। दक्षिणतोऽभियन्तु श्रविष्ठाः।
पुण्यं नक्षत्रमभिसंविशाम। मा नो अरातिरघशंसा गन्॥

क्षत्रस्य राजा वरुणोऽधिराजः। नक्षत्राणां शतभिषग् वसिष्ठः।
तौ देवेभ्यः कृणुतो दीर्घमायुः। शतं सहस्रा भेषजानि धत्तः॥

यज्ञं नो राजा वरुण उपयातु। तं नो विश्वे अभिसंयन्तु देवाः।
तन् नो नक्षत्रं शतभिषग् जुषाणम्। दीर्घमायुः प्रतिरद् भेषजानि॥

अजएकपादुदगात् पुरस्तात्। विश्वा भूतानि प्रतिमोदमानः।
तस्य देवाः प्रसवं यन्ति सर्वे। प्रोष्ठपदासो अमृतस्य गोपाः॥

विभ्राजमानः समिधान उग्रः। आन्तरिक्षमरुहदगन् द्याम्।
तं सूर्यं देवमजमेकपादम्। प्रोष्ठपदासो अनुयन्ति सर्वे॥

अहिर्बुध्नियः प्रथमान एति। श्रेष्ठो देवानामुत मानुषाणाम्।
तं ब्राह्मणाः सोमपाः सोम्यासः। प्रोष्ठपदासो अभिरक्षन्ति सर्वे॥

चत्वार एकमभिकर्म देवाः। प्रोष्ठपदास इति यान् वदन्ति।
ते बुध्नियं परिषद्यं स्तुवन्तः। अहिं रक्षन्ति नमसोपसद्य॥

पूषा रेवत्यन्वेति पन्थाम्। पुष्टिपती पशुपा वाजबस्त्यौ।
इमानि हव्या प्रयता जुषाणा। सुगैर् नो यानैरुपयातां यज्ञम्॥

क्षुद्रान् पशून् रक्षतु रेवती नः। गावो नो अश्वाँ अन्वेतु पूषा।
अन्नं रक्षन्तौ बहुधा विरूपम्। वाजं सनुतां यजमानाय यज्ञम्॥

तदश्विनावश्वयुजोपयाताम्। शुभं गमिष्ठौ सुयमेभिरश्वैः।
स्वं नक्षत्रं हविषा यजन्तौ। मध्वा सम्पृक्तौ यजुषा समक्तौ॥

यौ देवानां भिषजौ हव्यवाहौ। विश्वस्य दूतावमृतस्य गोपौ।
तौ नक्षत्रं जुजुषाणोपयतम्। नमोऽश्विभ्यां कृणुमोऽश्वयुग्भ्याम्॥

अप पाप्मानं भरणीर् भरन्तु। तद् यमो राजा भगवान् विचष्टाम्।
लोकस्य राजा महतो महान् हि। सुगं पन्थामभयं कृणोतु॥

यस्मिन् नक्षत्रे यम एति राजा। यस्मिन्नेनमभ्यषिञ्चन्त देवाः।
तदस्य चित्रं हविषा यजाम। अप पाप्मानं भरणीर् भरन्तु॥ इति च

–तत्रैव (३।१।२।१-११)।

अग्निर् वा अकामयत। अन्नादो देवानां स्यामिति। स एतमग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवपत्। ततो वै सोऽन्नादो देवानामभवत्। अग्निर् वै देवानामन्नादः। यथा ह वा अग्निर् देवानामन्नादः। एवं ह वा एष मनुष्याणां भवति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा। अम्बायै स्वाहा दुलायै स्वाहा। नितत्न्यै स्वाहाऽभ्रयन्त्यै स्वाहा। मेघयन्त्यै स्वाहा वर्षयन्त्यै स्वाहा। चुपणीकायै स्वाहेति॥

प्रजापतिः प्रजा असृजत। अस्मात् सृष्टा पराचीरायन्। तासां रोहिणीमभ्यध्यायत्। सोऽकामयत। उप मा वर्तेत। समेनया गच्छेयेति। स एतं प्रजापतये रोहिण्यै चरुं निरवपत्। ततो वै सा तमुपावर्तत। समेनयाऽगच्छत। उप ह वा एनं प्रियमावर्तते। सं प्रियेण गच्छते। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। प्रजापतये स्वाहा रोहिण्यै स्वाहा। रोचमानायै स्वाहा। प्रजाभ्यः स्वाहेति॥

सोमो वा अकामयत। ओषधीनां राज्यमभिजयेयमिति। स एतं सोमाय मृगशीर्षाय श्यामाकं चरुं पयसि निरवपत्। ततो वै स ओषधीनां राज्यमभ्यजयत्। समानानां ह वै राज्यमभिजयति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। सोमाय स्वाहा मृगशीर्षाय स्वाहा। इन्वकाभ्यः स्वाहौषधीभ्यः स्वाहा। राज्याय स्वाहाऽभिजित्यै स्वाहेति॥

रुद्रो वा अकामयत पशुमान्त्स्यामिति। स एतं रुद्रायाऽऽर्द्रायै प्रैयङ्गवं चरुं पयसि निरवपत्। ततो वै स पशुमानभवत्। पशुमान् ह वै भवति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। रुद्राय स्वाहाऽऽर्द्रायै स्वाहा। पिन्वमानायै स्वाहा पशुभ्यः स्वाहेति॥

ऋक्षा वा इयमलोकाऽऽसीत्। साऽकामयत। ओषधीभिर् वनस्पतिभिः प्रजायेयेति। सैतमदित्यै पुनर्वसुभ्यां चरुं निरवपत्। ततो वा इयमोषधीभिर् वनस्पतिभिः प्राजायत। प्रजायते ह वै प्रजया पशुभिः। य एतेन हविषा

यजते। य उ चैनदेवं वेद। सोऽत्रजुहोति। अदित्यै स्वाहा पुनर्वसुभ्या स्वाहा। भूत्यै स्वाहा तिष्याय स्वाहेति॥

बृहस्पतिर् वा अकामयत। ब्रह्मवर्चसी स्यामिति। स एतं बृहस्पतये तिष्याय नैवारं चरुं पयसि निरवपत्। ततो वै स ब्रह्मवर्चस्यभवत्। ब्रह्मवर्चसी ह वै भवति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। बृहस्पतये स्वाहा तिष्याय स्वाहा। ब्रह्मवर्चसाय स्वाहेति॥

देवासुराः संयत्ता आसन्। ते देवाः सर्पेभ्य आज्ये करम्भं निरवपन्। तानेताभिरेव देवताभिरुपानयन्। एताभिर् ह वै देवताभिर् द्विषन्तं भ्रातृव्यमुपनयति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति सर्पेभ्यः स्वाहाऽऽश्रेषाभ्यः स्वाहा दन्दशूकेभ्यः स्वाहेति॥

पितरो वा अकामयन्त। पितृलोक ऋध्नुयामेति। त एतं पितृभ्यो मघाभ्यः पुरोडाशं षट्कपालं निरवपन्। ततो वै पितृलोक आर्ध्नुवन्। पितृलोके ह वा ऋध्नोति य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। पितृभ्यः स्वाहा मघाभ्यः स्वाहा। अनघाभ्यः स्वाहाऽगदाभ्यः स्वाहाऽरुन्धतीभ्यः स्वाहेति॥

अर्यमा वा अकामयत। पशुमान् त्स्यामिति। स एतमर्यम्णे फल्गुनीभ्यां चरुं निरवपत्। ततो वै स पशुमानभवत्। पशुमान् ह वै भवति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। अर्यम्णे स्वाहा फल्गुनीभ्यां स्वाहा। पशुभ्यः स्वाहेति॥

भगो वा अकामयत। भगी श्रेष्ठी देवानां स्यामिति। स एतं भगाय फल्गुनीभ्यां चरुं निरवपत्। ततो वै स भगी श्रेष्ठी देवानामभवत्। भगी ह वै श्रेष्ठी समानानां भवति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। भगाय स्वाहा फल्गुनीभ्यां स्वाहा। श्रैष्ठ्याय स्वाहेति॥

सविता वा अकामयत। श्रन् मे देवा दधीरन्। सविता स्यामिति। स एनं सवित्रे हस्ताय पुरोडाशं द्वादशकपालं निरवपदाशूनां व्रीहीणाम्। ततो वै तस्मै श्रद् देवा अदधत। सविताऽभवत्। श्रद् ध वा अस्मै मनुष्या दधते। सविता समानानां भवति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। सवित्रे स्वाहा हस्ताय स्वाहा। ददते स्वाहा स्पृणते स्वाहा। प्रतिगृभ्णते स्वाहेति॥

त्वष्टा वा अकामयत। चित्रं प्रजां विन्देयेति। स एतं त्वष्ट्रे चित्रायै पुरोडाश-मष्टाकपालं निरवपत्। ततो वै स चित्रं प्रजामविन्दत। चित्रं ह वै प्रजां

विन्दते। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। त्वष्ट्रे स्वाहा चित्रायै स्वाहा। चैत्राय स्वाहा प्रजायै स्वाहेति॥

वायुर् वा अकामयत। कामचारमेषु लोकेष्वभिजयेयमिति। स एतद् वायवे निष्ट्यायै गृष्ट्यै दुग्धं पयो निरवपत्। ततो वै स कामचारमेषु लोकेष्व-भ्यजयत्। कामचारं ह वा एषु लोकेष्वभिजयति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। वायवे स्वाहा निष्ट्यायै स्वाहा। कामचाराय स्वाहाऽभिजित्यै स्वाहेति॥

इन्द्राग्नी अकामयेताम्। श्रैष्ठ्यं देवानमभिजयेवेति। तावेतमिन्द्राग्निभ्यां विशाखाभ्यां पुरोडाशमेकादशकपालं निरवपताम्। ततो वै तौ श्रैष्ठ्यं देवानामभ्यजयताम्। श्रैष्ठ्यं ह वै समानानामभिजयति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। इन्द्राग्निभ्यां स्वाहा विशाखाभ्यां स्वाहा। श्रैष्ठ्याय स्वाहाऽभिजित्यै स्वाहेति॥ इति च

—तत्रैव (३।१।४।१-१४)।

मित्रो वा अकामयत। मित्रधेयमेषु लोकेष्वभिजयेयमिति। स एतं मित्राया-ऽनूराधेभ्यश् चरुं निरवपत्। ततो वै स मित्रधेयमेषु लोकेष्वभ्यजयत्। मित्रधेयं ह वा एषु लोकेष्वभिजयति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। मित्राय स्वाहाऽनूराधेभ्यः स्वाहा। मित्रधेयाय स्वाहा-ऽभिजित्यै स्वाहेति॥

इन्द्रो वा अकामयत। ज्यैष्ठ्यं देवानामभिजयेयमिति। स एतमिन्द्राय ज्येष्ठायै पुरोडाशमेकादशकपालं निरवपन् महाव्रीहीणाम्। ततो वै स ज्यैष्ठ्यं देवाना-मभ्यजयत्। ज्यैष्ठ्यं ह वै समानानामभिजयति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति इन्द्राय स्वाहा ज्येष्ठायै स्वाहा। ज्यैष्ठ्याय स्वाहाऽभिजित्यै स्वाहेति॥

प्रजापतिर् वा अकामयत। मूलं प्रजां विन्देयेति। स एतं प्रजापतये मूलाय चरुं निरवपत्। ततो वै स मूलं प्रजामविन्दत। मूलं ह वै प्रजां विन्दते। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति प्रजापतये स्वाहा मूलाय स्वाहा। प्रजायै स्वाहेति॥

आपो वा अकामयन्त। समुद्रं काममभिजयेमेति। ता एतमद्भ्योऽषाढाभ्यश् चरुं निरवपन्। ततो वै ताः समुद्रं काममभ्यजयन्। समुद्रं ह वै काम-मभिजयति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति।

अद्भ्यः स्वाहाऽषाढाभ्यः स्वाहा। समुद्राय स्वाहा कामाय स्वाहा। अभिजित्यै स्वाहेति॥

विश्वे वै देवा अकामयन्त। अनपजय्यं जयेमेति। त एतं विश्वेभ्यो देवेभ्योऽषाढाभ्यश् चरुं निरवपन्। ततो वै तेऽनपजय्यमजयन्। अनपजय्यं ह वै जयति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। विश्वेभ्यो देवेभ्यः स्वाहाऽषाढाभ्यः स्वाहा। अनपजय्याय स्वाहा जित्यै स्वाहेति॥

ब्रह्म वा अकामयत। ब्रह्मलोकमभिजयेयमिति। तदेतं ब्रह्मणेऽभिजिते चरुं निरवपत्। ततो वै ब्रह्मलोकमभ्यजयत्। ब्रह्मलोकं ह वा अभिजयति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। ब्रह्मणे स्वाहाऽभिजिते स्वाहा। ब्रह्मलोकाय स्वाहाऽभिजित्यै स्वाहेति॥

विष्णुर् वा अकामयत। पुण्यं श्लोकं शृण्वीय। न मा पापी कीर्तिरागच्छेदिति। स एतं विष्णवे श्रोणायै पुरोडाशं त्रिकपालं निरवपत्। ततो वै स पुण्यं श्लोकमशृणुत। नैनं पापी कीर्तिरागच्छत्। पुण्यं ह वै श्लोकं शृणुते। नैनं पापी कीर्तिरागच्छति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। विष्णवे स्वाहा श्रोणायै स्वाहा। श्लोकाय स्वाहा श्रुताय स्वाहेति॥

वसवो वा अकामयन्त। अग्रं देवतानां परीयामेति। त एतं वसुभ्यः श्रविष्ठाभ्यः पुरोडाशमष्टाकपालं निरवपन्। ततो वै तेऽग्रं देवतानां पर्यायन्। अग्रं ह वै समानानां पर्येति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। वसुभ्यः स्वाहा श्रविष्ठाभ्यः स्वाहा। अग्राय स्वाहा परीत्यै स्वाहेति॥

इन्द्रो वा अकामयत। दृढोऽशिथिलः स्यामिति। स एतं वरुणाय शतभिषजे भेषजेभ्यः पुरोडाशं दशकपालं निरवपत् कृष्णानां व्रीहीणाम्। ततो वै स दृढोऽशिथिलोऽभवत्। दृढो ह वा अशिथिलो भवति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। वरुणाय स्वाहा शतभिषजे स्वाहा। भेषजेभ्यः स्वाहेति॥

अजो वा एकपादकामयत। तेजस्वी ब्रह्मवर्चसी स्यामिति। स एतमजायैकपदे प्रोष्ठपदेभ्यश् चरुं निरवपत्। ततो वै स तेजस्वी ब्रह्मवर्चस्यभवत्। तेजस्वी ह वै ब्रह्मवर्चसी भवति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। अजायैकपदे स्वाहा प्रोष्ठपदेभ्यः स्वाहा। तेजसे स्वाहा ब्रह्मवर्चसाय स्वाहेति॥

अहिर् वै बुध्नियोऽकामयत। इमां प्रतिष्ठां विन्देयेति। स एतमहये बुध्नियाय प्रोष्ठपदेभ्यः पुरोडाशं भूमिकपालं निरवपत्। ततो वै स इमां प्रतिष्ठामविन्दत।

इमां ह वै प्रतिष्ठां विन्दते। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। अहये बुध्नियाय स्वाहा प्रोष्ठपदेभ्यः स्वाहा प्रतिष्ठायै स्वाहेति॥

पूषा वा अकामयत। पशुमान् त्स्यामिति। स एतं पूष्णे रेवत्यै चरुं निरवपत्। ततो वै स पशुमानभवत्। पशुमान् ह वै भवति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। पूष्णे स्वाहा रेवत्यै स्वाहा। पशुभ्यः स्वाहेति॥

अश्विनौ वा अकामयेताम्। श्रोत्रस्विनावबधिरौ स्यावेति। तावेतमश्विभ्या-मश्वयुग्भ्यां पुरोडाशं द्विकपालं निरवपताम्। ततो वै तौ श्रोत्रस्विना-वबधिरावभवताम्। श्रोत्रस्वी ह वा अबधिरो भवति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। अश्विभ्यां स्वाहाऽश्वयुग्भ्यां स्वाहा। श्रोत्राय स्वाहा श्रुत्यै स्वाहेति॥

यमो वा अकामयत। पितॄणां राज्यमभिजयेयमिति। स एतं यमाया-ऽपभरणीभ्यश् चरुं निरवपत्। ततो वै स पितॄणां राज्यमभ्यजयत्। समानानां ह वै राज्यमभिजयति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। यमाय स्वाहाऽपभरणीभ्यः स्वाहा। राज्याय स्वाहाऽभिजित्यै स्वाहेति॥ इति च

—तत्रैव (३।१।५।२-१४)।

यद्यपि शौनकिनामथर्ववेदिनां मन्त्रसंहितायामुपलभ्यमाने नक्षत्राणामुल्लेखे नक्षत्रदेवतानामुल्लेखो नास्ति तथापि नक्षत्रनामलिङ्गवचनक्रमविषये भूम्ना सर्व-वेदशाखागतिसामान्यं प्रदर्शयितुं सोऽप्युल्लेखोऽत्र प्रदर्श्यते। तथाहि—

चित्राणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि।
तुर्मिशं सुमतिमिच्छमानो अहानि गीर्भिः सपर्यामि नाकम्॥

सुहवमग्ने कृत्तिका रोहिणी चाऽस्तु भद्रं मृगशिरः शमार्द्रा।
पुनर्वसू सूनृता चारु पुष्यो भानुराश्लेषा अयनं मघा मे॥

पुण्यं पूर्वा फल्गुन्यौ चाऽत्र हस्तश् चित्रा शिवा स्वातिः सुखो मे अस्तु।
राधे विशाखे सुहवाऽनुराधा ज्येष्ठा सुनक्षत्रमरिष्ट मूलम्॥

अन्नं पूर्वा रासतां मे अषाढा ऊर्जं देव्युत्तरा आ वहन्तु।
अभिजिन् मे रासतां पुण्यमेव श्रवणः श्रविष्ठाः कुर्वतां सुपुष्टिम्॥

आ मे महच् छतभिषग् वरीय आ मे द्वया प्रोष्ठपदा सुशर्म।
आ रेवती चाऽश्वयुजौ भगं म आ मे रयिं भरण्य आ वहन्तु॥ इति

—शौनकिनामथर्ववेदमन्त्रसंहितायाम् (१९।७।१-५)।

तत्र नक्षत्राणां कासु चन देवतासु शाखाविशेषे एकस्या एव शाखाया ग्रन्थविशेषेऽपि भेदोऽपि दृश्यते। तथा हि मृगशीर्षस्य देवता आत्रेयतैत्तिरीयकृष्णयजुर्वेदशाखाध्यायिनां संहितायां ब्राह्मणे च सोम उक्तोऽस्ति काठककृष्णयजुर्वेदसंहितायां मैत्रायणीयकृष्णयजुर्वेदसंहितायां च मरुत उक्ताः सन्ति, वेदाङ्गज्योतिषग्रन्थे च सोम एवोक्तोऽस्ति। अत्र वेदाङ्गज्योतिषोक्तिः आत्रेयतैत्तिरीयकृष्णयजुर्वेदसंहितानुसारिणी दृश्यते। पूर्वफल्गुन्योर् देवता आत्रेयतैत्तिरीयकृष्णयजुर्वेदाध्यायिनां संहितायां ब्राह्मणे चाऽर्यमा उक्तोऽस्ति उत्तरफल्गुन्योर् देवता भग उक्तोऽस्ति, काठककृष्ण-यजुर्वेदसंहितायां मैत्रायणीयकृष्णयजुर्वेदसंहितायां च पूर्वफल्गुन्योर् देवता भग उक्तोऽस्ति, उत्तरफल्गुन्योर् देवताऽर्यमा उक्तोऽस्ति। वेदाङ्गज्योतिषग्रन्थेऽपि पूर्वफल्गुन्योर् देवता भग उक्तोऽस्ति, उत्तरफल्गुन्योर् देवताऽर्यमोक्तोऽस्ति। अत्र वेदाङ्गज्योतिषग्रन्थस्योक्तिः काठककृष्णयजुर्वेदसंहिता-मैत्रायणीयकृष्णयजुर्वेदसंहितानुसारिणी दृश्यते। चित्राया देवता आत्रेयतैत्तिरीयकृष्णयजुर्वेदशाखाध्यायिनां संहितायामिन्द्र उक्तोऽस्ति, तेषामेव ब्राह्मणे तु त्वष्टा उक्तोऽस्ति, काठककृष्णयजुर्वेदसंहितायां मैत्रायणीयकृष्णयजुर्वेदसंहितायामपि चित्राया देवता त्वष्टा एवोक्तोऽस्ति। वेदाङ्गज्योतिषग्रन्थेऽपि चित्राया देवता त्वष्टा एवोक्तोऽस्ति। अत्राऽपि वेदाङ्गज्योतिषग्रन्थोक्तिः काठककृष्णयजुर्वेदसंहिताद्यनुसारिणी दृश्यते। अत्र आत्रेयतैत्तिरीयकृष्णयजुर्वेदशाखाध्यायिनां संहितायां चित्राया देवता इन्द्र उक्तो ब्राह्मणे तु त्वष्टा उक्त इति एकस्या एव शाखायाः ग्रन्थेऽपि विगानं दृश्यत इत्ययं विषयः परिचिन्तनीयो दृश्यते। ज्येष्ठाया देवता आत्रेय-तैत्तिरीयकृष्णयजुर्वेदाध्यायिनां संहितायां ब्राह्मणे च इन्द्र उक्तोऽस्ति, काठककृष्णयजुर्वेदसंहितायामपि इन्द्र एवोक्तोऽस्ति, मैत्रायणीयकृष्णयजुर्वेदसंहितायां तु वरुण उक्तोऽस्ति। वेदाङ्गज्योतिषग्रन्थेऽपि ज्येष्ठाया देवता इन्द्र एवोक्तोऽस्ति। अत्र वेदाङ्गज्योतिषग्रन्थोक्तिः आत्रेयतैत्तिरीयकृष्णयजुर्वेदसंहिताद्यनुसारिणी दृश्यते। आत्रेयतैत्तिरीयकृष्णयजुर्वेदाध्यायिनां संहितायां मूलस्य देवता पितर उक्ताः सन्ति, किन्तु तेषामेव ब्राह्मणे कुत्रचिन् निर्ऋतिरुक्ताऽस्ति, कुत्रचित् प्रजापतिरुक्तोऽस्ति, काठक-कृष्ण-यजुर्वेदसंहितायां मैत्रायणीयकृष्णयजुर्वेदसंहितायां च मूलस्य देवता निर्ऋतिरुक्ताऽस्ति। वेदाङ्गज्योतिषग्रन्थेऽपि मूलस्य देवता निर्ऋतिरेवोक्ताऽस्ति। अत्र वेदाङ्गज्योतिषग्रन्थोक्तिः काठककृष्णयजुर्वेदसंहिताद्यनुसारिणी दृश्यते। अत्र आत्रेयतैत्तिरीयकृष्णयजुर्वेदशाखाध्यायिनां संहितायां मूलस्य देवता पितरः उक्ताः, ब्राह्मणे तु कुत्रचिन् निर्ऋतिरुक्ता कुत्रचित् प्रजापतिरुक्त इति एकस्या एव शाखाया ग्रन्थेऽपि विगानं दृश्यत इत्ययमपि विषयः परिचिन्तनीयोऽस्ति। अभिजिन् नक्षत्रम्

आत्रेयतैत्तिरीयकृष्णयजुर्वेदशाखाध्यायिनां संहितायां ब्राह्मणे च प्रथमकाण्डे नोल्लिखितम्, तेषामेव ब्राह्मणे तृतीयकाण्डे तु द्वयोः स्थलयोरेव उल्लिखिमस्ति, तस्य देवता च ब्रह्म इत्युल्लिखितमस्ति। काठककृष्णयजुर्वेदसंहितायामपि अभिजित उल्लेखो न दृश्यते। मैत्रायणीयकृष्णयजुर्वेदसंहितायां तु तस्योल्लेखोऽस्ति, तस्य देवता च ब्रह्मा प्रतिपादितोऽस्ति। वेदाङ्गज्योतिषग्रन्थे तु अभिजिद्देवतोल्लिखिता नास्ति। शतभिषजो देवता आत्रेय-तैत्तिरीयकृष्णयजुर्वेदशाखाध्यायिनां संहितायां ब्राह्मणे च इन्द्र उक्तोऽस्ति, किन्तु तेषामेव ब्राह्मणे एकत्र तु (३।१।२) वरुण उक्तोऽस्ति। काठककृष्णयजुर्वेदसंहितायामपि शतभिषजो देवता वरुण एवोक्तोऽस्ति। मैत्रायणीयकृष्णयजुर्वेदसंहितायां तु शतभिषजो देवता इन्द्र उक्तोऽस्ति। वेदाङ्गज्योतिषग्रन्थे तु शतभिषजो देवता वरुण एवोक्तोऽस्ति। अत्र वेदाङ्गज्योतिषग्रन्थोक्तिः काठककृष्णयजुर्वेदसंहितानुसारिणी दृश्यते। अत्राऽपि आत्रेयतैतिरीयकृष्णयजुर्वेदशाखाध्यायिनां संहितायां ब्राह्मणे च विगानमपि दृश्यत इति परिचिन्तनीयोऽयं विषयः। पूर्वप्रोष्ठपदानाम् उत्तरप्रोष्ठपदानां च देवते आत्रेय-तैत्तिरीयकृष्णयजुर्वेदसंहितादिषु क्रमेण अजएकपात् अहिर्बुध्न्यः इति चोल्लिखिते दृश्येते, मैत्रायणीयकृष्णयजुर्वेदसंहितायां तु क्रमेण अहिर्बुध्न्यः अजएकपात् इत्युल्लिखिते दृश्येते। वेदाङ्गज्योतिषग्रन्थे च सुधाकरसंस्करणे शिक्षादिवेदषडङ्गसंस्करणे, हस्तलेखेषु च पूर्वप्रोष्ठपदानाम् उत्तरप्रोष्ठपदानां च देवते क्रमेण अजएकपात् अहिर्बुध्न्य इत्येवोल्लिखिते दृश्येते। शामशास्त्रिसंस्करणे तु क्रमेण अहिर्बुध्न्यः अजएकपात् इत्युल्लिखिते दृश्येते। अत्र सोमाकरेण "प्रोष्ठपदयोर् विपर्ययः पाठदोषो वा" इति टिप्पणी कृतोपलभ्यते। सुधाकरेण तु तादृशी टिप्पणी न कृता। तत्र "पूर्वभद्रपदाया अजो वैकपादिति देवताद्वयं वा एकदेवताया नामद्वयम्" इत्युक्त्वा सुधाकरेण वैदिकविषयाऽनभिज्ञता स्वस्य प्रकटीकृता दृश्यते।

अत्र नक्षत्रनामकरणे नक्षत्रदेवताद्वैधे यथाशाखं व्यवस्था ज्ञेया। संहिता-ब्राह्मणविगाने संहिताप्राबल्यं बोध्यम् प्रथमोपस्थितत्वात्, अथवा मन्त्रोक्तं प्रबलं मन्तव्यम् "मन्त्रचोदनयोर् मन्त्रबलं प्रयोगित्वात्" (कात्यायनश्रौतसूत्रे १।५।७) इति न्यायात्। स्वशाखायां नक्षत्रदेवताव्यवस्थाभावे वेदाङ्गज्योतिषग्रन्थोक्ता व्यवस्था स्वीकर्तव्या।

विशेषः— एतेषां श्लोकानां साधारणोऽर्थः सोमाकरेणैवोक्तः। अस्माभिस्तु बहूनि श्रुतिवचनानि प्रदर्श्य विवेचनपूर्वकं श्लोकानामर्थः प्रतिपादितो ज्ञेयः। ऋग्वेदेऽपि (५।५१।१-१५) नक्षत्रदेवता उल्लिखिता इति केचिन् मन्यन्ते॥३२-३४॥

हिन्दी– (कृत्तिका का) अग्नि, (रोहिणी का) प्रजापति (ब्रह्मा), (मृगशीर्ष का) सोम (चन्द्र), (आर्द्रा का) रुद्र, (पुनर्वसु का) आदिति, (तिष्य का) बृहस्पति, (आश्लेषा का) सर्प, (मघा का) पितर, (पूर्वफल्गुनी का) भग (सूर्यविशेष), (उत्तरफल्गुनी का) अर्यमा (धाता), (हस्त का) सविता (सूर्य), (चित्रा का) त्वष्टा, (स्वाति का) वायु, (विशाखा का) इन्द्राग्नी, (अनुराधा का) मित्र (सूर्यविशेष), (ज्येष्ठा का) इन्द्र, (मूल का) निर्ऋति, (पूर्वाषाढा का) आपः (जल), (उत्तराषाढा का) विश्वेदेव, (श्रवण का) विष्णु, (धनिष्ठा का) वसु, (शतभिषक् का) वरुण, (पूर्वभद्रपद का) अजएकपात् (सूर्यविशेष), (उत्तरभद्रपद का) अहिर्बुध्न्य, (रेवती का) पूषा, (अश्विनी का) अश्विनीकुमार, ([अप-]भरणी का) यम (ये नक्षत्रों के देवताएं हैं) ॥३२-३४॥

[यज्ञकर्मार्थं नक्षत्रदेवताभिर् यजमानस्य नक्षत्रजनाम्नः करणम्]

नक्षत्रदेवता ह्येता एताभिर् यज्ञकर्मणि।
यजमानस्य शास्त्रज्ञैर् नाम नक्षत्रजं स्मृतम्॥३५॥

(सोमाकरभाष्यम्)

नक्षत्रदेवता एता इति। एतासां प्रयोजनं यस्मात् शास्त्रज्ञैस् तन्त्रकारैर् बह्वृचानां सूक्तवाके **"यजमाननामनी (अस्याऽऽदिश्य नामनी)"** (द्र.- आश्वलायनश्रौतसूत्रे १।९।५) इति द्वितीयं नाम नक्षत्रजं स्मृतमुदाहृतं यज्ञकर्मणि तस्मादेता उदाहृताः॥३५॥

(कौण्डिन्न्यायनव्याख्यानम्)

यज्ञेषु सूक्तवाकाऽऽशीःप्रार्थनसुब्रह्मण्याह्वानादिषु श्रौतस्मार्तयज्ञाधिकृतस्य त्रैवर्णिकस्य यजमानस्य नक्षत्रजनाम्नः **कर्तव्यत्वं प्रतिपादयति शास्त्रकारः–** नक्षत्रदेवता ह्येता **इत्यादिना।**

एताः हि कृत्तिकादीनां नक्षत्राणां क्रमेण देवताः श्रुत्युक्ताः सन्ति। एताभिर् देवताभिः सम्बद्धं यजमानस्य नक्षत्रजं नाम यज्ञकर्मार्थं कार्यमिति श्रुतिशास्त्रज्ञैः स्मृतमस्तीत्यर्थः।

विशेषः– एतच्छ्लोकोक्तस्य नक्षत्रनामकरणस्य वैदिकानां परम्पराया **विशेषेण विचारोऽस्य श्लोकस्य व्याख्यानेऽन्यैर् न कृतः। अस्माभिस् तु भूमिकायां अष्टात्रिंशे प्रकरणे** (पृ.२०३–२१६) **एतस्मिन् विषये विचारो विस्तरेण प्रस्तुतोऽस्ति, स तत्रैव द्रष्टव्यः॥३५॥**

हिन्दी – ये ही नक्षत्रों की देवताएं हैं, [अपने-अपने जन्म के नक्षत्र से सम्बद्ध] इन नक्षत्र-देवताओं से यज्ञ कर्म के लिए यजमान का नक्षत्रज नाम की कर्तव्यता वेदशास्त्रज्ञ मुनियों ने समझी (बताई) है।

विशेष – यहां पर वैदिक नक्षत्रनामकरणविधान को वर्णित किया गया है। यह विधान वैदिक नक्षत्रदेवताओं से सम्बद्ध है। नामकरणसंस्कार में नक्षत्रनाम के निर्णय के विषय में वर्तमान काल में प्रचलित 'अवकहडचक्र' प्राचीन वैदिक ग्रन्थों में सर्वथा अनुपलब्ध है। वेदाङ्गज्योतिष का नक्षत्रनामकरणविधान इस चक्र के विधान से बिलकूल भिन्न है। वेदाङ्ग-ज्योतिष के नक्षत्रनामकरणविधान का प्रभाव चरकसंहिता में दिखाई देता है (शारीरस्थान ८।७९)। इस का स्पष्टीकरण चक्रपाणि ने और गङ्गाधर ने वेदाङ्गज्योतिषानुकूल रूप में किया है। सुश्रुतसंहिता में भी ऐसी बात है (शारीर.१०।२४)। इस का स्पष्टीकरण डल्हण ने भी लगधप्रोक्त वेदाङ्गज्योतिषग्रन्थ में प्रतिपादित व्यवस्था के अनुसार ही किया है। अष्टाङ्गसङ्ग्रह के उत्तरस्थान के प्रथम अध्याय में (श्लो.७८) भी वेदाङ्गज्योतिष की ही अनुकूल बात पाई जाती है। विक्रमसंवत् १७५६ में रचित संस्कारभास्कर ग्रन्थ में भी कात्यायनसूत्रानुसारी लोगों में वेदाङ्गज्योतिष के अनुकूल नक्षत्रनाम रखने की परम्परा जीवित रहने की बात पाई जाती है (मुम्बई, १९६९, पृ.१२३-१२४)। धर्मसिन्धु में भी इस विषय का उल्लेख है। वैदिक नक्षत्रनामकरण की पद्धति के महत्त्व और अनुसरणीयता के सम्बन्ध में प्रस्तुत ग्रन्थ की संस्कृतभूमिका के अठतीसवें प्रकरण (पृ.२०३-२१६) को देखें॥३५॥

[नक्षत्रविशेषाणामुग्रक्रूरसञ्ज्ञे]

उग्राण्यार्द्रा च चित्रा च विशाखा श्रवणोऽश्वयुक्।
क्रूराणि तु मघाः स्वातिर् ज्येष्ठा मूलं यमस्य यत्॥३६॥

(सोमाकरभाष्यम्)

उग्राण्यार्द्रा च चित्रेति। नक्षत्रस्वरूपज्ञानस्तवनप्रतीत्यर्थः श्लोकः। याम्यं भरणी सङ्क्षेपार्थमाह॥३६॥

(कौण्डिन्न्यायनव्याख्यानम्)

आश्वलायनगृह्यसूत्रे "उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः" (१।४।१) इति, भारद्वाजगृह्यसूत्रे "अथाऽस्याः प्रथमगर्भिण्याश् चतुर्थे मासि सीमन्तं कुर्वन्त्यापूर्यमाणपक्षे पुण्ये नक्षत्रे" इति (१।२१), बौधायनगृह्य-सूत्रे "रोहिणी मृगशीर्षमुत्तरे फल्गुनी स्वातीति विवाहस्य नक्षत्राणि, पुनर्वसू तिष्यो हस्तश् श्रोणा रेवतीत्यन्येषां भूतिकर्मणाम्, यानि चाऽन्यानि पुण्योक्तानि नक्षत्राणि" (१।१।२०-२२) इति दृश्यते। एवं च वैदिकपरम्परायां कानि चन नक्षत्राणि कल्याणानि पुण्यानि च स्वीकृतानि, कानि चन तद्विपरीतानि स्वीकृतानीति गम्यते। तेषां

विवेकाय शास्त्रकारः प्रसङ्गसङ्गत्या लाघवाद् उग्राणि क्रूराणि च नक्षत्राणि प्रदर्शयति— उग्राण्यार्द्रा च चित्रा चेत्यादिना।

आर्द्रा, चित्रा, विशाखा, श्रवणः, अश्वयुक् च उग्राणि नक्षत्राणि ज्ञेयानि। मघाः, स्वातिः, ज्येष्ठा, मूलम्, यमस्य यन् नक्षत्रं तच् च (अपभरण्यश् च) इति नक्षत्राणि तु क्रूराणि नक्षत्राणि ज्ञेयानि। परिशेषादन्यानि नक्षत्राणि कल्याणानि पुण्यानि वा नक्षत्राणि ज्ञेयानि। एतेषामुग्राणां क्रूराणां च नक्षत्राणां शुभकर्मसु परिहारः, अभिचारादिषूग्रेषु क्रूरेषु च कर्मसूपयोगो यथाशास्त्रं कर्तव्य इत्याकूतम्। अग्न्याधानेऽपि ब्रह्मवर्चसकामनाप्रधानानां ब्राह्मणानां कृत्तिकासु अग्न्याधानम्, उग्रकर्मप्रधानस्य क्षत्रियस्य तु चित्रायामग्न्याधानम् इत्यादिका व्यवस्था च बोद्धव्या। दृश्यते हि "चित्रा क्षत्रियस्य" इति सूत्रं कात्यायनश्रौतसूत्रे (४।७।४)। आत्रेयतैत्तिरीयकृष्णयजुर्वेदब्राह्मणेऽपि "यो भ्रातृव्यवान् स्यात्। स चित्रायामग्निमादधीत। अवकीर्यैव भ्रातृव्यान्। ओजो बलमिन्द्रियं वीर्यमात्मन् धत्ते" इति वचनं दृश्यते (१।१।२।६)। माध्यन्दिनीयवाजसनेयिशतपथब्राह्मणेऽपि "हन्ति सपत्नान् हन्ति द्विषन्तं भ्रातृव्यं य एवं विद्वाँश् चित्रायामाधत्ते, तस्मादेतत् क्षत्रिय एव नक्षत्रमुपेर्त्सेज् जिघांसतीव ह्येष सपत्नान् वीव जिगीषते" इति पठ्यते (२।१।२।१७)। एवमेव स्वातौ विवाहविधानमपि आसुरादिविवाहविषयमवगम्यते। कामनाविशेषविषयं वा। तथा हि भारद्वाजगृह्यसूत्रे "यां कामयेत दुहितरं प्रिया स्यादिति तां निष्ट्यायां दद्यात् प्रियैव भवति, नैव तु पुनरागच्छतीति विज्ञायते" इति (१।१२)। एवमेवाऽऽपस्तम्बगृह्यसूत्रेऽपि (३।२-५)। एवमेव यथायथमूह्यम्। नक्षत्रविषये आत्रेयतैत्तिरीयकृष्णयजुर्वेदब्राह्मणस्थं "यत् पुण्यं नक्षत्रं तद् बट् कुर्वीतोपव्युषसम्। यदा वै सूर्य उदेति। अथ नक्षत्रं नैति। यावति तत्र सूर्यो गच्छेत्। यत्र जघन्यं पश्येत्। तावति कुर्वीत तत्कारी स्यात्। पुण्याह एव कुरुते। एवं ह वै यज्ञेषुं च शतद्युम्नं च मात्स्यो निरवसाययां चकार॥ यो वै नक्षत्रियं प्रजापतिं वेद। उभयोरेनं लोकयोर् विदुः। हस्त एवाऽस्य हस्तः। चित्रा शिरः। निष्ट्या हृदयम्। ऊरू विशाखे। प्रतिष्ठाऽनूराधाः। एष वै नक्षत्रियः प्रजापतिः। य एवं वेद। उभयोरेनं लोकयोर् विदुः। अस्मिँश् चाऽमुष्मिँश् च॥ यां कामयेत दुहितरं प्रिया स्यादिति। तां निष्ट्यायां दद्यात्। प्रियैव भवति। नैव तु पुनरागच्छति॥ अभिजिन् नाम नक्षत्रम्। उपरिष्टादषाढानाम्। अवस्ताच् छ्रोणायै। देवासुराः संयत्ता आसन्। ते देवास् तस्मिन् नक्षत्रेऽभ्यजयन्। यदभ्यजयन्। तदभिजितोऽभिजित्त्वम्। यं काम्येताऽनपजय्यं जयेदिति। तमेतस्मिन् नक्षत्रे यातयेत्। अनपजय्यमेव जयति। पापपराजितमिव तु॥ प्रजापतिःपशूनसृजत। ते नक्षत्रंनक्षत्रमुपातिष्ठन्त। ते समावन्त एवाऽभवन्। ते

रेवतीमुपातिष्ठन्त। ते रेवत्यां प्राभवन्। तस्माद् रेवत्यां पशूनां कुर्वीत। यत्किञ्चाऽर्वाचीनं सोमात्। प्रैव भवन्ति॥ सलिलं वा इदमन्तरासीत्। यदतरन्। तत् तारकाणां तारकत्वम्। यो वा इह यजते। अमुं स लोकं नक्षते। तन् नक्षत्राणां नक्षत्रत्वम्। देवगृहा वै नक्षत्राणि। य एवं वेद। गृह्येव भवति॥ यानि वा इमानि पृथिव्याश् चित्राणि। तानि नक्षत्राणि। तस्मादश्लीलनामँश् चित्रे। नाऽवस्येन् न यजेत। यथा पापाहे कुरुते। तादृगेव तत्॥ देवनक्षत्राणि वा अन्यानि। यमनक्षत्राण्यन्यानि। कृत्तिकाः प्रथमम्। विशाखे उत्तमम्। तानि देवनक्षत्राणि। अनूराधाः प्रथमम्। अपभरणीरुत्तमम्। तानि यमनक्षत्राणि। यानि देवनक्षत्राणि तानि दक्षिणेन परियन्ति। यानि यमनक्षत्राणि तान्युत्तरेण॥ अन्वेषामरात्स्मेति। तदनूराधाः। ज्येष्ठमेषामवधिष्मेति। तज् ज्येष्ठघ्नी। मूलमेषामवृक्षामेति। तन् मूल-बर्हणी। यन् नाऽसहन्त। तदषाढाः। यदश्लोणत्। तच् छ्रोणा। यदशृणोत्। तच् छ्रविष्ठाः। यच् छतमभिषज्यन्। तच् छतभिषक्। प्रोष्ठपदेषूदयच्छन्त। रेवत्या-मरवन्त। अश्वयुजोरयुञ्जत। अपभरणीष्वपावहन्। तानि वा एतानि यमनक्षत्राणि॥ यान्येव देवनक्षत्राणि। तेषु कुर्वीत यत्कारी स्यात्। पुण्याह एव कुरुते॥" इति प्रकरणं च (१।५।२।१-९) परिशीलनीयम्। अत्र कृत्तिकासूदगयने सति कृत्तिकादीनि देवनक्षत्राणि अनूराधादीनि दक्षिणाययननक्षत्राणि यमनक्षत्राण्युक्तान्यवगम्यन्ते। तस्मात् तिलकोक्तं चिन्त्यम्। तत्र देवनक्षत्र-यमनक्षत्रविभागः सामान्यरूपः, पुण्य-नक्षत्रोग्रनक्षत्रक्रूरनक्षत्रविभागो विशेषरूपः इति प्रतीयते। शौनकिनामथर्ववेदमन्त्र-संहितायामपि कतिपयनक्षत्राणामशुभत्वस्य सूचक उल्लेखो दृश्यते। तथाहि—

ज्येष्ठघ्न्यां जातो विचृतोर् यमस्य मूलबर्हणात् परिपाह्येनम्।
अत्येनं नेषद् दुरितानि विश्वा दीर्घायुत्वाय शतशारदाय॥
व्याघ्रेऽह्न्यजनिष्ट वीरो नक्षत्रजा जायमानः सुवीरः।
स मा वधीत् पितरं वर्धमानो मा मातरं प्र मिनीज् जनित्रीम्॥ इति (६।११०।२,३)।

अन्ये श्रौताः स्मार्ताश् च नक्षत्रसम्बद्धा विधयो भूमिकायां सङ्क्षेपेणोल्लिखिताः सन्ति द्वादशे प्रकरणे (पृ.७२)। ते तत्रैव द्रष्टव्याः।

मुहूर्तचिन्तामणौ तु "पूर्वात्रयं याम्यमघे उग्रं क्रूरं कुजस् तथा। तस्मिन् घाताग्निशाठ्यानि विषशस्त्रादि सिध्यति" इति (२।४), "मूलेन्द्राद्रर्हिभं सौरिस् तीक्ष्णं दारुणसंज्ञकम्। तत्राऽभिचारघातोग्रभेदाः पशुदमादिकम्" इति (२।४) चोक्त-मिति वैदिकैस् तद्विवेचनं कार्यम्॥३६॥

हिन्दी– आर्द्रा, चित्रा, विशाखा, श्रवण और अश्विनी उग्र नक्षत्र हैं। मघा, स्वाति, ज्येष्ठा, मूल और यम का जो नक्षत्र है वह नक्षत्र (भरणी) क्रूर नक्षत्र हैं [शेष कृत्तिकादि नक्षत्र पुण्य नक्षत्र हैं]।

विशेष– मुहूर्तचिन्तामणि में तो पूर्वफल्गुनी, पूर्वाषाढा, पूर्वभद्रपद, भरणी और मघा ही उग्र और क्रूर भी बताए गए हैं (२।४)। इस से लगधमुनिप्रोक्त वेदाङ्गज्योतिष की श्रुति की और गृह्यसूत्रों की अनुकूल व्यवस्था में और मुसलवानों के शासनकाल में (१६५७ वैक्रमाब्द में) बने हुए अर्वाचीन ग्रन्थ मुहूर्तचिन्तामणि की व्यवस्था में बडा ही अन्तर दिखाई देता है। पीयूषधारा में उद्धृत कथित वसिष्ठादिवचन भी वेदाङ्गज्योतिषग्रन्थ के अनुकूल न होने से चिन्त्य ही हैं॥३६॥

[अधिकमासोपजन्मकारणम्]

द्व्यूनं द्विषष्टिभागेन दिनं सौराच् च पार्वणम्।
यत्कृतावुपजायेते मध्येऽन्ते चाऽधिमासकौ॥३७॥

(सोमाकरभाष्यम्)

तत्र मध्येऽन्ते च द्वावधिमासकौ यत्कृतावुपजायेते यया कल्पनया भवतस्तदर्थं हेयमपहातव्यं कुतोऽवयवमिति वाक्यशेषः। किं केवलमानम्? न। सपार्वणम्। पार्वण-नक्षत्रसहितमित्यर्थः। एकान्तरेऽह्नि मासे चेत्यनियमे एतदेवार्थे उत्तरसौम्याविष्णवाजानां परतो द्वौ द्वौ न। एवं मापलक्षके अत एवेह समसंख्यायाः सर्वाणि कालसाम्यमभिप्रेत्य पाञ्चवार्षिकयुगे उदाहृतानि। पर्व तु विभागार्थं कुतो हेयं सूर्यात् सूर्यमानादिति वाक्य-शेषः। किमेकदेशो द्यूनं द्विषष्टिभागेन प्रत्येकं दिनं द्वाषष्टेन भागेन द्वयेन हीनं कृत्वेति वाक्यशेषः। एतदर्थमेवोक्तं **"दुहेयं पर्व चेत् पाद"** (श्लो.१२) इति।

तथा च गर्गः–

ततः प्रक्षीयमाणस्य तिथिरित्येष संज्ञिता।
द्विलवोनमहोरात्रं चन्द्रस्य गतिरुत्तमा॥ इति।

तथा–

द्विलवक्षयसम्भूतो द्वाषष्ट्या भवते तिथिः।
ऋतोरन्तमनुप्राप्य हीनरात्रेति नाम च॥ इति॥३७॥

(कौण्डिन्न्यायनव्याख्यानम्)

अथ सौरदिन-चान्द्रदिनयोः सम्बन्धं प्रतिपाद्य तत्सम्बन्धाच् चान्द्राधिमास-निष्पत्तिं प्रदर्श्य ऋग्वेदादिभ्यः सिद्धं वैदिकानामार्याणां चान्द्राधिमासस्वीकार-मुपपादयति शास्त्रकारः– द्व्यूनं द्विषष्टिभागेनेत्यादिना।

सौराद् दिनात् पार्वणमाससम्बद्धं दिनं च सौरदिनद्विषष्टितमभागविचारेण द्वाभ्यां भागाभ्यां न्यूनं ज्ञेयम्। यस्मात् कारणाद् हि श्रविष्ठादेर् माघशुक्लप्रतिपदश् च प्रवृत्तस्य पञ्चवर्षात्मकस्य युगस्य मध्ये (तृतीयवर्षस्य प्रथमस्याऽयनस्य) अन्ते (ग्रीष्मे) तथा पञ्चमवर्षस्य (द्वितीयस्याऽयनस्य) अन्ते (हेमन्ते) च अधिमासकौ उपजायेते इत्यर्थः। तैषेऽधिमासस्योल्लेखः "तदुभयं व्युदितं तैषस्य त्वेवोदिततरमिव त एतं त्रयोदशमधिचरं मासमाप्नुवन्ति, एतावान् वै संवत्सरो यदेष त्रयोदशो मासस् तदत्रैव सर्वः संवत्सर आप्तो भवति" इति शाङ्खायनीयानाम् ऋग्वेदाध्यायिनां ब्राह्मणे (१९।२) च कृतोऽवगम्यते। "हेमन्तशिशिरयोश् चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः" (२।४।१) इति वदता आश्वलायनगृह्यसूत्रकारेणाऽपि दक्षिणायनान्ते हेमन्ते कस्मिँश् चिद् वर्षेऽधिमासस्योपजननं विचार्य तदपरपक्षपरिहाराय 'चतुर्णामपरपक्षाणाम्' इत्युक्तमिति देवस्वामिना गार्ग्यनारायणेन च व्याख्यातमस्ति। तस्माद् वैदिकेषु द्विजेन्द्रेषु तृतीयेतृतीये वर्षे हेमन्तान्तेऽधिमासस्योपजननं प्रसिद्धमित्यवगम्यते। पार्वणम्=चान्द्रम्, "पार्वणमासानि विज्ञायन्ते" (३।१।३०) इति, "त्रिंशद् वै सावनस्य विप्रतिषेधात् पार्वणस्य यथा यद्येतान् नाऽलभेतेति" (३।१।३१) इति च जैमिनीयधर्ममीमांसासूत्रसङ्कर्षकाण्डे, तत्रैव देवस्वामिभाष्ये च "पार्वणसंवत्सरात् षड्भिरहोभिः सावनस्य संवत्सरस्यातिरेकात्" इत्यादौ, तथा सोमाकरभाष्ये (श्लो. ११) स्थिते "तस्यार्धं पार्वणः पक्षस् तस्मात् पञ्चदशी तिथिः" इति गर्गवचने, "पारिप्लवमिति सावनसंवत्सरपरिग्रहार्थं वचनम्। इतरथा पार्वणो वा सौरो वा नाक्षत्रो वा संवत्सरः पक्षे गृह्येत" इति माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मणव्याख्याने हरिस्वामिवचने (१३।४।३।१५) च पार्वणशब्दस्य चान्द्रशब्दपर्यायवाचित्वेन प्रयुक्तताया दर्शनाद् वाक्याद् औचित्याच् च। एवं च सौरदिनाच् चान्द्रस्य दिनस्य तिथिरूपस्य सामान्यतया द्विषष्टितमभागद्वयेन न्यूनत्वात् सौरमासाच् चान्द्रस्य मासस्यैकेन दिनेन न्यूनत्वमिति त्रिंशति सौरमासेषु एकत्रिंशच् चान्द्रमासा भवन्ति। अयमेकत्रिंशश् चान्द्रो मासः प्रथमोऽधिमासः, ततः पुनः त्रिंशति सौरमासेषु गतेषु एकत्रिंशच् चान्द्रमासा भवन्तीत्ययमेकत्रिंशश् चान्द्रो मासो द्वितीयोऽधिमासो भवतीति लगधमुनिना दिक्प्रदर्शनरूपेणोक्तं ज्ञेयम्।

एषाऽधिमासोपपत्तिः कौटलीयेऽर्थशास्त्रे च द्वितीयेऽधिकरणे विंशेऽध्याये देशकालमाने च प्रतिपादिताऽस्ति। तथा हि—

दिवसस्य हरत्यर्कः षष्टिभागमृतौ ततः।
करोत्येकमहश्छेदं तथैवैकं च चन्द्रमाः॥

एवमर्धतृतीयानामब्दानामधिमासकम्।
ग्रीष्मे जनयतः पूर्वं पञ्चाब्दान्ते च पश्चिमम्॥ इति।

एतस्य वचनस्य भट्टस्वाम्यनुसारिगणपतिशास्त्रिकृतं व्याख्यानं च—

"अधिमासं श्लोकद्वयेनाह— दिवसस्येति। अर्कः सूर्यः, दिवसस्य अहोरात्रस्य षष्टिभागम् एकघटिकात्मकं हरति प्रतिदिवसं छिनत्ति। ततः प्रतिदिवसमेकघटिकाहरणात्, ऋतौ षष्टिदिवसात्मकमासद्वयावसाने एकमहश्छेदम् एकमधिकमहोरात्रं करोति उत्पादयति। तथैव अर्कवदेव चन्द्रमाश् च एकम् अहश्छेदं करोति। एवम् अनेन प्रकारेण, अर्धतृतीयानामब्दानाम् अर्धोनतृतीयानां वर्षाणाम्, अर्थान् माघप्रभृतीनां त्रिंशतो मासानां ग्रीष्मे पूर्वम् अधिमासकम् अधिमासं त्रिंशत्तमं द्वितीयमाषाढम्, पञ्चाब्दान्ते अर्थात् पुनरर्धतृतीयवर्षात्मनां श्रावणप्रभृतीनां त्रिंशतो मासानामन्ते, पश्चिममधिमासकं च उत्तरमधिमासं च अर्थात् त्रिंशत्तमं द्वितीयं पौषं च जनयतः, अर्कचन्द्रमसौ" इति।

एतौ श्लोकौ जीमूतवाहनेन कालविवेकेऽप्युल्लिखितौ दृश्येते (पृ.११३)।

एतादृशस्याऽधिमासस्योल्लेखो महाभारतेऽपि दृश्यते। तथा हि—

कलाः काष्ठाश् च युज्यन्ते मुहूर्ताश् च दिनानि च।
अर्धमासाश् च मासाश् च नक्षत्राणि ग्रहास् तथा॥
ऋतवश् चाऽपि युज्यन्ते तथा संवत्सरा अपि।
एवं कालविभागेन कालचक्रं प्रवर्तते॥
तेषां कालातिरेकेण ज्योतिषां च व्यतिक्रमात्।
पञ्चमेपञ्चमे वर्षे द्वौ मासावुपजायतः॥ इति

—विराटपर्वणि ५२।१-३ (चित्रशालासंस्करणे),
४७।१-३ (सातवलेकरसंस्करणे)।

एवं चन्द्रचारविशेषादधिमास उपजायत इति सोमाकरेण गर्गवचनाभ्यां चन्द्रचारविशेषो दर्शितो द्रष्टव्यः। अत्रेदं विचारणीयम्—

एकस्माद् दृक्सिद्धसौरोदगयनारम्भकालात् षष्ठं दृक्सिद्धसौरोदगयनारम्भकालं यावत् सावनदिनानि १८२६.२१०९९४ भवन्तीति आधुनिकाः कालपरीक्षका वदन्ति। तथैव एकस्माद् दृक्सिद्ध-शुक्लप्रतिपदारम्भकालात् प्रभृति त्रिषष्टितमदृक्सिद्धशुक्लप्रतिपदारम्भकालं यावत् मध्यममानेन सावनदिनानि १८३०.८९६४८ भवन्तीति च ते वदन्ति। एवं च यदि प्रथमं दृक्सिद्धसौरोदगयनारम्भदिनं प्रथमं दृक्सिद्धशुक्लप्रतिपदारम्भदिनं चैकं भवति तर्हि षष्ठं दृक्सिद्धसौरोदगयनारम्भदिनं

त्रिषष्टितमाद् दृक्सिद्ध-शुक्लप्रतिपदारम्भदिनात् चतुःपञ्चानि दिनानि पूर्वमेवाऽऽपतति। तस्माद् वेदाङ्गज्योतिषग्रन्थे उक्ता पञ्चवर्षात्मकेषु सर्वेषु युगेषु प्रथमे वर्षे दृक्सिद्धसौरोदगयनारम्भदिनस्य दृक्सिद्धशुक्लप्रतिपदारम्भदिनस्य च सह प्रवृत्तिरनुपपन्ना, तथैव तत्रोक्ता पञ्चसु सौरेषु वर्षेसु द्वयोरधिमासयोर् व्यवस्था च नैव सूपपन्ना, तथैव तत्रोक्ता सौरेषु पञ्चसु वर्षेषु १८३० दिनानीत्युक्तिश् चाऽनुपपन्नेति एकस्मिन् सौरे वर्षे ३६६ दिनानीत्युक्तिरप्यनुपपन्नैवेति च आधुनिकाः के चन वेदाङ्गज्योतिषग्रन्थसमीक्षका वदन्ति। एवं च लगधप्रोक्तवेदाङ्गज्योतिषग्रन्थोक्ता कालगणनाव्यवस्था स्वल्प एव कालेऽयथार्थाऽशुद्धिबहुलेति च स्पष्टतयैव ज्ञायत इति सा व्यवस्था कदाचित् प्रवृत्ताऽपि ततः स्वल्प एव काले व्यतीते परित्यक्ता स्यादिति च ते वदन्ति (भारतीय ज्योतिष, पृ.१३०-१३१)। वस्तुतस् तु "अतश् च प्रकृतं बुद्ध्वा देशकालान्तराणि च। तन्त्रकर्तुरभिप्रायानुपायाँश् चाऽर्थमादिशेत्" इति चरकसंहितायामुक्तस्य (१।२६।३७) मुनिकृतग्रन्थार्थनिरूपणसिद्धान्तस्याऽनुसणीयत्वात्, लगधमुनिप्रोक्तस्य वेदाङ्गज्योतिषग्रन्थस्य वैदिककालगणनापद्धतिदिक्प्रदर्शनमात्रपरत्वस्य "इत्युपायसमुद्देशो भूयोऽप्येनं प्रकल्पयेत्" इति (श्लो.४२) लगधमुनिवचनादवगम्यमानत्वाच् च लगधमुनिकृतकालगणनादिक्प्रदर्शनमवलम्ब्य वैदिकैः पञ्चवर्षात्मकस्य युगस्य, तदन्तर्गतानां सौराणां चान्द्राणां च वर्षाणां दिनानाम्, अधिमासस्य, ऋतूनाम्, मासानाम्, पर्वकालस्य च गणना कर्तव्येत्यवगन्तव्यम्।

वैदिकैर् हि आर्यैः पर्वनिर्णयश् चक्षुषाऽपि चन्द्रं विलोक्याऽपि कर्तव्य इति द्वादशस्य श्लोकस्य व्याख्याने प्रदर्शितैः शाङ्खायनब्राह्मणैतरेयिब्राह्मण-माध्यन्दिनीय-वाजसनेयिशुक्लयजुर्वेदशतपथब्राह्मणादिवचनैः प्रतिपादितमेव। एवं च चान्द्राणां मासत्वयनवर्षाणामपि तेनैव प्रकारेण निर्णयः कर्तव्य इत्यपि सिद्धं भवति।

सौरवर्षस्य निर्णयश् च घर्मक्षपावृद्धिह्रासौ मण्डलविशेषे शङ्कोश् छायां वा विलोक्य कर्तव्यः। उदगयनारम्भदिने हि दिनपरिमाणं दिनपरिमाणेषु ह्रस्वतमं भवति, रात्रिश् च दीर्घतमा भवति। दक्षिणायनारम्भदिने तु दिनपरिमाणं दिनपरिमाणेषु दीर्घतमं भवति, रात्रिश् च ह्रस्वतमा भवति। उदगयनारम्भदिने हि मध्याह्ने शङ्कोश् छाया मध्याह्नच्छायासु दीर्घतमा भवति। दक्षिणायनारम्भदिने तु मध्याह्ने शङ्कोश् छाया मध्याह्नच्छायासु ह्रस्वतमा भवति।

छायादर्शनेन कालनिरूपणस्य परम्परा वैदिकानामाचार्याणां प्राचीनात् कालात् प्रभृत्येव प्रवृत्ताऽवगम्यते। तथाहि—

आदित्यस् त्वेव सर्वऽ ऋतवो यदैवोदेत्यथ वसन्तो यदा सङ्गवोऽथ ग्रीष्मो यदा मध्यन्दिनोऽथ वर्षा यदाऽपराह्णोऽथ शरद् यदैवाऽस्तमेत्यथ हेमन्तस् तस्मादु मध्यन्दिनऽ एवाऽऽदधीत तर्हि ह्येषोऽस्य लोकस्य नेदिष्ठं भवति तन् नेदिष्ठादेवैनमेतन् मध्यान् निर्मिमीते॥ छाययेव वाऽ अयं पुरुषः पाप्मना-ऽनुषक्तः सोऽस्याऽत्र कनिष्ठो भवत्यधस्पदमिवेयस्यते तत् कनिष्ठमेवैतत् पाप्मानमवबाधते तस्मादु मध्यन्दिनऽ एवाऽऽदधीत॥ इति

–माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशतपथब्राह्मणे (२।२।३।९,१०)।

त्रुटीनां तु भवेत् त्रिंशन् मुहूर्तस्य प्रयोजनम्।
द्वादशाङ्गुलमुच्छ्रेषं तस्य च्छायाप्रमाणतः॥

नवतिषडङ्गुलश् चैव प्रतीचीं तां प्रकाशयेत्।
पुरस्तात् सन्धिवेलायां मुहूर्तो रौद्र उच्यते॥

श्वेतः षष्टिः समाख्यातो मैत्रो वै द्वादशाङ्गुलः।
षट्सु सारभटो ज्ञेयः सावित्रः पञ्चसु स्मृतः॥

चतुर्षु चैव वैराजस् त्रिषु विश्वावसुस् तथा।
मध्याह्ने चाऽभिजिन् नाम यस्मिन् छाया प्रतिष्ठति॥

प्राचीं वै गामिनीं छायां रौहिणस् त्रिषु वर्तते।
बलश् चतुर्षु विख्यातो विजयः पञ्चसु स्मृतः॥

नैर्ऋतस् तु षडङ्गुल्यो वारुणो द्वादशाङ्गुलः।
सौम्यः षष्टिः समाख्यातो भगस् तु परमस् तथा॥ इति

–आथर्वणज्योतिषे (१।५-१०)।

यथायथा च ह्रस्वत्वं पुंसः स्थानेन सम्भवेत्।
तथातथा पवित्रः स्यात् कालः श्राद्धार्चनादिषु॥

छायेयं पुरुषस्यैवं तत्पादाधो भवेद् यथा।
आधानश्राद्धदानादेः स कालोऽक्षयकृत् स्मृतः।

अयुतं तु मुहूर्तानामर्धमष्टदशाधिकम्।
त्रिंशद्भिस् तैरहोरात्रमिति माध्यन्दिनी श्रुतिः॥

मध्याह्ने तु गते सूर्ये न पूर्वे न च पश्चिमे।
तुल्याग्रसंस्थिते चैव सोऽष्टमो भाग उच्यते॥ इति

–बृहत्पराशरस्मृतौ (७।९२-९५)।

चक्षुः शास्त्रं जलं लेख्यं गणितं बुद्धिवित्तमाः।
पञ्चैते हेतवो विप्रा ज्योतिर्गणविवेचने॥ इति

–ब्रह्माण्डपुराणे (१।२४।१५२), लिङ्गपुराणे (१।६१।६२-६३), वायुपुराणे (१।५३।१२३) च।

एते दिनमुहूर्ताश् च दिवाकरविनिर्मिताः।
शङ्कुच्छायाविशेषेण वेदितव्याः प्रमाणतः॥ इति च

–ब्रह्माण्डपुराणे (२।३।४१), वायुपुराणे (२।५।४२)च।

छायायामष्टपौरुष्यामष्टादशभागश् छेदः,षट्पौरुष्यां चतुर्दशभागः, चतुष्-पौरुष्यामष्टभागः, द्विपौरुष्यां षड्भागः, पौरुष्यां चतुर्भागः, अष्टाङ्गुलायां त्रयो दशभागाः, चतुरङ्गुलायामष्टभागाः, अच्छायो मध्याह्न इति। परावृत्ते दिवसे शेषमेवं विद्यात्। आषाढे मासि नष्टच्छायो मध्याह्नो भवति। अतः परं श्रावणादीनां षण्मासानां द्व्यङ्गुलोत्तरा, माघादीनां द्व्यङ्गुलावरा छाया॥ इति

–कौटलीयेऽर्थशास्त्रे (२।२०)।

रुतैर् मृगशकुन्तानां स्थावराणां च वृत्तिभिः।
छायादिपरिणामैश् च ऋतुधामा निरूप्यते॥ इति

–वाक्यपदीये तृतीयकाण्डे कालसमुद्देशे (श्लो.४५)।

आर्यावर्त पुस्तकालय

विषुवाभ्यामपि सौरवर्षस्य ज्ञानं कर्तव्यं भवति। विषुवं च केनाऽपि रूपेण संवत्सरसत्रादिवैदिकयज्ञेष्वपि प्रसिद्धमिति तस्याऽपि कालगणनाचिह्नत्वेनोपयोगो वैदिकानामार्याणां परम्परायां प्राचीनात् कालात् प्रभृत्येव क्रियमाणोऽवगम्यते। तथाहि–

यथा वै पुरुष एवं विषुवाँस् तस्य यथा दक्षिणोऽर्ध एवं पूर्वोऽर्धो विषुवतो यथोत्तरोऽर्ध एवमुत्तरोऽर्धो विषुवतः॥ इति

–ऐतरेयिणाम् ऋग्वेदाध्यायिनां ब्राह्मणे (१८।८[४।२२])।

अष्टाविंशिनावभितो विषुवन्तं मासौ, अष्टाविंशत्यक्षरोष्णिक्, औष्णिह्यो ग्रीवा अथैतच् छिरो यज्ञस्य यद् विषुवान् ग्रीवा एव तत् कल्पयित्वा तासु शिरः प्रतिदधाति, तदाहुः कतरेषामेषोऽह्नामवरेषां परेषामिति, नाऽवरेषां न परेषामित्याहुः, उभयेषां वा एषोऽह्नामुभयानि वैतस्यैतान्यहानि। इति

–शाङ्खायनीयानाम् ऋग्वेदाध्यायिनां ब्राह्मणे (२६।१)।

यथा वै शालैवं संवत्सरो यथा शालाया पक्षसी एवं संवत्सरस्य पक्षसी यथा मध्यमो वंश एवं दिवाकीर्त्यम्॥ इत्यादि

–काठककृष्णयजुर्वेदसंहितायाम् (३।५), मैत्रायणीयकृष्णयजुर्वेद-संहितायां (४।८।१०) च।

विषुवानेष भवति। इति

–ताण्डि-कौथुम-राणायनीय-सामवेदाध्यायिनां पञ्चविंशब्राह्मणे (४।६।१)।

आत्मा वा एष संवत्सरस्य यद् विषुवान् पक्षावेतावभितो भवतः। इति च

–तत्रैव (४।७।१)।

अग्निष्टोमो विषुवान्। इति

–कात्यायनश्रौतसूत्रे (१३।२।९)।

पूर्वपक्षं प्रतिलोमम्। इति च

–तत्रैव (१३।२।१५)।

उत्तरं दक्षिणं ज्ञेयं दक्षिणोत्तरसंज्ञितम्।
मध्ये तु विषुवं ज्ञेयं पुटद्वयविनिस्सृतम्॥ इति

–बृहत्पराशरस्मृतौ (६।९९-१००)।

शरद्-वसन्तयोर् मध्ये मध्यमां गतिमास्थितः।
अतस् तुल्यमहोरात्रं करोति तिमिरापहः॥ इति

–ब्रह्माण्डपुराणे (१।२१।१४२-१४३), वायुपुराणे (१।५०।१९३) च।

सूर्येण विषुवं विद्यात् कालं सोमेन लक्षयेत्।
समा रात्रिरहश् चैव यदा तद् विषुवं भवेत्॥ इति च

–ब्रह्माण्डपुराणे (१।२१।१४८), वायुपुराणे (१।५०।१९८-१९९) च।

दशपञ्चमुहूर्तं वै अहर् विषुवति स्मृतम्।
दशपञ्चमुहूर्तं वै रात्रिन्दिवमिति स्मृतम्॥ इति

–वायुपुराणे (१।५०।१७४)।

शरद्वसन्तयोर् मध्ये विषुवं तद् विभाव्यते। इति च

–तत्रैव (१।५०।१७६)।

पञ्चदशमुहूर्तो दिवसो रात्रिश् च चैत्रे मासि आश्वयुजे च मासि भवतः। इति

–कौटलीयेऽर्थशास्त्रे (२।२०)।

अयने द्वे च विषुवे सदा पश्यति मार्गवित्।
कृत्वाऽऽयामं पुरा वत्स रेच-पूरक-कुम्भकम्॥ इति

–ब्रह्मविद्योपनिषदि (श्लो. ५५)।

विषुवाऽयनकालेषु ग्रहणे चाऽन्तरे सदा।
वाराणस्यादिके स्थाने स्नात्वा शुद्धो भवेन् नरः॥ इति

–जाबालदर्शनोपनिषदि (४।५५)।

श्राद्धं सङ्क्रमणे भानोः प्रशस्तं पृथिवीपते।
विषुवद्वितयं तत्राऽप्ययने द्वे विशेषतः॥ इति

–विष्णुधर्मोत्तरपुराणवचनम् (१।१४२।२५), हेमाद्रिकृते श्राद्धकल्पे (पृ.२२९)।

उपरिप्रदर्शितेभ्यो वचनेभ्यो विषुवकालस्याऽयनप्रारम्भकालाऽयनसमाप्तिकालमध्यस्थकालत्वम्, समरात्रिन्दिवकालत्वम्, तस्य सूर्यगतिस्थितिवशाज् ज्ञेयत्वम्, तस्य पुण्यकालत्वेन वैदिकानां विशेषाऽवधानस्य विषयत्वं च स्पष्टं भवति।

एवं च वैदिकैरार्यैः सौरेणाऽयनकालेन विषुवकालेन च सह सामञ्जस्यस्य स्थापनेन चान्द्राः मासा ऋतवोऽयनानि च वर्षेवर्षे युगेयुगे च निरूप्यन्ते विचार्यन्ते चेति उक्ताऽधिमासव्यवस्थाऽपि सामान्या दिक्प्रदर्शनात्मिकैव ज्ञेया। अतस् तस्या व्यवस्थायाः स्वीकारे कालगणनायां स्वल्पेन कालेनैव सौर-चान्द्र-मानयोर् महद् वैषम्यं स्यात्, सौरे वर्षे ३६६ दिनानां स्वीकारे शते वर्षेषु ७५ दिनानामन्तरं स्यादित्यादिकाऽऽपत्तिर् विचारशीलैर् विद्वद्भिर् नोद्भावनीया सौरमान-चान्द्रमानयोः परस्परं लक्षकत्वस्य स्वीकार्यत्वात्, दृक्सिद्धपूर्णिमाऽमावास्याभिः शङ्कुच्छायावेद्यदृक्सिद्धाऽयनारम्भदिनविषुवदिनैश् च परस्परज्ञापनस्य सम्भवात्, सौराणामार्तवानां मासानामपि शङ्कुच्छायया वेत्तुं शक्यतायाः कौटल्येन प्रतिपादितत्वाच् च। एवं च सौरं दृक्सिद्धम् उदगयनारम्भदिनम्, वासन्तविषुवदिनम्, दक्षिणायनारम्भदिनं शारदविषुवदिनं चेति चतुर्भिः कालैः सदैव चान्द्रं वर्षं सुविदितं कृत्वा तत् यथौचित्यधिमासयोजनेन सौरर्त्वनुरूपं कुर्वन्ति वैदिका आर्या इति ज्ञेयम्।

उक्तविधे व्यतिकरे न हि सर्वेषु पञ्चवर्षात्मकेषु युगेषु प्रतियुगार्धमधिकमासो नियमेन योज्यते, यथावश्यकं यथौचित्येव चाऽधिकमासो योज्यते। किन्तु यदायदाऽधिकमासो योज्यते तदातदाऽयनान्ते एव शुचौ मासे (आषाढे) वा सहस्ये मासे (पौषे) वा द्वितीयशुचिमासरूपेण (द्वितीयाषाढरूपेण) वा द्वितीयसहस्यमासरूपेण (द्वितीयपौषरूपेण) वैवाऽधिकमासो योज्यते, नाऽयनमध्येऽन्येषु मासेष्विति बोध्यम्। एतादृशी व्यवस्था च यदा दृक्सिद्धसौरायनारम्भदिने कृष्णपक्षस्य दशमं

वा ततः परा वा तिथिर् भवति तदैव तेन कृष्णपक्षेण युक्तोऽमावास्यान्तो मासोऽधिको मास इति स्वीक्रियते, यदा तु दृक्सिद्धसौरायनारम्भदिने कृष्णपक्षस्य नवमी वा ततः पूर्वा वा तिथिर् भवति तदा तु तेन कृष्णपक्षेण युक्तोऽमावास्यान्तो मासोऽधिको मास इति न स्वीक्रियते इति सूचकाभ्यां वचनाभ्यां नेपालशासनकेन्द्ररूपे काष्ठमण्डपमहानगरे स्थिते राष्ट्रियाऽभिलेखालये सङ्गृहीते द्रोणकृते रत्नकरण्डिकाख्ये प्राचीने स्मृतिसमुच्चयत्वेनोक्ते धर्मशास्त्रनिबन्धे (सूक्ष्मच्छायाचित्राधारपत्रकस्थप्रतिलिपिसङ्ख्या बी ३३/१२) एकादशीप्रकरणे २०९तमे पत्रे पूर्वपृष्ठे दृश्याभ्यां वचनाभ्यां स्पष्टतयाऽवगम्यते। तथाहि—

कृष्णपक्षे दशम्यादौ मेध्यं गच्छेद् दिवाकरः।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे॥ इति,

दशमीमभ्यतिक्रम्य यदा सङ्क्रमते रविः।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे॥ इति च।

तत्र मेध्यमित्यस्य निरूढपशुबन्धरूपमेधहितमयनमुखरूपं कालमित्यर्थोऽवगम्यते। एवं च यदा गताद् अधिमासाच् चान्द्रेषु त्रिंशति मासेषु व्यतीतेषु एकत्रिंशस्य मासस्य कृष्णपक्षस्य दशम्याः पूर्वमेव नवम्यां वा ततः पूर्वमेव वा सूर्योऽयनान्तरं गच्छति तदा तेन कृष्णपक्षेण सहितश् चान्द्रो मासोऽधिमास इति न स्वीक्रियते, तत उत्तरस्याऽयनस्याऽन्ते गताद् अधिमासाच् चान्द्रेषु त्रिषु वर्षेषु व्यतीतेष्वेवाऽधिकमासः स्वीक्रियते। एवं च चान्द्राणां तपस्-तपस्यादीनां मासानां शिशिरादीनामृतूनां च सौरैर् ऋतुभिः सदैव सम्बद्धत्वं यथावत् तिष्ठति, नैव तत्र सुदूरविप्रकर्षो भवति।

उदाहरणेनाऽप्ययं विषयः स्पष्टीक्रियते। तत्र वेङ्कटेश्वर-शताब्दीपञ्चाङ्गे २०१४तमे वैक्रमाब्दे १८७९तमे शकाब्दे १९५७तमे क्रैस्ताब्दे दिसम्बरमासस्य २१तमे दिवसे सौरस्य दृक्सिद्धस्योदगयनस्य शुक्लप्रतिपदश् च सामीप्येन स्थितिर् दृश्यते। इयमेव शुक्लप्रतिपद् वेदाङ्गज्योतिषग्रन्थानुसारं तपःशुक्लप्रतिपद् (माघशुक्लप्रतिपद्) अस्ति। ततः प्रवर्तते वैदिकानां वर्षम्। ततः प्रभृति त्रिंशति चान्द्रमासेषु गतेषु २०१७तमे वैक्रमाब्दे १८८२तमे शकाब्दे १९६०तमे क्रैस्ताब्दे मईमासस्य २६तमे दिवसे शुक्लप्रतिपदि वैदिकानामधिको मासः (द्वितीयः शुचिमासः द्वितीय आषाढो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं त्रिंशति चान्द्रमासेषु व्यतीतेषु २०१९तमे वैक्रमाब्दे १८८४तमे शकाब्दे १९६२तमे क्रैस्ताब्दे नवम्बरमासस्य २७तमे दिवसे अमावास्योत्तरशुक्लप्रतिपदि वैदिकानामधिको मासः (द्वितीयः सहस्यमासः द्वितीयः पौषो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं षट्त्रिंशति चान्द्रमासेषु (त्रिषु चान्द्रेषु वर्षेषु) व्यतीतेषु २०२२तमे वैक्रमाब्दे १८८७तमे

शकाब्दे १९६५तमे क्रैस्ताब्दे नवम्बरमासस्य २३तमे दिवसे अमावास्योत्तरशुक्ल-प्रतिपदि वैदिकानामधिको मासः (द्वितीयः सहस्यमासः द्वितीयः पौषो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं त्रिंशति चान्द्रमासेषु व्यतीतेषु २०२५तमे वैक्रमाब्दे १८९०तमे शकाब्दे १९६८तमे क्रैस्ताब्दे मईमासस्य २७तमे दिवसे अमावास्यागत-शुक्लप्रतिपदि वैदिकानामधिको मासः (द्वितीयः शुचिमासः द्वितीय आषाढो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं षट्त्रिंशति चान्द्रमासेषु (त्रिषु चान्द्रवर्षेषु) व्यतीतेषु २०२८तमे वैक्रमाब्दे १८९३तमे शकाब्दे १९७१तमे क्रैस्ताब्दे मईमासस्य २५तमे दिवसे शुक्लप्रतिपदि वैदिकानामधिको मासः (द्वितीयः शुचिमासः द्वितीय आषाढो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं त्रिंशति चान्द्रमासेषु गतेषु २०३०तमे वैक्रमेऽब्दे १९९५तमे शकाब्दे १९७३तमे क्रैस्ताब्दे नवम्बरमासस्य २५तमे दिवसे शुक्लप्रतिपदि वैदिकानामधिको मासः (द्वितीयः सहस्यमासः द्वितीयः पौषो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं षट्त्रिंशति चान्द्रमासेषु (त्रिषु चान्द्रवर्षेषु) व्यतीतेषु २०३३तमे वैक्रमाब्दे १८९८तमे शकाब्दे १९७६तमे क्रैस्ताब्दे नवम्बरमासस्य २२तमे दिवसे शुक्लप्रतिपदि वैदिकानामधिको मासः (द्वितीयः सहस्यमासः द्वितीयः पौषो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं त्रिंशति चाद्रमासेषु व्यतीतेषु २०३६तमे वैक्रमेऽब्दे १९०१तमे शकाब्दे १९७९तमे क्रैस्ताब्दे मईमासस्य २६तमे दिवसे शुक्लप्रतिपदि वैदिकानामधिकमासः (द्वितीयः शुचिमासः द्वितीय आषाढो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं त्रिंशति चान्द्रमासेषु व्यतीतेषु २०३८तमे वैक्रमाब्दे १९०३तमे शकाब्दे १९८१तमे क्रैस्ताब्दे नवम्बरमासस्य २७तमे दिवसे शुक्लप्रतिपदि वैदिकानामधिकमासः (द्वितीयः सहस्यमासः द्वितीयः पौषो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं षट्त्रिंशति चान्द्रमासेषु (त्रिषु चान्द्रवर्षेषु) व्यतीतेषु २०४१तमे वैक्रमाब्दे १९०६तमे शकाब्दे १९८४तमे क्रैस्ताब्दे नवम्बरमासस्य २३तमे दिवसे शुक्लप्रतिपदि वैदिकानामधिकमासः (द्वितीयः सहस्यमासः द्वितीयः पौषो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं त्रिंशति चान्द्रमासेषु गतेषु २०४४तमे वैक्रमाब्दे १९०९तमे शकाब्दे १९८७तमे क्रैस्ताब्दे मईमासस्य २८तमे दिवसे शुक्लप्रतिपदि वैदिकानामधिकमासः (द्वितीयः शुचिमासः द्वितीय आषाढो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं षट्त्रिंशति चान्द्रमासेषु (त्रिषु चान्द्रवर्षेषु) व्यतीतेषु २०४७तमे वैक्रमाब्दे १९१२तमे शकाब्दे १९९०तमे क्रैस्ताब्दे मईमासस्य २५तमे दिवसे शुक्लप्रतिपदि वैदिकानामधिकमासः (द्वितीयः शुचिमासः द्वितीय आषाढो वा) प्रवर्तते। तस्मिन्-नधिकमासे पूर्णे ततः परं त्रिंशति चान्द्रमासेषु व्यतीतेषु २०४९तमे वैक्रमाब्दे १९१४-तमे शकाब्दे १९९२तमे क्रैस्ताब्दे नवम्बरमासस्य २५तमे दिवसे शुक्लप्रतिपदि

वैदिकानामधिकमासः (द्वितीयः सहस्यमासः द्वितीयः पौषो वा) प्रवर्तते। तस्मिन्-नधिकमासे पूर्णे ततः परं षट्त्रिंशति चान्द्रमासेषु (त्रिषु चान्द्रेषु वर्षेषु) व्यतीतेषु २०५२तमे वैक्रमाब्दे १९१७तमे शकाब्दे १९९५तमे क्रैस्ताब्दे नवम्बरमासस्य २३तमे दिवसे शुक्लप्रतिपदि वैदिकानामधिकमासः (द्वितीयः सहस्यमासः द्वितीयः पौषो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं त्रिंशति चान्द्रमासेषु व्यतीतेषु २०५५तमे वैक्रमाब्दे १९२०तमे शकाब्दे १९९८तमे क्रैस्ताब्दे मईमासस्य २६तमे दिवसे शुक्लप्रतिपदि वैदिकानामधिकमासः (द्वितीयः शुचिमासः द्वितीय आषाढो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं त्रिंशति चान्द्रमासेषु व्यतीतेषु २०५७-तमे वैक्रमाब्दे १९२२तमे शकाब्दे २०००तमे क्रैस्ताब्दे नवम्बरमासस्य २६तमे दिवसे शुक्लप्रतिपदि वैदिकानामधिकमासः (द्वितीयः सहस्यमासः द्वितीयः पौषो वा) प्रवर्तते। तस्मिन्नधिकमासे पूर्णे ततः परं षट्त्रिंशति चान्द्रमासेषु (त्रिषु चान्द्रेषु वर्षेषु) व्यतीतेषु २०६०तमे वैक्रमाब्दे १९२५तमे शकाब्दे २००३तमे क्रैस्ताब्दे नवम्बरमासस्य २४तमे दिवसे शुक्लप्रतिपदि वैदिकानामधिकमासः (द्वितीयः सहस्यमासः द्वितीयः पौषो वा) प्रवर्तते इति ज्ञेयम्।

भारतवर्षे यावनस्य ज्योतिषस्य प्रचारात्, शकानां शासनस्य स्थापनायाः कालाच् च प्रागेव मागधशासकातिक्रमणादिकैः कारणैर् नेपालोपत्यकां प्रविष्टैर् वैशाल्या लिच्छविभिः शासकैर् भारतवर्षीया मौलिकी वैदिकी कालगणनापद्धतिर् नेपालदेशमानीता चिराय सुरक्षिता चाऽवगम्यते। नेपालदेशस्येतिहासे लिच्छवीनां शिलालेखेषु केवलमाषाढे पौषे चाऽधिमासो दृश्यते, तत्र ४३५ इत्यङ्किते (५६९ वैक्रमाब्दे), ५१९ इत्यङ्किते (६५३वै.), ३१ इत्यङ्किते (६६४वै.), ३४ इत्यङ्किते (६६७ वै.) च वर्षे पौषेऽधिमासो दृश्यते; प्राचीनलेख्येषु ५४७तमे, ५५५तमे च नेपालवर्षेऽपि (१४८३ वै. १४९१ वै.) पौषेऽधिमासो दृश्यते; ५९८तमे ६०१तमे च नेपालवर्षे (१५३५ वै., १५३८ वै.) आषाढेऽधिमासो दृश्यते; ६०४तमे नेपालवर्षे (१५४० वै.) पौषेऽधिमासो दृश्यते, ६५२तमे ६५५तमे च नेपालवर्षे (१५८९ वै., १५९२ वै.) आषाढेऽधिमासो दृश्यते इति च स्मरणीयम्। इत्थं नेपालदेशे वैक्रमाब्दानां षष्ठात् शतकात् प्रभृति षोडशं शतकं यावद् वेदाङ्गज्योतिषस्य अयनान्त एवाऽधिमास उपजायते इति सिद्धान्तमनुसृत्य आषाढे पौषे चैवाधिमासः स्वीक्रियते स्मेत्यपि स्पष्टं भवति। तत्र लिच्छविशासने पूर्वकाले प्रयुक्तः संवत्सरो वर्तमान-शकसंवत्सरोऽस्तीति प्रमोदवर्धनेन निर्णीतम्; सुमतितन्त्रपुस्तकादिषु प्राप्येषु केषुचिल्लेखेषु मानदेवाब्द इति नाम्नोल्लिखितो लिच्छविशासने उत्तरकाले प्रयुक्तः संवत्सरस् तु ६३३तमे वैक्रमेऽब्दे प्रारब्धः संवत्सर इति कैश्चिदुक्तम्,

किन्तु सः ६३४तमे वैक्रमेऽब्दे (५७७तमे क्रैस्ताब्दे) प्रारब्ध इत्यपि प्रमोदवर्धनेनैव निर्णीतम्। तदनुसारमेव चाऽत्र कोष्ठकेषु वैक्रमाब्दा उल्लिखिता बोध्याः।

ननु यदि प्रतियुगार्धं त्रिंशतित्रिंशति चान्द्रमासेषु व्यतीतेषु अधिमास इति लगधमुनिसिद्धान्तमुल्लङ्घ्य एकस्माद् अधिमासात् षट्त्रिंशति चान्द्रमासेषु (त्रिषु चान्द्रवर्षेषु) व्यतीतेष्वपि अधिमासो भवतीति स्वीक्रियते तर्हि लगधमुनिवचनस्य प्रामाण्यं खण्डितं भवेत्, तथा च लगधमुनिप्रोक्तस्य ग्रन्थस्य वेदाङ्गज्योतिषग्रन्थत्वं चाऽस्वीकार्यं स्यादिति चेत् तत्रोच्यते। लगधमुनिना सर्वेषां गणितानां आदियुगार्थमेव मुख्यतया प्रदर्शितत्वादन्येषां युगानां कृते तु 'इत्युपायसमुद्देशो भूयोऽप्येनं प्रकल्पयेत्' इति (श्लो.४२) ऊहविधानस्य कृतत्वात् तदनुसारमूहं कृत्वा व्यवस्थायाः प्रतिपादने लगधमुनिसिद्धान्तस्य अखण्डितत्वमेव बोध्यम्। यथा सिद्धे शब्दार्थसम्बन्धे इति पाणिनीयमूलसिद्धान्तमेवादाय कतिपयानां पाणिनीयसूत्राणां न्यूनत्वेऽतिरिक्तत्वे च विचार्य वार्त्तिकादीनां रचनायामपि पाणिनीयमूलसिद्धान्तस्याऽखण्डितत्वमेवेति शिष्टैः स्वीकृत्य वार्त्तिकादीनां प्रामाण्यं स्वीक्रियते तथैवेदमपि बोध्यम्। पाणिनीयव्याकरणे वार्त्तिकादीनां रचनाया दिक्प्रदर्शनं यथा— द्वितीयस्मै, तृतीयस्मै; द्वितीयस्मात्, तृतीयस्मात्; देवदत्तीयम्, यज्ञदत्तीयम् इत्यादीनि पदानि पाणिनीयसूत्रैर् नाऽन्वाख्यायन्ते, तदर्थं "वाप्रकरणे तीयस्य ङित्सूपसङ्ख्यानम्" इति (१।१।३६, वा.३) वार्त्तिकम्, "वा नामधेयस्य (१।१।७३, वा.५) इति च वार्त्तिकं कृत्वा न्यूनतापूरणं कृतम्। "आद् गुणः" (६।१।८७), "वृद्धिरेचि" (६।१।८८), "अकः सवर्णे दीर्घः"(६।१।१०१), इति पाणिनीयसूत्राणामतिव्याप्तिं दृष्ट्वा हलीषा, लाङ्गलीषा, स्थूलोतुः, बिम्बोष्ठी, शकन्धुः, कर्कन्धुः, कुलटा, सीमन्तः इत्यादीनां प्रयोगाणामन्वाख्यानाय वार्त्तिककारेण "शकन्ध्वादिषु च" इति (६।१।९४, वा.४), "ओत्वोष्ठयोः समासे वा" इति (६।१।९४, वा.५), च वार्तिके कृते दृश्येते। एतादृशान्युदाहरणानि बहूनि सन्ति। न केवलं लौकिकप्रयोगविषये एव, वैदिकप्रयोगविषयेऽपि "या खर्वेण पिबति तस्यै खर्वः" इत्यादीनां प्रयोगाणामन्वाख्यानाय "षष्ठ्यर्थे चतुर्थीवचनम्" (२।३।६२, वा.१) इति वार्तिकम्, "गृभ्णामि ते", "मध्वा जभार", "गर्दभेन संभरति", "मरुदस्य ग्रभीता", "सामिधेन्यो जभ्रिरे", "उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्" इत्यादीनां वैदिकप्रयोगाणामन्वाख्यानाय "हग्रहोर् भश् छन्दसि हस्य" इति (८।२।३२, वा.१) वार्तिकम्, पाणिनेर् "मत्वर्थे मासतन्वोः" (४।४।१२८) इति सूत्रेणाऽनन्वाख्यातानाम् मधुः, तपः, नभः, इषः, ऊर्जः, शुचिः,शुक्र इति वैदिकानां मासवाचकपदानामन्वाख्यानाय "लुगकारेकाररेफाश्च" (४।४।१२८, वा.२) इति वार्तिकम्, "मन्त्रेष्वाङ्यादेरात्मनः" इति पाणिनिसूत्रस्य (२।४।१४१) "त्मन्या समञ्जन"

"त्मनोरन्तस्थः" इत्यादिषु प्रयोगेषु अव्याप्तिं निवारयितुम् "मन्त्रेष्वात्मनः प्रत्यय-मात्रप्रसङ्गः" (६।४।१४१, वा.१) इति वार्तिकम्, "पञ्चदशिनोऽर्धमासाः", "त्रिंशिनो मासाः" इत्यादीनां प्रयोगाणामन्वाख्यानाय पाणिनेः सूत्रस्याऽभावात् श्लोकवार्त्तिक-कारेण "शच्शनोर् डिनिः" (५।२।३७) इति वार्त्तिकं कृतम्, "विंशिनोऽङ्गिरसः" इत्यादीनां प्रयोगाणामन्वाख्यानाय भाष्यकारेण च "विंशतेश् चेति वक्तव्यम्" (५।२।३७) इत्युक्तम्। एतादृशान्युदाहरणानि अन्यान्यपि बहून्येव सन्ति।

एवं च यथा बहुभिरव्याप्तिदोषैरतिव्याप्तिदोषैश् च युक्तमपि पाणिनिसूत्रं कात्यायनादिवार्त्तिकैर् भाष्येण च पूरितं परिष्कृतं व्याख्यातं च सद् वेदाङ्गत्वेन वैदिकैः शिष्टैः स्वीक्रियते, तथैव लगधमुनिप्रोक्तं वेदाङ्गज्योतिषं च वैदिकैः शिष्टैः पूरितं परिष्कृतं व्याख्यातं च सद् वेदाङ्गत्वेन स्वीकृतं स्वीक्रियते स्वीकर्तव्यं च। उक्तं हि "व्याख्यानतो विशेषप्रतिपत्तिर् न हि सन्देहादलक्षणम्" इति (पाणिनीय-व्याकरणभाष्ये, सिद्धे शब्दार्थसम्बन्धे इति वार्त्तिकस्य व्याख्याने; लण् इति प्रत्याहारसूत्रस्य व्याख्याने; १।१।१३, १।१।४९-४, १।३।९-१४, १।३।१०-२७, १।३।११-७, ३।२।५७, ३।२।५८, ७।१।१३)।

विशेषः— एतादृशं वेदाङ्गज्योतिषोक्ताधिमासव्यवस्थाया व्याख्यानमुप-पादनं परिष्करणं चाऽन्येन केनाऽपि वेदाङ्गज्योतिषव्याख्याकारेणाऽकृतं बोध्यम्। अस्माभिस् तु प्राचीनग्रन्थस्यानुसन्धानं कृत्वा सप्रमाणमेष नियम इदम्प्रथमतया प्रतिपादितो बोध्यः। अत्राऽस्मन्निर्देशनानुसारं प्रमोदवर्धनेन रत्नकरण्डिकायाः पठने प्रभूतं परिश्रमं कृत्वोक्तौ श्लोकावन्विष्याऽऽनीताविति च बोध्यम्। अस्माकमेतेन अनुसन्धानेन वेदाङ्गज्योतिषग्रन्थे उक्ता पञ्चवर्षात्मकेषु सर्वेषु युगेषु पञ्चसु सौरेषु वर्षेसु द्वयोरधिमासयोर् व्यवस्था नैव सूपपन्ना, तथैव तत्रोक्ता सौरेषु पञ्चसु वर्षेषु १८३० दिनानीत्युक्तिश् चाऽनुपपन्नेति एकस्मिन् सौरे वर्षे ३६६ दिनानी-त्युक्तिरप्यनुपन्ना, अतो लगधप्रोक्तवेदाङ्गज्योतिषग्रन्थोक्ता कालगणनाव्यवस्था स्वल्प एव कालेऽयथार्थाऽशुद्धिबहुलेति ज्ञाता परित्यक्ता च भवेदिति वदतां (भारतीय ज्योतिष, पृ.१३०-१३१) शङ्करबालकृष्णदीक्षितादीनामाधुनिकानां केषाञ्चन वेदाङ्गज्योतिषग्रन्थसमीक्षकाणां भ्रमोऽपि निराकृतो भवति। तथा च सौरर्तु-चान्द्रर्त्वोर् मध्ये यथा मासादधिकस्य कालस्याऽन्तरं कदाऽपि न भवेत् तथाऽधिमासस्य व्यवस्था स्वीकर्तव्येति वेदाङ्गज्योतिषस्याऽऽकूतमित्यपि स्पष्टं भवति। आदियुगे, अन्यस्मिन् यस्मिन् युगे सौरस्योदगयनस्य चान्द्रमासस्य च सहैव प्रवृत्तिर् भवति तस्मिन्नेव युगे युगमध्ये युगान्ते च अधिमासः स्वीक्रियते, अन्येषु युगेषु तु सौरायन-प्रवृत्तिकाले स्थितं तिथिं विचार्य यस्यकस्याऽपि अयनस्यान्ते अस्मत्प्रदर्शित-

व्यवस्थानुसारमधिमासः स्वीकर्तुं शक्यते इत्यपि स्पष्टं भवति। "इण्डियन् याण्ड् फोरन् क्रोनोलजि" इति नामके ग्रन्थे (१९२३, पृ.१०६) वेङ्कटेश-बापुजि-केतकरेण तु "विहाय युगषट्कान्ते ६ प्राप्तं माघं मलिम्लुचम्। प्रारभेत सदाऽऽद्यानि युगानि च पुनःपुनः॥ न हेयः षट्शताब्दीयो माघमासोऽधिकस् तु यः। एवमादियुगारम्भो योग्यकाले सदा भवेत्" इत्युक्तं दृश्यते। एतत् तु नेपालदेशेतिहासेनाऽसमर्थितं कल्पनामात्ररूपं व्यवहारे कदाऽपि नाऽऽगतमवगम्यते। अस्यां व्यवस्थायां सौरर्तु-चान्द्रर्त्वोर् मध्ये मासैकमितात् कालाद् अधिकेन कालेनाऽन्तरमपि भवतीत्येतादृशी व्यवस्था च वैदिकानां कृतेऽस्वीकार्यैव भवति।

एतस्य श्लोकस्याऽर्थः सोमाकरेण सम्यक् कृतो न दृश्यते। शङ्कर-बालकृष्ण-दीक्षितेन त्वस्य श्लोकस्य प्रकारान्तरेण समुचित एवाऽर्थः कृतो दृश्यते। सुधाकरादिभिरपि तथैवाऽर्थः कृतो दृश्यते। अस्माभिस् त्वस्य सविवेचनं सम्यक् प्रतिपादनमुपपादनं समर्थनं च कृतं बोध्यम्॥३७॥

हिन्दी – सौर दिन से पार्वण दिन (तिथि) बासठ भागों में से दो भागों से न्यून होता है, जिस कारण से पाँच वर्षों के युग के मध्य में (उदगयन के अन्त में आषाढ में) और (उस युग के) अन्त में (दक्षिणायन के अन्त में पौष में) दो अधिमास उत्पन्न होते हैं।

विशेष – यह लगधमुनिप्रोक्त वेदाङ्गज्योतिष की कालगणना पद्धति के अत्यन्त महत्त्वपूर्ण सिद्धान्त को बताने वाला श्लोक है। राशियों के आधार में नहीं, दृक्सिद्ध सौर अयनों के आधार में अधिकमास मानकर सौर अयनों में और चान्द्र अयनों में तथा सौर वर्षों में और चान्द्र वर्षों में तालमेल बनाए रखने की यह अर्वाचीन-निरयण-राशिपद्धति से अप्रभावित अनादि वैदिक पद्धति विशेष ध्यानयोग्य है।

इस अधिकमासव्यवस्था में सभी पञ्चवर्षात्मक युग के सभी युगार्धों में अधिकमास नियमित रूप से नहीं योजित किया जाता है, यथावश्यक औचित्यानुसार ही अधिकमास योजित किया जाता है। किन्तु जबजब अधिकमास योजित किया जाता है तबतब अयन के अन्त में ही शुचिमास में (आषाढ में) अथवा सहस्यमास में (पौष में) द्वितीयशुचिमास (द्वितीयाषाढ) के रूप में अथवा द्वितीयसहस्यमास (द्वितीयपौष) के रूप में ही अधिकमास योजित किया जाता है, अयन के मध्य में अन्य मासों में नहीं। इस प्रकार की व्यवस्था में जब दृक्सिद्ध सौर अयन के आरम्भ के दिन में कृष्णपक्ष की दशमी वा उस के पीछे की तिथि होती है उसी अवस्था में उस कृष्णपक्ष से युक्त अमावास्यान्त मास अधिकमास माना जाता है, जब तो दृक्सिद्ध-सौरायनारम्भदिन में कृष्णपक्ष की नवमी अथवा उस से पूर्व की तिथि होती है, उस कृष्णपक्ष से युक्त अमावास्यान्त मास अधिकमास नहीं माना जाता है। इस बात को सूचित करने वाले वचन नेपाल के शासनकेन्द्ररूप काठमाण्डू महानगर में स्थित राष्ट्रिय अभिलेखालय (दरबारलाइब्रेरी / वीरपुस्तकालय) में सङ्गृहीत द्रोणकृत 'रत्नकरण्डिका' नाम के स्मृति-

समुच्चय कहे जाने वाले प्राचीन धर्मशास्त्रनिबन्धग्रन्थ में (Reel No. B 33/12) एकादशी-प्रकरण में २०९वें पत्र में पूर्वपृष्ठ में उद्धृत हैं। जैसे–

कृष्णपक्षे दशम्यादौ मेध्यं गच्छेद् दिवाकरः।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे॥

और,

दशमीमभ्यतिक्रम्य यदा सङ्क्रमते रविः।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे॥

इस प्रकार जब गत अधिमास से चान्द्र तीस मास व्यतीत होने पर एकतीसवें मास के कृष्णपक्ष की दशमी से पूर्व ही नवमी में वा उस से भी पूर्व ही सूर्य का अयनपरिवर्तन होगा तो उस अवस्था में उस कृष्णपक्ष में पूर्ण होने वाला चान्द्र मास अधिमास नहीं माना जाता है। उस के वादवाले अयन के अन्त में अर्थात् गत अधिमास से तीन चान्द्र वर्षों के बीत जाने पर ही अधिकमास माना जाता है। इस प्रकार चान्द्र तपस्-तपस्यादि मासों का और चान्द्र शिशिरादि ऋतुओं का सौर शिशिरादि ऋतुओं से सदा ही सम्बद्धता यथावत् स्थिर रहती है, वहां सुदूरविप्रकर्ष नहीं होता है।

उदाहरण से भी यह विषय स्पष्ट किया जाता है। जैसे वेङ्कटेश्वर-शताब्दीपञ्चाङ्ग में २०१४ वैक्रमाब्द में १८७९ शकाब्द में १९५७ क्रैस्ताब्द में दिसम्बर की २१ तारीख में शुक्लप्रतिपदा सौर दृक्सिद्ध उदगयनारम्भ के समीप में है। यही शुक्लप्रतिपदा वेदाङ्गज्योतिष ग्रन्थ के अनुसार तपःशुक्लप्रतिपदा (माघशुक्लप्रतिपदा) है। अतः उसी दिन से वैदिकों का वर्ष प्रवृत्त होता है। उस के वाद तीस चान्द्रमासों के बीत जाने पर २०१७ वैक्रमाब्द में अर्थात् १८८२ शकाब्द में १९६० क्रैस्ताब्द में मई महीने की २६ तारीख में शुक्लप्रतिपदा में वैदिकों का अधिकमास (द्वितीय शुचिमास अथवा द्वितीय आषाढ) प्रवृत्त होता है। उस के वाद तीस चान्द्रमासों के बीत जाने पर २०१९ वैक्रमाब्द में १८८४ शकाब्द में १९६२ क्रैस्ताब्द में नवम्बर महीने की २७ तारीख में शुक्लप्रतिपदा में वैदिकों का अधिकमास (द्वितीय सहस्यमास अथवा द्वितीयपौषमास) प्रवृत्त होता है। उस के वाद छत्तीस चान्द्रमासों के अर्थात् तीन चान्द्र वर्षों के बीत जाने पर २०२२ वैक्रमाब्द में १८८७ शकाब्द में १९६५ क्रैस्ताब्द में नवम्बर महीने की २३ तारीख में शुक्लप्रतिपदा में वैदिकों का अधिकमास (द्वितीय सहस्यमास अथवा द्वितीयपौष) प्रवृत्त होता है। इन उदाहरणों को और कुछ अन्य उदाहरणों को भी समाविष्ट करके उदाहरणों को नीचे की सारणी में भी दिखाया गया है–

वैक्रमाब्द	शकाब्द	क्रैस्ताब्द	अधिकमास के आरम्भ की तारीख	अधिकमास का नाम	पूर्व अधिकमाससे बीता हुआ समय
२०१७	१८८२	१९६०	मई २६	द्वितीयशुचिमास	ढाई वर्ष
२०१९	१८८४	१९६२	नवम्बर २७	द्वितीयसहस्यमास	ढाई वर्ष
२०२२	१८८७	१९६५	नवम्बर २३	द्वितीयसहस्यमास	३ वर्ष

२०२५	१८९०	१९६८	मई २७	द्वितीयशुचिमास	ढाई वर्ष
२०२८	१८९३	१९७१	मई २५	द्वितीयशुचिमास	३ वर्ष
२०३०	१९९५	१९७३	नवम्बर २५	द्वितीयसहस्यमास	ढाई वर्ष
२०३३	१८९८	१९७६	नवम्बर २२	द्वितीयसहस्यमास	३ वर्ष
२०३६	१९०१	१९७९	मई २६	द्वितीयशुचिमास	ढाई वर्ष
२०३८	१९०३	१९८१	नवम्बर २७	द्वितीयसहस्यमास	ढाई वर्ष
२०४१	१९०६	१९८४	नवम्बर २३	द्वितीयसहस्यमास	३ वर्ष
२०४४	१९०९	१९८७	मई २८	द्वितीयशुचिमास	ढाई वर्ष
२०४७	१९१२	१९९०	मई २५	द्वितीयशुचिमास	३ वर्ष
२०४९	१९१४	१९९२	नवम्बर २५	द्वितीयसहस्यमास	ढाई वर्ष
२०५२	१९१७	१९९५	नवम्बर २३	द्वितीयसहस्यमास	३ वर्ष
२०५५	१९२०	१९९८	मई २६	द्वितीयशुचिमास	ढाई वर्ष
२०५७	१९२२	२०००	नवम्बर २६	द्वितीयसहस्यमास	ढाई वर्ष
२०६०	१९२५	२००३	नवम्बर २४	द्वितीयसहस्यमास	३ वर्ष

नेपालदेश के इतिहास में लिच्छवियों के शिलालेखों में केवल आषाढ और पौष में अधिमास देखे जाते हैं, वहां संवत् ४३५[1] (विक्रमसंवत् ५६९), संवत् ५१९ (विक्रमसंवत् ६५३), संवत् ३१[2] (विक्रमसंवत् ६६४), और संवत् ३४ (विक्रमसंवत् ६६७) इन वर्षों में पौष में अधिमास देखे जाते हैं; प्राचीनकाल के लेख्यों में ८०२ शकसंवत् में आरब्ध नेपालसंवत् के ५४७वें और ५५५वें वर्ष में (विक्रमसंवत् १४८३ और १४९१ में) भी पौष में अधिमास देखे जाते हैं; नेपालसंवत् में ही ५९८वें और ६०१वें वर्ष में (विक्रमसंवत् १५३५ और १५३८ में)आषाढ में तीन वर्षों के अन्तर पर अधिकमास देखे जाते हैं; ६०४वें नेपालसंवत् में

---

१. लिच्छविकाल के शिलालेखों में प्रयुक्त इस संवत् को अन्य अनुसन्धाता कार्तिकादि गतसंवत् मानते हैं; उन में से अधिकांश लोग इस को कार्तिकादि गतशकसंवत् स्वीकार करते हैं और कुछ लोग दूसरे प्रकार का कार्तिकादि गतसंवत् होने की बात बताते हैं। प्रमोदवर्धन के अनुसन्धान ने वस्तुतः इस संवत्का कार्तिकादि न होकर माघादि (अथवा चैत्रादि) होने का और गतशकसंवत् या अन्य किसी प्रकारका गतसंवत् न होकर वर्तमानशकसंवत् होने का तथ्य प्रकट किया है। तदनुसार ही यहां कोष्ठक में विक्रमसंवत् के वर्ष दिए गए हैं।

२. लिच्छविशासन के उत्तरकाल के शिलालेखों में प्राप्त इस संवत् के सम्बन्ध में अनुसन्धाताओं में मतभेद है। सुमतितन्त्र के हस्तलिखित पुस्तक इत्यादि के लेखों में मानदेवसंवत् के नाम से भी उल्लिखित यह संवत् भी वर्तमानसंवत् ही है और इस का प्रारम्भ विक्रमसंवत् ६३४ (सन् ५७७) में होता है यह निर्णय प्रमोदवर्धन ने किया है। इसी निर्णय के अनुसार यहां उक्त संवत् के समानकालिक विक्रमसंवत् का उल्लेख किया गया है।

(विक्रमसंवत् १५४० में)पौष में अधिमास प्राप्त होता है, ६५२वें और ६५५वें नेपालसंवत् में (विक्रमसंवत् १५८९ और १५९२ में)आषाढ में अधिमास माना गया था, ऐसा उल्लेख मिलता है। अधिकमास के सिद्धान्त के प्रयोग के ये उदाहरण स्मरणीय हैं। इस प्रकार नेपाल में वैक्रमाब्द की छठी शताब्दी से सोलहवीं शताब्दी तक वेदाङ्गज्योतिष के 'अयन के अन्त में ही अधिमास उत्पन्न होता है' इस सिद्धान्त को मान कर आषाढ में और पौष में ही अधिमास माना जाता था, यह बात भी स्पष्ट होती है। अनादि काल से चले आ रही यह परम्परा विदेशियों के प्रभाव से भारत में राशिपद्धति के प्रचलन होने से और उसी के आधार पर अनादि वैदिक परम्परा की वेदाङ्गज्योतिषोक्त अधिमास व्यवस्था में भी विचलन आने से पूर्व ही अनादि वैदिक परम्पराको लेकर नेपाल में आए हुए वैशाली के लिच्छवियों से नेपाल में लाया गया प्रतीत होता है, जो व्यवस्था कई शताब्दियों तक नेपाल में काष्ठमण्डपोपत्यका और उस के निकटवर्ती क्षेत्र में प्रयुक्त होती रही। अन्यत्र इस वैदिक प्रणाली का जीवन्त प्रयोग दुर्लभ है।

वेदाङ्गज्योतिषोक्त अधिमास के हमारे व्याख्यान में प्रदर्शित नियम का किसी भी अन्य आधुनिक विद्वान् ने प्रतिपादन नहीं किया है। हमने तो अनुसन्धानद्वारा प्राचीन ग्रन्थ रत्नकरण्डिका में प्रतिपादित व्यवस्था का अन्वेषण करके सप्रमाण यह नियम प्रतिपादित किया है। परिशिष्ट में सम्बद्ध ग्रन्थ के हस्तलेख की छायाप्रतिलिपि भी दी गई है (पृ.४७३), यह हस्तलेख ताडपत्र में प्राचीन लिपि में है, ऊपर उद्धृत दो श्लोक इसी हस्तलेख के हैं। हमारे इस अनुसन्धान से वेदाङ्गज्योतिषग्रन्थ में पञ्चवर्षात्मक सभी युगों में पाँच सौर वर्षों में दो अधिमास की व्यवस्था की गई है और वह अनुपपन्न है, उसी प्रकार वेदाङ्गज्योतिषग्रन्थ का एक सौर वर्ष में ३६६ दिन मानना भी अनुपपन्न है, अतः लगधप्रोक्तवेदाङ्गज्योतिषग्रन्थोक्त कालगणनाव्यवस्था थोडे ही समय में परित्यक्त हुआ होगा इत्यादि बोलने वाले शङ्करबालकृष्णदीक्षितादि आधुनिक कुछ वेदाङ्गज्योतिषग्रन्थ के समीक्षकों का भ्रम (द्र.- भारतीय ज्योतिष, अनु. शिवनाथ झारखण्डी, पृ.१३०-१३१) भी निराकृत होता है। इसी प्रकार सौर ऋतु और चान्द्र ऋतु के मध्य में दो मास तक के अन्तर को स्वीकार कर कल्पना के आधार-पर वेङ्कटेश बापूजी केतकरद्वारा "इण्डियन् याण्ड् फोरन् क्रोनोलजि" नामक ग्रन्थ में (सन् १९२३, पृ.१०६) प्रस्तुत किया गया अधिकमाससम्बन्धी विचार (पाँच युग पर्यन्त प्रत्येक ढाई वर्ष में अधिकमास मानना और छठे युग के अन्त में अधिकमास के रूप में प्राप्त माघ को अधिकमास न मानना और उसी मास से नवीन युग का प्रारम्भ करना तथा छठी शताब्दी के अन्त में प्राप्त अधिकमास माघ को तो नहीं छोडना) भी अस्वीकार्य सिद्ध होता है। जिस प्रकार की अधिमासव्यवस्था से वास्तव सौर ऋतु और चान्द्र ऋतु के मध्य में एक मास से अधिक काल का अन्तर कदाऽपि न होगा वैसी अधिमासव्यवस्था ही स्वीकर्तव्य है, यह वेदाङ्ग-ज्योतिषकार का आशय स्पष्ट होता है। आदियुग में और अन्य जिस युग में सौर उदगयन और चान्द्र मास का अत्यन्त सन्निकट काल में ही प्रारम्भ होता है, उसी युग में युग के मध्य में और युगान्त में अधिमास स्वीकृत किया जाना चाहिए, अन्य युग में तो सौर अयन के आरम्भ के काल में स्थित चान्द्र तिथि का विचार करके जिसकिसी भी अयन के अन्त में उपरिप्रदर्शित व्यवस्था के अनुसार अधिमास स्वीकार किया जाना चाहिए, यह बात स्पष्ट होती है॥३७॥

[नाडिका-मुहूर्तपरिभाषे दिनगता मुहूर्तसङ्ख्या कलासङ्ख्या च]

कला दश सविंशाः स्यान् नाडिका ते मुहूर्तकः।
द्यु त्रिंशत् तत् कलानां तु षट्शती त्र्यधिका भवेत्॥३८॥

(सोमाकरभाष्यम्)

काललक्षणमाह **कला दश सविंशाः स्या**दिति। ताः कला इत्युक्तास् ता दश कला विंशभागसहिता नाडिकेति वाक्यशेषः। द्वे मुहूर्तस्य नाडिके भवतः इति वाक्यशेषः। **"मुहूर्तस्तु नाडिके"** इति गर्गः। ते मुहूर्ता द्वि त्रिंशस्त्रिंशन्मुहूर्तं दिनं तत्र कलानां षट्शती त्र्यधिका भवेत्। त्र्युत्तराणि षट्शतानि कलानां दिनमित्यर्थः। एतदेव॥३८॥

(कौण्डिन्न्यायनव्याख्यानम्)

मुहूर्तैः कलाभिश् च सावनदिनमानमाह शास्त्रकारः— कला दश सविंशाः स्यान् नाडिके**त्यादिना।**

कलाविंशांशयुता दश कलाः नाडिका स्यात्, **ते द्वे नाडिके मुहूर्तः स्यात्, तेषां मूहूर्तानां त्रिंशत् दिनं स्यात्,** कलानां तु त्रिभिरधिकानि **षट् शतानि दिनं भवेदित्यर्थः।**

एतदनुकूलानि वचनानि पुराणादिष्वपि दृश्यन्ते। तथा हि—

> **अहोरात्रकलानां तु षडशीत्यधिकाः (षट्शती त्र्यधिका?) स्मृताः।**
> **रवेर् गतिविशेषेण सर्वर्तुषु च नित्यशः॥** इति
>
> —ब्रह्माण्डपुराणे मध्यभागे (३।३७)।

> **अहोरात्रं कलानां तु अ(त्र्य?)धिकानि शतानि षट्।**
> **ताश् चैव सङ्ख्यया ज्ञेयाश् चन्द्रादित्यगतिर् यथा॥** इति च
>
> —तत्रैव उत्तरभागे (१।२१४)।

> **अ (त्र्य?) धिकं षट्शतं यच् च कलानां प्रविधीयते।**
> **तदहर् मानुषं ज्ञेयं नाक्षत्रं तु दशाधिकम्॥** इति च
>
> —तत्रैव (१।२२०)।

> **अहोरात्रकलानां तु षट्शती त्य(त्र्य?)धिका स्मृता।**
> **रवेर् गतिविशेषेण सर्वेषु ऋतुमिच्छतः॥** इति
>
> —वायुपुराणे (२।५।३८)।

मुहूर्तास् तु पुनस् त्रिंशदहोरात्रमिति स्थितिः।
अहोरात्रं कलानां तु व्य(त्र्य?)धिकानि शतानि षट्॥ इति च

–तत्रैव (२।३८।२१६)।

त्रिं(विं)शत्कलश् चाऽपि भवेन् मुहूर्तो
भागः कलाया दशमश् च यः स्यात्
त्रिंशन्मुहूर्तं तु भवेदहश् च
रात्रिश् च सङ्ख्या मुनिभिः प्रणीता॥ इति

–महाभारते शान्तिपर्वणि (२३१।१२-१३)।

तत्र लघ्वक्षरोच्चारणमात्रोऽक्षिनिमेषः। पञ्चदशाक्षिनिमेषा काष्ठा। त्रिंशत् काष्ठाः कला। विंशतिकलो मुहूर्तः कलादशभागश्च। त्रिंशन्मुहूर्तमहोरात्रम्। इति

–सुश्रुतसंहितायां सूत्रस्थाने (६।५)।

एवं च लगधमुनिप्रोक्तस्य कालमानस्य प्रभावः पुराणादिग्रन्थेष्वपि दृश्यत इत्यवगन्तव्यम्। पुराणादीनां पाठस्य परम्परायां शैथिल्यात् तत्र मूलपाठेषु भ्रेषाः प्रतीयन्ते। उक्ते महाभारतपद्येऽपि यद्यपि चित्रशालासंस्करणे भाण्डारकरशोध-संस्करणे च "त्रिंशत्कलः" इत्येव मुद्रितं दृश्यते तथापि स पाठो विंशत्-पदस्या-ऽऽर्षस्य प्रयोगस्यौचित्यमाकलयितुमशक्नुवता केन चित् प्राचीनेनैव पण्डितम्मन्येन लेखकेन संशोधनबुद्ध्या लिखितोऽवगम्यते। दृश्यते हि उपनिषत्सु आर्षग्रन्थेषु च विंशत्पदप्रयोगः। तथाहि "ततो निधनपतये त्रयो-विंशज् जुहोति च" इत्यत्र बृहज्-जाबालोपनिषदि (३।१४), "गुणो बुद्धिरहङ्कारस् तन्मात्राणीन्द्रियाणि च। भूतानि च चतुर्-विंशदिति पाशाः प्रकीर्तिताः" इत्यत्र शिवोपनिषदि (१।११), "मन्त्रो द्वा-विंशदक्षरः" इत्यत्र च रामरहस्योपनिषदि (२।६८), "आदौ तारेण संयुक्तो मन्त्रः षड्-विंशदक्षरः" इत्यत्र च रामरहस्योपनिषद्येव (२।७७), "षड्-विंशदङ्गुलिर् हंसः प्रयाणं कुरुते बहिः" इत्यत्र योगचूडामण्युपनिषदि (श्लो.९३), "शूद्राद् गृह्य शतं कुर्याद् वैश्यादर्धशतं स्मृतम्। क्षत्रियात् पञ्चविंशत् तु ब्राह्मणाद् दश कीर्तिताः" इत्यत्र बौधायनधर्मसूत्रे (१।४।१०[१।६।१०]), "पन्नगास् तु चतुर्-विंशत् कृष्णा द्वात्रिंशतिर् ग्रहाः। दक्षिणाद्यासु वीक्ष्यन्ते नीचैर् विभ्रान्तमण्डलाः" इत्यत्र अथर्ववेद-परिशिष्टे (५२।८।४), "यज्ञाश् च द्वा-विंशत्" इत्यत्र (१।१), "द्वाविंशद्-यज्ञेषु पञ्च-महायज्ञानुष्ठानं प्रथमो यज्ञः" इत्यत्र (६।१९) च वैखानसगृह्यसूत्रे, "अग्निष्टोमे द्वादश स्तोमभागास् त्रयोदशाऽत्यग्निष्टोमे पञ्चदशोक्थ्ये षोडशिनि सप्तदश वाजपेय एकोन-विंशदतिरात्रे त्रयस्-त्रिंशदप्तोर्यामे" इत्यत्र वैखानसश्रौतसूत्रे (१७।६) च विंशत्-पदस्य प्रयोगो दृश्यते।

विशेषः— यद्यपि हस्तलिखितपाठेष्वपि "कला दश सविंशाः स्याद् द्वे मुहूर्तस्य नाडिके" इत्येव पाठो दृश्यते, तथापि स्मृतिषु शब्दादर्थस्य विशेषतो विचार्यत्वादर्थानुसारं वाक्यरचनां युक्तियुक्तां कृत्वा "कला दश सविंशाः स्यान् नाडिका ते मुहूर्तकः" इति पाठः परिकल्पितो बोध्यः। 'कला दश सविंशाः स्यान् नाडिका' इत्यत्र स्यादिति क्रियापदं विधेयानुसारं प्रयुक्तं बोध्यम्, उद्देश्य-विधेययोर् भिन्नवचनकत्वे विधेयानुसारमपि क्रियापदवचनं भवति 'पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाऽऽकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः' इति पाणिनीयव्याकरणभाष्ये प्रथमाह्निके प्रयोगस्य दर्शनात् इति च बोध्यम्। एतस्य श्लोकस्याऽर्थस् तु सोमाकरादिभिः सर्वैः कृत एव। हस्तलिखितपुस्तकेष्वपि प्राप्य-मुक्तं पाठमेवाऽऽदाय सोमाकरेण "नाडिकेति वाक्यशेषः" इत्युक्तम्॥३८॥

हिन्दी– अपने बीसवें भाग से युक्त दश कलाएं एक नाडिका होती है ($१०\frac{१}{२०}$ कलाएं=१ नाडिका) दो नाडिकाएं एक मुहूर्त होता है। तीस मुहूर्त एक दिन (अहोरात्र) होता है। कला के विचार से तो तीन से अधिक छ सौ (६०३) कलाएं वह (एक अहोरात्र) होता है।

विशेष– लगधमुनिप्रोक्त कालमान का प्रभाव पुराणादि ग्रन्थों में भी दिखाई देता है। प्रस्तुत श्लोक में प्रतिपादित कालमान के अनुकूल ब्रह्माण्डपुराण, वायुपुराण, महाभारत-शान्तिपर्व और सुश्रुतसंहिता के कुछ वचन ऊपर संस्कृत-व्याख्या में उद्धृत किए गए हैं॥३८॥

[सोमस्य सूर्यस्य च भयोगस्य कालः, काष्ठापरिभाषा च]

ससप्तकं भयुक् सोमः सूर्यो द्यूनि त्रयोदश।
नवमानि च पञ्चाऽह्नः काष्ठा पञ्चाक्षरा भवेत्॥३९॥

(सोमाकरभाष्यम्)

आर्यावर्त पुस्तकालय

ससप्तकं भयुक् सोम इति। स सोमः कृतो भयुक् नक्षत्रसमाहितः ससप्तकं सप्तांशसंख्याकं दिनं तु भुङ्क्ते इति वाक्यशेषः। तथा सूर्यो द्यूनि त्रयोदश। सौर्यं दिनं त्रयोदशांशरहितमित्यर्थः। अथवा **"दिनैकाशकेन तद्भम्"** (श्लो. २६) इति यदुक्तं तत् स्वमानेनेदं तु मापनेन दिनानि तानि त्रयोदश भवन्ति। सूर्यर्क्षभुक्तावथोत्तमानि पञ्चमाह्नः आर्क्षचान्द्रमानतो नायान्त्युत्तमानि मानान्तराणि सौरेणाप्तानि। नाडिकाः षडंशकाश्च षड् भवन्ति तानि पञ्च घटिकास्त्रिंशत् सार्धाः। एवं शशिना त्रयोदश सार्धा आर्क्षभुक्ति-रित्युक्तं भवति तान्येव तूत्तमान्यह्नो मानानि पञ्चपञ्च। कापि भावेन पञ्चावशा तद्वा पञ्चावधिकौ तयोरेकमधिमासयोरुत्तमं तथैव तयोर् भुक्तिः। तदर्थं च वक्ष्यति **"विभजेज्**

ज्ञानराशिना" (श्लो. ४२) इति। अथ च ऋतुसंवत्सरयुगात्मना काष्ठा पञ्चाक्षरा भवेत्। काष्ठा नाम परिमाणं सर्वकालकलनायामुदाहृतम्। मनु-गर्गादिभिर् भेदेन **"दश वाऽष्टौ च काष्ठाः"** इत्यादिभिर् वाक्यैः सह काष्ठा पञ्चाक्षरा इह सैव चोदिता कलनादिभाग-नियमार्थं पर्वर्त्वर्धभद्ध्रुवांशादिकयागकालापेक्षया व्यवहरन्ति तेऽपि च॥३९॥

(कौण्डिन्न्यायनव्याख्यानम्)

अथ चन्द्रस्य सूर्यस्य च नक्षत्रभोगकालं काष्ठाप्रमाणं चाऽऽह शास्त्रकारः— ससप्तक**मित्यादिना।**

सोमः कलासप्तकेन सहितं द्यु एकेन नक्षत्रेण युक्तो भवति। सूर्यः त्रयोदश दिनानि ततोऽतिरिक्तानि अह्नः पञ्च दिननवमभागाँश् च एकेन नक्षत्रेण युक्तो भवति। उत्तमानि चेति पाठेऽपि उत्तमशब्देनाऽङ्केषूत्तमस्य नवसङ्ख्याबोधक-स्याऽङ्कस्य ग्रहणात् नवमानीत्येवार्थो विवक्षित इति बोध्यम्। गणितसंवादाच् चाऽयमेवार्थो निश्चित एवाऽस्ति। पञ्च लघूनि अक्षराणि यावति काले उच्चारि-तानि भवन्ति तावत्काला एका काष्ठा भवेद् इत्यर्थः।

चन्द्रस्य नक्षत्रभोगस्य कालोऽयं वेदाङ्गज्योतिषग्रन्थोक्तो ब्रह्माण्डपुराणे-ऽप्युल्लिखितोऽवगम्यते। तथा हि—

अहोरात्रे कलाश् चैव समं सोमः समश्नुते। इति (१।२१।१२४)।

अत्र मुद्रितपाठे पाठभ्रेषोऽनुमीयते। शुद्धः पाठो वायुपुराणे दृश्यते। तथाहि—

अहोरात्रं कलाश् चैव सप्त सोमः समश्नुते। इति (१।५०।१७६)।

सामवेदाध्यायिनां निदानसूत्रे च सूर्यस्य नक्षत्रभोगकाल एवं प्रतिपादितो दृश्यते—

सप्तविंशती राष्ट्रस्य राज्ञो वसतयो मिताः।
त्रयोदशाहमेकैकं नक्षत्रमुपतिष्ठति॥

त्रयोदशाहानि तृतीयमह्नश् चतस्रस् त्रेधा दशतयोऽपि कुर्वन्।
त्रिणवं पन्थानं विततं पुराणं चत्वारिंशता नवरात्रैः समश्नुते॥ इति (५।५[५।१२])।

अत्र मूलश्लोके "काष्ठा पञ्चाक्षरा भवेत्" इति पाठः। १२४ काष्ठाभिः कला भवतीति त्रिंशे श्लोके उक्तम्। तत्र १२४ काष्ठाभिरेका कला भवतीति सोमाकरेणा-ऽपि स्पष्टीकृतम्। काष्ठाया विभागस् तु सूक्ष्मतरकालगणनार्थमिह कृतो दृश्यते।

मूलोक्तस्य चन्द्रसूर्यनक्षत्रभोगकालस्योपपत्तिश् चैवं ज्ञेया। एकस्मिन् युगे चन्द्रः ६७×२७=१८०९ नक्षत्राणि भुङ्क्ते (श्लो.२९)। **युगं च १८३० सावनदिनात्मकम्** (श्लो.२८)। **अतः** $\frac{१८३०}{१८०९}=१\frac{२१}{१८०९}=१\frac{७}{६०३}$ **इति चन्द्रः एकेन अहोरात्रेण अहोरात्रस्य ६०३ कलानां मध्ये ७ कलाभिश् चैकं नक्षत्रं भुङ्क्ते इति सिद्ध्यति। एवमेव सूर्यः १८३० सावनदिनात्मके युगे २७×५=१३५ नक्षत्राणि भुङ्क्ते** (श्लो.३०)। **अतः** $\frac{१८३०}{१३५}=१३\frac{५}{९}$ **इति सूर्यः त्रयोदशभिर् अहोरात्रैर् अहोरात्रस्य नवानां समभागानां मध्ये पञ्चभिर् भागैश् चैकं नक्षत्रं भुङ्क्ते इति सिद्ध्यति।**

विशेषः— हस्तलिखितपुस्तकेषु सोमाकरपाठे च "ससप्तकं भयुक् सोमः" इत्येव पाठो दृश्यते। युक्तश् चाऽयं पाठः। द्यु इति 'द्यूनि' इति पदस्य सान्निध्यादवगम्यते। तस्मात् सुधाकरकृतं 'ससप्तैकम्' इति संशोधनमनावश्यकम्। यद्यपि हस्तलिखितपुस्तकेषु यजुर्वेदिनां परम्परयाऽऽगतः पाठः "उत्तमानि तु पञ्चाह्नः" इत्येव दृश्यते, तथापि ऋग्वेदिनां परम्परयाऽऽगतः पाठः "नवमानि च पञ्चाऽह्नः" इति दृश्यते। अस्माभिः स्पष्टत्वादृग्वेदिपरम्परागतं पाठं गृहीत्वा व्याख्यानं कृतमस्ति। उत्तमानि इत्यस्याऽपि नवमानीत्येवार्थो भवितुं शक्नोति नवसङ्ख्यायाः सङ्ख्यासूत्तमत्वादिति ज्ञेयम्। एतस्य श्लोकस्य सोमाकरव्याख्यानमस्पष्टम्। थिबोमहाशयेनाऽप्यस्य श्लोकस्याऽर्थः सम्यगेव कृतोऽवगम्यते। शङ्करबालकृष्णदीक्षितादिभिरप्यस्य श्लोकस्य समीचीन एवाऽर्थः कृतो दृश्यते॥३९॥

हिन्दी – चन्द्रमा एक सावन दिन और दिन की ६०३ कलाओं में से ७ कला तक एक नक्षत्र का भोग करता है और सूर्य तेरह दिन और दिन के समान ९ भागों में से ५ भाग तक एक नक्षत्र का भोग करता है। एक काष्ठा पाँच लघु अक्षरों को द्रुतवृत्ति में उच्चारण करने में जितना समय लगता है उतने समय की होगी॥ ३९॥

[दिनमानज्ञानोपायः]

यदुत्तरस्याऽयनतो गतं स्याच्
छेषं तथा दक्षिणतोऽयनस्य।
तदेकषष्ट्या द्विगुणं विभक्तं
सद्वादशं स्याद् दिवसप्रमाणम्॥४०॥

(सोमाकरभाष्यम्)

यदुत्तरस्येति। यदुत्तरस्याऽयनत उत्तरायणादारभ्य यद् गतं स्याद् यावद्दिनं गतमतीतं भवेत्। शेषं तथा दक्षिणतोऽयनस्य। एवमेव दक्षिणायने शेषं विचारयेत्। तदेव सङ्ख्याय द्विगुणं कुर्यादिति वाक्यशेषः। ततः षष्ट्या विभक्तं सद्वादशं दिवसप्रमाणं स्यात्। एतदुक्तं भवति। उदगयने चतुर्विंशतिनाडिका च एका च द्वाविंशतिर् दिनं भवति। ततो मासगते त्रिंशत्सु दिवसेषु त्रिंशद् द्विगुणा षष्टिर् भवति। ते च वर्षकालेश् च षष्टिघटिका भवन्ति। पञ्चमासे मासार्धे पञ्चविंशतिनाडिकाः। ते च द्वादश एवमेव सद्वादशं स्याद् दिवसप्रमाणम्। एवमेतयैव कलनया द्वयोर् मासयोरन्ये ततोऽप्यधिके द्वे नाडिके अतिरिच्येते। त्रिष्वन्यास् तिस्रः। एवं विषुवति त्रिंशन्नाडिकं दिनं भवति, उत्तरेष्वेतेनैव क्रमेण द्व्यंशं कल्पयेत्। ततो वक्ष्यति "ज्ञेयराशिं गताभ्यस्तं विभजेज् ज्ञानराशिना" (श्लो. ४२) इति। *तस्मादिह यत् सूचितं तदन्यज् ज्योतिषशास्त्रमपेक्ष्य प्रकल्प्यमेवं तु* ॥४०॥

(कौण्डिन्न्यायनव्याख्यानम्)

अथ उदगयनकाले दक्षिणायनकाले च दिवसविशेषे देशविशेषे च दिवसस्य मानविशेषस्य ज्ञानायोपायमाह— यदुत्तरस्याऽयनतो गत**मित्यादिना**।

उदगयने उदगयनारम्भदिनाद् यावन्ति दिनानि गतानि तानि दिनानि, दक्षिणायने तु दक्षिणायनस्य यावन्ति दिनानि अवशिष्टानि तानि दिनानि द्विगुणानि कृत्वा एकषष्ट्या विभक्तानि मुहूर्तद्वादशकयुक्तानि चेत् तस्य दिवसस्य प्रमाणं स्यादित्यर्थः।

उदाहरणं यथा उदगयनारम्भदिनात् पञ्चमस्य दिवसस्य दिवसमानं ज्ञेयं चेत् $१२+\frac{५\times२}{६१}=१२\frac{१०}{६१}$ इति तस्य दिवसस्य प्रमाणम् $१२\frac{१०}{६१}$ मुहूर्ता इति ज्ञेयम्। यदि दक्षिणायने दक्षिणायनसमाप्तये १५ दिनेष्ववशिष्टेषु दिवसस्य मानं ज्ञेयं चेत् $१२+\frac{१५\times२}{६१}=१२\frac{३०}{६१}$ इति तस्य दिवसस्य प्रमाणम् $१२\frac{३०}{६१}$ मुहूर्ता इति ज्ञेयम्। एवमेव उदगयनप्रारम्भाच् चत्वारिंशस्य दिवसस्य दिवसमानं ज्ञेयम् चेत् $१२+\frac{४०\times२}{६१}=१२\frac{८०}{६१}=१२+१\frac{१९}{६१}=१३\frac{१९}{६१}$ इति तस्य दिवसस्य प्रमाणम् $१३\frac{१९}{६१}$ मुहूर्ता इति ज्ञेयम्।

अत्रोपपत्तिश् चेयम्। दिक्प्रदर्शनात्मकगणितसौविध्याय एकस्मिन् वर्षे ३६६ सावनदिननि भवन्तीति स्वीक्रियते इति एकस्मिन्नयने ३६६÷२=१८३ दिनानि भवन्तीति स्वीक्रियते। उदगयने दिवसमानं ६ मुहूर्तैर् वर्धते दक्षिणायने च ६ मुहूर्तैर् ह्रसति इति च अष्टमे श्लोके प्रोक्तम्। एवं च उदगयने एकस्मिन् दिने $\frac{६}{१८३}$ मुहूर्तवृद्धिर् भवति। एवं च प्रतिदिनं $\frac{२}{६१}$ मुहूर्तवृद्धिर् भवति। एवं च $\frac{२}{६१}\times२=\frac{४}{६१}$

नाडीवृद्धिर् भवति। ह्रस्वतमस्य दिवसस्याऽपि १२ मुहूर्ता मानमिति ते तु सर्वेषु दिवसेषु समवेता भवन्तीति ते सर्वत्र योज्या एवेति ज्ञेयम्। चतुर्विंशे पद्ये त्रिभिः कुडवैर् हीनं द्रोणं जलं नाडिकायाः प्रमाणमुक्तम्। चतुर्भिः कुडवैरेकः प्रस्थः, चतुर्भिः प्रस्थैरेकमाढकम्, चतुर्भिराढकैरेकं द्रोणमिति एकस्मिन् द्रोणे ४×४×४ =६४ कुडवाः भवन्ति तत्र त्रिभिः कुडवैर् हीनं द्रोणं नाडिकायाः प्रमाणम् इति ६४–३=६१ कुडवाः नाडिकायाः प्रमाणमिति ज्ञेयम्। एवं च एकस्मिन् दिने $\frac{४}{६१}$ नाडी-वृद्धिरिति प्रस्थश् च वेदाङ्गज्योतिषग्रन्थानुसारम् $\frac{४}{६१}$ नाड्या तुल्य इति अष्टम-चतुर्विंश-चत्वारिंशश्लोकानां परस्परं समन्वयो बोध्यः।

विशेषः— एतस्य श्लोकस्य सोमाकरेणापि प्रायः समीचीन एवाऽर्थः कृतोऽस्ति। थिबो-शङ्करबालकृष्णदीक्षित-बार्हस्पत्यादिभिः सर्वैरेवाऽस्य श्लोकस्य पाठपरिष्कारयुतः समीचीनोऽर्थः कृतोऽवगम्यते॥४०॥

हिन्दी – उत्तरायण में अयनारम्भ दिन से इष्ट दिन तक उत्तरायण के जितने दिन बीते हैं उन को द्विगुणित करके उस गुणन फल को ६१ का भाग देकर लब्धि में १२ जोड देने से इष्ट दिन का मुहूर्तात्मक दिवसप्रमाण (दिनमान) प्राप्त होगा। दक्षिणायन में इष्ट दिन से दक्षिणायनसमाप्ति तक जितने दिन अवशिष्ट हैं उनको द्विगुणित करके उस गुणनफल को ६१ का भाग देकर लब्धि में १२ जोड देने से इष्ट दिन का मुहूर्तात्मक दिनमान होगा।

उदाहरण— उदगयनारम्भदिन से पाँचवे दिन के दिवसमान ज्ञेय हो तो १२+$\frac{५×२}{६१}$ =१२$\frac{१०}{६१}$ होने से उस दिन का दिनमान १२$\frac{१०}{६१}$ मुहूर्त जाने। यदि दक्षिणायन में दक्षिणायनसमाप्ति से १५ दिन अवशिष्ट होने पर दिवस का प्रमाण ज्ञेय हो तो १२+$\frac{१५×२}{६१}$=१२$\frac{३०}{६१}$ होने से उस दिवस का प्रमाण १२$\frac{३०}{६१}$ मुहूर्त जाने॥४०॥

[ऋतुशेषज्ञानोपायः]

यदर्धं दिनभागानां सदा पर्वणिपर्वणि।
ऋतुशेषं तु तद् विद्यात् संख्याय सह पर्वणाम्॥४१॥

(सोमाकरभाष्यम्)

यदर्धं दिनभागानामिति। यदर्धं दिनभागानां द्वाषष्ट्यंशकल्पनया यदर्धं लुप्त-मित्यर्थः। तदेकत्र कलयेदिति वाक्यशेषः। सदा पर्वणिपर्वणि। तत् सदा एकत्रिंशन्नाडिका भवति। "दुहेयं पर्व चेत् पादे" (श्लो.१२) इत्युक्तम्। ततः किम्? ऋतुशेषं तु तद्

विद्यात्। मासद्वये व्यतीते दिनमेकमतिरिच्यते। एवं सङ्ख्याय सङ्कलय्य पर्वणां सर्वेषां ततोऽधिकमासनिष्पत्तिरिति वाक्यशेषः।

तथा च गर्गः–

द्विलवक्षयसम्भूतो द्वाषष्टिर् भवते तिथिः।
ऋतोरन्तमनुप्राप्य हीनरात्रेति नामतः॥ इति॥४१॥

(कौण्डिन्न्यायनव्याख्यानम्)

अथ सौरर्तु-चान्द्रर्त्वन्तरं प्रतिपर्व प्रतिमासं प्रत्यृतु प्रत्ययनं प्रतिवर्षं च ज्ञातुमुपायमाह शास्त्रकारः यदर्धं दिनभागानामित्यादिना।

सर्वदा पक्षेपक्षे दिनभागानां यद् अर्धं चान्द्रात् पक्षात् सौरेऽर्धमासेऽतिरिच्यते तत् पञ्चवर्षात्मके सौरदृक्सिद्धोदगयन-शुक्लप्रतिपदोः सह प्रवृत्त्या प्रारब्धे युगे गतानां पर्वणां सङ्ख्यया (सह सङ्ख्याय=) गुणयित्वा सौरर्तुशेषं जानीयादित्यर्थः।

एकस्मिन् पञ्चवर्षात्मके युगे सावनदिनानि १८३०, चान्द्राः पक्षा १२४ इति एकस्मिन् चान्द्रे पक्षे १८३०÷१२४=१४$\frac{९४}{१२४}$ सावनदिनानि भवन्ति, सौरा अर्धमासास् तु एकस्मिन् युगे १२० भवन्तीति एकस्मिन् सौरेऽर्धमासे १८३०÷१२०=१५$\frac{३०}{१२०}$=१५$\frac{१}{४}$= १५$\frac{३१}{१२४}$ सावनदिनानि भवन्ति। एवं च सौरार्धमास-चान्द्रपक्षयोरन्तरं च १५$\frac{३१}{१२४}$ - १४$\frac{९४}{१२४}$=$\frac{१८९१}{१२४}$ - $\frac{१८३०}{१२४}$=$\frac{१८९१-१८३०}{१२४}$=$\frac{६१}{१२४}$ इति दिनरूपं भवति। अथवा एकस्मिन् रविदिने १२६$\frac{१}{१५}$ सावनदिनांशा भवन्तीति पूर्वमुक्तम् (श्लो.२७)। एकस्मिँस् तिथौ च १२२ सावनदिनांशा भवन्ति। अतः सौरदिन-तिथ्योरन्तरम् १२६$\frac{१}{१५}$–१२२=४$\frac{१}{१५}$ सावनदिनांशा इति स्पष्टम्। एवं च सौरार्धमास-चान्द्रपक्षयोरन्तरं च ४$\frac{१}{१५}$×१५=६१ सावनदिनांशाः=$\frac{६१}{१२४}$ दिनम् इति स्पष्टं भवति। एतच् च दिनभागानामर्धस्याऽतीवा-ऽऽसन्नमिति मूले दिनभागानामर्धं गृहीत्वा गणितं कर्तव्यमित्युक्तं ज्ञेयम्। एवं च युगारम्भाद् यावन्ति पर्वाणि व्यतीतानि तेषां सङ्ख्यया दिनभागार्धकं गुणयित्वा तावत्सु पक्षेषु व्यतीतेषु तावन्तमृतुशेषं जानीयात्।

उदाहरणं यथा युगारम्भाद् द्वादशसु पर्वसु व्यतीतेषु ऋतुशेषो ज्ञेयश् चेत् $\frac{१}{२}$× १२=६ इति युगारम्भाद् द्वादशसु पर्वसु व्यतीतेषु (चान्द्रेषु त्रिषु ऋतुषु व्यतीतेषु) सौरस्य तृतीयस्य ऋतोः ६ सावनदिनानि अवशिष्टानीति ज्ञेयम्। प्रतिपर्व $\frac{६१}{१२४}$

सावनदिनात्मकस्य ऋतुशेषस्य ग्रहणे तु उक्तायां स्थितौ $\frac{६१}{१२४}\times१२=\frac{७३२}{१२४}=५\frac{११२}{१२४}$ इति गणितेन $५\frac{११२}{१२४}$ सावनदिनानि ऋतुशेष इति ज्ञेयम्।

विशेषः— एतादृशः सौर्तुशेष एव चान्द्राधिमासजनने कारणं भवतीत्येतेनैवाऽधिमासोऽपि व्याख्यातो भवति। अत एव ऋग्वेदिनां पाठेऽयमेव श्लोकः पठितः, "द्व्यूनं द्विषष्टिभागेन" इत्यादिकः श्लोको (श्लो.३७) न पठितः। एतस्य श्लोकस्य सोमाकरेणाऽपि समीचीन एवाऽर्थः कृतो दृश्यते। शङ्करबालकृष्णदीक्षितेनाऽयं श्लोको दिनशब्देन तिथिं गृहीत्वा व्याख्यातोऽस्ति। बार्हस्पत्येन दिनशब्देन सावनदिनं गृहीत्वैतस्य श्लोकस्य युक्तियुक्त एवाऽर्थः कृतोऽवगम्यते। सुधाकरेण दीक्षितप्रदर्शितोऽर्थ एवाऽनुसृतो दृश्यते। अस्माभिस् तु मूले दिनशब्दस्योल्लिखितत्वात् तस्य च सावनदिने रूढत्वात् तदनुसारमेवाऽर्थः प्रदर्शितो बोध्यः। शामशास्त्रिणा प्रस्तुतः श्लोकार्थस्तु श्लोकाक्षरानुरूपो न दृश्यते॥४१॥

हिन्दी– प्रत्येक पक्ष में चान्द्र पक्ष (अर्धमास) से सौर अर्धमास में जो दिन भागों का आधा अतिरिक्त (ज्यादा) होता है उस को इष्ट दिनतक पञ्चवर्षात्मक युग के गत पर्वों की संख्या के साथ गणित करके (आधे दिन भागों को गत पर्वसङ्ख्या से गुणा करके) सौर ऋतुका शेष जाने। सौरार्धमास में १८३०÷१२०=$१५\frac{३०}{१२०}$ दिन और चान्द्रपक्ष में १८३०÷१२४=$१४\frac{९४}{१२४}$ दिन होते हैं; अतः $१५\frac{३१}{१२४}-१४\frac{९४}{१२४}=\frac{६१}{१२४}$ होने से चान्द्रपक्ष से सौर अर्धमास $\frac{६१}{१२४}$दिन से बडा होता है। अथवा एक रविदिन में $१२६\frac{१}{१५}$ सावनदिनांश होते हैं (श्लो.२७)। एक तिथि में १२२ सावनदिनांश होते हैं। अतः सौर दिन और तिथि का अन्तर $१२६\frac{१}{१५}-१२२=४\frac{१}{१५}$सावनदिनांश, अतः सौर अर्धमास और चान्द्र पक्ष में $४\frac{१}{१५}\times१५=६१$ सावनदिनांश अर्थात् $\frac{६१}{१२४}$दिन बराबर का अन्तर होने की बात स्पष्ट होती है। यह सावनदिनांश के आधे का अत्यन्त आसन्न होने से प्रतिपक्ष आधा दिन बराबर का ऋतुशेष लेने को कहा गया है।

उदाहरण— आदियुग में युगारम्भ से बारह पर्व व्यतीत होने पर ऋतुशेष ज्ञेय हो तो $\frac{१}{२}\times१२=६$ होने से उक्त युगारम्भ से बारह पर्व के बीतने के बाद (चान्द्र तीन ऋतु व्यतीत होने के बाद) सौर तृतीय ऋतु के ६ सावन दिन शेष जाने। प्रतिपर्व $\frac{६१}{१२४}$ सावनदिन बराबर का ऋतुशेष लेने पर तो $\frac{६१}{१२४}\times१२=\frac{७३२}{१२४}=५\frac{११२}{१२४}$ होगा, अतः उक्त युगारम्भ से बारह पर्व (चान्द्र तीन ऋतु) व्यतीत होने के बाद सौर तृतीय ऋतु के $५\frac{११२}{१२४}$ सावन दिन शेष होते हैं।

विशेष– शुद्ध सौर वर्ष, अयन, ऋतु और मास का श्रौतस्मार्त धर्मकृत्यों में मूलतः उपयोग न होने से; चान्द्र वर्ष, अयन, ऋतु और मास का नियमन तो स्थूल आसन्न सौर वर्ष,

अयन, ऋतु और मास के मान से भी किया जा सकने से; सौर और चान्द्र मानों के बीच के सम्बन्ध के दिक्प्रदर्शनात्मक गणित को सरल बनाने के लिए सामान्यतया सौर वर्ष में ३६६ सावनदिन, सौर अयन में १८३ सावनदिन, सौर ऋतु में ६१ सावनदिन, सौर मास में ३०$\frac{१}{२}$ सावनदिन, सौरार्धमास में १५$\frac{३१}{१२४}$ सावनदिन और सौर दिन (रविदिन) में १२६$\frac{१}{१५}$ सावनदिनांश स्वीकार करने पर भी अनुसरणीय चान्द्र मान में उस का कोई दुष्प्रभाव न पडने से, सौर अयन का ज्ञान तो दिनवृद्धि-रात्रिह्रास और रात्रिवृद्धि-दिनह्रास के अथवा शङ्कुच्छाया के निरीक्षण से ही आसानी से किया जा सकने से तथा केवल सौर अयन से भी चान्द्र-वर्ष-अयन-ऋतु-मास-अधिमासों का नियमन संभव होने से सौरमान की सूक्ष्मता के साधन में वेदाङ्गज्योतिषकार का अनादर अवगत होता है। अत एव यहां पर इसी ग्रन्थ में स्वीकृत उपर्युल्लिखित सौर अर्धमास के मान को लेकर गणित करने पर भी आधे दिन से कम के ही अन्तर आने पर (सौरार्धमास-दिन १५$\frac{३१}{१२४}$-चान्द्रपक्षदिन १४$\frac{९४}{१२४}$=अन्तरदिन $\frac{६१}{१२४}$) भी सामान्यतया आधे दिन का अन्तर मान कर उल्लेख किया गया है। इस श्लोक में प्रतिपादित रीति से सौर ऋतु और चान्द्र ऋतु के आसन्न अन्तर को ज्ञात करके वास्तविक अन्तर को मध्याह्नशङ्कुच्छायादि से विचार करते रहने की आवश्यकता भी प्रकारान्तर से सूचित होती है। इस प्रकार की वस्तुस्थिति को समझने से लगधमुनिप्रतिपादित विविध मानों में अदोष समझा जा सकता है॥४१॥

[अस्य ग्रन्थस्य कालज्ञानोपायसमुद्देशपरत्वम् अन्यकल्पनाधारत्वं च]

इत्युपायसमुद्देशो भूयोऽप्येनं प्रकल्पयेत्।
ज्ञेयराशिं गताभ्यस्तं विभजेज् ज्ञातराशिना॥४२॥

(सोमाकरभाष्यम्)

इत्युपायसमुद्देश इति। इत्युपायसमुद्देशः एवमुक्तप्रकारेण यागकाललक्षण-प्रतिपादने भूयोऽप्यहः प्रकल्पयेत् पौनःपुन्येनोहेत् सर्वकर्मसु। कथम्? ज्ञेयराशिं गताभ्यस्तं पदार्थान् सूचितार्थान् सङ्क्षेपार्थान् तान् विभजेज् ज्ञानराशिना। ज्ञानं बुद्धियोगः। ऊहा-पोहसामर्थ्येन अन्यानि ज्योतिःशास्त्राण्यपेक्ष्य। कथम्? अभ्यस्तं तत उद्धृत्य यथार्थमव-गत्याऽऽगमेन च कल्पयेत् सर्वमित्यर्थः। यथा मुहूर्तनाडिकाकलाकाष्ठाक्षरकल्पनं तथैव दिवसप्रमाणमिति॥४२॥

(कौण्डिन्न्यायनव्याख्यानम्)

उक्तानां युग-वर्षा-ऽयन-ऋतु-मासा-ऽधिमास-पक्ष-तिथि-नक्षत्र-पर्वकाला-दीनां निरूपणस्य दिक्प्रदर्शनात्मकत्वमुक्त्वा प्रदर्शितदिशा यथावस्तुतत्त्वं तेषां निरूपणस्योपायं च प्रदर्शयति शास्त्रकारः— इत्युपायसमुद्देश **इत्यादिना।**

इत्युक्तप्रकारेण युगादिज्ञानोपायनिर्देशः कृतः, स्वदेशस्य स्वकालस्य च विचारेण एतम् उपायसमुद्देशं वस्तुस्थित्यनुसारम् अधिकमपि प्रकल्पयेदित्यर्थः। "भूयोऽप्यह्नः" इति पाठेऽह्नो ज्ञानस्योपायं पानीयमानादिरूपं ततो युगवर्षादिज्ञानोपायं च प्रकल्पयेदित्यर्थः। अधिगतराशिनाऽभ्यस्तं ज्ञेयमूलराशिं ज्ञातराशिना विभजेत्। ज्ञातराशी आदाय त्रैराशिकेन फलं जानीयादिति भावः। "ज्ञानराशिना" इति पाठे ज्ञप्तिसाधनराशिनेति तदर्थो ज्ञेयः।

विशेषः— एतेन श्लोकेन लगधमुनिना 'एतस्मिन् ग्रन्थे प्रतिपादिता विषयाः कालगणनोपायदिक्प्रदर्शनात्मका एव, एतद् दिक्प्रदर्शनमवलम्ब्य तेषुतेषु देशेषु तेषुतेषु कालेषु च श्रौतस्मार्तधर्मकृत्यार्थकालगणनारीतिं वेदाङ्गज्योतिषहृदयविद् द्विजवरः प्रकल्पयेत्' इति स्पष्टतयैवोक्तम्। एतदेव वेदाङ्गज्योतिषहृदयं विदित्वाऽस्माभिस् तत्रतत्रैतस्य ग्रन्थस्य दिक्प्रदर्शनार्थत्वं प्रतिपादितमेव॥४२॥

हिन्दी– उक्त रूप में एक पञ्चवर्षात्मक युग की कालगणना की रीति को दिखाकर अन्य युगों की भी कालगणना करने के उपाय का वस्तुगत उपदेश किया गया है। इस उपाय को वस्तुस्थिति के अनूकूल रूप में और रीति से भी कल्पित करे। अवगत राशि से गुणित ज्ञेयमूल राशिको ज्ञानसाधन ज्ञात राशि से विभक्त करे। (त्रैराशिक से अज्ञात राशि जाने।)

विशेष– इस श्लोक से लगधमुनिद्वारा 'इस ग्रन्थ में प्रतिपादित विषय कालगणना के उपाय के दिक्प्रदर्शन के रूप में प्रस्तुत किए गए हैं, इस दिक्प्रदर्शन को अवलम्बन करके तत्तद् देश और तत्तत् काल में श्रौतस्मार्तधर्मकृत्यार्थक कालगणना की रीति को वेदाङ्गज्योतिषहृदयविद् द्विजवरों को प्रकल्पित करना चाहिए' यह बात स्पष्टतया ही कही गई है। इस प्रकार के वेदाङ्गज्योतिष के हृदय को सम्यक्तया जान कर ही हमलोगों ने तत्तत् स्थलों में इस वेदाङ्गज्योतिष ग्रन्थ का दिक्प्रदर्शनार्थत्व प्रतिपादित किया है॥४२॥

[वेदाङ्गज्योतिषस्य प्रतिपाद्यानां विषयाणां प्रवक्तुश् च निर्देशेन ग्रन्थोपसंहारः]

इत्येतन् मासवर्षाणां मुहूर्तोदयपर्वणाम्।
दिनर्त्वयनमासानां व्याख्यानं लगधोऽब्रवीत्॥४३॥

(कौण्डिन्न्यायनव्याख्यानम्)

अथ ग्रन्थोपसंहारं करोति— इत्येतन् मासवर्षाणामित्यादिना।

इत्येवम्प्रकारेण लगधो मुनिः चान्द्रवर्षाणाम्, मुहूर्तानाम्, वासवनक्षत्रादीनामुदयानाम्, चान्द्रपर्वणाम्, दिनानाम्, ऋतूनाम्, अयनानाम्, मासानां च व्याख्यान-

मब्रवीदित्यर्थः। मासवर्षाणाम् इत्यस्यार्थश् चान्द्रवर्षाणाममिति युक्तः, मास-शब्दस्याऽस्मिन् श्लोके द्विवारं प्रयुक्तत्वात् पुनरुक्ततापरिहारस्याऽऽवश्यकत्वात् "माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः। युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते" (श्लो.५) **इति चान्द्रवर्षप्राधान्येन कालज्ञानस्य निरूपणस्य प्रतिज्ञातत्वात्, सकारान्तस्य मास्-शब्दस्य चन्द्रवाचित्वेन मास-शब्दस्य चान्द्रपर्यायत्वेन सुखेन ग्रहीतुं शक्यत्वाच् च।**

विशेषः— "इदं पद्यं सोमाकरभाष्ये नास्ति" **इति सुधाकरेणोक्तं दृश्यते। किन्तु सोमाकरभाष्ये दृश्यमानः "एवमुपसंहृत्य विज्ञानफलमाह सोमसूर्यस्तृचरितमिति" इति वाक्ये स्थितः** "एवमुपसंहृत्य" इत्यंशो हि "इत्येतन् मासवर्षाणाम्" **इत्यादेः पद्यस्य सोमाकरव्याख्याते वेदाङ्गज्योतिषग्रन्थेऽस्तित्वं प्रतिपादयत्येवेति ज्ञेयम्। अस्माभिर् दृष्टासु ४४ पद्यात्मिकासु नैपाल-राष्ट्रियाऽभिलेखालयस्थासु चतसृष्वपि मूलमात्रवेदाङ्गज्योतिषग्रन्थलेखच्छायाप्रतिलिपिषु एतत् पद्यमुलभ्यत एवेति च ज्ञेयम्॥४३॥**

हिन्दी– उक्त प्रकार का यह चान्द्रवर्षों का, मुहूर्त का, धनिष्ठादि के उदयों का, पर्वों का, दिनों का, ऋतुओं का, अयनों का और मासों का व्याख्यान लगधमुनि ने बोला। [इस पद्य का सोमाकर ने भी सङ्केत तो दिया ही है।] ॥४३॥

[एतद्ग्रन्थार्थज्ञानफलम्]

सोमसूर्यस्तृचरितं विद्वान् वेदविदश्नुते।
सोमसूर्यस्तृचरितं लोकं लोके च सन्ततिम्,
लोकं लोके च सन्ततिमिति॥४४॥

(सोमाकरभाष्यम्)

एवमुपसंहृत्य विज्ञानफलमाह **सोमसूर्यस्तृचरितमिति**। सोमसूर्यनक्षत्राणां चरितं गतागतविज्ञानं यो वेद जानाति सोऽश्नुते आप्नोति। किम्? सोमसूर्यनक्षत्रचरितं लोकं तत्सायुज्यमित्यर्थः। तथेह लोके च सन्ततिमनवच्छिन्नसन्तानसिद्धां स्वर्गलोकवान् प्रजावान् भवतीत्यर्थः। अभ्यासः शास्त्रनिष्पत्तये। स च पक्ष-मास-तिथि-चन्द्र-गतिज्ञानादार्त्विज्ययोग्यत्वाच् च पङ्क्तिपावन एव। एतत् तु विदग्धसांवत्सराणां तिथिज्ञानफलं वृथाभिमानिनां त्वसर्वज्ञानां वृथोपदेशिनां वृथानुष्ठानप्रवर्तकानामकालयागचोदनादकाल-

यागप्रवर्तकत्वादौपमन्यवादिवन् मूर्धपातादिदोषपरम्परा **"नक्षत्रैर् यश् च जीवति"** (मनुस्मृतौ ३।१६२) इत्यश्राद्धीयत्वं तथा प्रदोषज्ञापकत्वाच् च परत्राप्यसिद्धिः।

तथा च स्मृतिः–

दुरिष्टैर् दुरधीतैश् च दुराचारैर् दुरागमैः।
विप्राणां कर्मदोषैस् तैः प्रजानां जायते भयम्॥ इति।

तस्मात् तथा यागकर्मणि वर्तितव्यं यथोपक्रमापवर्गावुभावपि न नश्यतः। अभ्युदितेष्टिदर्शनादकालोपक्रमदोषः। उपसत्समासदर्शनादकालापवर्गदोषः। तथा **"पुरा द्वादशाः पुरा दीक्षिताय द्वादशामिति वदन्तं न धीयेत"** इति श्रुतिः। तदेतदेवार्थमभिप्रेत्य सूत्रकारः **"पूर्णमासीमुपवसेददर्शनेऽमावास्याम्"** इत्याह। तथा च श्रुतिः– **"य एवासा आग्नेयोऽष्टाकपालः पौर्णमासे योऽमावास्यायां तमग्नये पथिकृते कुर्याद्"** इति (काठकसंहितायाम् १०।५)। तस्मादकाल उपक्रमापवर्गयोरेवैते अपार्थके भवतस् तस्माद् विचार्य यतस् **"तेऽसुरा अदक्षिणा अयज्ञा अनक्षत्रा यत् किं चाऽकुर्वत तां कृत्यामेवाऽकुर्वत"** (काठकसंहितायाम् ३७।१२) इति श्रुतेः। तस्मादुभयकालानुरोधवशादेकाङ्गवैकल्यम्। अपि च शास्त्रादौ प्रवृत्तिर् येषामभिप्रेता परिशिष्टवाक्यानुरोधवशात् **"चतुर्दश्यवसाने तु पितृयज्ञं तु कारयेद्"** इति वाक्यैर् यागस् तत्र न कर्तव्य इत्यपेक्षमेव।

तथा च गर्गः–

चतुर्दश्यां यदा कृष्णे क्षयमभ्येति चन्द्रमाः।
दृश्यो भवति वाऽप्युच्चः सिनीवाल्यास् ततस् तदा॥ इति।

निश्युद्गतोऽथवाऽप्युच्चो ह्यस्तं वाऽप्युपगच्छति।
ततः पूर्णेऽप्यृतौ ह्येतत् कार्यं चन्द्रवशाद् भवेत्॥ इति।

यद्यप्येवं तथापि **"य एवासा आग्नेयोऽष्टाकपालः"** इति (काठकसंहितायाम् १०।५) श्रुतेरस्ति गौणत्वमेवं प्रतीयते। अन्यथैषा श्रुतिरेव न स्यात् येषां तु सूत्रकारो विकल्पेनाह– **"पूर्वां पौर्णमासीमुपवसेदुत्तरां वा"** (कात्यायनश्रौतसूत्रे २।१।१) इत्यादि कात्यायनसूत्रापेक्षावशेन स्वेच्छया प्रवृत्तिरिह तु सूत्रकारस्य प्रवर्त्तितेह प्रतिज्ञा पूर्ण इत्याद्या। तस्मादेतत् सुतरां विचार्यम्॥४३॥

मयोक्तमेतत् सकलं विदित्वा यागात् फलं प्राप्नुयुश् चोदितं यत्।
निर्मत्सरश्रौतकर्मप्रवृत्ता दोषान् बहून् प्राप्नुयुरन्यथाऽन्ये॥१॥

मया कृतं भाष्यमस्य स्वबुद्ध्या यस्मान् नाऽऽप्तमागमं पूज्यमानम्।
तस्माच् छेषं तद्विदः कल्पयन्तु नमस् तेभ्यो *ब्रह्मसूर्येन्दुभेभ्यः*॥२॥

सोमाकरो वेदविदुक्त-कान्तप्रातिभज्ञानागमभावबुद्धिः।
ज्योतिःशास्त्रानाकुलकेन संसा जिह्वात् सर्वमात्मनां प्रव्रजिष्यन्॥३॥

॥ इति शेषकृतं ज्योतिःशास्त्रभाष्यं समाप्तम्॥

(कौण्डिन्न्यायनव्याख्यानम्)

चन्द्रादिज्योतिषामयनस्य ज्ञानस्य फलं प्रतिपादयति शास्त्रकारः— सोमसूर्य-स्तृचरितमित्यादिना।

सोमस्य सूर्यस्य स्तॄणां च उदयास्तमयादिचारं लक्षणादिभिस् सम्यग् विदन् वेदज्ञो द्विजः चन्द्राधिष्ठितं लोकं सूर्याधिष्ठितं लोकं नक्षत्राधिष्ठितं च लोकं प्राप्नोति, लोके पुत्रपौत्रादिरूपं जन्मवंशसन्तानं शिष्यप्रशिष्यादिरूपं विद्यावंशसन्तानं च प्राप्नोतीत्यर्थः। चतुर्थपादाभ्यासो ग्रन्थसमाप्तिद्योतनाय कृतो बोध्यः।

ननु "आह्वायका देवलका नाक्षत्रा ग्रामयाजकाः। एते ब्राह्मणचाण्डला महा-पथिकपञ्चमाः" इति महाभारते शान्तिपर्वणि (७६।६) नाक्षत्रब्राह्मणस्य निकृष्टत्वं प्रतिपादितम्, "विश्रम्भघाती व्यङ्गो हि तथा नक्षत्रसूचकः। वर्जनीया द्विजा ह्येते श्राद्धकर्मणि नित्यशः" इति काश्यपधर्मसूत्रे नक्षत्रसूचकस्य ब्राह्मणस्याऽश्राद्धीय-ब्राह्मणत्वमुक्तम् (पृ. २७९), मनुस्मृतावपि "हस्ति-गो-ऽश्वोष्ट्रदमको नक्षत्रैर् यश् च जीवति। पक्षिणां पोषको यश् च युद्धाचार्यस् तथैव च" इति (३।१६२) नक्षत्रैर् जीवकस्य हव्यकव्ययोर् वर्जनीयेषु ब्राह्मणेषु गणना कृता दृश्यते, विष्णुधर्मसूत्रेऽपि "हीनाधिकाङ्गान् विवर्जयेत्, विकर्मस्थाँश् च, बैडालव्रतिकान्, वृथालिङ्गिनः, नक्षत्रजीविनः, देवलकाँश् च" इति (८२।३-८) नक्षत्रजीविनो पित्र्ये कर्मणि विवर्जनीयत्वं प्रतिपादितम्, शङ्खलिखितवचनेऽपि चतुर्वर्गचिन्तामणौ परिशेष-खण्डे श्राद्धकल्पे (पृ.४९२) हेमाद्रिणा धृते "नक्षत्रादेशवृत्तिर् ब्रह्मपुरुषो मद्यपो ब्रह्मविक्रयी कितवः कूटकारको मानुषपशुविक्रयिणश् चाऽपाङ्क्तेयाः" इति नक्षत्रादेशवृत्तेर् ब्राह्मणस्याऽपाङ्क्तेयत्वमुक्तमिति कथं सोम-सूर्य-स्तृ-चरितं जानतः सोम-सूर्य-स्तृ-चरितलोकगामित्वमत्रोक्तं सङ्गच्छते इति चेत् तत्र वराह-मिहिरादयो भोजकाः "अविदित्वैव यच् छास्त्रं दैवज्ञत्वं प्रपद्यते। स पङ्क्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः" (बृहत्संहितायाम् २।१६) इत्यादि वदन्ति। सोमाकरस् तु श्रुति-स्मृतिविहितयागादिकालापेक्षित-तिथिनक्षत्रपक्षमासर्त्वयनादिरूपकालविदा-मेतत् फलमुक्तं नाऽऽदेशिकानां दैवज्ञानां वेदाङ्गज्योतिषग्रन्थकारेणेति प्रतिपाद-यति। युक्तं चैतत्; मूले वेदविदो सोमसूर्यस्तृचरितं विदुषो लोकप्राप्तेः सन्तति-प्राप्तेश् च प्रतिपादितत्वात्। वेदमनधीत्य अन्यशास्त्रस्याऽध्येतुस्तु "योऽनधीत्य द्विजो

वेदमन्यत्र कुरुते श्रमम्। स जीवन्नेव शूद्रत्वमाशु गच्छति साऽन्वयः" इति मनुस्मृतौ (२।१६८) निन्दितत्वात्, वेदाध्ययनरहितस्याऽन्यशास्त्राऽध्ययनस्य "तस्माद् वेदादृते नाऽन्यदध्येतव्यं द्विजन्मना। वेदबाह्यं तु यत्किञ्चिन् नाऽध्येतव्यं कदाचन" इति बृहद्योगियाज्ञवल्क्यस्मृतौ (१२।२१) निषिद्धत्वाच् च। यच् च "न वेदमनधीत्याऽन्यां विद्यामधीयीताऽन्यत्र वेदाङ्गस्मृतिभ्यः" इति शङ्खलिखितवचनस्य दर्शनाद् वेदमनधीत्याऽपि वेदाङ्गस्मृत्यध्ययने विरोधाभाव इति कुल्लूकभट्टेन मनुस्मृतिव्याख्यायामुक्तं (२।१६८) तदप्यनुपपन्नं बोध्यम्, शङ्खलिखितवचनेन वेदाध्ययनात् पूर्वं वेदोपकारक-वेदाङ्गस्मृत्याद्यध्ययनं ततो वेदाध्ययनमिति अध्ययनक्रमविशेषस्यैवाऽनुमतत्वात्, वेदं सर्वथा त्यक्त्वाऽन्यशास्त्रस्याऽध्ययनस्याऽननुमतत्वात्, पाणिनीयव्याकरणभाष्यकारेण मुनिना पतञ्जलिनाऽपि "पुराकल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माऽधीयते, तेभ्यः स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते" इति प्रथमाह्निके वदता वेदाध्ययनोपकारकाणां वेदाङ्गानामेव वेदात् पूर्वमध्ययनस्य प्राचीनतरशिष्टसम्मतताया: प्रदर्शितत्वात्,"वेदत्यागैकबुद्ध्या यो ब्रह्मचारी महाजडः। शास्त्राभ्यासं (प्रकुरुते) सोऽयं मानुषगर्दभः" इति वेदनिरपेक्ष-शास्त्राभ्यासस्य तु लौगाक्षिस्मृतौ (पृ. ४०४) विशेषेण निन्दितत्वाच् च। कात्यायनेनाऽपि "मन्त्रपादपदसन्धिविधिज्ञो धातुनामवचनप्रकृतिज्ञः। ईदृशो भवति यज्ञविधिज्ञः पक्षमासतिथिचन्द्रगतिज्ञः" इति तृतीये परिशिष्टे प्रतिज्ञासूत्रे वदता मन्त्रादिविद एव यज्ञापेक्षितज्योतिषाध्यायिनः प्रशंसनीयता सूचिताऽस्तीति वेदविदो ज्योतिषज्ञस्याऽत्र कृता प्रशंसा सुसङ्गतेति बोध्यम्॥४४॥

हिन्दी – चन्द्र सूर्य और नक्षत्रों के चार को जानने वाला वेदज्ञ द्विजाति सोमचरित लोक को सूर्यचरित लोक को तथा नक्षत्र चरित लोक को प्राप्त करता है और इस लोक में सन्तति भी प्राप्त करता है।

विशेष – महाभारत के शान्तिपर्व में (७६।६) नाक्षत्रब्राह्मण का निकृष्टत्व प्रतिपादित है, काश्यपधर्मसूत्र (पृ. २७९) में नक्षत्रसूचक ब्राह्मण का अश्राद्धीयब्राह्मणत्व बताया गया है, मनुस्मृति में (३।१६२) नक्षत्र से जीविका करनेवाले ब्राह्मण की हव्यकव्य में वर्जनीय ब्राह्मणों में गणना की गई है, विष्णुधर्मसूत्र में (८२।३-८) नक्षत्रजीवी ब्राह्मण का पित्र्य कर्म में विवर्जनीयत्व प्रतिपादित है, शङ्खलिखित के हेमाद्रिद्वारा उद्धृत (चतुर्वर्गचिन्तामणि, परिशेषखण्ड, श्राद्धकल्प, पृ.४९२) वचन में नक्षत्रादेश की वृत्ति वाले ब्राह्मण को अपाङ्क्तेय कहा गया है। अतः सोम-सूर्य-स्तृ-चरित जानने वाले का सोम-सूर्य-स्तृ-चरित-लोकगामित्व कैसे सङ्गत होता है, यह प्रश्न उठ सकता है। इस विषय में वराहमिहिर प्रभृति मग ब्राह्मण *"अविदित्वैव यच् छास्त्रं दैवज्ञत्वं प्रपद्यते। स पङ्क्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः"*

(बृहत्संहिता २।१६) इत्यादि कहते हैं। सोमाकर ने तो श्रुति-स्मृतिविहित यागादिकालापेक्षित तिथिनक्षत्रपक्षमासर्त्वयनादिरूप काल को जानने वाले का यह फल प्रतिपादित है, आदेशिक दैवज्ञों का नहीं, ऐसा कहा है। यह बात युक्तियुक्त भी है; क्यों कि मूल में वेदविद् सोम-सूर्य-स्तृचरितज्ञ की ही लोकप्राप्ति और सन्ततिप्राप्ति का प्रतिपादन है। वेद के अध्ययन को छोडकर अन्य शास्त्र के अध्ययन करने वाले का तो *"योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्। स जीवन्नेव शूद्रत्वमाशु गच्छति साऽन्वयः"* ऐसे रूप में मनुस्मृति में (२।१६८) निन्दित होने से, वेदाध्ययनरहित होकर अन्यशास्त्र के अध्ययन का *"तस्माद् वेदादृते नाऽन्यदध्येतव्यं द्विजन्मना। वेदबाह्यं तु यत्किञ्चिन् नाऽध्येतव्यं कदाचन"* ऐसा कहकर बृहद्योगियाज्ञवल्क्यस्मृति में (१२।२१) निषेध किए जाने से, *"न वेदमनधीत्याऽन्यां विद्यामधीयीताऽन्यत्र वेदाङ्गस्मृतिभ्यः"* इस शङ्खलिखितवचन से वेदाध्ययन के विना भी वेदाङ्गस्मृति के अध्ययन में विरोधाभाव होने की कुल्लूकभट्ट की बात (मनुस्मृतिव्याख्या २।१६८) तो अनुपपन्न ही है। शङ्खलिखितवचन में वेदाध्ययन से पूर्व वेदोपकारक-वेदाङ्ग-स्मृति का अध्ययन करके वेदाध्ययन करने का अध्ययनक्रमविशेष ही अनुमत है, वेद को सर्वथा छोडकर अन्यशास्त्र का अध्ययन अनुमत नहीं। पाणिनीयव्याकरणभाष्यकार मुनि पतञ्जलि ने भी *"पुराकल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माऽधीयते, तेभ्यः स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते"* कहकर वेदाध्ययनोपकारक वेदाङ्ग का ही वेद से पूर्व अध्ययन प्राचीनतर शिष्टसम्मत होने की बात प्रदर्शित की है। *"वेदत्यागैकबुद्ध्या यो ब्रह्मचारी महाजडः। शास्त्राभ्यासं (प्रकुरुते) सोऽयं मानुषगर्दभः"* कहकर वेदनिरपेक्ष-शास्त्राभ्यास का तो लौगाक्षिस्मृति ने (पृ.४०४) विशेष रूप से निन्दा की है। कात्यायन ने भी तृतीय परिशिष्ट प्रतिज्ञासूत्र में *"मन्त्रपादपदसन्धिविधिज्ञो धातुनामवचन-प्रकृतिज्ञः। ईदृशो भवति यज्ञविधिज्ञः पक्षमासतिथिचन्द्रगतिज्ञः"* कहकर मन्त्रादिविद् और यज्ञापेक्षित ज्योतिष का अध्ययन करने वाले ब्राह्मण की ही प्रशंसनीयता सूचित की है। अतः वेदविद् ज्योतिषज्ञ की यहां की गई प्रशंसा सुसङ्गत है॥४४॥

(व्याख्यानोपसंहारः)

एवं व्याख्याते लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थे अद्यत्वेऽपि श्रौत-स्मार्त-याग-संस्कारादिधर्मकृत्यार्थं ग्राह्या लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थानुसारिणी कालगणनाव्यवस्थैषा वैदिकैरवलम्बनीयेति निष्कर्षरूपेणोपस्थाप्यते—

१. शङ्कुच्छायादिवेद्यस्य दृक्सिद्धस्य सौरस्योदगयनस्याऽऽरम्भस्य दिनात् (सायनमकरसङ्क्रान्तिदिनात्) प्रायेण पूर्वात् अधिमासयुते वर्षे तु कदाचित् ततः परादपि आसन्नात् शुक्लप्रतिपद्दिनाद् वैदिकानां सौरचान्द्रं नववर्षं प्रवर्तते इति स्वीकरणीयम्।

२. उक्तप्रकारेण प्रवृत्तं नववर्षं संवत्सर-परिवत्सरेदावत्सरेद्वत्सर-वत्सरेषु कतम-दिति निर्णयो विष्णुधर्मोत्तरपुराणादिवचनानुसारं करणीयः।

३. उक्तप्रकारेण निर्णीताद् वैदिक-सौरचान्द्र-नववर्षारम्भदिनादेव वैदिकानां श्रौत-स्मार्तधर्मकृत्यार्थकं सौरचान्द्रमुदगयनं च प्रवर्तते इति मन्तव्यम्।

४. उक्तप्रकारेण निर्णीताद् वैदिक-सौरचान्द्रनववर्षारम्भदिनादेव वैदिकानां श्रौत-स्मार्तधर्मकृत्यार्थकः सौरचान्द्रः शिशिर ऋतुरपि प्रवर्तते, ततो द्वयोर्द्वयोरमान्त-योश् चान्द्रमासयोर् व्यतीतयोः शुक्लप्रतित्सु क्रमेण सौर-चान्द्रा वसन्त-ग्रीष्म-वर्षा-शरद्-हेमन्ता ऋतवः प्रवर्तन्ते, अयनान्तेऽधिमासे सति तु अधिमासेऽपि व्यतीते नवीनः सौरचान्द्र ऋतुः प्रवर्तते, एते ऋतवो मुख्यरूपेण चान्द्रा एव; अधिमासेनैतेषामृतूनां सौरर्तुभिर् दूरविप्रकर्षस्य परिहारस्य साधनीयत्वात् त्वेते ऋतवः सौरचान्द्रा उच्यन्ते इति स्वीकर्तव्यम्।

५. वेदोक्तास् तपस्-तपस्य-मधु-माधव-शुक्र-शुचि-नभो-नभस्येषोर्जसहःसहस्य-मासा मुख्यरूपेण चान्द्रा एव, तथाप्येतेषां मासानामपि अधिमासेन सौरमासैर् दूरविप्रकर्षस्य परिहारस्य साधनीयत्वात् त्वेते मासा अपि सौरचान्द्रा इति वक्तुं शक्यन्ते, माघफाल्गुनादयस् तु मासा उक्तप्रकारेण निर्णीतेभ्यस् तपस्-तपस्या-दिभ्योऽभिन्ना एव मन्तव्याः इति च स्वीकरणीयम्।

६. सौरायन-विषुवदिन-विज्ञेयशीतोष्णवर्षहेतुवास्तविकसौरर्तुभिः सह उक्तविधानां चान्द्राणामृतूनां दूरविप्रकर्षं परिहृत्य सामञ्जस्यस्य स्थापने चाऽयनान्ता-धिमासव्यवस्थाया एव समर्थतरत्वाच् च वैदिकैः श्रौत-स्मार्तधर्मकृत्यदृष्ट्या-ऽयनान्ते एवाऽधिमासः स्वीकर्तव्यः।

७. वैदिकानां प्रतिपदादयस् तिथयः सामान्यतयाऽहोरात्रात्मका एव, तस्मात् प्रति-पदादिषु श्रौतस्मार्तधर्मकृत्यार्थं खण्डतिथिविचारोऽनावश्यकः, केवलमुपवसथ-दिनपौर्णमासेष्टिदिनपिण्डपितृयज्ञदिन-दर्शेष्टिदिनादिनिर्णयायैव स्फुटः पक्षसमा-प्तिकालो विचारणीयः, एवं च श्रौतस्मार्तधर्मकृत्यकालनिर्णये कर्तव्ये सामान्य-तया शुक्लपक्षे कोऽपि तिथिर् न त्रुट्यति न च वर्धते इति पक्षः श्रुतिकल्पसूत्र-स्मृत्यनुसारमाश्रीयते, कृष्णपक्षेऽपि चतुर्दशीं विहायाऽन्यस् तिथिः कदापि न वर्धते न च त्रुट्यति; वास्तविकस्य पक्षसमाप्तिकालस्य (पर्वकालस्य) विचारेण कदाचित् कृष्णपक्षस्य चतुर्दशी तु त्रुट्यति (लुप्यते) इति स्वीक्रियते, एवं च कदाचित् पूर्वयजनीयदिनाच् चतुर्दशं दिनमेवाऽमावास्यां स्वीकृत्य तस्मिन्नेव दिनेऽपराह्णे पिण्डपितृयज्ञः क्रियते चेति च मन्तव्यम्।

८. नक्षत्रविचारे च श्रुति-स्मृति-पुराणेषु कृत्तिकानां प्रथममुल्लेखात्, श्रुतौ कृत्तिकातारकापुञ्जस्य अम्बा-दुलादीनां सप्तानां तारकाणां नाम्नां निर्देशस्य

दर्शनाच् च चन्द्रचारेषु कृत्तिकानां यया तारकया सह चन्द्रस्य प्रथमं योगो भवति तस्यास् तारकाया आद्यं बिन्दुमेव नक्षत्रचक्रस्याऽऽद्यं बिन्दुं स्वीकृत्य चन्द्रस्य सूर्यस्य च नक्षत्रैः सह योगानां प्रतिपादनं कर्तव्यम्। तदर्थं साधन-युक्तैर् वैदिकज्यौतिषिकैर् वेधेन नक्षत्रक्षेत्रविभजनं कार्यम्। वेदेषु प्राप्यो नक्षत्रेषु कृत्तिकानां प्रथममुल्लेखः कदाचिद् वेदाविर्भावकाले कृत्तिकानाम् उदगयनप्रारम्भे सूर्यनक्षत्रत्वेन स्थितत्वात् कृतो वेदितव्यः, न तु कदाचित् कृत्तिकानां वसन्तसम्पाते स्थितत्वात् कृत्तिकानां वेदेषु प्रथममुल्लेखः कृत इति तिलकाद्युक्तं स्वीकर्तव्यमित्यत्र च वैदिकज्यौतिषिकैर् वेदाविर्भावकाल-विचारकैश् चाऽवधानं देयम्।

९. यथाऽऽधुनिकैर् ज्यौतिषिकैः सूर्यसिद्धान्तादिषु तेषां मूलग्रन्थेषु दत्तानां वर्ष-मानादीनां संस्कारं कृत्वा व्यवहारे प्रयोगः क्रियते, यथा च पाणिनीयाया अष्टाध्याय्या वार्त्तिककार-भाष्यकारवचनैः परिष्कारं कृत्वा शिष्टैर् व्यवहारे प्रयोगः क्रियते, तथैव लगधमुन्युक्त-सौरचान्द्रवर्षमानादीनामपि वस्तुस्थित्यनु-सारं परिष्कारं कृत्वा व्यवहारे प्रयोगः कार्यः, वर्षारम्भाऽयनारम्भर्त्वारम्भमासा-रम्भाधिमासारम्भपर्वकालनिर्णयादयस् तु लगधमुनिप्रोक्तसिद्धान्तानुसारं श्रुति-स्मृतिपुराणाद्यनुकूलतानुसारं च कार्याः, लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रथोक्त-शिशिरादियुगवर्षायनादिसिद्धान्तानां त्याग एव तु वैदिकधर्मानुयायिभिः सर्वथा-ऽकार्य एवेति॥

तत्रैते श्लोका भवन्ति—

युगमार्षं हि पञ्चाब्दं ब्रह्मगुप्तादिजल्पितैः।
नाऽनार्षैर् बाध्यते धर्मे परं मानमृषिर् यतः॥१॥

संवत्सरस् तु प्रथमो द्वितीयः परिवत्सरः।
ततश् चेदावत्सरश् च तुर्य इद्वत्सरः श्रुतः॥२॥

वत्सरः पञ्चमोऽब्दः स्यात् पञ्चाब्दस्य युगस्य च।
तेषां विपरिवर्तैश् च युगद्वादशकं स्मृतम्॥३॥

वैष्णवं प्रथमं तत्र बार्हस्पत्यं ततः परम्।
ऐन्द्रमाग्नेयं च त्वाष्ट्रमाहिर्बुध्न्यं च पित्र्यकम्॥४॥

वैश्वदेवं च सौम्यं च ऐन्द्राग्नं चाऽऽश्विनं तथा॥
भाग्यं चेति द्वादशैव युगानि कथितानि हि॥५॥

वैष्णवादि युगेष्वब्दा षष्टिः स्युः प्रभवादयः।
तेऽपि चान्द्रा वत्सरा हि गार्ग्यादिमुनिकीर्तिताः ॥६॥

चैत्रशुक्लप्रतिपदि कलेरब्दः प्रवर्तते।
अन्येषां तु मते यावतिथः षट्त्रिंशता ततः ॥७॥

न्यूनः कृष्ण युगाब्दस् तु वैदिकानां प्रवर्तते।
तपश्शुक्लप्रतिपदि तंत्पूर्वस्यामिति स्थितिः ॥८॥

तष्टाः कलियुगाब्दास्तु षष्ट्याऽऽदियुगसञ्चयः।
लब्धः, शेषे पञ्चभिस् तु तष्टे लब्धं युगं गतम् ॥९॥

शिष्टेऽत्र खे पञ्चमोऽब्दोऽन्यत्र तत्सङ्ख्यवत्सरः।
संवत्सरादिषु ज्ञेयो वैदिकैर् ब्राह्मणैस् सदा ॥१०॥

वैदिकानां तु वर्षादि सौरचान्द्रं प्रकीर्तितम्।
अयनं विषुवं सूर्यान् मासं चन्द्राच् च लक्षयेत् ॥११॥

आर्यावर्ते तु मध्याह्नेऽहस्सु दीर्घतमा यदा।
शङ्कोश् छाया ततस् सूर्यः प्राप्नुयादुत्तरायणम् ॥१२॥

आर्यावर्ते हि मध्याह्नेऽहस्सु ह्रस्वतमा यदा।
शङ्कोश् छाया ततः सूर्यः प्राप्नुयाद् दक्षिणायनम् ॥१३॥

सूर्यस्योदङ्मुखीभावात् स्फुटं याऽमावसी परा।
तस्यां तु पूर्णे मासे हि प्रवृत्तं वर्षमिष्यते ॥१४॥

तस्य मासस्य या शुक्लप्रतिपत् तत एव च।
इज्यार्थं वर्षमयनमृतुर् मासश् च गण्यते ॥१५॥

तत्राऽयनं चोत्तरं स्यादृतुश् च शिशिरो भवेत्।
मन्त्रोक्तश् च तपा मासो माघो ब्राह्मणकीर्तितः ॥१६॥

तपस्-तपस्यौ च मधु-माधवौ शुक्रकः शुचिः।
नभो-नभस्यौ चेषोर्जौ सहाश् चैव सहस्यकः ॥१७॥

सूर्यगत्यनुगौ चान्द्रौ वैदिकद्विजसम्मतौ।
द्वौद्वौ तपःप्रभृतिकौ मासावृतुरिहोदितः ॥१८॥

शिशिरश् च वसन्तश्च ग्रीष्मो वर्षास् तथा शरत्।
हेमन्तश् चेति ऋतवः क्रमान् मासद्वयात्मकाः ॥१९॥

उत्तरायणमत्रोक्तमृतुभिः शिशिरादिभिः।
त्रिभिर् वर्षादिभिः प्रोक्तमृतुभिर् दक्षिणायनम्॥२०॥

सौरेऽयने सप्त दर्शाः स-पञ्चषदिनेऽपि च।
यदा दर्शे सप्तमे तु पूर्णो मासस् तदाऽधिकः॥२१॥

कृष्णपक्षे तु नवमीमप्यतिक्रम्य भास्करः।
यत्राऽयनान्तरं गच्छेन् मासोऽमान्तो हि सोऽधिकः॥२२॥

चन्द्रस्याऽदर्शनाच् चैव यावदन्यददर्शनम्।
मासश् चन्द्रमितस् तस्य पक्षौ द्वौ शुक्ल-कृष्णकौ॥२३॥

चन्द्रस्याऽदर्शनाद् यानि यावदन्यददर्शनम्।
दिनानि प्रथमाद्यानि तिथयस् ताः प्रकीर्तिताः॥२४॥

उभयोः पक्षयोरन्तौ पञ्चदश्यौ[1] प्रकीर्तिते।
उक्तं तत् पर्व प्रतिपत्-पञ्चदश्योर् यदन्तरम्॥२५॥ इति॥

अथ व्याख्यानकारवंशवर्णनादिकम्–

विनश्वरोऽज्ञो दुःख्यल्पोऽहमिति भ्रममूर्छितम्।
लोकं समुद्दिधीर्षन्त्यः श्रुतयो लोकगोचरैः॥१॥

वाक्यैर् जन्माद्यस्य यतस् तद् ब्रह्मेति प्रदर्श्य च।
सम्भावनां ततः सच् चिदानन्द इति यज् जगुः॥२॥

जागरादिष्वनुगतेः प्रोच्य यस्य विशुद्धताम्।
गत्यन्तरस्याभावात् तु नेति नेतीति यत् पुनः॥३॥

अञ्जसा निर्दिदिक्षन्ति यस्य सर्वात्मतामपि।
प्रतिपाद्य प्रत्यगात्माभिन्नत्वमनुशासति॥४॥

स्वप्रकाशस्वतस्सिद्धाऽऽत्मरूपत्वाद् धि यत्र च।
नास्ति लौकिकमानानामपेक्षा तु मनागपि॥५॥

---

१. (क) चन्द्रमा वै पञ्चदशः। एष हि पञ्चदश्यामपक्षीयते। पञ्चदश्यामापूर्यते। इति
—आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदब्राह्मणे (१।५।१०।५),

(ख) अथो चन्द्रमा वै भान्तः पञ्चदशः स पञ्चदशाहान्यापूर्यते पञ्चदशाऽपक्षीयते। इति
—माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशतपथब्राह्मणे (८।३।२।८)।

तस्मिन्नद्धा निष्प्रपञ्चे प्रपञ्चोऽयं कथञ्चन।
भासतेऽनादिकं तत्र हिरण्याण्डं हि निर्बभौ ॥६॥

पञ्चभिस् तु महाभूतैर् युक्तलँ् लोकैस् त्रिभिस् तथा।
इदं स्थूलं शरीरं तु वैराजं यस्स्य स प्रभुः ॥७॥

वैश्श्वानरो विश्श्वरूपोऽन्तर्यामी पुरुषः स्वभूः।
हिरण्यगर्भो ब्रह्मेति चोक्तस् तस्य प्रशासिता ॥८॥

"एतमेके वदन्त्यग्निम् मनुमन्ये प्रजापतिम्।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्श्वतम्" ॥९॥

सौम्यप्राणोपासकत्वात् सौम्यप्राणात्मको हि यः।
वसिष्ठाख्य ऋषिस् तस्माज् जनिलँ् लेभे कथञ्चन ॥१०॥

यस्य त्वाध्यात्मिकं तत्त्वं निर्दिदिक्षन्त्यसौ श्रुतिः।
उर्वश्यां तु जनिं मैत्रावरुणाभ्यां प्रवक्ति च (ऋ.७।३३।११) ॥११॥

सोऽयं पुरातनो धाता वसिष्ठानां महानृषिः।
दशतय्याः सप्तमस्य द्रष्टा यो मण्डलस्य च ॥१२॥

शक्तिप्रभृतयो मन्त्रद्रष्टारो बहवः सुताः।
तस्य ख्याताः सप्तमादिमण्डलेषु हि तत्र च ॥१३॥

यो मित्रावरुणोऽस्माकं प्रवरर्षिर् वसिष्ठजः।
मन्त्रद्रष्टा न स्मृतः स कात्यायनश्रुतर्षिणा ॥१४॥

कुण्डिनोऽपि वसिष्ठस्य वंश्यो मन्त्रदृगेव च।
किन्तु तेन स्मृतो मन्त्रद्रष्टृत्वेन न सोऽपि च ॥१५॥

प्रवरर्षितया ह्येतौ सर्वैः कल्पविधायिभिः।
आश्वलायनमुख्यैश् च प्रवराध्यायिभिस् तथा ॥१६॥

कात्यायनादिभिः सर्वैः स्मृतौ पौराणिकैरपि।
लैङ्गे मात्स्ये वायवीये ब्रह्माण्डेऽपि च कीर्तितौ ॥१७॥

ऋषिभिर् मन्त्रकृद्भिर् हि प्रवरा विहिताः समैः।
प्रवरर्षितया चैतौ सर्वेषां सम्मताविति ॥१८॥

मन्त्रकृत्त्वं निश्चिनुम एतयोः सुदृढं वयम्।
कातीयार्षानुक्रमण्यां वाशब्दान् बहुशस् तु तान् ॥१९॥

रिक्ततामपि चैकत्रोपलभ्य तु सुविस्मिताः।
अनुमायाऽऽगमभ्रंशं सप्तमे मण्डलेऽथवा ॥२०॥

अष्टमादिषु कुत्राऽपि मन्त्रास् ताभ्यां प्रकाशिताः।
स्युरेवेति वयं मन्यामहे कात्यायनोऽपि च ॥२१॥

शौनको ब्राह्मणादुक्तेराकृतेरुपदेशतः।
ऋचां सङ्गृह्य चोन्नीय विकल्प्य च ऋषीन् यतः ॥२२॥

प्राहतुस् तन् न न भवेत् स्खलितं तु तयोरपि।
श्रुतर्ष्योरिति ह्यस्माकं मतिः शाखान्तरेऽथवा ॥२३॥

ताभ्यां प्रकाशिता मन्त्रास् स्युर् लुप्ता हन्त तेऽपि च।
इत्यागमानुगमने ह्याम्नाये च प्रमादिनः ॥२४॥

स्वगोत्रप्रवरर्षिभ्यां दृष्टस्यैव मनोरपि।
स्मृत्याऽऽम्नानेन वा प्रत्यभिज्ञानेन च वर्जितान् ॥२५॥

दक्षिणीयतमाँश् चाऽपि वसिष्ठान् कुण्डिनानिमान्।
उपलभ्य गतिं चित्रां लौकिकीं मन्महे वयम् ॥२६॥

वसिष्ठस्याऽरुन्धतीतोऽन्यस्यां पत्न्यां समुद्गतः।
मैत्रावरुणनामा य ऋषिस् तस्य सुतस्य च ॥२७॥

गण्यस्यर्षेः कुण्डिनस्य ख्याते वंशे समुद्गतः।
एतद्ब्रह्माण्डोदरस्थे भूर्लोकान्तर्गते शुभे ॥२८॥

जम्बूद्वीपे भारते च कुमारीखण्डके स्थिते।
हिमवत्खण्डमध्यस्थे नेपाल इति विश्रुते ॥२९॥

सुदेशेऽन्तर्गतेऽद्यत्वे त्रितुङ्गाचलमण्डिते।
शालग्रामशिलायोन्याः गण्डक्याः पूर्वतः स्थिते ॥३०॥

शुक्लया चैव माहेन्द्र्या पूते कर्मदयाऽपि च।
स्थिते गौरीगुरोरङ्के तत्पादैः सर्वतो वृते ॥३१॥

मुकुन्दसेनवंश्यैश् च महीपालैः सुपालिते।
ख्याते जनपदे चुँद्द्या नद्या उत्तरतः स्थिते ॥३२॥

ताम्रकूटाभिधे ग्रामे तपोवननिभे शुभे।
माष्य-षष्टिक्य-व्रैहे[illegible]-वाटीभिः परिशोभिते ॥३३॥

तैलीनमौद्गीनाभिश् च वाटीभिश् चाऽपि संयुते।
क्षेत्रैर् नदीमातृकैश् च शालेयैश् च समर्धिते ॥३४॥

वनैः पशव्यैर् यज्ञीयकाष्ठयुक्तैः समन्ततः।
परिक्षिप्ते सौमनस्ययुक्तैर् नानाविधैर् जनैः ॥३५॥

समाकीर्णे वसन् सम्यग् राज्ञा लोकैश् च पूजितः।
सूर्योपाध्यायनामाऽभूत् स्वाध्यायी भूसुरोत्तमः ॥३६॥

सुनन्दनस् तस्य पुत्रस् तस्य चेन्द्रमणिः सुतः।
तस्य विष्णुहरिः सूनुर् मणिकण्ठस् तु तत्सुतः ॥३७॥

स्थानेश्श्वरस् तस्स्य पुत्रस् तस्यर्षीश्वर आत्मजः।
बालानन्दस् तस्य सुतस् तस्य चाऽऽग्नीश्वरः सुतः ॥३८॥

तस्य पुत्रस् समुद्भूतश् चिरजीवी बहुष्वपि।
अग्ग्रजेषु जातमात्रगतेष्विति श्रुतादिभिः ॥३९॥

लोकोत्तरैर् गुणौघैश् च युक्त इत्यभिवीक्षितः।
आश्चर्ययुक्तैर् विद्वद्भिर् महर्षिः शापचोदितः ॥४०॥

कश्चिद् भुवं समायात इति चाऽऽतर्कितो मुदा।
पित्राऽयं तु चिरं जीव्यादिति गोर्वरतोलितः ॥४१॥

जोखुरित्यभिधां प्राप्तो भूमिदानेन मानितः।
राज्ञा हरकुमारेण सेनवंश्येन तत्कृतम् ॥४२॥

अनुपाल्य नृपैः साहिवंश्यैश् च प्रतिपालितः।
श्रीकृष्णाख्योऽक्लिष्टकर्माऽध्यात्मविद्याधुरन्धरः ॥४३॥

षट्कर्मा कर्मयोगी च षड्भिः पुत्रैः समावृतः।
सद्गार्हस्थ्य-सुकृत्याभ्यां यो निदर्शनतामितः ॥४४॥

यश् च नप्तारमध्याप्य भानुं रामकथागुरुम्।
नैपालकजनस्तुत्यां परमाचार्यतां गतः ॥४५॥

यदीयोऽयं चाऽनुवंश्यामाचार्यपदवीं दधत्।
बहुशाखो विद्वदाढ्योऽन्ववायोऽभिविराजते ॥४६॥

पुत्रा धनञ्जयस् तस्य काशीनाथश् च शेखरः।
तुलसीरामको गङ्गादत्तश् चेन्द्रविलासकः ॥४७॥

धनञ्जयसुतो भानुभक्तो भाषाकविर् महान्।
विश्रुतो राष्ट्रमान्योऽभूद् ग्रन्थै रामायणादिभिः ॥४८॥

शेखरो नाम वै पद्मनाभोऽभूद् गृह्यकर्मवित्।
षडग्नेर् गृहिणो दीप्रस् तृतीयोऽग्निरिवोज्ज्वलः ॥४९॥

तस्य पुत्रो देवदत्तः कनीयान् गणकोत्तमः।
यो विनिन्ये सुतान् शास्त्रे ज्येष्ठं तत्र विशेषतः ॥५०॥

ज्येष्ठः स विश्वनाथाख्यः काशिक्यां बालशास्त्रिणः।
सुशिष्याद् दिननाथाख्यादधीत्य श्रुतविस्तरम् ॥५१॥

उपलेभे यो द्वितीयो बालशास्त्रीत्यमानि च।
लोकनाथो देवदत्ततनयो मध्यमाग्रियः ॥५२॥

ज्योतिषे राजकार्ये च निपुणः सुकृतप्रियः।
उत्सृज्य पुत्राँस् त्रीन् बालान् पुत्रीमेकां सतीं जनीम् ॥५३॥

सूर्योपरागे गङ्गायां स्नात्वा कृत्वा विसूचिकाम्।
निमित्तं देहमुत्सृज्य वाराणस्यां व्यमुच्यत ॥५४॥

तत् पुण्य-पुञ्ज-पुष्टाऽपि क्षामा मूर्त्या धनेन च।
धृत्या चेशावलम्बेन सोत्साहा नियमिन्यपि ॥५५॥

नारिकेलसमाकारा धर्मप्राणा मनस्विनी।
यशोदाक्ख्या तस्य पत्नी कृच्छ्राद् बालान् बभार सा ॥५६॥

तत्र ज्येष्ठ उमानाथो मेधावी वाक्पटुर् गुणी।
ज्येष्ठात् पितृव्यात् प्रतिभोन्मेषं प्राप्य ततो गुरून् ॥५७॥

उपास्य टेकनाथादीन् प्रज्ञोत्कर्षमवाप ह।
स शास्त्रज्ञोऽलौकिकधीः कुम्भीधान्यो दृढव्रतः ॥५८॥

वेदादिसंहिताः सर्वाः सम्यगालोड्ड्य यत्नतः।
ताभ्यः सारं समुद्धृत्य प्राकार्षीच् शास्त्रकाव्यकम् ॥५९॥

गोपीनाथो मध्यमस् तु मातुः कष्टं विलोकितुम्।
अशक्तस् तल् लघूकर्तुमिव बाल्ये तनुं जहौ ॥६०॥

कन्यसः सुगृहीताख्यो नरनाथः कुशाग्रधीः।
बाल्येऽग्रजादुमानाथाल् लिपिं जग्राह लीलया ॥६१॥

ज्येष्ठात् पितृव्यादमरकोषं सर्वमधीत्य च।
कण्ठस्थमेव तङ् कृत्वा व्याकृतिञ् चाऽपि किञ्चन ॥६२॥

अधीत्याऽथो कान्तिपुरीङ् गत्वा स्थित्वा समाद्वये।
स्वाग्रजान् मोदनाथाच् च टेकनाथाच् च व्याकृतिम् ॥६३॥

अधीत्य कालिदासाच् च देवीदत्ताच् च काव्यकम्।
वैद्यकाध्ययनप्रेष्यमाणाग्रजनिवेदनात् ॥६४॥

प्राप्य राज्ञः पाकशालामपि रुग्णो गृहयूँ ययौ।
तत्रैव ज्येष्ठात् पितृव्यादवशिष्टान् तु व्याकृतिम् ॥६५॥

अधीत्य पूर्णवूँ विदधेऽध्ययनवूँ व्याकृतेस् तु सः।
मनोहराच् चाऽधिजगे कान्तिपुर्यां हि ज्योतिषम् ॥६६॥

पश्चादधीत्याऽऽयुर्वेदम् पुरुषार्थस्य साधनम्।
शरीरं स्वस्य चाऽन्येषां रक्षन् कीर्तिं समार्जयत् ॥६७॥

पित्रोः पुण्यात् पितृव्याणामनुक्रोशाच् च रक्षणात्।
अनुग्रहादग्रजस्येश्वरलीलावशादपि ॥६८॥

अदृष्टवानपि पितुर् मुखमात्रमपि ह्ययम्।
पौरुषस्याऽनुगन् दिष्टमिति प्रख्यापयञ् जने ॥६९॥

विद्यया च कृतित्वेन सुकृतेन धनेन च।
प्रज्ञया यशसा चाऽपि सुसमृद्धो व्यराजत ॥७०॥

आत्मजा अत्र भवतो जाताः षट् चिरजीविनः।
तेष्वाद्योऽहं शिवस् तातपादादेव च लब्धवान् ॥७१॥

शक्तिं च प्रतिभोन्मेषं श्रुतं चाऽपि समासतः।
अध्यापकेभ्योऽन्येभ्यश् च शासकाधीनतामपि ॥७२॥

गतेभ्योऽधीत्य स्वप्रज्ञाबलाद् दिग्दर्शनं ततः।
लब्ध्वा विद्याविवृद्ध्यर्थं प्रयते च यथामति ॥७३॥

"अकृत्वा परसन्तापमगत्वा खलनम्रताम्।
अनुत्सृज्य सतां वर्त्म यदल्पमपि तद् बहु ॥७४॥

यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः।
नाऽलमेकस्य तृप्त्यर्थमिति पश्यन् न मुह्यति ॥७५॥

सहस्रिणोऽपि जीवन्ति जीवन्ति शतिनस्तथा।
धृतराष्ट्र विमुञ्चेच्छां न कथञ्चिन् न जीव्यते ॥७६॥

सर्वासामेव वृत्तीनां वृत्ती राजकुलाश्रया।
अधर्मबहुला ह्येषा नित्योद्वेगा च भारत ॥७७॥

अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः।
या वृत्तिस् तां समास्थाय विप्रो जीवेदनापदि ॥७८॥

न लोकवृत्तं वर्तेत वृत्तिहेतोः कथञ्चन।
अजिह्मामशठां शुद्धां जीवेद् ब्राह्मणजीविकाम् ॥७९॥

सर्वान् परित्यजेदर्थान् स्वाद्ध्यायस्स्य विरोधिनः।
यथा तथाऽध्यापयँस् तु सा ह्यस्य कृतकृत्यता ॥८०॥

वयसः कर्मणोऽर्थस्य श्रुतस्याऽभिजनस्य च।
वेषवाग्बुद्धिसारूप्यमाचरन् विचरेदिह ॥८१॥

विद्याचारित्रगोत्राणां रक्षणाय कुलस्य च।
जायेयेति हि जायायां सिञ्चेद् रेतो यथाविधि ॥८२॥

आत्मार्थं पाचनं यस्य रत्यर्थं यस्य मैथुनम्।
वृत्त्यर्थं यस्य चाऽधीतं निरर्थं तस्य जीवितम् ॥८३॥

वृथाकृशरसंयावपायसापूपशष्कुलीः।
वृथामांसं च नाऽश्नीयात् प्राणात्ययभयं विना ॥८४॥

कुर्यात् सायम्प्रातरेव भोजनं नाऽतितृप्तिदम्।
नाऽन्तराऽन्नं समश्नीयादन्यत्र फलमूलतः ॥८५॥

कणं कदा चित् खादामि पिण्याकमपि च ग्रसे।
भक्क्षये शालिमांसानि भक्ष्याँश् चोच्चावचान् पुनः ॥८६॥

शये कदा चित् पर्यङ्के भूमावपि पुनः शये।
प्रासादेऽपि च मे शय्या कदा चिदुपपद्यते ॥८७॥

धारयामि च चीराणि शाणक्षौमाजिनानि च।
महार्हाणि च वासांसि धारयाम्यहमेकदा ॥८८॥

न सन्निपतितं धर्म्यमुपभोगं यदृच्छया।
प्रत्याचक्षे न चाऽप्येनमनुरुध्ये सुदुर्लभम् ॥८९॥

अनागतानां भोगानामवाञ्छनमकृत्रिमम्।
आगतानां च सम्भोग इति पण्डितलक्ष्मणम्॥९०॥

त्रिवर्गं नाऽतिकृच्छ्रेण भजेत गृहमेध्यपि।
यथादेशं यथाकालं यावद्दैवोपपादितम्॥९१॥

अर्जितं स्वेन वीर्येण नाऽप्यपाश्रित्य कञ्चन।
फलशाकमपि श्रेयो भोक्तुं ह्यकृपणं गृहे॥९२॥

ब्राह्म्मणस्य तु मुक्ख्योऽयं दमो धर्मः पुरातनः।
स्वाद्ध्यायाब्भ्यसनञ् चैव तत्र कर्म समाप्ष्यते॥९३॥

तञ् चेद् वित्तमुपागच्छेद् वर्तमानं स्वकर्मणि।
अकुर्वाणव्ँ विकर्माणि शान्तम् प्रज्ञानतर्पितम्॥९४॥

कुर्वीताऽपत्त्यसन्तानमथो दद्द्याद् यजेत च।
संविभज्ज्य च भोक्तव्यन् धनं सद्भिरितीर्यते॥९५॥

परिनिष्ठितकार्यस् तु स्वाद्ध्यायेनैव ब्राह्मणः।
कुर्यादन्न्यन् न वा कुर्यान् मैत्त्रो ब्राह्म्मण उच्यते॥९६॥

यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः।
आत्मज्ञाने शमे च स्याद् वेदाब्भ्यासे च यत्नवान्॥९७॥

एतद् धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः।
प्राप्यैतत् कृतकृत्यो हि द्विजो भवति नाऽन्यथा॥९८॥

नौषधानि न मन्त्राश् च न होमा न पुनर् जपाः।
त्रायन्ते मृत्युनोपेतं जरया वाऽपि मानवम्॥९९॥

नाऽभिनन्देत मरणं नाऽभिनन्देत जीवितम्।
कालमेव प्रतीक्ष्येत न्याय्यचेष्टापरायणः॥१००॥

सर्वसाम्यमनायासं सत्यवाक्यं च भारत।
निर्वेदश् चाऽविधित्सा च यस्य स्यात् स सुखी नरः॥१०१॥

मृत्योर् वा मुखमेतद् वै या ग्रामे वसतो रतिः।
देवानामेष वै गोष्ठो यदरण्ण्यमिति श्रुतिः॥१०२॥

सर्वलोकहितं कुर्यान् नाऽहितं कस्य चिद् द्विजः।
मैत्रं समस्तसत्त्वेषु ब्राह्मणस्योत्तमं धनम्॥१०३॥

ब्राह्मणः समदृक् शान्तो दीनानां समुपेक्षकः।
स्रवते ब्रह्म तस्याऽपि भिन्नभाण्डात् पयो यथा" ॥१०४॥

इत्यादिकानि शास्त्राणां भणितानि यथाबलम्।
अनुसर्तुं दृढतया यतमानः सदैव हि॥१०५॥

निष्काल्ल्य दास्स्यभावं हि ब्राह्मण्यस्स्य विलोपनम्।
हृदः स्वीकृत्य वृत्तिं हि पूजावेतनरूपिकाम्॥१०६॥

अधिकार्थोपार्जनाय कर्म कर्तुं क्षमोऽपि च।
ब्राह्मण्येन श्रुतेर् भक्त्या चाऽपि तस्मात् पराङ्मुखः॥१०७॥

यथातथालोकयात्रासिद्धिसन्तुष्टमानसः।
सुतीव्रां वेदवेदाङ्गशास्त्रभक्तिं समाश्रितः॥१०८॥

नैपालभाषाऽऽदिकविभानुना ख्यापिते शुभे।
त्रिशुक्लविप्रश्रीकृष्णाचार्यवंशे समुद्गतः॥१०९॥

नारनाथिश् च गाङ्गेयो मतिसारगरशिष्यकः।
माध्यन्दिनीयकाचार्यो वार्तावृत्तिगृहस्थकः॥११०॥

कौण्डिन्न्यायनशिक्षादिग्रन्थानां रचनादिह।
भूमण्डले वैदिकादिविद्वद्भिः संस्तुतोऽपि च॥१११॥

पूषदत्तो भनाम्ना हि लगधोक्त्यनुसारिणा।
शिवाभिधोऽहमकृषि व्याख्यानमिदमादरात्॥११२॥

वैदिकानामलङ्घ्यस्य वेदाङ्गज्योतिषस्य हि।
दृष्ट्वा व्याख्याः कृताः पूर्वैरपूर्णा अस्फुटा अपि॥११३॥

नानाशाखावेदमन्त्रसंहिता ब्राह्मणानि च।
कल्पसूत्राणि स्मृतीश् च पौराणीः संहिता अपि॥११४॥

धर्मशास्त्रनिबन्धाँश् च यथालाभं विलोक्य च।
प्रयत्नेन कृता ह्येषा व्याख्या स्याद् विदुषां मुदे॥११५॥

प्रविष्टे खर्षिखशरैः (५०७०) संसूच्ये वत्सराह्वये।
कृष्णस्वर्गारोहणतो गणिते तु युगाब्दके॥११६॥

भूताकाशखनेत्रैश् च (२००५) संसूच्ये क्रैस्तवत्सरे।
मधौ तु मासि व्याख्यानमेतत् खलु सुविस्तृतम्॥११७॥

सुपुष्टं वेदवेदाङ्गस्मृत्यादिवचनैः स्फुटम्।
परमात्मप्रसादेन पूर्णतामञ्जसाऽगमत् ॥११८॥

यज्ञर्तुनिर्मलीभावदर्शनक्षमतामिह।
ददतीयं नवा व्याख्या वेदलोचनवर्तिका ॥११९॥

प्रसन्नचक्षुः प्राप्यैतां व्याख्यां वेदः प्रसीदतु।
प्रसन्नः सन् स कुरुताच् श्रेयो वेदानुयायिनाम् ॥१२०॥

वेदो लोके परं ज्योतिः श्रेयोमार्गप्रदर्शने।
प्रसादने चक्षुषोऽस्य यत्नोऽस्माभिरयं कृतः ॥१२१॥

प्रसन्नचक्षुर् वेदोऽयं वेदभक्तियुताय च।
जनाय देयाच् चक्षुश् च वेदात्मालोकनक्षमम् ॥१२२॥

बलवन्नास्तिकाऽपास्ता वेदाङ्गज्योतिषस्मृतिः।
या तदुद्धारजं पुण्यं भूयाज् ज्ञानान्तरायहृत् ॥१२३॥

आर्यावर्त पुस्तकालय

योऽसावात्मा जगतस् तस्थुषश् च
स सूर्यगः पूरुषः स्वर्णवर्णः।
उपासितश् चैतया व्याख्यया च
प्रकाशतामात्मनैक्यं गतश् च ॥१२४॥

इति श्रीगुरुमुखोच्चारणानूच्चारणरूपाद्ध्ययन-समवाप्त-स्वशाखारूपाऽऽदित्यसम्प्रदायाऽऽगत-माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखा-मन्त्रब्रह्मयज्ञसंहिता-ब्राह्मण-कल्पसूत्रेण श्रुतिस्मृतिपुराण-पारायणपरायणेनाऽवलोकित-नानाधर्मशास्त्रनिबन्धेन काव्यप्रकाशव्याख्या-वेदभाषानिघण्टु-कौण्डिन्न्यायनशिक्षा-वैदिकमन्त्रसङ्ग्रह-पाणिनीयशिक्षाव्याख्या-नारदीयशिक्षाव्याख्या-ब्रह्ममीमांसासूत्रकौण्डिन्न्यायनवृत्ति-ब्रह्मयज्ञपद्धति-प्रभृत्यनेकग्रन्थकारेण हिमवत्-खण्डान्तर्गत-गण्डकी-प्रदेशाभिजनेन काष्ठमण्डपनगरनिवासिना कान्यकुब्जोच्चकुलीनविद्याधुरीण-ब्राह्मणवर्यश्रीकृष्णाचार्यवंशजेन कौण्डिन्न्यायनेनाऽऽचार्येण वासिष्ठ-मैत्रावरुण-कौण्डिन्न्येति-त्रिप्रवरेण शिवराजशर्मणा द्विजोत्तमेन कृतं लगधमुनिप्रोक्त-

वेदाङ्गज्योतिषव्याख्यानं समाप्तम्॥

❁